
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

क्र. द. ६

२८

शारीरभाष्य- रत्नप्रभाटीका

॥रामानंद्याः प्रथमाध्यायस्य प्रारंभः॥

Acc. No. ~~251~~ M·1565
Title - रत्नप्रभाटीका· (on शारीरभाष्य)
~~Author~~ - गोविन्दानंद
Date - ?
Subject - वेदान्त·
folio - ~~[illegible]~~ 259
Xerox - 520

गौरीभाष्य

=श्रीमत्पूज्यश्रीकाशीश्रीकामाक्षीदत्तपादयुगं वन्दे रपि सत्तं प्राप्य संपूर्णप्रकाशं [illegible] मन्त्रं तेना
लिपूज्यैः श्रीशिवरामयोगीन्द्रैः शिवरामाख्यैः [illegible] श्रीगौरीनायकयोः [illegible] प्रकटनेति [illegible]
[illegible] श्रीमद्गोपालगीर्भिः गोपालसरस्वती [illegible]॥ ५

॥श्रीमन्महागणाधिपतये नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ ॥यमिह करुणिकं शरणं गतो
व्यदिशत्सोदर आपमहत्पदं। तमहमाशु हरिं परमाश्रये जनककं [illegible] मनन्तसुखाकृतिं॥१॥ श्रीगौर्या सह
[illegible] निजपदाम्भोजे नमुक्तिप्रदं प्रौढं विघ्नवनं हरं तमनघं श्रीधुंडितुंडासिना। वंदे चर्मकपालिकोप
करणौ वैराग्यसौख्यात्परं नास्तीति प्रादिशं तमंतविधुरं श्रीकाशिकेशं शिवं॥२॥ यत्कृपालवमात्रेण मू
को भवति पंडितः। वेदशास्त्रशरीरां तां वाणीं वीणाकरां भजे॥३॥ कामाक्षीदत्तदुग्धप्रचुरसुरनुतम्
[illegible] श्रीगौरीनायकाभिप्रकटनशिवरामार्यलब्धात्मबोधैः। श्रीमद्गोपालगीर्भिः प्रबुद्ध
तपरमाद्वैततत्त्वालोऽस्मि तास्य श्रीमद्गोविन्दपाणौ चरणकमलगो निर्वृतोहं पाथ्यालिः॥४॥ श्रीशंकरं भग
वत्कृतं प्रणम्य व्यासं हरिं सूत्रकृतं च वच्मि। श्रीभाष्यतीर्थपरहंसतुष्ट्यै वा [illegible] बंधाधि दमभ्युपायं॥५॥ श्रीमच्छारी
[illegible] विस्तृतग्रंथवीक्षायामलसं यस्य मानसं। व्याख्यातदर्थमारब्धा भाष्यरत्नप्रभाभिधा॥६॥ श्रीमच्छारी
रकभाष्यं प्राप्य वाक्यसिद्धिमाप्नुयात्। इति श्रमो मे सफलो गांगारथ्योदकं यथा॥७॥ यदज्ञानसमुद्भूतमिं
द्रजालमिदं जगत्। सत्सुखानंतं तमहं ब्रह्म निर्भयं॥८॥ इह खलु स्वाध्यायोऽध्येतव्य इति नित्या
ध्ययनविधिनाऽधीतसांगस्वाध्यायेतद्विजिज्ञासस्य सोऽन्वेष्टव्यः स विजिज्ञासितव्यः आत्मा वा अरे
द्रष्टव्यः श्रोतव्य इति श्रवणविधिरुपलभ्यते। तस्यार्थः अमृतत्वकामेनाद्वैतात्मविचारः वेदांतवा
क्यैः कर्तव्य इति तेन काम्येन नियमविधिना अर्थाद्विचारात्मकशास्त्रप्रवृत्तिः। वैदिकानां पुराणादिभाषा
न्यं वा निरस्यते इति वस्तुगतिः। तत्र कश्चिदिह जन्मनि जन्मांतरे वानुष्ठितपरमादिति [illegible] तज्जिज्ञासुरुपल
[illegible]

[illegible]तान् भगवान् बादरायणस्तदनुबंधचतुष्टयं श्रवणात्मकस्य शास्त्रारंभप्रयोजकं न्यायेन निर्णेतुमिदं सूत्रं रच
यांचकार। अथातो ब्रह्मजिज्ञासेति। नन्वनुबंधजातं विधिसन्निहितार्थवादवाक्यैरेव ज्ञातुं शक्यं। तथाहि। त
द्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुत्या यत्कृतकं तदनित्यमिति न्या
यवत्या न जायते म्रियते वा विपश्चिद्यो वै भूमा तदमृतमतोन्यदार्तं इत्यादिश्रुत्या च भूमात्मा नित्यः ततो
न्यदनित्यमिति नित्यानित्यविवेको लभ्यते। कर्मणा कृष्यादिना चितः संपादितः सस्यादिर्लौकिको भोग्य इत्यर्थः। वि
पश्चित् नित्यज्ञानस्वरूपः। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। आ
त्मनस्तु कामाय सर्वं प्रियं भवति इत्यादिश्रुत्या ऽनात्मपात्रे वैराग्यं लभ्यते। परीक्ष्य अनित्यत्वेन नि
श्चित्य अकृतो मोक्षः कृतेन कर्मणा नास्तीति कर्मतत्फलेभ्यो वैराग्यं प्राप्नुयादित्यर्थः। शांतो दांत उप
रतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुत्या [illegible] शमादिषट्कं लभ्यते।
समाहितो भूत्वेति काण्वः पाठः। उपरतिः संन्यासः न स पुनरावर्तत इति स्वयंज्योतिरानंदात्मकमो
क्षस्य नित्यत्वश्रुत्या मुमुक्षा लभ्यते। तथा च विवेकादिविशेषणवान् अधिकारीति ज्ञातुं शक्यं।
यथा य एता रात्रीरुपयंतीति रात्रिसत्रविधौ प्रतितिष्ठंतीत्यर्थवादस्य प्रतिष्ठाकामस्तद्वत् तथा
श्रोतव्य इत्यत्र तव्यप्रत्ययार्थस्य नियोगस्य प्रकृत्यर्थो विचारो विषयः विचारस्य वेदांतविषयः
लिसाक्षात्कर्तुं आत्मा द्रष्टव्य इति अद्वैतात्मदर्शनमुद्दिश्य श्रोतव्य इति विचारविधानात् नहि
विचारः साक्षाद्दर्शनहेतुः अप्रमाणत्वात् अपितु प्रमाणविषयत्वेन। प्रमाणं चाद्वैतात्मनि वेदां
ता एव तं त्वौपनिषदं पुरुषं वेदांतविज्ञानसुनिश्चितार्था इति श्रुतेः वेदांतानां च प्रत्यक्ब्रह्मैक्य

ब्र.सू.टी.टी.

२

वि०

प्रस्.५

विषयः। तत्त्वमस्यहं ब्रह्मास्मीति श्रुतेः। एवं विचारस्य फलमपि ज्ञानद्वारा मुक्तिः। तरति शोकमात्मवित् ब्रह्म
वेद ब्रह्मैव भवतीति श्रुतेः। तथा संबन्धोऽप्यधिकारिणा विचारस्य कर्तव्यतारूपः फलस्य प्राप्यता
रूप इति यथायोगं बोध्यः। तस्मादिदं सूत्रं व्यर्थमिति चेन्न तासामधिकार्यादिश्रुतीनां स्वार्थता
त्पर्यनिर्णायकन्यायसूत्राभावे किं विवेकादिविशेषणवानधिकारी उतान्यः। किं वेदान्ताः पूर्वतन्त्रे
णागतार्था आगतार्था वा। किं ब्रह्म लौकिकमन्यद्वा। किं मुक्तिः स्वर्गादिवत् लोकान्तरं आत्मस्वरूपा वा
इति संशयानिवृत्तेः। तस्मादागमवाक्यैरापाततः प्रतिपन्नाधिकार्यादिनिर्णयार्थमिदं सूत्रमा
वश्यकं। तदुक्तं प्रकाशात्मचरणैः अधिकार्यादीनामागमिकत्वेऽपि न्यायेन निर्णयार्थमिदं सूत्र
मिति। येषां मते श्रवणे विधिर्नास्ति तेषामविहितश्रवणेऽधिकार्यादिनिर्णयानपेक्षणात् सूत्रं व्य
र्थमित्यापततीत्यलं प्रसंगेन। तथाच अस्य सूत्रस्य श्रवणविध्यपेक्षिताधिकार्यादिश्रुतिविवे
कार्थत्वात् तद्धेतुहेतुमद्भावः श्रुतिसंगतिः। शास्त्रारंभहेत्वनुबन्धनिर्णायकत्वेन
र्थनिर्णयायोपयोगित्वात् तद्धेतुहेतुमद्भावः श्रुतिसंगतिः। समन्वयाध्यायसं
उपोद्घातत्वात् शास्त्रादौ संगतिः। अधिकार्यादिश्रुतीनां स्वार्थे समन्वयोक्तेः समन्वयाध्यायसं
गतिः। एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमस्यादिश्रुतीनां सर्वात्मत्वादिस्पष्टब्रह्मलिं
गानां विषयादौ समन्वयोक्तेः पादसंगतिः। एवं सर्वसूत्राणां श्रुत्यर्थनिर्णायकत्वात् श्रुतिसंगतिः
तत्तदध्याये तत्तत्पादे च समानप्रमेयत्वेन संगतिरूहनीया। प्रमेयं च कृत्स्नशास्त्रस्य ब्रह्म भाष्या
यानां समन्वयाविरोधसाधनफलानि। तत्र प्रथमपादस्य स्पष्टब्रह्मलिंगानां श्रुतीनां समन्व
यः। द्वितीयतृतीययोरस्पष्टब्रह्मलिंगानां ... र्थपादस्य पदमात्रे समन्वय इति भेदः। अस्य

4

चिकरणस्य प्रारम्भान्नाधिक[illegible] धिकरणमारभ्य[illegible] करणे। नेत्यादिपेच्य

कं लेयमिति। तदुक्तमधिकरणरत्नमालायां विचार्यो न। एको विषयसंदेहपूर्वपक्षावभासकः। शब्दोऽपर

स्तु सिद्धांतवादी संगतयः स्फुटा इति। श्रोतव्य इति विहितश्रवणात्मकं वेदांतमीमांसाशास्त्रं विषयः। तत्किमा

रब्धव्यं न वेति विषयप्रयोजनसंभवासंभवाभ्यां संशयः। तत्र नाहं ब्रह्मेति भेदग्राहि प्रत्यक्षेण कर्तृत्वाक

व१ र्तृत्वादिविरुद्धधर्मवत्त्वलिंगकानुमानेन चाविरोधेन ब्रह्मात्मनोरैक्यस्य विषयस्यासंभवात्। सत्त्वेऽप्यस्य ज्ञा

नान्निवृत्तिरूपफलासंभवाच्च नारंभणीयमिति प्राप्ते [illegible] सिद्धांतः अथातो ब्रह्मजिज्ञासेति। तत्र श्रवण

विधित्समानार्थलोपः कर्तव्येति पदमध्याहर्तव्यं। अध्याहृतं च प्रमाणवता ब्रह्मजिज्ञासा कर्तव्येति। तत्र प

वृत्ति प्रत्ययार्थयोर्लीनधर्मयोः कर्तव्यत्वान्वयात् प्रयत्नसाफल्यीभूतं ज्ञानमत्र लक्षणयोच्यते। प्रत्ययेन र

च्छाला [illegible] विचारो लक्षणया। तथा च ब्रह्मज्ञानाय विचारः कर्तव्य इति सूत्रस्य श्रौतोऽर्थः संपद्यते। तत्र

ज्ञानस्य स्वतः फलत्वायोगात् प्रमातृत्वकर्तृत्वभोक्तृत्वात्मकानर्थनिवर्तकत्वे[illegible] नैव फलसंबन्ध्यं त

त्रानर्थस्य सत्यत्वे ज्ञानमात्रान्निवृत्त्ययोगादध्यस्तत्वं वक्तव्यमिति बन्धस्याध्यस्तत्वमर्थात्सूचितं॥ तच्च

शास्त्रस्य विषयप्रयोजनवत्त्वसिद्धिहेतुः तथा हि शास्त्रमारब्धव्यं विषयप्रयोजनवत्त्वात् भोजनादिवत्

शास्त्रं प्रयोजनवत् बंधनिवर्तकज्ञानहेतुत्वात् रज्जुरियमित्यादिवाक्यवत् बंधो ज्ञाननिवर्त्यः अध्य

स्तत्वात् रज्जुसर्पवत् इति प्रयोजनसिद्धिः एवमेवाध्यस्त[illegible] ज्ञानाज्जीवगतानर्थभ्रमनिवृत्तिफलं सू

चयन् जीवब्रह्मणोरैक्यं विषयमप्यर्थात्सूचयति अन्यज्ञानादन्यत्र भ्रमानिवृत्तेः जीवो ब्रह्माभि

न्नः तज्ज्ञाननिवर्त्याध्यासाश्रय[illegible]त्वात्। यदि स्यं तन्न यथा शुक्त्यभिन्न इदमंश इति विषयसिद्धि

पथा१

हेतुरध्यास इत्येवं विषयप्रयोजनवत्त्वाच्छास्त्रमारंभणीयमिति। अत्र पूर्वपक्षे बंधस्य सत्यत्वेन ज्ञानाद
निवर्त्यरूपायांतरसाध्या मुक्तिरिति फलं। सिद्धांते ज्ञानादेव मुक्तिरिति विवेक इति सर्वं मनसि निधाय ब्रह्मसू
त्राणि व्याख्यातुकामो भगवान् भाष्यकारः सूत्रेण विचारकर्तव्यतारूपश्रौतार्थान्यथानुपपत्त्या
अर्थात्सूत्रितं विषयप्रयोजनवत्त्वमुपोद्घातत्वात्तत्सिद्धिहेत्वध्यासाक्षेपसमाधानभाष्याभ्यां प्रथमं
वर्णयति युष्मदस्मत्प्रत्ययगोचरयोरिति एतेन सूत्रार्थास्पर्शित्वादध्यासग्रंथो न भाष्यमिति निरस्तं
लो १ आर्थिकार्थस्पर्शित्वात् यत्तु मंगलाचरणाभावादव्याख्येयमिदं भाष्यमिति तन्न सुतरामितरेतरभावा
नुपपत्तिरित्यंतभाष्यरचनार्थं तदर्थस्य सर्वोपप्लवरहितस्य विज्ञानघनप्रत्यगर्थस्य तत्त्वस्य स्मृत
त्वात्। अतो निर्दोषत्वादिदं भाष्यं व्याख्येयं लोके शुक्ताविदं रजतमिति भ्रमः सत्यरजते इदं रजतमि
त्यधिष्ठानसामान्यारोप्यविशेषयोरैक्यप्रमाहितसंस्कारजन्यो दृष्ट इति अत्राप्यात्मन्यनात्माहं
काराध्यासे पूर्वप्रमा वाच्या। सा चात्मानात्मनोर्वास्तवैक्यमपेक्षते न हि तदस्ति तथाहि। आत्मा
नात्मनोर्वैक्यमन्योन्यपरस्परैक्यायोग्यत्वात् तमःप्रकाशवदिति मत्वा हेतुभूतं विरोधं वदन्नतः प्र
तीतितो व्यवहारतश्च साधयति युष्मदस्मत्प्रत्ययगोचरयोरिति न च प्रत्ययोत्तरपदयोश्चेति सूत्रेण
प्रत्यये चोत्तरपदे च परतो युष्मदस्मदोर्मपर्यंतस्य त्वमादेशौ स्त इति विधानात् त्वदीयं [illegible]नाधिका
स्त्वे मदीयं त्वत्पुत्रो मत्पुत्र इतिवत् त्वन्मत्प्रत्ययगोचरयोरिति स्यादिति वाच्यं समासैकवचनइ
त्येकवचनाधिकारात् अत्र च युष्मदस्मदोरेकार्थवाचित्वाभावात् अनात्मनां युष्मदर्थानां बहुत्वाद

दस्म

स्मदर्थे चैतन्यस्यात्मादिरुपाधितो बहुत्वात्। न चैवं सति कथमत्र परामर्शो विशेषतः। न च यूयमिति प्रत्ययो युष्मत्प्रत्य
यः वयमिति प्रत्ययोऽस्मत्प्रत्ययस्तद्गोचरयोरिति विग्रह इति वाच्यं। शब्दसाधुत्वेऽर्थसाधुत्वात्। न हि
अहंकारघनात्मनो यूयमिति प्रत्ययविषयत्वमस्तीति चेन्न गोचरपदस्य योग्यतापरत्वात्। चिदात्मा तावद्
अस्मत्प्रत्यययोग्यः तत्त्वमस्यादिवाक्येषु अहंकारादिनिवृत्तिपूर्वकस्फुरणात् न तावदयमहंकारेण विषयः अस्मत्प्रत्ययवि
षयत्वादिति भाष्योक्तेश्च। यद्यप्यहंकारादिरपि तद्योग्यस्तथापि चिदात्मनः सकाशादत्यन्तभेदसिद्ध्यर्थं
युष्मत्प्रत्यययोग्य इत्युच्यते। आचार्यश्रीचरणास्तु टीकायोजनायामेवमाहुः संबोध्यचेतनो युष्मत्सद्वा
च्यः अहंकारादिविशिष्टचेतनोऽस्मत्सद्वाच्यः। तथा च युष्मदस्मदोः स्वार्थे प्रयुज्यमानयोरेव सर्वादेश
नियमो न लाक्षणिकयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावाविति सूत्रात् संगतस्य प्रसंगात्। तथा च
त्र शब्दलक्षकयोर्विवक्षितमात्रजडमात्रलक्षकयोरपि न त्वमादेशः लक्षकत्वाविशेषादिति यदि तयोः
शब्दबोधकत्वे सत्येव त्वमादेशाभाव इत्यनेन सूत्रेण ज्ञापितं तदास्मिन्भाष्ये युष्मत्पदेन युष्मच्छब्द
जन्यप्रत्यययोग्यः परागर्थो लक्ष्यते अस्मच्छब्देनास्मच्छब्दजन्यप्रत्यययोग्यः प्रत्यगात्मा। तथा च
लक्ष्यतावच्छेदकतया शब्दोऽपि बोध्यत इति न त्वमादेशः। न च यच्छक्यप्रसक्तयोरेव लक्ष्यतावच्छेदकत्वं
न शब्दयोग्यत्वं तस्य गौरवादिति वाच्यं। पराक्प्रतीचोर्विरोधस्फुरणार्थं विरुद्धशब्दयोग्यत्वस्यापि
वक्तव्यत्वात्। अत एवेदमस्मत्प्रत्ययगोचरयोरिति वक्तव्येऽपीदंशब्दोऽस्मदर्थे लोके वेदे च बहुशः इमे
वयमास्महे इमे विदेहा अयमहमस्मीति च प्रयोगदर्शनात् नास्मच्छब्दविरोधीति मत्वा युष्मच्छब्दः
प्रयुक्तः इदंशब्दप्रयोगे विरोधास्फूर्तेः। एतेन चेतनवाचित्वादस्मच्छब्दः पूर्वं प्रयोक्तव्यः। अभ्यर्हितं पू

= पंच
पा०

ता

भा.टी.टा.

पा.१

र्वमिति न्यायात् । [illegible] दीनि मये र्नित्यमिति सूत्रेण विहित एकशेषश्च स्यादिति निरस्तं । युष्मदस्मदोरिति सूत्र
शेषाभावेऽपि पूर्वनिपाते [illegible] योरप्रसिद्धेः [illegible] शिवशिवादिसितरविरोधास्फूर्तेश्च । युष्मदर्थादना
त्मनो निष्कृष्य [illegible] स्य चिदात्मनः [illegible] रोपापवादन्यायेन ग्रहणं द्योतयितुं चादौ युष्मद्ग्रहणमित्याहुः । तत्र
युष्मदस्मत्पदाभ्यां पराक्प्रत्यक्त्वेनात्मानात्मनोर्वस्तुतो विरोध उक्तः प्रत्ययपदेन प्रतीतितो विरोध उक्तः
प्रतीयत इति प्रत्ययोऽहमहमित्यादि [illegible] इदंपतया भाति । आत्मा तु प्रतीतिरूपः प्रत्ययः स्वप्रकाशतया भा
ति । गोचरपदेन व्यवहारतो विरोध उक्तः युष्मदर्थो हि प्रत्यगात्मतिरस्कारेण कर्तृत्वाद्यभिमानादिव्यवहारगोचरः
न न त्वहमिति [illegible] स्वात्मप्रविलापेनाहं ब्रह्मेति व्यवहारगोचर इति त्रिधा विरोधः स्फुटीकृतः । युष्मच्चास्म
च्च युष्मदस्मदी ते एव प्रत्ययौ च तौ गोचरौ चेति युष्मदस्मत्प्रत्ययगोचरौ तयोस्त्रिधा विरुद्धस्वभाव
योरितरेतरभावो [illegible] तादात्म्यं तदनुपपत्तौ सिद्धायामित्यन्वयः । [illegible] घट
इति वत्तादात्म्यं किं न स्यादित्यत आह विषयविषयिणोरिति । चिज्जडयोर्विषयविषयित्वाद्दीपघ
टयोरिव न तादात्म्यमिति भावः युष्मदस्मदी पराक्प्रत्यग्वस्तुनी ते एव प्रत्ययश्च गोचरश्चेति वा वि
ग्रहः । अत्र प्रत्ययगोचरपदाभ्यामात्मानात्मनोः प्रत्यक्पराग्भावेन चिदचित्त्वं हेतुरुक्तः तत्र हेतुमा
ह विषयविषयिणोरिति । अनात्मनो ग्राह्यत्वादचित्त्वं आत्मनस्तु ग्राहकत्वाच्चित्त्वं वाच्यं अचित्त्वेऽस्य
स्य स्वेन ग्रहस्य कर्मकर्तृत्वविरोधेनासंभवादप्रसक्तेरापत्तेरित्यर्थः । यद्वैवं व्याहृते तु हेमघटो नः । नन्वे
वमात्मानात्मनोः पराक्प्रत्यक्त्वेन चिदचित्त्वेन ग्राह्यग्राहकत्वेन च विरोधात्तद्धर्मैः प्रत्यक्त्वादेः स्वस्य
तादात्म्यस्य चानुपपत्तौ सत्यां तत्प्रतिसंभावेनाध्यासाभावेऽपि तद्धर्माणां चेतनत्वस्य [illegible] त्वादी

५

नोऽपि निमित्तेऽध्यासोऽस्त्वित्यत आह तद्धर्माणामपीति। तयोरात्मानात्मनोर्धर्मा ये तद्धर्मास्तेषामपि इतरेतरभावानुपप-
त्तिः। इतरत्र धर्म्यन्तरे इतरेषां धर्माणां भावः संसर्गः तस्यानुपपत्तिरित्यर्थः। न हि धर्मिणोः संसर्गं विना धर्मिणां
किं निमित्तोऽस्ति। स्फटिके लौहित्यवत् स्वसमानसत्ताकोपाध्यधीनत्वात् लौहित्यधर्मसंसर्गः। असंगात्मधर्मिणः केनाप्यसंसर्गात्
र्मिसंसर्गपूर्वको धर्मसंसर्गः कुतस्तस्य प्रसक्तिरिति सो ... सुतरामिति। न चात्मानात्मनोस्तादात्म्यस्य तद्धर्मसंस-
र्गस्य वाऽभावेऽपि अध्यासः किं न स्यादित्यत आह इत्यत इति। इदं रूपं सत्तातादात्म्याद्यभावेन तन्निमित्ताभा-
त्वात्। अतः प्रमाणजन्यसंस्कारस्याध्यासहेतोरसंभवात् अध्यासो मिथ्येति भवितुं युक्तमित्यन्वयः। मिथ्यासौ
...र्थः अपह्नववचनः अनिर्वचनीयतावचन इति अत्र चापह्नवार्थः। ननु कुत्र कस्याध्यासोऽपह्नूयते
स्तां तस्यात्मन्यनात्मतद्धर्माणां अनात्मन्यात्मतद्धर्माणामध्यासो निरस्यत इत्याह अस्मत्प्रत्यय गोचरे
र इत्यादिना। अहमिति प्रत्यययोग्यत्वं बुध्यादेरप्यस्तीति तद्व्यावर्तनाय आत्मानं विशेषयति विषयिणीति। बुध्या-
दिसाक्षिणी इत्यर्थः। साक्षित्वे हेतुः चिदात्मक इति। अहमिति भासमाने चिदंशापन्नी इत्यर्थः। युष्मत्प्रत्ययगो-
चरस्येति। त्वं ... इदं तत्प्रत्ययस्येति यावत्। ननु अहमिति भासमानबुध्यादेः कथमिदमर्थत्वमित्यत आ-
ह। विषयस्येति। साक्षिभास्यस्येत्यर्थः। साक्षिभास्यत्वरूपलक्षणयोगात् बुध्यादेर्घटादिवदिदमर्थत्वेन
प्रतिपन्नत्वे इति भावः। अथवा पदात्मनो युष्मत्त्वं सर्वतिरस्कृतरूपं प्रसक्तं प्रतीतित्वं अस्मास्मेति व्यवहारगो-
चरत्वं चोक्तं इति। अहमिति प्रतीयमानत्वात् आह रूपवदिति सांशः स्यात् अस्मत्प्रत्ययगोचर इति। अस्म
ध्यासो प्रत्ययस्यासौ गोचरश्चेत् तस्मिन्नित्यर्थः। आह वृत्तिव्यंग्यस्फुरणत्वं स्फुरणविषयत्वं वा हेतुः। आद्ये
दृष्टान्ते हेतुसिद्धिः। द्वितीये तत्पक्षे तदसिद्धिरित्यात्मनो मुख्यत्वं प्रत्यक्षादिवदुक्तमिति भावः। ननु पदास्य
नोऽविषयत्वं तदसिद्धं अनुभवामीति शब्दविषयत्वात् आह अपरोक्षत्वादित्यत आह विषयिणीति। नाप्यत्वे

ता.टी.रा.

५

त्वस्य संवाहेतुः। नाघः पक्षे तन्दलि ... दे। नो मे दृष्टान्ते तद्वैकल्यादिति भावः। देहं जानामीति देहाहंकारयोः
विषयविषयित्वेऽपि मनुष्योऽहमिति तस्ये दोध्यासवत् आत्माहंकारयोरप्यध्यासः स्यादित्यत आह। चिदात्म
क इति। तयोर्जीवात्मनोर्वास्योस्तादृश्याद्ध्यासेऽपि चिदात्मन्यनवच्छिन्ने जडात्माहंकारादेर्नाध्यास इति भावः
अतएव मिलितभास्यत्वादात्मवदहंकारस्यापि प्रत्यक्त्वादिकं मुख्यमेव ततः पूर्वोक्तपराक्त्वासिद्धिरित्याशंक्या
ह युष्मदिति। अतं चिति भास्यत्वमहंकारे नास्ति कर्तृकर्मत्वविरोधात्। चिद्रूपस्यत्वं चिदात्मनि नास्तीति हेत्वसि
द्धिः अतो बुद्ध्यादेः प्रतिभासतः प्रत्यक्त्वेऽपि पराक्त्वादिकं मुख्यमेवेति भावः। युष्मत्पराक्त्वात्तो प्रतीयत इति प्र
सयष्मत्यौक्ले... व्यवहारगोचरत्वं तस्येति विग्रहः तस्यार्थमाह विषयस्येति। विषू बंधनेऽपि
षिणोतिवभातीति विषयः तस्येत्यर्थः। अनात्मन्यनात्मतद्धर्माध्यासो मिथ्या भवतु अनात्मन्यात्मतद्धर्माध्या
सः किं न स्यात् अहं स्फुरामि सुखी सोऽहमनुभवादिसार्वाभ्याह तद्विपर्ययेणेति। तस्मान्नात्मनो विपर्ययो वि
रुद्धस्वभावस्य चैतन्यं इदंशून्ये तत्तौ या चैतन्यात्मनो विषयिणस्तद्धर्माणां च योऽहंकारादौ विषये ध्यासः स
मिथ्येति नास्तीति भावितं युक्तं। अध्यासस्यासम्भवात्। न ह्यत्र पूर्वप्रमाहितसंस्कारः सादृश्यमत्र नैवा
स्ति। निरवयवे निर्गुणे स्वप्रकाशात्मनि गुणावयवसादृश्याद्यसंभवात्। नन्वात्मनो निर्गुणत्वे
... तद्धर्माणां मिलितप्रतीयमानं मिथ्येति चेत् तदुच्यते बुद्ध्या ... साक्षिचैतन्यं ज्ञानं विषयाभेदेनाभिव्यक्तं स्फु
रणं सुखदुःखजन्यवृत्तिव्यक्तमानं दुःखसेवं वृत्तिव्याधिकृतभेदात् ज्ञानादीनामात्मधर्मत्वव्यपदेशः। तद्
... आनन्दो विषयानुभवो नित्यसत्त्वं चेति संतिधर्माः अपृथक्त्वेऽपि चैतन्यात्मस्वरूपभावाध्यासतरति।
अतो निर्गुणत्वेऽपि सत्यमते अहंकर्तामीत्यादिप्रतीतेरर्थस्य चाध्यासत्वायोगात् प्रमातं अहं नर इति
सामानाधिकरण्यस्य गौणत्वमिति मतमाशङ्क्य। तथा च बोधस्यसत्तया तान्त्रिवत्तिरूपफलासंभवा

आदमाहा जीमे: ३

८

२

स्मेति २

सस्यं

11

तद्वदुपक्रमोपसंहारयोरैकरूप्यायोगे न विषयासंभवात् शास्त्रं नारंभणीयमिति पूर्वपक्षाभाष्यता सर्वथा। युक्त्यवर
णात् पूर्वपक्षस्य दुर्बलत्वं सूचयति। तथा हि किमध्यासस्य नास्तित्वमयुक्तत्वं दर्शनाद्वा कारणाभावाद्वा अना
घटकत्वेन वा तथा भातीति। एतदनुरोधादादौ यद्यपीति पठितव्यम्। अध्यासस्यासंगस्वप्रकाशात्मन्ययुक्तत्वमलं
कार इति भावः। न द्वितीय इत्याह अन्यथेति। अहं कर्ता मनुष्योऽहमिति प्रत्यक्षानुभवोऽस्ति। अध्यासस्याभाने
मतिरपि सर्वः। न चेदं प्रत्यक्षं कर्तृत्वादौ प्रमेति वाच्यम्। अपौरुषेयत्वेन निर्दोषेणोपक्रमादिलिंगावधृततात्
पर्येण च तत्त्वमस्यादिवाक्येन अकर्तृत्वासंगत्वबोधेनास्य भ्रमत्वनिश्चयात्। न च ज्येष्ठप्रत्यक्षविरोधादाग
मज्ञानस्यैव बाध इति वाच्यम्। देहात्मवादप्रसंगात् मनुष्योऽहमिति प्रत्यक्षविरोधेनात्मनः अशरीरत्वादिश्रुत्या
देहादन्यात्मासिद्धेः। तस्मादिदं रजतमिति वत् सामानाधिकरण्यप्रत्यक्षस्य भ्रमत्वं शंकाकुलत्वे हि तस्याना
गमात्प्राबल्यमिति स्थेयम्। किंच ज्येष्ठत्वं पूर्वभावित्वं वा आगमज्ञानं प्रत्युपजीव्यत्वं वा। आद्ये न प्राबल्यम्। ज्ये
ष्ठस्यापि रजतभ्रमस्य पश्चाद्भाविना शुक्तिज्ञानेन बाधदर्शनात्। न द्वितीयः। आगमतात्पर्यतो प्रत्यक्षादि
मूलकव्यवहारेषु संगतिग्रहद्वारा शब्दोपलब्धौ द्वारा च प्रत्यक्षादेर्व्यावहारिकप्रामाण्यस्योपजीव्यत्वेऽपि
तात्त्विकप्रामाण्यस्यानपेक्षितत्वात्। अनपेक्षितांशे आगमेन बाधसंभवादिति। ननु तथापि [illegible] आगमस्य श्रुति
बलात् [illegible] विफलत्वे तथा विद्वान् नामरूपाद्विमुक्त इति श्रुतिबलात् तत्त्वसाक्षात्कारे ज्ञानान्नि
वृत्तिसंभवात् अध्यासवर्णनं व्यर्थमिति तत्र। ज्ञानमात्रान्निवृत्तेः स्वप्नादिस्वत्वादर्शनात् सत्यस्य चोपपत्तेः नो
निवर्त्यत्वं [illegible] दर्शनात्। अयोग्यतानिश्चये सति सम्बन्धस्य ज्ञानान्निवृत्तिः [illegible] तेषां [illegible] योगानां च
सेतुदर्शनात् सत्यस्यापापस्य नाशदर्शनात् अयोग्यतानिश्चय इति वाच्यम्। तस्य श्रद्धा [illegible] निरमात् [illegible] सोऽपि सत्यज्ञा
नेनीरपलोतो [illegible] तस्य च नान्यः पन्था इति श्रुत्या ज्ञानमात्रान्निवृत्तिप्रतीतेः। अतः श्रुतज्ञाननिवर्तकत्वानि

वीतादि अध्यस्तत्वं वर्णनीयं। किंच ज्ञाने रूप्यविषयस्य किन्नामसत्यत्वं न तावदज्ञानाजन्यत्वं मायां तु प्रकृतिमिति श्रु-
तिविरोधात्। मायाविषयोरैक्यात्। नापि स्वाधिष्ठाने स्वाभाववत्त्वं शून्यत्वं। अस्थूलमित्यादि निषेधश्रुतिविरो- ले३
धात्। नापि ब्रह्मवत् बाधायोग्यत्वं। ज्ञानान्निवृत्तिश्रुतिविरोधात्। अथ व्यवहारकाले बाधशून्यत्वं तर्हि
व्यावहारिकमेव सत्यत्वमित्यागतमिति सत्यध्यस्तत्वं तच्च ... यदपि ज्ञाना ... वर्णनीयमेव। योगास्या-
पूर्वकारत्ववत्। न च तदुनन्यस्याधिकरणे तस्य वर्णनासौ न स्तयं। तत्रोक्ताध्यासस्यैव प्रसंगात्। किंच
यादिसिध्यर्थमारोप्यमाणत्वादिति दिक्। अध्यासं द्वेधा दर्शयति। लोकव्यवहार इति। लोक्यते मनु-
ष्योऽहमित्यभिमन्यत इति लोकोऽध्यासः तद्विषयो व्यवहारो। अभिमान इति ज्ञानाध्यासो दर्शितः। द्विवि-
न्यो धाध्यासस्वरूपलक्षणमाह अन्योन्यस्मिन्नित्यादिना। धर्मधर्मिणोरितरेतरेण ... तच्चैतन्यादि धर्मिणां
धर्मिणामहंकारात्मनोस्तयोरत्यन्तभिन्नयोरितरेतरभेदाग्रहेणान्योन्यस्मिन्नन्योन्यतादात्म्याध्या-
त्मानं धर्मांशध्यासेनाध्यस्य लोकव्यवहार इति योजना। अतः सोऽयमिति प्रमायां नाध्यासत्वं। तदि-
दमर्थयोः कालभेदेन ... तदंशे भेदाभावात् इति वक्तुमत्र ... नच धर्मितादात्म्याध्या-
ध्यासे धर्माध्यासनिर्बन्धे निष्फलत्वमिति वाच्यं। अंधत्वादीनामिन्द्रियधर्माणां धर्म्यध्यासात्स्फु-
त्वेऽपि अहं ... इति स्फुटोऽध्यास इति ज्ञापनार्थत्वात्। नन्वात्मानात्मनोः परस्पराध्यस्तत्वे शून्यवा-
दः स्यादिति शंकां ... मिथुनीकृत्येति। सत्यमनिदं चैतन्यं तस्यानात्मनि संसर्गमात्राध्यासा-
न स्वरूपस्यानन्तं ... तत्र योर्मिथुनीकरणमध्यासः इति न शून्यते-
त्यर्थः। नन्वध्यासमिथुनीकरणलोकव्यवहाराणां एकार्थत्वे ध्यस्य मिथुनीकृत्येति पूर्वकाल-
त्वं ... प्रत्ययादेशस्य ल्यपः कथं प्रयोग इति चेन्न। अध्यासव्यक्तिभेदात्। ततः पूर्वपूर्वाध्यास- क

स्वोत्तरोत्तराध्यासं प्रति संस्कारद्वारा पूर्वपूर्वकालत्वेन हेतुत्वद्योतनार्थं ल्यपः प्रयोगः तदेवमस्य एव पति नैसर्गिक इति। प्रस
गात्मनि हेतुहेतुमद्भावेनाध्यासप्रवाहोऽनादिरित्यर्थः। ननु प्रवाहस्यावस्तुत्वादध्यासव्यक्तीनां सादित्वात्कथमन
नादित्वमिति चेत् उच्यते। अध्यासत्वावच्छिन्नव्यक्तीनां मध्ये ऽन्यतमयाप्यव्यक्त्या विनानादिकालस्यावर्त्तनं का
र्यानादित्वमित्यंगीकारात्। एतेन कारणाभावादिति [illegible] कल्पो निरस्तः। संस्कारस्य निमित्तस्य नैसर्गिकपदेनोक्त
त्वात्। न च पूर्वप्रमाजन्य एव संस्कारो हेतुरिति वाच्यं। लाघवेन पूर्वानुभवजन्यसंस्कारस्य हेतुत्वात्। अतः पू
र्वाध्यासजन्यसंस्कारोऽस्तीति सिद्धं। अध्यासस्योपादानमाह मिथ्याज्ञाननिमित्त इति। मिथ्या च तदज्ञानं च
मिथ्याज्ञानं तन्निमित्तमुपादानं यस्य स तन्निमित्तस्तदुपादान इत्यर्थः। अज्ञानस्योपादानत्वेऽपि संस्कारदोषत
त्वावरकतया दोषत्वेनाहंकाराध्यासकर्तृत्वेश्वरस्योपाधित्वेन संस्कारकालकर्मादिनिमित्तपरिणामित्वेन च
निमित्तत्वमिति द्योतयितुं निमित्तपदं स्वप्रकाशात्मन्यसंगे कथमविद्यासंग इति शंकानिरासार्थं मिथ्याप
दं प्रपंचं ऽस्मार्येऽहं देहेऽप्येवमनुभवसिद्धं अंधकारवत् अहमज्ञ इत्यनुभवसिद्धमज्ञानं इदं रूपं न कल्पितस्या
धिष्ठानासंस्पर्शित्वात्। निरस्वरूपज्ञानस्याविरोधित्वाच्चेति। यद्वा अज्ञानं ज्ञानाभाव इति शंकानिरासा
र्थं मिथ्यापदं। मिथ्यात्वे सति साक्षात् ज्ञाननिवर्त्यत्वमज्ञानस्य लक्षणं मिथ्याज्ञानपदेनोक्तं ज्ञानेनेत्य
प्रागभावः साक्षान्निवर्त्यते इति वदंतं प्रति मिथ्यात्वे सतीत्युक्तं। अज्ञाननिवृत्तिद्वारा ज्ञानान्निवर्त्यबंधेऽति
व्याप्तिनिरासाय साक्षादिति। अनाद्युपादानत्वे सति मिथ्यात्वं वा लक्षणं अंशनिरासार्थं उपादानत्वे सति
ति संगतिं अध्यासं द्रढयितुं अभिलपति अहमिदं ममेदमिति। आध्यासिककार्याध्यासे अहमिति प्र
थमोऽध्यासः। न चाधिष्ठानारोप्ययोः सादृश्यानुपलंभात् इदंपदेन भोग्यः संघात उच्यते। अत्राहमिदमिति स
नेन मनुष्योऽहमिति तादात्म्याध्यासो दर्शितः। ममेदं शरीरमिति संसर्गाध्यासः। ननु देहात्मनोस्तादात्म्यमे

नायमध्यास इति वाच्यं अमयो मिथ्यात्वमिति यदादि। तरासार्थमनादीति अ
दहतीतिवत् अहमुपलंभः १ धासनोः संबंधनिरासार्थं ४
लि इदं इत्यादर्शयोरुपलंभात् २

मा॰टी॰टी॰

६

न संसर्गाइति तयोः को भेद इति चेत् सत्यं। सत्यैक्ये सति मिथो भेदस्तादात्म्यं। तत्र मनुष्योहमित्यैक्यं ज्ञानं। ममेदमि
ति भेदेनारूपं संसर्गज्ञानमिति भेदः। एवं सामानाधिकरण्यादनुभवसत्वादध्यासोस्तीति। अतो ब्रह्मात्मैक्यविरो
धाध्यासाभावेन विषयप्रयोजनयोः सत्वात् शास्त्रमारंभणीयमिति सिद्धं लक्षणाख्यतात्पर्यं॥ एवं वस्तु वर्णा वर्णितसूचि
ते विषयप्रयोजने प्रतिपाद्य तद्धेतुमध्यासं लक्षणसंभावनाप्रमाणैः साधयितुं लक्षणं पृच्छति आहेति।
किं लक्षणकोध्यास इत्याह पूर्वपक्षवादी सत्यर्थः। अस्य शास्त्रस्य तत्वनिर्णयप्रधानत्वेन वादकथात्वद्योतनार्थमा
हेति परोक्तिः। आहेत्यादि कथं पुनः प्रत्यगात्मनी संतः प्रागध्यासलक्षणपरं भाष्यं तदारभ्य संभवन्त्यापरं तमे
तमविद्याख्यामित्यारभ्य सर्वलोकप्रत्यक्ष इत्यंतं प्रमाणपरमिति विभागः। लक्षणमाह स्मृतिरूप इ
ति। अध्यास इत्यनुषंगः। अत्र परत्रावभास इत्येव लक्षणं शिष्टं पदद्वयं तदुपपादनार्थं। तथा हि अवभास्य
ते इति अवभासो रजताद्यर्थः तस्यायोग्यं मधिकरणं परत्र पदार्थः। अधिकरणस्यायोग्यत्वं समानेप्यासंतात्वा
वयवेन वा। तथाचैकावच्छेदेन स्वसंसर्गस्य मानेस्वात्यंताभाववति अवभासत्वं अध्यासत्वमिति सर्थः
इदं च सादिनाध्यास साधारणं लक्षणं। संयोगेति व्याप्तिवारणाय एकावच्छेदेनेति। संयोगस्य संसर्ग
मानेवृक्षेस्वात्यंताभाववति अवभासत्वे पि स्वस्वात्यंताभावयोर्मूलाग्रावच्छेदकभेदाद्भ्राति व्याप्तिः। पूर्वं
स्वाभाववति भूतलेप श्चादानीतो घटो भातीति घटे भ्रातिव्याप्तिनिरासाय स्वसंसर्गस्य मान इति पदं। तेन
स्वाभाववत्कालेप्रतियोगी संसर्गस्य विषयमानो तो न्यत इति नातिव्याप्तिः। भूतलं अवच्छेदेन घटस्यांगे
स्यात्यंताभाववति अवभासत्वेन पदं। शुक्तौ यदि संसर्गावच्छेदेन रजतसंसर्गकाले संता तदा यो स्तीति ना
तिव्याप्तिवारणाय स्वात्यंताभाववतीति पदं। शुक्तौ यदि दंसावच्छेदेन रजतसंसर्गकाले संता तयोस्तीति ना
व्याप्तिः। न च स्वलक्षणस्यात्मपरत्वेः शुक्तौ रजतस्य सामग्र्यभावेन संसर्गासत्वात्। न च स्वयं प्रमाणसस्य रत
तस्यैव परत्र शुक्तौ भवभास्यत्वे नाध्यस्तत्वोक्तिरिति वाच्यं। अन्यथाख्यातिप्रसंगात्। दिसत आह स्मृतिरू

८

= नत्वाद्यमसंसर्गाग्रहस्य दोषः व्यभिचारात् व्याप्ते
दर्शयति अहङ्कार इति ५

पद्यते। स्मर्यत इति स्मृतिः संस्कारजन्यज्ञानादि। तस्य रूपमिव रूपं यस्येति स्मृतिरूपः स्मर्यमाणसदृश इत्यर्थः। सादृश्यं चास्य स्मर्यमाणा
दारोप्यस्य भेदाग्रहे अन्यथाख्यातिरिति स्पष्टं भवति। सादृश्यमुपपादयति। पूर्वदृष्टेति। दृष्टं दर्शनं संस्कारद्वारा पूर्वदर्शनादव
भास्यत इति पूर्वदृष्टावभासः। तेन संस्कारजन्यज्ञानविषयत्वं स्मर्यमाणारोप्ययोः सादृश्यमुक्तं भवति। स्मर्यमाणारोप्य
योः संस्कारजन्यत्वात्। न च संस्कारजन्यत्वादारोपस्य स्मृतित्वापत्तिरिति वाच्यं। दोषसंप्रयोगजन्यत्वस्यापि विवक्षि
तत्वेन संस्कारमात्रजन्यत्वाभावात्। अत्र संप्रयोगशब्देन अधिष्ठानसामान्यज्ञानमुच्यते। अहंकाराद्यध्यासे इन्द्रिय
संप्रयोगाभावात्। एवं च दोषसंप्रयोगसंस्कारबलादुत्पाद्यो रजतमहमस्मीतीति परत्रावभासत्वं लक्षणमुप
पन्नमिति स्मृतिरूपपूर्वदृष्टपदाभ्यामुपपादितं। अन्ये तु त्रयाणां दोषादित्रयजन्यत्वं कार्याध्यासलक्षणमुक्तमित्या
हुः। अपरे तु स्मृतिरूपः स्मर्यमाणसदृशः। सादृश्यं च प्रमाणाजन्यज्ञानविषयत्वं स्मर्यमाणारोप्ययोः प्रमाणाजन्य
त्वात्। पूर्वदृष्टपदं तज्जातीयपरं अभिनवरजतादेः पूर्वदृष्टत्वाभावात्। तथा च प्रमाणाजन्यज्ञानविषयत्वे स
ति पूर्वदृष्टजातीयत्वं प्रातीतिकाध्यासलक्षणं ताभ्यामुक्तं परत्रावभासशब्देनाध्यासमात्रलक्षणं व्याख्या

ग।७

तमेव। तत्र स्मर्यमाणेत्यादौ अभिनवघटे चातिव्याप्तिनिरासाय प्रमाणेत्यादिपदद्वयमित्याहुः। तत्राधिष्ठाने
स्मर्यमाणसदृशः पूर्वत्र पूर्वदर्शनादवभास्यत इति योजना। ज्ञानाध्यासे तु स्मृतिसदृशः परत्र पूर्वदर्शनादवभासः
सन्त इति वाक्ययोजनीयमिति संक्षेपः। ननु अध्यासे वादिविप्रतिपत्तेः कथमुक्तलक्षणसिद्धिरित्याशंक्यापि

शीनेभ

ज्ञानारोप्यस्वरूपविवादेऽपि परत्र परावभासत्वमिति लक्षणे संवादाद्युक्तिः सत्याधिष्ठाने मिथ्यावस्त्ववभासत इति
सर्वतन्त्रसिद्धान्तदृष्टलक्षणमिति तन्मतो अन्यथात्मख्यातिवादिनो मतमाह तं केचिदिति। केचिदन्यथाख्या
तिवादिनो अन्यत्र शुक्त्यादावन्यधर्मस्य रजतस्य धर्मस्य देशान्तरस्थरूप्यादेरध्यास इति वदन्ति। आत्मख्या
तिवादिनस्तु बाह्ये शुक्त्यादौ बुद्धिरूपात्मनो धर्मस्य रजतस्याध्यासः आन्तरस्यैव रजतस्य बहिर्वदवभास इति

= स्मर्यमाणागमादौ प्रमाणाजन्यज्ञानविषयत्वे सत्यपि पूर्वदृष्टजातीयत्वाभावात्। अभिनवघटे पूर्वदृष्टजातीयत्वेऽपि प्रमाणजन्यज्ञा-
नविषयत्वात्। ७

वदंतीत्यर्थः। अन्यथाख्यातिमतमाह केचिदिति। यत्र यस्याध्यासोऽन्योन्यसिद्धस्तयोरर्थयोरधिष्ठानारोप्ययोस्तद्विवेका-
भेदाग्रहे सति तन्मूलो भ्रमः इदं रूप्यमिति विशिष्टव्यवहार इति वदंतीत्यर्थः। तैरपि विशिष्टव्यवहारान्यथा-
नुपपत्त्या विशिष्टप्रतीतिः स्वीकार्येत्यत्र परत्र परावभासत्वं सम्मतमितीति भावः। शून्यमतमाह अन्ये त्विति। त-
स्यैवाधिष्ठानस्य शुक्त्यादेर्विपरीतधर्मत्वकल्पनां विपरीतो विरुद्धो धर्मो यस्य तद्भावः तत्स्य रजतादेः अ-
त्यन्तासत्त्वः कल्पनामाचक्षत इत्यर्थः। एतेषु मतेषु परत्र परावभासत्वलक्षणसंवादमाह सर्वथापीति। अ-
न्यथाख्यातित्वादिप्रकारभेदविवादेऽपि अध्यासः परत्र परावभासत्वलक्षणं न जहातीत्यर्थः। शुक्त्यादावारोप्यस्य रज-
तस्य देशान्तरे बुद्धौ वा सत्त्वायोगात् शून्यत्वे प्रत्यक्षत्वायोगात् सत्त्वे सति बाधायोगात् मिथ्यात्वमेवेति भावः।
आरोप्यमिथ्यात्वे न युक्त्यपेक्षा तस्यानुभवसिद्धत्वात् इत्याह तथा चेति। बाधानन्तरकालीनोऽयमनुभवः
तत्पूर्वं शुक्तिकात्वज्ञानायोगात् रजतस्य बाधप्रत्यक्षसिद्धं मिथ्यात्वं चेव तत्त्वादेनोच्यते आत्मनि निरुपाधिके
हंकाराध्यासे दृष्टान्तमुक्त्वा ब्रह्मजीवान्तरभेदस्याविद्याद्युपाधिकस्याध्यासे दृष्टान्तमाह एक इति। द्वितीयचं-
द्रसहितवदेक एवोडुल्याद्विधा भातीत्यर्थः। लक्षणप्रकरणोपसंहारार्थ इतिशब्दः। अथ तत्त्वाध्यासः शुक्त्यादौ
आत्मनि तदसंभवतीत्याक्षिपति कथं पुनरिति। यत्रारोप्याध्यासाधिष्ठानत्वं तत्रेन्द्रियसंप्रयुक्तत्वं विषयत्वं च
तिव्याप्तिः शुक्त्यादौ दृष्टा तत्र व्यापकाभावादात्मनोऽधिष्ठानत्वं न संभवतीत्याक्षिपत्याह प्रत्यगात्मनीति। प्रती-
चि पूर्णे इन्द्रियागम्ये विषयस्याहंकारादेस्तद्धर्माणां चाध्यासः कथमित्यर्थः। उक्तव्याप्तिमाह सर्वो हीति।
पुरोवस्थितत्वमिन्द्रियसंप्रयुक्तत्वं। नन्वात्मनोऽप्यधिष्ठानत्वार्थं विषयत्वादिकमस्ति सत आह युष्मदिति।
इदंप्रत्ययानर्हस्य प्रत्यगात्मनो न चक्षुषा गृह्यते नापि वाचा इत्यादिश्रुतिमनुसृत्य समाविषयत्वं ब्रवीषि
संप्रत्यध्यासत्वोऽपि न विषयत्वादीनां श्रुतिसिद्धान्तयोर्बाधः स्यादित्यर्थः। आत्मन्यध्यासस्य संभावनाप्र

वपरोक्ष

व

दृष्ट

अस्मदर्थोऽस्मिन् तत्प्रतिबिंबितत्वं न यत्र प्रतीयते सोऽस्मत्प्रत्ययोऽहंकारस्तत्र भासमानत्वादात्मवाचः ४

तिजानीते युष्मदिति। अधिष्ठानारोपयोरेकस्मिन् ज्ञाने भासमानत्वमात्रं तत्राध्यासव्यापकं तच्चभानमयुक्तं संशय-
नियत्वादिपूर्वभागे [illegible] तदेव स्मिन्नप्यधिनन्तु भानाभिन्नत्वघटितं विषयत्वं [illegible] व्यापकं गौरवादि-
तिमत्वाह नतावदिति। अयमात्मानियमेनाविषयो न भवति। तत्र हेतुमाह अस्मदिति। अस्मत्प्रत्ययो हमि-
त्यध्यासस्तत्र भासमानत्वादित्यर्थः। न चाध्यासे सति भासमानत्वं तस्मिन् सति स इति परस्पराश्रय इति
वाच्यं। अनादित्वात्पूर्वाध्यासे भासमानो मनोऽन्तरं ध्यासाधिष्ठानत्वसंभवात्। न च हमिति तदाकारविष-
यप्रकाशन रूपस्यात्मनो भासमानत्वं धर्मः तद्विषयत्वं विना तस्यापि भानमयोग्यमिति तत्राह अपरोक्षत्वा
च्चेति। चशब्दः शंकानिरासार्थः। स्वप्रकाशत्वादित्यर्थः। स्वप्रकाशत्वं साधयति प्रसिद्धेरिति। आबालपंडि-
तमात्मनः संशयादिशून्यत्वेन प्रसिद्धेः स्वप्रकाशत्वमित्यर्थः। अतः स्वप्रकाशत्वेन भासमानत्वेनात्म-
नोऽधिष्ठानत्वं संभवतीति भावः। यदुक्तमपरोक्षाध्यासाधिष्ठानत्वस्येन्द्रियसंप्रयुक्तत्वव्याप्त्या व्यापकाभि
लितत्राह। नचायमिति॥ तत्र हेतुमाह॥ अप्रत्यक्षेपीति इन्द्रियाग्राह्येऽपीत्यर्थः। बालाः अविवेकिनः त-
लमिंद्रनीलकटाहकल्पं नभो मलिनं पीतमित्येवमपरोक्षमध्यस्यंति तत्रेन्द्रियग्राह्यत्वं नास्तीति व्यभिचारा-
न्न व्याप्तिः। एतेनात्मानात्मनोः सादृश्याभावान्नाध्यासइत्यपास्तं नीलनभसोस्तदभावेऽप्यध्यासदर्शनात्।
सिद्धांते आलोकाकारचाक्षुषवृत्तिव्यक्तसाक्षिवेद्यत्वेन नभस इति ज्ञेयं। संभावनां निगमयति। एवमिति। ननु ब्रह्म
तानेनारयत्वेन सूत्रितामविद्यां हित्वाध्यासः किमिति वर्ण्यते इत्यत आह तमेतमिति। आक्षिप्तं समाहितं उक्तल-
क्षणलक्षितं अध्यासं अविद्याकार्यत्वादविद्येति मन्यंतेऽध्यासविद्यानिवर्त्यत्वात्। विद्यात्वमिसाह त-
द्विवेकेनेति। अध्यस्तनिषेधेनाधिष्ठानस्वरूपनिर्धारणं विद्यां अध्यासनिवर्त्तिं का हरिस्या॥ तथापि कि-
रणाविद्यासक्तो कार्याविद्या किमिति वर्ण्यते तत्राह तत्रेति। तस्मिन्नध्यासे दुर्व्यायेनाविद्यात्मके सतीत्यर्थः।

18

सा॰री॰ग॰

१

मूलाविद्याभासः सुषुप्तावनर्थत्वादर्शनात्कार्याध्यासेनानर्थत्वज्ञापनार्थं तद्दर्शनमिति विभागः। अध्यासकृ
तगुणदोषाभ्यामधिष्ठानं न लिप्यत इति अक्षरार्थः। एवमध्यासस्य लक्षणसंभावने उक्त्वा प्रमाणमाह तमेत
मिति। तं वर्णितमेतं साक्षिप्रत्यक्षसिद्धं पुरस्कृत्य पुरस्कृत्य लौकिकः कर्मशास्त्रीयो मोक्षशास्त्रीयश्चेति त्रि
विधो व्यवहारः प्रवर्तत इत्यर्थः। तत्र विधिनिषेधपराणि कर्मशास्त्राणि वेदादीनि विधिनिषेधशून्यप्रत्यक्
ब्रह्मपराणि मोक्षशास्त्राणि वेदान्तवाक्यानीति विभागः। एवं व्यवहारहेतुत्वेनाध्यासे प्रत्यक्षं लिङ्गमिति प्रमाणा
न्तरं पृच्छति। कथं पुनरिति। अविद्यावानहमित्यध्यासवानात्मा प्रमाता तस्य विषयाश्रयाणि तानि प्रमा
णानि अविद्यावद्विषयाणीति विग्रहः। तत्र प्रत्यक्षव्यवहारहेतुत्वेन ताः प्रमायाः अध्यासात्मकप्रमात्राश्रितत्वात् प्रमा
णानाममविद्यावद्विषयत्वं यद्यपि प्रत्यक्षं तथापि पुनरपि कथं केन प्रमाणेनाविद्याविषयत्वमिति योजना।
तत्र प्रमाणानामविद्यावद्विषयाणि कथं प्रमाणानि स्युः आश्रयदोषात् प्रामाण्यापत्तेरित्याक्षेपः। तत्र प्रमाण
प्रत्यक्षव्यवहाराद्यापत्तितल्लिङ्गकानुमानं चाह उच्यत इत्यादिना तस्मादित्यन्तेन। देवदत्तकर्तृको व्यवहारः त
दीयदेहादिष्वहंममाध्यासमूलः तदन्वयव्यतिरेकानुसारित्वात्। यदित्थं तत्तथा। यथा मृदन्वयी घट इति
प्रयोगः। तत्र व्यतिरेकं दर्शयति देहेति। देवदत्तस्य सुषुप्तावध्यासाभावे व्यवहाराभावो दृष्टः। इत्यत्र प्र
योरध्यासे सति व्यवहार इत्यन्वयः स्फुटत्वान्नोक्तः। अतो न लिङ्गेन कारणतयाध्यासः सिध्यतीति। व्यवहा
ररूपकार्यानुपपत्त्यावेति भावः। ननु मनुष्यत्वादिजातिमति देहे अहमित्यभिमानमात्रात् व्यवहारः सिध्यतु
किमिन्द्रियादिषु ममाभिमानेनेत्यत आह नहीति। इन्द्रियपदं लिङ्गादेरप्युपलक्षणं। प्रत्यक्षादीत्यादि
पदप्रयोगात्। तथा च प्रत्यक्षादिलिङ्गादिप्रयोक्तृको व्यवहारः द्रष्टा अनुमाता श्रोता अहमित्यादिरूपः स

प॰३

इंद्रियादीनिममतास्पदानि अध्यासहीनानसंभवतीत्यर्थः। अध्यासानामिमित्तेनानुपादाय यो व्यवहारः स नेति योजना। पू
र्वत्रानुपादानासंभवप्रक्रिययोरेको व्यवहारः कर्त्तेति ... प्रसवः साधुः उत्तरत्रानुपादानव्यवहारयोरेकात्मकर्तृकत्वे
त्सो ... इंद्रियाद्विषु ममेत्यध्यासाभावे ... व्यवहारो न स्यादिति भावः। इंद्रियाध्यासे
नैव व्यवहारादर्शनादध्यासेनेत्यत आह न वेति। इंद्रियाणामधिष्ठानं आश्रयः शरीरमित्यर्थः। ननु स्यात्मनात्मे
पु संसारीरं तत्रामाश्रयः किं न अध्यासेनेत्यत आह न चानध्यस्तात्मभावेनेति। अनध्यस्तः आत्मभावः आत्मता यस्मि
न् तेनेत्यर्थः। असंगो हीति श्रुतेराध्यासिक एव देहात्मनोः संबंधो न संयोगादिरिति भावः। नन्वात्मनो देहा
दिष्विराध्यासिकसंबंधोऽपि मास्तु स्वतश्चेतनतया प्रमातृत्वोपपत्तेः। न च सुषुप्तौ प्रमातृत्वापत्तिः करणोपरमा
दिति तत्राह न चेति। तस्मिन्निति। प्रमाश्रयत्वं हि प्रमातृत्वं प्रमा यदि नित्यचिन्मात्रं तर्ह्याश्रययोगः कूटस्थचैत
न्ये च ... इति मात्रं ... प्रसंगः वृत्तेर्जडत्वात् अतः वृत्तीद्धो बोधः प्रमा तदाश्रयत्वं असंगस्यात्मनो वृत्ति
मन्मनस्तादात्म्याध्यासं विना न संभवतीति भावः। देहाध्यासे तद्धर्माध्यासे चासति ... तर्ह्यात्मनः प्रमा
तृत्वं मास्तु इत्यत आह न चेति। तस्मादात्मनः प्रमातृत्वादिव्यवहारार्थमध्यासोऽङ्गीकर्तव्य ... प्रमाना
... पूर्वमुपलक्षेरिति तस्मादिति। प्रमाणस्यत्वादित्यर्थः। यद्वा प्रमाणप्रश्नं समाधाय ... परिहरति तस
स्मादिति। अहमित्यध्यासस्य प्रमातृत्वंर्गतत्वेनादोषसादविद्यावदाश्रयाणि प्रमाणानीति योजना। सति
प्रमातरि पश्चात् ... दोष उच्यते यथा काचादिः अविद्या तु प्रमातृत्वंर्गतत्वान्न दोषः येन प्रत्यक्षादीनामप्रा
माण्यं भवेदिति भावः। ननु यदुक्तमन्वयव्यतिरेकाभ्यां व्यवहारोऽध्यासकार्यमिति तदयुक्तं। विदुषामध्यासाभा
वेऽपि व्यवहारदर्शनादित्यत आह पश्वादिभिश्चेति। चशब्दः शंकानिरासार्थः। किं विद्वत्संप्रत्ययोऽस्तीति साक्षात्का
रः उत यौक्तिकमात्मानात्मविवेकज्ञानं। आद्ये बाधिताध्यासानुवृत्त्या व्यवहार इति समन्वयसूत्रे वक्ष्यते। द्वितीये परो
क्षज्ञानस्यापरोक्षभ्रमानिवर्त्तकत्वात् विवेकिनामपि व्यवहारकाले पश्वादिभिरविशेषादध्यासवत्त्वेन

ओर

ता.टी.र.

२०

तुल्यो लाघवतात्पर्योध्यासकार्य इति युक्तमित्यर्थः। अत्रायं प्रयोगः विवेकिनोऽध्यासवंतः व्यवहारवत्त्वात् पश्वादिवत् इति। तत्र साधकत्वाभावं व्याकुर्वन् दृष्टांते हेतुं स्फुटयति यथा हीति। विज्ञानस्यानुकूलत्वं प्रतिकूलत्वं चेष्टानिष्टसाधनगोचरत्वं तदेवोदाहरति। यदेति। अयं दंडो मदनिष्टसाधनं दंडत्वात् अनुभूतदंडवत् इदं तृणं इष्टसाधनं अनुभूतजातीयत्वात् अनुभूततृणवदिति अनुमाय व्यवहरंतीत्यर्थः। अधुना हेतोः पक्षधर्मतामाह एवमिति। व्युत्पन्नचित्ता अपीत्यन्वयः। विवेकिनोपीत्यर्थः। फलितमाह अत इति। अनुभवबलादित्यर्थः। समान इति। अध्यासकार्यमिति तेन तुल्य इत्यर्थः। ननु यस्माकं प्रवृत्तिरध्यासादिति न पश्वादयो ब्रुवंति नापि परेषामेतत्प्रसिद्धं अतः साध्यविकलो दृष्टांत इति नेत्याह पश्वादीनां चेति। तेषामात्मानात्मनोर्ज्ञानं नास्ति न विवेकः उपदेशाभावात् अतः सामग्रीसत्त्वादध्यासस्तेषां प्रसिद्ध इत्यर्थः। निगमयति तत्सामान्येति। तैः पश्वादिभिः सामान्यं व्यवहारवत्त्वं तस्य दर्शनात् विवेकिनामप्ययं व्यवहारः समान इति निश्चीयत इति संबंधः समानत्वं व्यवहारस्याध्यासकार्यत्वेनेत्युक्तं पुरस्तात् तत्रोक्तान्वयव्यतिरेकौ स्मारयति तत्काल इति। तस्याध्यासस्य काल एव कालो यस्य स तत्कालः यदाध्यासस्तदा व्यवहारस्तदभावे सुषुप्तौ तदभाव इत्यन्वयादिमानिति यावत् अतो व्यवहारलिंगात् विवेकिनामपि देहादिषु अहं ममाभिमानोस्तीत्यन्वयः। ननु लौकिकव्यवहारस्याध्यासिकत्वेपि ज्योतिष्टोमादिव्यवहारस्य नाध्यासजन्यत्वं तस्य देहातिरिक्तात्मज्ञानपूर्वकत्वादित्याशंक्य हेतुमंगीकरोति शास्त्रीये इति। तर्हि कृत्यं वैदिककर्मणोऽध्यासजन्यत्वासिद्धिरित्याशंक्य किं तत्र देहान्यात्मधीमात्रमपेक्षितं उत तत्त्वज्ञानं नाद्य इत्याह तथापीति। न द्वितीय इत्याह न वेदांतेति। आत्मतत्त्वज्ञानं नाध्यासस्य बाधकत्वात् तत्सिद्धिरित्याह तथापीति। न द्वितीय इत्याह न वेदांतेति। आत्मतत्त्वज्ञानं अनुपयोगात् प्रवृत्तिबाधात् च इत्यर्थः। शास्त्रीयकर्मणोऽध्यासजन्यत्वं निगमयति प्राक् तथेति। अध्यासे आगमं प्रमा

णयति। तत्प्रतीति। नच प्रत्यक्षानुमानार्थापत्तयोऽध्यासे प्रमाणं तथागमोपीत्यर्थः। ब्राह्मणो यजेत। न ह वै स्नात्वा भिक्षे-
त। अष्टवर्षं ब्राह्मणमुपनयीत कृष्णकेशोऽग्नीनादधीतेत्यागमो ब्राह्मणादिपदैरधिकारिणं वर्णाद्यभिमानिनं अनु-
वदन् नाध्यासमन्तरेण संभवतीति भावः। एवमध्यासे प्रमाणसिद्धे किंरूपः कुत्राध्यास इति जिज्ञासायां तमुदाहरन् तल्लक्षण-
स्मारयति। अध्यासो नामेति। उदाहरति। तद्यथेति। तल्लक्षणं यथा स्पष्टं भवति। तथोदाह्रियत इत्यर्थः। स्वदेहादि-
देन प्रत्यक्षाः पुत्रादयो बाह्याः तद्धर्मान् साकल्यादीन् देहविशिष्टात्मन्यध्यस्यति तद्धर्मत्वाभावात् स्वस्मिंस्तत्तुल्यधर्मान-
ध्यस्यतीत्यर्थः। देहादपरोक्षत्वात् तद्धर्माध्यासमुदाहरति। अन्यथाध्यासनं गीकारार्थेति द्रष्टव्यं। देहेन्द्रियधर्मानात्मनो
विशिष्टात्मन्यध्यस्यतीत्यत आह तथेति। कृशत्वादिधर्मवतो देहादेरात्मनि तादात्म्येन कल्पितत्वात् तद्धर्माः साक्षाद-
त्मन्यध्यस्ता इति मंतव्यं। अत्रान्ते प्रसारकरूपे साक्षिणि मनोधर्माध्यासमाह तेषां अन्तःकरणेति। धर्माध्यासमुक्त्वा
तद्वदेव धर्म्यध्यासमाह एवमिति। अन्तःकरणं साक्षिण्यभेदेनाध्यस्य तद्धर्मान् कामादीनुत्थ्यस्यतीति मंतव्यं।
स्वप्रकाशात्मनो वस्तुतः प्रतिलोम्येनान्तःकरणदुःखात्मकाहंकारादिविलक्षणतया तच्चित्सुखस्वात्मकत्वेनाध्यस्यति
प्रकाशत इति प्रसक्तः। एवमात्मन्यनात्मतद्धर्माध्यासमुदाहृत्यानात्मन्यात्मनोपि संसृष्टत्वेनाध्यासमाह तं
चेति। अहमिति स्वप्नाध्यासचिदात्मनोऽध्यासानुवादः। अन्यथा जडादौ व्यापत्तेः। नचानध्यस्तस्याध्यासे भानप्रसक्तिरित
सर्वद्रष्टृत्वादात्मविस्मरणात्मनः संसर्गाध्यास एष्टव्यः। तद्विपर्ययेणेति। तस्याध्यस्तस्य जडस्य विपर्ययो चित्
न तस्य चैतन्यं तदात्मनास्थितमिति यावत्। तत्रापि नैकान्तात्मनः संसर्गः मनस्यतानेषपहितस्य देहादौ मन
उपहितस्येति [illegible] विशेषः। एवमात्मानात्मनोरध्यासात् [illegible] कर्तृत्वसादिलक्षणः बुद्ध्यादौ चात्माध्यासाच्चैतन्य
[illegible] इति भावः। वर्णिताध्यासमुपसंहरति। एवमयमिति। अनादिरविद्या [illegible] तत्पाकार्याध्यासस्याना-
दित्वं। अध्यासात् संस्कारस्ततोऽध्यास इति प्रवाहतोऽनैसर्गिकत्वं। एवमुपादाननिमित्तंचोक्त्वा फलमाह [illegible]
[illegible] तदुक्तं [illegible] नरूपमस्येह तथोपलभ्यते नांतो नचादिर्नच संप्रतिष्ठेति हेतु

...तत्त्वेति पदेन ... प्रकाशो ... इति द्वितीयं वर्णकं। एवं वर्णकद्वयेन वेदान्तविचारस्य कर्तव्यता
यां विषयप्रयोजनसंबन्धानां ... चेति हेतुद्वयं ... स्यार्थिकर्तव्यं व्याख्याय ... व्याख्यातारम्भमाणः पुन
रप्यधिकारिणं ... शास्त्रारम्भं संदेहे सति अथशब्दस्यानन्तर्यार्थत्वे तस्याधिकारिणं लाभाय
ति। तत्र अथशब्द इति। सूत्र इत्यर्थः। मंगलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेति अथशब्दस्य बहवोऽर्थाः सन्ति। तत्राथ योगा
नुशासनमिति सूत्रे यथा अथशब्द आरम्भार्थकः योगशास्त्रमारभ्यत इति तद्वदत्र किं न स्यादित्यत आह नाधिकारार्थ इति।
अयमाशयः। किं जिज्ञासापदं ज्ञानेच्छापरं उत विचारलक्षकं। आद्ये अथशब्दस्यारम्भार्थकत्वे ब्रह्मज्ञानेच्छा आरभ्यत इति
सूत्रार्थः स्यात् स चासंगतः तस्या अनारभ्यत्वात् न हि प्रत्यक्ष... करणं इच्छा क्रियते किंतु तया विचारः। न द्वितीयः। कर्तव्य
पदाध्याहारं विना विचारलक्षकत्वायोगात्। अध्याहृते च तेनैवारम्भोक्तेरथशब्दवैयर्थ्यात्। ... सिद्धार्थमानं
तदर्थत्वेऽवयुक्तेति। अनन्तरार्थत्वमभिप्रेत्य मर्थान्तरं दूषयति। मंगलस्येति। वाक्यार्थो विचारकर्तव्यता। न हि तत्र मंगल
स्य कर्तृत्वादिनान्वयोऽस्तीत्यर्थः। ननु सूत्रकृता शास्त्रादौ मंगलं कार्यमिति अथशब्दः प्रयुक्त इति चेत्सत्यं। न तस्यार्थो मं
गलं किंतु तच्छ्रवणमुच्चारणं च मंगलं कृत्यं करोति तदर्थस्यानन्तर्यमेवेत्याह। अर्थान्तरेति। अर्थान्तरं आनन्तर्यं। श्रुत्या
श्रवणेन। शंखवीणादिनादश्रवणवदोंकाराथशब्दयोः श्रवणं मंगलफलकं ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पु
रा। कंठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ इति स्मरणादिति भावः। ननु प्रपंचो मिथ्येति प्रकृते सति अथेत्यनन्तरं प्रपं
चः सत्य इत्यत्र पूर्वप्रकृतार्थादुत्तरार्थस्यार्थान्तरत्वार्थोऽथशब्दो दृष्टः तथात्र किं न स्यादित्यत आह पूर्वेति। फलत इति। फलस्ये
त्यर्थः। अपेक्षितत्वाभावात् पूर्वप्रकृतार्थविशेषः प्रकृतो नास्ति यस्मात्तस्यार्थान्तरत्वमथशब्देनोच्येत। यतः कुतश्चिदर्था
न्तरत्वं सूत्रकृता न वक्तव्यं फलाभावात्। यदि फलस्याजिज्ञासापदोक्तकर्तव्यविचारस्य हेतुत्वेन यत्पूर्वं प्रकृतं तदपेक्षा
स्तीति अपेक्षावत्त्वात् प्रकृतहेतुमाक्षिप्य तस्मादर्थान्तरत्वमुच्येत तदर्थान्तरत्वमानन्तर्यान्तर्भवति। हेतुफलभाव
स्यानन्तर्यस्यावश्यंवाच्यत्वात् तस्मादिदमर्थान्तरमित्युक्ते तस्य हेतुत्वाप्रतीतेः। तस्मादिदमनन्तरमित्युक्तेऽपि च

ति

येव हेतुत्वप्रतीतिः। न चानन्तर्यादनन्तरं गौरीत्यत्र हेतुत्वस्यानापत्तिरिति वाच्यं। तयोर्देशतः कालतो वा व्यवधाने नानंतर्यस्यानुपपत्त्या
त्। अनंतरलाभगनीफलयोरेवमुख्यमानंतर्यं मध्ये व्यवधानात्। नन्वि भुक्तेरुत्पत्तिरर्थांतरसंबन्धाच्च। ज्ञातत्वाद्धेफल्याच्चेति भावः।
फलस्य विचारस्य पूर्वप्रकृतहेत्वपेक्षायाः बलाद्घद्धर्थांतरत्वं तस्यानंतर्याभेदात् न पृथगाध्यक्षाकार्यत्वमिति स्याद्धेतुत्वमाधाय
जनीये। यद्वा पूर्वप्रकृतेर्थे पेक्षायस्या अर्थांतरतायास्तस्याः फलं ज्ञानं तद्द्वारानंतर्यं व्यतिरेकाच्च तज्ज्ञानेन तस्याः ज्ञान
लोऽनर्थो वा न्यायशास्त्रार्थत्वेऽसमर्थः। ननु आनंतर्यार्थत्वेऽप्यानंतर्यस्याप्युपिः करत्वात् आह। सति चेति। यन्नियमेन पूर्ववृत्तं
पूर्वत्वमपि पुष्कलकारणमिति यावत्। तदेवाथ्यायादितिवक्तव्यमित्यर्थः। नन्वस्तु धर्मविचारे इव ब्रह्मविचारेऽपि वेदाध्ययनं पु
ष्कलकारणमित्यत आह। स्वाध्यायेति। समानं ब्रह्मविचारे साधारणकारणं न पुष्कलकारणमित्यर्थः। ननु संयोगपृथक्त्व
न्यायेन यज्ञेन दानेनेत्यादिश्रुत्या यज्ञादिकर्माणि ज्ञानाय विधीयन्त इति सर्वापेक्षाधिकरणे वक्ष्यते। तथा च पूर्वतंत्रेण
तदवबोधः पुष्कलकारणमिति शंकते। नन्विति। इह ब्रह्मजिज्ञासायां विशेषः असाधारणं कारणं। एकस्य तूभयत्वे संयोगपृथक्त्व
योगपृथक्त्वमिति जैमिनिसूत्रं। तदर्थस्तु एकस्य कर्मण उभयत्वे अनेकफलसंबन्धे संयोगपृथक्त्वं संबन्धबोधकवाक्य
तस्य पृथक्त्वं भेदः तत्रोदाहरणं दध्ना जुहोति। दध्नेन्द्रियकामस्य जुहुयात्। खादिरो यूपो भवति। खादिरं वीर्यकाम
स्येत्यनेन खाद्यादिकर्मणां स्वर्गादिफलमपि यज्ञेनेति वचनात् ज्ञानार्थत्वं चेति। परिहरति। नेत्यादि
ना। अयमाशयः। न तावत् पूर्वतंत्रस्थन्यायसहस्रं ब्रह्मज्ञाने तद्विचारे वा पुष्कलकारणं। तस्य धर्मनिर्णयमात्रहेतुत्वा
त्। नापि कर्मनिर्णयः तस्यानुष्ठानहेतुत्वात्। न हि कर्माग्न्योरिव धर्मब्रह्मणोः कश्चिदस्ति यया धर्मज्ञानात् ब्रह्मज्ञा
नं भवेत्। यद्यपि शुद्धिविवेकादिद्वारा कर्माणि हेतवः तथापि तेषामाधिकारिविशेषणत्वं। अज्ञातानां तेषां तन्मा
तरकृतानामपि फलहेतुत्वात्। अधिकारिविशेषणं ज्ञायमानं प्रवृत्तौ पुष्कलकारणमानंतर्यावधिहेतुवक्तव्यं अ
तः कर्माणि तदवबोधः तत्त्वन्यायविचारो वा नानंतर्यावधिरिति न ब्रह्मजिज्ञासायां धर्मजिज्ञासानंतर्यमिति। ननु धर्म
ब्रह्मजिज्ञासयोः कार्यकारणत्वाभावेऽपि आनंतर्योक्तिद्वारा क्रमज्ञानार्थोऽथशब्दः हृदयस्याग्रेऽवद्यत इत्यादिवदथ

२५

थवस्वस्य वेदानां क्रमप्राप्तानामर्थशब्दवदिहापि शङ्क्याह । यथेति । अवदानानामानन्तर्यनियमः । क्रमो यथाथशब्दार्थ
स्तस्य विवक्षितत्वात् न तथेह धर्मब्रह्मजिज्ञासयोः क्रमो विवक्षितः । एककर्तृकत्वाभावेन तयोः क्रमानपेक्षणात् अतो न
क्रमार्थोऽथशब्दः स्यादर्थः । ननु तयोरेककर्तृत्वमेव कुतो नास्तीत्यत आह । शेषेति । येषामेकप्रधानशेषता । यथावदानानां
प्रयाजादीनां च । ययोश्च शेषशेषित्वं यथा प्रयाजदर्शयोः । यस्य चाधिकृताधिकारित्वं यथाऽपां प्रणयनं दर्शपूर्णमा
सांगमाश्रित्य गोदोहनेन पशुकामस्येति विहितस्य गोदोहनस्य । यथा वा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति दर्शा
द्युत्तरकाले विहितस्य सोमयागस्य दर्शाद्यधिकृताधिकारत्वं तेषामेककर्तृकत्वं भवति । ततश्चैकप्रयोगवचनगृ
हीतानां तेषां युगपदनुष्ठानासंभवात् क्रमाकांक्षायां श्रुत्यादिभिर्हि क्रमो बोध्यते नैवं जिज्ञासयोः शेषशेषित्वे श्रुति
लिंगादि प्रमाणमस्ति । ननु ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनी भूत्वा प्रव्रजेदिति श्रुत्या अपीत्यविधिवद्दारपुत्रा
नुत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेदिति स्मृत्या च अधिकृताधिकारत्वं भातीति । तन्न ब्रह्मचर्यादि
व प्रव्रजेत् आसादयति शुद्धात्मा मोक्षे वै प्रथमाश्रम इति श्रुतिस्मृतिभ्यां तयोदाहृतश्रुतिस्मृत्योः शुद्धचित्तवि
षयत्वावगमात् । एतदुक्तं भवति यदि जन्मान्तरकृतकर्मभिः शुद्धचित्तं तदा ब्रह्मचर्यादेव संन्यस्य ब्रह्म जिज्ञासितव्यं
यदि न शुद्धमिति रागो विज्ञायते तदा गृही भवेत् तत्रापि शुद्धौ वनी भवेत् तत्राप्यशुद्धौ तत्रैव कालमाकल्पयेत् वने
शुद्धौ प्रव्रजेदिति । तथा च श्रुतिः यदहरेव विरजेत् तदहरेव प्रव्रजेदिति तस्मान्नानयोरधिकृताधिकारत्वं किंचिन्मान
मिति भावः । ननु मीमांसयोः शेषशेषित्वमधिकृताधिकारत्वं च मास्तु एकमोक्षफलकत्वेनैककर्तृकत्वं स्यादेव । व
दन्ति हि ज्ञानकर्मभ्यां मुक्तिरिति समुच्चयवादिनः । एवमेकवेदार्थजिज्ञासारूपत्वाच्चैककर्तृकत्वं । तथा चाग्नेयादिष
ड्यागानामेकस्वर्गफलकानां द्वादशाध्यायानां चैकधर्मजिज्ञासारूपाणां क्रमवत्तयोः क्रमो विवक्षित इति क्रमार्थो
ऽथशब्दोऽस्त्वित्याशंक्याह । फलेति । फलभेदात् जिज्ञास्यभेदाच्च न क्रमो विवक्षित इत्यनुषंगः । यथा सौर्यवैष्णवप्राजाप
त्यचरूणां ब्रह्मवर्चसस्वर्गादिफलभेदात् यथा वा काममचिकित्सातंत्रयोर्जिज्ञास्यभेदान्न क्रमापेक्षा तद्वन्मीमां

=उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिः ॥ =४

13

सयोर्न [illegible] तिभावः। तत्र फलभेदं विवृणोति। अभ्युदयेति। विषयाभिमुख्येनोदेतीत्यभ्युदयो विषयाधीनं सुखं स्व
र्गादिकं [illegible] मित्यान हेतो मीमांसायाः फलमित्यर्थः। न केवलं फलस्य स्वरूपतो भेदः किंतु हेतुतोऽपीत्याह। तच्चेति। अ
लक्षेन [illegible] मीमांसायाः फलं तु तद्विरुद्धमित्याह। निःश्रेयसेति। निरपेक्षं श्रेयो निःश्रेयसं मोक्षस्तत्फलमि
त्यर्थः। अ [illegible] नं चस्वोत्पत्तिव्यतिरिक्तमनुष्ठानं नापेक्षत इत्याह। न चेति। स्वरूपतो हेतुतश्च फलभेदो व्यसमुच्चय
इति भाव [illegible] साध्यभेदं विवृणोति। भव्यश्चेति। भवतीति भव्यः साध्य इत्यर्थः। साध्यत्वे हेतुमाह। नेति। नहि
तुष्टत्वेन [illegible] रूपेति। पुरुषव्यापारः प्रयत्नः। तत्र हेतुर्यस्य तेनसादित्यर्थः। कृतिसाध्यत्वात् कृतिजन्यत्वात् [illegible] धर्मस्या
सत्वेन तु [illegible] दित्यर्थः। ब्रह्मणो धर्माद्वैलक्षण्यमाह। इहत्विति। उत्तरमीमांसायाश्च विषयः भूतं ब्रह्म साध्यं। तत्र हेतुर्नि
त्योति। स्व [illegible] त्सादित्यर्थः। साध्यासाध्यत्वेन धर्मब्रह्मणोः स्वरूपभेदमुक्त्वा हेतुतोऽप्याह। नेति। धर्मवत् [illegible] लक्ष्यते नेत
र्थः। मान [illegible] भेदमाह। चोदनेति। अस्यात्मज्ञानस्य [illegible] चोदना तस्याः प्रवर्तकत्वं [illegible] वैलक्षण्यार्थं [illegible]
भेदद्रस [illegible] मतयावक्यं विवृणोति। याहीति। लक्षणं प्रमाणं स्वर्गकामो यजेतेत्यादिवाक्यं हि स्वविषये धर्मे यागादि
करणक [illegible] दिफलकभावनारूपे फलतेतु यागादिगोचरां नियोगवाहितत्साधने यागादौ पुरुषं प्रवर्तयद्वावे
बोधयति [illegible] यमात्मा [illegible] ब्रह्मत्वेत्यादिवाक्यं तु समर्थं केवलमप्रपंचं ब्रह्म बोधयत्येव न प्रवर्तयतिविषयाभावादि
त्यर्थः। नन्ववबोध एव विषयस्तत्राह। न पुरुषेति। ब्रह्मचोदनया पुरुषोऽवबोध्येन प्रवर्तते तद्वत्रहेतुः पूर्ववाक्यो
हि अवबोधयस्येति। स्वजन्यज्ञाने स्वयं प्रमाणं न प्रवर्तकमित्यत्र दृष्टांतमाह। यथेति। मानादेवबोधस्य जातत्वात्
तेचाविध्ययोगात् न चावगतार्थज्ञाने पुरुषप्रवृत्तिः। तथा च प्रवर्तकत्वमप्रमेयो धर्मः उदासीनमानमेयं ब्रह्मेति जि
ज्ञास्यभेदात् न तन्मीमांसयोः क्रमार्थोऽथशब्द इतिभावः। एवमथशब्दस्यार्थं तरासत्त्वादानंतर्यवाचित्वे सति
तदवधित्वेन पूर्ववृत्तं कारणं [illegible] वक्तव्यमित्याह। तस्मादिति। उपदिश्यते सूत्रकृतेति शेषः। तत्किमित्यत आह। उच्यत
इति। विवेकादीनामागमिकत्वेन प्रामाणिकत्वं पुरस्तादेवोक्तं लौकिकव्यापारान्मनसः उपरमः शमः बाह्यकरण

शम

यवार्थमाह। ज्ञातुमिति। न च नवगते वस्तुनीच्छा मा भूत् दर्शनात्तस्या मूलं विषयज्ञानं वक्तव्यं ब्रह्मज्ञानं तु जिज्ञासायाः फलं तदेव
मूलं कथमित्याशंक्याह। अवगतीति। आवरणनिवृत्तिरूपाभिव्यक्तिमत्त्वेनावगतिः पर्यन्तो व[illegible]धिर्यस्याः खण्डस्य क्ष
कारवृत्तिज्ञानस्य तदेव जिज्ञासायाः कर्मत्वं देव फलं। मूलं त्वापातज्ञानमिति सन्धुना वक्ष्यते इति फलमूलज्ञानयोर्भेदान्न
जिज्ञासानुपपत्तिरित्यर्थः। ननु गमनस्य ग्रामः कर्म तत्प्राप्तिः फलमिति भेदात् कर्मैव फलमित्ययुक्तं तत्राह। फलेति। क्रिया
न्तरे तयोर्भेदेऽपि इच्छायाः फलविषयत्वात् कर्मैव फलमित्यर्थः। ननु ज्ञानावगत्योरैक्यादुद्देश्यविधेययुक्तेः सत्यत्वाह। ज्ञानेन्वे
ति। ज्ञानं वृत्तिः अवगतिस्तत्फलं इति भेद इति भावः। अवगतिमन्तमित्यं अपि तु अवगतेः [illegible]फलत्वं स्फुटयति। अर्थेति।
गिराब्दो कृतहेतुमाह। निःशेषेति। बीजमविद्या आदिर्यस्यानर्थस्य तत्राशकर्त्रादि इत्यर्थः। एवं च यथावार्थमुक्त्वा सूत्रवाक्य
स्यार्थमाह। तस्मादिति। अत्र सन्प्रत्ययस्य विचारलक्षणत्वं तत्प्रत्ययेन सूचयति अथातः शब्दाभ्यामधिकारिणः सा
धितत्वात्। तेन ब्रह्मज्ञानाय विचारः कर्तव्य इत्यर्थः। इति तृतीयवर्णकं प्रथमवर्णके बन्धस्याध्यासत्वोक्त्या विषयादि
प्रसिद्धावपि ब्रह्मप्रसिद्ध्यप्रसिद्ध्योर्विषयादिसंभवासंभवाभ्यां शास्त्रारंभसंदेहे पूर्वपक्षमाह। तत्पुनरिति। पुनःश
ब्दो वर्णकान्तरद्योतनार्थः। यदि वेदान्तविचारात् प्रागेव ब्रह्म ज्ञातं तर्हि अज्ञातत्वरूपविषयत्वं नास्ति। अज्ञानाभावेन तन्नि
वृत्तिफलमपि नास्तीति न विचारयितव्यं। अथाज्ञातं केनापि तर्हि तदुद्देशेन विचारः कर्तुं न शक्यते अज्ञातस्योद्देश्या
योगात् तथा च बुद्धावनारूढस्य विचारासम्भवा शास्त्रेण वेदान्तैश्च प्रतिपादनायोगात् तत्प्रतिपाद्यत्वरूपसंबन्धो नास्ती
ति ज्ञानानुत्पत्तेः फलमपि नास्तीत्यनारभ्यं शास्त्रमित्यर्थः। आपातप्रसिद्ध्या विषयादिलाभादारम्भणीयमिति सिद्धा
न्तयति। उच्यत इत्यादिना। प्रसिद्धं तावदित्यर्थः। अस्ति [illegible] तत्स्याप्रकृतत्वेनास्तिपदस्य प्रसिद्धिपरत्वात्। ननु केन मा
नेन ब्रह्मणः प्रसिद्धिः। न च सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्या सेति वाच्यं। ब्रह्मपदस्यालोके संगतिग्रहाभावेन तद्घटि
तवाक्यस्याबोधकत्वात् इत्याशंक्य ब्रह्मपदव्युत्पत्त्या प्रथमं तस्य निर्गुणस्य सगुणस्य च प्रसिद्धिरित्याह। ब्रह्मश
ब्दस्येति। अस्यार्थः। श्रुतौ सूत्रे च ब्रह्मप[illegible]दस्य प्रयोगान्यथानुपपत्त्या कश्चिदर्थोऽस्तीति निश्चीयते प्रमाणवाक्ये नि

 =रस्य निर्ज्ञेयस्य वस्तुनः ईश्वरज्ञानाविषयत्वे कस्यचित्कार्यस्य वा ईश्वरज्ञानविषयत्वे तस्य अल्पत्वप्रसंगेन सर्वार्थः=

र्थकपदप्रयोगादर्शनात्। स चार्थो महत्त्वरूप इति व्याकरणान्निश्चीयते। बृहि वृद्धाविति स्मरणात्। सा च वृद्धिः निरव
धिकमहत्त्वमिति संकोचकाभावात्। श्रुतावनंतपदेन सह प्रयोगाच्च ज्ञायते। निरवधिकमहत्त्वं च नवत्वादिदोष
(५।३ वत्त्वे सर्वज्ञत्वादिगुणहीनत्वे च न संभवति। लोके गुणहीनदोषवतोरल्पत्वप्रसिद्धेरतो बृंहणाद्ब्रह्मनित्यमुक्तं देश
कालवस्तुतः परिच्छेदाभावरूपं नित्यत्वं प्रतीयते। अविद्यादिदोषशून्यत्वं शुद्धत्वं जाड्यादिराहित्यं बुद्धत्वं बंध
कालेऽपि स्वतो बंधाभावो मुक्तत्वं च प्रतीयते। एवं सकलदोषशून्यं निर्गुणं प्रसिद्धं तथा सर्वज्ञत्वादिगुणकं चेत्तत्प
दवाच्यं प्रसिद्धं ज्ञेयम्। कार्यस्य वा परिशेषेऽल्पत्वप्रसंगेन सर्वज्ञत्वस्य सर्वकार्यशक्तिमत्त्वस्य चालाभादिति। ए
वं तत्पदात्प्रसिद्धेः प्रमाणान्तरेणानालता दज्ञाननिवर्त्तकत्वात् जिज्ञासोपपत्तिरित्युक्तो त्वंपदार्थात्मनापि ब्रह्मणः
प्रसिद्ध्या तदुपपत्तिरित्याह। सर्वस्येति। सर्वस्य लोकस्य योऽयमात्मा तदभेदात् ब्रह्मणः प्रसिद्धिरित्यर्थः। नन्वात्म
नः प्रसिद्धिः कुत आह। सर्वो हीति। अहमस्मीति न प्रत्येतीति न किंतु प्रत्येत्येव स्वे वसच्चिदात्मनः प्रसि
द्धिरित्यर्थः। आत्मनः कुतः सत्त्वमिति शून्यमतमाश्रयात। यदीति। आत्मनः शून्यस्य प्रतीतौ अहं नास्मीति लो
को जानीयात्। लोकस्त्वहमस्मीति जानाति तस्मादात्मनोऽस्तित्वप्रसिद्धिरित्यर्थः। आत्मप्रसिद्धावपि ब्रह्मणः
किमायातं तत्राह। आत्मा चेति। अयमात्मा ब्रह्मेति श्रुतेरिति भावः। प्रसिद्धिपक्षोक्तदोषं पूर्वपक्षे पास्या
र्पयति। यदीति। अज्ञातत्वाभावेन विषयाद्यभावात् अविचार्यत्वं प्राप्तमित्यर्थः। यथेदं रजतमिति वस्तुतः शुक्ति
प्रसिद्धं सत् इदमहमस्मीति सत्यत्वेनान्यरूपात्मत्वसामान्ये नव वस्तुतो ब्रह्मणः प्रसिद्धिर्नैयं पूर्णानंदब्रह्मस्वरूपवि
शेषगोचरां वादिनो विवादाभावप्रसंगात्। न हि शुक्तित्वे विशेषदर्शने सति रजतरंगमन्यद्वा इति विप्रति
पत्तिरस्ति। अतो विप्रतिपत्त्यन्यथानुपपत्त्या सामान्यतः प्रसिद्धावपि विशेषस्याज्ञातत्वाद्विषयादिसिद्धि
रिति सिद्धान्तयति। नेत्यादिना। सामान्यविशेषभावस्यात्मनि सच्चित्पूर्णादिपदयोरभेदात्कल्पित इति

मंतव्यं। तत्र स्थूलसूक्ष्मक्रमेण विप्रतिपत्तीरूपन्यस्यति। देहमात्रामित्यादिना। शास्त्रज्ञानशून्याः प्राकृताः वेदबाह्यमतानुसा
तार्किकादिमतमाह। असीति। सांख्यमतमाह। भोक्तेति। किमात्मा देहादिरूपः उत भिन्न इति विप्रतिपत्तिकोटि वेनदेहे
न्द्रियमनोबुद्धिशून्यान्यज्ञातद्भिन्नोपि कर्तृत्वादिमानन्वयेति विप्रतिपत्तिकोटित्वेन तार्किकसांख्यपक्षावुपन्यस्याथ
त्वपीश्वराद्भिन्नो न वेति विवादकोटित्वेन योगिमतमाह। अस्ति तद्व्यतिरिक्त इति। निरतिशयमसत्वं गतहीनो ईश्वरः स
र्वज्ञत्वादिसंपन्न इति योगिनो वदंति। भेदकोटिमुक्त्वा सिद्धांतकोटिमाह। अ [illegible] सभोक्तुरिति। भोक्तुरेव स्याथ
र्द्रः साक्षिणः स ईश्वरः आत्मा स्वरूपं इति वेदांतिनो वदंती त्यर्थः। विप्रतिपत्तीरुपसंहरति। एवं बहवइति विप्रतिप
त्तीनां प्रपंचो निरासश्च विवरणोपन्यासे दर्शितः सुखबोधायेती। इह परम्पते। तत्र युक्तिवाक्याभासाः सिद्धांतिनो
जीवो ब्रह्मैवात्मत्वात् ब्रह्मवदित्यादियुक्तेः। तत्त्वमसीत्यादिश्रुतेश्च बाधिताभासत्वात्। अन्ये तु देहादिरात्माहं
प्रत्ययगोचरत्वात् व्यतिरेकेण घटादिवत् इत्यादियुक्त्याभासः। स वा एष पुरुषोन्नरसमयः इंद्रियसंवादे चक्षु
रादयः ते ह वाचमूचुः मनुन्नदुवाच यो यं विज्ञानमयः असदेवेदमग्र आसीत् कर्त्ता बोद्धा भर्त्ता न मन्ता नम्यः आत्मान
मेतरोपपयती ति नाप्याभासं चाश्रिता इति विरवाग्नाः। देहादिः अनात्मा भौतिकत्वात् घटवदित्यादिन्यायैरानंद
मयोभ्यासादित्यादिसूत्रैश्चाभासत्वं वक्ष्यते। ननु संतु विप्रतिपत्तयः तथापि यस्य यन्मते अज्ञातदाश्रयणात्तस्य
स्वार्थः सेत्स्यति किं ब्रह्मविचारारंभेणेत्यत आह। तत्रेति विचार्येति। आत्मैक्यज्ञानादेव मुक्तिरितिवस्तुगतिः।
मतांतराश्रयणे तदभावान्मोक्षासिद्धिः। किंचात्मानमन्यथा ज्ञात्वा तत्पापेन संसारांधकूपे पतेत्। अपि च तमः
प्रविशंति ये के चात्महनो जना इति श्रुतेः। योन्यथा संतमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणा
त्मापहारिणेति वचनाच्चेत्यर्थः। अतः सर्वेषां मुमुक्षूणां निःश्रेयसफला यवेदांतविचारः कर्तव्य इति सूत्रार्थमु
पसंहरति। तस्मादिति। ब्रह्मज्ञस्याप्यस्त्वेन विषयादिसद्भावात् आतात्पर्यत्वादधिकारिणा प्रासादपातप्राप्ति
प्यो विषयादिसंभवाच्च। वेदांतविषया मीमांसा पूजितविचारणा वेदांताविरोधिनो येतर्कास्तैत्रौ तदस्त्वांमु
पकरणानि यस्याः सा निःश्रेयसायारभ्यतइत्यर्थः। ननु सूत्रे विचारवाचिपदाभावात् तदभावात् कथं सूत्रार्थः

भो

सा:

भा॰टी॰रा॰

१९

छो१

इत्यत आह। अथेति। अथ तत्तानेन[...]ति द्वारा विचारे लक्षणादिचया तत्कर्तव्यतां अनीतीति भावः। एवं प्रथमसूत्रस्य च सारोर्थः। व्याख्यान
च तृतीयेन दर्शिताः। सूत्रस्य चानेकार्थत्वं भूषणं। नन्विदं सूत्रं शास्त्राद्बहिः स्थित्वा शास्त्रमारंभयति अंतर्भूतं वा। आद्ये
तस्यहेयता। शास्त्रासंबंधात्। द्वितीये तस्यारंभकं वाच्यं। न चेत्स्वयमेवारंभकं। स्वस्मात्स्वोत्पत्तेरिष्टत्वाश्रयात्। न चारंभश्च
तरं पश्चा प्रवृत्तिः। उच्यते। श्रवणविधिनारंभ्यमिदं शास्त्रं शास्त्रान्तर्गतमेव शास्त्रारंभं प्रतिपादयति। यथा स्वमनेधिविधिर्वैदांत
गते एव कृत्स्नवेदस्याध्ययने प्रवृत्ते केन द्विसनवद्यं॥ प्रथमसूत्रं समाप्तं॥ ॥प्रथमसूत्रेण शास्त्रारंभमुपपाद्य शास्त्रमार
भमाणः पूर्वोत्तराधिकरणयोः संगतिं वक्तुं वृत्तं कीर्त्तयति। अथेति। मुमुक्षुणा ब्रह्मज्ञानाय वेदांतविचारः कर्तव्य इत्युक्तं। ब्रह्मयुक्तिरित्यादिविशिष्टविचाराणां
ब्रह्मणो विचार्यत्वोक्त्या अर्थात्प्रमाणादिविचाराणां प्रतिज्ञातत्वेपि ब्रह्मप्रमाणं ब्रह्मयुक्ति[...] तत्र लक्षणं वक्तव्यं तन्न संभवतीत्याक्षिप्य सूत्रकृतं पुनः
विशेषणं ब्रह्मज्ञानं विना कर्तुमशक्यत्वात् तत्स्वरूपज्ञानाय आदौ लक्षणं वक्तव्यं। आक्षेपेणास्योत्थानादाक्षेप
यन्नेवं लक्षणसूत्रमवतारयति। किं लक्षणमिति। किमाक्षेपे। नास्त्येवं लक्षणमित्यर्थः। आक्षेपपादसंगतयः। तथाहि
संगतिः। लक्षणद्वौ निवेदोतानो स्पष्ट ब्रह्मलिंगानो लक्ष्ये ब्रह्मणि समन्वयोक्तेः श्रुतिशास्त्रा स्यापपादसंगतयः। तत्र पूर्वपक्षे ब्रह्मस्वरू
यतो वा इमानि भूतानि जायंते इत्यादिवाक्यं विषयः। तत्किं ब्रह्मणो लक्षणं वक्तुं न वेति संदेहः। तत्र पूर्वाधिकरणफलमेव फलमिति यतो
पाञ्ञसिध्या मुक्त्यसिद्धिः। फलं सिद्धांते तत्सिद्धिरिति भेदः। पक्षप्रक्षेपसंगतो पूर्वाधिकरणफलमेव फलमिति यतो। अयं रूपात् प्रवर्त्तते इति। तथाप्यस्यपा
पृथक्न वक्तव्यं। तदुक्तं। आक्षेपे चापवादे च प्राप्तौ लक्षणकर्मणि। प्रयोजनं न वक्तव्यं यश्च कृत्वा प्रवर्त्तते इति। तत्र नयास्तीति प्राप्तं।
र्थमुक्तं मिति मंतव्यं। यत्पूर्वाधिकरणे सिद्धांतेन पूर्वपक्षः तत्रापवादकी संगतिः प्राप्तिस्तदर्थ्य चिंता। तत्र नयास्तीति प्राप्तं।
जन्मादेर्जगद्धर्मत्वेन ब्रह्मलक्षणत्वायोगात्। न च उपादानत्वे सति कर्तृत्वं लक्षणमिति वाच्यं। तदनुमानस्य श्रुतस्य नु
त्वात्। कर्तृत्वोपादानत्वे द्रष्टव्याभावे नानुमाना प्रवर्त्तते। न च श्रौतस्य ब्रह्मणः श्रुत्यैव लक्षणसिद्धेः किमनुमानेनेति
वाच्यं। अनुमानस्य श्रुतस्यानुग्राहकत्वेन तदभावे तद्विरोधे वा श्रुत्यर्थासिद्धेः। न च जगत्कर्तृत्वमुपादानत्वं वा प्रत्येकं लक्ष
णमस्त्विति वाच्यं। कर्तृमात्रस्योपादानाद्विद्वन्नस्य ब्रह्मत्वायोगात्। वस्तुतः परिच्छेदादिति प्राप्ते पुरुषामात्रस्य
अनुमानस्याप्रतिष्ठितत्वात् तीद्रियार्थस्यातेच्याप्तेयोगात्। अपौरुषेयतया निर्दोषश्रुत्युक्तो भयकारणत्वस्य सुत्वादिह

कण्ठ

१९

जो दृश्यमेना
त्यादिलक्षणत्व

त्वं तेन संभावितं तु स्यात्वात्तदेव लक्षणमिति सिद्धान्तयति। जन्माद्यस्य यत इतीति। अत्र यद्यपि जगज्जन्मस्थितिलयका
रणत्वं लक्षणं प्रतिपाद्यते तथाप्यत्र प्रकृतिश्च साधिकरणे तत्कारणत्वं न कर्तृत्वमात्रं। किंतु कर्तृत्वे सोपादानत्वोभय
रूपमिति वक्ष्यमाणं सिद्धवत्कृत्योभयकारणत्वं लक्षणमित्युच्यत इति न पौनरुक्त्यं। ननु जिज्ञास्यनिर्गुणब्रह्मलक्षणः
कारणत्वं कथं लक्षणमिति चेत्तदुच्यते। यथा रजतं शुक्तेर्लक्षणं यद्रजतं सा शुक्तिरिति तथा यज्जगत्कारणं तद्ब्रह्मेति कि
ल्पितं कारणत्वं तटस्थमेव ब्रह्मणो लक्षणमित्यनवद्यं॥ सूत्रं व्याचष्टे। जन्मेत्यादिना। बहुव्रीहौ पदार्थाः सर्वे वाक्यार्थ
स्यान्यपदार्थस्य विशेषणानि। यथा चित्रगोर्देवदत्तस्य चित्रगावः तद्वदत्रापि जन्मादीति नपुंसकैकवचनं द्योतितं
स्य समाहारस्य जन्मस्थितिभंगस्य जन्म विशेषणं तथा च जन्मनः समासार्थैकदेशस्य गुणसंविज्ञानं यत्पिनू
बहुव्रीहौ सतत्कृणत्वं विज्ञानमित्यर्थः तत्र यज्जन्म कारणं तद्ब्रह्मेति ब्रह्मलक्षणविधानं न पुष्कलं। स्थितिलयकारणानि
त्वं सेन ज्ञातेष्वसौ तस्य ज्ञानमहाक्यत्वात् अतो जन्मस्थितिभंगे निरूपितानि त्रीणि कारणानि मीलितान्येव ल
क्षणमिति मत्वा सूत्रे समाहारो द्योतित इति ध्येयं। नन्वादित्वं जन्मनः कथं ज्ञातमत्र संसारस्यानादित्वात् इत्यत आह। ज
न्मनश्चेति। मूलश्रुतौ यतो वा इमानि भूतानि जायन्त इति जन्मनः प्रथमनिर्देशात् तदपेक्ष्य सूत्रकृता जन्मन आदित्वमुक्तमित्यर्थः। इदमः प्रत्यक्षार्थ
मात्रवाचित्वमाशंक्याह पक्षितिसर्वकार्यवाचित्वमाह। अस्येतीति। वियदादिजगतो भिन्नत्वात् जन्मादिसंबंध इ
सतआह। षष्ठीति। वियदादेर्महाभूतानां जन्मादिसंबंधो वक्ष्यत इति भावः। अनुगतो जन्मादेर्विशेष्यत्वं
बंधाभावात्तल्लक्षणत्वे विसंवादस्य तत्कारणत्वं लक्षणमिति पञ्चम्यर्थमाह। यत इतीति। यच्छब्देन सर्वज्ञा
मनंतमानंदरूपं वस्तूच्यते। आनंदाद्ध्येवेति निर्णीतत्वात् तथा च स्वरूपलक्षणसिद्धिरिति मंतव्यं पदार्थमु
क्त्वा पूर्वसूत्रस्थब्रह्मपदानुषंगेण तच्छब्दाध्याहारेण च सूत्रवाक्यस्यार्थमाह। अस्येत्यादिना। कारणस्य सर्वज्ञ
त्वादि संभावनार्थानि जगतो विशेषणानि। यथा कुंभकारः प्रथमं कुंभशब्दाभेदेन विकल्पितं पृथुबुध्नोदरा
कारं स्वरूपं बुद्धावालिख्य तदात्मना कुंभं व्याकरोति। बहिः प्रकटयति। तथा परमकारणमपि स्वेक्षितनामरू

पात्मना व्याकरोतीति श्रुतेर्नमीयत इति मत्वाह। नामरूपाभ्यामिति। इत्थंभावे तृतीया। आद्यकार्यं चेतनजन्यं। कार्यत्वात्। कुंभव
दिति प्रधानशून्ययोर्निरासः। हिरण्यगर्भादिजीवजन्यत्वं निरस्यति। अनेकेति। श्राद्धवैश्वानरेष्ट्यादौ पितापुत्रयोः कर्तृभोक्त्रो
र्भेदात्पृथगुक्तिः। यो ब्रह्माणं विदधाति पूर्वं सर्व एत आत्मनो व्युच्चरंतीति श्रुत्या स्थूलसूक्ष्मदेहोपाधिद्वारा जीवानां
कार्यत्वेन जगदंतःपातित्वान्न जगत्कारणत्वमित्यर्थः। कारणस्य सर्वज्ञत्वं संभावयति। प्रतिनियतेति। प्रतिनियत। नियत
स्थितानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यर्थः। स्वर्गस्य क्रियाफलस्य मेरुपृष्ठं देशः देहपाता
दूर्ध्वकालस्तूत्तरायणमरणादिनिमित्तं प्रतिनियतं। एवं राजसेवाफलग्रामादेर्देशादिव्यवस्था ज्ञेया। तथा च यथा से
वाफलं देशाद्यभिज्ञदातृकं तथा कर्मफलं फलत्वादिति सर्वज्ञत्वसिद्धिरिति भावः। सर्वशक्तित्वं संभावयति। मनसा
पीति। नन्वन्येऽपि विपरिणामादयो भावविकाराः संतीति किमिति जन्मादीत्यादिपदेन न गृह्यंत इत्यत आह। अन्येषामिति।
वृद्धिविपरिणामयोर्जन्मनि अपक्षयस्य नाशेंऽतर्भावः। इदं हि जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति
यास्कमुनिवाक्यमेतत्सूत्रमूलं किं न स्यादित्यत आह। यास्केति। यास्कमुनिः किल महाभूतानामुत्पन्नानां स्थिति
कालेऽपि भौतिकेषु प्रत्यक्षेण जन्मादिषट्कमुपलभ्य निरुक्तवाक्यं चकार। तन्मूलीकृत्य जन्मादिषट्कं लक्षणं
सूत्रार्थ इति ग्रहणे सूत्रकृता ब्रह्मलक्षणं न संगृहीतं किंतु महाभूतानां लक्षणमुक्तमिति शंका स्यात् तत्र प्राप्स्य
दिति येश्रुत्युक्तजन्मादयस्सत्ववाद्यं ग्रहीतव्यमित्यर्थः। यदि निरुक्तस्यापि श्रुतिमूलत्वं इति महाभूतजन्मादिकं मत्सलि हि
सा श्रुतिरेव सूत्रस्य मूलमस्तु किमंतर्गडुना निरुक्तेनेति भावः। यदि जगतो ब्रह्मातिरिक्तकारणस्य कृतः
ब्रह्मलक्षणस्य तत्रापि व्याप्त्यादिदोषः स्यात्। अत उक्तं तटस्थलक्षणसूत्रेण ब्रह्म विना ग्रामजन्मादिकं न संभ
वति कारणांतरासंभवादिति युक्तिः सूत्रिता। सा तत्स्वरूपादे विस्तरेण वक्ष्यते। अधुना संक्षेपेण तां दर्शयति। नन्वोक्तं
सादिना। नामरूपाभ्यां व्याकृतस्येत्यादिनां च गुणैर्जगद्धितो ब्राह्मणानां व्याख्या नामसत्प्रधानशून्ययोः संसार णस्यानि
रासोऽदर्शितः। परमाणुनामचेतनानां स्वतः प्रवृत्त्ययोगात् जीवानां स्वज्ञानशून्यत्वेन नियमेन नानुमानो सर्वे तेष्व
राशिद्धौ तेषां प्रेरकाभावात् जगदारंभकत्वासंभव इति भावः। स्वभाववादे यद्विचित्रं जगद्धितिलोकापति सप्रका
हः। नचेति। जगत इत्यादि संभावयितुं न शक्यमित्यन्वयः। किं स्वयमेव स्वस्य हेतुरिति स्वभावः उत कारण। नचेक्ष

२४ नमे नानु का स १

त्वं॥ नाद्यः॥ आत्माश्रयात्। न द्वितीयः स्यात्। विशिष्टेति। विशिष्टस्यासाधारणनिर्देशकालनिमित्तानि तेषां कार्यार्थित्वरूपाद्यप्रमाण
त्वात् कार्यस्य कारणानपेक्षत्वं न युक्तमित्यर्थः। अनपेक्षत्वे धान्यार्थिनां कृषिं शीतवर्षादिकाले बीजादिनिमित्तं च प्रवृत्तिर्न स्या
दिति भावः। पूर्वोक्तसर्वज्ञत्वादिविशेषणमीश्वरं मुक्त्वा जगदुत्पत्त्यादिकं न संभवतीति विशेषणं कर्तारं विना कार्यं नास्तीति
व्यतिरेकयुक्तः। तेन यत्कार्यं तत्सकर्तृकमिति व्याप्तिर्ज्ञायते एतदेव व्याप्तिज्ञानं जगति पक्षे कर्तारं साधयत् सर्वज्ञमीश्वरं
साधयतीति किं श्रुत्येति तार्किकाणां श्वानिमुपन्यस्यति। एतदेवेति। एतदेव। अनुमानमेव साधनं। न श्रुतिरिति मन्यन्ते तद्
ति योजना। अथवा एतद्व्याप्तिज्ञानमेवेश्वरसिद्धेरनुमानात् युक्तिमात्रत्वेनास्मत्संमतं सदनुमानं स्वतन्त्रं इति मन्यन्त इत्यर्थः। स
र्वज्ञत्वमादिशब्दार्थः। यद्वा व्याप्तिज्ञानसहकृतमेतल्लक्षणमेवानुमानं मन्यन्त इत्यर्थः। तत्रायं निभागः। व्याप्तिज्ञानाज्जग
तः कर्तास्तीति अस्ति त्वसिद्धिः। पश्चात्तत्सकर्तृत्वं सर्वज्ञतः जगत्कारणत्वाद्व्यतिरेकेण कुलालादिवदिति सर्वज्ञत्वसिद्धिर्लक्ष
णादिति। अत्र मन्यन्त इत्यनुमानस्याभासत्वं सूचितं। तथाहि। अंकुरादौ तावज्जीवः कर्ता न भवति जीवादिन्त्रस्य करण
दचेतनत्वानियमादन्यः कर्ता नास्त्येवेति व्यतिरेकनिश्चयाद्यत्कार्यं तत्सकर्तृकमिति व्याप्तिज्ञानासिद्धिः। लक्षणलिं
गकानुमाने तु बाधः। अशरीरस्य जन्यज्ञानायोगात् यज्ज्ञानं तन्मनोजन्यमिति व्याप्तिविरोधेन नित्यज्ञानासिद्धेर्जनाभा
वनिश्चयात् तस्मादतीन्द्रियार्थे श्रुतिरेव शरणं। श्रुत्यर्थसंभावनार्थत्वेनानुमानं युक्तिमात्रं न स्वतन्त्रमिति भावः।
नन्विदमयुक्तं। श्रुतेरनुमानां तर्कावमर्शे प्रसक्तवदीपसूत्रे कृतोऽनुमानस्यैवोपन्यस्तत्वादिति चेत् तर्हि तत्स
कृते। नन्विति। ततो मन्यन्त इत्यनुमानस्याभासत्वं किमर्थमुक्तमिति भावः। यदि श्रुतीनां स्वतन्त्रमानत्वेन स्यात्तर्हि तत्सूत्रेऽपि
मन्वादिस्मृत्यादिनावाक्यानां तात्पर्यं सूत्रकृतस्त्वविचारयेत् तस्मादुत्तरसूत्राणि श्रुतिविचारार्थं तत्त्वन्यायादिसूत्रेऽपि
श्रुतिरेव स्यात्तत्त्वेण विचार्यते नानुमानमिति परिहरति। नेति। किं च मुमुक्षोर्ब्रह्मावगतिरभीष्टा यदर्थमस्य शा
स्त्रस्यारंभः सा च नानुमानात् तं त्वौपनिषदमिति श्रुतेः। अतो नानुमानं विचार्यमित्याह। वाक्यार्थेति। वाक्यस्य
तदर्थस्य च विचारो ग्रहदध्यवसानं तात्पर्यनिश्चयः प्रमेयसंभवनिश्चयश्च तेन जाता ब्रह्मावगतिः मुक्तये
भवतीत्यर्थः संभवो बाधाभावः। ननु किमनुमानमपेक्षितमेव नेत्याह। सत्स्विति। विमतमभिन्ननिमित्तोपा

न १

दानकं । विमतं चेतनप्रकृतिकं । कार्यत्वात् सुखादिवदित्यनुमानेऽप्यर्थदार्ढ्यायापेक्षितमित्यर्थः । तर्कः संशयविपर्यासनिवृत्तिः । मंतव्य इति । श्रुतार्थस्तर्केण संभावनीय इत्यर्थः । यथा कश्चित् गान्धारदेशीयः स्वदेशाद् आरण्ये बद्धनेत्र एव सन् केनचिन्मुक्तबंधः तदुक्तमार्गग्रहणसमर्थः पंडितः स्वयं तर्ककुशलो मेधावी स्वदेशं गान्धारानेव प्राप्नुयात् एवमेवेहाविद्याकामादिभिः स्वरूपानंदात् अपहृत्यास्मिन्नात्मने संसारे क्षिप्तः केनचिद्दयापरवशेनाचार्येण नासि त्वं संसारी किंतु तत्त्वमसीत्युपदिष्टस्वरूपः स्वयं तर्ककुशलश्चेत् स्वरूपं जानीयात् नान्यथेति श्रुतिः स्वस्याः पुरुषमतिरूपतर्कापेक्षां दर्शयतीत्याह । पंडित इति । आत्मनः श्रुतेरित्यर्थः । ननु ब्रह्मणो मननाद्यपेक्षा न युक्ता । वेदार्थत्वात् । धर्मवत् । किंतु श्रुतिलिंगवाक्यादय एवापेक्षिता इत्यत आह । नेति । जिज्ञास्ये धर्मे इव जिज्ञास्ये ब्रह्मणि इति व्याख्येयं । अनुभवो ब्रह्मसाक्षात्कारः व्योविधदनुभवः । आदिपदान्मनननिदिध्यासनयोर्ग्रहः । तत्र हेतुमाह । अनुभवेति । मुक्त्यर्थं ब्रह्मज्ञानस्य शाब्दस्य साक्षात्कारावसानत्वापेक्षत्वात् प्रसक्तभूतसिद्धब्रह्मगोचरत्वेन साक्षात्कारफलकत्वसंभवात् तदर्थं मनननाद्यपेक्षा युक्ता । धर्मे तु नित्यपरोक्षे साध्ये साक्षात्कारस्यानपेक्षितत्वात् असंभवाच्च श्रुत्यादिनिर्णयमात्रं मनुष्ठानायापेक्षितं लिंगादयस्तु श्रुतेः संतर्कनिर्णीता एव श्रुतिद्वारा निर्णयोपयोगित्वेनापेक्ष्यंते न मनननादयः अनुपयोगादित्यर्थः । निरपेक्षः शब्दः श्रुतिः । शब्दस्यार्थप्रकाशनसामर्थ्यं लिंगं । पदस्यान्येतरपदाकांक्षा वाक्यं । अंगवाक्यसापेक्षं प्रधानवाक्यं प्रकरणं । क्रमपठितानां समर्थानां क्रमपठितैर्यथाक्रमसंबंधः स्थानं । यथाऽऽग्नेयाद्य इष्टयो दर्शादिक्रमेण पठिताः क्रमपठितानां ... सा तासां दश मंत्रा अत्र इंद्राग्नी रोचना दिव इत्यादयः तत्र प्रथमेष्टौ प्रथमं मंत्रस्य विनियोगः स्थानेनेति ... एवं तावद् ब्रह्म समाख्या । यथा आध्वर्यवसंज्ञकानां मंत्राणामाध्वर्यवसंज्ञके कर्मणि विनियोग इति विवेकः । एवं तावद् ... न वा अपेक्षितमनुमानं ब्रह्मणो मननाद्यपेक्षं वेदार्थत्वात् धर्मवदित्यनुमाने साध्यत्वेन ध्यानस्यानुपयोगात् ... ब्रह्मणि मनननाद्यपेक्षत्वं चोक्तं । तत्र यदि वेदार्थत्वमात्रेण श्रवणो ...

न

रूपस

त्रिं ६

धर्मेण साम्यं यद्युच्येत तर्हि कृतिसाध्यत्वं विधिनिषेधविकल्पोत्सर्गापवादाश्च ब्रह्मणि धर्मवत्स्युरिति विक्षिप्तैर्बाधकमाहा। पुरुषेच्छादिना। पुरुषकृत्यधीनात्मलाभत्वात्कर्तव्यत्वं तद्भावश्च धर्मे श्रुत्यादीनां मे न प्रामाण्यमित्यन्वयः। धर्मस्य साध्यत्वं लौकिकवैदिककर्मदृष्टान्तेन स्फुटयति। कर्तुमिति। लौकिकवैदिकमित्यर्थः। दृष्टान्तं स्फुटयति। यथेति। दार्ष्टान्तिकमाह। तथेति। तद्वद्धर्मस्य कर्तुमकर्तुं शक्यत्वमुक्तं अन्यथा कर्तुं शक्यतामाह। उदितेति। धर्मस्य साध्यत्वमुपपाद्य तत्र विध्यादियोग्यतामाह। विधीति। विधिप्रतिषेधाश्च विकल्पादयश्च धर्मे स्युर्ब्रह्मण्येवेत्यर्थवन्तः सावकाशा आपतन्तीति ते ब्रह्मण्यपि स्युरित्यर्थः। यजेत न सुरां पिबेदित्यादयो विधिनिषेधाः। व्रीहिभिर्यवैर्वा यजेतेति संख्या विकल्पो विकल्पः। प्रकृ णाग्रहणे वैदिकः। उदितानुदितहोमयोर्व्यवस्थितविकल्पः। न हिंस्यादित्युत्सर्गः। अग्नीषोमीयं पशुमालभेतेत्यपवादः। तथाहवनीये जुहोतीत्युत्सर्गः। अश्वस्य पदे पदे जुहोतीत्यपवाद इति विवेकः। एते ब्रह्मणि स्युरित्यत्र उपपत्तिं वारयति। न त्विति। साधनाभूतवस्तुविषयत्वादित्येतेन। इदं वस्तु एवं नैवं घटः पटो वेति प्रकारविकल्पः। अस्ति नास्ति वेति स्वरूपविकल्पः। ननु वस्तुन्यप्यात्मादौ वादिनामस्ति नास्तीत्यादिविकल्पा दृश्यन्ते तत्राह। विकल्पनास्त्विति। अस्त्यादिकोटिस्मरणे पुरुषबुद्धिस्तन्मूला मनःस्पन्दितमात्राः संशयविपर्ययविकल्पा न प्रमारूपा इत्यर्थः। अयं भावः। धर्मो हि यथा यथा ज्ञाप्यते तथा तथा कर्तुं शक्यते इति यथाशास्त्रं पुरुषबुद्ध्यपेक्षा विकल्पाः सर्वे प्रमारूपा एव भवन्तीति। न साम्येऽत्र ब्रह्मण्यपि सर्वेऽपि विकल्पा यथार्थाः स्युरिति तत्राह। यामिति वदेत्प्रत्याह। नेति। यदि सिद्धवस्तुज्ञानमपि साध्यज्ञानवत्पुरुषबुद्धिमपेक्ष्य जायेत। तदा सिद्धे विकल्पा यथार्थाः स्युः। न तु सिद्धवस्तुज्ञानं पौरुषं किं तर्हि प्रमाणवस्तुजन्यं। तथा च वस्तुन एकरूपत्वादेकमेव ज्ञानं प्रमा अन्ये विकल्पा अयथार्था एवेत्यर्थः। अत्र दृष्टान्तमाह। न हि स्थाणावेकस्मिन्निति। स्थाणुरेवेत्यवधारणे। सिद्धे सर्वे विकल्पा यथार्था न भवन्तीत्यर्थः। तत्र यद्वस्तुतन्त्रं ज्ञानं तद्यथार्थं यत्पुरुषतन्त्रं तन्मिथ्येति विभजते। तत्रेति। स्थाणावपि विरुद्धाः। स्थाणावुक्तन्यायं ब्रह्मण्यतिदिशति। एवमिति। प्रकृतमाह। तत्रैवं सतीति। सिद्धेऽर्थे ज्ञानप्रमाण

स्ववस्त्वधीनत्वेसति ब्रह्मज्ञानमपि वस्तुतंत्रमेव यथार्थं न पुरुषतंत्रं। भूतार्थविषयत्वात्। स्थाणुज्ञानवत् इत्यर्थः। अत्र
तः साध्ये धर्मे स्वरूपविरूपत्वाः पुंतंत्रो नासिद्धेर्थ इति वैलक्षण्यात्। न धर्मस्याध्यं ब्रह्मण इति मननाद्यपेक्षासिद्धेति
भावः। ननु तर्हि ब्रह्म प्रत्यक्षादिगोचरं धर्मविलक्षणत्वात् घटादिवत्। तथा च जन्मादिसूत्रे जगत्कारणानु
मानेन विचार्यं सिद्धार्थत्वस्य मानत्वात्। न श्रुतिः सिद्धार्थे तस्याः प्रमानत्वेन तद्विचारस्य निष्फलत्वादिति शं
कते। नन्विति। प्रमाणांतरविषयत्वमेव प्राप्तमिति कृत्वा प्रमाणांतरस्यैवं विचारप्राप्ता विति शेषः। अत्र पू
र्वपक्षी प्रष्टव्यः। किं पक्षार्यत्वद्धत्वेन ब्रह्मानुमानं ब्रह्मसाधकं। किंवा पक्षार्यं तत्सकारणमिति। नाद्यः। व्याप्त्य
सिद्धेरित्याह। नेति। ब्रह्मण इंद्रियाग्राह्यत्वात् प्रत्यक्षेण व्याप्तिग्रहायोगात् प्रमाणांतरविषयत्वमित्यर्थः।
इंद्रियाग्राह्यत्वं कुत इत्यत आह। स्वभावत इति। पराञ्चि खानि व्यतृणत् स्वयंभूरिति श्रुते ब्रह्मणो रूपादिही
नत्वाच्चेत्यर्थः। इंद्रियाग्राह्यत्वेपि व्याप्तिग्रहः किं न स्यादित्यत आह। सतिहीति। तन्नास्तीति शेषः। इदं का
र्यं ब्रह्मसंबद्धमिति व्याप्तिः प्रत्यक्षं ब्रह्मणोतींद्रियत्वात् न संभवतीत्यर्थः। द्वितीये कारणसिद्धावपि कारणस्य
ब्रह्मत्वं श्रुतिं विनाज्ञातुमशक्यमित्याह। कार्यमात्रमिति। एवं बहुकृतं यस्मात्तस्माच्छ्रुतिमंतरेण जगत्कारणे ब्र
ह्मेति निश्चयालाभः तस्मात्तद्बोधकश्रुतिरेव प्राधान्येन विचारणीया। अनुमानं तूपादानत्वादिसा
न्यायद्वारा मृदादिवत् ब्रह्मणः स्वकार्यात्मकत्वसिद्धिश्रौतार्थसंभावनार्थं गुणतया विचार्यमित्युपसंहरति।
तस्मादिति। एतत्सूत्रस्य विषयवाक्यं पृच्छति। किं पुनरिति। इह ब्रह्मणि लक्षणार्थत्वेन विचारयितुमि
ष्टं वाक्यं किमित्यर्थः। अत्राहि प्रथमसूत्रे जिज्ञास्याधिकारिणो ब्रह्मविचारं प्रतिज्ञाय ब्रह्मज्ञानं तु क्रमस्य
द्वितीयसूत्रे लक्षणमुच्यते। तथैव श्रुतावपि मुमुक्षोर्ब्रह्मज्ञानं तु क्रमस्य जगत्कारणत्वोपलक्षणानु
वादेन ब्रह्मज्ञाप्यत इति श्रौतार्थक्रमानुसारित्वं सूत्रस्य दर्शयितुं सोपक्रमं वाक्यं पठति। भृगुरि

ति। अथवेति। स्मारयायुपदिष्टोऽर्थः। अत्र यन्नेनैकसूत्रं विवक्षितं। नानात्वेऽप्यत्र लक्षणविधानायोगात्। यज्ज्ञानकारणं तदेवं
दृश्यमानं तरवाक्यं यदेकं कारणं तद्ब्रह्मेति वाक्यकारणं तदेकं ब्रह्मेति वा महावाक्यमिति भेदः। किं तर्हि स्वरूपलक्षण
मित्याशंक्य वाक्यशेषान्निर्णीतो यतः शब्दार्थः स सत्यज्ञानानन्दरूपो ब्रह्म। तस्यैवेति। यः सर्वज्ञत्वः तस्मादेतद्ब्रह्म नाम
रूपमन्नं च जायते। विज्ञानमानंदं ब्रह्मेत्यादिशास्त्रोक्तरीत्या वाक्यान्यर्थस्य विषयदृष्टान्तः। अन्योन्यपीति। एवंजाती
यकस्मैवाह। मित्येति। तदेवं सर्वाखु शास्त्रेषु लक्षणद्वयवाक्यानि जिज्ञास्ये ब्रह्मणि समन्वितानि। तद्विया
मुक्तिरिति सिद्धं। यस्य निःश्वसितं वेदाः सर्वार्थज्ञानराशयः। श्रीरामं सर्ववेत्तारं वेदवेद्यमहं भजे। वृत्तानुवा
देन संगतिं वदन् उत्तरसूत्रमवतारयति। जन्मादीति। चेतनस्य ब्रह्मणो जगत्कारणत्वोक्त्या सर्वज्ञत्वसामर्थ्यात् प्र
तिज्ञातं सर्वज्ञत्वं। चेतनस्य सृष्टेर्ज्ञानपूर्वकत्वात्। तथा च ब्रह्म सर्वज्ञं सर्वकारणत्वात्। यो यत्कर्ता स तज्ज्ञः
यथा कुलाल इति। किं तु तदेवार्थिकं सर्वज्ञत्वं प्रधानादिनिरासाय वेदकर्तृत्वसहेतुना दृढयन्नाह सर्थः। हेतु
द्वयस्यै [illegible] कार्थलाघवत्वात् एकविषयसमवान्तरसंगतिः। यद्वा वेदस्य नित्यत्वात् ब्रह्मणः सर्वहेतुत्वं नास्तीत्या
क्षेपसंगत्या वेदहेतुत्वमुच्यते। अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिर
स इति वाक्यं विषयः। तत्किं वेदहेतुत्वेन ब्रह्मणः सर्वज्ञत्वं साधयति उत न साधयतीति संदेहः। तत्र व्या
करणादिवद्वेदस्य पौरुषेयत्वे मूलप्रमाणसापेक्षत्वेन प्रामाण्यापातान्न साधयतीति पूर्वपक्षे जगद्धेतो [illegible]
तत्त्वासिद्धिः फलं। सिद्धान्ते तत्सिद्धिः। अस्य वेदान्तवाक्यस्य स्पष्टब्रह्मलिंगस्य वेदकर्तरि समन्वयोक्तेः श्रु
तिशास्त्राध्यायपादसंगतयः। एवमादावेवस्यादिसंगतयः ऊह्याः। वेदे हि सर्वार्थप्रकाशनशक्तिरस्त्येव भ
ते तत्तदुपादान ब्रह्मगतशक्तिपूर्विका तत्कृता वा प्रकाशनशक्तित्वात् [illegible] कार्यगतशक्तिवत्। यद्वा। प्रदी
प शक्तिवदिति वेदोपादानत्वेन ब्रह्मणः स्वसंबद्धाशेषार्थप्रकाशनसामर्थ्यरूपं सर्वसाक्षित्वं सि[illegible]ध्यति
ति। यद्वा यथा अध्येतारः पूर्वक्रमं ज्ञात्वा वेदं कुर्वन्ति। तथाविचित्रगुणमायासहायोऽनायतानंतस्य प्रकाशं

मा॰टी॰टा॰

चिन्मात्रः परमेश्वरः स्वकृतपूर्वकल्पीयक्रमसजातीयक्रमवन्तं वेदराशिं तदर्थांश्च युगपज्ज्ञानेनैव करोतीति न वेदस्य पौ
रुषेयता। यत्र त्ववधानपूर्वकं वाक्यज्ञानं वाक्यस्य पौरुषेयत्वकारणं तत्र पौरुषेयता। अत्र च यौगपद्यान्नास। अतो वेदकर्तृ
त्वे दर्पिवत्तदर्थप्रतिपत्तत्वं बहुं नोतरी तथा जानातीति सर्वज्ञत्वमिति सिद्धं तं यति। शास्त्रेति। शास्त्रे प्रतिहेतुत्वान्
ब्रह्मणः सर्वज्ञत्वं सर्वकारणं चेति संगतिरूपानुसारेण सूत्रयोजनामभिप्रेत्य पदानि व्याचष्टे। महत इति। हेतोः सर्वज्ञत्व
सिद्ध्ये वेदस्य विशेषणानि। तत्र ग्रन्थतोऽर्थतश्च महत्त्वं कितं शासनात् शास्त्रं शास्त्रं शब्दः शब्दमात्रोपलक्षणा
र्थ इति मत्वाह। अनेकेति। पुराणन्यायमीमांसाधर्मशास्त्राणि शीक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषाणि ष
डङ्गानीति दश विद्यास्थानानि वेदार्थज्ञानहेतवः तैरुपकृतस्येत्यर्थः। अनेन मन्वादिभिः परिगृहीतत्वेन वेदस्य
प्रामाण्यं सूचितं। अबोधकत्वाभावादपि प्रामाण्यमित्याह। प्रदीपवदिति। सर्वार्थप्रकाशनशक्तिमत्त्वे ऽपि अ
चेतनत्वात् सर्वज्ञकल्पत्वं। यो निरूपादानं कर्तृत्वं। ननु सर्वज्ञत्वस्य योग्यः सर्वार्थज्ञानशक्तिमत्त्वं वेदस्य तदन्वितत्वेऽपि
तद्योनेः सर्वज्ञत्वं कुतस्त्याह। नहीति। उपादाने तच्छक्तिं विना कार्ये तदयोगाद्वेदोपादानस्य सर्वज्ञत्वं। अनुमानं तु एवं
दर्शितं। न च अविद्यापास्तदोषकः शक्तिमत्त्वे चेतनत्वात्तदृश इति भावः। वेदः स्वविषयादधिकार्थज्ञानवज्जन्यः प्र
माणवाक्यत्वात् व्याकरणरामायणादिवदित्यनुमानान्तरं। तत्र व्याप्तिमाह। यद्यदिति। विस्तरः शब्दाधिक्यं अनेना
र्थतोऽल्पसंवरनं कुर्वन्नी नस्यार्थाधिक्यं सूचयति। दृश्यते चार्थवादादिविषयं वेदे। अत्रेषामोजना यद्यच्छास्त्रं यस्माद
ल्पसंभवति स ततः शास्त्रादधिकार्थज्ञानं इति प्रसिद्धं। यथा शब्दसाधुत्वादि ज्ञेयैकदेशार्थो यस्य तदपि व्याकरणा
दिपाणिन्यादेरधिकार्थज्ञानं संभवति। यद्यल्पार्थमपि शास्त्रमपि कार्थज्ञानात् संभवति तदा अस्य महतः इत्या
दि तैर्यस्यान्महतोऽपरिच्छिन्नाद्भुतात्सर्वयोनेः सकाशाद्नेकशाखेत्यादिविशिष्टस्य वेदस्य पुरुषनिश्वास
वदप्रयत्नेनैव संभवः तस्य सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति किमु वक्तव्यमिति। तत्र वेदस्यापौरुषेयत्वशङ्कां निरा
सार्थं श्रुतिस्थं निश्वसितपदार्थमाह। अप्रयत्नेनेति। प्रमाणान्तरेण अर्थज्ञानप्रयासं विना निमेषादिन्यायेन

न्या
२०

सर्थः । अत्रानुमानेन यः सर्वज्ञ इति प्रसुक्त सर्वज्ञ सदार्थयपाणिन्यादिवत् वेदकर्तृत्वेनाधिकार्थज्ञानसत्तामात्रे
साध्यते । न सर्वार्थज्ञानस्य वेदहेतुत्वं । निश्वसितश्रुतिविरोधात् वेदज्ञानमात्रेणाध्येतृत्ववद्वेदकर्तृत्वोपपत्तेश्च ।
इयान् विशेषः । अध्येता परापेक्षः ईश्वरस्तु स्वकृतवेदानुपूर्वीं स्वयमेव स्मृत्वा तथैव कल्पादौ प्रणादिष्वाविर्भा
वयन्ननादवतज्ज्ञानसत्ताकं तदर्थमप्यवर्जनीयतया जानातीति सर्वज्ञः समन्वयः । अधुना ब्रह्मणो लक्षणा
नंतरं प्रमाणजिज्ञासायां वर्णकांतरमाह । शास्त्रयोनित्वादिति । लक्षणप्रमाणयोर्ब्रह्मनिर्णयार्थत्वादेकफलकत्वसं
गतिः । तं त्वौपनिषदं पुरुषमिति श्रुतिर्ब्रह्मणो वेदैकवेद्यत्वं ब्रूते न वेति संशये कार्यलिंगेनैव लाघवात्कर्तृ
रेकस्य सर्वज्ञस्य ब्रह्मणः सिद्धेर्न श्रुत इति प्राप्ते वेदप्रमाणकत्वो ब्रह्मणो न प्रमाणांतरवेद्यत्वमिति सिद्धां
तयति । शास्त्रयोनित्वादिति । तद्व्याचष्टे । यथोक्तमिति । सर्वत्र पूर्वोत्तरपक्षयुक्तिद्वयं संशयबीजं द्रष्टव्यं ।
अत्र पूर्वपक्षेऽनुमानस्यैव विचार्यतासिद्धिः फलं सिद्धांते वेदांतानामिति भेदः । अनुमानादिना ब्रह्मसि
द्धिः पूर्वसूत्रे प्रसंगान्निरस्ता । किं च विचित्रप्रपंचस्य प्रासादादिवदेककर्तृकता साध्या न लाघवावतारः
न च सर्वज्ञत्वो कर्तृभेदे कलसंभवः एकमत्यतानां सर्वज्ञत्वंज्ञानं ततस्तदसिद्धिरन्योन्याश्रयमभिप्रेत्याह । शा
स्त्रादेवेति । किं तद्ब्रह्मेति तदाह । शास्त्रमिति । पृथगारंभमाक्षिपति । किमर्थमिति । येन तूलनाद
र्शितं ततः किमर्थमित्यर्थः । जन्मादिलिंगानुमानस्य स्यात्तंत्रेणोपन्यासशंका निरासार्थं पृथक्सूत्र
मित्याह । इच्यत इति । वेदांताः सिद्धब्रह्मपराः उतकार्यपरा इति निष्प्रत्यूहसंशयापेक्षं चाप्योः प्रसंगात्प्रसंगा
त्योः संशये पूर्वसूत्रे द्वितीयवर्णकेनाक्षेपसंगत्या पूर्वपक्षमाह । कथं पुनरित्यादिना । तदेवं सौत्रमा
दीनां लक्ष्यत्वात्सत्यादिस्वरूपब्रह्मलिंगानां ब्रह्मणि समन्वयोक्तेः प्रसादिसंगतयः पूर्वपक्षे वेदांतेषु मुमु
क्षुप्रवृत्त्यसिद्धिः सिद्धांते तत्सिद्धिरिति विवेकः कथमित्याक्षेपे हेतुः [illegible]वत्वेति । यतो जैमिनिसूत्रेण शा

स्यास्य वेदस्य क्रियापरत्वं दर्शितं। अतोऽक्रियार्थत्वाद्वेदान्तानामानर्थक्यं फलवदर्थमूलत्वं प्राप्तमित्यस्य च
सूत्रस्यायमर्थः। प्रथमसूत्रे तावद्वेदस्याध्ययनकरणकस्याध्ययनविधिना व्याप्य फलवदर्थपरत्वमुक्तं
चोदनालक्षणोऽर्थो धर्म इति द्वितीयसूत्रे धर्मे कार्ये चोदना प्रमाणमिति वेदप्रामाण्यप्रापकं कार्य
परत्वमवसितं। तत्र वायुर्वै क्षेपिष्ठेत्यादि अर्थवादानां धर्मे प्रामाण्यमस्ति न वेति संशये आम्नाय
प्रामाण्यस्य क्रियार्थत्वेन व्याप्तत्वात् अर्थवादेषु धर्मस्याप्रतीतेरक्रियार्थानां तेषां आनर्थक्यं निष्फ
लार्थत्वं। न चाध्ययनविध्युपात्तानां निष्फलत्वे सिद्धेऽर्थे प्रामाण्यमुक्तं। तस्मादनित्यमेषां प्रामाण्यमुच्य
ते। व्यापकाभावाद्व्याप्यं प्रामाण्यं नास्त्येवेति यावत्। एवं पूर्वपक्षे विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन
विधीनां स्युरिति सूत्रेण सिद्धान्तमाह। क्रियापरत्वमिति। अनित्यमिति प्राप्ते दर्शितमित्यर्थः। वायुर्वै क्षिप्रत
मगामिनी देवता तद्देवताकं कर्म क्षिप्रमेव फलं दास्यतीत्येवं विधेयार्थानां स्तुतिरूपार्थद्वारेण वायव्यं
श्वेतमालभेतेत्यादि विधिवाक्येनैकवाक्यत्वादर्थवादाः सफलाः स्युः। स्तुतिलक्षणया सफलकार्यपरत्वा
त्प्रमाणमर्थवादा इति यावत्। नन्वध्ययनविधिगृहीतानां वेदान्तानामानर्थक्यं न युक्तमित्यत आह। कृतमिति।
न वयं वेदान्तानामानर्थक्यं साधयामः किं तु ज्ञानकर्मसिद्धस्य मानान्तरवेद्यत्वात् निष्फलत्वाच्च सिद्धप
रत्वे तेषां मानान्तरसापेक्षत्वनिष्फलत्वयोः प्रसङ्गादप्रामाण्यापातात् कार्यशेषकर्तृदेवताफलानां
प्रकाशनद्वारा कार्यपरत्वं वक्तव्यमिति भ्रमः। तत्र संसदर्थवादानां कर्तृदेवतास्तावकत्वं। विधिविविदिषा
दिवाक्यानां फलसमर्पकत्वं। ननु कर्मविशेषमनारभ्य प्रकरणाधीतानां वेदान्तानां कथं तच्छेषत्वं मा
नाभावादित्याशङ्क्याह। उपासनेति। मोक्षकामो ब्रह्मोपासीतेत्यादौ आत्मेत्येवोपास
नाविधिः आदिशब्दाच्छ्रवणादयः तत्कार्यपरत्वं वक्तव्यमित्यर्थः। ननु ... कार्य

त आ ७
स्ते ?
कृष्ण
२१

त ४ पा ३

परत्वं किमर्थं वक्तव्यमिति तत्राह। नहीति। परितः समंतात् निश्चये नास्ति खलं परिनिष्ठितं कृत्स्नानपेक्षं सि
द्धमिति वाच्यते। तस्य प्रतिपादनमज्ञातस्य वेदेन ज्ञापनं तेन तत्संभवति। मानांतरयोग्येऽर्थे वाक्यस्य सं
वादे सत्यनुवादकत्वादग्निर्हिमस्य भेषजमिति वाक्यवत्। विसंवादे चाबोधकत्वादादित्यो यूप इति वा
क्यवदित्यर्थः। सिद्धो न वेदार्थः मानांतरयोग्यत्वात् घटवदित्युक्तं। निष्फलत्वाच्च तथेत्याह। तद्विति।
सिद्धत्वापन्ने हेयोपादेयायोगे फलाभावाच्च तन्न संभवतीत्यर्थः। फलं स्वरूपावाप्तिर्दुःखहानं च। त
च्च प्रवृत्तिनिवृत्तिभ्यां साध्यं। तत्रोपादेयस्य प्रवृत्तिफलकार्यस्य हेयस्य निवृत्तिफलकार्यस्य ज्ञाना
भ्यां जायते न सिद्धस्य ज्ञानादिति भावः। ननु सिद्धबोधिवेदांतानां साफल्यं कथमित्याशंक्य [illegible]
सादित्संग्रहवाक्यं विवृणोति। अत एवेति। देवैर्निरुद्धः सोऽग्निररोदीदिति वाक्यस्याश्रुत्वेन रज
तस्य निंदाद्वारा बर्हिषि न देयमिति सफलनिषेधपरत्ववद्वेदांतानां विध्यादिशेषत्वं वाक्यमित्यर्थः।
ननु तेषां मंत्रवत्स्वातंत्र्यमस्तु नार्थवादवद्विध्येकवाक्यत्वमित्याशंक्य दृष्टांतासिद्धिमाह। मंत्राणां
चेति। प्रमाणलक्षणेऽर्थवादचिंतानंतरं मंत्रेषु चिंता कृता। इषे त्वेति मंत्रे छिनद्मीत्यध्याहाराच्छाखाच्छेदन
क्रियाप्रतीतेरग्निमीळ इत्यादौ च क्रियासाधनदेवताप्रतीतेः मंत्राः श्रुत्यादिभिः क्रतौ विनियुक्ताः। तेषु मु
च्चारणमात्रेणादृष्टं कुर्वंतः क्रतावुपकुर्वंति उत दृष्टेनैवार्थस्मरणेनेति संदेहे चिंतादिनाप्यध्ययनेनाव
गात मंत्रार्थस्मरणमिति संभवात् अदृष्टार्था मंत्रा इति प्राप्ते सिद्धांतः। अविशिष्टस्तु वाक्यार्थ इति लोके वेद
योर्वाक्यार्थस्याविशेषात् मंत्रवाक्यानां दृष्टेनैव स्वार्थप्रकाशनेन क्रतूपकारकत्वसंभवात् दृष्टे संभ
वति अदृष्टकल्पनानुपपत्तेः फलवदनुष्ठानापेक्षितेन क्रियातत्साधनस्मरणेन द्वारेण मंत्राणां धर्मां
गत्वं। मंत्रैरेवार्थः स्मर्तव्य इति नियमस्त्वदृष्टार्थ इति। तथा चार्थवादानां स्तुतिपदार्थद्वारा पदैकवाक्य

हं निषिद्धिः। मंत्राणां तु वाक्यार्थज्ञानद्वारा तैर्वाक्यैकवाक्यत्वमिति भावः। नन्वस्तु कर्मप्रकरणस्थवाक्यानां
विध्येकवाक्यत्वे वेदांतानां तु सिद्धप्रामाण्यं किं न स्यादित्यत आह। न चेदिति। वेदांतानां विध्येकवा
क्यत्वेनैवार्थवत्त्वतः सिद्धार्थावेदकत्वात् मंत्रार्थवादादिवदित्यर्थः। अन्यत्रोद्देशापि वेदांतेषु कल्प्यतामि
ति तत्राह। उपपन्नो वेति। ने सन्तुष्टाः। सिद्धे फलाभाववत्त्वोक्तत्वादित्याशयः। तर्हि ब्रह्मण्येव स्वार्थे विधिः
कल्प्यतां कृतं वेदांतानां विध्यंतरशेषत्वेनेत्यत आह। नचेति। ननु दृष्टान्तश्रुतौ तु सिद्धेऽप्यनिर्विधि
दृष्टस्तत्राह। क्रियेति। दृष्टः क्रियासाधनस्य प्रयुज्यमानतया लोकेऽपलब्धिर्विधेयता। निषिद्धे यत्र ब्रह्मणः
कथमप्यसाध्यसाध्यानविधेयत्वं इत्यर्थः। सिद्धमतमुपसंहरति। तस्मादिति। स्वयमेवारूढं वदन् पक्षां
तरमाह। अथेति। सिद्धांतसूत्रं व्याचष्टे। तु शब्द इति। तद्ब्रह्म वेदांतप्रमाणकं इति प्रतिज्ञातोऽर्थे हेतुं
पृच्छति। कथमिति। हेतुमाह। समन्वयादिति। अन्वयपदस्य सर्वविषयत्वं। तस्माद्विदिसेवहेतुः। तात्पर्यस्य
सम्यक्त्वं अनवगतार्थविषयकत्वं सत्यत्वं यथितुं संपदं प्रतिपादितं तात्पर्यमेव। तथा चाखंडं ब्रह्म वेदांतजप्रमा
विषयः। वेदांततात्पर्यविषयत्वात्। यो यद्वाक्यतात्पर्यविषयः स तद्वाक्यप्रमेयः यथा कर्मवा
क्यप्रमेयो धर्मः इति प्रयोगः। वाक्यार्थस्याखंडत्वं संसर्गत्वं वा। वाक्यस्य चाखंडार्थकत्वं स्वपदो
पस्थितार्थपदार्थस्तेनाय संसर्गः तद्बोधे च प्रमाजनकत्वं। न चेदमप्रसिद्धं। प्रकृष्टप्रकाशश्चं
द्र इत्यादिलक्षणवाक्यानां लोके लक्षणया चंद्रादिव्यक्तिमात्रप्रमाहेतुत्वात्। सर्वपदलक्षणा
च्याविरुद्धा। सर्वैरर्थवादपदैरेकस्याः स्तुतेर्लक्ष्यत्वांगीकारात्। तथा सत्यज्ञानादिपदैरखंडब्र
लक्षयतीति न पक्षासिद्धिः। नाप्यहेतुत्वासिद्धिः। उपक्रमादिलिंगैर्वेदांतानां अद्वितीयाखंडब्रह्मणि

कृष्ण
२२

तात्पर्यनिश्चयात् । (सोपि हेत्वसिद्धिनिरुपक्रमादिलिंगैर्वेदांतानां अद्वितीया (वं ड) तत्र श्रोतोप्यपदेशोपक्रमं दर्शयति । सदेवेति । उद्दालकः पुत्रमुवाच । हे सौम्य प्रियदर्शन इदं सर्वं जगत् । अग्रे उत्पत्तेः प्राक्काले सदबाधितं ब्रह्मैवासीत् । एव कारणतातः पृथक् सत्ता निषिध्यते । सजातीयविजातीयस्वगतभेदनिरासार्थमेकमेवाद्वितीयमिति पदत्रयं । एवमद्वितीयं ब्रह्मोपक्रम्यैतदात्म्यमिदं सर्वमित्युपसंहरति । इदमुपक्रमोपसंहारैकरूप्यं तात्पर्यलिंगं तथा तत्त्वमसीति नवकृत्वोभ्यासः रूपादिहीनाद्वितीयब्रह्मणो मानांतराप्रयोग्यत्वात् । अपूर्वत्वमुक्तं । अत्र यावत्किंचित्सत्सोम्य न निभाल्यस इति । संघाते स्थितं ब्रह्म कुत्र न जानासीत्यर्थः । तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ब्रह्मज्ञानात् फलमुक्तं विदुषस्तस्य यावत्कालं देहो न विमोक्ष्यते । तावदेव देहपातपर्यंतो विलंबः । अथ देहपातानंतरं विद्वान् ब्रह्मसंपत्स्यते विदेहकैवल्यमनुभवतीत्यर्थः । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति सृष्ट्यादिश्रुत्याऽद्वितीयपरता नार्थो वर्थवादः । मृदादिदृष्टांतैः प्रकृतिव्यतिरेकेण विकारो नास्तीत्युपपत्तिरुक्ता । एवं षड्विधानि तात्पर्यलिंगानि व्याख्यातानि सर्वत्र सामान्यतः प्रतिवेदांतं दृश्यंते । तदुपदेशोपक्रमं श्लोकं पठति । आत्मेत्यादि इति । बृहदारण्यके मधुकांडे उपसंहारवाक्यं तदात्मनो निर्विशेषत्वार्थमाह । तदेतदिति । मा मा भिर्बृहद्रूपं तत्ब्रह्म । एतदपरोक्षं । अपूर्वं कारणशून्यं । अनपरं कार्यरहितं । अनंतरं मध्ये अंतरं यस्य नास्ति सनंतरं । एकरसमित्यर्थः । अबाह्यं अद्वितीयं । तस्यापरोक्षत्वमुपपादयति । अयमिति । सर्वमनुभवतीति सर्वानुभूः चिन्मात्रमित्यर्थः । ऋग्यजुःसामवाक्यानि उक्त्वा आथर्वणवाक्यमाह । ब्रह्मैवेदमिति । पुरस्तात्सर्वदिग्वस्तुजातमिदं ब्रह्मैव निपुणं भाति तस्मात् ब्रह्मैव वस्तुतः सर्वं आदिपदेन सत्यं ज्ञानमित्यादिवाक्यानि गृह्यंते । नन्वेवं ब्रह्मणस्तात्पर्यविषयत्वे वेदांतानां का

धर्मवार्थः किं न स्यात् इति तत्राह। न चेति। वेदान्तानां ब्रह्मणि तात्पर्ये निश्चीयमाने कार्यपरत्वं न युक्तं। यस्य
शब्दः स शब्दार्थ इति न्यायादित्यर्थः। यदुक्तं अर्थवादवद्वेदान्तानां कर्त्रादिस्तावकत्वमिति तत्राह।
न च तेषामिति। तेषां कर्मशेषस्तावकत्वं न भाति किं तु ज्ञानद्वारा कर्मफलसाधनत्वमेव तत्त
त्प्रियाकाले कर्तृत्वेन करणे न च विषयं परिपादितिश्रुतेरित्यर्थः। अर्थवादानां तु स्वार्थे फलाभावा
त्स्तुतिलक्षणेति भावः। यदुक्तं सिद्धत्वेन मानान्तरवेद्यं ब्रह्म न वेदार्थ इति तत्राह। न च परीति। तत्त्व
मसीति शास्त्रमन्तरेण [illegible] इति संबन्धः। धर्मो न वेदार्थः साध्यत्वेन पाकवन्मानान्तरवेद्यत्वात्। यदि
वेदं विना धर्मस्यानिर्णयान्मानान्तरवेद्यता तदा ब्रह्मण्यपि तुल्यं। यच्चोक्तं निष्फलत्वाद् ब्रह्म न वे
दार्थ इति तदनूद्य परिहरति। यत्त्विति स्यादिना। रहितत्वाच्च [illegible] ब्रह्मण इति शेषः। यदप्युक्तं उपास
नापरत्वे वेदान्तानामिति तत्र किं प्राणाद्युपास्यानां वाक्यानामुत सर्वेषामिति। तत्राद्यमङ्गीकरोति।
देवतादीति। ज्येष्ठश्च द्विगुणः फलं चादिशब्दार्थः। न द्वितीयः। विधिशून्यानां सत्संज्ञानमित्यादीनां स्वा
र्थे फलवतामुपासनापरत्वकल्पनायोगात्। किं च तदर्थस्य ब्रह्मणस्तच्छेषत्वे ज्ञानां गूढं वा। आद्ये
ध्यस्तगुणवत्त्वस्य तच्छेषत्वेपि न द्वितीयस्येत्याह। न तु तथेति। प्राणादिदेवतावदित्यर्थः। अन्त्ये ब्रह्मा
त्मैकत्वे ज्ञाते सति हेयोपादेयशून्यतया ब्रह्मात्मनः फलाभावादुपास्योपासकद्वैतज्ञानस्य कार
णस्य नाशात् तच्छेषोपासनासंभव इत्याह। एकत्वेति। द्वैतज्ञानस्य संस्कारबलात् पुनरुदये विधा
नमिति नेत्याह। न हीति। दृढस्येति शेषः। भ्रान्तित्वनिश्चयोदार्ढ्यं संस्कारोद्भवोपि न भ्रान्तिरिति। नि
श्चितं न विधिनिमित्तं येनेति। उपासनापो कारणस्य सत्त्वेनेत्यर्थः। वेदप्रामाण्यस्य यापरं किञ्चित्

प्रा६
कृष्ण
२३

र्थकत्वमनुवदति। यद्यपीति। कर्मकाण्डे अर्थवादादीनामित्यर्थः। तथा च व्यापकाभावाद्वेदान्तेषु प्रामाण्याभावा
नुमानमिति भावः। वेदान्तानां स्वार्थमानं अक्रियार्थत्वात् सोऽरोदीदित्यादिवत् इत्यनुमाने निष्फलार्थ
त्वमुपाधिरित्याह। तथापीति। अर्थवादानां निष्फलस्वार्थमानत्वेऽपीत्यर्थः। तद्विषयस्य तत्त्वेन स्व
स्वार्थे प्रमाणत्वमनीतिशेषः। सफलज्ञानकरणत्वेन वेदान्तानां स्वार्थमानत्वसिद्धेर्न क्रियार्थत्वं तद्व्या
पकमिति भावः। ननु मा भूद्वेदप्रामाण्यस्य व्यापकं क्रियार्थत्वं व्याप्यं तु भविष्यति। तदभावाद्वेदान्ताना
मप्रामाण्यं दुर्वारमिति नेत्याह। न चेति। येन वेदप्रामाण्यस्य स्वस्यानुमानं गम्यते नान्यत्र क्वचिद् दृष्टं दृष्टान्त
मपेक्षेत न तदेव नास्तीत्यर्थः। चक्षुरादिवद्वेदस्य स्वतः प्रामाण्यज्ञानान्न तद्व्याप्तिलिङ्गाद्यपेक्षा। प्रामा
ण्यसंशये कूपखनवदज्ञाताबाधितार्थतास्वरूपप्रामाण्यनिश्चयो न क्रियार्थत्वेन कूपे पतेदिति वाच्यमपि फ
लासिद्धेरिति भावः। वर्णकार्थमुपसंहरति। तस्मादिति। समन्वयादित्यर्थः। किंचिद्वाक्यानामपि फ
लवदज्ञातार्थत्वेन प्रामाण्यं तत्तुल्यं वेदान्तानामपीति स्थितम्॥ ॥ एवं पदानां सिद्धेऽर्थे व्युत्पत्तिमिष्ट्वा
तेऽब्रह्मनास्तिकानां मतं ब्रह्मणो मानान्तरायोग्यत्वात् सफलत्वाच्च वेदान्तैकमेयत्वमिष्टं तन्मात्रनिरस्तं
संप्रतिपत्तिसर्वे वाक्यानां कार्यान्वितार्थे शक्तिरिति घटं विधिशेषत्वेन प्रसक्तं ब्रह्मवेदान्तैर्बोध्यते न स्वा
तन्त्र्येणेति वदतां प्राभाकराणां मतान्तरेण आरम्भस्य वर्णकान्तरमारभ्यते॥ तत्र वेदान्ताः किमुपासना
विधिशेषत्वेन ब्रह्म बोधयन्ति उत स्वातन्त्र्येणेति सिद्धे व्युत्पत्त्यभावात् पूर्वपक्षमाह। अ
त्रापर इति। ब्रह्मणो वेदान्तवेद्यत्वे प्रतिकाराः पूर्वपक्षयन्तीत्यर्थः। उपासनातो मुक्तिः पूर्वपक्षे तत्त्व
ज्ञानादेवेति सिद्धान्ते फलम्। विधिर्नियोगः तस्य विषयः प्रतिपत्तिरूपासना। अस्याः कोऽविषयः तदु
पासनादिना स्यैर्निप्रपरे रेव ब्रह्म तत्परत्वमित्याह। प्रतिपत्तीति। विधिविषयप्रतिपत्तिविधि

षयतये सर्थः। विधिपराद्वाक्यात् विशेषणभेदं दर्शयितुमाह। यथेति। यूपे पशुं बध्नाति। आहवनीये जुहोतीत्युच्यते
ति किंचिद्वे यूपादय इत्याकांक्षायां यूपं तक्षत्यष्टाश्रीकरोतीति तक्षणादिसंस्कृतं दारु यूपः। अग्नीनाद
धीतेत्याधानसंस्कृतोऽग्निराहवनीयः। वज्रहस्तः पुरंदर इति विधिपरेणैव वाक्येन समर्प्यते तद्वदित्यर्थः।
विधिपरवाक्यस्यापि अन्यार्थबोधकत्वे वाक्यभेदः स्यादिति शंकां निरासार्थमपि शब्दः। मानान्तराज्ञात
न विशेषणतयोच्यते न प्राधान्येनेति न वाक्यभेदः। प्राधान्यार्थभेदस्यैव वाक्यभेदहेतुत्वादिति भावः। ननु
षड्विधलिंगैस्तात्पर्यनिर्णयस्य उपक्रमणः कुतो विधिरेव समभिव्याहृते। कुत इति। व्यवहारोपाहिता
स्मिता पर्यनिश्चयः। व्यवहारे च श्रोतुः प्रवृत्तिनिवृत्तीदृष्टिरूपात्प्रयोगो दृश्यते। अतः शास्त्रस्यापि
ते एनप्रयोजने ते च कार्यज्ञानजन्ये इति कार्यपरत्वं शास्त्रस्य ततः कार्यविशेषसंबन्धेन इत्याह। प्रवृत्ती
ति। शास्त्रस्य नियोगपरत्वे च वृद्धसंमतिमाह। तथा हीत्यादिना। क्रियाकार्यं नियोगो विधिः धर्मोऽपूर्वमिति
अनर्थान्तरं। को वेदार्थ इत्याकांक्षायां प्राभाकरोक्तं। इत्याहीति। तस्य वेदस्य कार्यं वेदार्थः इत्यत्र चोदना
सूत्रस्थं व्याख्यामाह। चोदनेति। क्रियायाः नियोगस्य ज्ञानद्वारा प्रवर्तकं वाक्यं चोदनेत्युच्यते इत्यर्थः। शा
बरस्वामिसंमतिमुक्त्वा जैमिनिसंमतिमाह। तस्य ज्ञानमिति। तस्य धर्मस्य ज्ञापकं भवेत्युक्त्वेपदिति विधी
वाक्ये उपदेशः तस्य धर्मेण व्यतिरेकादित्यर्थः। पदानां कार्यान्विताभिधाने शक्तिरित्यत्र सूत्रं पठति। तद्भूता
नामिति। तत्सूत्रे वेदभूतानां सिद्धार्थनिष्ठानां पदानां क्रियार्थेन कार्येण विना निरन्वितपदेन समा
म्नायः ततो आरण्यं कृत्स्नं। पदार्थज्ञानस्य वाक्यार्थरूपकार्यधीनिमित्तत्वादित्यर्थः। कार्यान्वितार्थे
शक्तानि पदानि कार्यवाचिपदेन तत्पदार्थस्मृतिद्वारा कार्यमेव वाक्यार्थं बोधयन्तीति भावः। पूर्वमित
माह। अत इति। यतोऽन्वय एवमातः। अतो विधिनिषेधवाक्यमेव मानं अपर्याप्तादिदित तच्छेषतयोप

=तद्भूतानां क्रियार्थेन समाम्नायोऽर्थ
स्य तन्निमित्तत्वादिति सूत्रं=५

क्षीणं। तेन कर्मशास्त्रेण सामान्येन शास्त्रत्वं। तस्मात् वेदान्तानां कार्यपरत्वे नैव अर्थवत्त्वं स्यादित्यर्थः। ननु वेदां
तेषु नियोज्यस्य विधेयस्य चादर्शनात् कथं कार्यधीरिति तत्राह। सति चेति। ननु धर्मब्रह्मजिज्ञासयोः
कारणाभ्यामिह काण्डद्वये ऽर्थभेदो युक्तः। एककार्यपरत्वे शास्त्रभेदानुपपत्तेः। तत्र काण्डद्वये जिज्ञास्यभेदे स
ति फलवैलक्षण्यं वाच्यं। तथा च न मुक्तिफलाय ज्ञानस्य विधेयता। मुक्तेर्विधेयक्रियाजन्यत्वे कर्मफला
दविशेषप्रसंगात्। अविशेषे जिज्ञास्यभेदासिद्धेः। अतः कर्मफलविलक्षणत्वान्नित्यसिद्धमुक्तेस्तज्ज
फलानां विधिरयुक्त इति शंकते। नन्विहेति। मुक्तेः कर्मफलाद्वैलक्षण्यमसिद्धमिति तदर्थं तानं विधेयं।
न च तर्हि सफलं कार्यमेव वेदान्तेष्वपि जिज्ञास्यमिति लड्डासिद्धिरिति वाच्यं। दृष्टत्वात्। न च ब्रह्म
जिज्ञास्यत्वस्य विरोधः। ज्ञानविधिशेषत्वेन स्तुत्या कृतार्थत्वप्रतिपादनादिति परिहरति। नेति। ब्रह्म वि
णो विधिप्रयुक्तसंस्कृत्यति। आत्मा वा इति। अत एव देसत्रे ब्रह्म भावकमो ब्रह्मवेदनं कुर्यादिति। विधि
परिष्क्रियते इति दृष्टव्यं। लोके ज्ञानस्य रूपं वेदान्ता नैवार्थतो दर्शयति। निषेध इति। ननु किं विधिफल
मिति तदाह। तदुपासनादिति। प्रत्यक्ब्रह्मोपासनात्। ब्रह्मविदाप्नोति परमिति शास्त्रोक्तो मोक्षः स्व
र्गवल्लोकप्रसिद्धः फलमित्यर्थः। ब्रह्मेणः कर्तव्योपासनाविषयकविधिशेषत्वाङ्गीकारे बाधप्रमा
ह। कर्तव्येति। विध्यसंबद्धसिद्धवस्तुनि प्रत्यक्षादिप्रमाणाभावात् वेदान्तानामवैफल्यं स्यादित्यर्थः। ननु नि
तिशंकाक्षेपणार्थी दृष्टान्तवैषम्येण परिहरति। स्यादिति। एतदर्थवत्त्वमेवं च स्यादित्यर्थः। एवं तद्वि
र्थमाह। यदीति। किं च यदि तावदेव मुक्तिः स्यात् श्रवणजन्यज्ञानानन्तरं मननादिविधिर्न स्यात्। त
द्विधेर्लक्षार्थत्वाभावान्मुक्तिरित्याह। दृष्टेति। किं च श्रोतव्य इति श्रवणानन्तरकार्यान्तरश्रवणात् प्रवृत्ता
दिफलस्यैव शास्त्रलक्षणसिद्धेः फलाभावान्मननादिविधेश्च कार्यपरा वेदान्ता इति पूर्वपक्षमुपसं
हरति। तस्मादिति। वेदान्ता न विधिपराः स्वार्थफलवत्त्वे सति नियोज्याविषयत्वात्। नायं सर्वेति

वाक्यवत्सोरोदीत्स्वर्गकामो यजेतेति वाक्यस्यापि निरालापहेतौ । वरोषणार्थमिति [illegible] ज्ञानयति । अत्रोता ।
यद्दुरुंमोक्षकामस्यानियोज्यस्य ज्ञानं विधेयं इति तन्त्रे साह । नेति । मोक्षो न विधिज्ञान्यः कर्मफलवि
लक्षणत्वादात्मवदित्यर्थः । दृष्टहेतुज्ञानाय कर्म तत्फलं प्रपंचयति । स्थावरेति सार्द्धेन । वर्णितं तत्ता
रतम्यंपनानुवदतीत्येतेन । अथ वेदप्रयोजनानंतरं । अतो वेदस्य फलवदर्थपरत्वात् । धर्मनिर्णयाय
कर्मवाक्यविचारः कर्तव्य इति सूत्रार्थः । न केवलं धर्मस्यैव कर्म किंतु अधर्मोपीत्याह । अधर्मोपी
ति । निषेधवाक्यप्रमाणकत्वादित्यर्थः । कर्मणोः फलमाह । तयोरिति । मोक्षस्तु अतीन्द्रियो विरोधः
शरीराद्यभोग्यो निषयात्वात् तन्यो । नात्मविशुद्धप्रसिद्ध इति वैलक्षण्यज्ञानाय प्रसिद्धत्वादीनि विशेष
णानि । सामान्येन कर्मफलं दुःखाधर्मफलं पृथक् प्रपंचयति । मनुष्येत्यादि । इति । तदेकोमानुषआनं
दस्ततः शतगुणो गंधर्वादीनामिति श्रुतेरनुष्ठानानुसारि तम्[illegible] [illegible]र्थः । ततश्च सुखतारतम्यादि
त्यर्थः । मोक्षस्तु निरतिशय सत्ता धनं च तत्र ज्ञानमेकरूपमिति वैलक्षण्यं । किंच साधनञ्च [illegible]
यत्संपन्न एकरूप एव मोक्षाविद्याधिकारी कर्मणि तु नानाविध इति वैलक्षण्यमाह । धर्मेति । ग
म्यते न केवलं किंतु प्रसिद्धं चेत्यर्थः । आर्थितं फलकामितं । साम र्थ्यलौकिकं पुत्रादि आदिपदादि
दं [illegible] शास्त्रानिर्दितं तल्लभ्यं । किंच कर्मफलं मार्गप्राप्यं । मोक्षस्तु नित्यसिद्ध इति भेदमाह । तत्र्येति । उपास
नायां । चितस्यैव प्रकर्षाद्दर्चिरादिमार्गेण ब्रह्मलोकगमनं तेआर्चिबमित्यादिना श्रूयत इत्यर्थः
अग्निहोत्रं तपः सत्यं वेदानामनुपालनं । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते । वापीकूपत
डागादिदेवतायतनानि च । अन्नप्रदानमारामाः पूर्तमित्यभिधीयते । शरणागतसंत्राणं भू
तानां चाप्यहिंसनं । बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते । तत्रापि चंद्रलोकेपीत्यर्थः । संपतति ।

कृष्ण
२५

गच्छति। अस्माल्लोकादमुं लोकमनेनेति संपातः कर्म यावत्कर्मभोक्तव्यं तावत्स्थित्वा पुनरायाती त्यर्थः। प्र-
न्नेष्वेसाकूर्ध्वगा तेषु मुक्तिविस्मृतारतम्यमुक्तो ऽयोगात्तेभूतदात। तथेति। इदानीमुक्त तद्गुरु तदनुरोधेन
तारतम्येवेदनं धर्मफलं प्रपंचयति। तथोर्ध्वमिति। द्विविधं कर्मफलं मोक्षस्य तद्वैलक्षण्यज्ञाना
य प्रपंचितमुपसंहरति। एवमिति। असितो कामक्रोधस्यान्यादि सिद्धार्थः। तेतं भुक्त्वा स्वर्गलोकं वि
शालामिति सामस्मरति: क्षीणे पुण्ये मर्त्यलोकं विशंति? पदर्शनात्फल तारतम्येन लोधनता रतम्यानुमानं न्या
यः। श्रुतिमाह। तथा चेति। मोक्षो न कर्मफलं कर्मफलविरुद्धत्वात् प्रियत्वे विशोकत्वे सति दाढ्योऽयमलो दि
धर्मवत्सात्। व्यतिरेकेण स्वर्गादिवदिति न्यायानुमानं श्रुतिमाह। अशरीरमिति। वावेसवन्तं
धर्मवत्सात्। मोक्षश्चेदुपासनारूपधर्मफलं
तत्तदेवप्रियमस्तीति तन्निषेधात्कोऽपि सोऽहम् धर्मकर्मफलमेवेति। ननु प्रियं नाम वैषयिकं सुखं तन्निषि
ध्यते। मोक्षस्तु धर्मफलमेव कर्मणो विचित्रफलदानसामर्थ्यादिति शंकते। अशरीरं समेवेति। अ
न्यनो देहान्तं शिलमशरीरं सन्तं तस्यानादित्वान्न कर्मसाध्यते नाहं। नेति। अशरीरं स्थूलदेहशून्यं दे
ह्यनेकेष्वनित्येषु एकं नित्यमवस्थितं महान्तं व्यापिनं आत्मेशं कृत्वा संचारयति। विभुमिति
तमात्मानं साक्षी ऽसन्नु शोकोपलक्षितं संसारं नानुभवतीत्यर्थः। स्वदेहाभावे श्रुतिमाह।
अप्राण इति। प्राणमनसोः क्रियाज्ञानशक्त्योर्निषेधात्तद्धीनान्तं कर्मेन्द्रियाणां निषेधो
हि यतः अतः शुद्ध इत्यर्थः। देहद्वयाभावे श्रुतिरसंगो हीति। निर्देहात्मस्वरूपमोक्षस्यानादि [illegible]
वत्त्वे सिद्धे फलितमाह। अत एवेति। नित्यत्वेऽपि परिणामित्वाद्धर्मकार्यत्वं मोक्षस्येत्याशंक्य नित्य
द्वेधा विभज्यते। तत्राद्यं विधिति। नित्यवस्तुमप्यत्यर्थः। परिणामि च तन्नित्यं चेति परिणामि
नित्यं। आत्मा तु कूटस्थनित्य इति न कर्मसाध्य इत्याह। इदं सिति। परिणामिनो नित्यसंप्रसक्ति

ता. भा. टि. २.
२९

ष्टाकल्पितं मिथ्यैव। कूटस्थस्य तु नाशाद्यभावात् नित्यत्वं पारमार्थिकं। कूटस्थत्वमित्यर्थः परिस्पंदाभाव
माह। व्योमवदिति। परिणामाभावमाह। सर्वविक्रियारहितमिति। फलानपेक्षित्वमाह। फलार्थक्रियापे
क्षामाह। नित्यतृप्तमिति। तद्धि रनुनपेक्षितं विशेषकं सुखं वा निरवयवत्वान्न क्रिया तस्य परानार्थम
पि न क्रियास्वरूपज्योतिष्ट्वात्। अतः कूटस्थत्वान्न कर्मसाध्यो मोक्ष इत्युक्तं कर्मतत्फलसंभिन्नोक्ते
तथैवाह। यत्रेति। कालानवच्छिन्नत्वाद्येवाह। कालेति। कालत्रयं प्रपंचमो पावर्तत इति योग्यत
यासंबंधनीयं। धर्माद्यनवच्छेदमानमाह। अन्यत्रेति। अन्यदित्यर्थः। कृतात् कार्यात्। अकृतो
स्य कारणात्। भूताद्वर्तमानाच्च। चकाराद्वर्तमानाच्च। अन्यद्यत्सर्वस्मात् तद्वदेत्यर्थः। ननु कोऽस्य
तय ब्रह्मणः कूटस्थनित्यत्वं वदंतु। मोक्षस्य नियोगफलत्वं किं न स्यादिति तत्राह। अत इति। तत्कैव संब
हैव। कर्मफलविलक्षणत्वादित्यर्थः। ब्रह्मैव हि मोक्षस्य कूटस्थत्वं धर्माद्यसंभिन्नत्वं चेति भावः। यद्य
यज्ञिज्ञास्यं तद्ब्रह्म अतः पृथक् जिज्ञास्यत्वात् धर्माद्यस्पृष्टमित्यर्थः। अतः शास्त्राभावपाठविषयमे
वार्थः। ब्रह्मणो विधिस्पर्शो नास्त्यपि यत्नेन स्यात्। कार्यविलक्षणानधिगतविषयत्वाभावान्नहि
ब्रह्मात्मैक्यं प्रमाणे ज्ञाते विधिपरवाक्या... शास्त्रं न यातादिनाविधेरनुपपत्तिः। यो
सिद्धस्यैक्योपासितिविधिदर्शनादिति भावः। अथवा मोक्षस्य नियोगसाध्यत्वे फलितं तत्र धर्मा
हा। ... इति। यदन्यत्र विज्ञास्यं ब्रह्म तस्य तत्रैव वेदांते रूपादि... समन्वयादित्यर्थः। विपक्षे
दंडपातयति। तद्यदीति। तत्रैवं सतीति। मोक्षे साध्यत्वेनानिष्टे सतीत्यर्थः। अतएवेति। कृतैर्नियोग
साध्यत्वेन नियोग्यात्मा... कर्तव्यनियोगाभावादित्यर्थः। प्रदीपात्ममोनिवृत्तिवत्... भावात्
निवृत्तिरूपमोक्षस्य दृष्टफलत्वाच्च न नियोगसाध्यत्वमित्याह। अपि चेति। यो ब्रह्मात्मेति।

वेद स ब्रह्मैव भवति। परं कारणं अवरं कार्यं तद्रूपे तदधिष्ठाने तस्मिन् दृष्टे सति अस्य द्रष्टुरनात्मबुद्धिरूपा अपि
कर्माणि क्षीयन्ते इति। ब्रह्मणः स्वरूपमानंदं विद्वान् निर्भयो भवति। द्वितीयाद्वै भयं भवति। अभयं ब्रह्म प्रा
प्नोति। अज्ञाननाशनात्। तज्जीवात्म्यं ब्रह्म गुरूपदेशात् आत्मानमेवाहं ब्रह्मास्मीति वेद स विदितवान् तत्
त्वमसि। आत्मानं ज्ञानात्। तज्ज्ञानात् ब्रह्म गुरूपदेशात् आत्मानमेव अहं ब्रह्मास्मि इत्यनुभवतः तत्रानुभवकाले मोह
स्यापि छेदनात् तद्ब्रह्म पूर्णमेव तत्परिच्छेदभ्रान्तिनाशात् अहं ब्रह्मास्मीत्यनुभवति। विद्यातत्फलयोर्मध्ये इत्यर्थः। मोक्षस्य विधि
शेषो न स्यात् इति श्रुतीनामर्थः। तासां तात्पर्यमाह। ब्रह्मेति। विद्यातत्फलयोर्मध्ये ये प्रयत्नास्ते अह।
फलत्वे स्वर्गादिवत् कालान्तरभावित्वं स्यात्। तथा च श्रुतिबाध इति भावः। इत्यत्र मोक्षस्य प्रयत्नसाध्यत्वे आह। तत्र
तत्त्वमसीति। तद्ब्रह्मैतत् अहमस्मीति पश्यन् तस्मात् ज्ञानात् वामदेवो मुनी ऋषिः सूर्यं ब्रह्म प्रतिपेदे अहं तत्र
प्रमेति। तद्ब्रह्मैतत् सत्यमस्मीति पश्यन् तस्मात् ज्ञानात् वामदेवो मुनिः अहं मनुरभवं सूर्यश्चेत्यादि ददर्शेत्यर्थः। यद्यपि
स्याज्ञेति [illegible] नु दृश्यो नात्मनि मे त्वान्यस्य सर्वात्मभूतस्य प्रकाशात् न ह मनुरित्यादि वेषम्यमस्ति तथापि
स्थितिर्न क्रियाया लक्षणं। ब्रह्मदर्शने तु ब्रह्मप्रतिपत्तिक्रियायामाह तु इति वैषम्यमस्ति। परस्परलक्षणः स्या
लक्षणहेत्वोः क्रियायाः इति सूत्रेण क्रियाप्रतिलक्षणहेत्वोरर्थे यो वर्तमाना कालोः परस्पर लक्षणत्वं कुर्वन्ति।
तस्मान्न चावादेशो यत्र इति विहितात् प्रत्ययस्य सामर्थ्यात् विष्णुरागायतीत्युक्ते तत्र स्वकर्तृकत्वम्।
मध्येन भातीति एतावतापश्यन् प्रतिपदे इत्यस्य दृष्टान्तमाह। पश्येति। किंच ज्ञानादज्ञाननिवृत्तिः अ
यतेज्ञानस्य विद्यायाः दूरवर्तिन्या दर्शितानि वर्तन्ते न प्रत्यक्षं ततो बोध्यत्वात् एवं वेदान्ताज्ञानं विद्यायद्भ्या इ
सोऽहं त्वं हीति भारद्वाजादयः षड् ऋषयः पिप्पलादगुरुपादयोः प्रणम्य ऊचिरे। त्वं खल्वस्माकं पि
ता यस्त्वमविद्यामहोदधेः परं पुनरावृत्तिशून्यं पारं ब्रह्मविद्याप्लवेनास्मांस्तारयसीति प्राप्य सिद्धा
नेनाज्ञानं नाशयसीति यावत्। प्रश्नवाक्यमुदाहृत्य दोषमाह। अतस्तमिति। अत्र तारयसीत्यन्तम्
पञ्चमस्येष्टं इष्टमुपसंहारस्य इति तिष्ठेदः। आत्मविद्या वै तरति इति भावः [illegible] मयप्रकृतमे

यो।

भ.गी.टी.

२८

वहिन दृष्टं सोहमत्र तस्मात् हे भगवः शोचामि तं शोचंतं मां भगवानेव ज्ञानप्लवेन शोकसागरस्य परं पारं प्रापयत्विति
नारदेनोक्तः सनत्कुमारस्तस्मै तपसा दग्धकिल्बिषाय नारदाय तमसः शोकनिदानाज्ञानस्य ज्ञानेन नि
वृत्तिरूपं पारं ब्रह्म दर्शितवानित्यर्थः॥ एतच्चावेदन्तेविचामत्रेविंमिक्रुतीति वाक्यमादिशब्दार्थः॥
एवं श्रुतेस्तत्त्वप्रमा मुक्तिहेतुर्न कर्मेत्युक्तं। तत्राक्षपादगोतममुनिसंमतिमाह। तथा चेति। गोतोहमि
ति मिथ्याज्ञानस्य कार्ये रागद्वेषमोहादिदोषाणां नाशः दोषापायाद्धर्माधर्मरूपप्रवृत्तेरपायः प्रवृत्ति
पापात्पुनर्देहप्राप्तिरूपजन्मापायः। एवं पाठक्रमेणोत्तरोत्तरस्य हेतुनाशात्तन्नाशे सति तस्य प्रवृत्ति
रूपहेतोरनंतरस्य कार्यस्य जन्मनोऽपायात् दुःखध्वंसरूपापवर्गो भवतीत्यर्थः।) ननु पूर्वसूत्रेण स
ज्ञानान्निःश्रेयसाधिगम इत्युक्ते सति इतरपदार्थभिन्नात्मतत्त्वज्ञानं कथं मोक्षं साधयतीत्याशंक्य
तं मिथ्याज्ञाननिवृत्तिद्वारेणेति यत्कुसुमिदं सूत्रं प्रवृत्तं। तथा च भिन्नात्मज्ञानान्मुक्तिं वदत्सूत्रं संगमयते
चेत्परमतानुसारत्वादित्यत आह। मिथ्येति। तत्त्वज्ञानान्मुक्तिरित्येतत्संमतम् [illegible] उक्तं। भेददर्शनं तु यत्र
हि द्वैतमिव भवतीति श्रुत्याऽत्र भ्रान्तिलोकस्य सोः समस्तमिति पदद्वयेन नैव [illegible] भ्रान्तिरित्युक्तत्वादनर्थहेतु
त्वाच्चान्न मुक्तिहेतुरिति भावः। ननु ब्रह्मात्मैकत्वविज्ञानमपि भेददर्शनवत् न प्रमा। स एव हि रूपत्वे
नयत्रांतिस्यादित्यत आह। न चेद्भ्रमित्यादिना। अत्यन्तं विनतिरस्कारेण रूपं वस्तु भेददर्शनं स एव यथा
मनः स्वप्रकाशत्वं संपादनं तत्तद्रूपा विभेदेवा अपि आत्मनो ज्ञानं तत्त्वसाम्याद्विभेदेवा एवम नरति
संपत् तदानंतफलप्राप्तिर्भवतीति। तथा चैतन्नत्त्वसाम्याज्जीवे ब्रह्माभेदः संपद्यत इति चेत्सर्पः। आलंब
नस्य प्राधान्येन ध्यानं प्रतीकोपासिरध्यासः यथा ब्रह्मदृष्ट्या मनस आदित्यस्य वा तथाहं ब्रह्मेति

त्व

रूप
२८

54

सानमभ्यासो नेत्याह । नचेति । आदेशः उपदेशः क्रियाविशेषो विशिष्टक्रिया तया योगो निमित्तं यस्य ध्यानस्य त
तथा यथा प्रलयकाले वैश्वानरादीन् संवृणोतीति संवर्गः । स्वापकाले प्राणो वागादीन् संहरतीति सं
हारक्रियायोगात् संवर्ग इति ध्यानं श्वादेरपि विहितं तथा [illegible] क्रियायोगात् जीवो ब्रह्मेति ज्ञानमिति
नेत्याह । नापीति । यथा पत्न्यवेक्षितमाज्यं भवतीति उपांशुयाजाङ्गस्याज्यस्य संस्कारकर्म पत्न्यवे
क्षणं विहितं तथा कर्मणि कर्तृत्वेनाङ्गस्यात्मनः संस्कारार्थं ब्रह्मज्ञानं नेत्याह । नाप्याज्येति । प्र
तिज्ञाचतुष्टये हेतुमाह । संपदादीति । उपक्रमादिलिङ्गैर्ब्रह्मण्येकरूपे सद्वस्तुनि प्रमितिहेतुर्यः समा
नाधिकरण्याख्यानोपपदनिष्ठः समन्वयः । तात्पर्यं निश्चितं तत्तपी [illegible] । किंच एकस्य ज्ञानादन्यज्ञा
निकृष्टस्यात्करणस्य योगादिभ्यः स्थितिः चिन्मात्रस्तादात्म्यरूपाहङ्कारसंबन्धिनो नश्यतीसत्ता
ननियत्तिफलवाक्यबाधः स्यात् संपदादिज्ञानस्याप्रमात्वे नाज्ञाननिवर्तकत्वात् । किंच जी
वस्य ब्रह्मत्वस्य संपदाकृत्यं तद्भावः । पूर्वरूपेऽधिष्ठिते नष्टे चान्यस्यान्या[illegible]मितो योगात् । त[illegible]स्मात् ब्र
संपदादिरूपत्वमित्यर्थः । संपदादिरूपत्वाभावे फलितमाह । अत इति । प्रमात्वोन्नतत्वसाध्या
कितर्हि निर्विचनप्रमाणसाध्येत्यर्थः । इतरेषां सिद्ध[illegible] अप्रिरूपमोक्षस्य कार्यसाध्यत्वे तज्ञान
स्याविरोध । विषयत्वं च कल्पयितुमशक्यं कस्यसाध्यत्वादित्याह । एवं प्रकृतस्येति । ननु ब्रह्मज्ञा
यतिकारकत्वात् पत्न्यवेक्षणकर्मकारकाज्यवत् तदुक्तिश्चेत् किं ज्ञाने ब्रह्मणः कर्मकारकत्वं तेन
पासनायां । नाप्याह । नचेति । शाब्दज्ञानं विधिक्रियार्थः । विदितं कार्यं । अविदितकारणे
तस्माद्दधि अन्यदित्यर्थः । येनात्मनीदं सर्वं विजानाति तं केन करणेन जानीयात् तत्
स्मादविषयत्वादित्यर्थः । नाद्वितीयमित्याह । नचेति । यन्मनसा न मनुते इति श्रुतेः

मनसा यत् ब्रह्म न जानाति सविषयत्वेन मुक्त [illegible] तदेवावेद्यं ब्रह्म त्वं विद्धि। यदुपाधिविशिष्टं देवतादि तमि
दमित्युपासते जनाः। नेदं ब्रह्म त्वं इत्यर्थः। ब्रह्मणः शास्त्रबोध्याविषयत्वे प्रतिज्ञाहानिरिति शंकते अविषयत्वे
इति। वेदान्तजन्यवृत्तिकृताविद्यानिवृत्तिफलशा[illegible]लितया शास्त्रप्रमाणकत्वं वृत्तिविषयत्वेऽपि स्वप्र
काशब्रह्मणो वृत्त्यसंनिधिकृतस्फुरणाविषयत्वाद् अप्रमेयत्वमिति परिहरति। नेति। परस्तात् फलं सौदर्शि
का[illegible] निवृत्तिरूपब्रह्मतात्पर्यादिति वाक्यार्थः। [illegible] निवृणोतीति। न हीति। विद्विषयत्वमिदं तत्त्वो आविषय
तया। निदं तया अदृश्यत्वे श्रुतिमाह। तथा चेति। यस्य ब्रह्म अमतं चैतन्या विषय इति निश्चय
स्तेन सम्यग् ज्ञातं। यस्य त्वेतस्य ब्रह्मचैतन्यं विषय इति मतं स न वेद। उक्तमेव दृढार्थं मनु यदृति
अविज्ञातमि। अविषयत्वतया ब्रह्म विज्ञानतां अविज्ञातमदृश्यमिति पक्षः। अज्ञानां तु ब्रह्म विज्ञातं
दृश्यं मिति पक्ष इत्यर्थः। दृष्टेर्द्रष्टारं चाक्षुषमनोवृत्तेः साक्षिणा अनयादृश्यया दृष्ट्या न पश्येः किंत्वा
त्मबुद्धिवृत्तेः किन्तु यत्स्वरूपाया साक्षिणं तमात्मानं विषयीकुर्यादित्याह। नेति। नन्वविद्यानिवृत्तिश्चेन्मा
त्रस्य प्रामाण्ये पि निवृत्तेरागन्तुकत्वान्मोक्षस्यानित्यत्वं स्यादिति नेत्याह। अनन्तरमिति। तत्त्वज्ञाना
दिस्यर्थः। एवं तस्य नित्यत्वादात्मरूपस्याचनानित्यत्वप्रसंगे इत्यर्थः। उत्पत्तिविकाराप्तिसंस्कार रू
पं चतुर्विधमेव क्रियाफलं। तद्भिन्नत्वान्मोक्षस्य नो पासनासाध्यत्वमित्याह। उत्पाद्यत्वादिना। तस्मा
त्स्थानमेकं मुक्तेसतेन। नन्वौत्पाद्यत्ववद्विकार्यत्वेऽपि न पश्येत इति प्रकृतिसन्वयः। दुनयति। तय
रिति। किं तस्याविस्पष्टान्तरं विकारः। नान्यनित्यत्वनिरालापक्रियया ह्येतत्स्वैव ब्रह्मणोऽप्राप
वदाप्तिरस्त्वित्याह। नचेति। आत्मनीयाप्तिर्नत्वाप्यत्वाप्यत्वाप्रसक्तात्। न क्रियापेक्षा तस्या
त्मेति स्यादिना। यथा श्रीहीणां संस्कार्यत्वेन प्रोक्षणापेक्षा तथा मोक्षस्य नेत्याह नापीत्यादिना। गुणाधानं श्री

कद

२

ह्रिषु प्रोक्षणादिना क्षालनादिना वस्त्रादौ मलापनयः। शंकते। स्यात्स धर्म इति। आत्मनस्तु स्वरूपमेव मोक्षो ना-
धेयधर्मवत्त्वात्ततः उपासनया मलेन योगः। स्यादित्यत्र हेतुः। मयेति। संस्कारो मलनाशः। क्रि-
यात्मनि मलः सः कल्पितो वा। द्वितीये तज्ज्ञानादेव तन्नाशो न क्रियया। आद्ये क्रिया किमात्मनिष्ठा
अन्यनिष्ठा वा। नाद्य इत्याह। न क्रियेति। अनुपपत्तिं स्फुटयति। यदिति। क्रिया स्वाश्रये सत्यागा-
दिविकारं अकुर्वती न जायत इत्यर्थः। तच्च वाक्यबाधनं। न द्वितीय इत्याह। अन्ययेति। अविषयत्वा-
त्क्रियाश्रयद्रव्यासंयोगित्वादिति यावत्। दर्पणे तु सावयवे क्रियाश्रयेष्टकाचूर्णादिद्रव्यसंयो-
गित्वात्संस्क्रियत इति भावः॥ अन्यक्रियया न्यो न संस्क्रियत इत्यत्र व्यभिचारं शंकते। नन्विति। आत्मने

वि मूलाविद्याप्रतिबिंबितत्वेन ग्रहोऽस्य न रोगोऽहमिति भ्रान्त्या देहतादात्म्यमापन्नस्य क्रियाश्रयत्वभ्रान्त्या संस्का-
र्यत्वभ्रमात्तत्र व्यभिचार इत्याह। नेति। कश्चिदिति। अनिश्चितब्रह्मतत्त्वस्वरूप इत्यर्थः। यत्रात्मनि विषये आरो-
प्यबुद्धिरुत्पद्यते तस्य देहस्येत्येतस्यैवारोग्यफलमित्यन्वयः। ननु देहाभिन्नस्य कथं संस्कारः। तस्यामुष्मि-
कफलभोक्तृत्वायोगादित्यत आह। तेनेति। देहसंहतेनैवाहंकरणप्रतिबिंबात्मनाऽकर्ताहमिति भास-
मानेन प्रत्ययात्कर्मादयोऽमनस्तादात्म्यादस्य संतीति प्रत्यासन्ना क्रियाफलं भुज्यत इत्यर्थः। मनोविशिष्ट-
स्यामुष्मिकभोक्तुः संस्कारो युक्त इति भावः। विशिष्टस्य भोक्तृत्वे न केवलस्य साक्षिण इत्यत्र प्रमाणमाह। तयो-
रिति। प्रमातृसाक्षिणोर्मध्ये सत्यसंसर्गमात्रेण कल्पितकर्तृत्वादिमान् प्रमाता पिप्पलं कर्मफलं भुंक्ते
इति। सत्यसर्गोपचितत्वेनान्यः साक्षितया प्रकाशत इत्यर्थः। आत्मादेरतः देहादियुक्तं प्रमात्रात्मा नामेत्यर्थः। एवं सो-
पाधिकस्य चिदात्मनो मिथ्यासंस्कार्यत्वमुक्त्वा निरुपाधिकस्यासंस्कार्यत्वे प्रमाणमाह। एक इति। सर्वभूते-
ष्वद्वितीय एकः देवः स्वप्रकाशः तथापि मायावृतत्वेनाप्रकाशत इत्याह। गूढ इति। ननु जीवेनात्मसंवे

57

सा०भा०टी०ता०

२९

याद्भिन्नत्वाद्वा देवस्यात्मानं न तु मायया गूढत्वादिति नेत्याह। सर्वव्यापी सर्वभूतान्तरात्मेति। देवस्य विभुत्वान्न तु सर्वप्रा
णिप्रत्यक्त्वाच्चावरणादेवात्मानमित्यर्थः। प्रत्यक्त्वे कर्तृत्वं स्यादिति चेन्न। कर्माध्यक्षः क्रियासाक्षीत्यर्थः। न
हि साक्ष्यमस्तीति द्वैतापत्तिः। नासर्वभूतानामधिष्ठानं भूत्वा साक्षी भवति। साक्ष्यमधिष्ठाने साक्षिणिव
त्यितामिति भावः। साक्षिशब्दार्थमाह। चेता केवल इति। बोद्धा सन् [illegible] सकर्त्ता साक्षीति लोके प्रसिद्धः। च
कारो दोषाभावसमुच्चयार्थः। निर्गुणत्वान्निर्दोषत्वाच्च गुणो दोषनाशो वा संस्कारो नेत्यर्थः। स इत्यु
पक्रमात् शुक्रादिशब्दाः पुंस्त्वेन वाच्याः। स आत्मा परितः सर्वं मा गात्। व्याप्तः शुक्रादीति मान्। अका
यो लिङ्गशून्यः। अव्रणः अक्षतः। अस्नाविरः शिराविधुरः। अनश्वर इति वा। आभ्यां पृथग्भ्यां स्थूलदे
हशून्यत्वमुक्तं। शुद्धो रागादिमलशून्यः। अपापविद्धः पुण्यपापाभ्यामस्पृष्ट इत्यर्थः। अनन्तरेति। कुत
लाक्षि विकारसंस्कारेभ्योऽन्यस्य च मते क्रियाफलं सन्नास्ति यन्मोक्षस्य क्रियासाध्यत्वेऽङ्गीकारं भवेदित्य
र्थः। ननु मोक्षस्यासाध्यत्वे शास्त्रारम्भो व्यर्थः। न तु ज्ञानार्थीत्यादिनाह। तस्मादिति। कारणभावादित्य
र्थः। व्याघातं शङ्कते। नन्विति। तथा च मोक्षे क्रियानुप्रवेशो नास्तीति व्याहतमिति भावः। मानस
मपि ज्ञानं न विधियोग्यं या क्रिया वस्तुतन्त्रत्वान्नरुसंस्थाप्यत्वाच्चेत्याह। नेति। वैलक्षण्यं प्रपञ्चय
ति। क्रिया हीति। यत्र विषये तदपेक्षया चोद्यते तत्र सा हि क्रियेति योजना। विषयवस्त्वनपेक्षा कृतिला
प्या क्रियेत्यत्र दृष्टान्तमाह। यस्यै इति। गृहीतमध्वर्युणेति शेषः। वषट्करिष्यन्होता। तं ध्यायेद्देवतामि
ति चैवमादिवाक्येषु यथा वा दृष्टी ध्यानक्रिया वस्त्वनपेक्षा पुरुषतन्त्रा चैते [illegible] तदा दृष्टी क्रियेत्यर्थः।
ध्यानमपि मानसत्वाद्दृष्टान्तवन्न क्रियेत्यत आह। ध्यानमित्यादिना। तथापि क्रियावैलक्षण्यः। कृत्सा
ध्यानमपि मानसत्वादृष्टान्तवन्न क्रियेत्यत आह। ध्यानं मिथ्यात्वे वैलक्षण्यं ज्ञानस्य स्पष्टयति। ज्ञानं त्विति। अ
साध्यत्वमनुपाधिरिति भावः। ध्यानक्रिया मुक्तौ न तावद्वैलक्षण्यं ज्ञानस्य स्पष्टयति। तस्माद्वस्तु
तः प्रमाणसाध्यं चोदनातन्त्रं न विधेर्विषयः। पुरुषबुद्धिद्वारा तन्त्रं हेतुर्यस्य तत्पुरुषतन्त्रं। तस्माद्वस्तु

वि ति च २ ने चो

व्यभिचारादपूर्वं तत्त्वाच्च ध्यानात् ज्ञानस्य महान् भेद इत्यर्थः। भेदमेव दर्शयंल्लक्षणेनाह। यथार्थेति। अभेदात्त
स्येपि विधितो ध्यानं कर्तुं शक्यं न ज्ञानमित्यर्थः। ननु प्रत्यक्षज्ञानस्य विषयजन्यतया तत्तत्त्वेपि शाब्दबोध
स्य तदभावाद्विधेयक्रियात्वमिति नेत्याह। एवं सर्वेति। शब्दानुमानाद्यर्थापि ज्ञानमविधेयक्रियात्वेन ज्ञा
तव्यं। तत्राभिमानादेव ज्ञानस्य प्राप्तेर्विध्ययोगादित्यर्थः। तत्रैवं सति तत्र ज्ञानस्याविधेयत्वे सतीत्यर्थः।
यथाभूतत्त्वमबाधितत्वं नन्यात्मज्ञानं परस्येत्। आत्मा संविद्यात् आत्मा द्रष्टव्य इति विज्ञाने लिङ्दृष्टोऽत यत्स
याः विध्याप्रत्ययः स्यात् लेअतो ज्ञानं विधेयमित्यत आह। तद्विषयइति। तस्मिन् ज्ञानरूपे विषये विध्ययः
पुरुषं प्रवर्तयितुं अशक्तत्वादिति। अनियोज्यं कृत्स्नसाध्यं नियोज्यमन्यं वा ज्ञानं तद्विषयत्वादिसि
र्थः। प्रमाणं नियोगइति बोद्धा नियोज्यो विषयस्थ्यो विधेर्नास्तीति भावः। तर्हि लिङ्गः श्रुत्य विधीयतां न
त्वाह। अहेयेति। वस्तुस्वरूपो विषयस्तस्मात् आत्मनो निरतिशयस्यात्मस्वात्मा न विधेयत्वमित्य
र्थः। उदासीनवस्तुनि विषयत्वोयज्ञानं न विधेयं। प्रत्यक्षादिफलाभावादित्यर्थः। विधिपदानां ग
तिं पृच्छति। किमर्थानीति। विधिच्छायानि प्रसिद्धयागादिविधितुल्यानीत्यर्थः। विधिप्रत्ययैराभि
ज्ञानं परमपुरुषार्थसाधनमिति सूच्यते। स्तुत्या आत्मनि विशेषहेतुरनेकानां सा पाविषयप्रवृत्तिः। श्रो
त्मश्रवणादि प्रतिबन्धिका तन्निवृत्ति फलानि विधिपदानीत्याह। स्वाभाविकेति। एवं चश्रवणेति। सो
ह्यात्मादिनां। तत्र विषयेषु संघातस्य प्रवृत्तिः तत्रोच्चरोध इत्यर्थः। सोऽतश्चित्तवृत्तिप्रवाहः प्रव
र्तयेति। ज्ञानसाधनश्रवणादावितिशेषः। श्रवणस्वरूपमाह। तस्येति। अन्वेषणं ज्ञानं। यदि दे
ह्यात्मसर्वंज्ञात्मेयेस्तनात्मैवा ध्येनो ज्ञाबोध्य तेऽआद्धितीयादहस्यात्सबोधेद्धविधितपस्वी दे
तयनोपजीवनः स्वास्थ्यतीतिभावः। आत्मज्ञाति नः कर्तव्याभावेमानन्दमात्ता तथा चेति। भयंस्व
यं प्रकाशानन्दः परमात्माहमस्मीति यदि कश्चित्पुरुष आत्मानं जानीयात्तदा किं फलमिच्छन् कस्य

ब्रादेरि ५

वा०भा०टी०टी० 30

याभोक्तुः प्रीतये शरीरं तप्यमानं ऽननुसंज्वरेत्तत्पेतत् । भोक्तृभोग्यद्वैताभावात् कृतकृत्य आत्मविदि प्रसि
प्रायः । इतीनदोर्ल्लस्यार्थस्येत्य [illegible] दः । एतत्कृत्स्नं तमं तत्त्वं । चलितकारमतनिरासमुपसंहरति । तस्मादि
ति । प्राभाकरोक्तमुपन्यस्यति । यदपिचेद्विपिदति । कर्तृत्वमोल्लोकसिद्धस्यान्यवेदार्थः । तदन्यत् श्रुति
नाख्येव वेदस्य कार्यपरत्वेन मानाभावात् इत्यर्थः । मानान्तराबोधसिद्धस्याह । तन्नेति । अतः तस्य
फलस्वरूपस्यात्मन उपनिषदेकवेद्यस्याकार्यशेषत्वात् कृत्स्नवेदस्य कार्यपरत्वमसिद्धं । न च प्र
वृत्तिनिवृत्तिलिङ्गाभ्यां श्रोतृस्थहेतुं कार्यबोधमनुमायवक्तुर्वाक्यस्य कार्यपरत्वं निश्चित्य वाक्यप
दानां कार्यान्विते शक्तिग्रहः [illegible] सिद्धस्य पदार्थस्य वाक्यार्थत्वं मिति वाच्यं । पुत्रस्ते जात इति वाक्य
श्रोतुः पितुर्हर्षलिङ्गेन पुत्रजन्मानुमाय पुत्रादिपदानां सिद्धे संगतिग्रहात् कार्यान्विताये स्या
अन्वितार्थे शक्तिरिति गौरवे लाघवात् सिद्धस्यादि वाक्यार्थसादिसत्वं । किंच अ [illegible] णः नास्ति त्वो
अन्विताथे शक्तिरिति [illegible] लाघवात् सिद्धस्यादि वाक्यार्थे [illegible] दिति
देव कृत्स्नवेदस्य कार्यपरत्वं इत्यवेदान्तेषु तस्याभानात् । अथ वा कार्यशेषत्वात् किं वा लोकसिद्धलो
दाहो । स्वितमभातरविरोधात् । तत्राद्यं पक्षद्वयं निराचष्टे । बोला विति । अनन्यशेषत्वात् प्रसि
सोऽहं त्वादिविशेषणं नास्ति सोभावे हेतुर्वेदान्तमानात्सिद्धस्य मुख्योहेत्वं तरमात्मत्वमाह । सताप
रुति । इतिदिग्मर्थो इदं न इदं नेति सर्वद्वैतनिषेधेनयआत्माऽपदिष्टः स एष इत्यर्थः । चतुर्थं स
कृते । नन्वात्माहमितिआत्मनोऽहंकारादिसाक्षित्वेनाहंधीविषयत्वस्य निरस्तत्वान्लोकसि
द्धत्वात् । नेति । यतोऽर्थकारादपि न तानेति तस्यालौकिकत्वं किमुताब्धिमित्याह । नहीतिम
मतः तारतम्यवर्जितः तत्तन्मतेऽप्यात्मानुपयोगित्वात्कामिविशेषणानि । एवमं निरस्यति ।
अतइति । केनाचिद्वादिना प्रमाणेनवेत्यर्थः । अनाम्यत्वान्नमानां तत्रविरोधश्चेत्तत्राह । लोक्षी के
मां चेतनत्वात् कर्तृत्वादिति तत्राह । विश्वमीति । अतश्च तत्साक्षित्वेनोपयोगाद्धत्वात् तस्य घातक

त्वोन्यकर्मशेषत्वमित्यर्थः। साक्षिणः सर्वद्रष्टृत्वाद्देहाद्यनुपादेयत्वाच्च न कर्मशेषत्वमित्याह। आत्म
त्वादिति। अनित्यत्वेनात्मनो हेयत्वमाशंक्याह। सर्वेहीति। परिणामित्वेन हेयत्वं निराचष्टे। वि
क्रियेति। उपादेयत्वं निराचष्टे। अत एवेति। निर्विकारत्वादित्यर्थः। उपादेयत्वं हि साध्यस्य न चात्म
नः नित्यसिद्धत्वात्तदित्यर्थः। परप्राप्त्यर्थमात्मा हेयः स्यादित्याह। तस्मादिति। पुरुषान्न परं किंचिदिति। श्रु
त्या सर्वस्यावधिः। एवमात्मनोनन्यशेषत्वादबाध्यत्वादपूर्वत्वाद्वेदान्तेषु स्फुटभानाच्च वेदान्तैक
वेद्यत्वमुक्तं। तत्र श्रुतिमाह। तं त्वेति। तस्य कारणस्य त्रयस्याधिष्ठानं पुरुषं पूर्णं हे शाकल्य त्वां पृच्छामीत्यर्थः।
अत इति। उक्तलिंगैः श्रुत्या च वेदान्तानामात्मवस्तुपरत्वनिश्चयादित्यर्थः। पूर्वोक्तमनुवदति। यदपीति।
वेदस्य नैरर्थक्ये शंकिते तस्यार्थवत्तापरमिदं भाष्यं। दृष्टो हीति। तत्र पूर्ववेदार्थावबोधनमित्यत्र
श्रीधर्मविचारस्य क्रमात्कर्मावबोधनमित्युक्तं नैतावता वेदान्तानां ब्रह्मपरत्वनिरासः। अत एवानुप
मा लब्धेर्थे तत्प्रमाणमिति सूत्रकारो धर्मस्य फलं वदता तत्त्वेन वेदार्थतो दर्शयति तच्चापि विशिष्टे ब्रह्मण
इति। न च वाक्यं किंचिदस्तीत्याह। तद्धर्मेति। निषेधशास्त्रस्यापि निवृत्तिकार्यपरत्वमस्ति तत्सूत्रभा
ष्यवाक्यजातं कर्मकांडस्य कार्यपरत्वाभिप्रायमित्यर्थः। वस्तुतस्तु लिंगाद्युच्यते कर्मकांडस्य तात्पर्यलि
ङर्थस्य लोके प्रवर्तकज्ञानगोचरत्वेन कृत्यं यागादिक्रियायास्तमिष्टसाधनत्वमेव न क्रियातोऽतिरि
क्तं कार्यं तस्य कृत्वात्मयद्य सिद्धत्वादिति। तस्यापि परानिमतकार्यविलक्षणे सिद्धे प्रामाण्यं
किंमूलानक्रांडस्येति मंतव्यं। किंच वेदान्ताः सिद्धवस्तुपराः फलवत्त्व [illegible]
[illegible]
[illegible]

तेष

61

वस्ये प्रदर्शितसोमादिशाब्दानामर्थान्वयं लंस्यात् तदर्थः। ननु कृतेनो कमपि विधेयता हि सामि सार्थं व्याह। प्रय
तीति। कार्या। एतस्मिरेवूण मव्याप्तार्थत्वेन कार्यशेषत्वे न दध्यादिशाब्दोपकृतं वक्ति चेत् तर्हि सत्त्वादिशा
ब्दः कूटस्थं नयकी सत्र को हेतुः। किं कूटस्थस्य अक्रियासाधुता। क्रियाशेषत्वाद्वेति प्रश्नः। ननु दध्या
देः कार्यान्वयित्वेन कार्यत्वादुपदेशः। न कूटस्थस्य अकार्यत्वादिसाधमार्गोऽन्यनिरस्यति। नहीति। द्वि
दध्यादेः कार्यत्वे कार्यशेषत्वे हानिः। अतो एवकृतस्य कार्याङ्गिन्तस्य शाब्दार्थत्वं लभ्यमिति भावः। द्वि
तीयं शङ्कते। अक्रियात्वेपीति क्रियार्थः कार्यशेषपरः कूटस्थस्यापि कार्यशेषत्वान्नोपदेशाद्वा तिभा
वः। भूतस्य कार्यशेषत्वं शाब्दार्थत्वाय फलाय वा। नाद्य इत्याह। नेष दोष इति। दध्यादेः कार्यशेषत्वे
ऽपि शाब्दे न वस्तुमात्रमेवोपदिष्टं न कार्यान्वयी शाब्दार्थः। अन्वितार्थमात्रे शाब्दानां शा। किन्त
स्यापि शाब्दे न वस्तुमात्रमेवोपदिष्टं न कार्यान्वयमी शाब्दार्थः। अन्वितार्थमात्रे शाब्दानोशा। किन्त
हणादिसर्थः। द्वितीयमङ्गीकरोति। क्रियार्थत्वं विलि। तस्य एकृतविशेषस्य दध्यादेः क्रियाशेषत्वं
फलमुद्दिश्यांगीक्रियते इत्यर्थः। न तु प्रलक्षण इति तु शाब्दार्थः। ननु भूतस्य कार्यशेषत्वांगीकारे स्वातन्त्र्येण
कथं शाब्दार्थतेति तत्राह। न चेति। फलार्थशेषत्वांगीकारमात्रेण शाब्दार्थत्वभंगो नास्तीत्यर्थः। ओन
र्थक्यं फलाभाव इति परं शंकते। यदीति। यद्यपि दध्यादिस्वतो निष्फलमपि क्रियाद्वारा सफलत्वाद
पदिष्टं तथापि कूटस्थब्रह्मवादिनः क्रियाद्वाराभावात् तेन दृष्टान्तेन किं फलं स्यादित्यर्थः। भूतस्य
फलं क्रियेव द्वारमिति नानियमः। रज्ज्वादिज्ञानमात्रेण सापत्न्यदर्शनादित्याह। दृश्यत इति। तथैव दध्या
दिवदेवेत्यर्थः। दध्यादेः क्रियाद्वारा साफल्यं। अतिरिक्तु णत्वस्य तदितिविशेषस्सापि वेदान्तानां सफल
कृतार्थकूस मात्रेण दध्याद्युपदेशसाम्यमपि सनवद्यं। इदानीं वेदान्तानां निषेधवाक्यतुल्यतां पर
ते ऽपि पत्राह आपि चेति। नञः प्रकृत्यर्थेन संबन्धात् हननाभावो नञर्थः। इष्टसाधनत्वं तथा

कार्याभेदे

दिप्रत्ययार्थः। इष्टस्यात्र नरकदुःखाभावः। तत्परिपालको हननाभाव इति निषेधवाक्यार्थः। हननाभावो दुःखा
भावहेतुरित्युक्तार्थाद्धननस्य दुःखसाधनत्वधिया पुरुषो निवर्त्तते। नात्र नियोगः कश्चिदस्ति। तस्य क्रि
यात्मत्वात् नदध्यादिविषयत्वात्। न च तत्र ननो भावरूपा नञर्थो ख्या निवृत्तिः क्रिया। अभावत्वेनापि
क्रियात्वायोगात्। अभावस्य भावार्थहेतुत्वासंभवात् अतो निषेधवाक्यस्य सिद्धार्थप्रामा
ण्यमिति भावः। विपक्षे दण्डमाह। आक्रियेति। ननु स्वभावतो रागतः प्राप्ते न हं सर्वेणानुरागेण नञः सं
बंधेन हेतुना हननविरोधी संकल्पक्रिया बोध्यते। सा च न अर्थरूपा तत्राप्राप्तत्वाद्विधीयते। अहनन
ं कुर्यादिति। तथा च कार्यार्थत्वमिदं वाक्यमित्याशंक्य निषेधयति। नवेति। औदासिन्यं पुरुषस्य स्वरू
पं तच्च हननक्रियानिरूपितं निवृत्तो औदासिन्यं हननाभाव इति यावत्। तद्व्यतिरेकेण नञः
क्रियार्थत्वं कल्पयितुं न शक्यमिति योजना। मुख्यार्थस्याभावस्य न अर्थत्वसंभवे लक्षणादि क्रियात्वे
लक्षणाया अन्याय्यत्वात् निषेधवाक्यस्यापि कार्यार्थत्वे विधिनिषेधभेदविप्लवापत्तेश्चेति भावः। न
नु तदभावत्वतदन्यत्वविरुद्धयोरपि नञः शक्तिः किं न स्यात्। अब्राह्मणः अधर्म इति प्रयोगदर्शना
दिति चेन्न अनेकार्थत्वस्यान्याय्यत्वादित्याह। नञश्चेति। गवादिशब्दानां तु अगत्या नानार्थत्वं। स्व
गेषु वाग्वज्रादीनां शक्यप्रभुर्बंधाभावेन लक्षणा न वर्तेरत्। अन्यविरुद्धयोस्तु लक्ष्यसंपृक्तं शक्य

सं

संबंधात्। ब्राह्मणादन्यस्मिन् क्षत्रियादौ धर्मविरुद्धे वा पापे ब्राह्मणाद्यभावस्य नञः शक्यस्य संबंधा
प्रकृते च अर्थात् योगात्। नञः प्रसज्यप्रतिषेध एव न पर्युदासलक्षक इति मंतव्यं। पक्षान नः प्र
कृतेन संबंधः। प्रकृतेः प्रसज्यार्थोपसर्जनत्वे प्रधानसंबंधोऽप्रधानानां किंतु प्रकृते सर्वत्र निषेधेन
प्रसुपार्थे इष्टसाधनत्वेन संबंधो नञः। इष्टं च स्वापेक्षया बलवदनिष्टाननुबंधि यत्तदेव नता
क्यो लिंकस्य रमात्रे विषसंपृक्तान्नभोजनस्यापि इष्टापत्तेः। तथा च न हंतव्यः हननं बलवदनिष्ट

अप्रख्यातेन देशा धातु योगात् =४

शा·भा·टी·रा·

३२

रागनाशे कुतः प्रच्युतिरिति भावः। यद्वा रागतः प्राप्ता
क्रिया रागनाशे स्वयमेव शाम्यतीत्यर्थः ७

साधनत्वे सतिइष्टसाधनं न भवतीत्यर्थः। अत्र चेदं तत्त्वम् इति हनने विशिष्टेष्टसाधनत्वभ्रान्तिप्राप्तमनूद्य नेत्सभा
वबोधने बलवदनिष्टसाधनं हननमिति बुद्धिर्भवति। हनने तात्कालिकेष्टसाधनत्वरूपविशेष्यसत्वेन विशि
ष्टाभावबुद्धेर्विशेषणाभावपर्यवसानात्। विशेषणं बलवदनिष्टासाधनत्वमिति तदभावो बलवदनि
ष्टसाधनत्वं नञर्थ इति पर्यवसन्नैतद्बुद्धेरौदासिन्यपरिपालिका सा हि। अभावेति। चोप्यर्थः पक्षांतर
घोली प्रकृतसर्थाभावबुद्धिवत्प्रसमाधीभावबुद्धिरपीत्यर्थः। बुद्धेः क्षणिकत्वात्तदभावे सत्यौदासिन्यात्प्र
च्युतिरूपा हननादौ प्रवृत्तिः स्यादिति तत्राह। सा चेति। यथाग्निरिंधनं दग्ध्वा शाम्यति। एवं सा नञर्था
वगायबुद्धिः हननादाविष्टसाधनत्वभ्रान्तिमूलं रागेंधनं दग्ध्वैव शाम्यतीत्यक्षरार्थः। परपक्षे तु हननवि
शेषेपि क्रियाकार्यत्वज्ञेपि हननस्येष्टसाधनत्वभ्रान्तेरनिरासात्प्रच्युतिर्दुर्वारा। तस्मात्तदभावादेव नञर्थइ
ष्टसंतरति। तस्मादिति। भावार्थाभावेन तद्विषयकृत्यभावात्कार्यतापि नस्त इष्टार्थः। यद्देश्यकर्तृपक्षे
नियत्स्वफलक्षितमौदासिन्यं यस्माद्विशिष्टभावापन्नमेवेति व्याख्येयं स्वतः सिद्धस्यौदासिन्यस्य नञ
र्थसाध्यत्वोपपादनार्थं नियत्स्वफललक्षितत्वमिति ध्येयं। तस्य व्रतोर्व्रतमित्यनुष्ठेयक्रियानाभिव्रत सिद्धेन
कार्यमुपक्रम्यते क्षेतो यं तमादिसमिति प्रजापतिव्रतमुक्तं। तदुपक्रमबलात्तत्र नञ ईक्षणविरो
धिसंकल्पक्रियालक्षणांगीकृता एयमगौरस्तु। अपर्यर्दइष्टार्थो नामधीत्यर्थमुक्तम्यनञः प्रतिषेधवा
चित्वाभावात् अन्यविरुद्धलक्षकत्वं। एतेभ्यः प्रजापतिव्रतादिभ्योऽन्यत्राभावमेव नञर्थं मन्यामह
इत्यर्थः। दुःखोपावपफलकेन नञर्थे सिद्धे निषेधशास्त्रमानत्वं यदेतन्तीनो प्रत्यक्षमानत्वमिति भावः।
तर्हि क्रियार्थानामानर्थक्यमिति तत्राह। तस्मादिति। वेदंतानां स्वार्थे फलवत्वा
कार्यकृत्याविषयं तदित्यर्थः। यद्यपीत्यादिस्पष्टार्थं। श्रवणज्ञानमात्रात्संसारनिवृत्तावपि साक्षात्का

श· ३२

राज्ञीव तत एव मुक्तिर्दुरुपपन्ना चेति स दृष्टान्तमात । अत्रोच्यत इत्यादिना । अहमिति साक्षात्कारविरोधादित्यर्थः ।
तत्त्वविदो ज्ञानिनो मुक्ता मानमात । तदुक्तं श्रुत्येति । जीवतोऽशरीरत्वं विरुद्धमिति शंकते । शरीर इति । आत्म
नो देहसंबंधस्य भ्रान्तिप्रयुक्तत्वात्तद्विद्यया तन्नाशात् अशरीरत्वं जीवतो युक्तमित्याह । नेत्यादिना । अशे
षात्मस्वरूपत्वमशरीरत्वं तद्विद्यया जीवतोऽप्यस्य तदित्याह । मिथ्येति । देहात्मनोः संबंधः सत्य इति शंकते
तत्कृतेति । तन्नाशार्थं कार्यापेक्षेति भावः । आत्मनः शरीरसंबंधे जाते धर्माधर्मोत्पत्तिः तस्यां सत्यां संबंध
जन्मेत्यन्योन्याश्रयादेकस्यासिद्धौ द्वितीयस्याप्यसिद्धिः स्यादित्यपि परिहरति । नेत्यादिना । नन्वेतद्देहजन्यध
र्माधर्मकर्मण एतद्देहसंबंधहेतुत्वे स्यादन्योन्याश्रयः । पूर्वदेहकर्मण एतद्देहसंबंधोत्पत्तिः पूर्वदेहस्य
तत्पूर्वदेहकृतकर्मण इति बीजांकुरवदनादित्वान्नायं दोष इति तत्राह । अंधेति । अन्धपरम्परान्याय इत्यर्थः
नहि बीजादंकुरः ततो बीजान्तरं च यथा प्रत्यक्षेण दृश्यते तद्वदात्मनो देहसंबंधः पूर्वकर्मकृतः प्रत्यक्षः
नाप्यस्ति क्वचिदागमः । प्रस्तुतात्ते गोहीत्यादिश्रुतिः सर्वकर्तृत्वं वारयतीति भावः । तत्र युक्तिमाह । क्रिये
ति । कूटस्थस्य कूटस्थत्वान्न कर्तृत्वमित्यर्थः । स्वतो निष्क्रियस्यापि कारकसंनिधिना कर्तृत्वमिति रा
जादृष्टान्तवैषम्येण निरस्यति । नेति । राजादीनां स्वकृतं त्वस्त्येव कर्तृत्वं पुत्रं नात्मन इत्यर्थः । देहकर्म
णोरविद्याकृतयोर्बीजांकुरवदावर्तमानयोरात्मना संबंधो भ्रान्तिकृत एवेत्याह । मिथ्येति । ननूपजे
ते लिंगशरीरनुपपत्त्यात्मनः कर्तृत्वमेष्टव्यमिति तत्राह । एतेनेति । भ्रान्तिकृतेन देहादिसंबंधेन यागा
दिकर्तृत्वमात्मसंबोध्यारोप्यत इत्यर्थः । अत्राहुः । प्राभाकरा इत्यर्थः । भ्रान्तसंभावाद्देहसंबंधादि
कं सत्यमिति भावः । भेदस्य नाभावाद्वा गौणं इत्याह । नेति । प्रसिद्धो ह्यात्मवस्तुनोऽभेदो येन तस्य गौण
मुख्यज्ञानाश्रयत्वं प्रसिद्धेरित्यर्थः । यस्य तस्य पुंसो गौणोऽस्य यतः इत्यन्वयः । सोऽयमादिगुणविषयावि

ग॰भा॰टी॰ग॰

३३

त्यर्थः। तस्यानिति। भेदज्ञानमूलस्य पुंसदृत्यर्थः। शब्दसहस्याभिति। शब्दजन्यबोधं भवेदित्यर्थः। संशयमूलो ताव
दाहरति। यथा मंदेति। यदा संशयमूलयोर्नियोगेण संतदाक्रोति मूलयोः किंवा व्याभिसाह। यथा वैति। अनेक
स्यादिति। अत एव ताहृत्यादिवा संस्कारो द्वौ भेसतीत्यर्थः। निरूपचारेण्यागुणज्ञानं विनेत्यर्थः। व्यतिरेको
त्मोस्तित्ववादिनामिति। इदं ज्ञानवादिनां लुप्रमेयसाक्षिमानहलिपनावः। जीवन्मुक्तौ प्रमाणमाह। तथा चेति
तत्त्वज्ञजीवन्मुक्तस्य देहे यथा दृष्टान्तः। श्रुतिनिर्ल्वयनीसा [illegible] पर्लकूवल्मीकादौ प्रसक्ता लोकिस्ताप
ता सर्पेण त्यक्ताभिमानो वर्तते। एवमेवेदं विदुषा [illegible] भिमानं शरीरं तिष्ठति। अथ तथा त्वन्यानि
मुक्तः सर्पवदेवायं देहस्थोऽशरीरः। विदुषो देहे सर्पस्य त्वचीवाभिमानाभावादशरीरस्थोऽदमतः प्राणि
तीति प्राणो जीवन्नपि श्रुतेर्वाक्यं न कहलले जः स्वमेजमोऽशरीरानंद एवेत्यर्थः। वस्तुतो चक्षुरस्थिबाधित
चक्षुरादयनुवत्सा सच्चक्षुरिवेत्यादि कोऽन्यं। इत्सनवयमिति। श्रुत्सोऽमेशा नान्मुक्तिन्याभ्यालि इवेदं
तानां प्रामाण्यं हित शास्त्रे नो छा स्त्रलं च निर्दोषलयाहित्य तमित्यर्थः। श्रवणान प्रदिदृश्यपश्रु वणात्त
मनननिदिध्यासनयोरप्यन्तर वाक्यभेदेन विध्यंगीकारात् श्रवणो विधिरो व्यर्थं मदिरम लान
लक्ष्यतया प्राधान्यादित्साह। नेति। श्रवणे ज्ञानकरणे वेदान्तगोचरत्वात् प्राधान्यं मनननिदिध्यास
नयोः प्रमेयगोचरत्वात् तदंगत्वं। अयमाहृष्टस्य ज्ञानानुपयोगाः सर्वापेक्षान्यादितिमंतव्यं। तर्हि सा
नेविधिः क्रियासत्क्षत्त्राह। पादिहीति। यदि ज्ञाने विधिमंगीकृत्य वेदान्तेरखात श्रवण विध्येयस्ता
ने कर्मकारकत्वेन क्रियायुज्येत तदा विधिविसेवत्वं स्यात्। न त्वेवं तस्य विनिमुक्तत्वमस्ति प्राप्तव
गत्सापूर्वा [illegible] त्वावेविध्ययोगादित्यर्थः। तस्माद् विलक्ष्यत्वं भवात्। अतः शेषत्वासंभवात्। स्तुतं
योजयति। स्वतंत्रमिति। एवं चसतीति। चोदचारणेनुक्ता सा श्रवणः स्यात् तत्र सत्सेवपयायतो व्या

सादिवाक्ये तत्र ज्ञानेनाज्ञाननिवर्तितरूपफलत्वाभेसतीत्यर्थः २

तत्सादिवाक्ये तत्त्वज्ञानेनाज्ञाननिवर्तितरूपफल

सस्यापृथक्कृतास्वकृतिर्मुक्त्या धर्मविलक्षणप्रमेयत्वाभावात्। वेदोक्तानां कार्यपरत्वेनु प्रमेयाभेदात् नयुक्ते
सर्थः। ननु मानसधर्मविचारार्थं पृथगारंभ इत्याशंक्याह। आरभ्यमाणं चेति। अथवा ह्यस्य धर्मधर्म
विचारानंतरं अतो वाक्यधर्मस्य शुद्धिद्वारा मानसोपासना धर्महेतुत्वोपपत्तिरिति। मानसधर्मजिज्ञा
स्य इति सूत्रं स्पष्टं स इत्येवं दृष्टांतमाह। अथेति। तत्तीमाध्याये शुक्लादिभिः दोषहीनविनिर्णयानंतर
मोक्षिणास्तो ब्रह्मप्रयोगस्वकालतः कः क्रतुदोषः को वा पुरुषदोष इति जिज्ञास्यत इत्यर्थः। एवमारभ्येत
न स्यादर्थं तस्माद्दूतरधर्मार्थमारंभ इत्ययुक्तमिति भावः। स्वमते त्वानुगुण्यमस्तीत्याह। अत्रेति। ते
भिन्नभिन्नो अत्र न विचारितमिति तज्जिज्ञास्यत्वे सूत्रं युक्तमित्यर्थः। वेदं तीर्थ्य अवेद हेतं तर्हि हेतत्वापे
क्षाविध्यादीनां कार्यातिरिक्तार्थस्य [illegible] तेषां प्रामाण्यं न पश्यामीत्यादि [illegible]। तस्मादिति। मानस
प्रमेयप्रमात बाधवत्त्वादित्यर्थः। अत्र न कार्यदोषः तद्वो [illegible] सर्वव्यवहार इत्यत्र अर्थविदां
[illegible] इति। [illegible] ब्रह्मपूर्णमात्मा [illegible] इति सर्वत्राध्यस्त इति सेवंबो
[illegible] निश्चयात् पुत्र [illegible] इति स्वीय दुःखे
[illegible] मिथ्यात्मा [illegible] इत्यर्थः। नन्वहं
हेतोः [illegible] कार्यं विधि निषेधादि व्यवहारः कथं प्रवर्तेत। [illegible] न कथंचिदुच्यते इत्यर्थः। [illegible]
अस्येति बाधो बाधितः अहमर्थस्य प्रमातुः [illegible] प्रमातृत्वस्य [illegible]
तः [illegible] बाध इत्याह। अन्वेष्टव्य इति। य आत्मापहतपाप्मा विजरो विमृत्युर्वि
शोकः सोऽन्वेष्टव्य इति श्रुतेः। [illegible] परमात्मविज्ञाना [illegible] प्रमातृत्वं प्रमा
तैव [illegible] पाप्मरागद्वेषमरण [illegible] परमात्मा स्यादित्यर्थः। प्रमातृत्वस्य कल्पितत्वे तदा
श्रितानां प्रमाणानां प्रामाण्यं कथमित्यत आह। देहेति। [illegible] प्रसंगः कल्पितो [illegible]

यहारां गतयामानसेनेणते वेदवै: तद्वल्लौकिकमप्यक्षादिकमात्मबोधावधिव्यवहारकाले बाधाभावात्
व्यावहारिकं प्रामाण्यमिष्यते। वेदांतानां तु कालत्रयाबाध्यबोधितत्वात् तत्त्वावेदकं प्रामाण्यमिति तु रा
द्धार्थ:। आत्मनिश्चयात्। आ आत्मनो निश्चयादित्यत्र आङ् मर्यादायां। प्रमातृत्वस्य कल्पितत्वे पि विष
याबाधात्प्रामाण्यमिति १ राव:॥ ॥रामनाश्रित्य परे धाश्रित्य कृत्वा मनसमन्वय:। कार्यतात्पर्यबाधेन सा
धित: शुद्धबुद्धये॥॥ एवं समन्वयाक्षेपलक्षणमवांतरसंगतिमाह ॥ ५ ॥ सांख्यादयस्त्विति। स्वयंसु
सिद्धे वेदांतानां समन्वय:। तथापि मानांतरायोग्ये ब्रह्मणि शक्तिग्रहायोगात् कूटस्थत्वेन कारणत्वा
योगाच्च न समन्वय:। किंतु सर्गाद्यं कार्यं जडप्रकृतिकं कार्यत्वात् घटवत् इत्यनुमानगम्ये त्रिगुणे प्रधा
ने समन्वय इत्याक्षिपंतीत्यर्थ:। सिद्धे मानांतरगम्यमेवेत्याग्रह: शक्तिग्रहार्थ: अत एव प्रधानादाव
नुमानोपस्थिते शक्तिग्रहसंभवात् तत्परतया वाक्यानि योजयंतीत्युक्तं। किंच तेजसा सोम्य शुंगे
न सन्मूलमन्विच्छेत्याद्या: श्रुतय: शुंगेन लिंगेन कारणस्य सतोन्वेषणं दर्शयंतो मानांतरसिद्धे
वज्ञाते कारणे वदंतीत्याह। तदेवेति। ननु अतीन्द्रियत्वेन प्रधानादेर्व्याप्तिग्रहायोगात् कथमनुमानं
तत्राह। प्रधानेति। यत्कार्यं तज्जडप्रकृतिकं। यथा घट: यज्जडं तच्चेतनसंयुक्तं यथा रथादिरिति सामा
न्यतो दृष्टानुमानगम्या: प्रधानपुरुषसंयोगा इत्यर्थ:। अद्वितीयब्रह्मण: कारणत्वविरोधि
मतांतरमाह। काणादास्त्विति। स्त्रष्टिवान्ये ९ त्यत्र परार्थानुमानरूपे ९ योयं कार्यं तद्बुद्धिमत्कर्तृ
कमिति। ईश्वरं कर्तारं परमाणूंश्च यत्कार्यद्रव्यं तत्स्वन्यूनपरिमाणद्रव्यारब्धमित्यनुमि
अन्ये अपि बौद्धादय: असद्वा इदमग्र आसीदित्यादिवाक्याभासा:। यद्दल्तु तत्पून्यायसानं :

प्रतरद
कू
३५

यथा दीप इति युक्त्याभासः। एवं वादिविप्रतिपत्तिमुक्त्वा तन्निरासायोत्तरसूत्रेष्वलं दर्शमवतारयति। अ
तत्रेति। वादिविवादे सतीत्यर्थः। व्याकरणमीमांसान्यायनिश्चितत्वात्तत्पदवाक्यप्रमाणज्ञत्वं। युक्ता
ग कारणं तदचेतनमचेतनं वेति ईक्षणस्य मुख्यत्वगौणत्वाभ्यां संशये पूर्वपक्षमाह। तत्र सांख्या इति।
अपिशब्दो वैयाकरणार्थो। सदेवेत्यादिस्पष्टब्रह्मलिंगवाक्यानां प्रधानपरत्वनिरासेन ब्रह्मपरत्वोक्तेः
श्रुत्यादिसंगतयः। पूर्वपक्षे जीवस्य प्रधानैक्योपास्तिः। सिद्धान्ते ब्रह्मैक्यज्ञानमिति विवेकः। अ
चेतनस्यैव सर्वज्ञत्वं। न चेतनस्येत्याह। तेन च सत्त्वधर्मेणेति। न केवलस्येति। जन्यज्ञानस्य
सत्त्वधर्मत्वात्तन्निष्ठोपत्त्वेर कार्यत्वाच्चिन्मात्रस्य न कर्तृत्वमित्यर्थः। ननु गुणानां साम्याव
स्था प्रधानमिति सांख्या वदंति। तदवस्थायां सत्त्वस्योत्कर्षाभावात्कथं सर्वज्ञत्वमत आह। त्रि
गुणत्वादिति। त्रयो गुणा एव प्रधानं तस्य साम्यावस्था तदपेदा प्रधानमित्युच्यते। तदवस्था
यामपि प्रलये सर्वज्ञान शक्तिमत्त्वरूपं सर्वज्ञत्वं अक्षतमित्यर्थः। ननु मया किमिति शक्ति
मत्त्वरूपं गौणं सर्वज्ञत्वमंगीकार्यमिति तत्राह। नतीति। अनित्यत्वान्न सा प्रलये चेन्नाशात् शक्ति
मत्त्वं वाच्यं। कारकांतराभावाच्चेत्याह। अपि चेति। मतद्वयसाम्यमुक्त्वा स्वमते विशेषमाह। अ
पि चेति। ब्रह्मणः कारणत्वं समतिपादे सामर्थ्यं ते प्रधानादेः कारणत्वं तत्पूर्वपादे युक्तिभिर्निरस्य
ते। अपुना श्रुतिभिर्निरस्यति। ईक्षतेर्नाशब्दमिति। ईक्षणश्रवणाद्वेदशब्दावाच्यं अशब्दं प्र
धानं। अशब्दत्वान्न ~~कारणं~~ कारणमिति सूत्रयोजना। तस्य शब्दवाच्यं कारणमीक्षता इक्ष

सत्व

सर्वज्ञ

लोका

णमेवाह। बहूनिति। बहुप्रपंचरूपेण। स्वसर्गमहमेवोपादानतया कार्याभेदात् जनिष्यामीत्याह। प्रेति।
एवं तत्सृष्टिक्रिया आकाशं वायुं च सृष्ट्वा तेजः सृष्टवदित्याह। तदिति। मिषत् चलत् तत्सत्कांते
मितियावत्। सजीवात्मिन्नः परमात्मा प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रि
यं मनो ऽन्नमन्नाद्वीर्यं तपो मंत्राः कर्म लोका लोकेषु नाम चेत्युक्तौ षोडशकलाः। ननु ईक्षतेरिति धातुनि
र्देशो इति का। सा यमनस्मरणादीक्षतेरितिपदेनतिबलेन धातुरुच्यते। तेन धात्वर्थ ईक्षणं कथं
व्याख्यायत इत्याशंक्य लक्षणयेत्याह। ईक्षते [illegible]रिति चेति। इति कर्तव्यतौ विधेयो यजतेः पूर्ववत्त्व
मिति जैमिनिसूत्रे यथा यजतिपदेन लक्षणया धात्वर्थो याग उच्यते तद्वदिहापीत्यर्थः। सोमा
दिविकृतियागस्थांगानामविधानात् पूर्ववत्त्वं दर्शादिप्रकृतिस्थांगवत्त्वमिति सूत्रार्थः। धात्व
र्थनिर्देशेन लाभमाह। तेनेति। सामान्यतः सर्वत्वो विशेषतः सर्वविदिति भेदः। ज्ञानमीक्षणमे
व तपः। तपस्विनः फलमाह। तस्मादिति। एतत्कार्यं सूत्राख्यं ब्रह्म। केवलसत्त्वचेतनीनत्व
मंगीकृतप्रधानस्य सर्वज्ञत्वं निरस्तं। संप्रति न केवलं जडत्वेनैव न शाब्दार्थः। किंतु साक्षि
बोधविशिष्टस्यैव वित्तिव्यक्तबोधोपादानं। तच्चाचेतनस्य प्रधानस्य नास्तीत्याह। अपि चे
ति। साक्षित्वमस्ति चेत् नो कूटस्थानवत्वं स्यादिति शेषः। ननु सत्त्वशक्तिमात्रेण योगिनां सर्वज्ञ
त्वमुक्तमित्यत आह। योगिनामिति। सेश्वरसांख्यमतमाह। अथेति। सर्वज्ञत्वं नाम स
र्वगोचरज्ञानवत्त्वं न तु ज्ञानकर्तृत्वं। ज्ञानस्य कृतसाध्यत्वात् इति हृदि कृत्वा पश्यतीति। इद

व

क.
३५

त्वादिति। सर्वं जानातीति सर्वज्ञस्तस्य साधुत्वं शङ्कते। ज्ञाननित्यत्वश्रुतिः। नित्यस्यापि ज्ञानस्य तत्तदर्थोपहितत्वेन अन-
त्यरूपात् भेदं कल्पयित्वा कार्यत्वोपचारात् लक्षणस्तत्कर्तृत्वव्यपदेशः साधुरिति सदृष्टान्तमाह। न प्रतप्तेति।
संततत्वेऽप्यर्थः। अत्राप्यविवक्षितेऽपि। ननु प्रकाशते रकर्मकत्वात् सवितुः प्रकाशनम् इति प्रयोगोऽपि जानातेः
सकर्मकत्वात् कर्माभावे तद्दृष्टान्तेऽसम्पूर्ण इति तत्राह। कर्मापेक्षायामपीति। कर्मादि वर्षोपाम सिप्रकाशरूपे
सवितरि प्रकाशत इति कर्त्रर्थं चेत् प्रकाशक्रियामाश्रयत्वे न कर्तृत्वोपचारवद् ईश्वरे ज्ञानक्रियायामपि चिद्रूपेक्षणक-
र्तृत्वोपचारान्न वैषम्यमित्युक्तं पूर्वं। अधुना तु कुम्भकारस्येवोपाध्यन्तःकरणव्यक्तिरूपेक्षणवदीश्वरस्या-
पि स्वोपाध्यविद्यायाः सिसृक्षायस्य संस्कारायाः प्रलयावसाने नोद्बुद्धसंस्कारायाः सर्गोन्मुखः कश्चित्
परिणामः तस्या सूक्ष्मरूपेण निलीनसर्वकार्यविषयकं ईक्षणं तस्य कार्यत्वात् कर्मसद्भावाच्च तत्कर्तृ-
त्वं मुख्यमिति द्योतयति। सूत्तरामिति। ननु मायोपाधिकबिम्बचिन्मात्रस्येश्वरस्य कथमीक्षणं प्रति
मुख्यं कर्तृत्वं रूपप्रभावादिति चेन्न कार्यानुकूलज्ञानवत एव कर्तृत्वादीश्वरस्यापीक्षणानुकूलनि-
त्यज्ञानवत्त्वात्। नित्यसिद्धेनैव कर्तृत्वनिर्वाहात् क्रिमीक्षणेनेति वाच्यं। बाध्याद्देशे वरावर्तवत्त्वं
पचनात् क्रियाकारो नेत्यपि सङ्गात्। अतः श्रुतत्वा [illegible] द्याधिकरणत्वेनोत्कारादि देहत्वेनायं तु क्रत्वे
नश्रुतमीक्षणमाकारादिहेतुत्वेनोक्ती कार्यप्रसङ्गः। अव्याकृते। सूक्ष्मात्मना स्थिते व्याकर्तुं स्थूली-
कर्तुं अव्याकृतकार्यपरत्वेनैव तन्यरूपेक्षणस्य कारकानपेक्षत्वेऽपि नित्यरूपेक्षणस्य कारकत्वं वा
चेष्टासां क्ष्यात्। अपि न्यायिद्यामत इति। यथैकस्य ज्ञानं तथान्यस्यापि क्षितिनियमाभाव

ने

इष्टेरर्थः

१·भा·टी·टा·

३६

न्मायिनो शरीरस्यापि जन्येक्षणकारकत्वमिति भावः। ननु यज्जन्यत्वानंतं तच्छरीरसाधर्म्यमिति नियमाभिरस्ती त्वा
रीक्ष्य श्रुतिबाधमाह। मेत्रैश्चेति। कार्यं शरीरं करणमिंद्रियं। अत्रेश्वरस्य शक्तिर्माया च कार्यापेक्ष
या परा विचित्रकार्यकारित्वाद्विविधा साल्लैतिश्रु माचाभिद्धानप्रमाणसिद्धेत्याह। श्रूयत इति। ज्ञान
रूपेण बलेन प्राणादिक्रिया सा स्वाभाविकी अनादिमायात्मकत्वादित्यर्थः। ज्ञानस्य चैतन्यस्य
बलं मायाव्यक्तिबिंबितत्वेन स्फुटत्वं तस्याः क्रिया नाम बिंबत्वेन ब्रह्मणो जनकत्वात्तत्त्वापि स्वाभा
विकीतिवार्थः। अपाणिरपि ग्रहीता। अपादोपि जवनः। ईश्वरस्य स्वकार्ये कोऽपि हेतुसापेक्षता ना
स्तीति भावः। अग्र्यमनादिं पुरुषं अनंतं महांतं विभुमित्यर्थः। अपसिद्धांतं शंकते। नन्विति। ज्ञा
ने प्रतिबंधकारणान्यविद्यारागादीनि श्रुतावतदीश्वरादन्यो नास्तीत्यन्वयः। औपाधिकस्य जीवे
श्वरभेदस्य मयोक्तत्वान्नापसिद्धांत इत्याह। अन्योन्यत्वल इति। तत्कृतः उपाधिसंबंधकृतः ईश्व
तज्जन्यप्रसररूपो व्यवहारः असंकीर्ण इति शेषः। अव्यतिरेके कथमसंकरस्तत्राह। तत्कृत चेति।
उपाधिसंबंधकृत इत्यर्थः। देहादिसंबंधस्य हेतुरविवेको नाद्यविद्या। तया कृत इत्यर्थः। अविद्या
यो हि प्रतिबिंबो जीवः बिंबचैतन्यमीश्वर इति भेदो विद्याधीनसत्ताकः। अनादिभेदस्य कार्य
लाघोगात्। कार्यबुद्ध्यादिकृतप्रमात्रादिभेदस्तु कार्य एवेति विवेकः। नन्वखंडस्वप्रकाशात्मनि
कथमविवेकस्तत्राह। इत्यपतेन्चेति। बहुलो देहादिभिन्नस्वप्रकाशस्यैव सत आत्मनो नरोऽहमिति
भ्रमो दुरपह्नवः। स च मिथ्याबुद्ध्या मीयत इति मिथ्याबुद्धिमात्रेण भ्रांतिसिद्धा ज्ञाने
नेकल्पित इति चकारार्थः। यद्वोक्तमिथ्याबुद्धौ लोकानुभवमाह। इत्यपवतेचेति। इत्थं स्वावेत्तती

प्रति

कू·द
३६

या। श्रोत्रात्मना दृश्यत इत्यर्थः। पूर्वं पूर्वं स्रोतोमात्रेण दृश्यते न च प्रमयेति वार्थः। कूटस्थस्यापि मायिकं कृ
रणत्वं युक्तमित्याह। यथेति। यत्स्वैव घे शब्द शक्ति यह्यायोग इति तन्त्र। सदादिपदानां अबाधिता
र्थेषु लोकावगतशक्तिकानां वाच्यैकदेशत्वेनोपस्थितानां ब्रह्मलक्षकत्वादिति स्थितं। स प्रयत्नतरस्त्रौनि
रस्यशंकामाह। अत्राहेति। अन्यथापि। अचेतनत्वेपि। ननु प्रधानस्य चेतनेन। कृतसाम्यं। येन गौणमी
क्षणमिति। तत्राह। यथेति। नियतक्रमवत्कार्यकारित्वं साम्यमित्यर्थः। उपचारप्रायेवचनादिति गौणा
र्थप्रचुरे प्रकरणे समाम्नानादित्यर्थः। अप्तेजसोरिवाचेतने सति गौण ईक्षतिरिति चेन्नात्मशब्दात्स
त्र्येतन्नेतनस्त निश्चयादिति सूत्रार्थमाह यदुक्तमित्यादिना। सा प्रकृता सच्छब्दवाच्या। इयं इति त्रीदे
वतापरोक्षा हं तइदानीं भूतस्य नंतरं इमाः स्तिस्रस्तेजोबन्नरूपाः परोक्षत्वात् देवता इति द्वि
तीयाबहुवचनं अनेन पूर्वकल्पानुभूतेन जीवेनात्मना मम स्वरूपेण ता अनुप्रविश्य तासां नामप
सापनाम च रूपं च स्थूलं करिष्यामीति ईक्षते सन्वयः। लौकिकमसि च्छेजीवं प्राणधारण इति धातोर्जी
वति प्राणान्धारयतीति निर्वचनाच्चेत्यर्थः। अथवेति। जपक्षे तु बिंबप्रतिबिंबयोर्लोके भेदस्य क
ल्पितत्वदर्शनाज्जीवो ब्रह्मणः स्वत आत्मेति युक्तमित्यर्थः। जीवस्य तच्छब्दार्थं प्रत्यात्मशब्दात्तस्य प्र
धानमित्युक्त सतो जीवं प्रति आत्मशब्दान्न प्रधानमिति [illegible] प्रांतरेण हेतुं व्याचष्टे। तथोतात स
यः सदाख्य एषोणिमा परमसूक्ष्मः। एतदात्म्यमिदं सर्वं जगत्। तत्सदेव सत्यं [illegible]
थालात् स सदार्थः सर्वस्यात्मा। हे श्वेतकेतो त्वं च नासि संसारी किंतु तदेव सदब्रह्मासीति तस्य वी

त्मकं अग्रलासीतिश्रुत्यर्थः। इदमत्रोपदिशति। अत्र तस्मिन्नेतनात्मकत्वात् सच्चेतनमेवेति वाक्यशेषः। यदुक्तमपूर्वे तेज
सोरिव सत ईक्षणं गौणमिति तत्राह। अतेजसोस्विति। नामरूपयोर्व्याकरणं स्राष्टिः। आदिपदान्नियम
नं। अतेजसोरीश्वरमसाद्... नियम्यत्वाच्चाचेतनत्वमीक्षणस्य मुख्यत्वे बाधकमस्ति साध्यकं च
नास्तीति तेजोर्युक्तमीक्षणस्य गौणत्वमिति योजना। चेतनव[illegible]त्कार्यकारित्वं गुणः तेजःप्रभृतचेत
नवत्कार्यकारीत्यर्थः। यद्वा तेजःपदेन तदधिष्ठानं लक्ष्यते। तथा च मुख्यमीक्षणमित्याह। तयोरिति।
स्यादेतत्। यदि सत ईक्षणं मुख्यं स्यात् तदेवकुत इत्यत आह। सत इति। गौणमुख्ययोर्मुख्ये [illegible]
त्र पाठस्वावेन गौणप्रायपाठस्य। निश्चायकं सो... आत्मशब्दाच्च सत ईक्षणं मुख्यमित्यर्थः। आत्मा हि
तत्कारित्वगुणयोगात् आत्मशब्दोपि प्रधाने गौण इति शंकते। अथेत्यादिना। आत्मशब्दः प्रधाने
पि मुख्यो नानार्थकत्वादित्याह। अथ चेति। नानार्थकत्वे दृष्टान्तः। यथेति। अथैष ज्योतिरिति श्रु
तौ सत इस्य दक्षिणादौ कृतौ ज्योतिष्टोमे लोकप्रयोगात्। अग्नौ च ज्योतिःशब्दो यथा मुख्यस्तद्वदिस
र्थः। तस्मिन् सत्पदार्थे निष्ठा अपनेदलानं यस्य स तन्निष्ठः तस्य मुक्त्युपदेशात् इति सूत्रार्थमाह।
तेत्यादिना। श्रुतिः समन्वयसूत्रे व्याख्याता। अनर्थाद्यंशं प्रपंचयति। यदि वा तस्य त्विति किं
श्चित् किल दुष्टा सामहारण्यमार्गपतितमंधं स्वबंधुनगरं जिगमिषुं बध्वा पोषेकिमत्रा पुष्पनां
दुःखितेन स्थीयत इति तच्चोद्यः स्तुत्यो वाणी मा क्रंदयेत्याहं मत्वो वाचा। अतो मद्धाग्ध्येयं
यदत्र भवान् मंदीन्नं स्वाभीष्टनगरप्राप्त्ययसमर्थं प्रापतरति। स च विप्रलिप्सुर्दुष्टो

कस
३८

युवानमानीय तस्करी पल्लां गूढस्थलं अंधं गतास्तथामासमुपदिदेश च एनमंधं एष गो मुवा नां नगरं नेष्यति
मा त्यजन् लां गूढं मितिः। सचौ घः अज्ञात्वा तुलया तद्दत्स जनं त्वाभ्यो ष मप्राप्यान यं परां प्राप्तः तेन न्याये
नेत्यर्थः। सतथा सतीति। आत्मत्वानाभावेसति विद्वन्ये लमोक्षं नप्राप्नुयात्। प्रस्तुतानर्थं संसारं
च प्राप्नुयादित्यर्थः। ननु जीवस्य प्रधानेप्यसंप्रदुपासनार्थमिदं वाक्यमस्त्विति तत्राह। एवं
चसतीति। अवाधितोसम्प्रमाणस्वाभिसर्थः। क्वचिदारोपित चोरत्वस्य सत्ये न तप्तपरशुग्रहण
तो मोक्षो दृष्टः तद्दृष्टांतेन सत्ये ब्रह्मणि अहमित्यभिसंधिमतः मोक्षो यथा सत्याभिसंधेस्तप्तपरशुं
गृह्णाति स न दह्यते। अथ मुच्यते इति श्रुत्योपदिष्टः स उपदेशः संपत्पक्षे न युज्यत इत्याह। अन्यथेति।
देहमुत्थापयतीत्युक्थं प्राणस्तस्यात्मोपदेशो मुख्ये संभवति गौणत्वस्यान्याय्यत्वादात्म
शब्दः सति मुख्ये इत्याह। अपि चेति। क्वचिन्नूत्वादौ सर्वत्रात्मात्मेयस्तत्रापि मुख्य आत्मशब्दो नस्या
दित्यर्थः। चेतनत्वोपचारात्। भूतादिषु सर्वत्र चैतन्यतादात्म्यादित्यर्थः। आत्मशब्दश्चेतनस्येव
असाधारण इत्युक्तं। अस्तु वा व्यापि वस्तुनो साधारणः तथापि तस्यात्र श्रुतौ प्रधानपरत्वेपि नि
श्चायकाभावात् न प्रधानवृत्तित्वमित्याह। साधारणत्वेपीति। चेतनवाचित्वेतु प्रकरणं श्वेतकेतु
पदं च निश्चायकमस्तीत्याह। प्रकृतं स्थितिं। उपपदस्य निश्चायकत्वं स्फुटयति। नहीति। ततः किं त
त्राह। तस्मादिति। आत्मशब्दो ज्योतिःशब्दवन्नानार्थकत्वं दृष्टांतेन निरस्यति। ज्योतिरिति।
कथं तर्हि ज्योतिषा यजेतेति ज्योतिष्टोमे प्रयोगस्तत्राह। अर्थवादेति। एतानि वाक्यानि ज्यो

शा०भा०टि०टी०

३८

तीरूपि। य एतस्यस्तोमाद् इत्यर्थवादेन कल्पितं ज्वलनेनसादृश्यं। त्रिवृत्पंचदश। सप्तदश। एकविं
देकविंशाः स्तोमास्तत्तदर्थप्रकाशकत्वेन गुणेन ज्योतिःप्रदोतकत्वेनकृसंघाः। तथा च ज्योतींषि स्तो
मा अस्येति ज्योतिष्टोमः इत्यत्र ज्योतिःशब्दो गौण इत्यर्थः। नन्वात्मशब्दादिति एवं सूत्र एवोक्तम्
शब्दस्य प्रधाने गौणत्वसाधारणत्वशंकानिरासः कर्तुमुचितः। पुरुषार्थस्य लाघवेनोक्तत्वा
त्वे गौणत्वे नानार्थत्वशंकाया दुर्बलत्वेन तन्निरासार्थं पृथक्सूत्रारम्भानपेक्षणात्। त
था च शंकोत्तरत्वेन सूत्रव्याख्यानं नातीव शोभनं इत्यरुचेराह। अथवेति। निरस्ता समस्ता गौ
णत्वनानार्थत्वशंका यस्मात्तच्छब्दस्य सः तथोक्तस्तस्य भावस्तत्त्वं तयोरित्यर्थः। तत्त्वइति। सतः
आत्मशब्देनजीवाभिन्नत्वात् इति हि सापेक्षया मोक्षोपदेशः स्यात् एव प्रधानकारणत्वनि
रासे हेतुरित्यर्थः। ननु प्रधानकल्पि दृश्यते। दर्शयितुं निष्ठस्य स्थूलां तारां अरुंधतीं तेनोप
दिशतीति तद्वदनात्मन एव प्रधानस्य सत्पदार्थस्यात्मत्वोपदेश इति शंकते। कुतश्चेति। प्रधा
ने स स्थूलवाच्यं नेति कुतइत्यर्थः। सोत्रक्वकारो नुक्तसमुच्चयार्थ इत्याह। चशब्द इति। वि
वृणोति। स्वमपीति। अपि शब्दो न्याक्ष्येति सूचयति। वेदान्तध्येतागतं स्तब्धं पुत्रं पिता चा च
हे त अपि आदिश्यतत्सादेशः इपदेशैकलभ्यः सदात्मा तमप्राक्ष्यः गुरुनिकटे पृष्टवान
सि येनाश्रवणेन मननेन विज्ञानेनान्यस्य श्रवणादिकं भवतीत्यन्वयः। नन्वन्येनज्ञाते नन्व
न्यमन्यदज्ञातमपि ज्ञातं स्यादिति पुत्रः शंकते। कथमिति। हे भगवः कथं नु खलु स भवति
ती इत्यर्थः। कार्यस्य कारणानन्यत्वेनास्ती त्याह। यथेति। पिंडः स्वरूपं तेनचितातेनेति शेषः। त

हेतुत्व४

रूप
३८

त्र युक्तिमाह । वाचेति । वाचा वागिन्द्रियेणारभ्यत इति विकारो वाचारंभणं । ननु वाचा नामैवारभ्यते न घटादिरि-
त्याशंक्य नाममात्रं विकार इत्याह । नामधेयमिति । नामधेयं विकारो यतो वाचा केवलमुच्यते । वस्तुतः का-
रणाद्भिन्नो नास्ति तस्मान्मृषैवेत्यर्थ इति भावः । विकारो मिथ्या चेत्तदभिन्नं कारणमपि मिथ्या स्यादिति
नेत्याह । मृत्तिकेति । कारणे कार्याद्भिन्नसत्ताकं न कार्यं कारणाद्भिन्नं अतः कारणातिरिक्तस्य कार्यस्वरू-
पस्याभावात् कारणज्ञानेन तज्ज्ञानं भवतीति स्थिते दार्ष्टान्तिकमाह । एवमिति । मद्रूपे नसत्संवि-
यदादिविकारोऽस्तीति अल्पज्ञाने सति ज्ञेयं किंचिन्नावशिष्यते इत्यर्थः । यद्यपि प्रधाने ज्ञाते तदा[दि]स्या-
द्विकाराणां ज्ञानं भवति न पुरुषाणां तेषां प्रधानविकारत्वाभावादित्यत आह । नन्वेति । अस्माकं जी-
वानां सद्रूपत्वात् सज्ज्ञाने ज्ञानमिति भावः । कुतश्चेति । पुनरपि कस्माद्धेतोरित्यर्थः । सुषुप्तौ जी-
वस्य सदात्मनि स्थितिप्रतिपादनेन तत्सच्चेतनमेवेति सूत्रयोजना । एतत्स्वपनं यथा स्यात्त-
था यत्र सुप्तो स्वपितीति नाम भवति तदा पुरुषः सता संपन्नो भवति । स देहेन्द्रियादिनाम-
व्यक्तिः कथं तत्राह । स्वमिति । तत्र लोकप्रसिद्धिमाह । तस्मादिति । हि यस्मात् स्वं सदात्मानमपी-
तो भवति तस्मादित्यर्थः । श्रुतेरुक्तमर्थमाह । एषेत्यादिना । एतेषां लोकोक्तो सर्वव्यापि पूर्वस्थलपो-
र्वेऽपि कथं नित्यस्य जीवस्य लय इत्याशंक्य उपाधिलयादिति वक्तुं तावत्स्वप्नं स्वरूपाधिमा-
ह । मनेरिति । तेन्द्रियकमनोवृत्त्युपाधयः तैः घटादिस्थूलार्थविशेषेणाश्रमना संबंधो यत्रासौ
तानीन्द्रियार्थान् अनुभवन् स्थूलविशेषेण देहेनैव व्यवहारोऽतिमायन्नो विश्वसंज्ञो जागर्ति जागद्दृ-

सं
६
)

सनाश्रयमनोधिष्ठितः सन्नेव संसरति: स्वप्ने विचित्रवासनासत्कृतमायापरिणामान्पश्यन्सोम्य तन्मान इतिश्रु
तिस्थमनःशब्दवाच्यो भवति। स आत्मा स्थूलसूक्ष्मोपाधिद्वयोपरमेऽहे नरः कर्त्तेति विज्ञेयास्त्रिमनास्यौ
यातत्त्वीनइत्यपञ्चपदिति इत्यर्थः। ननु स्वापितीतिनाम निरुक्तेरर्थवादत्वात्न यथार्थत्वे सत्त अतहाय
थेति। तस्माद् हृदयशब्दस्येत न्नि र्वचनं तद्दर्शितमन्वेद्वीकृत्यनयेते जरयतीत्यापएवाशनायाप
दार्थः। तस्मात्तेदकं नयते शोषयतीति तेजएवोदन्या। अत्र दीर्घश्छान्दसः॥ एवं इदमपि निर्वचनं यथा
र्थमित्याह। एवमिति। इदं च प्रधानपक्षेन युक्तमित्याह। न चेति। स्वशब्दस्यात्मनीवात्मीयेपिप्र
क्तिरस्तीत्यारांक्याह। यद्दीति। प्रत्ते न विंब चैतन्येनेश्वरेण संपरिष्वंगो भेदपक्षमात्रभावे न तद्भेद इत्य
र्थः। तत्ते हृदोत्त अन्यानामवगतीनां चेतनस्कारणविषयकत्वेन सामान्याच्चेतनं तद्गतं कारण
मितिसूत्रार्थं व्यतिरेकमुखेनाह। यदीति। [illegible]सादिना। तन्यत परमाणवादिकं। न तेनदिति। अ
वगति वैषम्यमित्यर्थः। विप्रतिषेधान्नविधिचंनानादिशः प्रतिगच्छेयुः। प्राणाश्च चक्षुरादयो यथा
गोलकं प्रादुर्भवंति। प्राणेभ्योऽनंतरं देवाः सूर्यादयस्तदनुग्राहकाः। तदनंतरं लोकास्तद्वृत्तिलो
काः विषया इत्यर्थः। ननु वेदांतानां स्वतः प्रामाण्येन प्रत्यक्षं स्वार्थनिश्चायकत्वसंभवात् द्विगतिसा
मान्येनेसतत्त्वाहतामह श्चेति। एकरूपावगतिहेतुत्वं वेदांतानां प्रामाण्यसंशयनिवर्तकहेतुरि
त्यत्र दृष्टांतमाह। चक्षुरिति। यथा सर्वेषां चक्षुषां एकरूपावगतिहेतुसंस्करणानां शब्दा
वगतिगतिहेतुत्वं प्राणादीनां गत्यादिषु एवं सर्वेषाणि वेदांतानां गतिसामान्यं प्रामाण्यदा

ध्यहेतुरित्यर्थः।। एवं ईक्षत्याधिकरणे अचेतनं वेदान्तानां समन्वयं निरस्य चेतनवाचकशब्देनापि निरस्यति।
श्रुतत्वाच्चेति। सूत्रं व्याचष्टे। स्वशब्देनेति। स्वस्य चेतनस्य वाचकः सर्वविच्छब्दः। सः कालकालो
गुणी सर्वविद्य इति। सर्वज्ञं परमेश्वरं प्रकृत्य स सर्ववित् कारणमिति श्रुतत्वात् चेतनं कार
णमिति सूत्रार्थः। करणाधिपाः जीवाः तेषामधिपः। अधिकरणार्थमुपसंहरति। तस्मादिति।
ईक्षणाद्यशब्दादिदं परमात्मवाच्यमुक्तमिति मत्वाह। अन्य इति। वृत्तानुवादेनोत्तरसूत्रं सं
दर्शयति। जन्मादीति। प्रथमसूत्रस्य गतार्थोपोद्घातत्वात् जन्मादिसूत्रमारभ्येत्युक्तं। सर्वे
वेदान्तानां ब्रह्मणि प्रधानाद्यचेतने च समन्वयनिरासेन ब्रह्मपरत्वं व्याख्यातं। अतः प्रथमाध्याया
र्थस्य समाप्तत्वात् उत्तरग्रन्थारम्भे किंकारणमित्यर्थः। वेदान्तेषु सगुणनिर्गुणब्रह्मवाक्यानां
बहुलमुपलब्धेः तत्र ब्रह्मवाक्यस्य सगुणोपासनाविधिद्वारा निर्गुणे समन्वयः ब्रह्मवाक्यगुण
विवक्षां विना साक्षादेव ब्रह्मणि समन्वय इत्याकांक्षैव कारणमित्याह। उच्यत इति। संदिग्ध
सगुणनिर्गुणवाक्यार्थमाह। द्विरूपं हीति। नामरूपात्मको विकारः सर्वं जगत् तद्रूपो हिरण्यश्मश्रु
रादिविग्रह इति वाक्यार्थः। वाक्यान्युदाहरति। यत्र हीत्यादिना। यस्यैव त्वस्य ज्ञानावस्थायां द्वैत
मिव कल्पितं भवति तत्रेतर इतरं पश्यतीति। द्वयोपाधिकं वस्तु भातीति। यत्र त्वस्य
ले विदुषः सर्वं जगदात्ममात्रमभूत् तदा तत् केन कं पश्येदिति साक्षेपा निरूपाधिकं तत्त्वं भाति।

शा. भा. टी. रा.

८०

यत्र भूम्नि निश्चितो विद्वान् द्वितीयं किमपि न वेत्ति सो द्वितीयो भूमा परमात्मा निर्गुणः। अथ निर्गुणोत्तम
नेतरं सगुणमुच्यते। यत्र सगुणे स्थितः द्वितीयं वेत्ति तदल्पं परिच्छिन्नं यस्तु भूमा तदमृतमित्यर्थः
श्रुतेः। पूर्वं व्याख्यातं। धीरः परमात्मा सर्वाणि रूपाणि विचित्य स्त्र नामानि च कृत्वा बुद्ध्या
दौ प्रविश्य जीवत्वं तो व्यवहरन् यो वर्त्तते सगुणत्वं निर्गुणत्वेन विद्वान् पश्यतो वर्त्तते। निर्गताः
कृत्वा अंशा यस्मात्तन्निष्कलं अतो निरंशत्वान्निष्क्रियं अतः शान्तमपरिणामि निरवद्यं रागादि
दोषशून्यं अंजनं मूलतमः तेन बंधो धर्मादिकं वा तच्छून्यं निरंजनं। दिं चाम्र तस्यमो स्वय
मेव वान्यो सवास्त स्थत्वेन परमुत्कृष्टं सेतुं लौकिकसेतुमत्राप्य। यथा दग्धेंधनो नलः शाम्य
ति तथा विद्याविद्यातत्कार्यं दग्ध्वा ... निर्गुणमात्मानं विद्यादित्यर्थः। नेति नेतीति। व्याख्यातं स्थू
लादिद्वैतशून्यं। रूपद्वये श्रुतिमाहात्म्यमिति। द्वैत स्थानेन्स्त नं अल्पं सगुणरूपं निर्गुणादन्यत्। तथो
सं पूर्णं सगुणादन्यदित्यर्थः। एकस्याद्विरूपत्वं विरुद्धमित्यत आह। विद्येति। विद्याविषयो त्वेयं निर्गु
णं त्वं सत्सं अविद्याविषय उपास्यं सगुणत्वं कल्पितमित्यविरोधः। तत्राविद्याविषयं विवृणोति। त
त्रेति। निर्गुणत्वानार्थमात्रे पितप्रपंचमाश्रित्य बाध्यत्वाकाले गुडजिह्विकान्यायेन तत्त्वफला
र्थी विरूपासनाविधिः धीयंते ते कां चित्ते काग्र्यद्वारा ज्ञानं मुख्यफलमिति तत्काम्यानां मपि महा
तां सर्वं भ्रलपणीतिमंतव्यं। नाम ब्रह्मेत्याद्युपास्तीनां कामचारादिरभ्युदयः फलं। दहरा
द्युपास्तीनां क्रममुक्तिः। ॐ जीवादि ध्यानस्य कर्मसमृद्धिः फलमिति भेदः। ध्यानानां मान

(80)

सत्वात्तत्तानोत्तरं गत्या ब्रह्मज्ञानकांडे विद्यानामिति भावः। ननूपास्यब्रह्मण एकत्वात्कथमुपासनानां भेदस्तत्रा
ह। तेषामिति। गुणविशेषाः सत्यकामत्वादयो हृदयादिरूपाधिः। अत्र स्वयमेवाशंक्य परिहरति। एकइ
ति। परमात्मस्वरूपाभेदेप्युपाधिभेदेनोपहितोपास्यरूपभेदादुपासनानां भेदस्तत्फलभेदइति
भावः। तं परमात्मानं यद्गुणत्वेन लोका ज्ञानमिवोपासते तत्तद्गुणवत्वमेव तेषां फलं भवति। क्र
तुः संकल्पो ध्यानं। इह यादृशध्यानवान् भवति मृत्वा तादृशोपास्यरूपो भवतीत्यत्रैव भगवद्वा
क्यमाह। स्मृतेश्चेति। ननु सर्वेषां ते पुनिरतिशया। मनन एकत्वादुपास्योपासकयोस्तारतम्यं श्रुतं यः
कथमित्याशंक्य परिहरति। यथेत्येव इति। उक्तानामुपाधीनां शुद्धितारतम्यादैश्वर्यज्ञानसुखस्वरू
पराक्रमीणां तारतम्यरूपाधिशोभा भवंति तैरेकरूपस्यात्मन उत्तरोत्तरं मनुष्यादिहिरण्यगर्भांतेष्वा
विर्भावः क्वचित्तारतम्यं श्रूयते। तस्यात्मन आत्मानं स्वरूपमाविस्तरां प्रस्फुटतरं यो वेद उपास्ते स
श्रुते तदिति तरप्प्रत्ययादिस्यर्थः तथा च निरुपोपाधिरात्मैवोपास्यत्व उक्तोपाधिरीश्व
र उपास्य इत्युपाधिकं तारतम्यमविरुद्धमिति भावः। अत्रार्थे भागवतीमुदाहरति। सत्ता विति। अ
त्र सूर्यादेरपि न जीवत्वेनोपास्यत्वं किंत्वीश्वरत्वेनेत्युक्तं भवति। तत्र सूत्रकारसंमतिमाह। एवमिति। उदयः
असंबंधः। एवं यस्मिन्वाक्ये उपाधिर्विवक्षितः तद्वाक्यमुपासनापरमिति वक्तुमुत्तरसूत्रसंदर्भ
स्यारंभ इत्युक्तं यत्र न विवक्षितः तद्वाक्यं ज्ञेयब्रह्मपरमिति निर्णयार्थमारंभ इत्याह। एवंसत्यारं
ति। अन्नमयादिकोशा उपाधिविशेषा वाक्यगतिस्तासु पर्यवसानारंभसमर्थनमुपसंहरति। एवमे

ता

न्या·रा·

१

ण

कमपीति। सिद्धवदुक्तागतिसामान्यस्य साधनार्थमथुत्तरां भइत्याह। यश्चेति। अन्नं प्रसिद्धं। प्राणमनोबुद्ध
यः हिरण्यगर्भरूपः बिंबचैतन्यमीश्वरः आनंदः तेषां पंचानां विकारा आध्यात्मिकादेरु प्राणमनोबुद्धिती
वा अन्नमयादयः पंचकोशा इति श्रुतेः परमार्थः। पूर्वाधिकरणे गौणमुख्ययोरक्षयोरतुल्यत्वेन संशयोऽभा
वात् गौणप्रायपाठान्न निश्चायकमिदं सूक्तं। तर्हि मयटो विकारे प्राचुर्ये च मुख्यत्वात् संशये विकारप्रायपा
ठादानंदादिविकारो जीवः। आनंदमय इति निश्चयोऽस्तीति प्रत्युदाहरणसंगत्या पूर्वपक्षमाह। ब्रह्मा
दिसाकांक्षापूर्वकं। अन्नमयादीति। श्रुत्यादिसंगतयः स्फुटा एव पूर्वपक्षे व्यतिकारमते जीवोपास्या
प्रियादिप्राप्तिः पूर्णं। सिद्धांते लुब्धलोपाल्येति पन्नेदः शंकते। अथापीति। परिहरति। तस्मादिति। सं
गृहीतं विवरणोक्ति मुख्य इति। परमात्मेत्यर्थः। शारीरत्वेऽपीश्वरत्वं किन्न स्यादत आह। नचेति। जीव
त्वं दुर्वारमित्यर्थः। नन्वानंदपदाभ्यासेऽप्यानंदमयस्य ब्रह्मत्वं कथमित्याशंक्य ज्योतिष्टोमाधिकर
रे ज्योतिःपदस्य ज्योतिष्टोमपरत्ववदानंदमयप्रकरणस्थानंदपदस्यानंदमयपरत्वात्तदभ्यास
स्तस्य ब्रह्मत्वसाधकत्वमित्यभिप्रेत्याह। आनंदमयं प्रस्तुत्येति। रसः सार आनंद इत्यर्थः। अयं लोकः
यत् यदि एष आकाशः पूर्णः आनंदः साक्षी प्रेरको न स्यात् तदा कोऽन्यात् चलेत् को वा विशिष्टप्रा
ण्यात् जीवेत्। तस्मादेष एवानंदयाति। आनंदयतीत्यर्थः। युवा स्यात् साधु युवेत्यादिना वक्ष्य
माणा मनुष्ययुवानंदमारभ्य ब्रह्मानंदावसाना एषा संनिहिता आनंदस्य तारतम्यमीमांसा प्र
वति। उपसंक्रामतीति विद्वान् प्राप्नोतीत्येकदेशिनामर्थः। मुख्यसिद्धांते तूपसंक्रमणं विद्वत्कोशा
नौप्रसक्तमात्रत्वेन विलापनमिति ज्ञेयं। शिष्टमुक्तार्थं। आनंदशब्दा [illegible] ल्लो वाताति सर्वत्र

द

ब्रह्म
४२

82

समानेतिगतिसामान्यार्थमाह। श्रुतत्वाच्चेति। लिंगादमुख्यात्मत्वं सन्निधेर्बाध इति मत्वाऽऽह। नात्मेति। सर्वांतरत्वं नश्रु
तमित्याशंक्य ततोन्यस्यानुक्तेस्तस्य सर्वांतरत्वमिति विवृणोति। मुख्यमिति। लोकबुद्धिमिति। तस्याः स्थूलगा
हितामनुसरदित्यर्थः। तामसस्य मूषाकारत्ववत्प्राणस्य देहाकारत्वं देहे न सामान्यं तथा मनः प्राणाकारे ते नस
ममित्याह। पूर्वेणेति। अतीतो योनंतर उपाधिर्विज्ञानं यो शास्त्रकृतात्सावयवत्वकल्पना शारीरेण हेयस्रो
शारीरत्वमिति। लिंगाद्वयं दुर्बलं। अतः सहायाभावात् अभ्यासस्य सर्वांतरत्वाभावाद्विकारसन्निधेर्बाध इति
कान्वयइति ~~बाधक~~ पञ्चावः॥ विकारार्थमयट् श्रुतिः सहाय इत्यत आह। मयटः प्राचुर्येपि विधानान्मेवमित्याह।
विकारे मयडादिना। तत्प्रकृतवचने मयडिति। तदिति। प्रथमासमर्थात् प्राचुर्यविशिष्टस्य प्रकृतस्य वच
नेऽभिधाने गम्यमाने मयट् प्रत्ययो भवतीति सूत्रार्थः। अत्र वचनग्रहणात् प्रकृतस्य प्राचुर्यवैशिष्ट्यबुद्धिः
तादृशस्य लोके मयटश्चाभिधानाद्यथा। अन्नमयो यज्ञ इति। अत्र ह्यन्नं प्रचुरम्। किंनिमित्तस्तत्र शब्दः
प्रथमाविभक्तियुक्तस्तस्मात् मयट् यत्तस्य प्रकृतस्यार्थान्तरप्राचुर्यमाचीदृश्यते न श्रुतप्रकृतवचन इति
ज्ञेयं। सूत्रस्थश्च शब्दोनुक्तसमुच्चयार्थ इति मत्वा व्याचष्टे इतश्चेति। तदानन्दं ब्रह्मानंदस्य निरति
शयत्वावधारणपूर्वमुक्तं। आनंदमयस्य ब्रह्मत्वे लिंगमुक्त्वा प्रकरणमाह। मांत्रेति। यस्मादेव प्रकृतं त
स्मान्मांत्रवर्णिकमेव ब्रह्मानंदमय इति वाक्ये गीयत इति योजना। ननु मंत्रोक्तमेवात्र गम्यत इति कोपि
बोधस्तत्राह। मंत्रेति। ब्राह्मणस्य मंत्रव्याख्यानत्वात्तदुपायत्वमस्ति। मंत्रस्तूपेयः। तदिदमुक्तमपि
शेषाद्दिति। तयो रूपायोपेयभावादित्यर्थः। तर्ह्यन्नमयादीनामपि मांत्रवर्णिकब्रह्मत्वं स्यादित्यत आ
ह। नचेति। भृगावैरो को वरुणेनोपदिष्टा भृगुवल्ली। पंचमपर्यायस्थानंदे प्रतिष्ठिता। तत्रस्थानन

८३

न्यायेन तस्यार्थं ब्रह्मवल्ल्या आनंदमयेनिर्देशात्। एतन्निर्देशेति। सर्वेश्वरः तपः स आलोचनमतप्यत कु
तवानित्यर्थः। अतिस्थाने कामना बहुस्यामिसध्यातिरेकः। अधिकारे प्रकरणे। स आनंदमयो रसः।
ननुलक्ष्यलक्षणभावेप्यभेदः किन्नस्यादत आह। नहिलक्ष्येति। ननुलक्षणे ... योर्भेद
स्यावश्यकत्वे श्रुतिस्वरसोवी परस्यादिता शंकते। कृथमिति। यावताय तद्वाचि तु ... तः श्रुतिस्वरसी कथ
मिसन्वयः। उत्कांशं कामंगीकरोति। बाढमिति। तद्योमनएवा न नात्मभ्य त्वो। किं बाधः अभेददिसा
शंक्य कल्पितभेदा न बाधः स्यादितिसा। तथापीति। अभेदेपी सर्वः। नो किं क्रमः आत्मनः स्या ता
न तं क्रमेण देहादि ... ऽस्य भेद आ सा परमात्मनो लेमत्ता घुक्तिरित्यर्थः। अन्ये एव्यो देहादिचि
मिन्नतया ज्ञेयः। विवेक ज्ञाने न लक्ष्यः साक्षात्कर्तव्यः। तदर्थं श्रोतव्यः। विज्ञानं निदिध्यासनं सा
क्षात्कारो वास्तु संतर ... थिनुवादमनरूक्तम्। ननुभेदः सत्य एवास्तु तत्राह। प्रतिबिम्बतइति। प्र
तईश्वराद्न्यो जीवोन्यो नास्तीति चेत् जीवाभेदादीश्वरस्यापि मिथ्यात्वं स्यादत आह। परमेश्व
र इति। अविद्याप्रतिबिंबत्वेन कल्पिता जीवाश्चिन्मात्र ईश्वरः पृथगस्तीति न मिथ्यात्वं। कल्पित
स्याधिष्ठानाभेदेपि अधिष्ठानस्य ततो भेद इत्यत्र दृष्टांतमाह। यथेति। स्वत्रास्तु स्वतोपि मिथ्यान
जीव इत्यत्रु व्याप्य भेदमात्रं मिथ्यात्वे दृष्टांतमात्। यथावेति। ननु सूत्रे बल्लात्वदृश्यते इत्यत आह। ईह
शं चेति। कल्पितमेवेत्यर्थः। सूत्रे भेदः सत्य इतिपद्। भ्नाया सदनन्यत्वादिसूत्रेणास्य सनुसाराच्चे
तिभावः। नन्वादं यदा सद्रूसत्यप्रचुरं प्रधानमानंदमयमस्तु तत्राह। कामाच्चेति। नानुमानम्पेक्ष्य
मानुमानं पुनरुक्तिमाशंक्याह। इक्षतेरिति। अस्मिन्निति विषयस ... तिमी। आनंदमय

नं

स्पष्टा

क:
४

84

भिन्नमयकूटको पयवलो जीवस्य लयोगंयस्मान्नास्ति तस्मान्नप्रधानमिति योजना। जीवस्य प्रधानयोगोऽस्ती
त्यत आह। तदात्मनेति। जीवस्य जीवात्मत्वे दोऽस्तीत्यत आह। मुक्तिरिति। अदृश्ये स्थूलप्रपंचे सूक्ष्मे आ
त्मसंबन्धमात्रे लिंगशरीरे तद्गतिते निरुक्ते शब्दात्वं तद्भिन्नेऽनिःशेषलयस्थाने निलयने मायातत्कार्ये
अलक्षण्यत्वं यथास्यात्तथा यदैवैष प्रतिष्ठां मनसः प्ररूपं। इति मे पविद्धा लभते अथ तदैवाभयं ब्रह्म
प्राप्नोतीत्यर्थः। इतश्चापि अरमल्पमपि अंतरं भेदं यदैवैष पनरः पश्यति अथ तदा तस्य भयमिति योज
ना। इदं व्यक्तिकार मतं दूषयति। इदंत्विति। इत्थं परव्याख्यामो विकारार्थकेमयटि ब्रूहि पुच्छे सति अनुकूला
त्कारणं विना एवं प्रकरणस्थस्य मयटः पूर्वविकारार्थकत्वं अंते प्राचुर्यार्थकत्वमित्यर्धजरतीयं कथ
मियं केन दृष्टान्तेन आश्रीयत इति इदं वक्तव्यमित्यन्वयः। प्रश्नमेतं शंकते। नात्रेति। स्फुटमुत्तरं ब्रिमात प्रति
र इति न श्रूयते किं यावत्तु तोयो तरं ब्रह्मन श्रूयत इति विकल्प्यमा घमंगीकरोति। अत्रोच्यते य
घपीति। विकारप्रायपाठाद्ध दुग्रहीतमयट्श्रुतेः तावमयत्व लिंगात्वे सात्वह। तथापीति इष्टार्थ ह
सा जातं सुखं प्रियं। स्वसामोदः सचाक्षमात्प्रकृष्टप्रमोदः आनंदस्तु कारणं बिंबचैतन्यमात्मा शि
रः पुच्छयोर्मध्यवर्ती मयः ब्रह्मपुच्छादिश्रुत्यर्थः। द्वितीयं प्रत्याह। तत्रपादिति। यत्नोक्तं प्रकृतं गुत्ता निहि
तत्वेन सर्वीलतं ब्रह्म तदिह पुच्छवाक्ये ब्रह्मशब्दात्प्रत्यभिज्ञायते तस्यैवाविलापने पंचमापंचकोशा
प्रादुर्ताः प्रपंचिता तत्र तासर्वेनासीति वक्तुं कल्प्यंते इत्युक्तं। एवं पुच्छवाक्ये प्रकृतस्य प्रधानब्रह्म
परेणति न प्रकृतहान्यादिदोषइत्यर्थः। अतएव प्रधानत्वं पुच्छश्रुतिविरुद्धमिति शंकते। नन्विति।

अत्र ब्रह्मशब्दात् प्रकृतस्य प्रधानस्य ब्रह्मप्रत्यभिज्ञाने सति पुच्छशब्दविरोधप्रसक्तावेकस्मिन्वाक्ये प्रथमच
रमश्रुतशब्दयोरावश्यस्यानुपपत्तेर्जातविरोधिनो बलीयस्त्वात् पुच्छशब्देन प्राप्तगुणत्वस्य बाध इति प
त्याह । प्रकृतत्वादिति । प्रकरणस्यान्यथासिद्धिमाह । नन्विति । एकस्यैव गुणत्वं प्रधानत्वं च विरुद्ध
मित्याह । अत्रोच्यत इति । तत्र विरोधाभिरासायान्यतरस्मिन्वाक्ये ब्रह्मस्वीकारे पुच्छवाक्ये ब्रह्मस्वीकार्यमित्या
ह । अन्यतरेति । वाक्यशेषाच्चैवमित्याह । अपि चेति । तत्र ब्रह्मणि श्लोकोऽपीत्यर्थः । पुच्छशब्दस्य गतिं पृच्छति ।
कथं पुनरिति । यद्यपि पुच्छशब्दस्य मुख्यार्थेऽन्वयः कुमराकस्य ब्रह्मण आनन्दमयत्वं लाङ्गूलत्वाभावात् पुच्छ
पि लक्षणायां चाधारलक्षणा युक्ता प्रतिष्ठापदप्रयोगात् ब्रह्मशब्दस्य मुख्यार्थत्वाभावाच्च । तत्पक्षे ब्र
ह्मपदस्यापि कथयन्नलक्षणात्वादित्याह । नैष दोष इति । पुच्छमिति आधारत्वमात्रमुक्तं प्रतिष्ठेत्युक्तत्वात् इदं ए
कं मुख्यं नीडं आधिष्ठानं सोपादानस्य जगत इत्यर्थः । ननु व्यतिरेकेऽपि तैत्तिरीयवाक्ये ब्रह्मणि समन्वि
तं दृष्टं तत्र किमुदाहरणभेदेन साध्यं स्यात् । अपि चेति । यत्र सविशेषणत्वं तत्र वाङ्मनसगोचरत्वमि
ति व्याप्तेरत्र व्यापकाभावो व्याप्यनिर्विशेषमुच्यत इत्याह । निर्विशेषमिति । निवर्तन्त इति श्रुत्या इत्य
र्थः । सविशेषस्य मृषात्वाद्वक्तुमशक्यमित्युक्तं । अतो निर्विशेषत्वार्थं पुच्छवाक्यमेवोदाहरणमिति भावः ।
प्राचुर्यार्थं मयटा सविशेषोक्तौ निर्विशेषश्रुतिबाध इत्युक्तदोषान्तरमाह । अपि चेति प्रत्ययार्थत्वे
न प्रधानस्य प्राचुर्यस्य प्रकृत्यर्थो विशेषणं विशेषणस्य यः प्रतियोगी विरोधी तस्याल्पत्वमपे
क्षते यथा विप्रमयो ग्राम इति शूद्राल्पत्वं । अस्तु को दोषस्तत्राह । तथा चेति । प्रकृत्यर्थप्राधान्ये त्व
यं दोषो नास्ति । प्राचुर्यप्रकाशः सवितर्यत्र तमसोऽल्पस्यापेक्षाभावात् । परं त्वानन्दमयपदस्य प्रचुरा

क
४

नंदे लक्षणा दोषस्यादितिमंतव्यं। किंच पिच्छवत्स्यात् घटवच्च ब्रह्मत्वे स्यात्। प्रतिशरीरमिति। नन्वन्नमयस्य मा
नानंदपदे लक्षणयानंदमयपरं इत्यभ्याससिद्धिरित्यत आह। यद्यपीति। आनंदमयस्य ब्रह्मत्वे नि
र्णीते तस्यानंदपदस्य तत्परत्वज्ञानात् अभ्याससिद्धिः तत्सिद्धौ तन्निर्णय इति परस्पराश्रय इति भा
वः। अयमभ्यासः पुच्छब्रह्मणि इत्युक्तत्वात्। तस्मादिति। उपसंक्रमणं बाधः। ननु स य एवंविदिति ब्रह्म
विदं प्रक्रम्योपसंक्रमणवाक्येन फलं निर्दिश्यते। तत्तस्याब्रह्मत्वे न सिद्ध्यतीति शंकते। नन्विति। उ
पसंक्रमणं प्राप्तिरित्यंगीकृत्य विशिष्टप्राप्त्या विशेषणप्राप्तिफलमुक्तमित्याह। नैष इति। शानेन
कोशानां बाधस्तदिति सिद्धांते बाधावधिप्रसंगानंदत्वाभावोर्थादुक्तं उत्तरश्लोके न स्फुटीकृत इत्या
ह। तदपीति। तदपेक्षत्वादिति। कामयितृपुच्छब्रह्मविषयत्वात् इत्यर्थः। यदुक्तं पंचमस्थाने पुच्छ
त्वादानंदमये ब्रह्मत्वब्रह्मवल्ली समाप्ता भृगुवल्लीवदिति तत्राह। यत्त्विति। यावित्यर्थः। मयट् प्रत्ययसा
वयवत्वादिलिंगेन च स्थानं बाध्यमिति भावः। गोचरातिक्रमो गोचरत्वाभावः। पूर्वमीक्षतेः संग
या भावादिति पुनः प्रायपाठो न निश्चायक इत्युक्तं। तर्हि अत्र पुच्छपदस्याधारत्वमनयोर्लक्षणासाम्या
त्संशयोस्तीत्येवमेव प्रायपाठो निश्चायक इति पूर्वाधिकरणसिद्धांतप्रत्युदाहरणेन पूर्वपक्षयति। पुच्छं साक्षा
दिति। तथाच प्रत्युदाहरणसंगतिः पूर्वपक्षे सगुणोपास्तिः। सिद्धांते निर्गुणप्रमितिः फलं वेदांतवाक्यस
मन्वयोक्तेः श्रुत्यादिसंगतयः स्फुटा एव। सूत्रस्थानंदमयपदेन तद्घटकं स्वं ब्रह्मपदं लक्ष्यते। विकारप्र
ते अनेनेति विकारो न मयटः। प्राय्यापत्तिरिति। अवयवबंक्रमस्य ब्रह्मो प्राप्तिरित्यर्थः। अत्राहि सत्तस्य
ब्रह्मणि तानार्थको शापत्तित्वेन कल्प्यते जात्रत्वात्समर्थमस्ति। तत्रानंदमयस्यापि अवयवांतरोस्य

=तस्माद्वा एतस्माद्विज्ञानमयादिसार्थपुच्छान्तमेकं वाक्यं=३

पा० ब्र० टी० रा०

४४

नंतरं वस्मिंश्चित्पुच्छवत्वये प्रकृतं ब्रह्मपुच्छपदेनोक्तं तस्यानंदमयाच्चाहत्वेनावश्यवक्तव्यत्वादित्यर्थः ॥ तद्धेतु
व्यपदेशाच्च । तस्य ब्रह्मणः सर्वकार्यहेतुत्वव्यपदेशात्प्रियादिविशिष्टसाकारेणानंदमयस्य जीवस्यको
यत्वाच्च प्रतिषेधत्वं ब्रह्मणो न कुत्रापि सर्वथा: । मांत्रवर्णिकमेव च गीयते । ब्रह्मविदाप्नोति परमिति ।
यस्य स्थानानुक्तिरुक्ता यत्सत्यं ज्ञानमनंतमिति मंत्रोक्तं ब्रह्म तदत्रैव पुच्छवाक्ये गीयते ब्रह्मपदस्य योगा
त् नानंदमयवाक्यस्येत्यर्थः । नेतरोनुपपत्तेः । आनंदमयो जीवोत्र न प्रतिपाद्यः सर्वस्त्रष्टृत्वाद्यनु
पपत्तेरित्यर्थः । भेदव्यपदेशाच्च । अन्यमानंदमयो ब्रह्मरसं लब्ध्वानंदी भवतीति भेदोक्तेश्च तस्या
प्रतिपाद्यते सर्वथा: । आनंदमयो ब्रह्म तैत्तिरीयके पंचम [illegible] स्थानस्थ सात् । आनंदवदितसां
ख्यमाह । कामाच्च नानुमानापेक्षा । साम्यतत्कृतिकामयानंदः तस्य भृगुवल्ल्यां पंचमस्य ब्रह्मत्वस्य दर्शना
नंदमयस्यापि ब्रह्मत्वानुमानापेक्षा न कार्या विकारार्थकमयट् विरोधाद्दित्यर्थः । भेदव्यपदे
शाश्चेतरगुणं ब्रह्मोत्रवेद्यं स्यादित्याशंक्याह । अस्मिन्नस्य च तद्योगं शास्ति । इहानिहितत्वेन प्र
तीयमानः कर इहपरसंहते पुच्छवाक्ये ब्रह्मणि आत्महमेव परं ब्रह्मेति बोधयत आनंदमयस्य व
दाहीति शास्त्रे ब्रह्मभावं शास्ति अतो निर्गुणब्रह्मैक्यस्थानार्थं जीवस्येदानुवाद इत्सितिमेवकाह ।
परं पश्यतीति । अंतस्तद्धर्मोपदेशात् । छांदोग्यवाक्यमुदाहरति । अथ य इति । अत्रैव रूपात्तिप्रारं
भाः । हिरण्मयो ज्योतिर्विकारः पुरुषः पूर्णोपि मूर्तिमानुपासकैर्दृश्यत इति मूर्तिमाह । हिरण्य
ति । प्रणवेन ध्यानं तेन सहैव सतिविध्यावाङ् । नेत्रयोर्विशेषमाह । तस्येति । रूपे नैर्दृश्यस्य

ब्र०

४४

प्यासः पुच्छभागः तेन तेजस्वीन तुल्यं पुंडरीकं यथादीप्तमेवं तस्य पुरुषस्याक्षिणी सद्यो विकसितरक्तांभोजन
यन इत्यर्थः। उपासनार्थमादित्यमंडलं स्थानं रूपं चोक्त्वा नाम करोतीति। तस्योदिति। उन्नाम निर्वक्ति। स इति।
उदित उद्गतः सर्वेभ्यः पाप्मभ्य इत्यर्थः। नामज्ञानफलमाह। उदेतीहेति। देवतास्थानमादित्यमधिकृत्योपा
स्यमंतरं आत्मानं देहमधिकृत्याप्युपदिशति। अथेति। पूर्वत्र ब्रह्मपदैरानंदपदाभ्यासश्रुति
मुख्यत्वादिबहुप्रमाणवशात् निर्गुणनिर्णयवद्रूपवत्वादिबहुप्रमाणवशात् जीवो हिरण्मय इति
पूर्वसिद्धांतद्वयं तत्संगत्या पूर्वमुत्सर्गतः सिद्धनिर्गुणसमन्वयस्यापवादार्थं पूर्वपक्षयति। संसा
रीति। अत्र पूर्वोत्तरपक्षयो जीवब्रह्मणोरुपास्तिः फलं अक्षिणी लोप्यारश्रवणात्संसारीति सेव
ध्यः। श्रुतिमाह। स एष इति। आदित्यस्थः पुरुषः अमुष्मादादित्यादूर्ध्वगा ये केचन लोकाः तेषामी
श्वरो देवभोगानां चेत्यर्थः। स एषोक्षिस्थः पुरुष एतस्मादस्माद्धस्ता ये लोकाः ये च मनुष्यका

दा मा भोगास्तेषामीश्वर इति मर्यादाश्रूयते। अतः श्रुतेश्च संसारीत्यर्थः। एष सर्वेश्वर इत्यविद्धोपः श्रुते
रिति संबंधः। भूताधिपतिर्भूतः भूतपालः इत्यादिश्रौ बएव। किंच जगलानामसंकरायलोकवेदविधा
रकोऽभ्यासेतरेव वेदकालो ब्राह्मणानां वर्णाश्रमादीनां मर्यादाहेतुभूतो सेतुरेषाम्। अतः सर्वेश्वर इत्य
र्थः। सूत्रं व्याचष्टे। य एष इति। यद्यप्येकस्मिन्वाक्ये प्रथमश्रुतानुसारेण चरमं नेयं तथाप्यत्र
प्रथमश्रुतरूपवत्त्वं निष्फलं ध्यानार्थमीश्वरे नेतुं शक्यं च सर्वपाप्मासंगित्वं सर्वात्मत्वं लस
फलं जीवे नेतुमशक्यं चेति प्रबलं। न च न ह वै देवान् पापं गच्छतीति श्रुतेरादित्यजीवस्यापि

पाप्मस्पर्शत्वमिति वाच्यं। श्रुतेरप्युनाकर्मानधिकारिणां देवानां क्रियमाण पाप्मासंबंधेन तत्फलास्पर्शविवा
तासंपत्तिर्वा संचितपापाभावे क्षीणे पुण्ये मर्त्यलोकं विशंतीति। अयमग्नादिसंपत्तिमेवाह। सर्वे पा
प्मायामस्य परमात्मन एवेति। सार्वात्म्यमाह। तथेति। अत्र तच्छब्देश्वाप्युपपुरुष उच्यते। ऋगादयपे
क्षायां लिंगव्यत्ययः। इत्थं शास्त्रविशेषः तत्साहचर्यात्सामस्तोत्रं इत्यादन्यच्छस्त्रमप्युच्यते यजुर्वेदो यजुः
श्च तत्र योवेदाइत्यर्थः। पृथिव्यग्न्याद्यात्मक इति। अधिदैवमरुक् पृथिव्यंतरिक्षद्युनक्षत्रादित्यगते
शुक्लभारूपापंचविधास्वल्क। साम चाग्निवाय्वादित्यगताति कृष्णरूपमुक्तं पंचविधं अध्यात्मं तु
त्वक्वाक्चक्षुःश्रोत्राक्षिस्थशुक्लभारूपा चतुर्विधा साम च प्राणव्यानात्ममनोक्षिगतनीलरूपं च
तुर्विधमुक्तं। एवं क्रमेण ऋक्सामेनुक्रम्याह। श्रुतिस्त्वस्येति। योसर्वात्मक ऋक्सामात्मको गेष्णीय
मुख्यादित्यस्थस्य तावेवाक्षिस्थस्य गेष्णीपर्वाणीत्यर्थः। तच्चेति। ऋक्सापगो[illegible]त्वमित्यर्थः। सर्वकाम
गेयसंलिंगांतरमाह। तद्य इति। तत्तत्र लोके चनस्य सनिर्तककालीयोये चांते च नेसनवो विभूति
मंत इत्यर्थः। ननु लोके राजानोगीयंते नेश्वर इत्सतआह। य इति। पृथ्व्यादिविभूतिः श्रीः श्रो
तिः कुर्त्तिल्बंबलं तद्युक्तत्वं राजादिकं मदं गाएवेति तत्र ज्ञानमीश्वरस्यैवेत्यर्थः। निरंकुशमन
न्याधीनं। एतावतिचिकृपा मूर्तिर्मीया चिकृति लोन्माकामयामस्येत्यर्थः। यदृक्षम शब्दमिसा
दिवास्यंतरस्तेयपरमिताह। अपिचेति। तर्हिरूपं कुवः तत्राह। सचैतिकेः। मत्रकूपा स्तेन
इत्युपतेतत्रेत्वप्याह सर्वकारणलाल्लरूपवत्त्वं सर्वकर्मेत्यादिश्रुता निर्दिश्यत इति यो
जना। मर्यादावदैश्वर्यमीश्वरस्य नेत्यत्रं निराकरोति। ऐश्वर्येति। अध्यात्माधिदैवध्यान

ति
रूप
४५

90

यो विभागः पृथक्प्रयोगः तस्येक्षतेरेव न सैश्वर्यस्य परिच्छेदार्थमित्यर्थः। ननूपास्योद्देशेनोपास्ति
विच्छेयः क्रिया कर्मणो व्रीह्यादिवदन्यतः सिद्धिर्वाच्येत्याशंक्याह। नेति। आदिमज्जीवादीश्व
रस्य भेदोक्तेः। श्रुतेतरे जीवादन्य ईश्वरः सिद्ध इति सूत्रार्थमाह। अस्तीति। आदित्ये स्थित नरश्मि
निरासार्थमादित्यादेतर इति जीवं निरस्यति। यमिति। अशरीरस्य कथं नियन्तृत्वमत आह। य
स्येति। अन्तर्यामिपदार्थमाह। य इति। तस्यानात्मत्वं निरासयाह। एष त इति। हेतुं वस्तुरूप
मित्यर्थः। आदित्यो तरत्वश्रुतेः समानसादित्यर्थः। तस्मात्सर्वादित्यादिस्थानकृतदोषेऽप्युपास्य
इति सिद्धम्। अथ तद्रूपवत्वादिद्युवर्त्मलिंगानां पापास्पर्शित्वादिब्रह्मलिंगैरन्यथा नयनेन द
हराकाशपदश्रुतेः लिंगाद्बलीयसीति प्रत्युदाहरणेन प्राप्तेः प्रसाह। आकाशस्तल्लिंगादिति।
छान्दोग्यमुदाहरति। इदमिति। शालावत्यो ब्राह्मणो जैवलिं राजानं पृच्छति अस्य पृथिवीलो
कस्यान्यस्य च क आधार इति। राजा ब्रूते। आकाश इति हेति। यदेष आकाश आनन्दो न स्या
कस्यान्यस्य च क आधार इति। राजा ब्रूते। आकाशो वै नामेत्यत्र तद्भूतेति वाक्यशेषाद् इति
साधारणस्य श्रवणादाकाशो ब्रह्मेत्यन्यथा रितं। आकाशो वै नाम इत्यत्र तद्भूतेति वाक्यशेषात् इति
विभागः। निर्वहिता इसन्ति स्थितिहेतुः। ते नामरूपे यदन्तरा यस्मात् द्विन्ने यत्र कल्पित तत्त्वेन म
ध्ये स्त इति वार्थः। अत्र पूर्वपक्षे भूताकाशात्मनोपास्तिः सिद्धान्ते ब्रह्मात्मनेति फलं।
तेजः प्र
भृत्यस्य ब्रह्मलिंगवाक्यसमन्वयोक्तेरापादं श्रुत्यादिसंगतयः स्पष्टमत्र भाष्यं। तेजः प्र
कृत्यस्य स्पष्टब्रह्मलिंगवाक्यसमन्वयोक्तेरपि कारणात्मात्र एव प्रकारश्रुति बाधः। सर्वश्रुतेः श्याकाशातिरिक्तविषयत्वे
व्याप्तिपूर्वो ख्यातेरपि कारणत्वात् एवकारश्रुतिबाधः। सर्वश्रुतेश्चाकाशातिरिक्तविषयत्वे
न संकोचस्यादित्याह। सर्वाणीति। ब्राह्मणस्तु सर्वात्मकत्वात्तस्मादेव सर्वमिति श्रुति

यैकेति भावः। तथा सर्वलयाधारत्वं निरतिशयमहत्त्वं स्थिरत्वादि परमाश्रयत्वमित्येतानि स्पष्ट
निश्चेयलिङ्गानीत्याह। तथाकाशमित्यादिना। शतेर्जन्तस्य दातुः शातिरिति पाठे वं पूर्वित्यर्थः।
लिङ्गात्तन्मोह। अपि चेति। दाल्भ्य शालावत्यौ ब्राह्मणो राजा चैति त्रयः उद्गीथविद्याकुशला वि
चारयामासुः किमुद्गीथस्य परायणमिति। तत्र स्वर्गादागतान्निरद्धि जैवितेन प्राणेन किं प्रमाणो
द्गीथस्य स्वर्गएव परायणमिति दाल्भ्यपक्षम प्रतिष्ठादोषेण शालावत्यो निन्दित्वा लोकस्वर्गस्यापि
कर्मकारात्त्वे तरम्यं लोकः प्रतिष्ठेत्युवाच तं शालावत्यस्य पक्षमेतवद्वैते किल शालावत्य सामेति
शालावत्यं निन्दित्वानं तमेवाकाशं वर्णितं भूताकाशोत्पत्त्यावं तद्वलदोषतादवस्थ्यापादित्यर्थः। नत्वाका
शोनं तदिति न भूतं इत्याशंक्याह। तन्त्वेति। उद्गीथस्याकाशाख्यं वेति। संपादनात् उद्गीथस्यानं
तत्त्वादिकं न त्वेतदिति भावः। स उद्गीथाख्य यद्वओंकार एव आकाशात्मकः परः सर्वस्मात्यादि
कगुणे सत्कृष्टः। अतो वरीयान् श्रेष्ठ इत्यर्थः। पर इति। अव्ययं सकारान्तं वा परः कु
अमिति प्रयोगाद् परश्चासौ वरश्च स्यादिति तायेन वरः परोवरीयानित्यर्थः। प्राधान्यात् श्रुतिसाध्य
ओंकाराशब्दो बलीयानित्यत्कृस्मरयति। यस्तु नरिति। एवकारस्य वर्णशब्दानुगृहीतानेतादिब
हुलिङ्गानामनुग्रहाय तत्र जैदेकं कुलस्यार्थे इति न्यायेनैवान्याः श्रुतेर्वाध्यो मूढस्त्याह। अत्र शृ
मइति। आकाशपदाश्रुतस्ये वप्रथमप्रतीतिनियमो नास्तीत्यपि शब्दे न द्योतितं तत्र युक्ति
माह। दृष्टिलिश्चेति। आकाशपदाद्गौणार्थस्य ब्रह्मणोपि प्रथमप्रतीतिरस्ति। तस्य लक्षणीया
णं च ब्रह्मणि प्रयोगप्राचुर्यादिति भावः। अन्नैरेवकृत्स्ने व्योमनूक्ते क्षिरचो वेदाः संति प्रमाण

रुद्र
५८

क्रम २

येन यस्मिन् त्रक्षरे विश्वेदेवा अधिष्ठिता इत्यर्थः। ॐकारः कं सुखं खं खं ब्रह्म आपयत्रभिरूपासीत स्थूलं तत्प्रयो
गमाह। खंपुराणमिति। आपर्णनादि ब्रह्मेत्यर्थः। कं ब्रह्म कं खं ब्रह्मेति छांदोग्ये। ॐ खं ब्रह्म खंपुराण
मिति बृहदारण्यकमिति भेदः। किंच तत्रैव प्रथमानुसारेणोत्तरं नेयं। यत्र तन्त्रे तु शाखान्तरे त्वत्तरानुसारे
ण प्रथमं नेयमित्याह। वान्येति। तस्मादुपास्ये ब्रह्मणि वाक्यं समन्वितमित्युपसंहरति। तस्मादिति।
आकाशवाक्योक्तन्यायं तदुत्तरवाक्येऽतिदिशति। अतएव प्राणः। तृतीयप्रकरणमिति स्थापनार्थमनुतीय
इति भाष्यपदं तृतीयप्रकरणे श्रूयत इत्यन्वयः। कश्चिदृषिश्चाक्रायणः प्रस्तोतारमुवाच हे प्रस्तोतः यादे
वता प्रस्ताववंसामभिक्तिमनुगता ध्यानार्थं तां चेदज्ञात्वा मम विदुषो निकटे प्रस्तोष्यसि मूर्धा ते पतिष्य
तीति ततो भीतः स नूषप्रच्छ कतमा सा देवतेति उत्तरं प्राण इति प्राणमभिलक्ष्य सम्यक् विशंति ली
यंते तमभिलक्ष्योज्जिहते इत्यन्तेन इत्यर्थः। अतिदेशात्पूर्ववत्सं शयादि द्रष्टव्यमित्युक्तं विषयणो
ति। प्राणेति। मनउपाधिको जीवः प्राणेन ब्रह्मणा बध्यते सुषुप्तावेकीभवति। प्राणस्य। वायोः प्रा
णं प्रेरकं तस्य सत्तास्फूर्तिप्रदं मामेवानं ये विदुस्ते ब्रह्मविद इत्यर्थः। पूर्वेण गतार्थत्वात् पृथक्सूत्रं
व्यर्थमिति संधृते। ननु पूर्वं वायादिति। अधिकाशंकानिरासार्थमतिदेशसूत्रमिति मत्वा शंकामा
ह। नमुख्येपीति। तर्हि तदा चक्षुरप्येतीति सर्वत्र संबंधः। नन्वत्रेंद्रियाणां प्राणे लयोदयो श्रूय
ते तावता महाभूतलयादि प्रतिपादकवाक्यशेषोपपत्तिः कथमित्यत आह। इंद्रियसारत्वादि
ति। स स्वप्ने बरसइतिश्रुतेः इंद्रियाणि लिंगात्मरूपाणि अपंचीकृतभूतानां साराणि तेषां ल
याद्युक्त्या भूतानामपि प्राणे लयादिसिद्धेः वाक्यशेषोपपत्तिरित्यर्थः। अत्र ब्रह्म सहपाठा

च प्राणो न ब्रह्मेत्याह। अपि चेति। प्रस्तोतः प्रतिहर्तारं प्रस्तावमनुगतेति प्रतिहर्ता चक्राद्देवतेति पृष्टेन चाक्रायणेन आदित्यो
न्नं च निर्दिश्यते। आदित्य इति तो वा चोन्नमिति तो वा चेति श्रुतावित्यर्थः। सामान्यं सन्निधानं। लिङ्गि
ध्यनुगृहीत प्रथमश्रुत प्राणश्रुत्या मुख्यप्राणनिर्णये तद्[illegible] प्रस्तावोपास्तिरिति पूर्वपक्षफलं सिद्धान्ते
ब्रह्मदृष्टिरूपोपास्तिः। अस्याधिकरणस्यातिदेशत्वमेव पूर्वेण संगतिरिति विभागः। एवं तीति फलता
नीति प्रसक्तौ यत्किंचिद्भुवनधर्मकं कार्यमात्रं तस्य लेशो द्योवा मुनिकारैः प्राणेन पूर्वपक्षित्वे त्यक्ता
भूतशब्दस्य रू[illegible]र्थमहेपितयादेर्ब्रह्म निर्णायकत्वमित्याह। यत्र पापीति। ज्योतिष्प्रमाणस्य भूतयो
निष्प्रयोगादित्यर्थः। तस्य तद्योनित्वश्रुत्या संकुचते। नान्विति। अथ य[illegible]स्सुषुप्तो जीवः प्राणे ब्रह्मण्येकी
भवति तदाप्येनं प्राणं सविषया वागादयोऽपियन्तीत्यर्थः। अत्र जीवात्मिकलसर्वत्वप्राधान्यलिङ्गा
न्नमुख्यः प्राण इत्याह। तत्रापीति। नान्यान्तरसंनिधिप्रत्ययानाम्नागतं लिङ्गं बलीय इत्याह। तद
मुख्यमित्युक्तमिति। एवकारेण लब्धं वाक्यशेषः। तस्य बलं तद्गतं लिङ्गं तेनेत्यर्थः। प्राणमेवेत्यत्र वस्तुत
णेन सर्वभूतप्रकृतित्वलिङ्गेन च प्राणपदेन तत्कारणं ब्रह्म लक्ष्यमित्याह। तदाकाशशब्दस्येव
ति। यत्तिरूतामुदाहरणे संशयाभावेनायुक्तमित्याह। अत्रेत्यादिना। शब्दस्येदमुक्तं प्रकर
णं प्रपंचयति। यस्यैवेति। ज्योतिश्चरणाभिधानात्। छांदोग्यमेवोदाहरति। इदमिति। गा
यत्त्रुपाधिकब्रह्मोपास्त्यानन्तरमिथ्यर्थशब्दः अतो दिवो द्युलोकात्परः परस्याः ज्योतिर्दी
प्यते तच्चदिदमिति। जाठराग्नावध्यस्यते। कुत्र दीप्यते तत्राह। विश्वत इति। विश्वस्मात्प्राणि
वर्गादुपरि सर्वस्मात्कृतादिलोकादुपरि चेत्यलोकात्तत्पूर्वमेव विश्वतः पृष्ठेष्वनुत्तमे

पृ सर्वसंसारमंडलातीतं ज्योतिरिदमेव यद्देहस्थमित्यर्थः । अस्य पूर्वेणागतार्थत्वं वदन् प्रकृतप्रकरणसं
गतिमाह । अर्थादिति । अत्र स्ववाक्यस्य एवज्ञलिंगाभावेपि पादोस्येति पूर्ववाक्ये भूतपादत्वं लिं
गमस्तीति पादसंगतिः पूर्वोत्तरपक्षयोर्जडं ब्रह्म ज्योतिषोः फलमिति भेदः । ननु आत्मानं तमोपि
रोधित्वाद्ब्रह्मणापि ज्योतिःपदशक्यतया प्रसिद्धमस्ति नेत्याह । चक्षुरिति । रावयौ रात्रौ भवं नीलमिति पा
वत् अनेनावरकत्वाद्रूपवत्त्वाच्चक्षुर्ग्राह्यवस्तुरूपं तमः स्वार्थं दुःखं भवति । ज्योतिः श्रुतेरनुग्रहात् कल्पि
तान्याह । तथेत्यादिना । भास्वररूपाभिव्यक्तिका दीप्तिस्तेजस एव लिंगमित्याह । नहीति । मालूमर्यादेत्या
शंक्य श्रुतत्वान्नैवमित्याह । परोदिव इति । मर्यादोक्ता न इति शेषः । अत एव कार्यस्यापि मर्यादायोगा
न्निरर्थकं ब्राह्मणं इति कश्चिदाक्षिपति । नन्विति । एकदेशी ब्रूते । अस्त्विति । सर्गादौ जातं किंचि
द्दीप्तिमत्तेजो दिवः परस्मादस्तीति श्रुतिसामर्थ्यादित्यर्थः । अस्य नविस्पष्टतन्मते निष्फलं वस्तु नार्थः
इत्याक्षेप्ता ब्रूते । नेति । ध्यानं फलमित्याशंक्य निष्फलस्य क्वापि ध्यानं नास्तीत्याह । इदमेवेत्यादिप्र
योजनांतरं तमोनाशादिकं । अत्रिवृत्कृतं तेजोंगीकृत्य फलसमुच्चयतदेवानास्तीत्याह । तात्स्यि
ति । तेजोब्रह्मानां देवतानामेकैकां त्रिधा विभज्य पुनरेकैकं भागं द्विधा कृत्वा स्वभागादितर
भागयोर्निक्षिप्यत त्रिगुणरज्जुवत् त्रिवृत्करणवाणी प्रविश्योपोक्तेनास्य त्रिवृत्कृतं किंचिदित्यर्थः ।
किंचात्र यदतः पर इति पञ्चमी नान्यतः प्रसिद्धं भुमर्यादत्वं ध्यानान्न घटते न चात्रिवृत्कृतस्य
तत्कल्पितप्रसिद्धमित्याह । नचेति । एकदेशिमते निरस्ते साक्षात्पूर्वपक्षी ब्रूते । अस्तु तर्हीति । प्र

प्रदेशस्य संकल्पितत्वेनेत्याह । नसिति । निष्प्रदेशस्य निरवयवस्य विशेषेति । दिवः परस्ताद्दीप्यमानं ब्रह्मास्मयकल्पन
भागिनी ३

रित्यर्थः

देशविशेषः । दिवः परस्ताद्दीप्यमानाः सूर्यादितेजोऽवयवविशेषः तस्य परिगणरूपासनार्थं निमि
त्तत्वेनेत्यन्वयः सएव कौक्षेयज्योतिषि उपास्यते । तस्यादित्वे ज्ञस्यादिति भावः । ब्रह्मणोपि ध्या
नार्थं युक्ता नलिसन्वयः । अप्रामाणिकगौरवापातादिति न्यायः । ततः किं तत्राह । तादात्म्येति । यथा
एकस्य साक्षात्कारादिति व्याहृतौ प्रजापतेः शिरो दृष्टिः श्रुता । तथा जाठराग्नाव ब्रह्मत्वं घोषादि श्रुत्या प्र
सिद्धमिति जडज्योतिषः सामान्यं वाच्यमित्यर्थः । यद्धृदस्पर्शनेनौष्ण्यज्ञानं प्रसिद्धं सैवा तस्य जाठराग्ने
दृष्टिः यत्कर्णपिधानेन घोषश्रवणं सैवा तस्य श्रुतिः । ज्योतिषो जडत्वे लिंगं तस्मात् । तदेतदिति । ज्यो
तिरित्यर्थः । चक्षुष्यश्च श्रुत इति स्मृदरः श्रुतो विख्यातः । न चान्यदपीति । ब्रह्मलिंगमपि किंचिदन्य
त्रास्तीत्यन्वयः । न त्रिपादस्यामृतं दिवीति पूर्ववाक्योक्तं ब्रह्मात्र ज्योतिःपदेन गृह्यते भिन्न
त्वात् । न चेति । ननु सर्वात्मकत्वामतत्वाभ्यां ब्रह्मलोकमित्यत आह । अथापीति । कथंचित् छेदो
रेत्यर्थः । दिवि दिवि इति विभक्तिभेदान्तम प्रत्यभिहितेत्यर्थः । प्रकृते अतिप्राकृतेकार्यमित्यर्थः । आत्मा रेमि
रस्यति । पादेति । गायत्री वा इदं सर्वं भूतं वाग्वै गायत्री येन पृथिवीयदिदं शरीरं यदस्मिन्पुरुषे हृदय
मिमे प्राणा इति भूत वाक् पृथिवी शरीर हृदय प्राणाभिः षड्विधा षड्विधस्य रेश्चतुष्पदा गायत्री
तिमद् उक्तं तावानस्य महिमा ततः सर्वः प्रपंचोस्य गायत्र्यनुगतस्य ब्रह्मणो महिमा विभूतिः पु
रुषस्तु पूर्णं ब्रह्मरूपः अतः प्रपंचात्मा ज्यायानधिकः । आधिक्यमेवाह । पाद इति । सर्वज्ञादेकरूपो
दोषाः विश्वाहमिदं कृत्स्नमेकांशेन स्थितो जगदिति स्मृतेः । अस्य पुरुषस्य दिवि स्वप्रकाशात्म

कृत्य
५८

पे त्रिपादमृतं रूपमस्ति। दिवि सूर्यमंडले वा ध्यानार्थमस्ति कल्पितान्नागतो ब्रह्मस्वरूपममृतमस्ती
त्यर्थः। यथा लोके पाषाणादत्र यमधिकं तथेदमधिकमिति बोधनार्थं त्रिपादमृतमित्युक्तं। न त्रि
पात्त्वं विवक्षितमिति मंतव्यं। यदतः पर इति यच्छब्दस्य प्रसिद्धार्थवाचित्वात्पूर्ववाक्यप्रसिद्धं ब्र
ह्म गम्यमित्याह। तत्रेति। ननु यदग्ने यो ब्राह्मणपाल्लरस्तत्र यत्पदस्याप्रकृतार्थकत्वं दृष्टमित्यत आ
ह। तत्परिति ज्येति। तत्र यागस्यान्यतः प्रसिद्धेरभावेनापूर्वत्वोदगत्या यदोऽप्रसिद्धार्थसमाश्रि
तं। इह तु पूर्ववाक्यप्रसिद्धस्य ब्रह्मणो बुद्धिसंबंधेन प्रत्यभिज्ञा तस्य यदर्थत्वनिश्चया यत्पदे
कार्यकज्योतिःपदस्यापि स एवार्थ इत्यर्थः। संदेशान्यायादप्येवमित्याह। न केवलमिति। सर्वत्र
त्विदं ब्रह्मेत्युक्तत्र ब्रह्मानुवर्तते मध्यस्थं ज्योतिर्वाक्यं ब्रह्मपरमित्यर्थः। प्रकरणादिति। प्रकृताये
क्षयत्तदश्रुत्या चु संबंधश्रुतपादत्वादिलिंगैश्चेत्यर्थः। अतः प्रकरणाज्ज्योतिःश्रुतिबाधो न
युक्त इति निरस्तं। अविशेषकत्वादिति। ब्रह्मव्यावर्तकत्वाभावादित्यर्थः। येन तेजसा चैतन्येनेद्धः
प्रकाशितः सूर्यस्तपति प्रकाशयति तं बृहंतमवेदविन्मनुत इत्यर्थः। ज्योतिःशब्दस्य कार्य
ज्योतिष्येव शक्तिरिति लिंगीकृत्य कारणब्रह्मलक्षकत्वमयुक्तं ब्रह्मण्यपि शक्तिमाह। यद्वेति।
गाढांधकारे याचेव ज्योतिषा लोकं आसनादिव्यवहारं करोति तेन। भास्यं जडं तमपि वलो
मनोज्योतिःप्रकाशानं स्वयं ब्रवीत्यसात्यस्तुति। गच्छति ज्ञानगच्छतः स्वस्याधिगतिरस्ति तथा
सर्वस्य स्वनिष्ठत्वानं स्यादित्यत आह। तस्य भासेति। तत्कालान वच्छिन्नं ब्रह्म स्वरूपादिज्यो

सा॰ भा॰ टि॰ टी॰

५९

तिर्जासाक्षिभरनमापुरम्यतमिति चदेवगुपासन इत्यर्थः। योऽवितोऽग्निलयवते घुमर्यादस्यादिके ख्या
नार्थं कल्पितं ब्रह्मणो मुक्तिमित्याह। अत्रोच्यत इत्यादिना। दिवः परमपीसन्वयः। आरोप्य स्यापे
यस्याल्वे बनस्य चसाहृत्यनियमो नास्तीत्याह। परस्यापीति। पत्र विषयेति ब्रह्मज्योतिषः इति
रोषः। तं यथा यथोपासते तथा फलं भवतीति श्रुतेरित्याह। नतीयत इति। ज्ञानफलत्वे नतु यात्तिफ
लमेकरूपं किं न स्यादत आह। यत्रहीति। इयैव कलादित्यर्थः। ध्येयं तु नानेत्याह। यत्रान्यदिति। इत्थं
तेजो वस्तुरूपेणान्नमतीत्यर्थवादः। जन्मस्यासमं तादृशीं वा वस्तु हिरण्यं ददातीति वस्तुदान इति गुण
विहो बसंबंधं यो वेद लब्धमन्नं विंदते दीप्ताग्निश्च भवति। नान्मेतावा गुरुत्वमामनोवा प्रतीकेवा
चोपमय इति प्रतीकविरोधध्यानश्रुतिसंग्रहार्थमाद्यपदं सन्निधेः श्रुतिर्बलीयसीति रौक्ष
ने। कथं पुनरिति। प्रथमश्रुत्यनुसारेण चरमश्रुतिर्नेयत इत्याह। नैष दोष इति। सर्वनाम्नः स्वसा
मर्थेन स्वस्य सर्वनाम्नः सामर्थ्यं सन्निहितवाचित्वं तच्छब्देन परामृश्यत इति योजना। अर्था
घासदं सामानाधिकरण्यादित्यर्थः। छंदोपि चानौकृत्यस्य कृतं नास्तीति शंकामेकदेशी दूषय
ति। कथमिति। शंकां सापयति। नैतदित्यादिना। चतुष्पदत्वादिकं पूर्वमेव व्याख्यातं। पौराता
मेयमिति। वेदरहस्यभूतां मधुविद्यामेवमुक्तरीत्या यः कश्चिद्वेद तस्यायमिति भावः। मम
रहितब्रह्मप्राप्तिर्भवतीत्यर्थः। तथाच वेदलौ गायत्र्यां ब्रह्मशब्दो मुख्य इति भावः। गाय
त्रीशब्देन तदुपादानत्वेनानुगतब्रह्मलक्षणायां बीजं भानुपपत्तिमाह। नत्वक्षरेति। ब्रह्म
णोपि कथं स्वीक्रियते तत्राह। कामैमेति। नन्च गायत्र्याख्यानार्थस्य वीत्सआरोप इतिवा

ते

व

कृष्ण ५९

ध्येयत्वात्‌: सर्वात्मनो ध्यानसंभवेना सदारोपायोगादिति भावः। तथाहि दर्शनमिति सूत्रशेषं व्याचष्टे तथान्य
त्रेति। दृश्यत इति दर्शनं दृष्टमित्यर्थः। एतं परमात्मानं बह्वृचा ऋग्वेदिनो महत्युक्थे शास्त्रे तदनुगतमुपा
सते एतमेवाग्निरहस्ये तमेतमग्निरित्यध्वर्यव उपासत इति श्रुते यजुर्वेदिनो ऽग्नावुपासते एतमेव छ
न्दोगाः सामवेदिनो महाव्रते ऋत्विगुपासत इत्यैतरेयके दृष्टमित्यर्थः। गायत्रीशब्दो ब्रह्मलक्षक इति व्या
ख्याय गौणत्वमाह। अपर इति। भूतादेर्यः पादव्यपदेशस्तेनेति यावत् पूर्ववत्‌ पादस्य तथा गाय
त्रीपदेन लक्षणायां गायत्रीब्रह्मणी द्वे अपि लक्षिते। न च गायत्री सर्वमिति च यासंभवः घटे
रूपी तिपदार्थैकदेशो [illegible] रूपान्वयवत् गायत्रीपदार्थैकदेशो गायत्र्यनुगते ब्रह्मणि प्रधाने सर्व
त्वान्वयसंभवात्‌ इति भावः। तथा च सर्वं [illegible] त्यागस्याप्यमर्थः। तथा गायत्रीवच्चतुःपात्त्व
गुणसामान्यात्‌ चेतो ब्रह्मणि समर्प्यते येन स चेतोऽर्पणो गायत्रीशब्दस्तेन ब्रह्मण एवाभिगदात्‌।
[illegible] दर्शनमिति शेषं व्याचष्टे। तथेति संवर्गविद्यायामधि
दैवमग्निसूर्यचन्द्रोदकानि वायौ लीयन्ते अध्यात्मं वाक्चक्षुःश्रोत्रमनांसि प्राणमपियन्ति तौ ह
वा एते पञ्चान्ये आधिदैविकाः पञ्चान्ये आध्यात्मिकाः ते मिलित्वा दशसंख्याकाः सन्तः कृतमि
त्युच्यन्ते सन्ति हि कृतत्रेताद्वापरकलिसंज्ञकानि चत्वारि द्यूतानि क्रमेण च तुर[illegible] कृ[illegible] का
तत्र कृते दशानामन्तर्भावात् [illegible] त्रयाणां त्रिषु द्वयोर्द्वयोरेकस्य चान्तर्भावात्‌ तथा च
दशत्वगुणेन वा [illegible] कृतशब्देनोच्यते एवं कृतत्वं [illegible] स एवेति विच्छेद
[illegible] त्रिलिंगनिर्देशः। विराट्‌पदं [illegible] दशाक्षरा विराडिति श्रुतेः दशत्वसाम्या

त्वा

गा०भा०टी०टी०

५०

ननु पादको विराडित्युच्यते। एवं च दशत्वद्वारा वाग्यादिष्वकृतत्वं विराट्त्वं च ध्येयं। तत्र विराट्त्वं लक्ष्यानामात्सर्व-
मस्यान्नं भवति। अन्नं विराडिति श्रुतेः। कृतलक्ष्यानादन्नादो भवति। कृतघ्नृतस्यान्नादित्वात्। कृतं हि
त्रीय चतुरंकेषु त्र्यंकादिकं मंतर्भावयदन्नमत्त्वीव लक्ष्यते। अत एव कृतजयादितरघ्नृतजयः श्रुते
कः। कृताय विजिताय। चरेयाः लेपंतीति। अयो घृतं कृतसं श्रीयः कृतायः स विजितो येन तस्मै अ-
चरेयाः श्रेक्रादयः अपाः संयंति उपनमंते तेनाजितृप्सवंतीत्यर्थः। एवं च सा वाग्यादिदशात्मिका
एषा कृतशाद्विला विराडन्नं कृतलक्ष्यादन्नादिनीत्यर्थः। सर्वथापीति। गायत्रीति पदस्य लक्षणकल्पे
गौणकल्पे पिच्चत्यर्थः। अत्र परमाहेत्यपरपदेन गौणत्वं स्वमतेनेति द्योतयति। अन्नं तु लक्ष-
णापक्षेति वाग्वै गायत्रीति। गानात्मत्वं गायतिच त्रायते चेति निरुक्तनाम कत्वं च गायत्र्याऽप
णापक्षेति वाग्वै गायत्रीति। वागात्मत्वं गायति च त्रायते चेति निरुक्तनाम कत्वं च गायत्र्याउपपादनी-
पिलेनोपास्यत्वादुपपन्नतरं। गौणपक्षे गायत्रीत्वागात्तद्व्यं संबन्धमन्वत्वमात्रेणोपपादनी-
यं। एवं गायत्रीपदस्य स्वार्थत्यागोऽप्रसिद्धचतुष्पात्त्वगुणद्वारा विप्रकृष्टलक्षणा चेति वक्तव्यं।
जसं। ननु गायत्री वा इदं सर्वमिति प्रथमगायत्रीश्रुतेः कथं लक्षणेत्याशंक्य वाक्यशेषगतस-
र्वात्मकत्वाद्यनेकवलवत्प्रमाणसंवादेन ब्रह्मणि तात्पर्यावगमादित्याह। भूतादिपादेति। एवं
पदार्थमाह। इतश्चेति। सूत्रस्थादिपदार्थं दर्शयति। भूतपृथिवीति। अत्र सूत्रभाष्यकारयो
र्भूतादिरिति श्रुत्वा चतुष्पदा गायत्रीति संमतं। षडक्षरैश्च चतुष्पात्संपत्तिद्वारोच्यमानत्वात्सर्वेति चकार
पुरुषचितं युक्तं तरमाह। अपि चेति। ब्रह्मपरसत्त्वे तत्र लोकत्रयस्यासत्परत्वमित्याह। पुरु-

= लक्षि-
णा =

कृत
५०

१००

बेति। ब्रह्मपदस्य छेदो काचित्व मुक्तं निरस्यति। यदैतेद्वेति। हृदयस्य चतुर्दिक्षु ऊर्ध्वं च पंच सुषयः सं
ति ते च ब्रह्मलोकस्थान हृत्पुरस्य प्राणादि द्वारेण क्रमेण प्राणव्यानापानसमानोदानाः पंच द्वार
पाला इति ध्यानार्थं श्रुत्या कल्पितं तत्र हृदय छिद्रस्थे प्राणे पूर्व ब्रह्मपुरुषत्वं श्रुतिर्हृदि नाम
स्य ब्रह्मणउपासना संबंधितान्यं ब्रह्मणो द्वारपाला ब्रह्मपुरुषा इति संभवतीत्याह। पंच ब्र
ह्मेति। दिवि दिव इति विभज। कि परे दातृत्वमरूत तस्य तं भितृतो नासौ हृदये नोपेक्षणीय मित्याह। तत्प
रिहर्त्तव्यमिति। प्रतिहार प्रति जानीते। अत्रेति सूत्रे नर्थं वदन् परिहारमाह। नावधि
ति। एवं सर्वत्र व्याख्येयं। प्रधान प्रातिपदिकार्थ एव बंधेनत्र समभितो या विभक्तिस्तद्व्यवेद
नम्प्रति बंध कः वृत्थे चित्रहारस्या पि मर्यादा सदसे वा तं। यथा वृक्षाग्रं स्थलगत भागावछिन्न
स्पेनस्या धारः तत्रैव स्थलगत भागावछिन्नस्य तस्यैव मर्यादा भवति। एवं दिवि सूर्ये हार्दी द्वा
रो वा मुख्याधारे सन्नपि दिवो मर्यादत्वं तदलग्नाकाश्या वछिन्न ब्रह्म प्रति भूत्या दिसौ
दिवः परमित्युच्यते इत्यर्थः। यथाऽत्रोनोऽपानवछिन्न ब्रह्मणि गतो सो पंचम्यादिवो मर्यादात्वं
मेव मुख्यं तदागंतुकं चोच्यते इति वत्स हम्यासामीप्य लक्षणाया धारत्वं व्याख्येय मित्याह।
अपर इति। संबंधं प्रत्याधारत्वं मुख्य पूर्वमुक्तं दिव्येव सदिति। असं[illegible] बद्धं प्रति मर्यादात्वं
मुख्यम पुनोच्यते दिवः परम पीति वेदः। तस्मा ज्योतिर्वीर्यमुपास्ये ब्रह्मणि समान्वित
मितितिद्धं॥ प्राणस्तथानुगमात्॥ दिवोदासस्यापत्यं दैवोदासिः। प्रतर्दनो नाम राजा मृ
देन पुरुषकारेण [illegible] चेंद्रस्य प्रेमास्पदं गतं नाम मतिहेंद्र उवाच प्रतर्दन वरं ते द

ग

गी॰ भा॰ टि॰ टी॰

५१

टी॰ ५

दामीति स होवाच प्रतर्दनो यं त्वं मर्त्याय हिततमं मन्यसे तं वरं त्वमेवालोच्य मह्यं देहीति। तत्र इन्द्र इदमा
ह। प्राणोऽस्मीत्यादि। मुख्यं प्राणं निरस्य तं प्रत्यगात्मत्वेनोक्त्वा निर्विशेषचिन्मात्रे निरस्यति। तं मामि
ति। इदं प्राणस्येन्द्रदेवतात्वे लिङ्गं मुख्यप्राणत्वे लिङ्गमाह। अथेति। वागादीनां देहधारणासम्प
भावनिश्चयानन्तरमित्यर्थः। प्राणस्य देहधारकत्वमुत्थापकत्वं च प्रसिद्धमिति वक्तुरत्वान्यिन्द्र
क्तं। प्राणं जीवत्वे च लिङ्गमाह। न वाचमिति। आनन्दत्वादिकं ब्रह्मत्वे लिङ्गमाह। अन्ते चेति। अ
नेकेषु लिङ्गेषु दृश्यमानेषु पूर्वत्र ... बलनिर्णयार्थमिदमधिकरणमित्यगतार्थतामाह।
अनेकलिङ्गेति। पूर्वत्र प्रकृतब्रह्मवाचकशब्दबलाज्ज्योतिःश्रुतिः ब्रह्मपरेत्युक्तं न तथेह ब्र
ण श्रुतिभङ्गे किञ्चिद्बलमस्ति मिथो विरुद्धानेकलिङ्गानामनिश्चायकत्वादिति प्रत्युदाहर
णसङ्गत्या पूर्वपक्षयति। तत्रेति। पूर्वं प्रधानप्रातिपदिकार्थबलाद्विपरीतस्यार्थबोधवद्वा
क्यार्थज्ञानं प्रतिहितत्वेन प्रधानानेकपदार्थबलादेकवाक्यता सङ्गरति दृष्टान्तसङ्गतिर्वा
स्तु। पूर्वपक्षे प्राणाद्युपास्तिः सिद्धान्ते ब्रह्मप्रत्यग्ब्रह्मधीरिति विवेकः। तथा ब्रह्मपरत्वेनप
दानामन्यथा नयनमादितिहेत्वर्थमाह। तथाहीति। हिततमत्वं कर्माध्यक्षादिपदार्थानां सं
बन्धो ब्रह्मज्ञानात्स्वयमविश्वाय कथमुपलभ्यत इत्युक्तं विवृणोति यथाक्रम इत्यादिना। यं मन्य
से तं वरं त्वमेव प्रयच्छेत्यर्थः। स्वयं कृत्वा तु मां ब्रह्मरूपं वेद तस्य ध्यानादन्तर्यामीति तस्य विदुषो
लोको महतापि पातकेन न लुप्यते नैव हिंस्यते न प्रतिबध्यते। तेनाग्निना कर्मतूल
रासे दग्धत्वादित्याह। स यदीति। स धर्मपुण्यपापे तास्मादस्पृष्टत्वं तत्कारयितृत्वेनि

पृ॰
५॰

रकुर्वे ऐश्वर्यं च सर्वमेतदित्यर्थः । अहंकारवादेनस्यात्मवाचकशब्दैराचष्टे इत्याभिप्रायः । वाक्य
स्य इंद्रोपासनापरत्वे लिंगांतरमाह । तथा विप्रहेति त्रीणि शीर्षाणि यस्येति त्रिशीर्षस्त्वाष्टुः पु
त्रो विश्वरूपो नाम ब्राह्मणः तं हतवानस्मि । रैति यथार्थे शब्दयतीति रूतं वेदांतवाक्यं तन्मु
खे येषां ते रून्मुखाः तेभ्यः सालावृकेभ्यो दत्तवानस्मीत्यर्थः ।
इंद्रे प्राणशब्दोपपत्तिमाह । प्राणस्य चेति । पठंती लौकिका अपीत्यर्थः । बलवाचिना प्राणश
ब्देन बलदेवतात्वं स्यादिति भावः । इंद्रो हितं प्रहितं सा श्रुतं तमः । कर्मानाधिकारादपाप
इत्येवं व्याख्येयानीत्याह ।। निश्चिते चेति । क्विमिंद्रपदेन विप्रहोपलक्षितं चिन्मात्रं पुच्छ
ले इतरविरुद्धः । आद्येवाक्यस्य ब्रह्मपरत्वे सिद्धं न द्वितीयमित्याह । आध्यात्मेति । आसन्नि
देहे इंद्रियगत इत्यध्यात्मप्रसंगात्सासंबध्यते यैः शरीरे सांदिभिरिंद्रलिंगानावसंश्रितैः
धर्मैस्तैरध्यात्मसंबंधास्ते बहुलमेतदर्थः । आयुरत्र देहे प्राणवायुसंचारः अस्तित्वे सति तो
प्राणानामिंद्रियाणां स्थितिरित्यर्थस्तत्स्तुतिमाह । अस्तित्व इति । अथातो निःश्रेयसादा
नेपि साधारणश्रुतिः इंद्रियस्थापपन्नत्वं वद्दहोत्थापद्धत्वमाह । तथेति । व्यक्तसमुच्चयसर्वधि
ष्ठानत्वं दर्शितमित्याह । इति चोपक्रममध्येति । ततत्र नानाप्रपंचस्यात्मनि कल्पनापोयथा
इत्योतः लोके प्रसिद्धस्य रथस्यारेषु नेमिनाभ्योर्मध्यस्थशलाकास्वर्पितो तद्रूपाने
मिरर्पिता नाभौ च नाभिडिका यो अरा अर्पिता । एवं भूतानि पंच पृथिव्यादीनि । भीमतइ
तिमात्राः भोग्याः शब्दादयः पंचेति दशभूतमात्राः प्रज्ञामात्रास्वर्पितास्वर्पिताः । इंद्रियजाः

स्वप्न ८

103

पंचशब्दादिविषयप्रज्ञाः मीयंते आभिरिति मात्राः पंच धीन्द्रियाणि नेमिवत्तस्मिन् लग्नानि तत्केषु अरेषु
समर्पितं इत्यस्य व्याख्या। एवमस्मिन्प्राणे सर्वं समर्पितमित्याह। प्राणेऽर्पिता इति। स प्राणो मम स्वरूपमि
त्याह। स म इति। तर्हि प्रत्यगात्मनि समन्वयो न तु प्राणे तत्राह। अथ यमिति। अन्तःकरणवादस्य
मतिं पृच्छति। कथमिति। सूत्रमुत्तरं तद्व्याख्याति। इदमिति। जन्मोत्तरकृतश्रवणादिना ब्रह्मि
न जन्मनि स्वतः सिद्धं दर्शनमार्षं। मित्रेयं द्रष्टुः सर्वः उपन्यासो न चेत्स्य कथं तर्हि स इति पृच्छति। क
थमिति। अनेन ज्ञानस्तु सर्वः स इत्याह। विज्ञानेनेति। नियामकं ब्रूते। यदिति। परेण तस्य मे इत्या
दिना वाक्येन परामर्शः। स्मृतिमात्। एतदुक्तमिति। तस्माज्ज्ञाने श्रेष्ठमित्युपसंहारः। स्मृतज्ञान
विषयं इत्यत आह। निष्क्रमिष्यतीति। देहोत्थापनं जीवत्विकं भिन्नं स्यात्तत्राह। शारीरं धा
रणं चेति। सर्वे वागादयः प्राणाः अहं श्रेष्ठ इति विवदमानाः प्रजापतिमुपजग्मुः। स च तानुवाचा
यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरं प्रतिष्ठति स वः श्रेष्ठ इति। तथा क्रमेण वागादिषूत्क्रान्ते
ष्वपि मूकादिभावेन शारीरं स्वस्थं समस्थात्। मुख्यप्राणस्य तदुच्चिक्रमिषायां सर्वे ऽ वा
कुलत्वे तेऽन्ये वागादीन् वरिष्ठः प्राण उवाच। एवं मोहमापद्यथ यतोऽहमेवैतत्पञ्च किं
तत्संचयः प्राणापानादिभावेनात्मानं विभज्य एतद्बाणमवष्टभ्य विधारयामीति तदनवाणमविष्टः
रं शारीरमवष्टभ्य विधारयामीति सर्वः। द्विवचनमसत्त्वासोक्रान्तिम्युतेभ्य न श्रोमग्राहं
मित्याह। जीवमुख्येति। अभेदनिर्देशमाह। यो वा इति। वेदमात्। स हेति। यदि जीवमुख्य

प्राणयोर्लिंगादुपास्यत्वं तर्हि ब्रह्मणोऽपि लिंगान्तरानुक्तत्वादुपासनं स्यान्न चेष्टापत्तिः। उपक्रमादिना नि
श्चितैकवाक्यतासंगमकत्वं गादित्याह। नैतदेवमित्यादिना। न चास्य तत्र पदार्थभेदाद्वाक्यभेदः भिन्न
स्यादिति वाच्यं। जीवमुख्यप्राणयोरुक्तलिंगानां ब्रह्मणि नेतुं शक्यतया स्यात्तस्यासिद्धेः। अप्र
त्वपदार्थस्य फलवदर्थशेषत्वेन प्रधानवाक्यार्थानुसारेण तल्लिंगनयनस्योचितत्वा
च्च न तु प्रधानवाक्यार्थब्रह्मलिंगमन्यथा नेतुं शक्यं न वा तदनुचितमित्याह। न च ब्रह्मलिं
गमपीति। सूत्रशेषं व्याचष्टे। आश्रितत्वादिति। अन्यत्रापि तत एव प्राण इत्यादौ वृत्तेराश्रितत्वा
दिहापि तस्य ब्रह्मलिंगस्य योगात्। ब्रह्मपर एव प्राणशब्द इत्यर्थः। प्राणादिलिंगानि सर्वा
त्मके ब्रह्मण्यनायासेन नेतुं शक्यानीत्याह। यद्यपीत्यादिना। यस्मिन्नेतौ प्रेर्यत्वेन स्थितौ ते
नेतरेण ब्रह्मणा सर्वे प्राणादिव्यापारं कुर्वन्तीत्यर्थः। विशेषपरिच्छेदाभिमानमित्यर्थः। व
त्कारं विद्यादिति। न च कुर्वत्सु परत्वमुच्यते तस्य लोकप्रसिद्धत्वात् किं तु तस्य ब्रह्मत्वं बोध्यते तत-
द्बोधापि मुख्याय लिंगद्वयमत्र प्रसंगतरमाह। यद्वा चेति। येन चैतन्येन वागादिषु प्र
तेस्य कार्यं। विमुख्येन प्रेर्यते तदेव वागादेरगम्यं ब्रह्मेत्यर्थः। तत्त्वंपदवाच्ययोः स्वरूपतो
पने दलाभ्यामुपलक्ष्यात्मस्वरूपाभेदादेकत्वं निर्दिष्टमित्याह। नैष दोष इति। एवम
तेन सूत्रं व्याख्याय वृत्तिकृन्मतेन व्याचष्टे। अथ वेति। उपासनात्रैविध्यप्रसंगादिति सू
र्वमृतं। अत्र त्रिप्रकारस्येत्र ब्रह्मविशेष्यकस्य ब्रह्मोपासनस्य विवक्षितत्वादित्यर्थः।

गा·भा·टि·टा

५३

अतो न वाक्यभेद इति भावः। देहचेष्टात्मकजीवनहेतुत्वं प्राणस्याप्युक्तं देहचेष्टया तस्यानुमेयत्व
ख्यापनादमृतत्वं। उत्थापयतीत्युक्थत्वमिति प्राणधर्मः। जीवधर्मानाह। अथेति। बुद्धिप्राणयोः
सहस्थितत्वं [illegible] तस्यानन्तरं निसर्गः। अत्र प्रज्ञापदेन साभासा जीवाख्या बुद्धिरुच्यते। तस्याः
सर्वेषु धीनि हृदयानि सर्वाणि भूतानि यथैवं सर्वं स्वधिष्ठानचिदात्मना तथा। व्याख्यास्या
म इत्युपक्रम्य [illegible] वागेवेत्यादि चक्षुरेवास्या एकमंगमुदूढमित्यादि पर्यायाणां संक्षिप्ता
र्थमुच्यते। उपश्रयाया अस्वतन्त्रत्वात्। तावता बुद्धेर्नामप्रपंचविषयित्वमर्धशरीरत्वं अथा
स्येकरूपप्रपंचविषयित्वमर्धशरीरत्वमिति मीलितत्वा विषयित्वात् पूर्णशरीरत्वमिंद्रियत्व
स्य तत्र कर्मेंद्रियेषु वागेवास्याः प्रज्ञाया एकमंगं दुदुहे [illegible]। पूर्वपाभास। वागिं
द्रियद्वारा नामप्रपंचविषयित्वं बुद्धेर्लभ्यत इत्यर्थः। चतुर्थवेष पष्ठ्यर्थो। तस्याः पुनर्नामभि
लन्च स्वरादिना प्रातिविहितो ज्ञापितो भूतमात्रा रूपाद्यर्थरूपोपरस्ताद् परा [illegible] कारणं भ
ति सानकरण द्वारा ऽर्थप्रपंचविषयित्वं बुद्धिराप्नोतीत्यर्थः। एवं बुद्धेः सर्वार्थद्रष्टृत्वमु
पपाद्य तन्निष्ठचित्प्रतिबिंबद्वारा साक्षिणि द्रष्टृत्वाध्यासमाह। प्रज्ञयेति। बुद्धिद्वारा
चितात्मा वाचमिंद्रियं समारुह्य तस्याः प्रेरको भूत्वा वाचा करणेन सर्वाणि नामानि वक्त
व्यत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टा भवतीत्यर्थः। तथा च सर्वद्रष्टृ
त्वं चिदात्मनि स्वप्नसाध्यासनिमित्तत्वं च बुद्धेर्धर्म इत्युक्तं भवति। सर्वाध्यात्वानंद
त्वादिः अत्रैव धर्म इत्याह। तावाहुतीति। दशसंख्याख्यातो। प्रज्ञा इंद्रियजाता भूविरूपा ता

५३

ग्राह्यो भूतमात्रा वर्तते। प्रज्ञामात्रा इन्द्रियाणि मात्रा तं भूतमात्रा अधिकृत्य वर्तत इति। मात्रा त्व
ग्राहक यो र्मिथः सापेक्षत्वमुक्तं सादयति। यदीति। तदेव स्फुटयति। न हीति। ग्राह्येण
ग्राहकस्य रूपं न सिध्यति किं तु ग्राहकेन। एवं ग्राहकमपि ग्राह्यमनपेक्ष्य न सिध्यति।
तस्मात्सापेक्षत्वादेतदुभयं ग्राह्यग्राहकद्वयं वस्तुतो न भिन्नं किं तु चिदात्मनि आरोपितमि
त्याह। नो इति। तद्भाष्यं भाष्यादिकृत व्याख्यानं। सूत्रार्थमुपसंहरति। तस्मादिति। अन्यध
र्मेणान्यस्योपासनं रूप्यमित्याशंक्याश्रितत्वादित्याह। अन्यत्रापीति। इहापि जी
वः तत्त्वान्यधर्मेणोपासननियमसंगतो व्याख्या। तथाहि न तावदनेकगु
णविशिष्टस्य ब्रह्मणो विधिः संभवति। सिद्धस्य विधेयनर्थत्वात्। नापि ब्रह्मानुवादे
प नोपास्यात्रैविध्यं विधिः वाक्यभेदात्। न चानेकधर्मविशिष्टमेकमुपासनं विधीयत इति
वाच्यं। तादृशविधिवाक्यस्यात्राश्रवणात्। न च तेमामायुरमृतमित्युपास्वेति। आ
त्मायुरिति जीवेनायुरिति प्राणेनामृतमिति ब्रह्मणस्त्वस्वधर्मवतो विशिष्टोपास
नाविधिरिति वाच्यं। सर्वेषां धर्माणामश्रवणात्। श्रोत्रोऽश्रुतेश्च। प्राणो वा अमृतमिति
प्राणस्यैवामृतत्वश्रुतेश्च तदुपासनाविधिलुब्धे न वक्तारं विद्यात् एतदेवोक्तमुपा
सीत समआत्मेति त्रिधा विधिरिति जीवप्राणब्रह्मोपासनं विधेयः। अन्ये तु गुणविधय इति
स्वीकृते कवाक्यत्वं न शक्यं तथाप्युक्तं। उपक्रमादिनैकवाक्यतानिर्णयात्। तस्मात्

नैयप्रसक्तमपरमिदं वाक्यमित्युपसंहरति। तस्मादिति॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्पादकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमस्याध्यायस्य प्रथमः पादः॥ ॥ श्रीकृष्णाय नमः॥

श्रीगणेशाय नमः॥ श्रीरामं सिद्धमत्तारं गुहाशायिनमंतरं। अंतर्यामिणमत्येयं वैश्वानरमहं भजे॥१॥ पू-
र्वपादेनोत्तरपादयोः संगतिं वक्तुं वृत्तमनुवदति। प्रथम इति। जगत्कारणत्वव्यापित्वादिकं अ-
र्थात्सिद्धं। तदुपजीव्योत्तरे पादद्वयं प्रवर्त्तत इति हेतुहेतुमद्भावः संगतिः। कथं पादद्वये इत्याशंक्य
पादानां प्रमेयभेदमाह। अर्थांतरेति। आकाशादिशब्दानां स्पष्टब्रह्मलिंगैर्ब्रह्मणि समन्व-
यो दर्शितः। अस्पष्टब्रह्मलिंगवाक्यसमन्वयः पादद्वये वक्ष्यते। प्रायेणोपास्यत्वेय ब्रह्मणे
दाशादयो रवांतरभेद इति भावः। छांदोग्यमुदाहरति। इदमिति। तस्माज्जायत इति तज्जं
तस्मिंल्लीयत इति तल्लं तस्मिन्ननितीति चेष्टत इति तदनं तज्जं च तल्लं च तदनं चे-
ति तज्जल्लान् कर्मधारये स्मिन् शाकपार्थिवन्यायेन मध्यमपदस्य तच्छब्दस्य लोपः तज्ज-
त्वात् तज्जल्लानमिति वाच्ये छांदसो यवयवलोपः इति शब्दो हेतौ सर्वमिदं जगत् ब्रह्मैव तद्विवर्त्तत्वा-
दित्यर्थः। ब्रह्मणि मित्रामित्रपरेशभावात् शांतो रागादिरहितो भवेदिति गुणविधिः। स
कृतुमुपासनं कुर्वीतेति विहितोपासनस्योपासीतेत्यनुवादात् फलमाह। अथेति। क्रतुम-
यः संकल्पविकाररूपश्च सर्वः। पुरुषस्य ध्यानविकारित्वं स्फुटयति। तथेति। इह यथा मति-
फलो ध्यानमहिम्ना तच्छेयरूपेण जायत इत्यर्थः। क्रतुमयः संकल्पप्रधान इति यावर्थः
क्रतोर्विषयमाह मनइति ब्रह्मेत्युपक्रम्य मनोमयं प्राणशरीरं भारूप स सत्संकल्पं अंत-
हृदये ध्यायामित्यर्थः पूर्वत्र ब्रह्मलिंगैर ब्रह्मलिंगबाधकत्वः न तथेत्युपक्रमे ब्रह्मणो

लिंगमस्ति किंतु प्रकरणं तत्रासांनिध्यगुणविधानार्थमन्यथासिद्धं अतो जीवलिंगं बलीय इति प्राप्त उदाह
रणेन पूर्वपक्षयति। शारीर इत्यादिना। श्रुतिमाहात्म्यान्यथासिद्ध्या परिहरति। नैष दोष इति। शमवि
धिपरत्वे हेतुमाह। यत्कारणमिति। यत तावमाह। तत्समाप्यमविधिपरमित्यन्वयः। नच शमेति।
शमध्यानयोर्विधौ वाक्यभेदापत्तेरित्यर्थः। जन्मपरंपरया जीवस्यापि सर्वकर्मत्वादिसंभव
माह सर्वकर्मेति। सर्वाणि कर्माणि यस्य सर्वे कामा भोग्या यस्य सर्वगंधः सर्वरस इत्यादिश
द्धोर्थः। आराग्रमात्रस्येति। तोत्रशंतापः शान्ना कार्ग्रपरिमाणस्येत्यर्थः। सर्वत्रप्रसिद्धब्रह्म
णएवात्रोपास्यत्वेनोपदेशान्न जीव उपास्य इति सूत्रार्थमाह सर्वत्रेति। यत्र फलं नोच्यते त
त्रपूर्वोत्तरपक्षसिद्धिः फलमिति मंतव्यं। यद्यपि निराकांक्षं ब्रह्म तथापि मनःप्रचुरमुपा
धिरस्य प्राणः शरीरमस्येति समासांतर्गतसर्वनाम्नः सन्निहितविरोधाद्व्याकांक्षत्वाद्ब्रह्मसं
बध्यते स्योनं ते सदनं करोमीति संस्कारार्थं तदनस्य निराकांक्षस्यापि तस्मिन्सीदेति सा
कांक्षत्वच्छेदेन परामर्शदर्शनात् इत्याह। अत्रोच्यत इति। स्योनं पात्रं ते पुरोडाशस्येति
श्रुत्यर्थः जीवोपि लिंगात्सन्निहित इत्यत आह। जीवस्येति। इदं हि लिंगाद्यं तत्रोक्तप्रसि
द्धं जीवं न सन्निधापयति दुःखित्वेनोपास्ययोग्यत्वात्तत्फलाभावाच्च अतो विन्यजिन्या
येन सर्वाभिलषितमानंदरूपं ब्रह्मैवोपासनाक्रियानुबंधीति भावः। किंच ब्रह्मेति पदत्र
सांलिंगाबाध इत्याह। नचेति। अन्यतराकांक्षानुगृहीतफलवत्प्रकरणं विपूललिंगा

कल्पीय इति समुदायार्थः वस्तुनो विवक्षायाः फलमुपादाने स्वीकारः स च प्रकृतेषु गुणेष्वस्तीति
विवक्षोपचार इत्याह । तथाप्युपादानेनेति । नन्विदं गत्यामिदं सत्यमिति धीविवक्षाधीना
वेदे कुतस्त्यादित्यत आह । उपादानानुपादानेऽलिति । तात्पर्यं नाम फलवदर्थप्रतीतिजनकत्वं
त्वं
ले शब्दे धर्मः उपक्रमादिना तस्य ज्ञानात्तयोरवगम इत्यर्थः तदिहेति । तत्तस्मात् तात्पर्यं
बलादित्यर्थः सर्वात्मत्वे प्रमाणमाह । तथा चेति । तीर्णः स्थविरो यो दंडेन वंचति गच्छति
सोऽपि त्वमेव यो जातो बालः सत्यमेन सर्वतः सर्वास्वदिक्षु श्रुतयः श्रोत्राण्यस्येति सर्वतः
श्रुतिमत् सर्वजं तन्नो प्रसिद्धाः पाण्यादयस्तस्येति सर्वात्मत्वोक्तिः । ननु जीवधर्माश्चे
द्रक्षणयोऽप्येते तर्हि ब्रह्मधर्मा एव जीवे कथमिति न यो न्यते तत्राह अनुपपत्तेरिति ।
सूत्रं व्याचष्टे पूर्वेणेति । सर्वात्मत्वादिरूपस्य यः कल्पितस्य धर्मोऽधिष्ठाने संबध्यते
न अधिष्ठानधर्मः कल्पित इति भावः । वागेव वाकः सोऽस्यास्तीति वाकी न वाकी अवा
की अनिंद्रिय इत्यर्थः । कुत्राप्यादरः कामोऽस्य नास्तीत्यनादरः निस्पृह इत्यर्थः त्या
य स्याचानुपपत्तेः शारीर इति परिच्छेदहेतुः सूत्रोक्तः स तु जीव स्यैव नेश्वरस्येत्याह ।
सत्यमित्यादिना । प्राप्यत्वेन व्यपदिशतीति संबंधः । कर्मकर्तृव्यपदेशपदस्यार्थमाह
माह । तथोपास्येति । एकार्थत्वं प्रकरणस्य समानत्वं । अंतरा त्वमात्मेति । विभक्तिं
लोपश्छांदसः शब्दयोर्विशेषो विभक्तिभेदः तस्मात्तदर्थयोर्भेद इति सूत्रार्थः । स्म

श्री

स्तो हृदिस्थस्य जीवाद्भेदोक्तेरत्रापि हृदिस्थो मनोमय ईश्वर इत्याह। स एतेश्चेति। एतानि जीवानु-
यंत्रं शारीरं अत्र स एव अत्रोक्तास सर्वभेद इत्यत इति भावः। इति निरासापेक्षसप्रिकरणे निरस्तमपि चो-
द्यमुद्भाव्य निरस्यति। अर्भकौकस्त्वादित्यादिना। त्वदुक्तरीत्या वस्तुत एकत्वमेव भेदस्तु कल्पितः सूत्रेण
नूद्यत इत्याह। सत्यमिति। अर्भकमोको यस्य सोऽर्भकौकाः तस्य भावस्तत्त्वं तस्मादर्थिकं अल्प
त्वं अणीयानिति अल्पत्वं वा चशब्देनापि श्रुतमित्याह स्वशब्देनेति। नायं दोष इत्युक्तं निचाय्यत्वेनेति
न तावदिति। कथमपि अल्पत्वावादेश्च व्यापीत्यर्थः। परिच्छेदस्थानं विना अल्पत्वासंभवात् तत्
स्थाने स अल्पत्वेन तथोपास्यत्वमापातीति भावः। विपक्षे परिच्छेदो दोष इत्याह। यथा स्वमते
ति। सर्वेश्वरस्यापि व्यापकस्य हृद्युपलक्षितरूपे परिच्छेदो न किंचिदल्पहृदि व्यापत्नेन तथोक्तिरित्यर्थः।
ननु कथमिति हृदयमेव प्रायेणोच्यते तत्राह। तत्रेति। हृदये परमात्मनो बुद्धिवृत्तिर्वा हि
कोपलब्धिरिति अतएव ईश्वराभिव्यक्तिस्थानत्वात्तदुक्तिरित्यर्थः। व्योमदृष्टान्तालिङ्गेन लौकेल
तादिकानि छिद्राणीत्याह। तत्र यदा शंक्यत इत्यादिना। भिन्नाय तत्र न त्वेऽपि व्योम्नः सर्वसम्बद्ध
घटनाबद्धिति भावः। अल्पत्वेनोहार्दत्वे निष्कल्पत्वोपन्तलेऽपि च इवायं हार्द इत्याप्यत इति शंकां व्या
चष्टे। व्योमवदिति। अल्पत्वेनोक्तस्यान्तु हार्दस्येश्वरतिच्चेत्तन्न त्वात् जीवो वा भिन्नतावर्जीव
वद्धृत्युक्तं निरस्यति। न वैशेष्यादिति। धर्माधर्मवत्त्वमुपाधिरित्यर्थः। अयमेव विरो
धो वैशेष्यं स्यात्त्वेव अप्रत्ययः विरोधस्यातिरायार्थो वा धर्मादेः स्वाश्रये फलहेतुसम

कृष्ण
५८

भतिप्रायः ॥ तस्मादिति ॥ सूत्रार्थः ॥ किंच विभुत्वोवहतय आत्मन इत्यादिनामेकस्मिन्नु देहे सर्वात्मनां
भोक्तृत्वप्रसंगः स्वकर्मार्जित एव देहे भोग इति परिहारश्च तुल्य इति न वयं पर्यनुयोज्या इत्याह ॥
सर्वगतेति । वस्तुतस्तु बौ मे [illegible] भोगार्थं मिति सूत्रे वक्ष्यते ब्रह्मणो जीवाभिन्नत्वं श्रुतौ नि-
श्चितं तेन भोक्तृत्वानुमाने उपजीव्यश्रुतिबाधमाह । यथा सावयवत्वमिति । आत्मैकत्वमेवागं
[illegible] स्वावभासाः कामयते नो [illegible] नीलितो यम [illegible] तीन्यायः सचात्र न युक्तः न ह्यत्र दमं
गीकृत भोक्तृत्वं संसारित्वं युक्तं श्रुत्या भेदसिद्ध्यर्थं भोक्तृत्वकारणात् इत्याह । तत्रैवेति । न
न्वेकत्वं यथा श्रुत्या नास्ति तर्हि तेनोपजीव्यबाधः स्यात् किं तु सदुत्त्यागः इत्याह तथा [illegible] वि-
बप्रतिबिंबयोः कल्पितभेदेन भोक्तृत्वाभोक्तृत्वव्यवस्थोपपत्तेरप्रयोजको हेतुरित्याह
अथागृहीतमित्यादिना ॥ कल्पितांशे गिलमधिष्ठानस्यैव सो [illegible] मित्यस्मिन्नर्थे विस्तरं पा
तयति । तदाहेति । ब्रह्मणो [illegible] बाध्यबाधकभावात् शांडिल्यविद्यावाक्यं ब्रह्मण्युपास्ये स
मन्वितमिति सिद्धं । अत्ता चराचरग्रहणात् । यस्य ब्रह्म च क्षत्रं चादि जगदोदनो मृत्युः सर्व
प्राणिमारको पि यस्योपसेचनं ओदनसंस्कारक [illegible] तत्राप्येता यत्र भुंक्ते चित्तमात्रे पेद
कल्पनया वर्तते तद्ब्रह्म इत्था इदं इत्थं सर्वस्याप्यधिष्ठानभूतं को वेद चिन्तमुख्या ध्रुपायं
विना को पि न नानातीत संदेहः । संशयबीजमाह । विविधेति । तत्रमाग्नि प्रश्न हीत नेः पे यत्रे तौ चि
किलेति जीवस्य अन्यत्र धर्मादिति ब्रह्मणः प्रश्नः लोकादिमग्निं तमुवाचेत्यग्नेः हंत

मु

वि

तदिदं प्रवक्ष्यामीति नरयोः प्रतिवचनमुपलभ्यते इत्यर्थः। पूर्वत्र ब्रह्मणो ज्योतिष्ट्वं नास्तीति लिङ्गेन तदुप
जीव्यपूर्वपक्षयति। किं तावदिति। अग्निप्रकरणमतीतमित्युक्त्वेत्याह। जीवोऽयेति। पूर्वपक्षे
ओदनो पासितः सिद्धान्ते विधिविशेषभ्रमस्थानमिति भेदः ओदनशब्दो भोग्यवाचीति पूर्वप
क्षः सिद्धान्तस्तु ब्रह्मक्षत्रशब्दैरुपलक्षितस्यापि तत्कार्यमात्रे गौणः ओदनशब्दः गुणश्चात्र म
त्यूपसेचनपदेन सन्निधापितं प्रसिद्धोदनगतं विनाश्यत्वं गम्यते गौणशब्दस्य सन्निहि
तगुणग्राहित्वात् तथा च सर्वस्य विनाश्यत्वेनश्वरानां ब्रह्मादीश्वरेत्ते सात्। नैष दोष
इति। तस्य सन्निहितत्वादिति। पिपीलिकस्याङ्गुलीयको गृहस्यपूर्वोक्तस्यादित्यर्थः। अत्र कठ ति
वाक्यानन्तरं वाक्यस्यापि ज्ञेयान्यपि समन्वयमाह। ऋतमिति। ऋतमवश्यंभावि कर्म
फलं पिबन्तौ भुञ्जानौ सुकृतस्य कर्मणो लोके कार्ये देहे परस्य ब्रह्मणोऽर्द्धस्थानमर्ह
तीति परार्द्धं हृदये परमे श्रेष्ठं तस्मिन् याग्रहान्तर्भो रूपा बुद्धिरूपा गुहा तां प्रविष्टौ स्थि
तौ छायातपवत् भिन्नौ विरुद्धौ तौ च ब्रह्मविदः कर्मिणश्च वदन्ति त्रिणाचिकेता नि
श्चितौ ये च त्रिणाचिकेताः ते पि वदन्तीत्यर्थः नाचिकेतयागस्य नामध्ययनं तदर्थ
ज्ञानं तदनुष्ठानं चेति त्रित्वं बोध्यं। बुद्ध्यवच्छिन्नजीवस्य परमात्मनश्च प्रकृतत्वात् संश
यमाह। तत्रेति। पूर्वोत्तरपक्षयोः फलं स्वयमेवाह। यदीत्यादिना। तदपि जीवस्य बु
द्धिचेतन्यमपीत्यर्थः मनुष्येष्वेते मते ऋतमिति येयं प्रेते विचिकित्सा संशयः परलोक

भो कृ भास्ती तेकेना स्तीत्यन्ये। अलक्ष्ये यो पदिष्टो हमेलदा समलत्वं जानी मामित्यर्थः। तद्पीति
परमात्मस्वरूपमपीत्यर्थः ५ अन्यो ७ नो-त्कला पो गो न संशयमाक्षिपति। अत्राहेति। छत्रि
पदेन गं तार इव पिबत्पदेनाज हल्लक्षणया प्राधिष्ठा कुर्यतेदृत्याह। अत्रोच्यत इति। पान
कर्तृवाचिपदेन पानानुकूलो वा लक्ष्यो इत्याह। यद्वेति। नियत पूर्वक्षत्रयि कृतिमत्वरू
पमनुकूलत्वं कर्तृकारयित्रोः साधारणं यः कारयतीति स्वकृतो से वेतिन्यायादिति भा
वः। अत्र प्रकृतिर्मुख्यार्था तात्रु प्रत्यये लक्षणा मिश्रा त्त्व कृतिः प्रत्ययार्थो मुख्यः प्रकृ
तो त्यजत्लक्षणयापामनं लक्ष्यमित्याहुः पूर्वपक्षे पिबंतावितिकर्तृवाचिशत्प्र
त्ययेन बुद्धिजीवसाधारणं कारकत्वं लक्ष्यमित्याह। बुद्धीति। एवं चांत्ति कृष्ठानि पचंती
त्याख्यातेन कारकत्वं लक्ष्यं प्रकृतिस्तु मुख्यैवेति भावः। मुख्यपाता रो प्रसिद्ध पाते
गौणग्राह्यादित्यत आह नचेति। अत्र छत्रपदस्य सन्निहितमनुसुपदात् अनित्यस्व
स्तुपरत्व वद्गृहादि पिबत्पदस्य सन्निहितगृहापदात बुद्धि जीवपरत्वेति दृष्टांते
न पूर्वपक्षयति। किं तावदिति। नेन्चरः फलं। एकस्मिन्न जातिमति कृते सजाती
यमेव द्वितीयं ग्राह्यं व्यक्तिमात्रग्रहे लाघवात् न विजातीयं जातिमत्त्वस्वरूपपरु
त्पना गौरवात् न च वस्तु कारकत्वेन सजातीया बुद्धिदेव जीवस्य द्वितीयेति वाच्यं चेत
न सत्त्वं जीवस्य मायस्य कारकत्वात् अंतरंगत्वात् तथा च लोके द्वितीयस्यांतरं

गजातिमत्त्वदर्शनात् जीवस्याद्वितीयश्चेतन एवेति स्फुटार्थमाह । संख्याश्रवणे चेति । गुहायां बुद्धौ
स्थितं गह्वरेऽनेकानर्थसंकुले देहे स्थितं पुराणमनादिपुरुषं विदित्वा हर्षशोकौ जहातीति
परमेश्वरे ष्ठे व्योमन् हार्दाकाशे या गुहा बुद्धिः तस्यां निहितं ब्रह्म यो वेद सोऽश्नुते सर्वा
न्कामानित्यन्वयः । अन्विष्य विचार्येत्यर्थः । विशेषणं गन्तृगन्तव्यत्वादिलिङ्गमाह
विशेषणाच्चेति । सः जीवोऽध्वनः संसारमार्गस्य परमं पारं किं तत् विष्णोः व्यापनशील
स्य परमात्मनः पदं स्वरूपमाप्नोतीत्यर्थः । दुर्दर्शं दुर्ज्ञानं तत्र हेतुः गूढं मायावृतं माया
नुप्रविष्टं पश्चात् गुहाहितं गुहाद्वारा गह्वरेष्ठं एवं बहिरागतं मात्मानमध्यात्मयोगः स्थू
लसूक्ष्मकारणदेहलयक्रमेण प्रत्यगात्मनि चित्तसमाधानं तेनाधिगमो महावाक्य
जावृत्तिः तयाविदित्वेत्यर्थः । ऋतपानमन्त्रे जीवानुवादेन वाक्यार्थज्ञानाय तत्प
दार्थौ ब्रह्म प्रतिपाद्यते इत्युपसंहरति । तस्मादिहेति । उक्तन्यायमतिदिशति । एष
इति । द्वावेवात्र स्तो द्विवचनस्याकारः सुपर्णाविव सहैव युज्येते नियम्यनियाम
कभावेनेति । सख्यतो सखायौ चेतनत्वेन तुल्यस्वभावौ समानं एकं वृक्षं छेदन
योग्यं शरीरमाश्रित्य स्थितावित्यर्थः । गुहां प्रविष्टावितिवाक्यवत् एतावात्मानौ त
ल्लिङ्गदर्शनादित्याह तयोरन्य इति । विशेषणाच्चेत्याह । अन्तरे चेति । अनिशया

नं

कठ.
५८

116

स्वस्वेश्वरत्वाप्रतीत्या देहे निमग्नः पुरुषो जीवः शोचति निमग्नपदार्थमाह मुह्यमान इति। नरो ह्यमि
ति भ्रान्त इत्यर्थः। जुष्टं ध्यानादिना सेवितं यदा ध्यानपरिपाकदशायां ईशमन्यं विशिष्टरूपाद्भि
न्नं शोधिततच्चिन्मात्रं प्रत्यक्त्वेन पश्यति तदास्य महिमानं स्वरूपमिति ज्ञानी जीवः। ततो वीत
शोको भवतीत्यर्थः। द्वासुपर्णेति वाक्यं जीवेश्वरपरं कृत्वा चिंतितं। अधुना कृत्वा चिंता
मुद्घाटयति अपर इति। अन्यथा बुद्धिविलक्षणत्वं पदलक्ष्यपरत्वेनेत्यर्थः। सत्त्वं बुद्धिः
शरीरे सत्त्वसंज्ञ इति। बुद्धिजीवौ चेत् एवं पक्षार्थः स्यादित्यत आह। नापीति। पूर्वपक्षा
र्थस्तदा स्यात् यद्यत्र बुद्धिभिन्नः संसारी प्रतिपाद्येत न ह्यत्र संसारी विवक्ष्यते किं तर्हि
धितत्वस्य मर्त्यो ब्रह्मेत्यर्थः। श्रुतिस्मृतीति। पश्चाद्यथार्थो मुक्त इत्यनिर्देशः। तावता मंत्रव्याख्या
मात्रेण। एवमेव जीवस्य ब्रह्मत्वोक्त्यैव। नहि जीवो बुद्धिभिन्न इति विवेकमात्रेणोपसंहारो युक्तः
भेदस्तावन्नस्य भ्रान्तिरद्वैतमात्रेति भावः। अविद्याविदुषि बिंबमपि स्वरूपं कर्मैना यत्सत्वेन सं
पादयति ह्यनाग्निनास्त्यस्या एवं दग्धत्वादित्यर्थः। अविद्यानाग्नाच्छतीतिवार्थः जीवस्य ब्र
ह्मत्वपरमिदं वाक्यमिति पक्षे संगृते। कथमिति। बुद्धेः जीवत्वोक्तौ भ्रान्तत्वपर्यालोचनात् यत्र युक्ति
चिंतया मनः स्वैरिणी यन्मिषादाह गुच्यत इति। तदेवं ब्रह्मत्वबोधार्थं भोक्तृसमुपाधि
मत्त्ववृक्षे निक्षिपतीत्यर्थः वस्तुतो जीवस्याभोक्तृत्वे भोक्तृत्वसंभवः कथमित्यत आह इदं
हीति। चिन्मात्रात्म्येन कल्पिता बुद्धिः सुखादिरूपेण परिणमते बुद्धौ विवेकाचितात्मनः

ग.भा.टि.टा.

५१

वृत्ति

सुखादिरूपं न्यक्कृत्य चैतन्यवत्त्वं स्तो न कर्तृत्वं भातीत्यर्थः ।। २ ।। तौ च समानविषयत्वेन यस्तु तद्वत्समत्रमानमा
ह । तथा चेति । यत्राविद्याकाले चैतन्यं भिन्नमिव भवति तदा द्रष्टृत्वादि कृत्वं वस्तुनि ज्ञाते इ
त्यर्थः । तस्माद्धृतं पिबन्तौ विलिनावस्यमेव गुहाधिकरणविषय इति सिद्धं तं । अन्तर उपपत्तेः ।
(य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति) इपकोस
लविद्यावाक्यमुदाहरति । य इति । तदक्षिस्थानमग्निलेन श्रवणेन रूपं यतो ष्विक्र
क्षिपि स वर्त्मनी पक्ष्मणी एव गच्छतीत्यर्थः । दर्शनस्य लोके विकल्पेन वा स्त्रीयत्वात् अंत्ये राप
मा ह तत्रेति । पूर्वत्र पिबन्ताविति प्रथमश्रुतचेतनत्वानुसारेण चरमश्रुतौ गुहाप्रवे
शादयो नीताः तद्वदिहापि दृश्यत इति चाक्षुषत्वानुसारेणामृतत्वादयो योजनार्थं कल्पि
ताः सन्ननेयाति दृष्टान्तेन पूर्वपक्षयति । छायात्मेति । पूर्वपक्षे प्रतिबिंबोपास्तिः सि
द्धान्ते ब्रह्मोपास्तिरिति फलं । प्रसिद्धवदिति । चाक्षुषत्वेनेत्यर्थः ।। संभावनामात्रेण प
क्षान्तरमाह । विज्ञानात्मन इत्यादिना । मनो ब्रह्मेतिवत् एतद्ब्रह्मेतीति वाक्यस्येति
पदार्थस्वरूपत्वात् न स्वार्थपरत्वमिति पूर्वपक्षः । मनो ब्रह्मेत्युपासीतेत्यत्र इति पदस्य
प्रसमयपरत्वात् । इतश्च ब्रह्मेत्यस्य वाक्ये सन्वयेन इति पदस्याक्षिसंबंधिनोऽर्थपर
त्वोद्वेषप्य मिति सिद्धान्तयति । परमेश्वर एवेति । बहुप्रमाणसंवादस्तास्समर्थनुग्नात्कृ
इति न्यायानुगृहीताभ्यां मामम ब्रह्मश्रुतिभ्यां दृश्यत्वलिंगं बाध्यमित्याह । स्य म वामेति

५

५

वामानि कर्मफलान्येतं मक्षिपुरुषमभिलक्ष्य संयन्ति। इत्यस्य अर्थे ते सर्वफलोदयहेतुरित्यर्थः।
लोकानां फलदातापरमेवेत्याह। वामनीरिति। नयति फलानि लोकानां प्रापयतीत्यर्थः।
भामानि भानानि नयत्येष भित्याह। भामिनीरिति। सर्वार्थप्रकाशक इत्यर्थः। स्थानं नाम
रूपाद्याणां ध्यानार्थं स्थेत्तदेकपदेशादक्षिस्थानं नोक्तिरत्र न दोष इति सूत्रयोजना
ज्ञानवकृद्धिः अकृत्स्नकल्पना तदा अवेद्य यत्रे यन्निर्दिष्टं भवेत्। नन्वनुचितत्वात् इत्यो
क्तिरत्र समाधानमित्याशंक्य पूर्वोक्तिमाह। निर्गुणमपीति। प्रकरणादपि ब्रह्मलिंगत्वाच्चेत्यभिप्रा
हा सुखविशिष्टेति। ध्यानार्थं विदकल्पनया सुखगुणविशिष्टस्य ब्रह्मणः प्रकृतस्य
यत एष इति सर्वनाम्नाक्षिध्यानादेतक्षरः परमात्मा इति संबन्धार्थः ननु प्रकरणात्बले
न इत्यपसलिंगोन्नोपस्थापितः घ्नामात्मा सर्वनामार्थ इत्यत आह। आचार्यस्त्विति।
उपकोसलो नाम कश्चिद्ब्रह्मचारी जाबालस्याचार्यस्याग्नीन् द्वादशवत्सरान् परि
चचार तमनुपदिश्य देशांतरगते जाबाले गार्हपत्याद्यग्निभिर्दयया प्राणो ब्रह्मेत्यस्मै
विद्यामुपदिश्योक्तं आचार्यस्त्विति। तवास्मद्विद्याफलायाप्रत्ययमार्गमर्चिरादिकं वदिष्य
तीत्यर्थः पश्चादाचार्येणागतस्तस्मा अक्षिणीस्थो अर्चिरादिकागतिरुक्ता। तथा चानि
रूक्तात्मविद्याया अस्य गतिवाक्येनैकवाक्यता वाक्यस्थाच सर्वनाम्ना प्रकृता
त्मग्रहे निर्वहतीत्येकवाक्यता निर्वाहकं प्रकरणं वाक्यभेदकमाद्ब्रह्मलिंगाद्बलवदिति भावः

वः। श्रुतिं व्याचष्टे। उच्यत इति। प्राणः सूत्रात्मा श्रुतत्वात् श्रेष्ठेति यत् तत् ज्ञानामित्युक्ते विषयत्वे
त्वं च भूतानां कारणं श्रेष्ठत्वेन ज्ञातं न शक्नोमीत्यर्थः। एवंभूतं यत्कं तदेव वरत्वमिति सत्त्वेन वि
शेषितस्य स्वस्य भूतत्वनिरासः तथा कथंभूतं यत्त्वं तदेव ब्रूमीति विमुखेन विशेषितस्य वि
शेषितस्य स्वस्य भूतत्वनिरासः। तत्र स्वमित्यादिना। आत्मविद्येति श्रुतिविरोधा
स्य जन्यत्वनिरास इति व्यतिरेकमुखेनाह। तत्र स्वमित्यादिना। आमयो दोषः साधनपार तंत्र्यानि
त्यप्रतीपूध्यानमात्रो निष्ठमिति भावः। सामय इति। आमयो दोषः साधनपारतंत्र्यादिरिति।
सत्वादिः तत्सहितं तदित्यर्थः। प्रत्येकग्रहणे दोषमुक्त्वा द्वयोर्ग्रहणे फलितमाह। इतरेतरेति
विरोधितार्थकाविह इत्यर्थः। नन्वेवं श्रेष्ठे नात्र ध्येयं चेत् श्रेष्ठपदात् तरं किमर्थमित्यत आ
ह। तत्रेति। विशेषणत्वेन स्वस्य भूतत्वव्यावर्तकत्वेनेत्यर्थः। श्रेष्ठशब्दः निरोपायोस्त
त्यमिति विग्रहः। अध्येयत्वे कोदोषस्तत्राह। इष्टेति। मार्गोऽन्त्यासगुणविद्या साव
गमादिति भावः। आत्मविद्यापदेनोपसंहारादपि प्रकृतं श्रेष्ठत्वमाह। सेव सेवं चेति। ए
थिव्यग्निरन्नमादित्य इति मम चतस्रस्तनवो विप्रकृतिरिति गार्हपत्य उपदिदेश। आ
पो दिशो नक्षत्राणि चन्द्रमा इति अन्वाहार्यपचन उवाच। प्राणआकाशो द्यौर्विद्यु
दिति स्वमहिमानमाहवनीयो जगादेति भावः। अद्य यमस्माकमग्नीनां विद्या प्रत्येक
मुक्ता आत्मविद्या तु पूर्वमस्माभिर्निर्दिष्टा प्राणो ब्रह्मेत्युक्तेत्यर्थः। उच्यतामग्निभि
श्रेष्ठच्छायां त्मोपरणोच्यतां वक्तुमित्यादिति तत्रोक्त। आचार्यस्त्विति। एवमुक्तवत्स्वग्नी

निश्चयपाद्यस्त्वेदेपि नार्थ्यन्वेद इत्यर्थः। श्रुता अनुष्ठिता उपनिषद् उक्तं सगुणब्रह्मोपासनं येन तस्य या ग
तिः श्रुतौ स्मृतौ च प्रसिद्धा तस्या अनभिधानात् लिंगादितिसूत्रार्थमाह। इतश्चेति। यस्मादस्य
ते तत्र स्मादिहेसन्वयः। श्रुतिमाह। अथेति। देहपातानन्तरमित्यर्थः। स्वधर्मैस्तपस्तपो ब्रह्मच
र्यश्रद्धा विद्यादिभिः आत्मानं ध्यात्वा तया ध्यानविद्यया उत्तरं देवयानमार्गं प्राप्य तेनोत्तरेण
पथा आदित्यद्वारा सगुणब्रह्मस्थानं गच्छति एतद्वै ब्रह्म प्राणानां व्याप्तिसमष्टिरूपाणामा
यतनं लिंगात्मकं हिरण्यगर्भरूपं वस्तु तस्यैतदमृतं नाशिरूपं निर्गुणं सर्वाधिष्ठानं अतः प्रा
र्यं ब्रह्म प्राप्य तस्य स्वरूपं निर्गुणं तत्त्वो मुच्यत इत्यर्थः। अग्निरेव ज्योतिर्देवता एवमहराद्या
देवता एव तस्मात्तौ तक्रतोः। अथास्मिन्नुपासके मृते सति यदि पुत्रादयः शव्यं शावसंस्कारादिकं कु
र्वन्ति यदि च न कुर्वन्ति उभयथा यथाप्युपासका मतिमान्यार्चिरादिदेवान् क्रमेण गच्छति। अर्चिषमभि
ग्निं ततोऽहरन्हः शुक्लपक्षं ततः उत्तरायणं तस्मात्संवत्सरं ततो देवलोकं ततो वायुं वायोरा
दित्यं ततश्चन्द्रं चन्द्राद्विद्युतं तात्वा तत्र विद्युल्लोकस्थितानुपासकानमानवः पुरुषो ब्र
ह्मलोकादागास कार्यं ब्रह्मलोकं प्रापयति एषोऽर्चिरादिक्रमैर्दैवैर्विशिष्टो देवपथः गन्तव्येन
ब्रह्मणा योगाद् ब्रह्मपथश्च एतेन कार्यं ब्रह्म प्रतिपद्यमाना उपासका इमं मानवं मनोः स
र्गमावर्तं जन्ममरणं पुनः पुनः नावर्तन्ते नागच्छन्तीत्यर्थः। चक्षुरसीदतीति उपमा घटती
त्यर्थः। अनवस्थितस्योपास्यत्वं सदा न सिध्यतीति भावः। किं चान्यवधानात् स्वाक्षिस्थ
उपास्यो न च तस्य स्वचक्षुषा दर्शनं संभवतीत्याह यत्एषा इति। अस्तु तर्हि परेण द्रष्ट

मानस्योपास्तिरित्यत आह। नचेति। कल्पनागौरवादित्यर्थः। युक्तिसिद्धा न बाधिष्यत इत्यत आह। अ
स्येति। छायाकूटस्थबिंबस्य नाशमदर्शनेऽनुपलब्धेश्च छायासी न स्यादित्यर्थः। जीवं निरस्यति।
तचेति। जीवसंघातस्य पादमित्सावि शेषेणाजीवस्याधिष्ठातृत्वस्यैव दृष्टान्तमिति सहकारिमित्य
र्थः। दृष्टत्वादिति। स्मृतावितिश्लोकः। नन्वचक्षुरोः सूर्योऽन्तर्यामी यतः सूर्यो सतमेतीति वाक्यं। अमरादि
वाक्येति। प्रसिद्धिव्यापितामिसाशंक्याह। अमरत्वमपीति। जीवात्मनेन [illegible] स्यादीश्वरादीनामपि
त्वतिरिक्तेः इत्थं स्वस्वकार्यं कुरुतः। इकारपेक्ष्यया पंचमोक्तः समा [illegible] निवृत्तेर्यान
तीत्यर्थः। ईश्वरपक्षे हेत्वन्तरं संपूर्णं तत्राह। अभिमानिनीति। दर्शनमनुभवः। तत्स्वरात्रे [illegible]
शास्त्रमेव कारणं कल्प्यं स्त्रिद्धिमानीत्। तथा च शास्त्रकारणको विद्वदनुभवोपासनात् [illegible] इत्युपत
इत्यर्थः। तस्माद्रूपक्रोतन विधावा [illegible] त्वेव प्रमाणित्वमन्वितमिति सिद्धं। अंतर्यामीत्यादि
दिष्टतद्धर्मव्यपदेशात्। इतरदारण्यकं वाक्यमुदाहरति। यईति। अंतर्यामिब्राह्मणे प्रतीय
मानार्थमाह अत्रेति। यः पृथिव्यामित्यादिना देवताः पृथिव्याद्याः अधिष्ठित्य [illegible]
ते। तथा यः सर्वेषु लोकेषु तिष्ठति अधिलोकं। यः सर्वेषु वेदेषु तिष्ठन्नधिवेदं। यः सर्वेषु यज्ञेषु तिष्ठन्निति अ
धियज्ञं यः सर्वेषु भूतेषु तिष्ठन्नधिभूतं। यः प्राणेति [illegible] आत्मनि संतमध्यात्मं चेति
विभागः। अशरीरस्य नियंतृत्वासंभवात् [illegible] संशयः। पूर्वपक्षे [illegible]
[illegible] पृथिव्यादिस्थाननिर्देशो दृष्टान्तत्वात् [illegible]
[illegible] अतः पूर्वपक्षे [illegible] सिद्धान्ते

कुष
उक्तः तस्य दृष्टान्त २
६

प्रसक्तमुक्तत्वान्नेमितिमितिमंतव्यं। स्वयमेवारुचिं वदन् पक्षांतरमाह। अप्यवेति। अभिव्यक्तार्थे प्रलयाभावे नापफ
लस्यवेदार्थस्यायोगादिति भावः। तथा च श्रूयते यस्य देवस्यायतनं शरीरं लोकास्तेडनेनेति लोकश्च
रुद्रस्यैतिः सर्वार्थप्रकाशकं मन इत्यर्थः। रूपकूमा मदानां तयोर्मिथ्येवया निश्चयादनेकूदेवपक्षोन पुनरुद्द
सरूपेराह। यो मनोवेति। भागेनकसिद्धस्यां तयोर्मिलित्वे असिद्धसर्वधनकल्पनागौरवात्। निरासि
द्ध एको तयोर्मातिासि वातयाति। एवं प्रासङ्गिकं देवतानिरासेहेत्वं तरमाह। यः पृथिवीति। इत्थरोन
नियंता जाः शरीरत्वात् घटवदित्यस्य निरस्यति। नैषदोष इति। नियम्यातिरिक्तशरीरमूल्यत्वेना
हेतुः शरीरत्वेपि त्वेवा आत्मस्वदेहानि तरिजीवेव्यभिचारः। द्वितीयस्यासिद्धः इत्थरस्यस्वा
विद्योपार्जित सर्वसंबंधित्वादिसाह। यान्नियच्छतीति। स शरीरो नियंतेति लोकदृष्टिमनु
सृत्यैतदुक्तं। वस्तुतस्तु चेतनसान्निध्याज्जडस्य व्यापारो नियमनं तच्छक्तिमत्वं तत्त्वं नियंतृ
त्वं तत्राचिंत्यसमायार्थ कूषिदात्मनः शरीरं विनैवोपपन्नं। नन्वदेहानियंतृत्वविरस्यान्योनियं
ता चेत्तस्याप्यन्य इत्यनवस्थेत्यत आह। तस्यापीति। निरंकुशं सर्वनियंतृत्वं इत्थरस्येत्यरूतं
तस्य नियंत्रंतरानुमाने श्रुतिबाध इति नानवस्थेत्यर्थः यद्वा इत्थरा इदरत्वेन यामी नवस्थानि
यंतृत्वोके सत्यपरे भावात् नानवस्थेत्यर्थः। प्रधानं महदादिक्रमेण कथं प्रवर्तत इति तद्ध
स्याविषयं रूपादिहीनत्वादिविज्ञेयं सर्वलोदिस्यप्रसुनियं
तिष्ठतीत्वादित्यर्थः। अत तत्त्वप्रधानं चेतनं तस्य चर्मोणा मनिधानादिति हि सर्वथा ह
तरस्त्वं निरस्यारीशमाह। यदि प्रधानमित्यादिना। आत्मतन्त्र्येति। विनासीनोदहा

तत्संभोगानुपपत्तेरित्यर्थः। यथा देवदत्तकर्तृकग्रामगमनक्रियायाः ग्रामः कर्म न देवदत्तस्तथात्मक
र्तृकदर्शनादिक्रियायामात्मा नात्मविषयः न तावत् क्रियायाः कर्तृविषयत्वं योगादित्याह
कर्तरीति। क्रियायां गुणः कर्ता प्रधानं कर्म तत्रैकस्यां क्रियायामेकस्य गुणत्वप्रधान
त्वयोर्विरोधात् न कर्तुः कर्मत्वमित्यर्थः। दृष्टेर्द्रष्टारं आत्मानं तया दृष्ट्या [illegible] स्यान
विषयीकुर्यादित्यादि श्रुतेश्चाह दृष्टेत्यादि धर्मी धारी तस्येत्याह नेति। अपि शब्दसूचितं
[illegible] मुक्तौ कठोक्तं हेतुमाह। अपि च [illegible] ययोरपीति। पत्रे देनेति। सूत्रात्मा तु लिङ्गभेदश्रो
तिं निरस्यति दर्शयत इति। कथमिति। नन्वत्रैकोऽभोक्ता जीवः ईश्वरस्त्वभोक्तेति न विरोध इत्यत आह
ले। का पुनरिति। तयोर्भेदः श्रुतिविरुद्ध इति पूर्ववाद्याह। नान्य इति। स एव शब्दस्यार्थमाह। अत्रे
ति। श्रुतेरर्थान्तरमाशंक्य निषेधति। नियन्त्रन्तरेत्यादिना। न केवलम् प्रसक्तप्रतिषेधः
किं तु विशेषेण दृष्टेतरनिषेधश्च श्रुतेरन्तर्यामीतर [illegible] निषेधार्थत्वेबाधश्चेत्याह। अविशेषे
ति। तस्मात्सूत्रे य आत्मनि तिष्ठन्निति श्रुतौ च द्रष्टृत्वेनोक्तिः एवकारान्य इति आत्मभेद
निरासादिति प्राप्ते भेदस्योपाधिकल्पितत्वं श्रुतिसूत्राभ्यां भण्यत इति समाधत्ते अत्रोच्यत इति भे
दः सत्यः किं न स्यादित्यत आह। एकोतीति। गोरवेण [illegible] पीतो चरत्यास्वं [illegible] देशान्तरे चरः तद्गो
चरस्य घटवदनात्मत्वात् अभेदः सत्य इत्यर्थः तत्त्वेति। कल्पितभेदं गीर्वाणो [illegible] दर्पे क्षेत्र सर्वेषु उच्यते

मुंडकवाक्यमुदाहरति। अथेति। कर्मविद्यारूपापरविद्योक्त्यनंतरं यया निर्गुणं ज्ञायते परा सोच्यते तामेव विष
योत्तया निर्दिशति। यत्तदिति। अद्रेश्यं अदृश्यं ज्ञानेंद्रियैः अगम्यं कर्मेंद्रियैः श्रग्राह्यं गोत्रं वंशः वर्णाः ब्राह्मण
त्वादिजातिः चक्षुः श्रोत्रशून्यं अचक्षुःश्रोत्रं पाणिपादशून्यं अपाणिपादं ज्ञानकर्मेंद्रियविकलमित्यर्थः। विभुं प्रभुं सुसूक्ष्मं दुर्ज्ञेयत्वात् नित्यमव्ययपदाभ्यां नाशापक्षययोर्निरासः भूतानां योनिं
प्रकृतिं यत्पश्यंति धीराः पंडिताः तदक्षरं तद्विद्या परेत्यन्वयः। अदृश्यत्वादिगुणानां ब्रह्मप्रधा
नसाधारणत्वात्संशयः। पूर्ववद्द्रष्टृत्वादीनां चेतनधर्माणां अत्राश्रुतेः अस्त्रप्रधानमिति।
प्रत्युदाहरणेन पूर्वपक्षयति तत्रेति। पूर्वपक्षे प्रधानाद्युपास्तिः सिद्धांते निर्गुणधीरिति फ
लं। ऊर्णनाभिर्लूताकीटः तंतून् स्वदेहात्सृजति उपसंहरति चेत्यर्थः। सतो जीवतः ननु पूर्वं
निरस्तं प्रधानं कथमुत्थाप्यते तत्राह अपि चेति। अत्र प्रधाने विरुद्धमामननोऽसंभावितो
वाक्यशेषः श्रुत इति शंकते ननु यदिति। पंचम्या ताक्षरशब्दं प्रकृतप्रकृतेः प्रत्यभिज्ञानात्
प्रथमांतपरत्वाज्ञानं कस्य जगन्निमित्तेश्वरस्य सर्वज्ञत्वादिकमित्याह अत्रोच्यत इति। सं
दिग्धे तद्वाक्यशेषादिति न्यायेन सिद्धांतयति। एवं प्राप्त इति। चेतनाचेतनत्वेन संदिग्धे
भूतयोनेः प्र
भूतयोनेयः सर्वज्ञ इति वाक्यशेषादीश्वरत्वे निर्णय इत्युक्तं वाक्यशेषे भूतयोनेः प्र
त्यभिज्ञापकाभावादिति शंकते। नन्विति। जनिकर्तुः प्रकृतिरिति सूत्रेण प्रकृतेरपा
दानसंज्ञायां पंचमीस्मरणादक्षरात्संभवतीति प्रकृतित्वेनोक्ताक्षरस्य भूतयोने
र्वाक्यशेषे तस्मादिति प्रकृतित्वलिंगेन प्रत्यभिज्ञानमस्तीति समाधत्ते। अत्रोच्य

वहति। एतत्कार्यं ब्रह्म सूक्ष्मात्मकं नामरूपे स्थूलं ततोऽन्नं व्रीह्यादी सर्वं। यदुक्तं पंचम्यन्ताक्षरस्य
स्या भूतयोनेः प्रसिद्धिरिति नादचेतनत्वमिति तत्राह अक्षरात्परतः पर इति। नायमक्षरशब्दो भू
तयोनिं परामृशति परविद्याधिगम्यत्वेनोक्तस्याक्षरस्य भूतयोनेरक्षरं पुरुषं वेद स
क्षरस्य सापेक्षत्वे लिंगावसायपूर्वमेव ब्रह्मत्वेन परामर्शादित्याह। येनेति। येन ज्ञाने
नाक्षरं भूतयोनिं सर्वज्ञं पुरुषं वेदतो ब्रह्मविद्यां योग्याय शिष्याय प्रब्रूयादित्युप
क्रम्य प्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः पर इत्यभिमानः परो भूतयोनिरिति गम्य
ते इत्यर्थः। नहि पंचम्यन्ताक्षरशब्दार्थः पूर्वसारी क्याततानमिति वक्ष्यत इत्याह पू
र्वमिति। परविद्येति समाख्यापि तद्विषयस्य ब्रह्मत्वमित्याह। अपि चेति। ननु प्र
धानविद्यापि कारणविषयत्वात्परेत्यत आह। परापरविभागो हीति। अनित्यफ
लत्वेन। परविद्यानिंदित्वा मुक्त्यर्थिने ब्रह्मविद्यां प्रोवाचेति वाक्यशेषोक्तेरित्यर्थः
अस्तु प्रधानविद्यापि मुक्तिफलत्वेन परेत्यत आह। नचेति। ननु यः सर्वज्ञ इत्यपर
विद्याविषय उच्यते। अन्ड्रेस्य वाक्येन तु प्रधानविद्योच्यत इत्यत आह। लिंगस्येति।
इतश्च भूतयोनेर्ब्रह्मत्वमित्याह। कस्मिन्निति। अचेतनमात्रस्यैकापनं इपादा
नं तद्धानात्कार्यज्ञानेऽपि तदेकार्पणामात्मनो ज्ञानेन भवति। एवं जीवे ज्ञाते त
त्कार्यस्याभोग्यस्य ज्ञानेन भवतीत्यर्थः। ब्रह्मविद्याशब्दाच्च भूतयोनिर्ब्रह्मेत्या
ह। आत्मिन्नेति। स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामाहेति भूमिं ब्रह्मविद्याम्

श्चा च। ब्रह्मणि सर्ववेद्यानां विद्याफलानां चांतर्भावात् ब्रह्मविद्या सर्वविद्याप्रतिष्ठा। नन्वपरावि
द्यापरप्रकरणे किमर्थमुक्तेत्यत आह। अपरेति। प्लवंते गच्छंतीति प्लवाः विनाशिनः अदृढाः
नित्यफलस्य पादनाशक्ताः षोडशर्त्विजः पत्नीयजमानश्चेत्यष्टादश। यज्ञेन नाम निमित्तेन
निरूप्यंत इति यज्ञरूपाः तथाहि ऋतुषु यजयंतीति यष्टं कारयंतीति ऋत्विजः यजत इति
यजमानः। पत्युर्नो यज्ञसंयोगे इति सूत्रेण पतिशब्दस्य नकारो तादेशो यज्ञसंबंधे विहित
इति पत्नी। एवमृत्विगादि नामप्रवृत्तिनिमित्तं यज्ञ इति यज्ञरूपाः येषु अवरं आनित्यफ
लं कं कर्म श्रुत्युक्तं एतदेव कर्म श्रेयो नान्यदात्मज्ञानमिति ये मूढास्तुष्यंति ते पुनः पुन
र्जन्ममरणमाप्नुवंतीत्यर्थः। तद्विज्ञानार्थं ब्रह्मज्ञानार्थं गुरुमभिगच्छेदेवेति नियमः ब्रह्म
निष्ठस्यापि अनधीतवेदस्य गुरुत्वं वारयति। श्रोत्रियमिति। कार्यमुपादानाभिन्नमि
ति दृष्टांतः सर्वसाम्ये न वाच्यानिष्टापत्तेरित्याह। अपि च स्थूलाद्धीति। विशेषणा
न्तरेण विभेदकेन प्रधानमिति हेतुद्वयं विपक्षे व्याचष्टे। विशिनष्टि हीत्यादिना। दि
व्यो द्योतनात्मकः स्वयंज्योतिरमूर्तः पूर्णः पुरुषः पुरिशयः प्रत्यगात्मा। बाह्यं स्थूलं
आभ्यंतरं सकारणं सूक्ष्मं ताभ्यां सह अधिष्ठानत्वेन तिष्ठतीति सबाह्याभ्यंतरः। कि
त्वाक्प्रकृतिषु प्रसिद्ध इत्यर्थः। अविद्याकृतं नामरूपात्मकं शरीरं तेन परिच्छेदोऽस्त्यस्य तं
तस्य शरीरस्य धर्मान् जात्याद्यमूर्तत्वादीनित्यर्थः। नन्वक्षरशब्देन प्रधानोक्तावश

ग. भा. सि. टी.
६२

कथं प्रधानस्य प्रतिषिद्धत्वं बोध्येत तत्राह। अक्षरमेवाव्याकृतमिति। अश्नोति व्याप्नोति स्वविका-
रजातमित्यक्षरं। अव्याकृतं अकृतं अनादीति यावत्। नामरूपयोर्बीजभूतमीश्वरः तस्य
शक्तिरूपं परतंत्रत्वात् उपादानमपि शक्तिरित्युक्तं। भूतानां सूक्ष्माः संस्काराः यत्र
तद्भूतसूक्ष्मं ईश्वरश्चिन्मात्र आश्रयो यस्य तत्तथा तस्यैव चिन्मात्रस्य जीवेश्वरभेदो-
पाधिपरत्वं। यद्वा ईश्वर आश्रयो विषयो यस्येति नानाजीववादिनो व्याख्यानं तदु-
पबृंहितं। एतस्मिन्नु खल्वक्षरे आकाश ओतश्च प्रोतश्चेति ओतप्रोतभावेनाव्याकृ-
तस्य चिदाश्रयत्वमुच्यते। आश्रयपदलक्षणायाः निर्मूलत्वात्। पूर्णमूलप्रकृतेर्भे-
दे किंचिन्मानं नास्ति। न चेन्द्रो मायाभिरिति श्रुतिर्मानं। अजामेकामिति सिद्धानेकश्रु-
तिबलेन न लाघवतर्कसहायेन तस्याः श्रुतेर्बुद्धिभेदेन मायाभेदानुवादित्वात्। तदुक्तं
सुरेश्वराचार्यैः स्यत तस्व विद्याभेदोऽत्र मनागपि न घटत इति। सर्वज्ञो गायायाः पुरा-
णेतिहासकर्तारश्च मूलप्रकृत्यैक्यं वदंति। नन्वविद्यैक्ये बंधमुक्तिव्यवस्था कथं
न च व्यवस्था नास्तीति वाच्यं। श्रवणप्रवृत्त्यादिबाधापातादिति चेदुच्यते
येऽपि पिपासानाशानास्मिन् घ्नंतीति तैरपि परिणामित्वेन संसारमविद्यायामंगीकार्यं तथा
चानर्थालकस्यापसंघातात्मना परिणताविद्यांशोपाधितज्जीवभेदाद्व्यवस्थासि-
ध्यति। यस्य ज्ञानमंतःकरणेऽत्पद्यते तस्यांतःकरणपरिणामरूपज्ञानेन ज्ञानाशो मुक्तिरि

लि। एवं च श्रोतुः स्वरूपानंदप्राप्तिः श्रवणादौ प्रवृत्तिर्विद्वदनुभवो जीवन्मुक्तिश्शास्त्रं चेति सर्वमि
बाधितं भवति। न चैवं नानाजीवपक्षादविशेषः। मूलप्रकृतिनानात्वाभावादित्यलं॥ पर
वो हेतुः अविकार इति। ननु सूत्रकृताऽश्रुतौ प्रधानाद्युद्व्यपदेशादुक्तस्तत्र कथमहानाद्युदो
क्तौ व्याख्याय तत्राह। नात्रेति। कर्मात्मिनापवीयत इति प्रधानं भवतानमेव तत्तो न्यस्य
अप्रामाणिकत्वादित्यर्थः। अतोऽस्तानमेव भूतयोनिरिति पूर्वपक्षं कृत्वा निरस्यते तत
निरासेनार्थात्सांख्यकल्पितप्रधाननिरास इति मन्तव्यं। यत्तिकृन्मतेनादौ सूत्रं व्याच
ष्टे। अपिचेत्यादिना। प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवीति श्रुतिः
अग्निर्मूर्द्धेत्युक्तः असौ वाव लोको गौतमाग्निरिति श्रुतेः। निवृत्ताः वेदाः यागि सम्बन्धः प
ख्यापादावित्यर्थः। यस्येदं रूपं स एष सर्वप्राणिनामन्तरात्मेत्यर्थः। ननु मांहि मा इति भा
ष्यरात्केरित्यर्थः। यथाकृस्थित श्रुत्यापित स्वस्य सर्वात्मत्वं प्रकृतनार्थ महम न्वमितिसा
मगायति न लम्बेत्सादिकं नात्मनो विवक्षति। अफलत्वात् तथेतापीत्याह। आह मन्त्रे
मिति। यत्तिरुद्धाख्यां दूषयति। अन्ये पुनरिति। एष सर्वभूतान्तरात्मा सूत्रात्मा एत
स्माज्जायते प्राण इति श्रुत्यन्तरेण हिरण्यगर्भस्यात्र जायमानत्वेनोपन्यासादित्य
र्थः। निरदिक्षत अनेनोच्चादित्यर्थः। अग्निर्मूर्द्धेत्युक्तः यस्य समिधः सूर्यः सोऽपि द्युलोक
निस्तस्मात् जायते स यः तस्यादित्य एव समिदिति श्रुत्यन्तरात्। अतो मध्ये विसदिरे
व बान्यानत्वपमितिभावः। यद्युक्तमग्निर्मूर्द्धेत्यत्र भूतयोनेः सर्वात्मत्वं विवक्षित

मितितन्त्रेणाह। सर्वमिदं समपीति। न तु हिरण्यगर्भस्य जन्मान्यत्रानुक्तं कथमत्र वक्तव्ये तत्रा
ह। श्रूयतीति। अग्रे समवर्तत जातः स न भूतस्य पतिरीश्वर प्रस्तावाद्दूरस्थ च तु सह
त्रात्मा धारयामि मां पृथिवीं च स्थूलं सर्वं मे धारयत्। कस्मै कस्य प्रजापतिसंज्ञत्वे सर्वनाम
त्वाभावेन स्यादित्यतो गादेकारलोपेन कस्मै देवाय प्राणात्मने हविषा विधेम परिचरे
मेति व्याख्येयं। ऋतम् एको देव इति प्राणेषु तिष्ठते। यदा यस्मादिदं जातं तस्मात् एवमेव
देवायेत्यर्थः। एको देवः सर्वभूतेषु गूढ इति श्रुतेः सङ्गतं। ननु तस्य भूतान्तरात्मत्वे क
थं तत्राह। विकारेति। पूर्वकल्पे प्ररूढो यासनो कर्म समुच्चयानुष्ठानाद्रस्मिन् कल्पे
सर्वप्राणिव्यष्टिलिङ्गानां व्यापकं सर्वप्राणान्तर्गतं ज्ञानकर्मेन्द्रियप्राणात्मकं। समष्टि
लिङ्गशरीरं जायते तद्रूपस्य सूत्रात्मनः सर्वभूतान्तरात्मत्वं युक्तमित्यर्थः। स्वप्नं दृष्ट्वा
चार्थमाह। अस्मिन्नपि पक्ष इति। कर्मफलं श्रौतस्मार्तादिकं तत्पश्चात् पुरुषा एवेति
सर्वान्तरस्य रूपोदन्यालोच्य। भूतयोनौ तयोर्वाक्यं समन्वितमित्यर्थः। वैश्वानरः घ्रा
दोषमूलहरति। कोन इति। प्राचीनशालेत्यस्यार्थं दर्शयन् वृद्धिलोमिति
मीमांसां चक्रुः। कोन आत्मा किं ब्रह्मेति। आत्मैव ब्रह्मेति तापनार्थं पदद्वयं। ते पं
चापि निश्चयार्थं उद्दालकमाजग्मुः। सोपि सम्यङ्न वेदेति तेनोद्दालकेन सह षडपि
अश्वपतिं कैकेयं राजानमागताः सोऽपृच्छत् आत्मानं मिति। अध्यक्षे विस्मरसि तमेव नो
ब्रूहीति। राजा तु तेभ्यस्त्रीति मितालोर्थे तान् प्रत्येकमपृच्छत्। कं त्वमात्मानमुपास्से

इति। तत्र प्राचीनशाल्यादयः। क्रमेण प्रत्येकमूचुः। दिवमेवाहं वैश्वानरं वेद्मि। आदित्यमेवाहं वेद्मि वायुमेव आकाशमेव आप एव पृथिवीमेवाहं वेद्मीति। ततो राजा द्युसूर्यादीनां षण्णां यथाक्रमेण सुतेजस्त्व। विश्वरूपत्व पृथग्वर्त्मात्मत्व बहुलत्व रयित्व प्रतिष्ठात्व गुणानभिप्राय भवं तोय दिमामप द्युसूर्यादिषु भागवतो वैश्वानरस्याङ्गेषु एव प्रत्येकं वैश्वानरत्वदृष्ट्योपासने मूस्तका क्रमेण मूर्द्धपातान्धत्वप्राणोत्क्रमणदेहविशीर्णत्व बस्तिभेद पादशोषाभयतां सूचयति प्रत्येकोपासनं निन्दित्वा सुतेजस्त्वगुणको द्युलोकोऽस्यात्मनो वैश्वानरस्य मूर्धा विश्वरूपत्वगुणकः सूर्योऽस्य चक्षुरित्येवं द्युसूर्यादीनां मूर्धादिभावेन रूपदिश्य समस्तवैश्वानरध्यानविधिरान्नायते। य स्त्वेतमेवं प्रादेशमात्रमभिविमानं तं सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति। आग्निपुरस्त्वेन परोक्षतया विश्वं निर्मीय तेजानाती सर्वविमानः तं सर्वत्र सतदुपास्य। सुतेजाः सुतमिति। आत्मिपुरस्त्वेन परोक्षतया विश्वं निर्मीय तेजानाती स विविमानः। तं सर्वेषु सत दुपास्ये तमिति। आग्निपुरस्त्वेन परोक्ष तया विश्वं भिमीय तेजानाती स विविमानो जीवा इति भेदः सुतेजाः कः सर्वत्र परोऽयं भ्रंशे इह सर्वः। लोकाः भूरादयो भूतानि शरीराण्यात्मानो जीवा इति श्रुतेः एषः सर्वपरोऽयं भ्रंशो इह सर्वः। लोका भूरादयो भूतानि शरीराण्यात्मानो जीवा इति श्रुतेः एषः कः सर्वत्र परो यं भ्रं नेह सर्वः। लोका भूरादयो भूतानि शरीराण्यात्मानो जीवा इति श्रुतेः। एष वै सुतेजा आत्मा वैश्वानरः। सुतेजाः विश्वानि रूपाणि अस्य सूर्यस्य एष वै विश्वरूप आत्मा वैश्वानर इति श्रुतेः। कान्तिर्यस्य द्युलोकस्य स सुतेजाः विश्वानि रूपाणि अस्य सूर्यस्य एष वै विश्वरूपः स्य प्राणः बहुलत्वं प्रकृ नानाविधं वर्त्मगमनं आत्मा स्वभावो यस्य वायोः स नाना गतिस्त गुणकः स्य प्राणः बहुलत्वं व्यापित्वं तद्गुण आकाशोऽस्य संदेहो देहमध्यं रयित्वं धनत्वं तद्गुणा आपो यस्य बस्तिमूत्रस्था नं प्रतिष्ठात्वगुणा पृथिवी तस्य पादौ तस्य होमाधारत्वं संपादयति। उरएव वेद्यादिना। पूर्वसुपक्र मस्य हृदयस्य वेद्यादित्वाधारणधर्मस्य वाक्यशेषस्य सर्वत्रात्मादिलिंगेन ब्रह्मनिष्ठत्वमुक्तं। तदद मस्य हृदयस्य वेद्यादित्वाधारण धर्मस्य वाक्यशेषस्य होमाधारत्वलिंगेन जाठरनिष्ठत्व त्वादि उपक्रमस्थत्वाधारण वैश्वानरशब्दस्य वाक्यशेषस्य होमाधारत्वलिंगेन जाठरनिष्ठत्व

मितिलिङ्गे दृष्टान्तेन पूर्वपक्षयति। किं तावदिति आदिना। पूर्वोत्तरपक्षयोः जाठरब्रह्मणोर्ध्यानं फ
लं। यदघतेतदन्नं येन पच्यते सोऽयं पुरुषे शरीरे तत् स्थित इत्यर्थः। पक्षान्तरमाह। अग्निमात्रं
वेति। विश्वस्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चक्रे सूर्यं देवा अकृण्वन् इत्येवं ततः
सूर्योदये दिनव्यवहारादिरित्यर्थः स्याद्वैश्वानर इत्यनुषङ्गः। आहि यस्मात् कं सुखप्रदो भू
वनानां राजा वैश्वानरोऽसि मूर्ध्वा श्रीरस्येति आसि श्रीरीश्वरः तस्मात् तस्य वैश्वानरस्य सु
मतौ वयं स्याम तस्मादस्मद्विषया अनुग्रहमतिरस्त्वित्यर्थः। पक्षत्रयेऽप्यरुचिं वदन् कल्पा
न्तरमाह। आद्येत्यादिना। आत्मा वै वैश्वानर इति श्रुतेरित्यर्थः। केवलं वैश्वानरशब्दमु
न्यस्य। अत्र जाठरो वैश्वानर इति मुख्यः पूर्वः पक्षः प्राणाग्निहोत्रे होमाधारत्वलिंगा
त्। तस्य देहव्यापित्वादात्मत्वं। श्रुतौ द्युमूर्धत्वादिकल्पनया अध्यस्तत्वमिति ध्येयं
सिद्धान्तयति। तत इदमिति। साधारणशब्दो रूपकमस्त्येव विशेषात्। प्रथमश्रुत
मुख्यत्रैलोक्यशरीरलिंगात्। सर्वात्मकेश्वरपरत्वं युक्तं। न च रूपमश्रुतकल्पितं होमा
धारत्वलिंगेन जाठरपरत्वमित्यर्थः। ननु अग्निविशेषस्य कुतो विशेष इत्यत आह। अत्र
हीति। अन्नस्यान्तर्गततः त्रैलोक्यात्मना स्थित इत्यर्थः। जाठरस्यापि ध्यानार्थं विशेष
कल्पनेति चेन्न। असत्कल्पनापत्तेः ईश्वरस्य तद्रूपादानेनाद्विशेषः सत्येव ध्याना
र्थमुख्यतामित्याह। कारणत्वादिति। लिंगान्तराण्याह। स

कृ
६६

132

सर्वेष्वित्यादिना । यथाग्नेः । स्विष्टमिषीकातूलं दहते एवं ह्यस्य विदुष इत्यर्थः । ननु च सर्वात्मो
पेणापि स्तुतिसंभवान्न मूलस्य सपेक्षोपासनं स्यात् । यद्यपि स्तुतिरिति । तथापीति पदमर्थ
तः पठति । स्तुतिसमपीति । द्युमूर्धत्वादिरूपेण स्तुतिर्न रमात्रेण कर्तुमशक्या विना श्रुति
मित्यर्थः । सन्त्वारूपेण स्तुतिसंभवात् नासदारोप इति भावः । शब्दादीनां गतिं वक्तुं सूत्रमि
दं तमाशिष्य समाधत्ते । शब्दादिभ्य इति । स एषोऽग्निर्वैश्वानर इत्यग्निरहस्ये वैश्वानरवि
द्यायां श्रुतोऽग्निशब्दः ईश्वरे न संभवतीत्यन्वयः । सूत्रस्थादिशब्दार्थमाह । आदिशा
द्वादिति । अन्नमन्नं होमीयं होमसाधनं तेन प्राणाग्निहोत्रं कार्यमित्यर्थः । वातस ने यिनो
ऽग्निरहस्ये सप्रपंचां वैश्वानरविद्यामुक्त्वा स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषे
ऽन्तः प्रतिष्ठितं वेद स सर्वत्रान्नमत्तीत्युक्तेर्देहान्तस्थत्वं जाठरे संभवति प्रसिद्धेरिति
त । तथेति । अत्र सूत्रे आदिपदेनैवान्तः प्रतिष्ठानस्य ग्रहे संभवति पृथग्ग्रहणं किं लाभा
रणालिंगं सैषोतनार्थाः शब्दादिबलादिदमपि जाठरं गमयतीत्यभ्युच्चयः । यद्यपि द्यु
मूर्धत्वादिविशेष ईश्वरपक्षपाती होमाध्यारोपादि जाठरपक्षपातीति प्रतिभाने समं त
थापि परमेश्वरे विशेषो जाठरे न संभवतीति बलवानित्यत आह अथवेति । एष द्यु
मूर्धत्वादिनिर्देश इत्यर्थः । इमौ पृथिवीद्यामपि ते एव द्यावापृथिव्यौ रोदसी तयोर्म
ध्यमंतरिक्षं च योऽभूतोऽग्निर्भानुरूपेणाततान व्याप्तवान् स [illegible] व्याप्तवानित्यर्थः ।
नऽस्मान्नस्य न ध्येयत्वमित्यत आह । अथवेति । परमेश्वरदृष्ट्योपास्य जाठराग्नि

ब्र·भा·टी·टी·
२८

प्रतीकं व्याचष्टे तथा दृष्ट्येति । अग्निर्वैश्वानरशब्दार्थः धूमकेत्वादिमानीश्वरो लक्ष्य इत्युक्तौ कल्प्यां तस्मा
त्तामसरवो जाठरं इति । अस्मिन् पक्षे प्राधान्येनेश्वरोपास्यता पूर्वं त्रगुणतेति भेदः । दृष्टा । धियो
लिख्यां पदार्थयोरुपहितो लक्ष्य इत्यर्थः । लक्षणाबीजं अशक्यं व्याचष्टे । असंभवादिति । पुरुष
मपीत्यादि सूत्रशेषं व्याचष्टे । यदि च केवल इति । ईश्वरप्रतीकत्वे पाधित ... इत्यर्थो
विवक्ष्येत तदेति शेषः । यत्तु यः पुरुषः पूर्णः स एवाग्निर्वैश्वानरशब्दितः जाठरोपाधिक
इति सूत्रार्थः । यो वेद स सर्वत्र भुंक्ते इत्यर्थः । पुरुषत्वं पूर्णत्वं अव्याख्याय जाठरस्यापि नेत्
त्का । पाठांतरे पुरुषविधत्वं देहाकारत्वं तस्यानेनाह । मैत्विति । ननु जाठरस्यापि देह
व्यापित्वात् तद्विधत्वं स्यादित्यत आह । पुरुषविधत्वं च प्रकरणादिति । न देहैकव्यापित्वं
पुरुषविधत्वं किंतु विराड्देहाकारत्वं अधिदैवं पुरुषविधत्वं अध्यात्मं चोपासकमूर्ध
दिचुबुकांतेषु ... पञ्चमीश्वरस्य पुरुषविधत्वमित्यर्थः । ईश्वरस्यांगेषु संपादितं
दृश्यते । एवं जाठरं निरस्य पक्षद्वयं निरस्यति । अत एवेति । सूत्रं व्याचष्टे । यत्तु नैरुक्तादि
ना द्युमूर्धत्वादिः सर्वलोकफलभाक्त्वं सर्वपाप्मप्रदाहः आत्मत्रयलिंगोपक्रमाः इत्यु
क्तवस्तान्नेवाग्नौ स्वारयति । नहि भूतानि ... सोवस्तान्नेति मंत्रेणेश्वरदृष्ट्या
महिमोक्तः इति भावः । पूर्वमग्निर्वैश्वानरसाक्षी ईश्वरलक्षकाविशेषणं भ ... प्रती
कोपाधिपरित्यागेन विराट्पुरुषाकारस्य भागवतो वैश्वानरत्वं व्यास समूर्धादित्यु

ब्र
२८

कृतेत्युसंपाद्योपास्य सोंगीकारेपि न शब्दादिविरोधः शब्दयो[illegible]र्वैश्वानरे योगरूढ्या मुख्य
त्वान्नत्र तस्य शरीरिणां यत्र संपत्त्यादिकमाह। साक्षादपीति। साक्षात्तत्पदस्यार्थमाहाबि
नैवेति। जाठराग्नि लेबेधं विनेश्वरस्योपास्यत्वेपि शब्दाद्यविरोधं जैमिनिर्मन्यत इ
त्यर्थः। इदमेतस्य मूर्धैव सुतेजा इत्युरस्य रूपं नोच्यते। किंतु नरवच्छिरआदीनां व्यवस्थापक
त्वमहपुरुषशरीरे मूर्धादिचुबुकांतांगानि वक्ष्ये शिरआदीनि प्रतिष्ठितानि तेषु संपन्नो
वैश्वानरः पुरुषेंतः प्रतिष्ठित इत्युच्यते। अतो यथा शिरआदिस्थस्य पक्षिणो वक्षोंत
स्थत्वं तथा वैश्वानरस्य पुरुषांतस्थत्वं इत्याह। न चेति पुरुषविधमित्यादिना। अन्या
दिशब्दसेश्वरवाचित्वाज्जाठराग्नेरसंभवादितरसंभवस्येश्वरस्य पुरुषावयवेषु संपा
दनात्पुरुषविधत्वसंभवं तस्थत्वं चेत्यर्थः। पक्षांतरमाह। अथवेति। पुरुषविधत्वं पूर्ववत्। अं
तस्थत्वं माध्यस्थ्यमित्यर्थः। एवमंतस्थत्वमीश्वरे व्याख्याय शब्दादीनि व्याचष्टे। विश्वेति चेति।
विश्वस्यायं नरो जीवश्च सर्वात्मत्वात्। विश्वेषां विकाराणां वा नरः कर्ता। विश्वे सर्वे नरा जीवा अस्या
त्येतेन नियम्यत्वेन वा संतीति विश्वानरः रक्ष एव [illegible] राक्षस इतिवत्स्वार्थे तद्धितप्रत्ययः। नरे
संज्ञायामिति पूर्वपदस्य दीर्घता। अग्निधातोर्गत्यर्थस्य निप्रत्ययांतस्य रूपमग्निरिति। अंगायति
गमयति अग्रं कर्मणः फलं प्रापयतीति अग्निः अग्रणीः स्तुतः आश्रितो गत इति वाग्निः वैश्वान
रोपासनस्यातिथ्यभोजनात्पूर्वं प्राणाग्निहोत्रं विध्यंगत्वेन विहितं तदर्थमग्निहोत्रं तादिकल्पनं

135

शा॰भा॰रि॰र॰
६८

प्रश्नानानुरोधेन नचेतव्यमित्याह। गार्हपत्येति। मात्रां परिमाणं अतिक्रान्तो ऽतिमात्रस्तस्य विभोरित्यर्थः। उपा-
सकानां कृते ऽनुग्रहाय प्रादेशमात्रो ऽभिव्यज्यते। प्रदेशेषु वा मीयते ऽभिव्यज्यते इति प्रादेशमात्रः।
मतान्तरमाह। अनुस्मृतेरिति। प्रादेशेन मनसा मितः प्रादेशमात्र इत्यर्थः। यथा कथंचिदिति। मनसः
प्रादेशमात्रत्वं स्मृतिद्वारा स्मर्यमाणे कल्पितं श्रुतेरालम्बनमित्यर्थः। सूत्रस्यार्थान्तरमाह। प्रादेशे-
ति। संप्रति श्रुत्युक्तं प्रादेशमात्रश्रुतेर्गतिमाह। संपत्तेरिति। ब्राह्मणं पठति। प्रादेशमात्रमिवे-
ति। अपरिच्छिन्नमपीश्वरं प्रादेशमात्रत्वेन संपत्त्या कल्पितं सम्यग्विदितवन्तो देवा स्तमेवेश्वरं अ-
भिप्रत्यक्षेण संपन्ना प्राप्तवन्तो ह वै पूर्वकालेत एवोपायं तथा युष्मभ्यं तं वक्ष्यामि यथा
प्रादेशमात्रं प्रादेशपरिमाणमनतिक्रम्य मूर्द्धाद्याङ्गेषु वैश्वानरं संपादयिष्यामीति प्राचीनशालादी-
न् प्रति राजा प्रतिज्ञाय स्वकीयमूर्द्धानमुपदिशन् करेण दर्शयन्नुवाच। एष वै मूर्द्धा भूतादीन् लोका-
न् तीत्य उपरि तिष्ठतीत्यतिष्ठाः सो द्युलोको वैश्वानरः तस्य मूर्द्धेति यावत्। अध्यात्मं मूर्द्धा वेदेनो ऽधिदैव-
मूर्द्धा संपाद्य ध्येय इत्यर्थः। एवं चक्षुरादिष्वूहनीयं। स्वकीयचक्षुषी दर्शयन् एष वै सुतेजाः स वैश्वा-
नरस्य चक्षुरित्युवाच नासिकापदेन तन्निष्ठः प्राणो लक्ष्यते। तस्मिन्नाध्यात्मिकप्राणे ऽधिदैवप्राणस्य
वायोर्दृष्टिमाह। नासिके इति। अत्र सर्वत्र वैश्वानरशब्दस्तदंगपरः मुखस्थं मुख्यं। तस्मिन्नधिदै-
वं बहुलाकाशदृष्टिः मुखस्थलालारूपास्वप्सु रयिशब्दित तदीयबस्तिस्थोदके दृष्टिः। चुबुके प्र-
तिष्ठापादरूपा पृथिवी द्रष्टव्या। ननु गुणवैषम्येण विषयो भेदात्। अग्निरहस्यश्रुतेरनुसारे

रत्न
६८

णछांदोग्यस्य प्रादेशमात्रश्रुतिः कथं व्याख्येयेत्याशंक्याह। यद्यपीत्यादिना। एतावता त्यवैषम्येन बहुतर
प्रसिद्धिर्ज्ञातासिद्धं। विशेषस्यं न हीयते शाखाभेदेपि सर्वशाखासु प्रतीयमानं वैश्वानरोपासनं। एकमिति
न्यायस्य वक्ष्यमाणत्वाच्च। आतिष्ठत्वगुण छांदोग्य उपसंहर्तव्यः। विश्वरूपत्वे गुणश्च वाजिभिर्ग्र
ह्यस्तथा च द्युसूर्ययोः सुतेजस्त्वसमं आतिष्ठत्वविश्वरूपत्वयोर्व्यवस्था। यद्यप्यशाखाभेदेन गुणव्य
वस्थास्तु नाविशेषोपपत्तेरिति भावः। प्रादेशमात्रस्य संपत्तिप्रयुक्तत्वे श्रुसेतरं संख्यादपाति। आम्नातं
तीति। य एषोऽनंतोऽपरिच्छिन्नः आत्मा [illegible] दुर्विज्ञेयस्तं कथं जानीयामित्यत्रैः प्रश्ने याज्ञवल्क्योत्त
रं स इत्यत्र अविमुक्ते कामादिभिर्बद्धे जीवे भेदके सनया प्रतिष्ठित उपास्यः। पुनर[illegible]त्रि प्रश्नः स
इत्युत्तरं वरणायामिति। एवं प्रश्नोत्तरे आम्नायेपि तस्येति। तत्र च श्रुतौ इमामेव श्रुतिं संहितां नासिकांनि
रूप्येति भाष्ययोजना। सर्वाणि इंद्रियकृतान् दोषान् वारयतीति वरणा। श्रुतेः सर्वान् दोषान्ना
शयतीति नाशी नासिकेति निर्वचनं। नासाभ्रुवोर्जरं वद्वारेश्वरस्थानत्वध्यानात्पाप
वारकत्वमित्तिमंतव्यं। तयोर्मध्येपि विशिष्टजीवस्य स्थानं एष्यति। कृतमर्दिति भ्रुवोरित्य
तरं प्राणस्येतिपाठेपि घ्राणस्येत्यर्थः। स एष संधिर्द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य
संधित्वेन ध्येयं इत्याह। स एष इति। आभिमुख्येनाहं ब्रह्मेति विमीय ज्ञायते इत्याभिविमा
नः। अत्रैव गायत्र्या अभिमानत्वश्चाससोभिमानश्च सर्वस्वरूपत्वे सत्यानंत्यात् मानमत्रप
रिमाणं आपि विमीतो निर्मिमीते। तस्माद्वैश्वानरवाक्यं उपास्ये ब्रह्मणि समन्वितमिति सिद्धं।

इति श्रीमच्छारीरकसूत्रव्याख्यायां भाष्यरत्नप्रभाख्यायां प्रथमाध्यायस्य द्वितीयः पादः ॥ छ ॥ छ ॥ श्रीकृष्ण ॥
श्रीकृष्णाय नमः ॥ ॥ श्रीगणेशाय नमः ॥ ॐ ॥ द्युभ्वोतमूर्तमपदमक्षरमीक्षणीयं श्रीराममत्यद्भु-
तं तमधीशितारं । इन्द्रादिदेवगणविलसच्च शासितारं ज्योतिर्निधिः पदमनिक्रमतं भजेऽहं ॥१॥ एवं
रूढिबहुलानां प्रायेण सविशेषवाक्यानां समन्वयो द्वितीयपादे दर्शितः । अथ पुनर्यौगिकपदबहुला-
नां निर्विशेषप्रधानानां वाक्यानां समन्वयं वक्तुं तृतीयपाद आरभ्यते । अतोऽत्राधिकरणानां स-
मन्वयपादसंगतयः । तत्र पूर्वमुपक्रमस्थसेतुधारणशब्दस्य वाक्यशेषस्थद्युमूर्धत्वादिना ब्रह्मपरत्व-
मुक्तं तद्वदत्रापि उपक्रमस्थसेतुधारणायतनत्वस्य वाक्यशेषस्थसेतुश्रुत्या वस्तुतः परिच्छिन्नप्रधा-
नादेर्व्यवस्थेति दृष्टान्तलक्षणाधिकरणसंगतिः । पूर्वपक्षे प्रधानाद्युपास्तिः । सिद्धान्ते निर्विशेष-
ब्रह्मधीरिति फलं । मुण्डकवाक्यमुदाहरति । द्युभ्वादीति । यस्मिन्लोकत्रयात्मा विराट् प्राणैः सर्वैः सह
मनः सूत्रात्मकं चकारादव्याकृतं कारणं ओतं कल्पितं तदपवादेन तमेवाधिष्ठानात्मानं प्रत्यगभिन्नं जा-
नथ श्रवणादिना । अन्या अनात्मवाचो विमुञ्चथ विशेषेण निःशेषं त्यजत एष वाग्विमोकः पूर्वका-
ले लोकः कारो अमृतस्य मोक्षस्य अपारसंसारवारिधेः परपारस्य सेतुरिव सेतुः प्राप-
क इति मात्वं तत्श्रुति मुमुक्षूननुपदिशति । तत्रायतनत्वस्य सेतुधारणधर्मस्य दर्शनात्संशयमाह । त-
त्किमिति । अमृतस्य ब्रह्मणः सेतुरिति ब्रह्मणो भिन्नत्वेन सेतोः श्रुतत्वादेषशब्दपरामृष्टं
द्युभ्वाद्यायतनमब्रह्मैवास्त्वित्याह । अमृतस्येति । भेदश्रवणात् सेतुरिति श्रवणाच्चेत्यर्थः । तत्र
... पारवानिति । अनेन तत्कृत्स्नतः अपारदेशतः अ-
भेदश्रवणं व्याख्यातं सेतुश्रवणं स्वयं विवृणोति ।

त्री० टी० तस्य धारणा सं पत्यादनियतत्वं ः२

त्वनिर्धारकत्वं मुख्यत्वे तौ गृहणासंभवात् । गौणत्वे तु ग्रहे कर्त्तव्ये मुख्यत्वे तु विनाप्यनूतपारवत्वगुणवानेव कश्चि
ग्राह्यः । न तु मुख्यस्यानियतनिर्धारणगुणवानीश्वर इति भावः । यथा लोके मणयः सूत्रेणग्रथिताः ए
वेह गौतमत्वे मणिलिंगात्मकत्वात् पुनाः स्थूलानि सर्वाणि संदर्भानि ग्रथितानि भवंतीति स्मृत्यर्थः । आ
त्मशब्दात् पक्षद्वयमप्ययुक्तमित्यत आह । शारीरो वेति । सद्वितीयत्वेन देहशब्दोपपत्तेरित्यर्थः
नन्वात्मशब्दो जीवत्वं भवतीत्यत आह । आत्मशब्दश्चेति । उपाधिपरिच्छिन्नस्य जीवस्य सर्वव्यत्व
त्वं मुख्यं नास्तीत्यर्थः । उपक्रमस्य साधारणाय तनस्य गौणत्वे तु सत्वलिंगात् प्रथमश्रुतात्मश्रुत्या
ब्रह्मत्वनिश्चय इति भावः । स्वशब्दादि त्यस्यार्थमाह । श्रुतिश्चेति । प्रजानां उत्पत्तौ सदेव सौम्ये
स्थितौ वा यतनं लये प्रतिष्ठेति ब्रह्मवाचिसत्पदेन प्रोक्तायैः ब्रह्मण आयतनत्वश्रुतेरत्रापित
द्येत्यर्थः । अर्थांतरमाह । स्वशब्देनैवेति । यस्मिन् द्यौरिति वाक्यात् पूर्वोत्तरवाक्ययोः पुरुषब्रह्मा
दिशब्देन ब्रह्मकीर्त्तनान्मध्येपि ब्रह्मवाच्यमित्यर्थः । पुरुष इति पूर्ववाक्यं ब्रह्मैवेदं उत्तरवाक्यं
त्वसौ सुदिक्षु त्वेव सर्वं ब्रह्मैवेत्यर्थः । इत्तरेणोत्तरे स्वां दिशि इदं इतद्वाक्यस्य तत्रिनोद ब्रह्म
परत्वं व्याख्यान्यवाक्यं व्याचष्टे । तत्रेत्यादिना । सामानाधिकरण्यार्थमिति त्वमेति संबंधः
यस्मिन्सर्वमोतं तमेवैकमित्येवकारैकशब्दाभ्यां निर्विशेषं ब्रह्मैवमित्युक्तो हेत्वंतरमाह । वि
कारत्वेति । विकारेण तत् कल्पितेन भाषितत्वं भोगिमानो यस्य तस्य नर्थभावात्मेनेति दासुतेव
कूटस्थत्वसंज्ञेयमित्यर्थः । कथं तर्हि सामानाधिकरण्यमित्यत आह । सर्वं ब्रह्मेति । यश्चोरः सस्था
णुरितिवत्त्यस्य सर्वं तत्त्वब्रह्मेति सर्वोद्देशेन ब्रह्मत्वविधानात् बाधनार्थं नतु मद्भूयत्वत्त्स

देमिति नानारसत्वापार्थ। तत्र नियामकमाह। सर्वथेति। लवणपिण्डोऽन्तर्बहिश्चैकरसो न तु भूम्य:। सर्वो ल
वणकरसो यथा। एवमेवात्मा चैत्रे पृथिवीदकरसभ्रान्तिमित्यर्थः। यद्यपि पारमार्थिकलावयवत्वादिकं मुख्य
मत्वेऽव्यभिचारी तथापि सैन्धवजलादिबन्धनरूपं यद्विधारणं तदेव व्यभिचारित्वेऽपि तद्रूपदृष्टान्त
देशिता कृपालेन गम्यते न तु परमार्थबहिरन्तर्पारमार्थ्यादिकमित्याह। अत्रोच्यत इति। दृष्टान्ता त
त [illegible] इति प्रसंगमाह। नहीति। अत्रैव तौ पारेणेति शेषः। विचारणस्य शास्त्रार्थत्वं स्फुर
यति। पित्र इति। सिनोति बध्नातीति सेतुः परमार्थवेदेतो विचारणमित्यर्थः। तथा चामृत
पदस्य भावप्रधानत्वादमृतत्वस्य सेतुर्विपारकं ब्रह्मलोकेनामृतत्वेनान्वयेत्यर्थः। यद्यपि
स्थापा धारो ब्रह्मणे न सेतुशब्दार्थः। किं स्यव हि लेशा नमित्याह। अपर इति। फलितमाह। त
त्र यदुक्तमिति। ज्ञानेन सेतौ गृहीते सतीत्यर्थः मुक्तैरूपस्य प्रसक्तेन प्राप्यं यत् [illegible] तस्मात्प्रोक्त
रितिसूत्रार्थः। मुक्तिप्रतियोगिनं बन्धं दर्शयति। देहादिष्विति। तद्विपर्ययेणेति। दृष्टपंच
कृतः। मेरुबन्धनिवृत्तोऽस्मिन्नात्मस्थितमित्यर्थः। यद्यान घो गंगा घाः नाम रूपे विहाय समु
द्रात्मना तिष्ठति तथा ब्रह्म [illegible] विदपि संस्कारं विहाय परात्कारणान्न अव्यक्तात्परं पूर्ण
स्वयं ज्योतिरानन्दं ब्रह्मैकेन प्राप्य तिष्ठतीत्याह। तथापि हानीति। इदं प्रधानादेः क्लिन्नस्यापदत
माह। ब्रह्मणश्चेति। अस्य मुमुक्षोः हृदीति परेणात्मधर्मसंक्रमानां निरस्तं यद्वा क्रमनियमि
रथ्यतदा भवतो भवति मरणहेतु भावात् न केवलमनर्थनिवृत्तिः किं तत्र देहे तिष्ठन्नेव ब्र
ह्मानं दमश्नुत इत्यर्थः। लिंगान्तरमाह। भाविचेति। धीरो विवेकी तमेवात्मानं विज्ञाय प्रज्ञां

य

कं लक्ष्यपदार्थं तत्त्वान्वयार्थं ज्ञानेन कुर्वीत तानार्थिनो ज्ञानप्रतिबंधककर्मकांडदिदैर्मुख्यमाह। नेति। प
हूनि यस्य अल्पानूवेदोत त्राद्धानं गीव रोति। अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा। जिह्वामूलं
च दंताश्च नासिकोष्ठौ च तालु चेति। एतानि वागिन्द्रियस्थानानि तत्र वाक्शब्देनोच्यंते तेषां शोषण
मात्रं मनोमेशब्दो धारणपूर्वे तथ्यानां मनसो ग्लानिमात्रमित्यर्थः। वैराग्यि कहति। असाधारण
आत्मशब्दादिरित्यर्थः अतच्छब्दादिलक्ष्यार्थांतरमाह। तद्विपरीतस्येति। अतएव अतच्छ
ब्दादेव। प्राणभृच्चेति सूत्रे चकारः पूर्वसूत्रस्थनञोनुषंगार्थः। सर्वत्र पदत्वमानाधिकरण
आत्मशब्देन जीवस्याप्यतच्छब्दत्वस्यादित्यर्थः। ननु नानुमानप्राणभृतावतच्छब्दादिति
[illegible]मे नसूत्रं किमर्थं न कृतं। इतरयनिरासहेतोरेकत्वादित्यत आह। पृथगिति। योगः सूत्रं तु तत्
रसूत्रस्थहेतूनां जीवमात्रनिरासेनान्ययोपि स्तुबोधार्थं प्राणभृच्चेति पृथक्सूत्रकरणमि
त्यर्थः। तानेव हेतूनाकांक्षा द्वारा व्याचष्टे। कुतश्चेत्यादिना। यद्यपि [illegible] प्रेसमानेवात्र
लैयः तथापि जीवत्वाकारेण सातु सैयाद्दुदोलेन लेयरूपत्वमित्यर्थः। एवं च जीवत्वेलिं
गा विशिष्टत्वे न जीवस्य घुप्वादिवाक्यार्थत्वं निरस्यते न स्वरूपेणेति मंतव्यं। ननु स्वि
सेश्वरस्याद नाजीवस्यद्वारकपर्णोत्स्मिन्नोकावपि इश्वरआयतनयाक्येन किमर्थं व्याख्य
इत आह। यदिवेश्वर इति। अत्रेश्वरः मुक्तचिन्मात्रोपास्यः न सर्वत्वादिविशिष्टः
जस्यात्राप्रतिपाद्यत्वात् तथा चाप्रतिपाद्यार्थत्वोक्तिः स्मात् मध्यवचनात्संभवोत आद्य
वाक्येन ग्रहणं कार्यमित्यभिसंधिः तमसातोसी प्रवृत्ते। ननु तवोपीति। ब्रह्मस्वरूपप्रतिपा

दनार्थमवक्तव्यात् [illegible] तस्याविज्ञेयत्वस्यानुवादसंभव इति परिहरति। नेति। ननु द्वा सुपर्णेत्य
त्र बुद्धिजीवयोरुक्तेः कथमिदं सूत्रमित्यत आह। गुहामिति। स्थित्यदनाभ्यां च। एवं सूत्रे त्र तयोर
नुवादेनैक्यं दर्शितमित्यर्थः। नन्वत्र जीवेशौ नानुवाद्यौ पैङ्गिव्याख्याविरोधादतः सूत्रासंगतिरि
त्यत आह। यद्यपीति। तदापीति। सूत्रस्यासंगतिर्नास्तीत्यर्थः। अदनवाक्येन बुद्धिमनूद्य स्थिति
वाक्येन बुद्ध्यादिविलक्षणं भूमप्रसक्षभ्रमलक्षणो [illegible] द्युभ्वादिवाक्ये तदेव तात्पर्यं न बु
द्ध्युपहितो जीव इति सूत्रसंगतिमाह। ध्यक्षमित्यादिना। न च बुद्ध्युपहितो जीवः कथं न परं ब्रह्मे
त्यत आह। यद्यपीति। केनचित्तदंशेनोक्ते तदेव तदितरति। द्युभ्वादिवाक्यस्य ब्रह्मपरत्वमित्यर्थः। समा
प्तं प्रपंचार्थमिति। सेतुशब्दव्याख्यानेन प्रकृतमेतैः प्रत्यगात्मत्वे स्फुटीकरणार्थमित्यर्थः। त
स्मान्मुण्डकोपनिषद् ब्रह्माणि समन्वितेति सिद्धम्। भूमा छान्दोग्यमुदाहरति। इदमिति। नात्पे
सुखमस्ति भूमैव सुखं तस्मान्निरतिशयसुखार्थिना भूमैव विचार्य इति नारदं प्रति सनत्
कुमारेणोक्तमिति नारदश्रुते। [illegible] लक्षणमद्वितीयत्वमाह। यत्रेति। [illegible]
लक्षणं परिच्छिन्नलक्षणो [illegible]। अत्रेति। अत्र संशयबीजं प्रश्नपूर्वकमाह। कृ
तुरुसादिना। बहोर्भाव इति विग्रहे पृथ्वादिभ्य इमनिज्वा इति इमनिच्प्रत्यये कृते बहोर्लोपो भू
च बहोरिति सूत्रेण बहोः परस्य इमनिच्प्रत्ययस्यादेरिकारस्य लोपः स्यात् बहोः स्थाने भूराद
शश्च [illegible] निष्पन्नः तस्य भाववाचकत्वमनुप्रत्ययान्तत्वा
[illegible] तस्मिन् [illegible] प्राणोऽध्यस्तो भाति
[illegible]

वाक्योपक्रमस्य आत्मापि स्वप्रतिपादनापेक्षो धर्मित्वेन ख्यातीति सन्निहितव्यवहितप्रकरणाभ्यां संश
य इत्यर्थः। पूर्वमात्मशब्दात् भूम्ना घापतनं प्रश्ने भूम्नः। तदयुक्तं। तरति शोकमात्मविदिति अत्म
व्याप्तिरात्मशब्दप्रयोगादित्याक्षेपसंगत्या पूर्वपक्षयति। प्राणो भूमेति। धर्मधर्मिणो रभेदात् सा
मानाधिकरण्यं द्रष्टव्यं पूर्वोत्तरपक्षयोः। प्राणो वास्ति अलुप्तानैच प्रत्ले क्रमेण मंतव्यं। अत्राप्या
ये भूयः प्रश्नोत्तरभेदादर्शने दोष इत्यतः अस्मात् प्राणात्परं भूयः प्रश्नप्रतिवचने दृश्यते। अस्ति

परं

भगवो प्राणाद्भूयः प्रश्नं विनैवोक्तलिंगो न प्राणादभिन्न इत्याह। एषत्वादि सादिना। प्राणात्पर
म इति न दृश्यत इति पूर्वेण संबंधः। नन्वेषतु वा अतिवदतीति तुशब्देन प्राणप्रकरणविच्छेदात्
न प्राणो भूमेत्यत आह। प्राणमेवेति। नामाद्याशांतानुपास्यानतीत्य प्राणं श्रेष्ठं वदतीत्यतिवादी प्रा
णवित् तं प्रत्यसि अतिवाद्यसीति चेन्न चिप्रश्ने सते अस्मीति ब्रूयात् नाहमतिवादीत्यपन्हवं न कु
र्यादित्युक्तं प्राणविदं एष इति परामृश्य सत्यवचन ध्यान मनन श्रद्धादिधर्मपरंपरां विधाय अत्रापदे
शान्न प्रकरणविच्छेदः तुशब्दो नामाद्युपासकस्यातिवादित्वनिरासार्थ इत्यर्थः। भूम्नो लक्षणवचनं
सुखत्वममतत्वं च प्राणे प्रश्नपूर्वकं योजयति। कथं पुनरित्यादिना। प्राणमस्तिषु प्राणे लीने षु नश्रृणो
ति स्वपुत पुरुष इति शेषः। गार्हपत्यो ह वा एषोपानो व्यानोऽन्वाहार्यपचनः आहवनीयः प्राणः र
तिश्रुतेः प्राणाग्नय एवेह पुरे शरीरे जागतीति स्वव्यापारा एव तिष्ठंतीत्यर्थः। देवो जीव अथ तदा स्व
प्नादर्शनकाले सुखश्रवणात् प्राणस्य सुखत्वममविरुद्धमित्यन्वयः। आत्मपदेनोपक्रमविरोधं
परिहरति। प्राणहैवेति। प्राणस्यात्मत्वं कथमित्याशंक्य श्रुतत्वादित्याह। तथा हीति। स वै सम्पर्कि

वागादिवदित्यर्थः। विपक्षे हेतुच्छेदं बाधमाह। प्राण एव चेदिति। स्वस्यैव स्वस्मा
दुपदिष्टत्वं ५

तमिति च सर्वाधिष्ठानं प्राणं स्वीकरोतीति श्रुतिरित्यन्वयः। आत्मत्वं प्राणेपि मुख्यमिति भावः। ...
पत्तिं योजयति। सर्वात्मत्वेति। संप्रसादशब्देन प्राणं लक्षयित्वं मुख्यार्थं दर्शयति। संप्रसाद इति। सर्वा
एष एतस्मिन् संप्रसादे स्थित्वा पुनराद्रवतीति प्रयोगाच्च तत्पदं सुषुप्तिवाचकमित्याह। बहुत्वेति।
वाच्यार्थसंबंधात्प्राणो लक्ष्य इत्याह। तस्यां चेति। अत्र सूत्र इत्यर्थः। भूमा प्राण इति। अत्राध्या
येन तस्मात् भूयँ उपदिष्टत्वात्। नामादेरूर्ध्वं उपदिष्टत्वम् उक्तं नामादिषु दृष्टं चेत्यर्थः। इदानीं सि
द्धान्ते। नन्विति। प्रकृतप्राणवित्परामर्शाद् एषशब्दो न स्पृशति तस्य च स्वरूपपरतंत्रत्वेन स
त्मात्। वादिवाचित्वात् अतः प्राणप्रकरणे विच्छिन्नमिति हेतुसिद्धिरित्याह। अत्रोच्यत इति। सत्ये
नातिवादित्वं विशेषः न ह्येतो य एषशब्दस्तेन पूर्वानुकर्षे इत्यर्थः। य एष प्राणविदतिवदति इ
त्यनूद्य सत्यं वदेदिति विधानात् न प्राणप्रकरणविच्छेद इति दृष्टांतेन शंकते। नन्विति। सत्यश
ब्दस्त्वबाधिते रूढो ब्रह्मवाचकः नह्यन्यस्य मिथ्यात्वात् तत्सत्यवचने त्वबाधितार्थसंवादात्
ला क्षणिक इति नात्र लक्ष्यवचनविधिरित्याह। नेति ब्रूम इति। किं च सत्येन ब्रह्मणा इति
वदतीति तृतीयाश्रुत्या ब्रह्मकरणकप्रमतिवादित्वं श्रुतं तस्य प्रकरणात् ब्रह्मबोधो न युक्त इ
त्याह। श्रुत्याहि सत्यादिना। नान्वेति। सत्यवाक्य इत्यर्थः। एवं सत्येनेति श्रुत्या प्रकरणं बाध्य
मित्युक्तौ तत्साध्वनादिवाच्यमित्युक्तम्। प्रकृतेति। विजिज्ञास्यत्वलिंगाच्च पूर्वोक्ताद्भिन्न
मित्याह। सत्यं त्वेवेति। प्रकरणविच्छेदे दृष्टांतमाह। तस्मादिति। श्रुतिलिंगबलादेतस्य
सं प्रकृतात्प्राणात् प्राधान्येन भिन्नं द्रष्टव्यमित्यर्थः। एवमतिवादित्वस्य ब्रह्मसंबंधोत्पा

ये

प्राणलिंगत्वं निरस्तं। यत्तु प्रश्नं विनोक्तौ लिंगात् भूमा प्राण इति तन्न। तस्याप्रयोजकत्वात् इत्याह। सत्यं से
वेति। प्रकरणविच्छेदे न चेति। प्रश्नभेदादर्थभेद इति न नियमः। एकस्यामेनो मैत्रेय्या बहुशः पृष्टत्वा
त् प्रश्नं विनो [illegible] चातुर्वैदस्य प्रकृते [illegible] दर्शनाच्छेसर्थः। तत्र यथा चातुर्वैदत्वस्य
प्रकृतासंबंध्यादर्थभेद एवमिहापीति स्फुटयति। तत्रेत्यादिना। सत्यपदेन प्राणोत्कीर्तिर्मतत्वा
हात त्र सत्यमिति। विज्ञानं निदिध्यासनं। आदिपदान्मननश्रद्धाश्रवणमननःश्रद्धानिष्ठा तदु
त्कर्षाणि [illegible] तस्मान्यदि श्रवणादीनि [illegible] सत्यस्य ब्रह्मत्वे लिंगानि। एवं श्रुतिलिंगैः
प्राणस्याबोतरप्रकरणं बाधित्वा प्रस्तुतं सत्यं अप्रकृतमपि [illegible] धर्मत्वमित्याह। तत्र यदि
ति। किंच सन्निहितादपि व्यवहितं साकांक्षं बलीय इति न्यायेन सन्निहितं निराकांक्षं प्राणे
दृष्टान्तो [illegible] मस्य आत्मा स्वप्रतिपादनाय भूमविद्यापेक्षः इत्यभिप्रायेणाह। ए
वं चेति। किंच शोकस्य पारमित्युपक्रम्य तमसः पारमित्युपसंहारात् शोकस्य मूलोच्छेद
विनातरणासंभवात् शोकपदेन मूलतमोग्रहे तन्निवर्तकज्ञानगम्यत्वलिंगात्। आ
त्मा ब्रह्मेत्याह। न चान्यत्रेति। आत्मशब्दस्य प्राणस्य वदतीति संबंधः। नान्विद
चरमं ब्रह्मणं ब्रह्मपरमस्तु ततः प्राक् भूमा प्राण इति शंकते। प्रकरणान्त इति। तच्छ
ब्देन भूमानुकर्षणमेवमित्याह नेति। भूम्नो ब्रह्मत्वे लिंगान्तरमाह। धर्मेतिसूत्रं। यद्युक्तं
भूम्नो लक्षणं सुखत्वममृतत्वं च प्राणे सुयोज्यमिति तदनूद्य विघटयति। याप्यत्वावि
त्यादिना। सति कृष्णा [illegible] आत्मनो दृष्टत्वादित्यत्र [illegible] तद्भावइत्यसंगतं

त्मानार्थं प्रश्नोपनिषदि न शृणोति न पश्यतीति परमात्मानं प्रकृत्योक्तं। तथा तत्रैवात्मनः सुख
त्वमुक्तं न प्राणस्यायतन्त्रत्वं तरमात्मन एव सुखत्वमाह। तस्मादित्यर्थः। आत्मयो नाशादि
दोष तत्त्वेति तेषामप्येतन्न स्थिरं। स एवाथ स्तात्स तु परिष्यादिति सर्वात्मत्वं स एवेदं
सर्वमिति सर्वात्मत्वं च श्रुतं तस्मादूमा ध्यायो निर्गुणमन्विष्ट इति सिद्धं। अक्षरं। बृह
दारण्यके पठति। कस्मिन्निति। यद्भूतं च भवच्च भविष्यच्च तत्सर्वं कस्मिन्नोतमिति गार्ग्या
पृष्टेन मुनिना याज्ञवल्क्येन। व्याकृताकाशः कार्यमात्राश्रयः इत्युक्तः आकाशः कस्मिन्नो
त इति। तृतीयप्रश्ने तु मुनिरुवाच। तद्व्याकृतस्याधिकरणमेतदक्षरं अस्थूलादिरूपमि
त्यर्थः। इह यत्राक्षरशब्दप्रयोगात्संशयः। यथा समशब्दोऽपि निरूढः इति अस्य भूमेत्यु
क्तं। तथाक्षरशब्दो वर्णे रूढ इति दृष्टान्तेन पूर्वपक्षः। तत्रोंकारोपास्तिः फलं सिद्धान्ते निर्गु
णब्रह्मधीरिति विवेकः। ननु न क्षरतीत्यश्नुते वा इति योगात् ब्रह्मण्यक्षरशब्दोऽस्
त्विति चेन्न। प्रसिद्ध्यातिक्रमस्येति। रूढिर्योगमपहरतीति न्यायादित्यर्थः। वर्णस्योंका
रस्य सर्वाश्रयत्वे कथमिति शङ्कां व्याख्यानार्थमिदं यथाश्रुतं तु सर्वात्मत्वमित्याह। ओं
कार इति। प्रश्नप्रतिवचनाभ्यामाकाशान्तजगदाधारत्वेनात्सर्वं निश्चय न व्या
नार्थता तस्माल्लिङ्गबलाद्रूढिबाधितावृत्तिर्नास्तीति सिद्धान्तयति। एवमित्या
दिना। आकाशं भूतं रूपं संवृतं स्यादेतदिति। चेतनकर्तृत्वशिष्ट्या यावत्त्व
तेनैव मित्याह। साचेति। सूत्रं व्याचष्टे। सा चेति। चकार ओंकारास्य प्रत्यपनि

दासार्थः। एतावता शास्त्रकार्यान्तःपातिनः श्रुतसर्वकार्याश्रयत्वायोगात्। अव्याकृतमत्रानमेव आकाशः
प्रधानसांख्यकृत्तिलदाश्रयत्वात् अक्षरं प्रधानमित्यर्थः। निष्प्रलो विषयत्वेन प्रत्तो। प्रत्यपूर्वं
कंसूत्रं व्याकरोति। किमिदमिति यत्तो नूव्याद्यस्तिरिति श्रोतिं निरस्यति। एतदिति। अंबरां
तस्याधारं मत्पक्षरं श्रुतिरचेतनत्वाद्धावर्णयतीत्यर्थः। जीवनिरासपरत्वेनापि सूत्रं योजय
ति। नचेति। अन्यभावाच्छेदः तन्निषेधादिति सूत्रार्थः। तर्हि शोधितो जीव एवाक्षरं नपरइ
सतत्वात्। नहीति। शोधिते जीवत्वे नास्तीत्यर्थः। तस्मात्कार्गि ब्राह्मणे निर्गुणाक्षरे समन्वित
मितिसिद्धं। ईक्षतिकर्मव्यपदेशात्सः। प्रश्नोपनिषदमुदाहरति। एतदिति। पिप्पलादो गुरुः
ससकामेन पृष्टो ब्रूते हे सत्यकाम परं निर्गुणमपरं सगुणं ब्रह्म तदेव यद्योंकारः सहि प्र
तिमेव विद्वांस्तस्य प्रतीकस्तस्मात्प्रणवं ब्रह्मात्मना विद्वान् तेनैवोंकारध्यानेनायतनेन प्रा
तिसाधनेन यथाध्यानं परमपरं वान्वेति प्राप्नोतीति प्रकृतसमभ्ये एकमात्रद्विमात्रोंकारस्यो
ध्यानमुक्त्वा ब्रवीति। यः पुनरिति। इह प्रस्तावे तृतीया ब्रह्मोंकारयोरभेदोपक्रमात्। योऽस
कारादिमात्रात्रये एकस्या मात्राया अकारस्य अभ्यासादिफलं शास्त्रदादिविस्तरतिचेज्ज्ञानाति
तेन सम्पक्तोता एकामात्राय स्यो ऽकारस्य स एकमात्र एवं मात्राद्वयस्य सम्यक् विभूति
ताने द्विमात्रस्तथा त्रिमात्रस्तमोंकारं पुरुषं योऽभिध्यायीत स ओंकार विभूतिसैन
ध्यातेः सामभिः सूर्यद्वारा ब्रह्मलोकं गतो परमात्मानं पुरुषमीक्षत इत्यर्थः। संशयं तद्वीजं
यात्। किमिसोदिना। अक्षिन्नत्रिमात्रवाच्यइत्यर्थः।

७४

पूर्वत्र पूर्वपक्षत्वेनोक्तौ ओंकारे बृहित्वस्य ध्यातव्यं मिथ्याधीयत इति प्रसंगात् संगतिः ।। यद्वा पूर्वत्र वर्णेन्द्रियध्याद्य
र●नाकस्य लिंगात् ब्रह्मणि वृत्तिरुक्ता न इदं चापि ब्रह्मलोकप्राप्तिलिंगात् परशब्दस्य हिरण्यगर्भे
वृत्तिरिति सिद्धान्ते न पूर्वपक्षयति । तत्रापरमिति । कार्यं परब्रह्मणो रूपान्तररूपस्य यत्र फलं । तदुपासक:
सत्यं संपन्नः प्रविष्टः । ननु यत्तदान ईश्वर इति ध्यानात् विंदते वास्ति तस्य मपि फलं ब्रह्मओपासक
व्यक्तमित्यत आह । नहीति । अन्यत्र लब्धात्वेपि अत्र परविन्दु परमपराविद परमन्वेलौ स्यपक्षमा
नूपरायिदोऽपरप्राप्तिरयुक्ता उपक्रमविरोधात् । न चात्र परप्राप्तिरेवोक्तेति वाच्यं । परस्य सर्वगतत्वा
त् अत्रैव प्राप्तिसंभवे न सूर्यद्वारा गतिवैयर्थ्यात् । तस्मात् उपक्र●मानुग्रहीतादपरप्राप्तिरूपा
ल्लिंगात् परं पुरुषमिति । परं श्रुतिर्वाक्येऽसमर्थः । परश्रुतेर्गतिं पृच्छति । नन्विति । पिंडः स्थूलो । विराट्
तदपेक्षया सूत्रं स्वपरत्वमिति समाप्यर्थः । सूत्रे सशब्दः इश्वरोति पर इति प्रतिज्ञातत्वे न तं व्याचष्टे ।
परमेवेति । तदुपासक एतस्मात् हिरण्यगर्भात् सर्वं पुरुषं ब्रह्मात्मा मिरीक्षते इत्यर्थः । नन्वीक्षणविष
ये परो सत्तत आह । तत्रापि ध्यायतेरिति । नन्वीक्षणं प्रमाण्याद्विषयसत्यतामपेक्षत इति भवतु त
सः परश्चक्षणीयः ध्यानव्यस्य तत्वो परः किं न स्यादित्यत आह । स एवेति । श्रुतिध्यानप्रसक्तिर्हीना
त्स एवाद्यमिति सोऽनः तशब्दो व्याख्यातः अत्रैवं सूत्रयोजना ओंकारेण ध्येयः स एव परमात्मा
वाक्यशेषे इक्षणीयत्वोक्तेः अत्र च श्रुतिप्रसक्तिध्यानात् स एवायमिति । ननु शब्दश्नेऽपि तत्र प्रसक्तिं
नेति तोकते । नन्विति । परात्परशब्दश्चेदं गौणोऽश्रुतिध्यां इत्यप्रसक्तिर्नायाअविरोधमाह ।

हिरण्यगर्भस्य

श्वर

रू ७

विषय

अत्रेति। नन्वेतस्माज्जीवघनात्परादित्येतत्पदेनोपक्रान्तध्यातव्यपरामर्शादीक्षणीयः परात्मा ध्येया
दन्य इत्यत आह। नचात्रेति। ध्यानस्थले तस्य लक्षणस्य च लोके समानफलत्वात् ध्येय एवेक्ष
णीयः परात्मा एवं चोपक्रमोपसंहारयोरेकवाक्यता भवतीति भावः। स सामभिरुन्नीय
ते ब्रह्मलोकं स एतस्माज्जीवघनादित्येतत्पदेन सन्निहिततरो ब्रह्मलोकोऽस्य समीपे परामृश्यते
इति प्रश्नपूर्वकं व्याचष्टे। कस्तर्हि सोऽभिमतो घन इति सन्धावादिति भावः। सैन्धवखिल्यो
लवणपिण्डः खिल्यवद्धनो भावः परिच्छेदो यस्य स खिल्यभावः। एतत्पदेन ब्रह्मलोको वा परा
मृश्यत इत्यत आह। अपर इति। जीवघनशब्दस्य ब्रह्मलोके लक्षणां दर्शयति। जीवानां हीति।
व्यष्टिकरणाभिमानीनां जीवानां घनः संघातो यस्मिन् सर्वकरणाभिमानिनि स जीवघनः
तस्मात्परः सर्वलोकातीतः मुक्त इत्यर्थः। तस्मात्परः सर्वलोकातीतः
तत्स्यामित्यानन्तरं परात्परं सर्वं चेतनलोकं लक्ष्य इत्यर्थः। परमिति। यस्मात्
इत्यर्थः। परपुरुषशब्दस्य परमात्मनि मुख्यत्वात्स एव ध्येय इत्याह। परमिति। किंच परशब्दे
परत्वात्परमात्मनि। किंचित्स एव मुख्यः परः न तु पिण्डात्परः सत्त्वात्मेत्यर्थः। किंच परापरत्व
नोपक्रमे निर्दिष्टं तत्परब्रह्मैवात्र वाक्यशेषे ध्यातव्यमित्याह। परं चापरं चेति। यापनिष
दि लिङ्गान्तरमाह। यथेति। पादोदरः सर्पः अन्तरे परब्रह्मलोपासनया सूर्ये द्वारात्र
ब्रह्मलोकं गत्वा सोऽपरब्रह्मलोके स्थित्वा तदेव शान्तमभयं प्राप्नोतीत्यर्थ इत्याह। अत्रो
क्तेति। एवमनेकवाक्यतासमर्थनप्रकरणानुगृहीतपरपुरुषश्रुतिर्वा परब्रह्म

१ भा.टी.टी.

७५

प्रयमितया ब्रह्मलोकप्राप्तिलिंगं बाधित्वा वाक्यं प्रणवध्येये ब्रह्मणि समन्वितमिति सिद्धं। दहर उत्तरेभ्यः।
छांदोग्यमुदाहरति। अथेति। भूमविद्यानंतरं दहरविद्याप्रारंभार्थोऽथशब्दः। ब्रह्मणोऽभिव्यक्तिस्थानत्वात् ब्रह्म
ब्रह्मपुरं शरीरं अस्मिन् यत्प्रसिद्धं दहरमल्पं हृत्पद्मं तस्मिन् हृदये वदंतराकाशशब्दितं ब्रह्म तदन्वेष्ट
व्यं विचार्यं ज्ञेयमित्यर्थः। अत्राकाशो जिज्ञास्यस्तदंतस्थं वेति प्रथमः संशयः कल्प्यः तत्र यच्चाकाश
स्तदा संशयद्वयं तत्राकाशशब्दात् एकं संशयं उक्त्वा ब्रह्मपुरशब्दोत्थं संशयांतरमाह। तथा ब्रह्मपुरमिति।
इत्यत्र शब्दे जीवस्य ब्रह्मणो वा पुरमिति संशयः तत्र तस्मिन् संशये सतीति योजना। परपुरुषशब्द
स्य ब्रह्मणि मुख्यत्वात् ब्रह्म ध्येयमित्युक्तं। तथोहाप्याकाशपदस्य भूताकाशे रूढत्वाज्जीवो ध्येय इ
ति दृष्टांतेन पूर्वपक्षयति। तत्राकाश इत्यादिना। दहरवाक्यस्यानंतरं प्रजापतिवाक्यस्य च संग
णो निर्गुणे च समन्वयोक्तेः श्रुत्यादिसंगतयः पूर्वपक्षे भूताकाशाद्युपास्तिः। सिद्धांते सगुणब्रह्मोपा
स्सा निर्गुणधीरिति फलभेदः। न चाकाशस्तल्लिंगादित्यनेनास्य पुनरुक्तताशंकनीया अत्र तत्तस्मि
न्यदं तत्तदन्वेष्टव्यमित्याकाशांतस्थस्यान्वेष्टव्यत्वादिलिंगात्वेन दहराकाशस्य ब्रह्मत्वे स्पष्टलिंगा
भावात्। ननु भूताकाशस्याल्पत्वं कथमेकस्योपमानत्वं उपमेयत्वं च कथं उभे अस्मिन् द्यावापृथिवी
अंतरेव समाहिते उभावग्निश्च वायुश्चेत्यादिना श्रुतसर्वाश्रयत्वं चेत्यर्थः। नन्वेव आत्मेत्यात्मशब्दो
भूते कथं चेत्याशंक्य क्रमेण परिहरति। तस्येत्यादिना हृदयापेक्षयाल्पत्वं ध्यानार्थं कल्पित
भेदात्सादृश्यं। स्वत एव हेतोः सर्वाश्रयत्वमित्यर्थः। नन्वेष आत्मेत्यात्मशब्दो भूते न युक्त इत्यरुचेरा
हा अथवेति। घ इत्येति। चेतनगुणयोगेनेत्यर्थः। मुख्यं ब्रह्मग्रहस्तामित्यत ओ...न हीति। अ

रूप
७५

150

स्तु पुरस्वामी जीवो हृदयस्थाकाशस्तु ब्रह्मेत्यत आह। तत्रेति। पुरस्वामिन एव तदंतस्थत्वसंभवात् नान्यापेक्षे
त्यर्थः। व्यापिनोंतस्थत्वं कथमित्यत आह। मन इति। आकाशपदेन दहरमनूद्योक्तोपमादिकं ब्रह्मणोऽभे
दविवक्षया सविषयलीसाह। आकाशेति। ननु जीवस्याकाशपदार्थत्वं न युक्तमित्याशंक्य तादृग्भूताका
शस्यैव दहरोस्तु तस्मिन्नंतस्थं किंचिद्ध्येयमिति पक्षांतरमाह। नन्वात्रेति। परमंतस्थं वस्तु तद्विशेषण
त्वेन प्राधान्येन दहराकाशस्य तच्छब्देनोपादानादित्यर्थः। यद्वा अन्वेष्टव्यत्वादिलिंगात् दहरस्य ब्रह्म
त्वे निर्णीते [illegible] ताकाशस्तल्लिंगादिसनेन गतार्थत्वमिति शंका अत्र निरसनीया। अन्वेष्टव्यत्वादेः परवि
शेषणत्वेन न [illegible] तद्दहरस्य ब्रह्मत्वे लिं[illegible]कोपयोगं नास्तीत्यर्थः। अपहतपाप्मत्वादिलिंगोपेता
त्मकुत्सा केवलाकाशश्रुतिर्बाध्येति। सिद्धांतयति। परमेश्वर इत्यादिना। आकाशस्योपपूर्वकमिति
निषेधः। तमाचार्यं प्रति यदि ब्रूयुः हृदयमेव तावदल्पं तत्राकाशोल्पतरः किं तदत्राल्पे विद्यते य
द्विचार्यं ज्ञेयमिति तदा स आचार्यो ब्रूयादाकाशस्याल्पतानिवृत्तिमित्यर्थः। वाक्यसमाप्त्यर्थमिव
ह। तत्रेति। निवर्त्तयति। आचार्य इति शेषः। नन्वाकाशशब्देन रूढ्या भूताकाशस्य भानात्कथं तन्निव
त्तिरित्याशंक्याह। यद्यपीति। ननु रामरावणयोर्युद्धं रामरावणयोरिवेत्यत्र दृष्टोपमादर्पे। तिचेत्
न अप्रसिद्धसादृश्यस्यानन्वयेन युद्धस्य निरूपमत्वे तात्पर्यात् अनन्वयालंकार इति कवयः। पूर्वो
क्तमनूद्य निरस्यति। नन्वित्यादिना। सीता श्लिष्ट इवाभाति कोदंडप्रभया युत इत्यादौ प्रभायोगात् सीता
श्लेषरूपविशेषणभेदाद्द्वाश्रयणमेकस्यैव श्रीरामस्योपमानोपमेयभावविलक्षणार्थमगत्याकृत
मित्यनुदाहरणं द्रष्टव्यं नैवमत्राश्रयणं युक्तं वाक्यस्याल्पत्वनिवृत्तिपरत्वेन गतिसद्भावात्। किं

151

चहार्दीकाशस्यांतरत्वात्सागेऽल्पत्वेनव्यापकत्वाद्याकाशसादृश्यंनयुक्तमित्याह। अपिचेति। आंतरत्त्वस्य
गोलकासंतताभेदात्‌नसादृश्यमितिभावः ननुहार्दीकाशस्याल्पत्वनिवृत्तौतावत्येचतात्पर्यं किंनस्यादि
त्यतआह। दृष्टपचेति। अतोल्पत्वनिवृत्तावेवतात्पर्यमितिभावः एवमाकाशोपमितत्वादहराकाशं
नभूतमित्युक्तं सर्वाश्रयत्वादिलिंगेभ्यश्चतथेत्याह। नचेत्यादिना। विगताजिघत्साजक्षु
घायस्यसोयंविजिघत्सः बुभुक्षाशून्यइत्यर्थः प्रथमश्रुतब्रह्मशब्देनतत्सापेक्षचरमश्रुत
पष्ठीविभक्त्यर्थःसंबंधोनेयः नतुब्रह्मणःपुरमितिषष्ठ्यर्थः स्वस्वामिभावोचेतः गत्या
थः निरपेक्षेणतत्सापेक्षंबाध्यमितिन्यायादित्याह। अत्रब्रह्मइति। शरीरस्यब्रह्मणातदुपलब्धि
स्थानत्वरूपेसंबंधेमानमाह। सइति। पुरुषुशरीरेषुपुरिहृदयेशायइतिपुरुषइत्यन्वयः। ननु
ब्रह्मशब्दस्यजीवेप्यत्यादिनाशरीरत्वकृतिहैतामुख्यत्वाभावपष्ठ्यर्थः कथंचिन्नेयइत्यतआह।
अथवेति। वृंहयतीतिदेहमितिब्रह्मजीवः तस्यापिवृद्धपुरेहृदयंब्रह्मवेश्मभवतुराजपुरेमै
त्रस्यसद्भावदित्यर्थः अनंतफलत्वलिंगादपिदहरःपरमात्मेत्याह। तद्यथेति। अथकर्मफलानिवैराग्यानंतर
मिहजीवद्दशायामात्मानंदहरंतदाश्रितांश्चसत्यकामादिगुणान्‌ आचार्योपदेशमनुविद्यध्यानेनानु
भूयपरलोकंगच्छंतीतितेषांसर्वलोकेष्वनंतमैश्वर्यंस्वेच्छयासंचलनादिकंभवतीत्यर्थः। दहरेउक्त
लिंगान्यन्यथा। व्याख्यानितेषांतदंतस्थगुणत्वादित्युक्तंस्मारयित्वादूषयति। यदप्पीत्यादिना। उत्तरवाक्ये
शस्वरूपप्रतिपादनान्यथानुपपत्त्याएवंतस्यान्वेषणत्वादिकमित्सत्रोपपत्तिंशंकते। नन्विति। ए
तदाकाशस्वरूपंआक्षेपबीजमाकाशस्याल्पत्वंउपमयानिरस्यांतस्थवस्तूक्तेर्यदंतस्थमेवध्येय

गा।

मित्यर्थः । नहि हिज्ञादेव ध्येयं स्यादित्याह । नैतदेवमिति । अस्तु को दोषस्तत्राह । तथेति । सर्वनामभ्यां दहराकाशमा
कृष्यात्मत्वादिगुणाननुकृष्य गुणैः सह तस्यैव ध्येयत्वं वाक्यशेषो ब्रूते लब्धितो ध्येय इत्यर्थः । तस्मिन्यदन्तरिति
तत्पदेन व्यवहितमपि हृदयं योग्यतयाकृष्येत्याह । तस्मादिति । यद्वा आकाशस्तस्मिन्पदेन
तादृशं यदन्वेष्टव्यमिति योजनां सूचयति । संहृतस्थ्येरिति । दहराकाशस्य ब्रह्मत्वे हेत्वन्तरमाह ।
गतीति । प्रजा जीवा एतं हृदयस्थं दहरं ब्रह्मस्वरूपं लोकमहरहः प्रत्यहं स्वापे गच्छन्तस्तद्ब्रह्मलीना
स्थिता अप्यनृतेनाज्ञानेनावृतास्तं न जानन्तीत्यतः पुनरुत्तिष्ठन्तीत्यर्थः । नन्वेतत्पदपरामृष्टदहरस्य
स्वापे जीवानां गत्यपि ब्रह्मत्वे किमायातमित्याशङ्क्य तथा हि दृष्टमिति व्याचष्टे । तथाहीति । लोकेऽपि
दृष्टमित्यर्थान्तरमाह । लोकेऽपीति । गतिलिङ्गं व्याख्याय शब्दं व्याचष्टे । तथेति । जीवगन्तव्य [illegible]
ब्रह्मलोकशब्दस्य प्रसिद्धेरिति भावः । ब्रह्मण्यपि तस्याप्रसिद्धिं शङ्कते । नन्विति । निषादस्थ
पतिन्यायेन समाधत्ते । गमयेदिति । षष्ठे चिन्तितं । स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् । रौद्री
मिष्टिं विधाय श्रूयते तया निषादस्थपतिं याजयेदित्याम्नायते । तत्र निषादानां स्थपतिः स्वामीति
षष्ठीसमासेन त्रैवर्णिको ग्राह्यः । अग्निविद्यादिसामर्थ्यात् । न तु निषादश्चासौ स्थपतिरिति
कर्मधारयेण निषादो ग्राह्योऽसामर्थ्यादिति प्राप्ते सिद्धान्तः । निषाद एव स्थपतिः स्यान्निषा
दशब्दस्य निषादे रूढत्वात् । तत्पुरुषे तु षष्ठ्यर्थसंबन्धलक्षणा [illegible] कल्पनागौरवात् । [illegible] तद्धिती
याविभक्तेः पूर्वपदसंबन्धकल्पनापत्तेर्लाघवात् । अतो निषादस्यापि सामर्थ्यमात्रं कल्प्य
मिति तद्वद्ब्रह्मलोकशब्दे कर्मधारयः । कर्मधारये लिङ्गं व्याचष्टे । [illegible] इति । सूत्रे च

कारउत्न्याससमुच्चयार्थः। सर्वजगत्कारणलिङ्गाच्च दहरः पर इत्याह। धृतेरिति। नन्वथशब्दाद् दहरस्य ब्रह्मरूपेण वि
चिचयश्रुता धृतिर्न दहरलिङ्गम् इति शंकते अथ्येति। य आत्मेति प्रकृतात्मपरामर्शात् अथशब्दो दहरस्य
धृतिगुणविधिप्रारंभार्थ इत्याह। दहरोऽस्मिन्नित्यादिना। अस्मिन्नो विधृतिशब्दः कर्तृवाचित्वात् तस्यतः।
सूत्रे तु मतिमराद्यसमानाधिकरण्यात्। धृतिशब्दः क्लिष्टत्वेनो विधारणं ब्रूते। स्त्रियां क्तिन्निति भा
वे क्तिना विधानादिति विभागः। सेतुरसेतुः विधृतिरस्थितिहेतुरित्यसपौनरुक्त्यमाह। य
थोदकेति। सूत्रे योजयति। एवमिहेति। धृतेश्च दहरः परः अस्य धृतिरूपस्य नियमनस्य च म
हिम्नोऽस्मिन्नुपरमात्मन्येवश्रुतंतरदुपलब्धेरिति सूत्रार्थः। धृतेश्चेति। च काराल्लोकपदोक्त निया
मकत्वलिङ्गग्रहणं तत्र नियमेनेऽश्रुतंतरोपलब्धिमाह। एतस्येति। धृतो ताम् आह। तथेति। आस
मेतात्। कारातेंदीपतेरुतिरुचयं ज्योतिर्विभ्रजणपाकाराशब्दस्याविभ्रलगुणतो वा प्रसिद्धिः प्रयो
गप्राचुर्यं। यदि तु आत्मापहतपाप्मेत्यादिवाक्यशेषबलेन दहरः परः तर्हि जीवोऽपीत्याशंक्यनि
षेधति। इतरेति। जीवस्य वाक्यशेषमाह। अथेति। दहरोक्त्यनंतरं मुक्तोपसृप्यश्रुद्धब्रह्मलोच्यते य एष
संप्रसादो जीवोऽस्माच्छरीरात्कारणसंघातात् समुत्थाय आत्मानं तस्मात् द्विविध्यविविक्तेनात्मानं
स्वेन ब्रह्मरूपेण। विनिष्पद्यते। साक्षात्स्वतदेव प्रसन्नरूपं ज्योतिरूपसंपद्यते प्राप्नोतीति
व्याख्येयं यथा सुखं सुप्तो दायस्वपितीतिवाक्यं सुखं सुखं व्यादत्त इति व्याख्यायते तद्वत्
ज्योतिषो नात्मत्वं निरस्यतीति। एष इति। संप्रसादस्य त्वाच्येरित्येतिश्रुतं लंरवस्थावत्स्थानं
यपि जीवस्य लिङ्गमित्याह। तथेति। तदा अमितस्य तस्मात् समुत्थाने दृष्टांतः। यथेति। ननु

कापाकार्श्यशब्दो जीवेन दृष्ट इत्याशंक्योक्तावस्थोष्यानालिंगवत्त्वात् कल्प्य इत्याह । यथा चेति । नियामका
भावाज्जीवो दहरः किं न स्यादिति प्राप्ते नियामकमाह । नैतदिति । सादिना दहरे श्रुतधर्माणामसंभवा
दनं जीवो दहर इत्यर्थः । तर्हि पुनरुक्तिस्तत्राह । अतिरेवेति । उत्तराच्चेत्यधिकाशंकानिरासार्थ
मित्यर्थः । कृतान्तः जीवपरामर्शस्य गतिस्तत्राह । पृथिव्यलीति । जीवस्य स्वापस्थानभूतब्रह्म
ज्ञानार्थोयं परामर्श इति वक्ष्यते । असंभवादिति हेतोरसिद्धिं आशंक्य परिहरति । कुमारा
ओतादिसूत्रे । निरूक्ततायाः जीवाशंकायाः प्रजापतिवाक्यबलात्पुनः समुत्थानं क्रियते
तत्र जीवस्यैवापहतपाप्मत्वादिग्रहणेनासंभवासिद्धेरित्यर्थः । कथं तत्र जीवोक्तिस्तत्रा
ह । तत्रेत्यादिना । यद्यप्युपक्रमे जीवशब्दो नास्ति तथाप्यपहतपाप्मत्वादिगुणकेनात्मान
मुपक्रम्य तस्य जाग्रदाद्यवस्थात्रयोपन्यासादवस्थालिंगेन जीवनिश्चयात्तस्यैव ते गु
णाः संभवंतीति समुदायार्थः । इदं प्रजापतिश्रुतेः । य एष इति । प्राधान्यादक्षिग्रहणं स
र्वेन्द्रियेविषयदर्शनरूपजाग्रदवस्थापन्नमित्याह । द्रष्टारमिति । महीयमानः वा
सनामयैर्विषयैः पूज्यमान इति स्वप्नपर्याये । तद्यत्रेति । सुषुप्तिपर्याये च जीवमेव
प्रजापतिर्व्याचष्ट इत्यन्वयः । यत्र काले तदेतत्स्वपनं यथा स्यात्तथा सुप्तः सम्यक्क्र
स्तो निरस्तः करणग्रामो यस्य स समस्तः अत एवोपहतकरणत्वात्तद्धतद्वात्तृष्य
हीनः संप्रसन्नः स्वप्नप्रपंचमज्ञानमात्रे सेन विज्ञापयति अतोऽज्ञानसत्त्वान्न

हा·भा·टि·

७८

खे　　　　　　　　　　　　　　　　　　　　　　　　　　पर

कार्यादिलक्षणः प्राज्ञः एषस्य चैतन्येन कारणशरीरसाक्षी तस्य साक्ष्यस्य सत्तास्फूर्तिप्रदत्वादात्मेत्यर्थः।
चतुर्थपर्याये ब्रह्मोक्तेः तस्यैवापहतपाप्मत्वादिगुणाष्टकाश्रयत्वं तस्यापि पर्यायस्य जीवत्वमाह। नाहै
ति। अहेति निपातः खेदार्थे। खिद्यमानो हीन्द्रो वाचनं खलु सुप्तः पुमानयं सं प्रति सुषुप्त्यवस्थायां
अयं देवदत्तोऽहमित्येवमात्मानं जानाति नो एवमेवेमानि भूतानि जानाति किं तु विनाशमेव
प्राप्तो भवति नाहमत्र भोग्यं पश्यामि इति दोषमुपलभ्य पुनः प्रजापतिमुपससाद तं दोषं श्रु
त्वा प्रजापतिरब्रवीत्। एतमिति। एतस्मात्प्रकृतादात्मनोऽन्यत्रान्यं न व्याख्यास्यामीत्युपक्रम्य
मघवन् मर्त्यं वा इदं शरीरं इति निंदापूर्वकं जीवमेव दर्शयतीत्यर्थः। तस्मात्प्रजापतिवाक्याद
तोऽलं भवाद्धि सिद्धः सिद्धांतयतीति तं प्रतीति। अवस्थात्रयाच्छादनो नाविमृश्य तं शोधितत्वं
र्थस्य वाक्यार्थस्य [illegible] लिप्य [illegible]मित्यर्थः। तर्हि सूत्रे पुल्लिंगेन जीवोक्तिः कथं ज्ञानेन जीवत्वस्य
निवृत्तत्वादित्यत आह। भूतपूर्वमिति। ज्ञानात्पूर्वमविद्या तत्कार्य प्रतिबिंबितत्वरूपं जी
वत्वमभूदिति कृत्वा ज्ञानानंतरं ब्रह्मरूपोऽपि जीवनाम्नोच्यत इत्यर्थः। [illegible] तेजस प्राज्ञ
तुरीयपर्याय चतुष्टयात्मक प्रजापतिवाक्यस्य तात्पर्यमाह। एतदिति। जन्मनाशवत्त्वात्
तिबिंबवद्धि बदेहो नात्मेति ज्ञानार्थमिति ज्ञापनार्थं प्रजापतिरिंद्रविरोचनौ प्रत्युवाच यदुदशरा
वे आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे ब्रूतमित्यादिश्रवणेन उदशरावेति।
उदकपूर्णे शरावे प्रतिबिंबात्मानं देहं दृष्ट्वा स्वस्याज्ञानं यत्तन्मह्यं वाच्यमित्युक्त इत्यर्थः। व्य

156

स्याध्यविद्यायां विनिवर्त्यते इत्यत्रैतदुक्तं भवतीति संबंधः। किंमुक्तमित्यत आह। यदस्येति। जी

वस्याविद्योपाधिकं परस्परं व्यभिचारिणीभ्यो वस्थाभ्यो वस्तुरूपेण जीवं न व्यावर्तन्ते कुतः सिद्धसाध्यता। किंतु तमनुवर्त्य परस्परं व्यभिचारिणी ..... कं

विविच्य ब्रह्मत्वस्वरूपं बोधयति। अतो यः कृत्स्नल देवापहतपाप्मत्वादिधर्मेकं न जीवं दुःखं सो

भवति सोपि तस्य ब्रह्माभेदेन तद्धर्मी करिष्यत्यर्थः। एवमवस्थोपन्यासस्य विवेकार्थत्वं

न जीवलिंगत्वं एतदस्मत्तमेतद्ब्रह्मेति लिंगत्वे पेतः श्रुतिविरोधादिति मंतव्यं। ननु जीवत्व

ब्रह्मत्वयोर्विरुद्धधर्मवत्तोः कथमभेदस्तत्राह। तदेवेति। अन्वयव्यतिरेकाभ्यां जीवत्वस्या

विद्याकल्पितत्वोदविरोध इति मत्वा दृष्टांतेनान्वयमाह। यावदिति। व्यतिरेकमाह। यदे

ति। आविद्यायां सत्यां जीवत्वं वाक्योत्थबोधात् तन्निवृत्तौ तन्निवृत्तिरिति विवेकतां दर्श

र्थः संसारित्वस्य कल्पितत्वेसिद्धं निगमयति। तदेवं तस्येति। समुख्याय स्वेन रूपेण

विनिष्पद्यत इति श्रुतिं व्याख्यातुं आक्षिपति। कथं पुनरित्यादिना। कूटस्थनित्यस्य स्व

रूपाभिव्यक्तिः मलसंगिनो हि क्रियया मलनाशादभिव्यक्तिर्न तु कूटस्थस्यासंगिन इत्या

दिस्वर्णीति। कथंतरं पार्थिवो मलः अभिभूतेत्यस्य व्याख्यानमनभिव्यक्तेति आसा धी

रणो भास्वरत्वादिः अभिभावकः सोरालोदः। जीवस्वरूपस्याभिभवे वा ..... क्रमाह।

दर्शयति। विज्ञानघन एवेति। स्वसाक्षि..... मात्रं स्तावक्ता स्यात् तथैतन्यं चक्षुरादिजन्यं स्व

व्यक्तं द्रष्टृ ..... वाच्यं सत्त्व व्यवहारांगं जीवस्वरूपं भवति। तस्याभिभूतत्वं दर्शय

नि

शा.टि. ८१०
७१

व्यवहारो विरुध्यत इत्यभावाद्व्यवहारो न स्यादित्यर्थः। अज्ञस्यापि स्वरूपं एतद्व्यवहारांगत्वी
य स्वरूपं भवति। तस्यापि भूत सदृशो व्यवहारो व[illegible]त्तिषु व्यक्तमिति संगीकार्यं व्यवहारद
र्शनादित्याह। तथेति। अन्यथेत्युक्तं स्फुटयति। तद्योदिति। स्वरूपं चेतज्ज्ञानिन एव व्यज्ये
त। ज्ञानात्पूर्वं व्यवहारो न स्यादित्यर्थः। अतः सदैव व्यक्तस्वरूपत्वादित्यर्थः। सदाव्यक्तिषु
व्यक्तस्य वस्तुनो संगस्यात्मनः आविद्यकदेहाद्यविवेकरूपस्य मलसंगस्य सत्वात्तद्विवेका
पेक्षया समुत्थानादिश्रुतिरित्याह तस्मादिति। अत्रेति। वेदना हर्षशोकादिः। अविविक्तमिवेति
ताद्रूप्यस्य संगस्य कल्पितत्वमुक्तं तत्र कल्पितसंगे दृष्टान्तमाहयथेति। श्रुतिरूतिमिति।
एवं पदार्थश्रवणात्पश्चाद्विज्ञानमयः प्राणे इत्यादिवाक्यात्सिद्धमित्यर्थः। प्राणादिभिन्नत्वं
पदार्थज्ञानस्य वाक्यार्थसाक्षात्कारः फलमित्याह। केवलेति। अशरीरत्वस्य सत्वात्तत्समु
त्थानं कथमिति व्याख्येयं नविवेकइत्याशंक्याह। तथापि विवेकेति। इत्युक्तश्रुत्यनुसारेणेत्यर्थः।
शरीरेष्वशरीरमनवस्थितमिति श्रुतेः। अविवेकमात्रकल्पितसशरीरत्वं अतो विवेक एव
समुत्थानमित्यर्थः। ननु स्वकर्मार्जिते शरीरे भोगस्यापरिहार्यत्वात्कथं जीवत एव स्वरू
पाविर्भावइत्यत आह। शरीरस्थोपीति। अशरीरत्वेन शरीरस्थस्यापि विबंधाभाव इत्य
तेजीवतोप्युक्तिरित्यर्थः। अविरुद्धेत्यर्थे सूत्रशेषो यत्क इत्याह। तस्मादिति। अ
व्याहतो लक्षणो विसर्गः। ज्ञाना ज्ञानेन विद्या विपर्ययतिरोभावाभिव्यक्तिस्थिते इत्येषः शारि

रू

८
७

सकृतो क्रिरस्त इत्याह । एवमेवेति । अंशा दिमृत्यवधमसंगत्वेआत्मनो द्रष्टव्यत्वाप्यज्ञातिमृत्यः विपद्धसा
त्व्योमव पूर्दिशात्मैष्य सिद्धेर्षैर्द्रो मिथ्येत्यर्थः । प्रजापतिवाक्यात्थ्य पत्रे दोमि थ्येत्याकांक्षापूर्व
कमाह । कुतश्चेत्यादिना । एतद्धि दृश्यस्य सत्यमेव नास्तीत्यि कुतद्द सन्चयः । छायायां ब्रह्मत्वदृष्टि
परमिदं वाक्यं नापेदपरमित्यत आह । नापीति । यस्मद्ज्ञानोत्कृष्टतत्सतः सर्वकामप्राप्ति
स्तमात्मानमन्विच्छा वद्दति प्रवृत्तयो रिंद्रविरोचनयोर्यघनात्मप्रायां प्रजापति श्रेयात्त
दात्मप्राप्तावादीत्या दित्यर्थः । प्रथमवद्द्वितीयादिपर्याये व्याख्याना स्वप्नावस्थात्सु अनुस्मृत
मोब्रह्मत्वेनोक्त इत्याह । तथेति । अवस्था भेदेप्यनुस्मृतो मुक्तिमाह ।। किंचेति । सुषुप्तौ ज्ञा
तृव्यीरामितिमाशंक्याह । तथा तत्तीयइति । सुषुप्तौ निर्विकल्पज्ञानरूपआत्मास्तीत्यत्र
श्रुतहस्त प्ययन्न स्वतिमाह । नतीति । बुद्धेःसाक्षिणो नाशो नास्ति । नाशप्रभावादित्यर्थः । ए
वमवस्था निरसंगत्वेनोक्तआत्मैव तुरीयेपि ब्रह्मत्वेनोक्त इत्याह । तथेति । स्वतेरेकदेशिव्या
ख्यां दूषयति ।। केचिदित्येति । जीवपदयो द्वैदादितिभावः । श्रुतिबाधान्नैवमित्याह । तेषा
मिति । सन्निहितो जीव एव सर्वनाम्नार्थ इत्यर्थः । उक्तस्यपुनरुक्तो भयइति मृत्युते तव
तत्प्रकांत परमात्मनश्च तुर्थ एवोकैस्त ह्राध इत्याह । त्रयइति । नोकलिद्धे जीवानुवादे
न ब्रह्मत्वं बोध्यत इति स्वमतमुपसंहरति । तस्मादिति । व्याख्यानांतरासंभवादित्यर्थः
विलयनं शोधनं विधयामहा वाक्येनेति यावत् । येतु संसारं रस समिच्छंति तेषामिदंरणा

रीरश्चेत्तरमित्याह। अपरेत्वित्यादिना। शारीरसूत्रस्यार्थं संक्षेपेणोपादयति। एकत्वेति। अविद्या
नामपदैर्वेदं निरस्तं तु सामानाधिकरण्यं। आवरणविक्षेपशक्तिरूपशब्दप्रवृत्तिनिमित्तभे
दात्सहप्रयोगः। अत्रैवाविद्यायां संसरति न ततोऽन्यो जीव इति शारीरस्यार्थ इत्यर्थः। तर्हि सू
त्रकारः किमिति भेदं ब्रूते तत्राह। यत्विति। परमात्मनोऽसंसारित्वसिद्ध्यर्थं जीवाद्भेदं ब्रुय
ति। तस्यासंसारित्वनिश्चयाभावे तदभेदोक्त्यापि जीवस्य संसारित्वानपायादित्यर्थः। अधि
ष्ठानस्य कल्पितादृष्टेऽपि कल्पितस्याधिष्ठानान्न पृथगस्तीत्याह। जीवस्येति। कल्पितभे
दानुवादस्य फलमाह। एवं हीति। सूत्रे च भेदो नोक्त इति भ्रान्तिं निरस्यति। प्रतिपाद्यमिति।
आत्मेति तूपगच्छन्तीत्यादिसूत्राणि आदिपदार्थः। नन्वद्वैतस्य शास्त्रार्थत्वे द्वैतापेक्षविधि
विरोधस्तत्राह। वर्णितश्चेति। अद्वैतज्ञानतः कल्पितद्वैताश्रयाविरोधयोर्न विद्युषद्
ति सर्वमुपपन्नमित्यर्थः। शावं प्राजापतिवाक्ये जीवानुवादेन ब्रह्मण एवापहतपाप्मत्वा
दिगुणके जीवे ब्रह्मेत्युक्ते संभवान्न जीवो दहर इत्युक्तं तर्हि जीवपरामर्शस्य कागतिरित्यत आह
अन्यार्थश्चेति। सूत्रं व्याचष्टे। अथेत्यादिना। प्रकृते दहरे विशेषो गुणस्तदुपदेशो विने
त्यर्थः। तत्र दहरवाक्यशेषरूपं संप्रसादवाक्यमाशंक्य पूर्वं दहरं ब्रह्मपरत्वेन व्याच
ष्टे। कथमित्यादिना। उपास्यत्वादत्यन्तमिति व्याख्यावशात्सा निरस्तमित्यर्थं तरमा
हाल्पश्चेत्यचेदमिति। एवं दहरवाक्यं प्राजापतिवाक्यं च सगुणे निर्गुणे च समन्वितमि

तिसिद्धं॥ अनुवर्ततेऽस्तस्य च॥ मुंडकवाक्यमुदाहरति। न तत्रेति। तस्मिन् ब्रह्मणि विषये न भाति तन्न भा
सयतीति यावत्। यदा चंद्रभास्करादिर्न प्रकाशयति तदाऽल्पदीप्तेरग्नेः का कथेत्याह। कुत इति।
किं च सर्वस्य सूर्यादेस्तद्भास्यत्वान्न तद्भासकत्वमित्याह। तमेवेति। अनुगमनवदनुभानं स्वग
तमितिरिक्तो निरस्यति। तस्येति। तत्रेति सप्तम्याः सति विषये च साधारण्यात्संशयमाह। त
त्वेति। पूर्वत्रात्मश्रुतादिबलाद्दाकाशवाच्यस्य स्फूर्तिव्यापादीश्वरे वृत्तिराश्रिता तथेहापि स
तिसप्तमीबलात्तु वर्तमानार्थलाभेन यस्मिन्सति सूर्यादयो न भासंते स तेजोविशेष
रूपास्य इति प्रविषय दृष्टेर्वृत्तिः। अयणी यान्न चुनाभासमाने सूर्यादौ न भानीति विरो
धात् इति दृष्टांतेन पूर्वपक्षयति। तेजोधात्विति। तेजोध्यानं निर्गुणस्वयंज्योतिरात्मेत्यो
न मि लुप्तमत्र फलं तेजोधातुसैल्लिंगमाह। तेजोधातूनामिति। यत्तेजस्त्वाभिभावकं तत्ते
ज इति व्याप्तिमाह। तेजःस्वभावकमिति। यस्मिन्सति यन्न भाति तदनु तद्भातीति वि
रुद्धमित्यत आह। अनुमानमिति। ततो निकृष्टत्वान्न विवक्षितमिति भावः। मुख्यत्वेन वे
विवक्षानुपपत्तेः मुख्यानुमानलिंगात् सर्वभासकः परमात्मा स्वप्रकाशकोऽत्र ग्राह्य इति
[illegible] श्रुतिमाह। भाक्
सिद्धांतमाह। भात्विति। भात्संस्वप्रकाशात्सं भासकलार्थमुक्तं [illegible] भानं
पद इति। [illegible] तेजो [illegible] नगना [illegible]। नक्षिति। किं च सूर्यादयस्तेजोंतरस्थानं [illegible] तीय
मकुनपांति तेन स्यात् प्रदीपवदिसात्। तमसोऽस्येति। यो यमनदकरो तिसत्तज्जातीय

इति नियमो नास्तीत्याह। नायमेकान्त इति। पौनरुक्त्यमाशङ्क्य वाक्यानुवादपूर्वकं सूत्रोक्तं हेत्वन्तरं व्याचष्टे।
अनुकृतेरिति। तमेव प्रकारान्तमिमुपवक्तुं राकृतं तद्ध्यानं विना सर्वस्य पृथक्त्वानुभावरूपं अनुभा
नमनुकृतेरिति सूत्रे नोक्तं। तस्य चेति सर्वभासकत्वमुक्तमिति पौनरुक्त्यमित्यर्थः। आत्मनः सूर्यादि
भासकत्वं श्रुत्यन्तरप्रसिद्धमविरुद्धं चेत्याह। तद्देवा इति। सर्वशब्दः प्रकृतसूर्यादिवाचकत्वे
न व्याख्यातः। संप्रति तस्यासंकुचद्वृत्तितां मत्वा अर्थान्तरमाह। अथ वेति। तत्रेति सर्वनाम्नः प्र
कृतं ब्रह्म ग्राह्यमित्याह। न तत्र सूर्य इति। किं च स्पष्टब्रह्मपरपूर्वमन्त्राकाङ्क्षापूरकत्वाद
यं मन्त्रो ब्रह्मपर इत्याह। अनन्तरं चेति। हिरण्मये ज्योतिर्मये आनन्दमयाद्यपेक्षया परे कोशे आ
नन्दमयाख्ये पुच्छशब्दितं ब्रह्म विरजं आगन्तुकमलशून्यं। निष्कलं निरवयवं शुभ्रं नैसर्गि
कमलशून्यं सूर्यादिदीप्तिभूतं ब्रह्म विदुरात्मविद इत्यर्थः। सति सप्तमीपक्षमनुवदति। य
दपीति। सूर्यादिष्वपि भावकत्वे ज्योत्यान्तोऽपि प्रामाणिकत्वे तस्य हेतुत्वशङ्का स्यात्। न तत्र प्रमाण
मस्तीत्याह। तत्रेति। सिद्धौ ते न तत्रेति वाक्यार्थः कृपथमित्याशङ्क्याह। ब्रह्मण्यपीति सतिसप्त
मीपक्षे न भान्तीति श्रुतं वर्तमानत्वं सम्भवति तस्मिन्सति न भान्त्यतीतस्य भविष्यत्वं क
ल्पनीयं प्रत्यक्षविरोधश्चानिराकार्य विषयसप्तमीपक्षे तु न भान्ति यतीतस्य तदिति न व्याहा
रमात्रं कल्प्यं। न श्रुतहानिरिति लाघवं। अत ब्रह्मणि विषये सूर्यादेर्भासकत्वं निषेधेन
ब्रह्मप्रकाश्यत्वमस्यते इत्यर्थः। येनान्यभास्यत्वेन हेतुना सूर्यादयस्तस्मिन्ब्रह्मणि विषये

पुरुषस्योर्ध्वस्तन्मात्मनि जीवे मध्ये शरीरावच्छेदेन यन्नात्मनीति पुनि।

भासकः स्वः तथा तु अन्यानेन नोपलभ्यते स्वप्रकाशत्वादिति योजना। उक्तमेवार्थमन्तरेण द्रढयति

ब्रह्मेति। स्वप्रकाशत्वेऽन्यावभासकत्वे च श्रुतिद्वयं ग्रहणयोग्यत्वादन्याय इदमर्थः। शिञ्ज्याहार

पक्षे स्यतिबलमप्यस्तीत्याह। अपि चेति। सूत्रं व्याचष्टे। अपि चेति। अस्यावभासकत्वे सर्वभासक

त्वे च श्लोकद्वयं द्रष्टव्यं। तस्मादनुपानमेतत्रो ब्रह्मणि समन्वित इति सिद्धं। शब्दादेव प्रमि

तः। काठकवाक्यं पठति। अंगुष्ठेति। पुरुषः पूर्णो व्यात्मनि देहे मध्ये अंगुष्ठमात्रे हृदये। तिष्ठती

त्यंगुष्ठमात्रमुच्यते तस्यैव परमात्मत्वे वाक्यांतरमाह। तथेति। अंगुष्ठमात्रमिति पठनीयं।

योऽङ्गुष्ठमात्रो जीवः स वस्तुतो निर्धूमज्योतिर्वन्निर्मलप्रकाशरूप इति लमर्थं संशोध्य तस्य ब्रह्म

त्वमाह। ईशान इति। तस्याद्वितीयत्वमाह। स एवेति। कालत्रयेऽपि स एवास्ति नान्यत्किंचित्तन

चिकेतसा पृष्टं ब्रह्म तदेतदेवेत्यर्थः। परिमाणेशानशब्दाभ्यां संशयमाह। तत्रेति। यथा न्यायानादि

लिंगात्तदशिन्याहारेण स्वर्योग्यगोचरो ब्रह्मेत्युक्तं तथा प्रथममश्रुतपरिमाणलिंगात् जीवप्रती

तावीशानोऽस्मीति ध्यायेदिति विध्यध्याहारेण ध्यानपरं वाक्यमिति पूर्वपक्षयति। तत्र परिमा

णेति। पूर्वपक्षे ब्रह्मदृष्ट्या जीवोपास्तिः सिद्धान्ते तु प्रत्यक्ब्रह्मैक्यज्ञानं फलं यथा मोदेर्ध्वंवि

स्तारो महत्त्वमिति भेदः। दृष्यादिदिति। अंगुष्ठमात्र हृदयस्य विज्ञानशब्दितबुध्यपेक्षया स

कल्पनयेत्यर्थः। स्मृतिसंवादादप्यंगुष्ठमात्रो जीव इत्याह। स्मृतेश्चेति। अथ मरणानंतरं यम

पाशौर्बद्धं कर्मवशं प्राप्तमित्यर्थः। तत्रापीश्वरः किं न स्यादित्यत आह। नहीति। प्रश्नचेति सं

आ

163

यमनेममापि विष्णुरिति यमस्येश्वरनियम्यत्वस्मरणादिति भावः। अत एवास्येत्युपपदाद्यधिका
भावाच्च ईशान इतीशः स साक्षाद्भिरं कुरामीशीता भातीति श्रुत्या लिंगाच्चेत्यर्थमिति लिङ्गात् यूतिःप
रमात्मैवेति। प्रकरणाच्चेश्वरपरमिदं वाक्यमित्याह। एतदिति। शब्दो वाक्यं लिंगाद्दुर्बलमि
त्याशंक्याह। शब्दादिति। करः सकनिष्ठः अरत्निः मुख्यां गुष्ठमात्रोक्तौ वेगाद्युक्तौ किं गौणत्व
हृणोनेत्यत आह। न चान्यद्इति। सति संभवे मुख्यत्वहानौ न्याय्यः अत्र तु श्रुतिविरोधादसंभव
व इति गौणत्वं हि इत्यर्थः। मनुष्याणेवेति। त्रैवर्णिकानेवेत्यर्थः। पशुत्वादि समेनेन पश्वादीनां
देवानामृषीणां चाधिकारो वारितः तत्र पश्वादीनां शास्त्रार्थज्ञानादिसामर्थ्याभावात्
कर्मण्यशक्तिः इन्द्रादेः स्वदेवताके कर्मणि स्वोद्देशेन द्रव्यत्यागायोगात् अशक्तिः ऋषीणामा
र्षेयवरणे ऋष्यन्तराभावादशक्तिः। अर्थित्वादि समेनेन निष्कामानां मुमुक्षूणां स्थावराणां चा
धिकारो वारितः। तत्र मुमुक्षूणां शुद्ध्यर्थत्वे नित्यादिष्वधिकारो न काम्येषु शुद्धचित्तानां मो
क्षार्थित्वे श्रवणादिषु च तेषु अधिकारो न कर्मस्विति मन्तव्यं। शूद्रस्याधिकारं निरस्यति।
अपशुद्रत्वादिति। शूद्रो यज्ञेनानवक्लृप्त इति पर्युदासात्। उपनीतमध्यापयीतेति
शास्त्राच्च न शूद्रस्य वैदिके कर्मण्यधिकारः। तस्यैव कुत इति तस्य नेत्युपनयन प्रयुक्त
द्विजत्वाभावेन वेदाध्ययनाभावात्। अत्रापेक्षितो न्यायः षष्ठाध्याये वर्णित इत्याह।
वर्णितमिति। स्वर्गकामो यजेतेत्यादि शास्त्रस्याविशेषेण सर्वान् प्रत्यर्थिनः प्रतिपद्यन्त

सात् प्राणिमात्रस्य स्वर्गार्थत्वाच्च । पूर्वार्थे कर्मणि पश्वादीनामप्यधिकारः स्यादित्याशंक्य तस्मात्
षो शास्त्रे सामर्थ्याभावात् स्वर्गकामपदं मनुष्यपरतया संकोच्य मनुष्याधिकारत्वे स्थापिते त्रैवर्णिका
धिकारमाशंक्य वसंते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति त्रयाणामेवाग्नि
संबंधश्रवणात् तेषामेवाधिकार इति वर्णितमित्यर्थः । प्रस्तुते किमायातं तत्राह । मनुष्याणां
चेति प्रायेण सर्वत्रापि तत्तत्परिमितो मनुष्यदेह इत्यर्थः । एवमंगुष्ठशब्दो हस्तपरिमाणवाच्य
ः तत्रस्थं ब्रह्म लक्षयतीत्युक्तं स्वं प्रतीतं छंदोनां गुष्ठमात्र जीवमन्वेषाममीशान इति श्र
तौ पने शो श्च इति च कुंठकमनुवदति । यद्यपीति । प्रतिपद्यानेदाभिरो श्चात् अनुवाद्यांगुष्ठ
मात्रत्वं वाच्ये तात्पर्यमीर्ष्यबलवत्वादित्याह । तदिति । क्वचिदस्थूलत्वेऽस्यादिना । क्वचित्तत्त्व
मसीत्यादौ । एकत्वार्थे वाक्यशेषमनुकूलयति । एतमिति । श्रुतिर्यमो वा कर्ता द्रष्टव्यः । तं
जीवं प्रवृहेत् पृथक् कुर्यात् धैर्येण बलवदिंद्रियनिग्रहादिना तं विविच्यात्मानं मुं
जात्वच प्रकाशमानं मतं कूटस्थं ब्रह्म जानीयादित्यर्थः तस्मात्कठवाक्यं प्रसकृत्ब्रह्मलक्षणमिह
वेत्समान्वितमिति सिद्धं । शास्त्रस्य मनुष्याधिकारत्वे देवादीनां ब्रह्मविद्यायामप्यनधि
कारः स्यादित्याशंक्याह । तदुपर्यपि तत्र सरायणः । ननु समन्वयमात्राध्याये कथमधिकारचिंतात्र
संगतेत्यत आह । अंगुष्ठेति । स्य तस्योपेक्षानर्हत्वं प्रसंगः अत्र मनुष्याधिकारत्वोक्त्या
स्यतानां देवादीनां वेदोक्तश्रवणाद्यधिकारोऽस्ति न वेति संदेहे पो ता लक्षणं वेताया

165

८३

न

घसंभवान्नेति प्राप्ते सिद्धांतमाह। बाढमिति। एवमधिकारविचारात्मकाधिकरणद्वयस्य प्रा
संगिकीं संगतिः। अत्र पूर्वपक्षे देवानां ज्ञानाधिकारासिद्धेर्देवत्वप्राप्तिद्वारा क्रममुक्तिफला
सु दहराद्युपासनासु क्रममुक्त्यर्थिनां मनुष्याणामप्रवृत्तिः फले सिद्धांते तु प्रवृत्तिः। उपा
सनाभिर्देवत्वं प्राप्तानां श्रवणादिना ज्ञानान्मुक्तिसंभवात् इति सफलोयं विचारः। ननु पूर्वोक्ता
सक्तानां तेषां मोक्षार्थित्वाभावान्नाधिकार इत्यत आह। मोक्षार्थित्वं तावदिति विकारत्वेनान्तवि
षयसुखस्य क्षयातिशयादिदोषदृष्ट्या निरतिशयसुखमोक्षार्थित्वं सत्सप्रवृत्तीनां देवानां
संभवती सामर्थ्यं। ननु विग्रहस्वाहेतुत्वादेश्चतुर्थ्यंतशब्दातिरिक्ता विग्रहवती देवता नास्ति
साध्वस्य चाभावात् सामर्थ्याभावान्नाधिकार इत्यत आह। तथेति। अर्थित्ववदिति सामर्थ्यमप्यस्तीत्य
माह। न च तेषामिति। श्रूयते इन्द्रो यज्ञेन वज्रहस्त इतिवत् देवादीनां विद्याधिकारनिषेधो नास्ति
सामर्थ्यं। ननु दिनत्वेन दृष्टसामर्थ्यसिद्ध्युपनयनाभावात् स्त्रीशूद्रवत् सामर्थ्यं नास्तीत्यत
आह। न चेति। जन्मांतराध्ययनबलात् स्वयमेव प्रतिभाताः सन्ति वेदा येषां ते तथा तद्व
त्त्वादि सामर्थ्यं बालादिषु प्रविष्टपिशाचादीनां वेदोद्घोषदर्शनात्। देवयोनीनां जन्मांतरस्मरण
मस्तीति स्मृतेश्च देवतानामर्थित्वविज्ञानोपपत्तेः सामर्थ्यं। देवानां च ऋषीणां च विद्याधिकारे का
रणमर्थित्वादिकमुक्त्वा श्रौतं गुरुकुलवासादि लिंगमाह। अपि चेति। ननु ब्रह्मविद्यादे
वादीनामधिकारोऽस्ति वेदार्थत्वात् अग्निहोत्रवदित्यत आह तद्रूपीति। देवानां कर्मस्वना
धिकारः देवतांतराणामुद्देश्यानामभावादिति प्रथमसूत्रार्थः ऋषीणामप्यनधिकारः

८३

र्थ्यं तदभावात् । विरोधः कर्मणीत्यादि । द्वितीयसूत्रार्थः । असामर्थ्यमुपाधिरिति परिहर
ति । न तदिति । असामर्थ्यरूपं कारणमित्यर्थः । न ह्यस्ति येनासामर्थ्यं स्यादिति दोषः । तद्यथा देवानां
प्रत्यक्षत्वं ध्यानतया वर्तमानत्वं तथापि तेषामिति वाक्यबोधोप्यनुमानस्य द्रष्टव्यः । ननु देवादीनां प्रत्य
गृह्यमानश्रुतिः कथं तेषामतादेहत्वे नेहहृदयस्यास्य दंष्ट्रमात्रत्वाभावात् । अतः श्रुतिषु तेषां ना
धिकार इत्यत आह । देवाद्यधिकारेपीति । ननु मंत्रादीनां प्रतीयमानविग्रहवत्त्वे नास्यर्थे कल्प
धित्वाद् देवादीनामधिकार इत्युक्तः स चायुक्तः । अन्यपराणां तेषां प्रत्यक्षादिविरोधेन स्वार्थे तात्प
र्यकल्पनानुपपत्तेरित्याक्षिप्य सूत्रचतुष्टयेन परिहरति । विरोधः कर्मणीत्यादिना । वर्ण्येत त
हीति दोषः । स्वरूपं विग्रहः । अभ्युपगमे प्रत्यक्षेण देवता दृश्येत न च दृश्यते । अतो योग्यानु
पलब्ध्या देवताया विग्रहवत्त्वाभावात् । संप्रदानकारकाभावेन कर्मनिष्पत्तिर्न स्यादित्या
ह । तदा चेति । विग्रहस्यांगत्वे अनुपलब्धिबाधितं पुरस्याच्च न संभवतीत्याह । न चेति । त
स्मादर्थोपहितशब्द एव देवता तस्या अचेतनत्वान्न विद्याधिकार इति शंकार्थः । परिहरति ।
नानेति । एकस्यापि देवस्य योगबलादनेकदेहप्राप्तिः श्रुतिस्मृतिदर्शनात्संभवतीत्यतो न व
कर्मणि विरोध इति व्याचष्टे । कस्मादित्यादिना । वैश्वदेवशास्त्रे शस्यमानदेवाः कतीति शाक
ल्येन पृष्टो याज्ञवल्क्यो निविदा त्रयश्चेत्यादिरूपयाऽनंतरं ददौ निविन्नाम शस्यमानदे
वसंख्यावाचकः शब्दः षडधिकानि त्रीणि शतानि त्रीणि सहस्राणीति संख्योक्ता संख्येय
स्वरूपप्रश्ने महिमानो विभूतयः सर्वे देवा येषां त्रयस्त्रिंशद्देवानां अतोष्टौ वसवः एकादश

रुद्राः द्वादशादित्याः इंद्रः प्रजापतिश्चेति त्रयस्त्रिंशद्देवा देवास्तेपि षण्णां अग्निपृथिवीवाय्वंतरिक्षादित्य
दिवां महिमानस्तेपि षट्सु देवेष्वंतर्भवंति । षड्देवास्त्रिषु लोकेषु त्रयश्च द्वयोरन्नप्राणयोर्द्वौ चैक
कस्मिन्प्राणे हिरण्यगर्भेऽन्तर्भवंतीति दर्शितमित्यर्थः । त्रयस्त्रिंशतोपि देवतानामिति संबंधः ।
दर्शनं श्रौतं व्याख्याय स्मार्तं व्याचष्टे । तथा स्मृतिरिति । बलं योगसिद्धिं । अणिमा महिमा चैव लघिमा प्रा
प्तिरीशिता । प्राकाम्यं च वशित्वं च यत्र कामावसायिता । सर्वैश्वर्याणि । एतेन अणुर्महान् लघुर्गु
रुश्च भवति योगी । अंगुल्या चंद्रस्पर्शः प्राप्तिः ईशिता सृष्टिशक्तिः । प्राकाम्यमिच्छानभिघातः ।
वशित्वं नियमनशक्तिः । संकल्पमात्राद्दिष्टलाभो यत्र कामावसायिता । तद्भेदः । आमानसिद्धा
नां जन्मनासिद्धानामित्यर्थः । फलितमाह । अनेकेति । अनेकेषु कर्मस्वेकस्य प्रतिपत्तिरंगभाव:
तस्य लोके दर्शनादिति व्यतिरेकमाह । क्वचिदेकइति । प्रकृतोपयुक्तमन्वयदृष्टांतमाह । व
क्ष्यतीति । कर्मण्यविरोधमंगीकृत्य शब्दप्रामाण्यविरोधमाशंक्य परिहरति । शब्द इति चेन्नाद
ति । मा प्रसंञ्जि प्रसक्तो माभूदित्यर्थः । औत्पत्तिकसूत्रे शब्दार्थयोरनाद्योः संबंधस्यानादित्वा
दृष्टमानांतरानपेक्षत्वेन प्रामाण्यमुक्तं इदानीं अनित्यविग्रहव्यक्त्यभ्युपगमे तत्संबंधस्या
प्यनित्यत्वात् मानांतरेण व्यक्तिं ज्ञात्वा शब्दस्य संकेतः पुंसा कर्तव्य इति मानांतरापेक्षत्वात्प्रा
माण्यस्य विरोधः स्यादित्याह । कथमित्यादिना । किं शब्दानां अनित्यतया संबंधस्य कार्यत्वमाप्रा
द्यते उतार्थानामनित्यतया नाद्य इत्याह । नाथ मपीति । कर्मण्यविरोधवदित्यपेरर्थः । देवादिव्य
क्तिहेतुत्वेन प्रागेव शब्दानां सत्त्वान्नानित्यत्वमिति भावः । अत्र पूर्वापरविरोधं शंकते । नन्विति ।

शब्दस्य निमित्तत्वेन ब्रह्मसहकारित्वात् अविरोध इत्यन्यां व्यक्तिं तीयं कल्पमुत्थापयति। अपि चेति। अ-
नित्यत्वे साधिते व्यक्तिरूपार्थानामनित्यतया शब्दानां संबंधस्यानित्यत्वं दुर्वारं। तस्मात्पौरुषेय-
संबंधसापेक्षत्वात्प्रामाण्यविरोध इत्यर्थः। न च व्यक्तीनामनित्यत्वेपि घटत्वादिजातिसमवायसं-
तु शब्दसंबंधोपि नित्यः स्यादिति वाच्यं। इतरयाश्रितसंबंधस्यान्यतराभावे स्थितिसंयोगेन दृष्टांता-
सिद्धेरिति भावः। यथा गोत्वादयो गवादिशब्दवाच्याः तथा वस्तुतो घाकृतयो वस्वादिशब्दार्थाः
न व्यक्तय इति परिहरति। नेत्यादिना। शब्दानां तदर्थानां जातीनां च नित्यत्वात्तत्संबंधोपि नित्य इ-
ति प्रतिपादयति। नहीत्यादिना। व्यक्तीनामानंत्यादिति। न च गोत्वावच्छेदेन व्यक्तिषु शक्तिः स्-
मतेति वाच्यं। सामान्यस्याप्रत्यासत्तित्वेन सर्वव्यक्त्युपस्थितेरभावात् गोत्वे शक्यतावच्छेदक-
मितिमतापेक्षया गोत्वं शक्यं इति लाघवात्। निरूढलक्षणया व्यक्तेर्लाभेनानन्यलभ्य-
त्वाभावादित्याशयः। पक्षे केवलव्यक्तिषु शक्तिस्त्वनित्यत्वेऽनुपपत्तिरानंत्येन विनैव व्यक्तेः श-
क्त्यापत्तेः जातिस्थाने विषमत्वेन इष्टपर्यवसानस्यावश्यकत्वात्। तथा च नित्ययजातितादात्म्ये
न व्यक्तेरनादित्वात्संबंधोप्यनादिः स्वरूपवादात्। अत एव वाक्यपदीये त्वमस्यादिवाक्येष्वा-
न व्यक्तेरनादित्वात्तत्संबंधोप्यनादिः ... वाच्यैकदेशाभावात्। अतः प्रभ-
गलक्षणोक्तः पुनः स्वतः केवलसामान्यस्य वाच्यत्वे खंडशत्वं वाच्यैकदेशाभावात्। अतः प्रभ-
गलक्षणोक्तः पुनः केवलव्यक्तिर्निरास इति गम्यते। केवलव्यक्तिवचनाः खल्वित्यादि
वादिति सूत्रस्यारंभः केवलव्यक्तिनिरास इति गम्यते। ... व्यक्तिप्रवर्तकत्वेन प्राग्गवसंतीति
शब्दाः अर्थानंतरभाविनः लोके तिक्तः गवादिशब्दास्तु व्यक्तिप्रवर्तकत्वेन प्राग्गवसंतीति
न व्यक्तिमात्रवचनाः लोके तिष्ठाः किंतु स्थूलसूक्ष्मभावेनानुस्यूतव्यक्त्यविनाभूतसा-

समवायिनि मते

शुक्तिः ३

मान्त्रवचना इति मंतव्यं । न चेन्द्रादिव्यक्तेरेकत्वेन जात्यभावादाभ्यां शंकावतरद् इन्द्रादिशब्दाः केवल
व्यक्तिवचना इति संप्रतं । अतीतानागतव्यक्तिभेदेन जात्युपपत्तेरित्यलं प्रपंचेन दूषणं तदुपसंह
सदार्थीतिकमाह । व्यक्तिर्विसादिना । आकृतिर्जातिः । ननु का तर्हि व्यक्तिः यदनुगतेन्द्रादि
तिः शब्दार्थः स्यादित्यत आह । आकृतिविशेषस्येति । वज्रहस्तः पुरन्दर इत्यादि यद्वस्तर्थः । इ
न्द्रादिशब्दानां जातिः इन्द्रादिषु प्रवृत्तिनिमित्तमित्युक्त्वा उपाधिनिमित्तत्वमाह । स्थानेति । व्यक्ति
प्रलयेऽपि स्थानस्य स्थापित्वात् शब्दार्थसंबंधनियत इत्याह । ततश्चेति । उक्तं पूर्वापरविरोधं प
रिहरति । न चेति । शब्दो निमित्तमि सवि[illegible]रोधं मन्त्रसूत्ररोषमवतारयति । कथं पुनरिति ।
स्मृतेरस्य प्रामाण्यार्थं मूलश्रुतिरनुमीयत इत्यनुमानं स्मृतिः । हन्ते अस्य गर्मिंद वसितरः पवि
त्रमाशाव: । विश्वान्यभि सौभगा । सेत न्ने त्रसेते: पदैः स्वसीत्रलादवादीनसज्ञता । तत्रैव इति प
दं सर्वनाम । ता देवानां स्मार कं अस्य धूमरूचिरं तत्प्रध्याने देहे रमंत इति अस्य ग्रामनुष्याः चंद्र
स्थानां पितृणां इन्दुशब्दः स्मारकः पवित्रं सोमस्यो तन्त्रितर स्कुर्वतां ग्रहाणां तिरः पवित्रशब्दः
अच्छोऽस्मृयतां सोत्राणां गीतिरूपाणां आभुशब्दः अस्य च्यमः सामेतिश्रुतेः स्तोत्रानंतरं प्र
योगविहितानां शस्त्राणां विश्वशब्दः सर्वत्र सौभाग्यदूतानामपि सौभगशब्दः स्मारक इति छ
दोगब्राह्मणवाक्यार्थः स प्रजापतिः मनसा वाचं त्रयीं मिथुनं समभवत् । मनो वाग्रूपं मि
थुनं संपादितवान् मनसा त्रयीप्रकाशितां सृष्टिमालोचितवानित्यर्थः । रश्मिरित्येवादि स
मस्तजगत्स्रष्टाऽदिश्रुतिरादिशब्दार्थः । संप्रदायो गुरुशिष्यपरंपराध्ययनं । तं स्थानं वस्थाः प्र

ज्ञापंति स्वरुचिः शब्दपूर्विकैस्त्रष्टित्वात् प्रत्यक्षवदाद्विवदिति। प्रत्यक्षानुमानाभ्यामभिसत्यार्थीत
रमाह। आपि चेति। अतः प्रत्यक्षप्रसंगात् शब्दस्य रूपं वक्तुमुत्तरमाक्षिपति॥ कृपात्मक
मिति। वर्णरूपं तद्व्यतिरिक्तस्फोटरूपं चेति किं शब्दार्थः। तत्र वर्णानामनित्यत्वात् स्फोटस्य
चाखत्वात् न जगद्धेतुत्वमित्याक्षेपो द्वितीयपक्षं वैयाकरणो गृह्णाति। स्फोटमिति। स्फु
ट्यते वर्णैर्व्यज्यत इति स्फोटो वर्णाभिव्यंग्योऽर्थस्य व्यंजको गादिशब्दो नित्यः। तमभिप्रे
त्येदमुच्यत इति पूर्वेणान्वयः। स एवाद्यपक्षं दूषयति। वर्णेति। सोयं गकार इति प्रत्यभि
ज्ञया वर्णनित्यत्वसिद्धेर्नानुपपत्तिरित्यत आह। उत्पन्नेति। तारत्वमंदत्वादिविरुद्धधर्म
वत्वेन तारो गकारो मंदो गकार इति प्रतीयमानगकारस्य भेदानुमानात् प्रत्यभिज्ञा गत्वजातिवि
षयेत्यर्थः। ननु विरुद्धधर्मत्वानं चान्यूपाधिकं भ्रममित्यत आह। नचेति। तथा च वर्णानाम
नित्यत्वान्न जगद्धेतुत्वमिति भावः। किंच तेषामर्थबोधकत्वायोगात् स्फोटोंगीकार्य इत्या
ह। नच वर्णेभ्यस्तादिना व्यभिचारात् एकस्माद्वर्णादर्थप्रतीत्यदर्शनात्। वर्णान्तरवैयर्थ्य
प्रसंगाच्चेत्यर्थः। नहि वर्णानां समुदायो बोधक इत्याशंक्य क्षणिकानां सहनास्तीत्याह। नचे
ति। वर्णानां स्वतः साहित्याभावेपि संस्कारलक्षणा पूर्वद्वारा साहित्यमानत्वादिग्राणाना
मित्येति सांकेतो पूर्वेति। किमयं संस्कारो वर्णैर्जनितः पूर्वाख्यः कश्चिदुत वर्णानुभवज
नितो भावनाख्यः। नाद्यो मानाभावात्। किंचापमत्तालोज्ञातो वाऽर्थधीहेतुः नाद्यस्या
हः। तन्नेति। संस्कारसहितः शब्दो ह्यातत एवार्थधीहेतुः संबंधग्रहणमपेक्ष्य बोधकत्वा

तदूर्ध्वमादिवदिति सूत्रः। द्वितीये द्वितीयप्रत्यक्षेण तावदुत्पन्नावयवीभिर्योगेन नाघटत्वात्। नचेति। द्वितीये शंकते।
कार्येति। कार्यमर्थधीस्तस्यां जातायां संस्कारप्रत्ययः तस्मिन्नजाते सेति परस्पराश्रयेण दूषय
ति। नेति। पदार्थस्मरणस्यापि पदज्ञानानंतरभावित्वात् तेन संस्कारसहितोऽन्त्यवर्णः समर्थपद
स्य ज्ञानेन युक्तमित्यक्षरार्थः। अपिशब्दः परस्पराश्रयद्योतनार्थः। एतेन भावनासंस्कारपक्षोऽपि
निरस्तः। तस्य वर्णस्मृतिमात्रहेतुत्वेनार्थधीहेतुत्वायोगात्। नन्वंत्यवर्णसाहित्यमर्थधीहेतुः सं
केवलसंस्कारस्य तु वर्णस्मृतिहेतुत्वमिति वाच्यं अर्थधीपूर्वकाले भावनाया ज्ञानाभावेनार्थ
धीहेतुत्वायोगात्। न च वर्णस्मरणेनानुमितासाम्यं सवर्णसाहितार्थधीहेतुरिति वाच्यं तत्कार्य
स्य क्रमिकस्य वर्णस्मरणस्याप्यंत्यवर्णानुभवानंतरभावित्वेन तेनानुमितभावनानामंत्यवर्ण
साहित्याभावादिति भावः। वर्णानामर्थबोधकत्वासंभवे फलमाह। तस्मादिति। स्फोटे दृढं मा
नमित्याशयेनैकं पदमिति प्रत्यक्षं प्रमाणमित्याह। स्वेति। यथा रत्नतत्त्वं परीक्षकस्य प्र
त्ययैः स्फुटं भासते तथा गवादिपदस्फोटो गकारादिवर्णकृतप्रत्ययैः स्फोटविषयैः आहिताः
संस्कारा बीजं यस्मिन् चित्ते तस्मिन्नंत्यवर्णकृतप्रत्ययेन जनितः परिपाको यस्य संस्कारो य
स्मिन् तस्मिन् प्रत्ययाधिनि चित्ते ताद्रूप्यो गौरिति पदमिति प्रत्ययः प्रत्यक्षः तद्विषयतया स्फुट
मवभासत इत्यर्थः। अनेन वर्णान्वयव्यतिरेकयोः स्फोटज्ञानेऽन्यथासिद्धिः। न चैवमस्मा
द्वर्णानामनेकस्फोटाभिव्यक्तिः येन वर्णांतरवैयर्थ्यं किंतु रत्नवद्दृढप्रत्ययसंस्कृते चित्ते सम्य
गेकस्फोटाभिव्यक्तिरित्युक्तं भवति। नन्वेवं पदमेकं वाक्यमिति प्रत्ययः पदवाक्यस्फोटयोर्न

प्रमाणं तस्य वर्णत्वव्याप्यत्वेन न स्यादिति त्वादित्याशंक्य निषेत्स्यति । नचेति । स्फोटस्य तादृशत्वे लाघवं
नित्यत्वमाह । तस्येति । ननु तदेवेदं पदमिति प्रत्यभिज्ञा भ्रमः दृष्टान्तादि भेदप्रसक्त्यादित्यत आ
ह । भेदेति । आचार्यसंप्रदायोक्तिपूर्वकं लिङ्गं दर्शयति । वर्णास्त्वेवेति । वर्णातिरिक्तस्फोटवादिस्तु
शब्दस्यानुपलब्ध्या नाशो हानिरित्यर्थः । सादृश्यदोषादियं भ्रान्तिरिति शंकते । सादृश्यादिति । वर्ण
मानेतरत्वएवमेके शाङ्करीतिधी भ्रान्तिरिति युक्तं । भेदधी विरोधात् स एवायं वर्ण इति धीस्त्व
प्रमेव बाधकाभावादित्याह । नेति । गोत्वादिप्रत्यभिज्ञावत् वर्णेषु प्रत्यभिज्ञा गत्वादिवि
षयेति शंकते । प्रत्यभिज्ञानादिति । व्यक्तिभेदे सिद्धे प्रत्यभिज्ञाया जातिविषयत्वं स्यात् तत्स
पापीतं जलं तदेव मयापीतमिति साम्ये । न तथेह व्यक्तिभेदः सिद्ध इति परिहरति । न व्यक्तीति ।
न सेत्स्यतीति । वस्तुतस्त्वन्यत्वे ह्यानमित्यर्थः । उदात्तत्वादिविरुद्धधर्मत्वात् व्यक्तिभेदोऽनुमान
सिद्ध इत्यनुवदति । नन्विति । भेदप्रत्ययस्य कुंभकूपाकाशभेदप्रत्ययवदौपाधिकत्वे इवि
षयत्वात् अन्यथाऽसिद्धेः । अनन्यथासिद्धव्यक्त्यैक्यप्रत्यभिज्ञया निरपेक्षस्वरूपान्तरेण नत्याबाध
इत्युत्तरमाह । अत्रेति । तात्पर्यादिदेशेः कोष्ठस्थवायुसंयोगविभागाभ्यां अभिव्यञ्ज्यत्वात्
वर्णेषु वैचित्र्यमित्यर्थः । कल्पनागौरवाच्च वर्णेषु स्वतो भेदो नास्तीत्याह । अपि चेति । अतएव
तः गकारादिव्यक्तीयत्वास्तु प्रत्यभिज्ञानार्थं गत्वादिजातयस्तास्तु चोदात्तत्वादिभेदस्यौपा

धिकत्वमिति कल्पना । एवं वर्णव्यक्तिभेदमात्रस्योपाधिकत्वकल्पनमिति यत्तस्यानेकत्वकल्पनातो नोच
कल्पनमयुक्तमित्यर्थः । ननु भेदस्य बाधकाभावात् नौपाधिकत्वमित्यत आह । एवमिति । अस्तु तर्हि
प्रत्यक्षद्वयप्रामाण्याय भेदाभेदयोः सत्यत्वं तत्राह । कल्पनेति । द्वयोर्विरोधात् भेदऔपा
धिक एवेत्यर्थः । ननु नानासंयोगादेरतीन्द्रियत्वान्न तद्गतवैचित्र्यस्यारोपसंभवादेवं वर्णेषु प्रत्यक्षारो
पः संभवतीत्यरुचिं वदिष्यन् स्वमतमाह । अथवेति । ध्वनिधर्मा ह्रस्वत्वादयो ध्वनिभेदाध्या
साद्वर्णेषु भान्तीत्यर्थः । प्रसङ्गपूर्वकं ध्वनिस्वरूपमाह । कइति । अवतरति । स ध्वनिविशेषः । वर्णा
तिरिक्तः शब्दो ध्वनिरित्यर्थः । समीपं गतस्य पुंसः स्तारत्वमंदत्वादिधर्मान् स्वगतान् वर्णेषु समा
रोपयतीत्याह । प्रत्यासीदतश्चेति । आदिपदं विवृणोति । तदिति । नन्वेवं वर्णानां ध्वनिनो
तिरिक्तत्वमत आह । वर्णानामिति । प्रत्युच्चारणं वर्णा अनुवर्तन्ते ध्वनिर्व्यावर्तत इति भेदः इत्य
र्थः । अन्यथा वाचिकं रूपे वर्णेष्वनुवर्तमानेषु ध्वनिबुद्धिः स्यात् । दुंदुभ्यादिध्वनौ शब्दत्वमात्रेण
गृह्यमाणेऽयमयं वर्ण इति धीः स्यादिति भावः । एवं ध्वन्युपाधिकत्वं स्वमते तु णत्वं वदन्
वायूपाधिकत्वे पूर्वोक्तामरुचिं दर्शयति । एवं चेत्यादिना । अस्य को दोषस्तत्राह । संयोगेति ।
वायुसंयोगादेरत्र वर्णादित्यर्थः । तस्मात् श्रावणं ध्वनिरेवोदात्तत्वाद्यारोपोपाधिरिति भा
वः । एवं निरूढधर्म ध्वनीनां भेदेऽपि तेषामनुगता वर्णा न भिद्यन्त इत्युक्तं । तदेव दृष्टान्ते
न द्रढयति । अपि चेति । यथा खण्डमुण्डादिविरुद्धानेकव्यक्तिष्वपि गोत्वं गोत्वं तथा ध्वनि

ति

श्च वर्णाभिव्यञ्जका एवेत्यर्थः। द्रुतत्वादिध्वनिस्तद्भेदेन हेतुना वर्णानामपीति। योऽज्ञानात्प्रत्यभिज्ञाविरो
धादित्यस्यार्थः। यद्वा द्रुतत्वादिभेदविशिष्टतया प्रतीयमानत्वाद्वर्णानां भेद इत्या
शंकां दृष्टान्तेन निरस्यति। अपि चेति। वर्णानां स्वाभिमतं प्रसाधयते प्रमेयवाचकत्वं वक्तुं स्फोटं
विघटयति। वर्णेष्वथेति। कल्पनामसहमानः शंकते। नेति। यथैकत्र पादर्पणमुक्तायां बुद्धौ मुखवै
लक्षण्यं तत्रैव वर्णयुक्तायां बुद्धौ धियैवैकत्वेतरस्फोटः प्रत्यक्षः स्यात्। प्रतीतीति। यस्यां संविदि योऽर्थो
भासते स तत्र प्रमाणम्। एकं पदमिति बुद्धौ वर्णा एव स्फुरन्ति नातिरिक्तः स्फोट इति न स्फोटे प्रमा
णमिति स्यात्। नास्माकमपीत्यादिना। ननु गोपदबुद्धेः स्फोटो विषयो गकारादीनां तु व्यंजकत्वादनु
वृत्तिरित्यत आह। यदि हीति। व्यंग्यव्यक्तिबुद्धौ व्यंजकस्य भानं स्यात्तु नूनं तेन रददर्शनादित्यर्थः। वर्ण
समूहालंबनेनोपपत्तेर्न स्फोटः कल्पनीयः। पदार्थान्तरकल्पनागौरवादित्यात्। तस्मादिति। अ
नेकस्याप्येकोपाधिवशमेकत्वं युक्तमित्यात्। संभवतीति। ननु तत्रैकदेशादिरूपाधिरस्ति प्रकृ
ते कउपाधिरित्यत आह। यात्मिति। एकार्थत्वं क्रमेकं पदं प्रत्यानार्थं एकस्मिन्नतो स यंपदेकंवा
क्यमिति सेकार्थसंबंधादेकत्वोपचार इत्यर्थः। नन्वैकपदत्वेऽत्राते एकार्थत्वानेकस्मिन्नतोऽतत
दिसन्येन्याश्रय इति वाच्यं। इन्तमवबोधकानां क्रमेणानां सवर्णश्रवणानंतरं कालस्येक्षस्य तै
कृतानां मध्यमवकृत्स्यप्रवक्त्रादिलिंगानुमितैकार्थधीहेतुत्वनिश्चये सत्येकपदवाक्यस
निश्चयात्। वर्णसमूहोपि पदपनेदहेष्येर्वर्णातिरिक्तं पदं स्फोटाख्यं भागीकार्यमिति शंकते।

त्यो

175

प्रा॰ पत्रा॰ हि॰ रा॰

८८

प्र॰ ५ता॰

नत्रोहेति। क्रमभेदादुर्वर्णेष्वेव पदभेददृष्टिरिति परिहरति। अत्रेति। ननु नित्यविभूनां वर्णानां युगपत्क्र-
मः क्वचिद्वा पदस्वरूपज्ञाने नार्थधीहेतुस्तत्राह। बुद्धेति। व्युत्पत्तिदशायां उच्चारणक्रमेणोपलब्धि-
क्रममनुपतन्त्यमानवर्णैर्धारोप्यैते वर्णा एतत्क्रमेतत्संख्यावंत एतदर्थस्य वाचका इति गृहीताः। तावता स्तत
स्तोत्रः प्रवर्तते कालेन तथैव स्वरूपारूढाः स्वस्वार्थं बोधयन्तीत्यर्थः। स्थायिवर्णवादमुपसंह-
रति। वर्णेति। एवं वर्णानामर्थबोधकत्वं जहत् स्फोटः। सम्प्रति वर्णानामस्थिरत्वमंगीकृ-
त्य प्रौढिवादेन स्फोटं विघटयति। अथापीति। स्थिराणि गत्वादिसामान्यानि क्रमविशेषवंति
गृहीतसंगतिकान्यर्थबोधकानीति कल्पनीयं सामान्येषु प्रक्रिया संचारयितव्या। न त्वकृ-
ष्टः स्फोटः कल्पनीय इत्यर्थः। वर्णानां स्थायित्ववाचकसंयोः सिद्धो फलितमाह। तत इति।
पूर्वतंत्रवक्तानुवादपूर्वकं सूत्रं व्याचष्टे। कर्तृत्वेत्यादिना पूर्वतंत्रे सिद्धमेव वेदस्य नित्यत्वं
देवादिव्यक्तिस्रष्टेतद्वाचकशब्दस्यापि स्रष्टृत्वसिद्धौ मितात्रांशस्य निराकृतिवाचकच्छद्मा का
व्यक्तिजन्मोत्पत्त्या लौकिकत्वं निरस्य वेदोऽवांतरप्रलयावस्थायामप्यज्ञाकृत्यादीश्वरवदि-
त्यनुमानेन न दुष्यतीत्यर्थः। यत्नेन पूर्वसुकृतेन वाचो वेदस्य लाभयोग्यतां प्राप्ताः संतो
यानृषिकां मृषिषु स्थितां लब्धवंत इति मंत्रार्थः। आनुपूर्व्यामुपलब्धौ पूर्वमवांतर
कल्पादौ। ननु महाप्रलये जाते स्पष्टलब्धा तु शब्दार्थसंबंधानित्यत्वं इत्याशंक्याह। समा
नेति। सूत्रनिरस्यां शंकामाह। अथापीति। व्यक्तिसंततौ जातीनामवांतरप्रलये सत्त्वात्

कृ

८८

संबंधस्तिष्ठति व्यवहाराविच्छेदात् ज्ञायते चेति वेदस्यानपेक्षत्वेन प्रामाण्येन कश्चिद्विरोधः स्यात्।
निर्लेपलये तु संबंधनाशात् पुनः सृष्टौ केनचित् सुसासंकेतः कर्तव्य इति पुरुषबुद्धिसापेक्षत्वेन
वेदस्याप्रामाण्यं अध्यापकस्याश्रयस्य नाशादाश्रितस्यानित्यत्वं च प्रासंग इत्यर्थः। महाप्रलये
ऽपि निर्लेपलयो ऽसिद्धः सत्कार्यवादात्। तथा च संस्काराल्मना शब्दार्थतत्संबंधानां सत्तामेव पु
नः सृष्टावपि यतः नित्यत्वं। अपि च यत्कोनां पूर्वकल्पीयनामरूपसमानत्वात् न संकेतः कु
नचित् कार्यः किं च महत्पृष्टौ हि संकेतापेक्षा न तु कल्पान्तरस्थत्वादिति परिहरति। तत्रेदमित्यादिना।
नन्वादिसृष्टौ संकेतः कार्य इत्यत आह। तदापीति। महासर्गप्रलयकल्पेऽपीत्यर्थः। नन्वेवं सत्स
नादिसंस्कारे संबंधस्यानादित्वं तथापि महाप्रलयव्यवधानात् अस्मरणे कथं वेदार्थव्य
वहारस्तत्राह। अनादेश्चेति। न कश्चिद्विरोधः शब्दार्थसंबंधस्मरणादेरिति शेषः। स्वापप्र
बोधयोर्लयसर्गौ हि [illegible]मांसां श्रुतिमाह। स्वापेति। अथ तदा सुषुप्तो प्राणे परमात्मनि जीव
एकीभवति एवं प्राणे सजीवस्तदेति शेषः। एतस्मात्प्राणात् मनः आयतनं गोलकं आनंत
र्ये पंचमी प्राणेभ्य इत्यादि द्रष्टव्या। स्वप्नवत् कल्पितस्यासत्त्वात्तस्याभावात् तद्दर्शनं स्वापे इति भ
दर्शनं लयः इति दृष्टिसृष्टिपक्षः श्रुत्यभिप्रेत इति भावः। दृष्टांतवैषम्यमाशंक्य परिहरति।
स्वादित्यादिना। अविरुद्धमनुसंधानादिक्रममिति शेषः। हिरण्यगर्भादयः पूर्वकल्पानुसंधा
नप्रभावाः संसारित्वात् दृष्टांतवदित्याशंक्याह। यद्यपीति। इति यद्यपि तथापि न प्राकृतवदिति

योजना। ज्ञानादेर्निष्कर्षवदुत्कर्षोपयोगीकार्यः बाधाभावादिति न्यायानुगृहीतश्रुत्यादिभिः सामान्य
तो दृष्टानुमानं बाध्यमित्याह। यथाहीत्यादिना ननु तथापि पूर्वं कृत्स्नेश्वराणामुत्कर्षादस्मिन्न
कल्पे कोनुसंधातेत्यत आह। तत्रश्चेति। ज्ञानाद्युत्कर्षादिरित्यर्थः। मुक्तेश्वरोऽस्मिन्नुत्कर्षे धातारं इति
पवाचः परमेश्वरानुगृहीतो ज्ञानेनातिशये पूर्वोक्तश्रुतिस्मृतिवादानात। तथाचेति। पूर्वकल्पा
दौ सृजति तस्मै ब्रह्मणे प्रहिणोति गमयति तस्य बुद्धौ वेदमाविर्भावयति यः तं देवं स्वात्मा
कारं मातृताबाव्यो आत्मबुद्धिप्रकाशमानं शरणं परमभयस्थानं निःश्रेयसरूपमहं प्रपद्ये य
इत्यर्थः। न केवलमैश्वर्यस्यैव ज्ञानातिशयः किं त्वन्येषां सारस्वतादृष्णां इति विश्वासार्थमाह।
स्मरंतीति। ऋग्वेदे दशमंडलावयवं यवाग्वन्तं [illegible] दाशतय्यः वेदांतरेपि काण्डसूक्त
मंत्राणां द्रष्टारो बोधायनादिभिः स्मर्यंत इत्याह। प्रतीति। किंच मंत्राणां ऋष्यादिज्ञानाभाव
कत्सम्प्रापिका श्रुतिर्मंत्रदृगृषीणां ज्ञानातिशयं दर्शयतीत्याह। श्रुतिरपीति। आर्षेयम् ऋषि
योगः छंदो गायत्र्यादि दैवतमग्न्यादि ब्राह्मणं विनियोग एतान्यविदित्वा यस्मिन्मंत्रे ते
नेत्यर्थः। स्थाणुं स्थावरं गर्तं नरकं तथाच ज्ञानाधिक्ये कृत्स्नं तदितरं वेदस्यैव प्रबंधस्य
प्रवर्तितत्वात् तद्वेदस्यानादित्वं अनपेक्षितत्वं चाविरुद्धमिति भावः। अथ धर्मानुमानमारूप
त्वं प्रपंचयति। प्राणिनां चेति। ततः किं तत्राह। दृष्टेति। तेहि कामुष्मिकविषयसुखरागारू
त धर्मस्य फलं स्वर्गादिदृष्टं दृष्टपश्वादिसदृशमिति यत्तं विसदृशो कामाभावेन हेत्वभावात्
तथा दृष्टदुःखद्वेषकृताधर्मफले दृष्टसदृशादुःखमेव न सुखं कृतघ्नत्वादि दोषापत्तेरित्यर्थः।

९
८

संबंधस्तिष्ठति व्यवहाराविच्छेदात् ज्ञायते चेति वेदस्यानपेक्षत्वेन प्रामाण्येन कश्चिद्विरोधः स्यात्।
निर्लेपलये तु संबंधनाशात् पुनः सृष्टौ केनचित् सुसंकेतः कर्तव्य इति पुरुषबुद्धिसापेक्षत्वेन
वेदस्याप्रामाण्यं अल्पापकृत्स्याश्रयस्य नाशादखिलस्यानित्यत्वं च प्राप्तं इत्यर्थः। महाप्रलये
ऽपि निर्लेपलयोऽसिद्धः सत्कार्यवादात्। तथा च संस्काररूपात्मना शब्दार्थतत्संबंधानां सत्तामेव पु
नः सृष्टावपि व्यक्तेर्नानित्यत्वं। अपि च व्यक्तीनां पूर्वकल्पीयनामरूपसमानत्वात् न संकेतकृ
न चित्कार्यः विषमसृष्टौ हि संकेतापेक्षा न तुल्यसृष्टावितिपरिहरति। तत्रेदमित्यादिना।
नन्वाद्यसृष्टौ संकेतः कार्य इत्यत आह। तदापीति। महासर्गप्रलयमध्यवर्त्तो वपीसर्गः। नन्वेवं सं
सारस्यानादित्वे संबंधस्यानादित्वे तथापि महाप्रलयव्यवधानात् अस्मरणे कथं वेदार्थव्य
वहारस्तत्राह। अनादौ चेति। न कश्चिद्विरोधः शब्दार्थसंबंधस्मरणादेरितिशेषः। स्वापप्र
बोधयोर्लयसर्गाभिव्यक्तिमाहात्म्यश्रुतिमाह। स्वापेति। अथ तदा सुषुप्तौ प्राणे परमात्मनि जीव
एवैकीभवति एवं प्राणे स जीव स्वतदेतिशेषः। एतस्मात्प्राणात्मनः आयतनं लोककं आनंत
र्ये पंचमी प्राणेभ्य इत्याद्यध्याहर्तव्या। स्वप्नवत् कल्पितस्यात्मतत्त्वाभावात् तद्दर्शनं स्यादिति भ
दर्शनं लयः इति दृष्टिसृष्टिपक्षः स्वसंमतिप्रेत इति भावः। दृष्टांतवैषम्यमाशंक्य परिहरति।
स्यादित्यादिना। अविरुद्धमनुसंधानादिकमिति शेषः। हिरण्यगर्भादयः पूर्वकल्पानुसंधा
नशक्ताः संसारित्वादस्मदादिवदित्याशंक्याह। यद्यपीति। इति यद्यपि तथापि न प्राकृतवदिति

योजना। ज्ञानातिशयं सर्ववत् कृत्स्नप्रयोगीकार्यः बाध्याभावादिति न्यायानुगृहीतश्रुत्यादिभिः सामान्य
तो दृष्टानुमानं बाध्यमिति स्यात्। यथाहीत्यादिना। ननु तथापि पूर्वं कृत्स्नेश्वराणामुत्कृष्टादस्मिन्
कृत्स्ने कोऽनुसंधाता इत्यत आह। ततश्चेति। ज्ञानाद्युत्कर्षादित्यर्थः। मुक्तेश्वरोऽन्ये दृष्टं या तारतम्यमिति
परावः परमेश्वरानुगृहीतो ज्ञानातिशये पूर्वोक्तश्रुतिस्मृतिवादनात्। तथा चेति। पूर्वकल्पा
दौ सृजतीति तस्मै ब्रह्मणे प्रहिणोति गमयति तस्य बुद्धौ वेदमाविर्भावयति यः तं देवं स्वात्मा
कारं महावाक्योत्थबुद्धिप्रकाशमानं शरणं परमभयस्थानं निःश्रेयसस्वरूपमहं प्रपद्ये
इत्यर्थः। न केवलं मुक्तस्यैव ज्ञानातिशयः किं त्वबद्धानां सारस्वादीनां इति विश्वासार्थमाह।
स्मरंतीति। ऋग्वेदे दशमंडलावयवं यद्वामदेव त्रयेवाचो दारा तत्र्यः वेदांतरेऽपि कांडसूक्त
मंत्राणां द्रष्टारो बोधायनादिभिः स्मृता इत्याह। प्रतीति। किं च मंत्राणां ऋष्यादिज्ञानावश्य
कत्वख्यापिका श्रुतिर्मंत्रदृगृषीणां ज्ञानातिशयं दर्शयतीत्याह। श्रुतिरपीति। आर्षेयमृषि
यागः छंदो गायत्र्यादि दैवतमग्न्यादि ब्राह्मणं विनियोग एतान्यविदित्वा यस्मिन्मंत्रे ते
नेत्यर्थः। स्थाणुं स्थावरं गर्तं नरकं तथा च ज्ञानाधिक्ये कृत्स्नं तदितरत्वे वेदस्य सोपबृंहणस्य
प्रवर्तितत्वात्तद्वेदस्यानादित्वं अनपेक्षितत्वं चाविरुद्धमिति भावः। अन्यूनासमानमनुरूप
त्वं प्रपंचयति। प्राणिनां चेति। ततः किं तत्राह। दृष्टेति। ऐहिकामुष्मिकविषयसुखरागरू
तधर्मस्य फलं पश्वादिदृष्टं पश्वादिसंपद्रूपमित्ययुक्तं विसदृशं कामाभावेन हेत्वभावात्
तथा दृष्टदुःखद्वेषकृताधर्मफलं दृष्टसदृशादुःखमेव नरस्वर्गकृतं ज्ञान्यादिदोषापत्तेरित्यर्थः।

तदर्थं ते दृष्टान्तमाह । स्मृतिश्चेति । उत्तरसृष्टिः पूर्वसृष्टिसजातीया कर्मफलत्वात् । पूर्वसृष्टिवदनुमा
नेन च शङ्कार्थः । तेषां प्राणिनां मध्ये तान्येन तज्जातीयान्येव तानि दर्शयन् तत्र प्रासे हेतुमाह । किं
त्वेति । कर्माणि विहितनिषिद्धसाक्षात्कारेण पूर्वं क्रियाहीनं संस्कारं च जनयति । तत्रापूर्वात्फ
ले भुक्ते संस्कारस्याविलत्वात् पुनस्तज्जातीयानि करोतीत्यर्थः । संस्कारे लिङ्गमाह । तस्मादिति ।
संस्कारवशा ▮ देव पुण्यं पापं वा रोचते ऽतोऽभिरुचिलिङ्गात् पुण्यापुण्यसंस्कारोऽनुमेयः स एव
स्वभावः प्रकृतिशीलनेति च गीयते । एवं कर्मणा सृष्टिसादृश्यमुक्त्वा स्वोपादाने लीनकार्य
संस्काररूपशक्तिमत्त्वादपि सादृश्यमाह । प्रलीयमानमिति । इतरथा निःसंस्कारप्रलये
जगद्वैचित्र्यस्याकस्मिकत्वं स्यादित्यर्थः । ननु जगद्वैचित्र्यकारिण्योऽन्याः शक्तयः कल्प्यं
तां तत्राह । न चेति । अविद्यायां लीनकार्यात्मकसंस्कारादन्याः शक्तयो न कल्प्याः मानाभावा
द्गौरवाच्च । स्वोपादाने लीनकार्यरूपा शक्तिस्तु महाप्रलयेऽपि तिष्ठतीति श्रुत्यस्य सौम्येति श्रु
तिसिद्धा अनतो विद्यातत्स्था यदन्याः शक्तयो न सन्ति आत्माविद्यैव नः शक्तिरिति सिद्धान्तइ
त्यर्थः । निमित्ते त्वप्युपादानस्य कार्यमेवाविद्याघटनया शक्तिरन्यावेत्तनाम्नहः । उपादाने
कार्यसंस्कारसिद्धेः फलमाह । ततश्चेति । यथा सुप्तोत्थितस्य पूर्वचस्वजातीयमेव चस्व
र्णयते तस्य रूपजातीयमेवारणरा तिनरसादिकं भोग्यान् कर्मयोगाश्रयाः प्राणिनिका
▮ न्येवेति निपमहइत्यर्थः । निकायाः
पाकोगहेतुकर्माणि संस्कारवन्तो पूर्वलोकादितुल्या

दिसाह। देवादिरिति। आसन्वस्वादीनां तत्राधिकारइत्याशंक्यते षामपि तत्र ध्येयत्वात् प्राप्यत्वाच्चन
आत्वमित्याह। पुनश्चेति। चतुर्वेदोक्तकर्माणि प्रणवश्चेति पंचकुसुमानि तेभ्यः सोमाद्यादि
द्रव्याणि हुतानि लोहितशुक्लकृष्णपरः कृष्णगोप्याख्यानि पंचामृतानि तन्मंत्रपूरितैः प्रागाद्यूर्ध्व
त पंचदिशावस्थितानि। शिरादिसरस्वती नाडी त्रिमं चपूपछिद्ररूपाणि शिरादिसमं उत्तमानीतानि
यस्यात्मज इंद्रियावीर्याण्यात्मना परिणतानि पंचदिक्षु स्थितैर्वस्वादिभिरूपनीतान्याप्नीति ध्याय
तांवस्वादिप्राप्तिरूपः सर्थः। सूत्रस्थस्वादिपदार्थमाह। तथाग्निरिति। भानुरा शलिनश्च सारःपा
दाः। द्वौ कर्णौ द्वे नेत्रे द्वे नासिके एकावाणिति सप्तस्विंद्रियेषु शीरश्च मसतीरस्थेषु सप्तर्षि
ध्यानं कार्यमित्याह। तथैमावेवेति। अयं दक्षिणः कर्णः गोतमो वामो भारद्वाजः। एवं दक्षिणनेत्र
नासिके विश्वामित्रवसिष्ठौ वामे जमदग्निकश्यपौ वागत्रिरित्यर्थः। अत्र ऋषीणां ध्येयत्वाना
धिकारः। किंच विग्रहाभावात देवादीनां न क्वाप्यधिकारइत्याह। ज्योतिषि भावाच्चेति। आदि
त्सः सूर्यश्चंद्रश्चांगारक इत्यादिशब्दानां ज्योतिःपिंडेषु प्रयोगस्य भावात् सत्वोन्तविग्रहवा
न्देवः कश्चिदस्तीत्यर्थः। आदित्यः पुरस्तादुदेता पश्चादस्तमेतेति मधुविद्यावाक्यशेषस्मृ
तिष्वेवादित्यशब्दः प्रसिद्धः। तर्हि ज्योतिःपिंडानामेवाधिकारोऽस्तु तत्राह। नचेति। अग्न्या
दीनामधिकारमाशंक्याह। एतेनेति। अग्निर्वायुर्भूमिरित्यादिशब्दानां अचेतनवाचित्वे
नेत्यर्थः। सिद्धान्ती शंकते। स्यादेतदित्यादिना। वज्रहस्तः पुरंदर इत्यादयो मंत्राः सोरोचीदीदि

म:

सादयोर्थवादाः। इत्याद्युपयोगान्नहि वेदे वादादस्यंते यज्ञाभाविताः। ते तृप्ताः। तर्पयंत्येनं सर्वकाम
फलैः। गुप्तैरित्यादिका इतिहासपुराणानि लोके विग्रहं यमं दंडहस्तं लिखंति। इंद्रं वज्रहस्तमिति
विग्रहादिपंचकं [illegible] सद्भावात्। अनाधिकारदोषो नास्तीत्यर्थः। विग्रहो हविषां भो
गऐश्वर्यं च प्रसन्नता फलप्रदानमित्येतत् पंचकं विग्रहादिकं मानाभावादेतन्नास्ती
ति दूषयति। नेत्यादिना। नचात्रेति। विग्रहादावित्यर्थः। अर्थवादमंत्रावाक्यमित्य
स्याह। अर्थवादादेरित्यादिना। श्रीघ्रादिवत् प्रयोगविधिघटिता मंत्राः प्रयोगसंबद्धार्था
भिधानार्थाः नातत विग्रहादिपरा इति मीमांसका अभ्युपगच्छंत इत्यर्थः। तस्माद्विग्रहाभा
वादित्यर्थः। सूत्राभ्यां प्राप्तं पूर्वपक्षं निरस्यति। तुशब्द इत्यादिना। अर्हत्वविद्यादेवादीन्
नाधिकारो। न विद्यात्वात् मध्वादिविद्यावदिति इत्युक्ते तत्प्रयोजकत्वात्। यद्यपीति।
दर्शादिकं न ब्राह्मणमधिकरोति कर्मत्वात् राजसूयादिवदिति आभासत्वान्विद्यास्व
हेतोराह। नचेति। यत्र यस्याधिकारः संभवति स तत्राधिकारीति न्यायस्त्वन्य इत्यर्थः।
यतः सर्वेषां सर्वत्राधिकारो न संभवति ततोन्यापोह्यते सन्न्यायः। तद्बलयोर्येदेवादौ
नोभयोः प्रसक्तौ बलानामुच्यमानत्वात् तत्र ब्रह्मविद्याभावादित्यर्थः। ते ह देवा ऊचुरन्योन्यं ततः इंद्रवि
रोचनौ सुरासुरराजौ प्रजापतिं ब्रह्मविद्याप्रदं तं जग्मतुरिति च लिंगमस्तीत्यर्थः॥ क्रिम

त्र श्रत्नाम त्नमिति मं पर्व प्रश्ने याज्ञवल्क्य उवाच तमिति मोक्षधर्मे श्रुतं देवादीनामपि
व्यार लिंगमित्याह। स्मार्त्तमिति। यथा बालो नां गोत्रं वै च चक्षुरादिपं दयोगोपि शास्त्रे दै
वत्नल क्वाति रिन्द्रियाणि स्वीक्रियंते। तथाज्योति रादौ सूर्यादि शब्द प्रयोगेपि विग्रहव
देवताः स्वीकार्या इत्याह। ज्योतिरादीति। तथा चेतनत्वेन व्यवहारादि सर्गः एकस्य जडस्य
तनो स्तयरूप संकूष्यं तत्राह। अस्तिहीति। तथाहि। विग्रहवत्तयादेव व्यवहारः श्रूयते।
स्पश्र त्नेण्य उत्कान्त गणस्य ऋत्विकूत त्सैवं धीवोर्थवाद इत्याशंक्य सादिः तत्रमे धातिथे
मेधातिथेः संबोधनं श्रुतं तत्राचष्टे। मेधेति। मार्गे मेषो भूत्वा ह्वतारेति तत्ापनार्थं मेषे
तीद्र संबोधनमित्यर्थः। यद्दृत्मादि स्रादयो मरुदादिवदचेतनाएवेति तत्र सर्वत्र उ
डा जडांश द्वय त्नलादित्याह। मद्दिति। आदित्यादेर्कोजडभागः कश्चेतनोरा इतित त्रा
ह। ज्योतिरादे रिति। मे त्रादि वृंपदरा त्स्याप त्नासमान विग्रहादौ स्वार्थेन प्रमाणं अन्य
परत्नात् विषं फ स्येति वौकल्पवदित्याह। मह्यपीति। अन्यपरादपि वाक्या त्वबाधाप्रा
वेत्वार्थग्राह्य इत्याह। अत्रश्च मइति। तात्पर्य शून्ये पर्थे प्रत्यय मात्रे णास्ति न मुख्य
हरति। तथाहीति। तृणादौ प्रत्ययोस्ति विग्रहादौ स ना स्तीति वैषम्यं शंकते। अ
त्राहेति। विग्रहादेरोपि विधिवाक्यं तदेकवाक्यत या प्रशस्तोविधिरिति वार्थया
देषु प्रत्ययः। व्यक्तां तो भूतार्थो विग्रहादिः। तद्विषयः

तात्पर्यहेत्वोर्वृत्तं
न कृत्यापि स
त्र तात्पर्यं

प्रसंगेनास्तीत्यर्थः। नन्वयोत्तरवाक्येन विग्रहादिप्रसंगोस्ति तत्राह। नहीति। सुरापान
प्रसंगोपि स्यादिति भावः। पदैकवाक्यत्ववाक्यैकवाक्यत्वयोर्वैषम्यान्नैवमित्याह। अत्रो
च्यत इति। न च पदमेकं यदा सुरां पिबेदिति पदाभ्यामन्वेति तदा पदैकवाक्यं। एकमेवा
र्थानुभवं करोति। न तु पदद्वयं पृथक् सुरापानं बोधयति तस्य विधेर्योनिषेधानुपपत्तेः
वाक्यार्थानुभवं प्रसंगद्वारत्वात्। अर्थवादस्तु भूतार्थसंसर्गस्य तद्द्वारं बोधयन् विधिना
वाक्यैकवाक्यतापन्नं तदुपस्थितिविग्रहाद्यनुपपत्त्य इत्यर्थः। नन्वर्थवादस्थपदानामवांत
रसंसर्गबोधकत्वं विना लाक्षादेर्विध्यन्वयोस्तु तत्राह। यथाहीति। साक्षादन्वयाभो
गं दर्शयति। नहीति। अर्थवादात् सर्वत्र स्वार्थग्रहणमात्रे स्वार्थवाक्ये न्याय्यं ते। तद्यत्रे
ति। तत्तत्रार्थवादेषु यत्राग्निर्हिमस्य भेषजमित्यादावित्यर्थः। आदित्यो यूप इत्यादौ बा
धित इति तेनास्ति वादिगुणवादः पत्रवज्रहस्तः पुरंदर इत्यादौ मानान्तरसंवादित्वे वा
दोनस्तः तत्र भूतार्थवाद इत्यर्थः इति विभागे संग्रहः। विग्रहार्थवादः स्वार्थपि
तात्पर्यवाननुमन्यपरत्वे सत्यबाधितार्थकत्वात् प्रयाजादिवाक्यवदिति न्यायं मंत्रेष्व
तिदिशति। एतेनेति। वेदांतानुवादगुणवादानां निरालापहे तोपदानि। न चोभयपरत्वे वा
क्यभेदो वांतरार्थस्य महतात्पर्यद्वारत्वादिति भावः। विध्यनुपपत्त्यापि स्वर्गादेर्वताहि

ता

यहोगीकार्यं इत्याह । अपि चेति । ननु क्लृप्तफलके कर्मणि विधिः फलं विनाऽनुपपन्न इति भवतु
मन्त्रादेः स्वतन्त्रविग्रहमित्यर्थवादादिकः स्वर्गो विधिप्रमाणकः । विग्रहं विना विधेः कानुपपत्ति
स्तामाह । नहीति । इहैतस्य तावदनुपपत्त्या च तस्यादेहो नीकार्यं इत्याशङ्क्य तिमध्याह । कस्मादिति ।
अत एवेतस्याद्देहार्थं विग्रहत्वाद्युक्तं यः । किंच कर्मप्रकरणपाठात् । विग्रहप्रमितिप्रयाजवत् कर्मा
द्येनांगीकार्या तां विना कर्मापूर्वसिद्धेः । किंच तत्प्रसन्नादिवाक्यैः देवतासत्वा शब्दमात्रं देव
तेति भाविरयुक्तेत्याह । न च शब्देति । न चाकृतिमात्रं शब्दवाच्यं अस्तु किं विग्रहेणेति वाच्यं ।
निर्धर्मत्वापत्त्यसंयोगादतः शब्दस्यार्थो व्यक्तरूपा मन्त्रादिप्रमितविग्रहो नीकार्य इत्याह । तत्रे
ति । एवं मन्त्रार्थवादमूलकमितिहासादिकमपि विग्रहे मानमित्याह । इतिहासेति । प्रमाण
त्वेन संपन्नादित्यर्थः । व्यासादीनां योगिनां देवतादिप्रत्यक्षमपीतिहासादेर्मूलमित्याह । प्रत्य
क्षेति । व्यासादयो देवादिप्रत्यक्षमूलाः प्राणित्वादस्मदादिवदिति । अनुमानमतिप्रसंगेन दू
षयति । यदि सिद्धादिना । सर्वे घटादिभिन्नो वस्तुत्वात् । घटवदिति जगद्वैचित्र्यं नास्तीत्य
पि स्यात् । तथा क्षत्रियाभावं वर्णाश्रमाभावं वर्णाश्रमधर्मव्यवस्था च स्यादिति रूपा
द्धिस्यात् । तथा च राजसूयादिशास्त्रस्य कृतादियुगधर्मव्यवस्थाशास्त्रस्य वाप्रामाण्यमित्यर्थः
योगसूत्रार्थादपि देवादिप्रत्यक्षसिद्धिरित्याह । अपि चेति । मन्त्रजपात् देवता । किंच तसे

९३

त्ताक्षणं चेति सूत्रार्थः। योगमाहात्म्यस्य श्रुतिस्मृतिसिद्धत्वात् योगी नामास्ति देवादिप्रत्यक्ष
मित्याह। योग इति। पादतलादा जानोः जानोरा नाभेः नाभेरा ग्रीवायाः ग्रीवाया आ केशाप्ररोहं तत आ ब्रह्मरंध्र
पृथिव्यादिपंचके स्मृ स्थिते धारणया जिते योगगुणे याणिमादिके प्रवृत्ते योगाभिव्यक्तेते नो
मयशरीरं प्राप्तस्य योगिनो न रोगादिस्पर्श इत्यर्थः। चित्रकारादि प्रसिद्धिरपि विग्रहेमा
नमित्याह। लोकेऽपीति। अधिकरणार्थमुपसंहरति। तस्मादिति। चिंतायाः फलमाह। क्र
मेति। एवमेव देवादीनां ब्रह्मविद्याधिकारे सत्येव देवत्वप्राप्तिद्वारा मुक्तिफलान्युपास
नानि युज्यंते देवानामनधिकारे तु तानामभावात्। क्रममुक्त्यर्थिनामुपासने प्रवृत्तिर्न स्या
त्। अतोऽधिकारनिर्णयात् प्रवृत्तिसिद्धिरिति भावः। प्रसंगस्य सूत्रितैः पूर्वेणास्य दृष्टां
तसंगतिमाह। यथेति। पूर्वत्र देवादीनामधिकारसिद्ध्यर्थं मंत्रादीनां भूतार्थे विग्र
हादौ समन्वयो न्यायेन तस्माद्वेदांतानामपि भूतार्थे ब्रह्मणि समन्वयो दृढीकृतः। अत्रापि शू

शूद्र

द्रस्य श्रौतस्य पृष्टाश्रिये समन्वयो हस्या दृढीक्रियत इत्यधिकरणद्वयस्य प्रासंगिकस्या
स्मिन्समन्वयाध्याये तत्र भाव इति मंतव्यं। पूर्वपक्षे शूद्रस्यापि द्विजवद्वेदांतश्रवणप्रवृ
त्तिः सिद्धांते तदभाव इति फलं। अत्र वेदांतविचारो विषयः स किं शूद्रमधिकरोति
न वेति संभवासंभवाभ्यां संदेहे पूर्वपक्षमाह। तत्र शूद्रस्यापीत्यादिना। तस्मादन

शूद्र
९३

॥नित्यादनवकॢप्तेः। समर्थः। विद्यार्थिनि शूद्रे ताकप्रयोगा । लिंगादपि शूद्रस्याधिकार इत्याह।
प्रवतिचेति। जानश्रुतिः किल षट्शतानि गावो रथं चै रैक्वाय गुरवे निवेद्य मां शिक्षयेत्
वाच। ततो रैक्वो विधुरः कन्यार्थी सन्नुद्दिश्योवाच। आहेति निपातः खेदार्थः। हारेण निष्के
नैष्कः इत्यागंता रथो हारेत्वा सच गौभिः सह हे शूद्र तवैवास्तु किमल्पेनानेन ममगा
र्हस्थ्यानुपयोगिनेति। वाक्यः। अर्थित्वादिसेवा वैश्रेयः सा च तेन प्रयतित्ररुचितास्याभावि
कत्वादिति तर्न्यायोपेतात् लिंगादित्याह। तस्मादिति। सू[illegible]त्व हि रैक्वस्तंनयति। न शूद्रस्या
धिकार इत्यादिना। आपाततो विदितो वेदार्थो येन तस्येत्यर्थः। अध्ययनविधिना संस्कृतो
वेदस्तदुत्थमापातज्ञानं च वेदार्थविचारेषु शास्त्रीयं सामर्थ्यं तदभावात् शूद्रस्यार्थि
त्वादिसंभवेऽप्यापातिकज्ञानोत्ति वेदांत विचाराधिकार इत्यर्थः। यद्वा अध्ययनसंस्कृतेन वेदेन वि
दितो निश्चितो वेदार्थो येन तस्य वेदार्थेषु विधिष्वधिकारो नान्यस्य अनधीतवेदस्यापि वे
दार्थानुष्ठानाधिकारे अध्ययनविधिवैयर्थ्यापातात्। अतः फलपर्यंतब्रह्मविद्यासाध
नेषु श्रवणादिविधिषु शूद्रस्यानधिकार इत्यर्थः। अधीतवेदार्थज्ञानवत्त्वरूपस्याध्यय
नाविधित्वप्रयुक्तस्य सामर्थ्यस्याभावात् इति न्यायस्य तुल्यत्वाद्य इत्यपदं वेदार्थोपलक्ष
णार्थमित्याह। न्यायस्य साधारणत्वादिति। तस्माच्छूद्रस्येति [illegible] न्यायस्य यत्त
अतिविषयो स्वल्पत्वादित्यर्थः। एवं चेल्लिंगं दूषयति। यदिति। असामर्थ्यन्यायेनार्थित्वा

त्वे

ग्रा.व्या.टि.टी.

१४

प्र. व्या. ल.

दिसंभवात् न्यायस्य निरस्तत्वादित्यर्थः। ननु निषादस्थपतिं याजयेदिति सत्राध्ययनाभावेऽपि निषादश
ब्दात् शूद्रस्य विद्यामात्राधिकारोऽस्ति इत्याशंक्य संवर्गविद्यायामधिकारमंगीकरोति। काममिति। त
द्विषयत्वात् लिंगस्य तत्र यथादित्यर्थः। वस्तुतस्तु विधिवाक्यस्थत्वात् निषादशब्दोऽप्यधिकारिसमर्पकः।
शूद्रशब्दस्तु विद्याविधिपरार्थवादस्थो नाधिकारिणं बोधयति। अस्त्वामर्थन्यायविरोधेना
न्यपरशब्दस्य स्वार्थबोधकत्वासंभवादिति मत्वांगीकारं संजगति। अर्थवादेति। तर्हि शूद्रश
ब्दस्यानंश्रुतस्य कोऽर्थ इत्याशंक्य सूत्रेण समाहितः। व्याख्याते चेत्यादिना। जानश्रुतिर्नाम राजा नि
दाघसमये रात्रौ प्रासादतले सुप्त आपत दातदी यान्नदानादिगुणगणतोषिता ऋषयो हंस
रूपा भूत्वा मालारूपेण तस्योपरि आजग्मुः। तेषु पाश्चात्यो हंसोऽग्रेसरं हंसं उवाच। भो
भो भल्लाक्ष किं न पश्यसि जानश्रुतेरस्य तेजः स्वर्गप्राप्यास्थितं तत्त्वां धक्ष्यति न गच्छेति। तम
ग्रेसर उवाच। कमप्येनं वराकं विद्याहीनं सन्तं अरे सयुग्वानं युग्वागं रीत्या रैक्वमिव स्थितं
रैक्वमिवैतद्वचनं मा वद रैक्वस्य हि ब्रह्मविदस्य तेजो दुरतिक्रमं नास्यानात्मज्ञस्येत्यर्थः। अस्य
वचनस्य श्रोता जानश्रुतिः रैक्वलिंगेन रैक्वं ज्ञात्वा विद्यावान् भविष्यतीति हंसानामभिप्रायः। कं
उ अरे इति पदच्छेदः। उ शब्दो व्यर्थः। तेषां हंसानां अनादरवाक्यश्रवणात् अस्य राज्ञः शुगुत्पन्ना
सा शूद्रशब्देन रैक्वेण सूच्यते हीति सूच्यते हीति सूत्रार्थः। शुच्यतयोगिकार्थेनात्र भेसरति जानश्चि
तरूढार्थस्यासंभवादिति न्यायद्योतनार्थो हि शब्दः। तदाद्रवणात्। तयाशुचा आद्रवणात्। शूद्रः।

६५

५६
२५

न्तोके प्राहवान्। शुचा वा कन्यौ राजा अभिदुद्रुवे प्राह। शुचा वा करणेन रैक्वं गतवानित्यर्थः। शूद्रशब्द
स्य यौगिकत्वे लिङ्गमाह। क्षत्रियत्वेति। संवर्गविद्याविध्यनंतरं मध्ये अर्थवादः आरभ्यते शुनकस्याप
त्यं कपिगोत्रं पुरोहितं अभिप्रतारिनामकं राजानं च कक्षसेनस्यापत्यं सूदेन परिविष्यमाणौ तौ
भोक्तुमुपविष्टौ ब्रह्मचारी भिक्षितवानित्यर्थः। नन्वस्य चैत्ररथित्वं न श्रुतमित्यत आह। चैत्ररथित्वं चे
ति। एतेन द्विरात्रेणेति छांदोग्यश्रुतेः एव पूर्वं चित्ररथस्य कापेययोगदर्शनात्। अभिप्रतारिणो
पि तद्योगात् चित्ररथवंश्यत्वं निश्चीयते। राजन्यवंश्यानां हि प्रायेण पुरोहितवंश्या याजका भ
वंतीत्यर्थः। नन्वस्याभिप्रतारिणः चैत्ररथित्वेऽपि कथं क्षत्रियत्वं तत्राह। तस्मादिति।
चित्ररथादित्यर्थः। क्षत्ता सूतः तस्य रैक्वान्वेषणाय प्रेषणं अन्नगोदानादिकं च तत्र श्रुतेः
क्षत्रियत्वे लिङ्गं। अत्र शूद्रशब्दो यौगिक एवेति न शूद्रस्याधिकार इति स्थितं तत्र लिङ्गांतर
माह। संस्कारेति। उपनयनं वेदग्रहणांगं शूद्रस्य नास्तीति पूर्वमुक्तं इह विद्याग्रहणांगस्यो
पनयनसंस्कारस्य सर्वत्र परामर्शात् शूद्रस्य तदभावाभिलापाच्च विद्याधिकार इत्युच्यते। अध्या
दिशब्देनाध्ययनगुरुशुश्रूषादयो गृह्यंते। तं शिष्यमाचार्य उपनीतवानित्यर्थः। नारदोऽपि
विद्यार्थी मंत्रमुद्धारयन् सनत्कुमारमुपगत इत्याह। अधीहीति। उपदिदेशेति यावत्। ब्रह्मपरा
वेदपारगाः सगुणब्रह्मनिष्ठाः परं निर्गुणं ब्रह्म अन्वेषमाणा एष पिप्पलादः तज्जिज्ञासि
तं सर्वं वक्ष्यतीति निश्चित्य ते भरद्वाजादयः षडृषयः तमुपागता इत्यर्थः। ननु वैश्वान

र्मविद्यायां ऋषीन् राजा अनुपनीयैव विद्यामुवाचेति श्रुतेरनुपनीतस्यापि अस्ति विद्याधिकार इ
सत आह। नाकृति। ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिर इति पूर्ववाक्ये ब्राह्मणानुपनेय
नार्थमागता इति उपनयनप्राप्तिं दर्शयित्वा निषिध्यते। हीनवर्णे नोत्तमवर्णा अनुपनीयैव
उपदेष्टव्या इत्याचाररूपनार्थमिदमर्थः। एकजातिः। अनुपनीतः। पातकं च अभक्ष्यभक्षण
कृतं। सत्यकामः किल सत्यपितृको जबालां मातरं अपृच्छत् किंगोत्रोऽहमिति तं माता होवाच बह
र्त्ते सेवाव्यग्रतया अहमपि तव पितृगोत्रं न जानामि जबाला तु नामाहमस्मि सत्यकामो नाम त्व
मसीति एतावज्जानामीति ततः स जाबालो गौतममागत्य तेन किंगोत्रो[illegible]सीति पृष्ट उवा
च नाहं गोत्रं वेद्मि न माता वेत्ति परं तु मे मात्रा कथितं उपनयनार्थमाचार्यं गतः सत्यकामो जा
बालोऽस्मीति ब्रूहीति। अनेन सत्यवचनेन न तस्य शूद्रत्वसंभावो निर्धारितः। अब्राह्मण एत
त् संविविचित्स्य वक्तुं नार्हतीति निर्धार्य हे सौम्य समाहर त्वां आगाः सत्यं न त्यक्तवानसि। अतस्त्वा
मुपनेष्ये तदर्थं समिधमाहरेति गौतमस्य प्रवृत्तेश्च लिङ्गात् न शूद्रस्याधिकार इत्याह
तदभावेति। श्रवणादिनिषेधाच्च नाधिकार इत्याह। श्रवणेति। अस्य शूद्रस्य
द्विजैः पठ्यमानं वेदं प्रमादाच्छृण्वतः सीसलाक्षाभ्यां तप्ताभ्यां श्रोत्रद्वयपूरणं प्रायश्चित्तं स्मर्यत इ
त्यर्थः। पद्युपाद्युक्तं सञ्चरिष्णु स्मशानमिति यावत्। [illegible] वेति च स्मृतिरिति शेषः। मतिं वेदार्थज्ञानं।
दानं निषेधं निषिध्यते शूद्रस्य [illegible] नैमित्तकं तु दानमस्त्येव। पद्दत्तं विदुरादीनां ज्ञानित्वं दृष्टमिति

लत्वाह। येषामिति। सिद्धानां सिद्धेर्दुरुपपन्नत्वेऽपि साधकैः शूद्रैः कथं ज्ञानं लब्धव्यमित्यत आह। श्रावये
दिति॥ कम्पनात्। अस्यापि प्रासंगिकसमाप्तौ संगत्याह। अवासितरति। तमाप्तइत्यर्थः। काठकं पठति। य
दिदमिति। सर्वं जगत्। प्राणात् निःसृतं सत् प्राणे चेष्टात्मनि प्रेरके सति। एजति चेष्टते तच्च
प्राणाख्यं कारणं महद्भयं बिभेत्यस्मादिति भयं। तस्मिन् भयहेतुत्वे दृष्टान्तमाह। वज्रमिति। यथो
द्यतं वज्रं भयं तथेत्यर्थः। य एतत्प्राणाख्यं ब्रह्म निर्विशेषं विदुस्ते मुक्ता भवंतीत्याह। य इति। नन्वे
स्मिन् सूत्रे कथमिदं वाक्यमुदाहृतमित्यत आह। एतदिति। एजतेरर्थस्य कंपनस्य सूत्रितत्वात्। ए
जतिपदयुक्तं वाक्यमुदाहृतमित्यर्थः। प्रासंगिकाधिकारचिंतया अस्य संगतिर्नापेक्षितेति शब्दादेव
प्रमित इत्यनेनोच्यते। तत्रांगुष्ठवाक्ये जीवानुवादो ब्रह्मैक्यज्ञानार्थ इत्युक्तं। न तथेह प्राणानुवाद
ऐक्यज्ञानार्थः संभवति। प्राणस्य स्वरूपेण कल्पितत्वेनैक्यायोगात्। अतः प्राणोपास्तिपरं वाक्य
मिति प्रत्युदाहरणेन पूर्वपक्षयति प्रसिद्धेः पंचवृत्तिरिति। नन्वत एव प्राण इत्यादौ ब्रह्मलिंगा
त् प्राणश्रुतिर्नीता। अत्रापि तद्वच्चेत्पृ भयहेतुत्वं ब्रह्मलिंगमस्तीति नास्ति पूर्वपक्षावसरो
गतार्थत्वादित्यत आह। वायोश्चेति। प्रतिष्ठायस्थितिं लब्ध्वा प्राणवायोर्निमित्तत्वात् ज्वलतीति
प्रसिद्धं। अतः स्पष्टं ब्रह्मलिंगं नास्तीति भावः। वज्रलिंगाच्च वायुरित्याह। यद्विति। व्यष्टिर्विशेषः
समष्टिः सामान्यं। सूत्रा सिद्धांतं प्रतिजानीते। ब्रह्मैवेति। पूर्वोत्तरवाक्ययोरेकवाक्यता दृ
ग्गृहीतं सर्वं भयहेतुलिंगं वाक्यशेषगतं प्राणश्रुतेर्बाधकमित्याह। पूर्वत्रेत्यादिना भूतकं स्वप्रक

शं तद्गुणात्वेति ब्रह्मणा नास्ति लः कोपि लोको नास्त्येवेत्यकारार्थः । सोत्रं लिंगं व्याचष्टे । एतावित्स्यमितिं स वा
पुरुषस्य सर्वस्य कंपनश्रवणाद् इति प्राणः परमात्मैवेत्यर्थः । ब्रह्मणि वज्रशब्दः कथमित्याशंक्याणो
णाइत्याह । वज्रशब्द इति । बृहदारण्यके वायुरेव व्यष्टिरित्यत्रापपुनर्मृत्युमेति । अपमृत्युं जय
रूपं मापेक्षिकममृतत्वमुच्यते । ~~[illegible]~~ते । नमुख्यामृतत्वं । तत्रैव वायुरूपापत्तिप्रक
रणं समाप्याथ हैनमृषस्तैः प्रप्रच्छेति ज्ञेयात्मानमुक्त्वा सादेर्ना । शान्त्योक्तेरित्याह । यत्तु वाचि
सादिना । तस्मात् [illegible] ज्ञेयसमन्वितमिति सिद्धं । ज्योतिर्दर्शनात् । छंदोग्ये प्रजापतिवि
द्यावाक्यमाह । एष इति । परंज्योतिः श्रुतिभ्यां संशयमाह । तत्रेति । यत्तादिविषयावरकतमोना
शकं सौरमित्यर्थः । पूर्वत्र ब्रह्मप्रकरणस्यानुग्राहकः स च शब्दसंकोचो याचमोगो ज्ञातिप्राण
श्रुतिः ब्रह्मणि नीता । न तथात्र य आत्मापहतपाप्मेति प्रकरणस्यानुग्राहकं परस्यामहति
प्रत्युदाहरणेन पूर्वपक्षमाह । प्रसिद्धमेवेत्यादिना । पूर्वपक्षे सर्वोपास्तिः सिद्धांते ब्रह्मज्ञाना
न्मुक्तिरिति फलं । ननु ज्योतिरधिकरणे ज्योतिःशब्दस्य ब्रह्मणि वृत्तेरुक्तत्वात् कथं पूर्वप
क्ष इत्यत आह । ज्योतिरिति । तत्र गायत्रीवाक्ये प्रकृतब्रह्मपरामर्शकीय छन्दसामाना
धिकरण्यात् ज्योतिःशब्दस्य स्वार्थत्यागः कृतः । तथात्र स्वार्थत्यागे हेतुसंदर्शनात् पूर्वप
[illegible] क्ष इत्यर्थः । ज्योतिश्चरणाभिधानात्कृतत्वेन । चिरादिमार्गस्य संलिंगमाह । तथाचेति । ता

गौ२

याएता हृदयस्य नाड्यः इति खंडिकया नाडीनां रश्मीनां च मिथः संश्लेषमुक्त्वा अथ संक्रान्तो पानंतरं यत्र
क्रान्ते एतन्मरणं यथास्यात्तथोत्क्रामति अथ तदा एतैर्नाडीसंश्लिष्टरश्मिभिरूर्ध्वः सन्नुपरि
गच्छति गत्वादित्यं ब्रह्मलोकं द्वारभूतं गच्छतीत्यभिहितं तथैव प्राजापत्येऽपि शारीरात्समुत्थाय परमं
परंज्योतिरादित्याख्यमुपसंपद्यत द्वारा ब्रह्मलोकं गत्वा स्वेन स्वरूपेणाभिनिष्पद्यत इति व
क्तव्यं। समुत्थायोपसंपद्येति क्त्वाश्रुतिभ्यां ज्योतिषोऽर्चिरादिमार्गस्थस्यैवाभानादित्यर्थः। अतो
मार्गस्थसूर्योपास्त्याक्रममुक्तिपरं वाक्यमिति प्राप्ते सिद्धान्तयति। एवमिति। व्याख्येयत्वेनोप

ज्योति ७ क्रान्त आत्मैवात्र ज्योतिःशब्देन व्याख्येय इति दृष्टीकरणेन व्याख्यातः प्रयोजक प्रकरणानुमतीतो नाम पुरुषस्य — त्वं

सोऽवाक्यमेतदक्षज्योतिः श्रुतिर्वाक्ये ज्योतिषभावः। अशरीरत्वफललिंगाच्च ब्रह्मैव ज्योति[struck]र्न सूर्य इत्याह।
अशरीरमिति। न च सूर्यप्राप्त्याक्रमेणाशरीरत्वं स्यादिति वाच्यं परत्वेन विशेषितत्वस्य ज्योतिषः स च स
उत्तम इत्युपरामर्शेनाशरीरत्वनिश्चयादित्याह। परमिति। पूर्वोक्तलिंगं दूषयति। यत्त्विति। नाडीखं
डे दहरोपासकस्य यात्सूर्यप्राप्तिरुक्ता सन मोक्ष इति पूर्वोक्तसूर्योक्तिः। अत्र तु प्रेत्यापातिवाक्यनिर्गुण
विद्यायामर्चिरादिगतिस्य सूर्यस्यानन्वयात् अनपेक्षत्वात् श्रुतिव्यासलेन स्वरूपसाक्षात्कारूसंप
रंज्योतिस्तदैवोपसंपद्यत इति व्याख्येयमिति भावः।। आकाशो · व्यप।। छांदोग्यमुदाहरति। आकाशो
इति। यथोपक्रमबलात् ज्योतिः श्रुतिर्वापसंयोज्या शोपक्रमात् ब्रह्मादिराज्यवाप्ताविति दृष्टां
तेन पूर्वपक्षयति। श्रुतेति। श्रुते रूढ्याकाशोपास्तिर्निर्गुण ब्रह्मज्ञानं चैतस्य भयत्रफलं। आका

शा.भा.टि.-टी.

२८

प्र.८५

शास्त्रान्तरे गादि। अनेन पौनरुक्त्यमाशंक्य तद्वदत्र स्पष्टलिङ्गाश्रवणादिति परिहरति। स्पष्टस्यादित्येति वै
नाचेति प्रसिद्धिर्लिङ्गस्य। आशास्त्रेऽत्र वाक्यशेषगतायां श्रुतौ नामरूपकर्तृत्वलिङ्गोपेतायां बाधो
इत्यर्थः। यत्र बहुप्रमाणसंवादस्तत्र वाक्यस्य तात्पर्यमिति निर्णयादिति सिद्धान्तयति। प्रमेवेत्यादि
ना। नामरूपे राज्ञाद्यौ तदन्तः पालिनस्तद्भिन्नत्वं तत्कर्तृत्वं संचाम्यकर्तृमित्यर्थः। नामादिकर्तृत्वं स न ब्रह्म
लिङ्गं जीवस्येत्यादिति शङ्कते। नन्विति। अनेन जीवेनेत्यत्र जीवस्य ब्रह्माभेदेन कर्तृत्वमुच्यते इत्युक्त
क्तादयोगादिति परिहरति। बाधमिति। यञ्जोक्तस्य एतल्लिङ्गं नास्तीति तत्राह। नामेति। तर्हि पु
नरुक्तिस्तत्राह। आकाशेति। तस्यैव साधकोऽयं विचारः। अत्राकाशपदस्य ब्रह्मणि वृत्तिसिद्धये
इह सन्दर्भसंशयादि प्रयत्नेरूढत्वादिति न पौनरुक्त्यमिति भावः। स्पष्टस्येत्यंशो लोपेन आह धी
गम्येपृथक्त्वम् आत्मेति तमकृत्स्ने याति वल्व्यय आह। ध्येयमिति। विज्ञानं बुद्धिस्तन्मयत्वं प्रायः
सप्तमी व्यतिरेकार्थो प्राणबुद्धिप्रयां भिन्न इत्यर्थः। कर्मेरता नाद्ये भेदमाह। अन्तर्यामीति रीति। पु
रुषः पूर्ण इत्यर्थः। द्वयोर्लिङ्गनोर्दर्शनात् संशयमाह। तत्किमिति। पूर्वत्र नामरूपाभ्यां भेदोक्तेः
भेदेऽत्र भेदोक्तेरेतदयुक्तम्। प्राज्ञेनात्मना संपरिष्वक्त इति। आपिन्द्वेपि जीवात्मनि भेददोक्ते
व दौपचारिकभेदोक्तिसम्भवादित्याक्षेपसंगतिः। पूर्वपक्षे कर्मकर्तृजीवस्तुतिः। सिद्धान्ते ब्र
ह्मानुवादेन ततः कल्पितभेदापन्नस्य प्राज्ञस्य परमात्मनः स्वरूपैक्यप्रमितिरिति फलं बहु
जीवो ... प्राणोऽसि ... जीवस्तावकमिदं वाक्यमिति प्राप्तेऽसिद्धान्तय
ति। परमेश्वर ... । वाक्यस्य जीवस्तावकत्वेन जीवाभेदेन प्राप्त स्या

न्सू ४

ज्ञातस्योक्तिरसंगता स्यात्। अतो ज्ञाताज्ञातसन्निपाते ज्ञातानुवादेनाज्ञातं प्रतिपादनीयं अपूर्ववाक्य

तात्पर्यमिति न्यायादिति निखिलज्ञानतात्पर्यं। पुरुषः शरीरं प्राणो जीव इति श्रुतिर्वारयति। तत्र पुरुष

पुरुषो जीव एव प्राणस्तस्य व्यापरणे वैयर्थ्यः। अन्या

इत्यादिना। देहस्य वेदनाप्रसक्तेर्निषेधायोगात् पुरुषो जीव एव प्राणस्तस्य [illegible] ध्याये सामान्याध्याय तीव चन्द्रसौचन्द्रती

रूपोऽधिष्ठितः इत्यर्जुन चोरो [illegible] बद्धानुमुंचन्। अध्याये सामान्याध्यायतीव चल्लसौ [illegible] इति। इपक्रमवद्गुपसंहा

व। वस्तुतः सर्व [illegible] विनिक्रियाश्रुत्यन्यदस्य च केन लक्षणरिणिता सर्वमिसाह। पतद् इति। इपक्रमवदुपसंहा समर्थं स्मृद्धि

रवाक्ये प्येक्यापि वक्षितमिसाह। तथेति। व्याचष्टे। यायमिति। अवस्थोपन्यास स्याय समर्थं स्मृद्धि संसारित्वं गम्यते

[illegible] रेक्यपरत्वात् नजीयत्विंगामिसाह। पतोन बुद्धाते ति। प्रश्नोत्तराभ्यामसंसारित्वं गम्यत

इत्याह। यदलकूर्धमिति। कामादिविवेकानंतरमित्यर्थः। भवतीति चेति। यद्यस्मा दुक्तिस्तस्मात्

यत इति योजना। तेनावस्था धर्मेणानन्वागतोऽस्य प्रोक्तवति असंगत्वात्। स्तु बुद्धान्वयात्म

तसं पुण्यपापाभ्यामस्य ये भवति हि यस्मात् आत्मा। स्तु ष्टौ सर्वज्ञो ज्ञातीतः तस्मात् दृश्यस्ये

वसर्वज्ञो ज्ञाइत्यर्थः। वाक्यस्य ब्रह्मात्मैक्यपरत्वे हेतुतरमाह। यस्मादीति। सूत्रं व्याचष्टे। इतश्चेति।

वशी स्यतंत्रोऽपराधीन इति यावत्। ईशानो नियमनशक्तिमान्। शान्तेः कार्यं मा धिपसमिति

त्वेदः। तस्मात्सर्वाधिपत्यसमर्थे वाक्ये षष्ठाध्याय समन्वय इति सिद्धं॥ ॥इति श्रीमच्छारीरकभ

मीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायेतृतीयः पादः समाप्तः॥ ॥ ॥ ॥

॥श्रीकृष्णार्पणमस्तु॥

दो

194

॥प्रथमाध्यायस्य तृतीयः पादः समाप्तः॥

॥ प्रथमाध्यायचतुर्थपादप्रारंभः ॥

१.४ना.टि.२१

२

अस्मिन्पादे १ चतुर्थ

श्रीगणेशायनमः॥ अव्यक्तेशामजं पंचजनाधारं च कारणं॥ वेदितव्यं प्रियं वंदे प्रकृतिपुरुषं परं॥१॥ ॐ अ
धिकरणत्रयस्येक्षत्यधिकरणेन संगतिं वक्तुं वृत्तमनुवदति॥ ब्रह्मेति॥ तदशब्दत्वेन प्रधानस्य वैदिकशब्दा
म्नातत्वेनेत्यर्थः॥ ईक्षत्यधिकरणे गतिसामान्यमशब्दत्वं च प्रतिज्ञातं॥ तत्र ब्रह्मणि वेदांतानां गतिसामान्यं प्रपंचि
तं॥ अधुना प्रधानस्याशब्दत्वमसिद्धमित्याशंक्य निरूप्यत इत्याक्षेपसंगतिः॥ तेनाशब्दत्वनिरूपणेन ब्रह्मणि
वेदांतानां समन्वयो दृढीकृतो भवतीत्यध्यायसंगतिरप्यधिकरणत्रयस्य ज्ञेया॥ अत्राव्यक्तपदं विषयः॥ तत्किं प्रधा
नपरं पूर्वोक्तशरीरपरं वेति स्मृतिप्रकरणाभ्यां संशयः पूर्वमप्रसिद्धब्रह्मपरत्वं यथा षष्ठाध्यायस्य दर्शितं॥ तद्वदव्यक्तपदम
प्रसिद्धप्रधानपरमिति पूर्वपक्षयति॥ आनुमानिकमिति॥ अपि चेद्वाक्ये ब्रह्मलिंगीकारेणायमशब्दत्वाक्षेप इति समुच्चय
ति॥ तथा च ब्रह्मप्रधानयोर्विकल्पेन कारणत्वात्ब्रह्मण्येव वेदांतानां समन्वय इति नियमासिद्धिः फलं सिद्धांते नि
यमसिद्धिरिति विवेकः॥ पदविचारत्वादधिकरणानामेतत्पादसंगतिर्बोध्या स्मार्तक्रमरूढिभ्यां अव्यक्तशब्दः प्रधा
नपरः शब्दस्पर्शादिशून्यत्वेन योगसंभवाच्चेत्याह॥ शब्दादीति॥ प्रधानस्य वैदिकशब्दवाच्यत्वे का क्षतिरित्यत आह॥ तदे
वेति॥ अजामेकामित्याद्याश्रुतिर्हेतुः प्रकृतित्वे तत्र सांख्यस्मृतिः यदल्पं तज्जडप्रकृतिकमिति न्यायः॥ ततो ब्रह्मैव कार
णमितिमतच्छ्रुतिरिति भावः॥ सूत्रेण ■ अर्थवदनुसिद्धांतयति॥ नैतदिति॥ प्रधानं वैदिकं नेत्यत्र तात्पर्याभावं हेतुमाह॥
नहीति॥ ननु प्रधानस्यात्र प्रत्यभिज्ञानाद्वैदिकत्वमित्यत आह॥ न चात्रेति॥ ननु शब्दप्रत्यभिज्ञायामर्थोऽपि प्रत्यभिज्ञायते
प्रसाशांख्ययोगिकाच्छब्दादसति नियामके नार्थविशेषधीरित्याह॥ सचेति॥ रूढ्यातत्त्वधीरित्याशांख्यरूढिः किंलौ किंवै
स्मार्तीवा॥ नाद्य इत्याह॥ नचेति॥ द्वितीयं प्रत्याह॥ पराचिति॥ पुरुषसंकेतानानादिवेदार्थनिर्णयहेतुः पुंमते विचित्रत्वादि
त्यर्थः॥ यत्तु स्मार्तक्रमप्रत्यभिज्ञायोः ^ क्रमिकार्थः स्मार्त एवेति तत्राह॥ नच क्रमेति॥ स्थानात्तद्रूपप्रत्यभिज्ञानं शब्दा

२

२५

१

यामसतीसैन्वयान्नओघ्यसासेनातद्रूपस्यात्तद्रूपविरुद्धस्यप्रत्यभिज्ञानेसतीत्यर्थः॥पूर्वज्ञातरूपार्थस्यस्थानेतद्विरु
द्धज्ञानेसतितस्यप्रधीनोस्तीत्यत्रदृष्टांतमाह॥नहीति॥प्रकृतेनास्तिविरुद्धज्ञानंरथसांख्यप्रकरणाच्छरीरज्ञानेम
स्तीत्याह॥प्रकरणेति॥शरीरमेवरूपकेणरथसादृश्येनविन्यस्तंशरीररूपकविन्यस्तंतस्यपूर्ववाक्येआत्मबुध्योमे
ध्यस्थानपठितस्याशापिमध्यस्थेनाव्यक्तशब्देनग्रहणान्नप्रधानस्यवैदिकत्वमितिसूत्रार्थः॥स्मार्तक्रमःकिमितित्यज्य
यइत्याशंक्यश्रौतक्रमस्यप्रकरणाद्यनुग्रहेणबलवत्त्वादित्याह॥कइत्यादिना॥तदुभयंविवृणोति॥तथाहीति॥रूप
कक्लृप्तिःसादृश्यकल्पनाप्रग्रहोश्वरशनायदाबुद्धिसारथिविवेकीतदामनसेंद्रियरूपयानविषमविषयमार्गेदाकर्ष
ति॥यदायंविवेकीतदामनोरशनाबद्धास्तान्प्रवर्त्तयतीतिमनसःप्रग्रहत्वमुक्तं॥तेषुहयेषुगोचरान्मार्गान्॥ननुस्वत
श्चिदात्मनोभोगसंभवात्किंरथादिनेत्यतआह॥आत्मेति॥आत्मादेहःदेहादिसंगकल्पयायाभोक्तृत्वंनस्वतोसंगत्वादि
त्यर्थः॥अधुनारथादिभिर्गंतव्यंवदन्आकांक्षापूर्वकमुत्तरवाक्यमादत्ते॥तैश्चेत्यादिना॥शरीरस्यप्रकृतेत्वेपिअव्यक्तपदे
नप्रधानंगृह्यतामित्यतआह॥तत्रयएवेति॥एवंप्रकरणंशोधयित्वाशरीरस्यपरिशेषतामानयति॥तत्रेंद्रियेत्यादिना॥
अर्थानांपूर्वमनुक्तिशंकांवारयन्परत्वमुपपादयति॥अर्थाइति॥गृह्णंतिपुरुषपशुंबध्नंतीतिग्रहाःइंद्रियाणितेषां
ग्रहत्वंविषयाधीनं॥असतिविषयेतेषामकिंचित्करत्वात्तलोग्रहेभ्यःश्रे[illegible]ष्ठाअतिग्रहाविषयाइतिबृहदारण्यके
श्रवणात्त॥परत्वंश्रेष्ठत्वाभिप्रायेनतात्त्वेनेतिभावः॥सविकल्पकज्ञानंमनःनिर्विकल्पनिश्चयात्मिकाबुद्धिरात्म
शब्दात्सएवबुद्धेःपरःप्रत्यभिज्ञायतइतिशेषः॥हिरण्यगर्भाभेदेनब्रह्मादिपदव्यासमष्टिबुद्धिर्महानित्याह॥अथवेति॥
मननशक्तिरूपिणीभाविनिश्चयः॥ब्रह्माआत्माभोग्यवर्गाश्रयःतात्कालिकनिश्चयःकीर्तिशक्तिःनियमनशक्तिः॥त्रैकाल्य
निश्चयः॥संविदभिव्यंजिकाचिदध्यस्तातीतसर्वार्थग्राहिणीसमष्टिबुद्धिरित्यर्थः॥हिरण्यगर्भस्येयंबुद्धिरस्तीत्यत्रश्रुतिमाह॥
यइति॥नन्वप्रकृतासाकथमुच्यतेतदुक्तोचप्रधानेनकिमपराद्धमित्यतआह॥साचेति॥हिरुक्पृथक्पूर्वव्याप्तिबुध्यभेनोक्तौ
ततोभेदेनपरत्वमुच्यतइत्यर्थः॥तर्हिरथशरीरिणोर्द्वयोःपरिशिष्टेस्यातांनेत्याह॥एतास्मिन्निति॥अतोरथएवपरिशिष्यतइत्याह॥

शा.१७२८.२०.
२

अतोऽस्य एव परिशिष्ट इत्याह ॥ तदेवमिति ॥ तेषु पूर्वोक्तेषु षट्सु पदार्थेष्वित्यर्थः ॥ परिशेषफलमाह ॥ इतराणीति ॥ वेदो
पनेवेति शेषः ॥ दर्शयतीति चेति सूत्रस्य सांगो व्याख्यातः ॥ किंच ब्रह्मात्मैकत्वपरे ग्रंथे भेदवादिनां प्रधानस्यावकाशो ना
स्तीत्याह ॥ शारीरेत्यादिना ॥ भोगो वेदना काठकग्रंथस्यैक्यतात्पर्ये गम्यमाने ज्ञेयत्वहानहेतुयोगविषयो लिंगानि
संतीत्याह ॥ तथा चैवेत्यादिना ॥ ७ ॥ अग्र्या समाधिपरिपाकजा ॥ वागित्यत्र द्वितीयालोपः छांदसः मनसीति देध्ये ॥
त्यं कोऽन्तरत्वेन सूत्रं व्याचष्टे ॥ उक्तमेतदित्यादिना ॥ ४ ॥ कार्यकारणयोरभेदान्मूलप्रकृतिवाचकोऽव्यक्तशब्देन विकारे
लक्ष्यत इत्यर्थः ॥ गोभिर्गोविकारैः पयोभिः मत्सरं सोमं श्रीणीत मिश्रितं कुर्यादिति यावत् ॥ श्रीञ्पाक इति धातो
लोटि मध्यमपुरुषबहुवचनमेतत् ॥ अव्यक्तात्मना कार्यस्याव्यक्तशब्दयोग्यत्वे मानमाह ॥ श्रुतिश्चेति ॥ तर्हि
प्रागवस्थायामिदं जगदव्याकृतमासीत्तर्हि किलेत्यर्थः ॥ बीजरूपा शक्तिः संस्कारस्तद्वत्स्थं ॥ अपसिद्धांतशं
कोत्तरत्वेन सूत्रं व्याचष्टे । अत्राहेत्यादिना ॥ तार्किकादौ एवं सति सूक्ष्मशरीरे प्रागवस्थाभ्युपगमे सति ॥ ईश्वरेक
ल्पितानां त्रियम्यसंगीकाराच्चापसिद्धांत इत्याह ॥ अत्रोच्यत इत्यादिना ॥ कूटस्थ ब्रह्मणः स्रष्टृत्वसिध्यर्थमवि
विद्या साक्षीकार्येत्युक्तं बंधमुक्तिव्यवस्थार्थमपि साक्षीकार्येत्याह ॥ मुक्तानामिति ॥ पन्नोत्पन्नमुक्तिः साक्षीकार्या
तां विनैव स्रष्टो मुक्तानां पुनर्बंधापत्तिरित्यर्थः ॥ तस्याः परिकल्पितसत्त्वस्वतंत्रप्रधानाद्वैलक्षण्यमाह ॥ अवि
द्येत्यादिना ॥ मायामयी प्रसिद्धमायोपमिता लोके मायाविनो मायायत् परतंत्रेत्यर्थः ॥ जीवभेदोपाधित्वेनापि सा
क्षीकार्येत्याह ॥ महासुषुप्तिरिति ॥ बुध्याद्युपाधिभेदाज्जीवा इति वक्ष्यन्ति ॥ अविद्यायां श्रुतिमप्याह ॥ तदेतदि
ति ॥ आकाशाहेतुत्वोदाकाशः ज्ञानं विना तत्राभावादक्षरं विचित्रकारित्वान्मायेति भेदः ॥ इदानीमविद्याया ब्रह्माभि
दान्यत्वाभ्यामनिर्वाच्यत्वेनाव्यक्तशब्दार्हत्वमाह ॥ अव्यक्तेति ॥ तस्य महतः परत्वं कथमित्यत आह ॥ तदिदमिति ॥

त
२

परा बुद्धिर्महान्‌ तदात्मेतु तासरत्वमित्यन्वयः॥ प्रतिबिंबस्योपाधिपरतंत्रत्वात्‌ उपाधेः प्रतिबिंबात्‌ परत्वमाह॥
यदा त्विति॥ हेतुं स्फुटयति॥ अविद्येति॥ अव्यक्तस्य परत्वेपि शरीरस्य [illegible] किं जातं तदाह॥ तच्चेति॥ ननु इं
द्रियादीनामप्यव्यक्तैक्यादव्यक्तत्वं परत्वं च किमिति नोच्यते तत्राह॥ सत्यपीति॥ सूत्र[illegible]हृदयस्य वृत्तिकृत्‌ व्याख्या
न मुख्यापयति॥ अन्ये त्विति॥ पंचीकृतभूतानां सूक्ष्मावयवाः स्थूलदेहारंभकाः सूक्ष्मशरीरं प्रतिजीवं लिंगस्या
श्रयत्वेन नियतमस्तीति वक्ष्यते देहांतरप्राप्तौ तेन युक्तो गच्छति परलोकमित्यर्थः॥ कथं तस्य महतो जीवात्‌ परत्वं
यात्राक्य द्वितीयसूत्रं व्याचष्टे॥ तदधीनत्वाच्चेति॥ अर्थवदिति सूत्रस्य दृष्टांतमाह॥ यथेति॥ तस्याख्यानं दूषयति॥ तेनेति
ति॥ अव्यक्तपदबलात्‌ प्रकृतमपि स्थूलं स्यान्नेतरदिति शंकते॥ आम्नातस्येति॥ एकार्थबोधकानां शब्दानां मिथ आकां
क्षायेकस्यावबुद्ध्यारूढत्वमेकवाक्यत्वं तच्च मत्तेन तस्याकांक्षाभावात्‌ कुतोर्थबोध इति समाधत्ते॥ नेति॥ तां विनापि अर्थधीः
किं न स्यादित्यत आह॥ नहीति॥ शरीरशब्देन रूप्या स्थूलं प्रकृतं तस्य हानिरप्रकृतस्य सूक्ष्मस्य अव्यक्तपदेन
ग्रहणमन्याय्यं स्यादित्यर्थः॥ अस्त्वेकवाक्यतेत्यत आह॥ नचेति॥ ततः किं तत्राह॥ तच्चेति॥ आकांक्षया वाक्यैकवाक्यत्वे
सति प्रकृतं शरीरद्वयमेवाव्यक्तपदेन ग्राह्यं॥ आकांक्षापरस्तु न्यत्वादिति भावः॥ अनात्मनिश्चयः शुद्धेः तदर्थं सूक्ष्ममेवा
कांक्षितं ग्राह्यं॥ तस्य सूक्ष्मत्वेनात्माभेदेन गृहीतस्य दुःशोधत्वात्‌॥ स्थूलस्य दृष्टदौर्गंध्यादिना [illegible] अव
नात्मलब्धी वैराग्ययोः सुलभत्वादिति निराकृते॥ नचेति॥ दृष्टा बीभत्सा घृणा यस्मिंस्तस्य भावस्तत्त्वात्‌ इत्यर्थः॥ दू
षयति च॥ यत इति॥ वैराग्याय मूर्द्विवचनं विवक्षिता विष्यभावात्‌ किंतु वैष्णवं परमं पदं विवक्षितमिति तद्दर्शनार्थं प्रहेके
तं स्थूलमेवाव्यक्तशब्देन ग्राह्यमिति भावः॥ किंच॥ सूक्ष्मस्य लिंगांततःपातित्वन इंद्रियादिग्रहणेनैव ग्रहणान्न पृथगव्यक्त
शारीरपदाद्याग्रहः॥ अस्यापेत्याह॥ सर्वथेति॥ स्थूलस्य सूक्ष्मस्य वा ग्रहेपीत्यर्थः॥ तथा नामेति॥ सूक्ष्ममेवाव्यक्तमस्ति
त्यर्थः॥ अत्राव्यक्तं प्रधानं नेत्यत्र हेत्वंतरार्थं सूत्रं॥ ज्ञेयत्वेति॥ सत्वादिगुणरूपात्‌ प्रधानात्‌ पुरुषस्यांतरं भेदस्तत्‌ ज्ञानादि

३

सर्थः॥ नहि शक्यमिति च वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यत इति संबन्धः न केवलं भेद इति योगित्वेन प्रधानस्य ज्ञे
यत्वं नैरिष्टं किंतु तस्योपासनं यणिमादिप्राप्तयेऽपीत्याह॥ कश्चिच्चेति॥ ज्ञानविषयत्वाव्यक्तपदजन्यज्ञा
नगम्यत्वमार्थिकं ज्ञेयत्वमस्तीत्यत आह॥ न चानुपदिष्टमिति॥ उपदिष्टं हि ज्ञानं फलवदिति शास्त्रं शक्यं निष्फ
लस्योपदेशायोगादव्यक्तस्य च ज्ञानानुपदेशात् फलवत् ज्ञानगम्यत्वासिद्धिरित्यर्थः॥ तस्मादपि नाव्यक्तं शा
ब्दं न प्रधानमभिधीयते॥ अस्माकं तु रथरूपककॢप्तशरीराद्यनुसरणेन फलितमाह॥ तस्मादिति॥ सांख्येष्टफ
ले ज्ञानगम्यत्वावचनाच्चेत्यर्थः॥ ननु शरीरस्यापि ज्ञेयत्वानुक्तेः कथमिह ग्रहणं तत्राह॥ अस्माकं त्विति॥ अस्मन्मते विष्णु
रव्यपदस्यैकस्यैव ज्ञेयत्वोक्तेर्न दर्शनार्थमव्यक्तपदेन शरीरोपन्यासो युक्त इत्यर्थः॥ साधारणशब्दमात्रात्प्रधान
स्य प्रत्यभिज्ञा स्मार्तलिंगस्यानुक्त्या नियामकाभावादिति॥ तात्पर्यलिंगोक्तिमाशंक्य निषेधति॥ वदतीति चेदि
ति॥ अत्र हि तावत्त्रयमेव निर्दिष्टमित्यन्वयः॥ स्पष्टमन्यत्॥ किं चात्र कठवल्ल्यां प्रधानस्य प्रश्नोत्तरयोरसत्त्वान्न ग्रहण
मित्याह॥ त्रयाणामिति॥ मृत्युना नचिकेतसं प्रति त्रीन्वरान्वृणुष्वेत्युक्ते त्रयाणामेव प्रश्नो नचिकेतसा कृतः उपन्या
सश्च मृत्युनाहृतो नान्यस्येत्यर्थः॥ प्रश्नत्रयं क्रमेण पठति॥ तत्र तावदिति॥ हे मृत्यो स मम प्रथमवरस्त्वं स्वर्ग्यहेतुमग्निं
स्मरसि प्रेते मनुष्ये देहादन्योऽस्ति न वेति संशयोऽस्ति अत एव तदात्मतत्त्वं संदिग्धं जानीयामित्यर्थः॥ क्रमेणोत्तरत्रयमाह॥
प्रतिवचनमपीति॥ लोके तु विराडात्मनोपास्य[illegible]त्वाल्लोकादिस्त्रि सोऽग्निस्तं मृत्युरुवाच॥ नचिकेतसे याः स्वरूपतो
यावतीः संख्यातः यथा वा क्रमेणाग्निश्चीयते तत्सर्वमुवाचेत्यर्थः॥ हन्तेदानीं ब्रह्म वक्ष्यामीति ब्रह्मवाक्येन जीवप्रश्न
त्वव्यवहितमपि यथान्वैरणमित्यादिवाक्यं जीवविषयमुत्तरयोग्यत्वादित्यर्थः॥ वाक्यार्थस्तु आत्मा मरणं प्राप्य यथा भवति
तथा वक्ष्यामीति प्रतिज्ञातमाह॥ योनिमिति॥ चराचरदेहप्राप्तौ निमित्तमाह॥ यथेति॥ श्रुतमुपासनं स्वत्वे आद्यश्चका
रायत इत्यर्थः॥ एवं त्रयाणामेवोपन्यासः प्रश्नश्च यतः अतो न प्रधानं अव्यक्तमिति योजना॥ उक्तार्थं स्वतन्त्रमाक्षिपति॥ अ
त्राहेति॥ एकः प्रश्नः द्वौ प्रश्नौ वेति पक्षद्वये फलितं पृच्छति॥ किं चाल इति॥ सप्तम्यर्थे तसिः॥ अत्र च पक्षद्वयेऽपि प्रक्रियेत्यर्थः॥

त्यो

प्रश्नैक्येपत्त्राऽसंगतिः भेदे प्रधानस्य श्रौतत्वसिद्धिरिति पूर्ववाद्याह ॥ सप्तेत्यादिना ॥ प्रश्नैक्यपक्षमादाय सिद्धान्त्याह ॥
अत्रोच्यत इति ॥ येन प्रधानसिद्धिः स्यादिति शेषः ॥ चतुर्थप्रश्नकल्पनेन वरत्रित्वोपक्रमविरोधः स्यादिति विवरणोक्तिं
वरेत्यादिना ॥ वरप्रदानमुपक्रमो यस्याः सा ॥ अहिताय प्रथमलोकं प्रति प्रेषिताय इतः पुनः मम लोकं प्राप्तस्य ममापि ताय
पापूर्वं सुमनाः स्यादिति प्रथमवरे ॥ ननु द्वितीये वरे जीवविद्या तृतीये ब्रह्मविद्येति प्रश्नभेदः किं न स्यादित्यत आह ॥
यायं प्रेत इति ॥ प्रेत इत्युपक्रम्य तृतीये किं लिंगाज्जीवात्मविषयत्वं तृतीयो वरस्येत्यर्थः ॥ एवं शास्यापक्रमे सति प्रश्नोत्तरं नयुक्त
मित्याह ॥ तत्रेति ॥ मरणधर्मा यस्य चरी लिंगात्तस्य प्रष्टव्ययोर्जीवेश्वरयोर्भेदात् प्रश्नभेदसिद्धेर्वाक्यबाधो युक्त इति शंक
ते ॥ नन्वित्यादिना ॥ गोचरत्वादाश्रयत्वात् ॥ न केवलं प्रष्टव्यभेदात् प्रश्नभेदः किंतु प्रश्नवाक्ययोः सादृश्याभावादपीत्याह ॥
प्रश्नच्छायेति ॥ प्रष्टव्यभेदो सिद्ध इति परिहरति ॥ नेत्यादिना ॥ किं च ब्रह्मप्रश्ने जन्मादिनिषेधेन जीवस्वरूपं वदन् यमस्तयोरैक्यं
सूचयतीत्याह ॥ इह चान्यत्रेति ॥ तन्निषेधवाक्यं जीवोक्तिरसिद्धेत्यत आह ॥ सतीति ॥ भोगी मुक्तः तस्माद्विषयो जीवस्य प्राप्तजन्
मादिनिषेधेन स्वरूपमुक्तमित्यर्थः ॥ किंच जीवो ब्रह्माभिन्नः मोक्षहेतुज्ञानविषयत्वात् ॥ ब्रह्मवदित्याह ॥ तथा स्वप्नेति ॥
अतो वस्था येन सा क्षिणा प्रमाता पश्यति तमात्मानमिति संबन्धः ॥ हेतोरप्रयोजकत्वमाशंक्य तमेव विदित्वेत्यादि श्रुतिविरो
धमाह ॥ प्राज्ञेति ॥ किंचाभेदमुक्त्वा भेदस्य निंदितत्वादभेद एव सत्य इत्याह ॥ नेहेति ॥ एकदेहे यच्चैतन्यं तदेवामुत्र स्वर्गादौ ए
वमिहाखंडैकरसे ब्रह्मणि यो नानेव मिथ्याभेदं पश्यति स भेददर्शी मरणान्मरणं प्राप्नोतीति संसारभयान्मुच्यत इत्यर्थः ॥ किं
किंच जीवप्रश्नानंतरं तं दुर्दर्शमिति यदुत्तरमुवाच तेनाप्युत्तरेण अभेदो गम्यत इति संबन्धः ॥ प्रष्टृप्रश्नयोः प्रत्यासत्यापि लिंगेन
प्रष्टव्यैक्यं लभ्यत इत्याह ॥ तेन नात्र ब्रह्मत्वसिद्धिरित्याह ॥ अन्यत्र धर्मादित्यादिना पुत्रादिकं वृणीष्वेत्युक्तेऽपि विषयास्तुच्छा इत्यात्मतत्त्वा
न्न चाल्यमानो यस्मान्नचिकेता वृणीत इति श्रवणात्तदा संतुष्टो यमोऽन्यच्छ्रेयोऽन्यदुतैव प्रेय इति भोगापवर्गमार्गयोर्वैल
क्षण्यप्रतिज्ञाय दूरमेते विपरीते विषूची अविद्या या च विद्येति दर्शितवानित्यर्थः ॥ प्रेयः प्रियतमं स्वर्गादिकं विषूची विरु
द्धफले अविद्या कर्म विद्या विद्यात तयोः विद्याभीप्सिनं विद्यार्थिनं त्वामहं मन्ये यतस्त्वा ॰ तावद्बहवोऽपि कामाः पुत्राद

दें
जीवस्य

नं

ब्रह्मसूत्रं ५

योमयादीयमानादुर्लभात् अपि नाशो लुप्तं न लोभवंतं न कृतवंत इति प्रष्टारं स्तुत्वा प्रश्नमपि तदङ्गी भूयान्नचिकेतः
प्रैरेति स्तुवन्निरस्यत्यर्थः ॥ इयं प्रश्नभेदपक्षेन घटत इत्याह ॥ यत्रेति ॥ यत्र श्रेयः स्तुतिं लब्धवान् तं प्रश्नं विहाय
यच्चान्यदेवोक्ता पर्यंतं येन वरस्तुतिः कृतास्यादित्यर्थः ॥ नस्मोदिति ॥ पृथग्व्यपेदाभावादित्यर्थः ॥ प्रश्नवाक्य
यत्तेयाः सा द्वयाभावात् प्रश्नभेदं न स्वकृतं निरस्यति ॥ यत्तिसादिना ॥ धर्माद्याश्रयस्य जीवस्य ब्रह्मत्वं कथमिसूत
आह ॥ यावदिति ॥ अविद्यानाशानंतरं चेदागंतुकमनिसंचस्यादित्यत आह ॥ न चाविद्यावहत्यति ॥ जीवस्य ब्रह्मत्वे
स्वाप्ता विके ब्रह्मत्वप्रश्नस्य युदुत्तरं तज्जीवप्रश्नस्यापि भवतीति लाभेदं रोपयति ॥ ततश्चन जायत इति ॥ जीवब्रह्मैक्ये
त्रयाणामिति सूत्रं कथमित्यत आह ॥ स्तुत्वमिति ॥ कल्पितभेदात्प्रश्नभेदकल्पनेत्याह ॥ ततश्चेति ॥ परमात्मनः सकोशा
त्र प्रधानस्य वे धर्म्यमनात्मत्वेन तृतीय बृंतं भावाभावादिति भावः ॥ श्रोता व्यक्तशब्दो न सांख्यासाधारणत ल्गेत्वनः वे
दिकशब्दत्वान्महच्छब्दवदित्याह ॥ महद्वच्चेति सूत्रं व्याचष्टे ॥ यथेत्यादिना ॥ न चाकाशादिशब्दे व्यभिचारः ॥ आकोशादेर्भूतां
तरसाधारणत्वेन सांख्यासाधारणत्वासिद्धेः साध्यस्यापि सत्वादिति मंतव्यं ॥ सत्तामात्रे सत्वप्रधान[illegible]प्रकृते साध्यपरिणा
मेनिर्विकल्पकबुद्धाविस्त्यर्थः ॥ आत्मा महानित्यात्मशब्दप्रयोगात् महानशोचति ॥ तमसः परस्तादित्यादिना शोकास्पत
मः पारत्वादिष्यश्च महच्छब्दः सांख्यतत्वे नास्ति यत्नेरिति सबंधः ॥ अधिकरणार्थमुपसंहरति ॥ अतश्चेति ॥ चमसवदविशेषा
त् ॥ अत्राजापदं विषयः तत्किं प्रधानपरं नेति रूढ्यर्थासंभवात् संशये पूर्वत्राव्यक्तशब्दमात्रेण प्रधानस्याप्रत्यक्षिज्ञायामप्य
त्र त्रिगुणत्वादि लिंगोपेतादजापदात्प्रत्यभिज्ञास्तीति प्रत्युदाहरणेन पूर्वपक्षयति ॥ पुनरपीति ॥ फलं पूर्वपक्षे ब्रह्मलाणि समन्व
यासिद्धिः सिद्धांते तत्सिद्धिरिति पूर्ववद्द्रष्टव्यं ॥ रागहेतुत्वादिगुणयोगात्[illegible] लोहितादिशब्दैरजआदिगुणलाके पिकथं प्र
धानलोभात आह ॥ तेषां साम्येति ॥ अवयवाः प्रधानस्य रजआदयः ते धर्मा रंजकत्वादयः तैर्निमित्तैर्लोहितादिशब्दैः
प्रधानमुच्यत इत्यर्थः ॥ गुणाभेदात्प्रधानलाभ इति भावः ॥ तत्राजाशब्दं योजयति ॥ नेति ॥ रूढियोगमपहरतीति न्याये
नशंकते ॥ नन्विति ॥ रूढ्यसंभवाद्योगआश्रयणीय इत्याह ॥ बाढमिति ॥ प्रजाशब्दित प्रकृति तत्पुरुषभेदाभ्यामपि

मायापरं

मुण्यं सुखदुःखमोहाः॥ अनुत्पन्नं विवृणोति॥
प्रधानप्रत्यभिज्ञेत्याह॥ सांवेत्यादिना॥ प्रजायंत इति प्रजाः महदादयः त्रै[गु]ण्यं सुखदुःखमोहाः॥ सिद्धांतयति॥ [illegible]॥ एवं प्राप्त
तामेवाविद्ययेति॥ अविवेनेत्यर्थः॥ विषयध्वीः भोगः गुणाभिन्नात्मख्यातिरपवर्गः॥ सिद्धांतयति॥ [illegible] इति हेतुं व्याख्याय दृष्टांतं व्या
स्तति॥ मायादावपि साधारणो मंत्रादिशेषार्थग्रहो न युक्तः विशेषग्रहहेतोः प्रकरणादेरभावादिति हेतुं व्याख्याय दृष्टांतं ... ॥ चतुर्विधस्येति॥ न स्पृशे
चेष्टे॥ चमसवदिति॥ सर्वत्रेति॥ गुहादावपि॥ उत्तरसूत्रव्यावर्त्यां शंकामाह॥ तत्रत्विदमिति॥ चतुर्विधस्येति॥ जरायुजा
ऽज स्वेदजोद्भिज्जरूपस्येत्यर्थः॥ स्मृत्युक्ता कुतो न ग्राह्येति शंकते॥ कस्मादिति॥ श्रुतेः श्रुत्यंतराद थ्रै ग्रहोयुक्तः सा जा सा ज
मूलानपेक्षत्वाच्चेत्याह॥ तथाहीति॥ शाखिनः छांदोग्याः॥ किंच॥ लोहितादिशब्दैरपि द्व्यलक्षणान्याय्या अव्यवधाना
त् ननु रंजनीयत्वादिगुणैर्लक्षणेत्याह॥ लोहितादीनां चेति॥ ननु शाखांतरेण शाखांतरस्थमंत्रस्य निर्णयः कथमित्यत आ
ह॥ असंदिग्धेनेति॥ सर्वशाखाप्रत्ययन्यायादिति भावः॥ यथा शाखांतरवाक्यात्तत्र प्रधानग्रहः तथेहापि श्वेताश्वतरोपनि
षदि मायाप्रकरणात्तत्र तु हर इत्याह॥ तथेति॥ सृष्ट्यादौ किं साहायकं ब्रह्मणेति विमृश्यते ब्रह्मवादिनो ध्यानाख्येन योगेन पर
मात्मानमनुप्रविष्टाः संतः तत्रैव देवस्यात्मभूतामैक्येनाध्यस्तां शक्तिं परतंत्रां मायां सत्वादिगुणवतीं ब्रह्मणः सहायमप
श्यन्नित्यन्वयः॥ मायायाएकत्वेपि तदंशानां जीवोपाधीनां तत्त्वसंपातयेभिंनां मविद्याख्यानां भेदात्प्रीसा अव्याकृतो
पनिषद्यकेनामरूपेयस्यासा॥ अनेन तद्देदं तर्ह्यव्याकृतमासीदितिश्रुत्यंतरप्रसिद्धिरुक्ता तस्यां शक्तौ व्यक्ता व्यक्तकार्य
लिंगकानुमानं सूचयति॥ नामेति॥ मायायां रोहितादिरूपकल्पकं कथमित्यत आह॥ तस्यादिति॥ विषयः आश्रयः एवं प्रकरण
बलान्मायैव अजेति मायक्कमतं॥ छांदोग्यश्रुत्यातेजोबन्नलक्षणावांतरप्र[illegible]कृतिरजेति सूत्रकृन्मतेनोत्तरसू
त्रव्यावर्त्यां शंकते॥ कथमिति॥ किं तेजोबन्नेष्वजाशब्दो रूढः न जायत इति योगिको वा नाद्यः तेषु जातत्वजाते
रसत्वादित्याह॥ यावतेति॥ यतइत्यर्थः॥ अतो न रूढ इति शेषः॥ न द्वितीय इत्याह॥ न चेति॥ जातिर्जन्म अजा
तिरजन्म॥ लौकिकाजासादृश्यकल्पनया तेजोबन्नानामजात्वोपदेशात् गौणोयं शब्द इति परिहरति॥ क

ल्पनेति॥ अनियमोयदृच्छावर्ती सोबालप्रभुः॥ यदुक्तं जीवभेदेन प्रधानवादप्रसक्तिः सिद्धेति तन्त्रे माह॥ नचेदमिति॥ व्यवस्था
र्थो भेदोप्यर्थात् प्रतिपाद्य इत्याह॥ प्रसिद्धत्वेति॥ सम्म एव प्रसिद्ध इत्यत आह॥ भेदस्त्विति॥ कल्पनोपदेशो दृष्टान्तस्या
चष्टे॥ मध्वेति॥ न च योगस्य मुख्यवृत्तिबाधे तेन प्रधानग्रहो न्याय्य इति वाच्यं॥ रू ढ्यर्थानपेक्षायोगेनाश्रितगु
णलक्षणाया बलीयस्त्वात् गुणवृत्तौ हि रूढिराश्रिता भवति तथा च रोहितादिशब्दसमभिव्याहारानुगृहीतया रूढ्याश्रि
तया गुणवृत्त्या प्रधाने योगो बाधितो वान्तरप्रकृतिरजाशब्देन यथा मध्वादिशब्दैः प्रसिद्धमध्वाद्याश्रितगुणलक्ष
णया आदित्यादयो गृह्यन्ते तद्वत्॥ तस्मादजाशब्दं प्रधानमिति सिद्धं॥ छ॥ न संख्योपसंग्रहादपि॥ पंचजनशब्दः सांख्यत
त्त्वपरोन्यपरो वेति योगरूढ्योरनिश्चयात् संशये यथा तत्त्वविद्याधिकारे त्वजायां तात्पर्याभावादजापदे रूढिस्त्यागः
तथा पंचसु पंचसु तात्पर्याभावाज्जनशब्दे रूढिं संकोच्य तत्त्वानि ग्राह्याणीति दृष्टान्तसंगतिं सूचयन् मंत्रमुदाहृत्य
पूर्वपक्षयति॥ एवमित्यादिना॥ फलं पूर्ववत् प्राण चक्षुः श्रोत्रान्नमनांसि वाक्यशेषस्थाः पंचजनाः पंचतत्र च त्वारः स्व
हिरण्यगर्भः त्रो॥ अन्नं विराट् तयोः कारणमव्याकृतमाकाशश्च यस्मिन्नध्यस्तास्तमेवात्मानममृतं ब्रह्म मन्येत तस्मान्मननादिद्वा
नहममृतोस्मीति मंत्रदृशो वचनं॥ नन्वस्तु पंचत्वविशिष्टेषु पंचजनेषु पुनः पंचत्वान्वयात् पंचविंशतिसंख्याप्रतीतिः
तावता कथं सांख्यतत्त्वग्रह इत्याशंक्य संख्यायाश्चम्याकांक्षापातात्तानि ग्राह्याणीत्याह॥ नयेति॥ जगतो मूलभूता प्रकृ
तिस्त्रिगुणात्मकं प्रधानमनादित्वादविकृतिः॥ कस्यचित् कार्यं न भवतीत्यर्थः॥ महदहंकारपंचतन्मात्राणि प्रकृतयो वि
कृतयश्च तत्र महान् प्रधानस्य विकृतिरहंकारस्य प्रकृतिरहंकारस्तामसः पंचतन्मात्राणां शब्दादीनां प्रकृतिः सा
त्विक एकादशेंद्रियाणां पंचतन्मात्राश्च पंचानां स्थूलभूतानामाकाशादीनां प्रकृतयः॥ पंचस्थूलान्येकादशेंद्रियाणि
चेति षोडशसंख्याको गणो विकार एव न प्रकृतिः॥ तत्त्वान्तरोपादानत्वाभावात् पुरुषः स्तूदासीन इति सांख्यकारिकार्थः॥
संख्यया तत्त्वानामुपसंग्रहाच्छब्दवत्त्वमिति प्राप्ते सिद्धान्तयति॥ नेति॥ नानात्वमिष्टमित्यत आह॥ नैषामिति॥ पंचसुपं

चसुसा घारणस्येतरपंचकात् व्यावृत्तस्य धर्मस्याभावोत्र नानात्वं विवक्षितमित्यर्थः ॥ यद्यपि ज्ञानकर्मेंद्रियेषु दशसु ज्ञानक
रणत्वं कर्मकरणत्वं च पंचकद्वयेस्ति ॥ पंचतन्मात्रासु पंचसु स्थूलप्रकृतित्वं च तथापि यस्मिन्नित्यामन आकाशस्य च पृथ
गुक्तेः सत्त्वरजस्तमो महदहंकाराः पंचकत्वेव्याः ॥ मनस्त्वमात्रिप्ततानि पंचास्मिन् पंचकद्वये मिथोनुवृत्तेतरपंचकव्यावृत्त
धर्मो नास्तीत्यर्थः ॥ नास्ति तत्र आह ॥ धर्मेणेति ॥ धर्मेणेत्यर्थः ॥ तदेव स्फुटयति ॥ नहीति ॥ महासंख्यायामवांतरसंख्याः प्र
विशंति ॥ यथा द्वाविंशिनौ सप्तसप्तर्षयोष्टौ च वसवश्चेति ॥ सप्तदशो सूत्राण्विलादिकमादायुद्धित्वादयः प्रविशंति नान्यथेत्य
र्थः ॥ पंचशब्दद्वयेन स्ववाच्यन्यूनसंख्याद्वारेण तद्व्याप्या महासंख्यै बंहुस्यनरइतिशंकते ॥ अथेति ॥ मुख्यार्थस्य बध्य
माणत्वाल्लक्षणा न युक्तेति परिहरति ॥ तदपिनेति ॥ पंचजनशब्दयोरसमाससमंगीकृत्य पंचविंशतिसंख्याप्रतीतिर्नि
रस्तासंप्रति समासनिश्चयाननेसतीतिरिसाह ॥ परस्वेति ॥ समासेहेतुमाह ॥ भाषिकेणेति ॥ अयमर्थः ॥ अस्मिन् मंत्रे प्र
थमः पंचशब्द आद्युदात्तः द्वितीयः सर्वानुदात्तः जनशब्दश्चांतोदात्तः ॥ तथा च न द्वितीयपंचशब्दजनशब्दयोः समासं
विना सस्याकारस्य उदात्तत्वं पूर्वेषामनुदात्तत्वं च घटते ॥ समासस्येति सूत्रेण समासस्यांतोदात्तविधानादनुदात्तंपद
मेकवर्जमिति सूत्रेण यस्मिन्नुपदेउदात्तः स्वरितो वा यस्य वर्णस्य विधीयते तमेकं वर्जयित्वाऽवशिष्टं तत्पदं अनुदात्तं भ
वतीति विधानात् च एवं मांत्रिकांतोदात्तस्वरेणैकपदत्वनिश्चयः ॥ भाषिकास्येयत्तु शतपथब्राह्मणस्वरविधायकग्रंथे ॥
स्वरितो नुदात्तो वेति सूत्रेण यो मंत्रदशायामनुदात्तः स्वरितो वा स ब्राह्मणदशायामुदात्तो भवतीति अपवाद अ
श्रितः तथा चांत्याकारात् पूर्वेषामनुदात्तानामुदात्तत्वं ब्राह्मणावस्थायां प्राप्तं ॥ उदात्तमनुदात्तमनंत्यमिति त्रिस्व
रेण मंत्रदशायामुदात्तस्यानंत्यस्य परत्वम्यन्तयोऽयेमाणस्यानुदात्तत्वं विहितं ॥ तथा चात्र नकारादुपतन
आकार आकारांत्यस्य नेन न श्लिष्टत्वपापद्यमानो नुदात्तो भवति ॥ अयं मंत्रोनुदात्तस्वरः [illegible] भाषिकः तेन ब्राह्मण
स्वरेणैकपदत्वं निश्चीयत इति ॥ प्रकृतार्थकारैस्तु पाठकप्रसिद्धांतोदात्तस्वरो भाषिक इति व्याख्यातं तद्व्याख्या
नं कल्पतरुकारैर्दूषितं ॥ अंतानुदात्तं हि समाम्नातारः पंजजनशब्दमधीयत इति पाठकप्रसिद्धिरसिद्धेति ॥ तथा
च पंचजना इति मांत्रिकांतोदात्तः स्वरः यस्मिन् पंचपंचजनाइसंतानुदात्तो ब्राह्मणः स्वर इति विभागः उभयथापि

च ६

स६६

रि

सं १

एकपद्यात्समाससिद्धिरिति ॥ तैत्तिरीयकप्रयोगादप्येकपदत्वमित्याह ॥ प्रयोगांतरे चेति ॥ आज्यस्तोत्राणां पंचानां पंचजनानां
नां देवविशेषाणां यत्रापप्रत्ययप्रयोगः आमिद्रसाज्यग्रहणमंत्रशेषः देवतानां कर्मणि यत्र वदवस्थितं शरीरं तदेव पञ्चत्वं इहा
मुत्र प्रयोगाधारस्तस्येतस्यावैकल्यार्थमिति यजमानोक्तिः ॥ अस्तु समासस्ततः किं मत आह ॥ समस्तत्वाच्चेति ॥ आवृ
त्तिर्वीप्सा तदभावे पंचकद्वयाग्रहणात् पंचविंशतिसंख्याप्रतीतिरसिद्धेति भावः ॥ जनपंचकमेकं पंचजनानां पंचकं द्वितीय
मिति पंचकद्वयं तस्य पंचपंचेति ग्रहणं नेत्यक्षरार्थः ॥ किंच समासपक्षेऽपि किं पंचशब्दद्वयोक्तयोः पंचत्वयोः परस्परान्वयः
किंवा तयोः शुद्धजनैरन्वयः अथवा पंचत्वविशिष्टैः जनैः परस्परं पंचत्वस्यान्वयः नाद्य इत्याह ॥ नच पंचसंख्याया इति ॥
विशेषणमन्वयः ॥ अनन्वये हेतुमाह ॥ उपसर्जनस्येति ॥ अप्रधानानां सर्वेषां प्रधानेन विशेष्येणैवान्वयो वाच्यः
गुणानां परस्परान्वये वाक्यभेदापानादित्यर्थः ॥ द्वितीये दशसंख्याप्रतीतिः स्यात्तु ॥ नेत्यपंचविंशतिसंख्याप्रतीतिः ॥
तृतीयमुत्थापयति ॥ नन्विति ॥ पंचत्वविशिष्टेषु पंचत्वांतरान्वये विशेषणीभूतं पंचत्वेऽपि पंचत्वान्वयात् पंचविंशतित्व
प्रतीतिरित्यर्थः ॥ दृष्टांतवैषम्येण परिहरति ॥ नेति ब्रूम इति ॥ पंचानां पात्राणां समाहार इत्यत्र संख्यापूर्वो द्विगुरिति
समासो विहितः ॥ ततो द्विगोरिति सूत्रेण ङीपो विधानात् समाहारप्रतीतौ समाहारांतःकृतीत्याकांक्षायां सत्यां पंचेतिप
दांतरान्वयोपपत्तेः ॥ पंचजना इत्यत्र तु ङीबन्तत्वाभावेन समाहारस्याप्रतीतेः जनानां चादित एव पंचत्वोपादानात् संख्या
कांक्षाया असत्त्वात् पंचेति पदांतरेणान्वेति ॥ आकांक्षाधीनत्वादन्वयस्येत्यर्थः ॥ भेदो विशेषणं ॥ ननु जनानां निरा
कांक्षत्वेऽपि तद्विशेषणीभूतपंचत्वानि कतीत्याकांक्षायां पंचत्वांतरं विशेषणं भवत्वित्याशंकते ॥ भवदपीति ॥ नो
पसर्जनस्योपसर्जनांतरेणान्वयः किंतु प्रधानेनैवेति नोपसर्जनन्यायविरोध इत्यतः परिहरति ॥ तत्र चेति ॥ एवं ना
नाभावादिति व्याख्याय ■ यातिरेकाच्चेति व्याचष्टे ॥ अतिरेकाच्चेत्यादिना ॥ अतिरेक आधिक्यं जनशब्दितपंचविंशति
तत्वेषु आत्मांतर्भूतो न वा ॥ नाद्य इत्यत्र द्वितीये दोषमाह ॥ अर्थांतरे ■■ ति ॥ तथाकाशं विकल्प्य दूषयति ॥ तथेति ॥
उक्तो दोषः ॥ संख्याधिक्यं ॥ पंचविंशतिजना आत्माकाशौ चेति सप्तविंशतिसंख्या स्यादित्यर्थः ॥ नच सत्वरजस्तम

क्रि॰१

सांप्रथमगणनयासेष्टेतिवाच्यं॥आकाशस्यप्रथमगुणत्वेयथार्थापत्तिभिर्नियामितत्वानांप्रतिष्ठोक्तिविरोधात्त
वमतेस्वतंत्रप्रधानस्यैवाध्याहारत्वान्नेह॥नानास्तीतिवाक्यशेषविरोधाच्चेत्तवसस्येदूतवादित्वात्॥किंचपंचविंश
तिसंख्याप्रतीतावपिनसांख्यतत्वानांग्रहणमित्याह॥कथंचेति॥किंजनशब्दोनत्वग्रहणंतसंख्येयेतिक
थंशब्दार्थः॥नाद्यइत्याह॥जनेति॥नद्वितीयइत्याह॥अर्थांतरेति॥किंतदर्थांतरंयदर्थकमिदंवाक्यमि
तिपृच्छति॥कथमिति॥पंचचतेजनाश्चेतिकर्मधारयादिसमासांतरावसंज्ञासमासस्याप्तोनयाबहुत्व
त्वंतावदाह॥उच्यतइति॥दिग्वाचिनःसंख्यावाचिनश्चशब्दाःसंज्ञायांगम्यमानायांसुबंतेनोत्तरपदेनसम
स्यंतेयथादक्षिणाग्निःसप्तर्षयइत्यादि॥अयंचसमासस्तत्पुरुषभेदः॥पंचजनशब्दस्यसंज्ञात्वमुक्त्वा
संज्ञिकथनार्थमुत्तरंग्रंथमवतारयति॥केपुनस्तइति॥अतोउतशब्दोप्यर्थः॥येप्राणादिशेरकंतसाक्षिणमात्मानंवि
दुस्तेब्रह्मविदइत्यर्थः॥पंचजनशब्दस्यप्राणादिषुकथमप्रयोगइतिशंकते॥कथंपुनरिति॥नरतत्वेषुज
नशब्दस्यलक्षणयाप्रयोगस्तथामप्राणादिषुपंचजनशब्दस्यलक्षणयेत्याह॥तत्त्वेष्विति॥रूढ्यतिक्रमसा
म्यात्तत्वान्येवग्राह्याणीत्यतआह॥समानेष्विति॥सन्निहितसजातीयानपेक्षश्रुतिस्थाएवग्राह्याः॥ननुव्यवहि
तविजातीयसापेक्षस्मृतिस्थाइत्यर्थः॥लक्षणाबीजंसंबंधमाह॥जनेति॥जनःपंचजनइतिपर्यायःपुरुषपि
त्रादिशब्दवत्पंचजनशब्दस्यप्राणादिलक्षकत्वंयुक्तमित्याह॥जनत्वेचनश्चेति॥ननुनायंतदितिजनाःमहदादयः
जनकत्वाज्जनःप्रधानमितियोगसंभवेकिमितिरूढिमाश्रित्यलक्षणाश्रयाश्रयइत्यतआह॥समासेति॥
यथाश्वकर्णशब्दस्यवर्णसमुदायस्यवृक्षेरूढिरेवंपंचजनशब्दस्यरूढिरेवनावयवशक्त्या[illegible]मकोयोगइत्यर्थः॥
पूर्वकालिकप्रयोगाभावान्नरूढिरित्याक्षिपति॥कथमिति॥स्युःपुमांसःपंचजनाइत्यमरकोशादौप्रयोगोस्त्येवतद
भावमंगीकृत्याप्याह॥शक्येति॥जनसंबंधाच्चेतिपूर्वभाष्येनरेषुपंचजनशब्दस्यरूढिमाश्रित्यप्राणादिषु[illegible]ल
क्षणोक्ता॥इहतुश्रेष्ठवादेनप्राणादिषुरूढिरुच्यतइतिमंतव्यं॥संगृहीतंविवृणोतीति॥प्रसिद्धेत्यादिना॥उद्दिदीयजेत

sā·bhā·ṭi·ra·

6

प्र·च·पा

पशुकामस्सत्रोद्भिद्वपदं विधेयगुणार्थकं कर्मनामधेयं वेति संशये खनित्रादावुद्भित्पदस्य प्रसिद्धेर्यागनामत्वे
प्रसिद्धिविरोधान् ज्योतिष्टोमे गुणविधिरिति प्राप्ते सिद्धान्तः ॥ यजेत यागेनेष्टं भावयेदिति सार्थः ॥ ततश्चोद्भिदे स
प्रसिद्धस्य तृतीयान्तस्य यागेनेन प्रसिद्धार्थकेन सामानाधिकरण्यमतन्नामत्वं निश्चीयते ॥ उद्भिनत्ति पशून्
साधयतीति प्रसिद्धेरविरोधादप्रकृतज्योतिष्टोमे गुणविध्ययोगात्तद्धितोद्भिदास्वगुणवता यागेनेति
मत्वर्थसंबंधलक्षणाप्रसंगाच्चेति कर्मनामधेयमुद्भित्पदं ॥ तथाच्छिनत्तीति प्रसिद्धार्थच्छेदनयोग्यार्थकशब्दा
समभिव्याहाराद्दारुविशेषो यूपत्राद्यर्थः ॥ करोतीति समभिव्याहाराद्वेदिशब्दार्थः संस्कारयोग्यस्थंडिल
विशेष इति गम्यते ॥ तथाप्रसिद्धाधिकप्राणादिशब्दसमभिव्याहारात्पंचजनशब्दः प्राणपर्यक इति निश्चीयत इत्यर्थः ॥
एकदेशिनां मतद्वयमाह ॥ केचिदिति ॥ सादिना ॥ यथा ब्राह्मणाज्जातो निषादः ॥ असौ पंचजनशब्दस्यार्थान्तरमाह ॥ के
चित्त्विति ॥ पांजैचेन्य पाप्रजया विशन्तीति विट् तथापि शापुरुषरूपत्वे इत्यादाहार्थघोषाः स्तष्टार इत्यपि तत्पूर्वकं पोषातिरेकेण
द्रारूनायोगादिति श्रुत्यनुसारेण प्रजामात्रे ग्रहेऽपि न विरोध इत्यर्थः ॥ सूत्रे विरोध इत्याशंक्याह ॥ आचार्यस्त्विति ॥ अत
सांख्यतत्त्वातिरिक्तपक्षे चिन्त्यपरतया पंचजनशब्दव्याख्यापाम विरोधः इति भावः ॥ शंकोत्तरत्वेन सूत्रं व्याकरोति ॥ ज्योतिषेति ॥
ज्योतिषां सूर्यादीनां ज्योतिस्त्वेन प्रसिद्धत्वादुपासनस्यार्थेन ॥ नन्विदं षष्ठ्यन्तज्योतिःपदान्तं सूर्यादिकं ज्योतिः शास्त्रादेव प्र
सिद्धत्वात् काण्वानां पंचत्वपूरणाय ग्रहीतेनान्येषामिति विकल्पानुपपत्तिरिति शंकते ॥ कथं पुनरिति ॥ आकांक्षाविशेषा
दिकल्पायुक्त इत्याह ॥ सिद्धान्ती ॥ अपेक्षेति ॥ यथातिरात्रे षोडशिनं गृह्णाति न गृह्णातीति वाक्यभेदाद्विकल्पस्तद्वच्छा
खाभेदेनान्नपाठापाठाभ्यां ज्योतिषो विकल्प इत्यर्थः ॥ ननु क्रियायां विकल्पो युक्तः न वस्तुनीति चेन्न ॥ सत्यं अन्ना
पि शाखाभेदेन सान्ना ज्योतिः सति तावा प्राणादयो यत्र प्रतिष्ठितास्तन्मनसानुद्रष्टव्यमिति ध्यानक्रियायां वि
कल्पोपपत्तिरिति संबंधः ॥ उक्तं प्रधान[illegible]स्य[illegible] शब्दत्वमुपसंहरति ॥ तदेवमिति ॥ तथापि स्मृतियुक्तिभ्यां प्रधा
नमेव जगत्कारणं त्रयेण प्रधानस्याश्रोतत्वेनेपाजगत्कारणत्वलक्षणेन ब्रह्मण एव बुद्धिस्थत्वात्तस्मिन्नेव बुद्धि
स्थे निर्विशेषे ब्रह्मणि वेदान्तानां समन्वय इति साधितं ॥ पूर्वसूत्रे संक्षेपेण तत्र लक्षणा

न २ पं ४

१ मिसतआहा ॥ स्यतोति ॥ कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः ॥ पूर्वग्रंथेनास्य संगतिं वक्तुं रत्नमनुवदति ॥ प्रतिपा

दितमिति ॥ अधिकरण

क

209

समन्वयोरसिद्धिरेव श्रुतीनां विरोधदर्शनादित्याक्षेपरूपां तेनास्य संगतिमाह ॥ तत्रेति ॥ न चाविरोधचिंतायाः
द्वितीयाध्याये संगतिर्नास्मिन्नध्याय इति वाच्यं सिद्धे समन्वये स्मृत्यादिमानांतरविरोधनिरासस्य द्वितीयाध्यायार्थ
त्वात् सदसद्वाच्यजगत्कारणवादिश्रुतीनां मिथो विरोधाद्वाक्यार्थानिश्चये न लक्ष्ये समन्वयासिद्धेः प्राप्तायां तत्साधका
विरोधचिंतायाः अत्रैव संगतत्वात् ॥ न चैवं सृष्टिश्रुतीनामपि अविरोधोऽत्रैव चिंतनीय इति वाच्यं ॥ स्वप्नवत्कल्पितसृष्टे
विरोधस्यैवाभावात् किमर्थं तर्हि द्वितीये तच्चिंतनं स्थूलबुद्धिसमाधानार्थ इति भ्रमः ॥ इह तु सूक्ष्मदृशां वाक्यार्थे सम
न्वयज्ञानाय तस्य सार्थश्रुतिविरोधः परिह्रियते ॥ येयेपि त्वंपदार्थश्रुतिविरोधोऽत्र परिहर्तव्यः ॥ तथापि प्रथमसूत्रेण बंध
मिथ्यात्वस्य सूचनाद् विरोधः सिद्धः प्रपंचस्तु स्थूलबुद्धिसमाधानप्रसंगेन भविष्यतीति मन्यते सूत्रकारः ॥ अत्र जगत्कार
णश्रुतयो विषयस्ताः किं ब्रह्मणि मानं न वेति संशये तन्त्रज्योतिषोः संख्यादृष्टिक्रियायां विकल्पेपि कारणे वस्तुन्यसद्वा सद्
वा कारणमिति यदि विकल्पो संभवादप्रामाण्यमिति प्रत्युदाहरणेन पूर्वपक्षयन्ननुक्ताक्षेपं विवृणोति ॥ प्रतिवेदांतमि
त्यादिना ॥ वेदांतानां समन्वयसाधनाद् ध्रुवस्याध्यायसंगतिः ॥ असदादिपदानां सत्कारणे समन्वयोक्तेः पादसंगतिः ॥ पूर्वपक्षे स
मन्वयासिद्धिः फलं ॥ सिद्धान्ते तत्सिद्धिरिति विवेकः ॥ क्रमाक्रमाभ्यां सृष्टिविरोधं तावद्दर्शयति ॥ तथाहि क्वचिदित्यादिना ॥ स
परमात्मा लोकानसृजत ॥ अम्भय शरीरश्चतुरस्वर्गलोकः परः शब्दार्थः ॥ सूर्यरश्मिव्याप्तोंतरिक्षलोको मरीचयः ॥ मरो मर्त्यलो
कः ॥ अब्बहुलः पाताललोक आप इति श्रुत्यर्थः ॥ सृष्टिविरोधमुक्त्वा कारणविरोधमाह ॥ तथेति ॥ असदनभिव्यक्तनाम
रूपात्मकं कारणं ततः कार्यात्सदभिव्यक्तं ॥ एतत्तुल्यार्थं छांदोग्यवाक्यमाह ॥ असदेवेति ॥ किं शून्यमेव नेत्याह ॥ तत्सदि
ति ॥ अबाधितं ब्रह्मैवासीदित्यर्थः ॥ न ह्यसतात्मना स्थितं जगत्सृष्टिकाले सम्यगभिव्यक्तं अभवत् ॥ प्राक्क्रियासृष्टेः ॥ तत्त
त्कारणे एके बाह्यास्तेषां मतं श्रुतिरेव दूषयति ॥ कुतइति ॥ कुत एवं पदयोरर्थमाह ॥ कथमिति ॥ स्वमतमाह ॥ सदि
ति ॥ तदिदं जगद्धि किल नरूपं प्राक्काले व्याकृतं कारणात्मकमासीत् ॥ श्रुतीनां विरोधमुपसंहरति ॥ एवेति ॥

किमत्र न्यायमिस्सारांक्ष्यमाणांतरसिद्धप्रधानलक्षकत्वं वेदांतानां न्यायमित्याह॥समन्वीति॥तत्र सृष्टौ
विरोधमंगीकृत्य सृष्टिविरोधं परिहरति॥सत्स्वपीति॥आकाशादिषु ब्रह्मणः कारणत्वे विरोधो नेवाती
ति प्रतिज्ञायां हेतुमाह॥कुत इति॥यथाभूतत्वमेवाह॥सर्वज्ञ इति॥कारणस्य सर्वज्ञत्वादिकं प्रतिवेदं तद्व
त्यत इत्याह॥तस्य यो सादिना॥तद्विषयेण ब्रह्मविषयेण चेतनं सर्वज्ञं तदात्मानं स्वयमकुरुतेति श्रुतेरप प्रयो
ज्यत्वं॥तस्माद्वा एतस्मादात्मन आकाश इति प्रत्यगात्मत्वं स्वस्य बहुरूपत्वकामनया सृष्टि तिकाले पाती
यत्वं॥यथात्वे त्तिरीयके सर्वज्ञत्वादिकं कारणस्य तथा छांदोग्यादावपि द्रष्टव्यमित्याह॥तद्वत्र यल्लक्षणमि
ति॥अपवृत्तस्य व्यापारः॥अविगीतार्थत्वाद्विरुद्धार्थकत्वात्॥कारणे नास्ति विप्रतिपत्तिरिति शेषः॥तथापि का
र्यविरोधात्कारणेऽपि विरोधः स्यादित्याशंक्य निषेधति॥कार्यविषयं त्विसादिना॥सृष्टिप्रसृष्टीनां प्रत्यहम् न्यथा
थात्वेन सोहमिति प्रत्यभिज्ञायमानेद्रष्टर्यपि नानात्वं प्रसज्येतेत्याह॥अतिप्रसंगादिति॥सृष्टिविरोधमंगीकृत्य स्रष्ट
रि न विरोध इत्युक्तं॥अधुनांगीकारं त्यजति॥समाधास्यति चेति॥किमर्थं तर्हि श्रुतयः सृष्टिमन्यथान्यथा वदन्तीत्या
शंक्य सृष्टावतात्पर्यं ज्ञापनायेत्याह॥भवेदित्यादिना॥अतात्पर्यार्थे विरोधो न दोषायेत्येतात्पर्यं साधयति न ह्येति॥
फलवद्ब्रह्मवाक्यशेषत्वेन सृष्टिवाक्यानामर्थवत्त्वसंभवान्न स्वार्थे पृथक्फलं कल्प्यं वाक्यभेदापत्तेरित्याह॥न चक
ल्पयितुमिति॥न्यायोपेतवाक्यत्वं सिद्धं श्रुतिरपि दर्शयतीत्याह॥दर्शयति चेति॥मृदंगेन कार्येण लिंगेन कारणं ब्रह्म ज्ञा
नार्थत्वं सृष्टिश्रुतीनामुक्त्वा कारणस्याद्वयब्रह्मज्ञानं फलांतरमाह॥मृदादीति॥एवं निष्फलायामन्यार्थायां सृष्टौ
तात्पर्याभावाद्विरोधो न दोषः स्वत्र वृद्धसंमतिमाह॥तथा चेति॥अन्यथान्यथेति विप्रतिपत्त्या अवतारयब्रह्म बीज
मनेन तस्तदन्यथात्वेऽपि ब्रह्मणि न भेदः ज्ञेयेन विज्ञानमित्यर्थः॥ब्रह्मज्ञानस्य सृष्टिद्वारोपितमुक्तं तन्निर्वाहाय तत्फल
माह॥ब्रह्मेति॥अस्तु मसदिति सत्त्वपः॥एवं सृष्टिद्वारकविरोधमुक्त्वेत्रसमाधाय कारणस्य सदसत्त्वादिना सोऽपापि तवि
रोधनिरासार्थं सूत्रमादत्ते॥यस्करीति॥यतोऽस्तिलक्षणं ब्रह्मनिर्धार्यते तस्मिन्नेव श्लोकमुदाहरति॥अतोऽत्रेत्यके

सूत्राद्धिहिः

निरात्मकमसन्नश्राव्यते इति योजना तत्तत्र सदात्मनिश्लोको मंत्रो भवति॥ सदात्मसमाकर्षादतीन्द्रियार्थकार
सदेन ब्रह्म लक्ष्यत इत्याह॥ तस्मादिति॥ न च प्रधानमेव लक्ष्यतामिति वाच्यं॥ चेतनार्थकब्रह्मादिशब्दाना
नेकेषां लक्षणागौरवादिति भावः॥ तित्तिरिश्रुतौ सत्त्वं योजयित्वा छां॰ दोग्यादौ योजयति॥ एषैव चेति॥ सदे
कार्थकतत्पदेन पूर्वोक्तात्सतः समाकर्षात्तत्त्वमित्यर्थः॥ न च सत्सद् लक्षणानयुक्ता श्रुतिभिरेव स्वा
नभेदेनोदितानुदितहोमवद्विकल्पस्य दर्शितत्वादित्याह॥ तत्रैक इति॥ एके शाखिन इत्यर्थो न भवति किंत्वेक॥
दिसंसारचक्रस्था वेदबाह्या इत्यर्थः॥ अन्यनिरासे श्रुतिभिः सद्वादस्यैव स्पष्टत्वान्नो सा विरोधस्फूर्तिनिरासाय लक्षणा
लोतिभावः॥ यदुक्तं क्वचिदकर्तृत्वाकस्मिकेषितेति तन्नेत्याह॥ तेदिति॥ अप्यधक्षुः कृतौ॥ ननु कित्वं भावे एव परास्मैप
रसंत आह॥ चेतनस्याप्यायमिति॥ चक्षुः द्रष्टा श्रोत्रं श्रोता मनो मंता॥ सुच्यत इत्यर्थः॥ आद्यकार्यं सकर्तृकं कार्यत्वा घ
टवदित्याह॥ अपिचेति॥ अभ्यत्वेदानीं॥ ननु कर्मकारकादन्यस्य कर्तृत्वे सति कर्मण एव कर्तृत्वाच्छ्लकारो विरुद्ध स्य
तआह॥ योक्रियत इति॥ अनायासेन सिद्धिमपेक्ष्य कर्मणः कर्तृत्वमुपचर्यत इत्यर्थः॥ व्याक्रियते जगत्स्वयमेव नि प
त्रमिति व्याख्यापक्षेन चिन्त्या कृतमिति व्याचष्टे॥ यद्वेति॥ अतः श्रुतीनामविरोधात्कारणद्वारा समन्वय इति सि
द्धं॥७॥ छा॰ जगद्वाचित्वात्॥ विषयमाह॥ कौषीतकीति॥ बलाका या अपत्यं बालाकिर्ब्राह्मणः तं प्रति राजोवाच॥ यो
वा इति॥ न केवलमादित्यादीनां कर्ता किंतु सर्वस्य जगत इत्याह॥ यस्येति॥ एतज्जगद्यस्य कर्मक्रियत इति युक्त मा
कार्यमित्यर्थः॥ कर्मेति शब्दस्य योगरूढिभ्यां संशयमाह॥ तत्रेति॥ पूर्वत्रैकवाक्यस्थसदादिशब्दबलाद् सच्छा
नीतः इह तु वाक्यभेदात् स्तोत्रं शरणीति बालाकिवाक्यस्थब्रह्मशब्देन प्राणादिशब्दो ब्रह्मपरत्वेन नेतुमशक्य इति
प्रत्युदाहरणेन पूर्वपक्षमाह॥ किं तावदिति॥ पूर्वपक्षे स्यैव वाक्यस्य प्राणाद्युपास्तिपरत्वात् ब्रह्मणि समन्वयासिद्धिः सि
द्धांते ज्ञेये समन्वयसिद्धिरिति फलं॥ अथ सुषुप्तोद्दृष्टेति शेषश्रुतं पुरुषकर्तृत्वं प्राणस्य कथमित्येत आह॥ यो वै त इति॥ स्तन्नः [illegible]
कप्राणस्य विकाराः स्युः यदि यरसत्नमानमाह॥ केतम इति॥ यस्य महिमानः सर्वे देवा इति पूर्ववाक्ये दर्शितं॥ अतः नवौ

न

चि

हिरण्यगर्

पांडुरं श्वेतमुदकं वासोयस्य प्रा
संबोधनं

देवात्मकत्वात् सप्राणो ब्रह्मसरोक्षं त्रास्ते एकवेष्यत्वादित्यर्थः ॥ पूर्वपक्षान्तरमाह ॥ जीवो वेति ॥ यत्कारणं यस्मा
जीवं बोधयति तस्मादस्ति सुप्तोत्थापनं जीवलिंगमिति योजना ॥ तौ हि पुरुषं सुप्तमाजग्मतुः तं राजा हे बृहत् पांडरवासः सोम
राजन्नित्यामंत्र्य संबोध्य संबोधनेनानभिज्ञत्वात् प्राणादेरनात्मत्वमुक्त्वा यष्ट्या घातेनोत्थापयज्जीवं बोधितवानित्यर्थः ॥ श्रु
तिप्रधानः स्वेपर्से इति भिरूपहूतं पुंक्ते स्वाः ज्ञातयश्च तमुपजीवंति ॥ एवं जीवोपि आदित्यादिभिः प्रकाशनादिना भोगोपकरोऽस्यु
क्ते तेच हविर्ग्रहणादिना जीवमुपजीवंतीत्युक्तं सोऽत्र तु जीवलिंगं ननु प्राण एवैकधा भवतीति श्रुतेः प्राणशब्दो जीवैकपरमित्यत आ
ह ॥ प्राणभृच्चेति ॥ स्तुत्यादिहि रविरसि ज्ञातयति ॥ एवमिति ॥ स च बालाकिश्च लौकिक्या याज्ञिलिंगरूपानुपरूपानुक्तोरज्ञा
निरस्तस्तत्त्वी स्थितस्वदुक्तं ब्रह्म चेत्तु कारोच्यमानं ब्रह्मैवेति वक्तव्यमन्यथा राज्ञोपि मृषावादित्वप्रसंगा
दित्याह ॥ यदि सोपीति ॥ विदितवानपीत्यर्थः ॥ मुख्यपुरुषकर्तृत्वं ब्रह्मलक्षण एव लिंगं प्राणजीवयोस्तन्नियम्यत्वेनास्वा
तंत्र्यादित्याह ॥ कर्तृत्वं चेति ॥ यदुक्तं वच्छेनादृश्ययोर्वाचकः कर्मशब्दः प्राणजीवयोरुपस्थापक इति तत्रेत्याह ॥ य
स्येति ॥ अनेकार्थत्वादन्यतरार्थस्य प्रकरणादुपपदाच्च ग्रहणं न्याय्यं ॥ अत्र प्रकरणोपपदयोरसत्वात्कस्य ग्रहण
मिति संशये पुरुषकर्तृपदसान्निध्यात् क्रियत इति योगाज्जगद्ग्रहणमित्यर्थः ॥ एतत्कर्मेति प्रकृतपरामर्शोऽतु पुरुषाः
पूर्वोक्ताः कर्मशब्देन निर्दिश्यंतामित्यत आह ॥ नापीति ॥ पौनरुक्त्यापातात् पुरुषाणां नपुंसकैकवचनपरामर्शायोगा
च्चेत्यर्थः ॥ ननु पुरुषोत्पादकस्य कर्तुर्व्यापारः करोत्यर्थ उत्पादनं तस्य फलं पुरुषजन्म ॥ तदन्यतरवाची कर्मशब्दोऽस्त्वित्यत आ
ह ॥ नापीति ॥ कर्तृशब्देनेति क्रियाफलाभ्यां विना कर्तृत्वायोगात् कर्तृशब्देनैव तयोर्ग्रहणमित्यर्थः ॥ जगतोपि प्रकरणोपप
दे न स्त इत्युक्तमंगीकरोति ॥ सत्यमिति ॥ प्रकरणादिकं हि सर्वनाम्नः संकोचकं तस्मिंश्चासति सामान्येन बुद्धिस्थं सर्वमेव ग्राह्य
ते अत्र संकोचकासत्वात् सर्वार्थकेन सर्वनाम्ना बुद्धिस्थस्य कार्यमात्रस्य कर्मशब्दो वाचक इत्याह ॥ तथापीति ॥ किंच तर्क
दिकरशोत्तया जगत्प्रकृतमित्याह ॥ पूर्वत्रेति ॥ जगद्ग्रहणे पुरुषाणामपि ग्रहात् पृथगुक्तिर्व्यर्थेत्यत आह ॥ एतदुक्तमे
ति ॥ स वेदितव्य इति संबंधः ॥ पुरुषमात्रनिरूपितं कर्तृत्वमिति भ्रांतिनिरासार्थो वा शब्दः ॥ ब्रह्मलक्षणाभोजमित्यत्याः परि

र्थका

त

१२

तै

म्प४

व्राजकेभ्यः सत्र यथा ब्राह्मणशब्दः परिव्राजकान्यविषयः तथात्र कर्मशब्दः पुरुषान्यजगद्वाचीत्याह॥ एवमिति॥ अस्तजा
त्र कर्ता वेदितव्यः परमेश्वरस्य किमायातमित्यत आह॥ परमेश्वरेति॥ सिद्धान्तमुक्त्वा पूर्वपक्षबीजमनूद्य दूषयति॥ जी
वमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातमिति॥१७॥१७॥ उक्तमेव स्मारयति॥ त्रिविधमिति॥ श्रैष्ठ्यं गुणाधिक्यं॥ आधि
पत्यं नियंतृत्वं॥ स्वाराज्यमभिपद्यत इति भेदः संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इत्युक्तं वेदपुनरुक्तिः स्यादिति शंक
ते॥ नन्वेवमिति॥ कर्मपदस्य रूढ्या पूर्वपक्षप्राप्तौ तन्निरासार्थमस्यारम्भ इत्युक्तं नेत्याह॥ नेत्यादिना॥ प्राणशब्द जीवलिं
गयोर्गतिमाह॥ प्राणशब्दोपीति॥ मनो जीवः॥ जीवलिंगेन ब्रह्मैव लक्ष्यत इत्युक्तम्॥ इदानीं तल्लिंगेन जीवोक्तिद्वारा ब्र
ह्मग्राह्यमित्याह॥ अन्यार्थमिति॥ जीवपरामर्शस्य जीवाधिकरणब्रह्मज्ञानार्थत्वे प्रश्नमाह॥ क्वैष इति॥ हे बालाके ए
तच्छयनं विशेषज्ञानाभावरूपं यथा स्यात्तथैष पुरुषः क्वाशयिष्ट कस्मिन्नधिकरणे शयनं कृतवानित्यर्थः॥ एकीभा
वाश्रयज्ञानाय पृच्छति॥ क्व वा इति॥ एतद्भवनमेकीभावरूपं यथा स्यात्तथा एष पुरुषः क्वाभूत् सुप्तः केनैक्यं प्राप्नोतीति
पावत्॥ उपादानापादानं पृच्छति॥ कुत इति॥ एतदागमनमैक्यध्वंसरूपं यथा स्यात्तथा पुरुषः कुत आगत इत्यर्थः॥ प्र
श्नमुक्त्वा व्याख्यानमाह॥ प्रतिवचनमिति॥ शयनभवनयोराधारः उपादानापादानं च प्राणशब्दितं ब्रह्मैवेत्यर्थः॥
उत्तरप्राणोक्तेः प्रश्नोपि प्राणविषय इत्यत आह॥ सुषुप्तिकाले चेति॥ जडे तु तज्जीवैक्याभ्यां प्राणोत्र ब्रह्मैवेत्यर्थः॥ जीवो
क्तिरन्यार्थत्वमुपसंहरति॥ तस्मादिति॥ निःसंबोध्यताविशेषधीश्रूयता॥ स्वच्छताविक्षेपमलश्रूयता॥ भेदश्रु
तिश्रूयता स्वरूपमैक्यमाह॥ उपाधीति॥ प्रश्नव्याख्यानयोर्ब्रह्मविषयत्वे शाखान्तरसंवादमाह॥ अपि चैव
मेके शाखिन इति॥ ननु तत्राकाशः सुषुप्तिस्थानमुक्तं न ब्रह्मेत्यत आह॥ आकाशेति॥ उपाधिद्वारा प्रमातासज्जः मह
तु साक्षात्कारो ब्रह्मैवेत्याह॥ सर्वेति॥ एवं जीवनिरासार्थकत्वेन सूत्रं व्याख्याय प्राणनिरास परत्वेनापि व्याचष्टे॥ प्रा
णेति॥ अस्मिन् वाक्ये प्राणोपदेशं ब्रह्मज्ञानार्थं मन्यते जैमिनिः॥ उक्तप्रश्नव्याख्यानाभ्यां वाक्यस्य ब्रह्मपरत्वावग
मादपि चैके शाखिनः एवमेव प्राणातिरिक्तं जीवात्मानमामनंतः प्राणस्य वाक्यार्थत्वं वारयंतीति सूत्रे योजना॥
अतिरिक्तजीवोपदेशः प्राणनिराकरणस्याप्युच्चयः हेत्वंतरमिति सूत्रार्थः॥ तस्मादिदं वाक्यं ब्रह्मणि सम
न्वितमिति सिद्धम्॥ वाक्यान्वयात्॥ विषयवाक्यमाह॥ बृहदिति॥ प्रसादरात्मशेषत्वेन प्रियत्वादात्मैव सर्वशेषी

त्रिपूतमोतोन्यत्परिसत्व्यातैवद्रष्टव्यः ॥ दर्शनार्थश्रवणादिकं कार्यमित्यर्थः ॥ प्रियसंसृष्टेनेनेति ॥ पतिजायादिभिः
प्रियैर्योगैर्जीवतमात्रमिति नेत्यर्थः ॥ यथात्र घ्रातेत्र वाणीत्युपक्रमबलाद्वाक्यस्य ब्रह्मपरत्वं तथात्र जीवोपक्रमाद
स्य वाक्यस्य जीवपरत्वमिति दृष्टांतेन पूर्वपक्षयति ॥ किं तावदिति ॥ पूर्वपक्षे वाक्यस्य जीवोपास्तिपरत्वं सिद्धांते तु प्र
त्यग्ब्रह्मणि समन्वय इति फलं ॥ इदं प्रस्तकमहदपरिच्छिन्नं भूतं स समनंतं निःसमपारं सर्वगतं विदेकरसं एतेभ्यः
कार्यकारणात्मना जायमानेभ्यः भूतेभ्यः सौम्येनोत्थाय यथा तोपाधिकं जन्मानुभूयेतान्येव भूतानि लीयमानान्यनु तस्य
विनश्यति ॥ औपाधिकमरणानंतरं विशेषधीर्नास्तीति श्रुत्यर्थः ॥ विज्ञातारं विज्ञानकर्त्तारं केन करि ज्ञाते केनापि ज्ञात
मित्युपचारः ॥ मोक्षसाधनज्ञानगम्यत्वादिलिंगैर्वाक्यस्यात्मपात्रब्रह्मण्येवं ता सर्वावाग्मात्रब्रह्मप्रमापकत्वमिति सि
द्धांतयति ॥ एवमिति ॥ ... नविज्ञानेन तत्साध्येन कर्मणेत्यर्थः ॥ भेदनिंदापूर्वकमभेदसाधनेनैकविज्ञानात्सर्वविज्ञानस्य
समर्थनादौपचारिकत्वं न युक्तमित्याह ॥ न चैतदौपचारिकमित्यादिना ॥ पराकरोतीति श्रेयोमार्गात्प्रच्यावयति ॥ यथा दुंदुभि
शंखवीणाशब्दसामान्यग्रहणेनैव गृह्यमाणास्तदवांतरविशेषाः श्रुतिग्रहणग्राह्यस्तज्जनवत् सामान्ये कल्पितास्तेन
सिध्यंते ॥ एवमात्मज्ञानभास्यं सर्वमात्ममात्रमिति निश्चितमित्याह ॥ दुंदुभ्यादीति ॥ एवमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा
याः मुख्यत्वात् ब्रह्मनिश्वसितः सर्वस्रष्टृत्वलिंगादपीत्याह ॥ अस्य महत इति ऋग्वेदादिकं नाम ॥ इष्टं हुतमिति कर्म ॥ अयं च लो
कः परश्च लोक इति रूपं ॥ किंच स यथा सर्वासामपां समुद्र एकायनमिति खंडिकया सर्वप्रपंचस्य लयाधारत्व
मात्मनो ब्रह्मत्वे लिंगमित्याह ॥ तथैवैकायनेति ॥ जीवब्रह्मणोर्भेदाभेदस्य सत्त्वादभेदांशेनेदं जीवोपक्रमणं प्रति
ज्ञासाधकमित्याश्मरथ्यमतं ॥ सत्संसारदशायां भेदः ... एवमुक्तावेवाभेद इत्यौडुलोमिमतं ॥ तत्र मानमाह ॥
श्रुतिश्चेति ॥ सत्युत्क्रांतेः ननु संसारस्य औपाधिकत्वात् सर्वदैवाभेद इत्याशंक्य दृष्टांतबलेन संसा
रस्य स्वाभाविकत्वमित्याह ॥ क्वचिच्चेति ॥ यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहायेति ॥ नेति नि
दर्शनं व्याचष्टे ॥ यथा लोक इति ॥ सिद्धांतमाह ॥ अवस्थितेरिति ॥ अत्यंताभेदज्ञापनार्थं जीवमुपक्रम्य द्रष्टव्य
त्वादयो ब्रह्मण्युपमर्दकारत्वमित्यर्थः ॥ एतेन जीवलिंगानां ब्रह्मपरत्वकथनार्थमिदमधिकरणं न भवतीति प्रत्युक्तं ॥ ध्वि

करणे कथितत्वान्नापि जीवानुवादेन ब्रह्मप्रतिपादनार्थमुपक्रान्तो योऽयमत्र गतत्वादतो व्यर्थमिदमधिकरण
मिति निरस्तं जीवोद्देशेन ब्रह्मत्वप्रतिपादने भेदोऽप्यावश्यक इति भेदाभेदशंकाप्राप्तौ कल्पितभेदेनोद्देश्यत्वादिकं
सन्तोऽसन्ताभेदकृत्तिज्ञापनार्थमस्यारंभात्॥ ज्ञापने वाक्यत्र लिंगं आत्मशब्देनोपक्रान्तस्य जीवस्य धर्मिणोऽग्रहणे धर्मा
तस्याग्रहणं विनैव ब्रह्मधर्मकथनं॥ भेदाभेदे धर्मिद्वयग्रहः स्यादिति मंतव्यं॥ धीरः सर्वज्ञः॥ सर्वाणि रूपाणि कार्याणि
विचित्य सृष्ट्वा तेषां नामानि च कृत्वा तेषु बुध्यादिषु प्रविश्याभिवदनादिकं कुर्वन् यो वर्तते तद्विद्वानिहैवामृतो भ
वतीति मंत्रोऽपि जीवपरयोरैक्यं दर्शयतीत्याह॥ मंत्रेति॥ जीवस्य ब्रह्मविकारत्वान्नैक्यमित्याह॥ नचैते जड इति॥
मतत्रयं विभज्य दर्शयति॥ कार्येत्यादिना॥ कियानपीति॥ अभेदवद्भेदोऽपीत्यर्थः॥ तत्राश्मरथ्यमतस्योपादेयत्वमाह॥
तत्र कार्येति॥ सोऽयं देवदत्त इतिवत् तत्त्वमस्यादिवाक्यस्य परापरयोरत्यन्ताभेदः प्रतिपादयितुमिष्टोऽर्थः॥ तदनुसारि
त्वादित्यर्थः॥ ज्ञानान्मुक्तिश्रुत्यन्यथानुपपत्त्याप्ययमेव पक्ष आदेय इत्याह॥ एवं चेति॥ अत्यन्ताभेदे सतीत्यर्थः॥ क
ल्पितस्य भेदस्य ज्ञानान्निवृत्तिः संभवति न सत्यस्येत्यपि द्रष्टव्यं॥ यदुक्तं न दोषदृष्टान्तात्संसारः स्वाभाविक इति
तत्रेत्याह॥ अतश्चेति॥ अनामरूपब्रह्मत्वाज्जीवस्येत्यर्थः॥ उत्पत्तिश्रुत्या जीवस्य ब्रह्मणा भेदाभेदाविति मतमा
ह॥ अतएवेति॥ उत्पत्तेः स्वाभाविकत्वं मुक्त्ययोगादेवेत्यर्थः॥ अत्र पूर्वपक्षे बीजत्रयमुक्तं॥ जीवेनोपक्रमः परस्ये
व समुत्थानश्रुत्या जीवाभेदाभिधानं विज्ञातारं श्रेति॥ तत्राद्यं बीजं त्रिसूत्र्या निरस्तं॥ संप्रति द्वितीयमनूद्य तयैव
निराचष्टे॥ यदप्युक्तमित्यादिना॥ आत्मज्ञानात् सर्वविज्ञानं यत्प्रतिज्ञानं तत्र हेतुरिदं सर्वं यदयमात्मेति श्रुतिरेकव
क्त्वस्य प्रतिपादनात्तदेव प्रतिज्ञातमुपपादितमिति योजना॥ एतस्मात्प्रसवो यस्य एकस्मिन्प्रलयो यस्य तद्भावादित्य
र्थः॥ समुत्थानमभेदाभिधानमिति यावत्॥ जन्मनाशाभ्युक्तौ नाभेदः स्यादित्याशंक्य परिहरति॥ ननु इत्यादिना॥ मृतस्य
संज्ञा नास्तीति वाक्ये त्रैवर्गमोहितवाँस्तिज्ञानरूपस्यात्मनो नाशनाभावे नाशप्रसंगादिति मैत्रेय्योक्तो मुनिराह॥
नवा अरेऽहमिति॥ मोहं मोहकं वाक्यं अविनाशी नाशहेतुशून्यः॥ अनुच्छित्तिधर्मा नाशवान्न भवतीति अनुच्छित्तिध
र्मेत्यर्थः॥ तृतीयं बीजं तृतीयेन मतेनैव निरसनीयमित्याह॥ यदपीत्यादिना॥ आद्यमत

ग॰पा॰टि॰२२॰

२२

अ॰ ८

द्वयेपि सत्यभेदांगीकारे कौतुकेनेत्याक्षेपो नयुक्तः॥ काशङ्क्यस्व स्वमते ब्रह्मसंताभेदादिविज्ञानस्य कारणाभावात् सयुक्त इति॥
श्रुत्यनुसारित्वात् तन्मते मनःकल्पितं विज्ञातत्वमुक्तं ब्रह्मात्मनि भूतपूर्वगत्योक्तमिति परिहरणीयमित्यर्थः॥ किंच पूर्वापर
पर्यालोचनया वाक्यस्य मुक्तात्मपरत्वावगमात् विज्ञातत्वं कल्पितमेवानुपपन्नतरमिति न तल्लिंगेन जीवपरत्वमित्याह॥ अपिचेति॥
आर्षेषु पक्षेषु काशङ्का त्वत्पक्षस्येवादृष्टत्वे किं बीजं तदाह॥ दर्शितमिति॥ अतश्च श्रुतिमत्वाच्च॥ पुनरपि श्रुतिस्मृति
मतमाह॥ सदेवेत्यादिना॥ हेतुनाभेदो न पारमार्थिक इति प्रतिज्ञया संबंधः॥ भेदाभेदपक्षे जीवस्य जन्मादिविकारव
त्त्वान्निषेध्यो न स्यादित्याह॥ सर्व एष इति॥ भेदस्य सत्यत्वे तत्प्रमाणाबाध्यादहं ब्रह्मेति निर्बाधं ज्ञानं न स्यादित्याह॥ अ
न्यथा चेति॥ अभेदस्यापि सत्त्वात् प्रमेयस्य सांशत्वं भेदाभेदयोर्विरोधान्न समवायः स्यादित्याह॥ एकत्र निश्चितेति॥ मास्तु निर्बाधज्ञान
मित्यत आह॥ निरपेक्षमिति॥ अहं ब्रह्मेति सबाधितनिश्चयस्येव शोकादिनिवर्तकत्वमित्यत्र स्मृतिमप्याह॥ स्थितेति॥ आसंति
एकत्वे हि प्रतिष्ठिता भवति॥ न भेदाभेदयोरिति भावः॥ ननु जीवपरमात्मानौ स्वतो भिन्नौ अपर्यायनामत्वात् स्तंभकुंभवदित्य
तत्राह॥ स्थिते चेति॥ कथं तर्हि पर्यायनामभेद इत्याशंक्य जीवत्वेश्वरत्वादिनिमित्तभेदादित्याह॥ एको हीति॥ किंचाविद्यान्तो
बुद्धिरूपायां गुहायां स्थितो जीवो भवति॥ तस्यामेव ब्रह्मणि निहितमिति श्रुतेः॥ स्थाने स्यात् जीव एव ब्रह्मेत्याह॥ न हीति॥
कांचिदेवेकामिति॥ जीवस्थानादन्यामित्यर्थः॥ नन्वेकस्यां गुहायां द्वयोः किं न स्यातामित्यत आह॥ न चेति॥ स्वयुरेव प्रवेशेन
जीवत्वान्न भेदः॥ ननु संताभेदे जीवस्य स्पष्टभानात् ब्रह्मणोपि स्पष्टं स्यादलः स्पष्टत्वास्पष्टत्वाभ्यां तयोर्भेद इति चेन्न॥ दप
णिप्रतिबिंबस्य स्फुटत्वेपि बिंबस्यास्फुटत्ववत्॥ कल्पितभेदेन विरुद्धधर्मव्यवस्थोपपत्तेः॥ सत्सभेदे येषामाग्रहस्तेषां दोषभा
हा॥ येत्विति॥ सोयमिति तत्त्वमसीत्यकार्यकारणद्रव्यसामानाधिकरण्यादसंताभेदो वेदान्तार्थस्तद्वाध एव निःश्रेयसमा
प्यानंतस्य बाध्यो नयुक्त इत्यर्थः॥ किंच भेदाभेदवादिनो ज्ञानकर्मणोः कृतकं मोक्षं कल्पयंतितत्रानित्यत्वं दोषः॥ यत्तु कृतकम
पि नित्यमिति॥ तच्च यत्कृतकं तदनित्यमिति न्यायबाधितं॥ अस्माकं त्वनर्थध्वंसस्य ज्ञानसाध्यत्वान्नित्यमुक्तात्म
मात्रता ज्ञानानित्यत्वदोष इति भावः॥ तस्मात् मैत्रेयी ब्राह्मणं प्रसंगब्रह्मणि समन्वितमिति सिद्धं॥ प्रकृतिश्च प्रतिज्ञा॥ ध्व

वा
प्रश्ना

लक्षणसूत्रेणास्य संगतिं वक्तुं वृत्तं स्मारयति ॥ यथेति ॥ तत्र हि ब्रह्मणो बुद्धिस्थत्वार्थसामान्यतो जगत्कारणत्वं लक्षणमु
क्तं तेन नु बुद्धिस्थे ब्रह्मणि कृत्स्नवेदांतसमन्वयं प्रतिपाद्य तत्र कारणत्वं किं कर्तृत्वमात्रमुत प्रकृतित्वकर्तृत्वोभयरूपमिति वि
शेषजिज्ञासायामिदमारभ्यते ॥ तथा च सामान्यज्ञानस्य विशेषचिंताहेतुत्वात्तेनास्य संगतिः ॥ यद्यपि तदानंतर्यमस्य यु
क्तं तथापि निश्चिततात्पर्यैर्वेदांतैः कर्तृमात्रेश्वरमतनिरासः सुकर इति समन्वयांते इदं लिखितं ॥ लक्षणसूत्रस्याप्या
यादिसंगतत्वादस्याप्यध्यायादिसंगतिः ॥ पूर्वत्र सर्वविज्ञानप्रतिज्ञायां मुख्यत्वाद्ब्रह्मस्य जीवपरत्वं निरस्तं तदयुक्तं कर्त्रुपादा
नयोर्भेदेन प्रतिज्ञायां गौणत्वादिदोषोपपत्तिः ॥ तत्र निमित्ते इत्यादिना ॥ पूर्वोक्तनृपक्षयोर्द्वैताद्वैतसिद्धिः फलं ॥ ईक्षापूर्वकेति ॥ ई
क्षणस्य सा कर्तृत्वं निश्चितं ॥ तथा च ब्रह्म न प्रकृतिः कर्तृत्वात् ॥ योयः कर्ता स न प्रकृतिर्यथा घटकर्ता कुलाल इत्यर्थः ॥ ज
गत् ॥ पित्रकर्त्रुपादानकं ॥ कार्यत्वात् ॥ घटवदित्याह ॥ अनेकेति ॥ ब्रह्म नोपादानं ॥ ईश्वरत्वात् ॥ राजादिवदित्याह ॥ ईश्वरेति ॥ जगत्
न ब्रह्मप्रकृतिकं ॥ तद्धि लक्षणत्वात् ॥ यदिदं तत्तथा ॥ कुलालविलक्षणघटवदित्याह ॥ कार्यं चेति ॥ निष्कलं निरवयवं निष्क्रि
यमचलं ॥ शांतमपरिणामि निरवद्यं निरस्तसमस्तदोषं ॥ तत्र हेतुः ॥ निरंजनमिति ॥ अंजनतुल्यं तमः अन्यमित्यर्थः ॥ तर्हि
जगतः सहजोपादानं किमित्यत आह ॥ पारिशेष्यादिति ॥ ब्रह्मनिषेधे प्रधानं परिशेष्यत इत्यभिमानः सिद्धांतयति
प्रकृतिश्चेति ॥ चकारान्निमित्तसंग्रहः ॥ एवमुभयरूपे कारणे चेतनयोरवाप्यो भवतीत्याह ॥ एवमिति ॥ कर्तृज्ञानादपि सर्वका
र्यज्ञानं किं न स्यादित्यत आह ॥ निमित्तकारणव्यतिरेकस्थिति ॥ मृदादीनामुपादानानां दृष्टांतत्वाद्दार्ष्टांतिकस्य ब्र
ह्मण उपादानत्वं वाच्यमित्याह ॥ दृष्टांतोऽपीति ॥ वागारंभणं नाममात्रं विकारो न वस्तुतोऽस्तीति ॥ सत्यकारणज्ञानाद्विकार
ज्ञानं युक्तमित्यर्थः ॥ गतिसामान्यार्थं मुंडकेऽपि प्रतिज्ञादृष्टांतावाह ॥ तथान्यत्रापीति ॥ बृहदारण्यकेऽपि तावाह ॥ तथाम्
नीति ॥ घटः स्फुरतीत्यनुगतस्फुरणं प्रकृतिः तदतिरेकेण विकारा न संतीति ॥ सोयमर्थो यथा स्फुटः स्यात्तथा दृष्टांतः स
उच्यते ॥ हृघात्र विशेषशब्दान् सामान्यग्रहणव्यतिरेकेण पृथक् गृहीतुं श्रोता न शक्नुयात् सामान्ये तु ग्रहणेन दुंदुभ्याघातः
शब्दविशेषो गृहीतो भवति तस्य वा ग्रहणेन तदंतरविशेषशब्दो गृहीतो भवति ॥ अतः शब्दसामान्यग्रहणग्राह्याविशेषाः
सामान्ये कल्पिताः तद्वदात्मसामान्यस्य घटादय आत्मनि कल्पिता इत्यर्थः ॥ प्रतिज्ञादृष्टांतानुरोधात् लिंगात् ब्रह्मणः प्रकृति

स्य

१२

त्वमुक्त्वा पंचमीमुपपाद्याह॥ यत इति॥ यतो वा इत्यत्र श्रुतौ यत इति पंचमी प्रकृतौ इत्यन्वयः जनिकर्तुः जायमानस्य कार्यस्य प्रकृति
रपादानसंज्ञिका भवतीति सूत्रार्थः॥ संज्ञायाः फलं अपादाने पंचमीति सूत्रात् प्रकृतौ पंचमी लाभः॥ एवं ब्रह्मणः प्र[illegible]कृतित्वं प्र
साध्य कर्तृत्वं साधयति॥ निमित्तत्वमिति॥ ब्रह्मणस्त्वा[illegible]दित्यकर्त्रधिष्ठेयं प्रकृतित्वात् मृदादिवदित्याद्यनुमानानां आगमं
बाधकमाह॥ प्रागुक्तसूत्रे रिति॥ जगत्कर्तृ ब्रह्मैवेत्यत्रापि सूत्रं योजयति॥ अधिष्ठात्रंतरेति॥ एकस्योभयरूपं कारणत्वमविरुद्ध
मितिसूत्रं चैवेत्यनेन साधयति॥ कुत इत्यादिना॥ अभिध्यासदिति संकल्पः॥ अप्युच्चयो हेत्वंतरं॥ आकाशादेवेत्येवकारसूचित
मुपादानांतरानुपादानमयग्रहणं साक्षादिति पदेन सूत्रकारो दर्शयतीति योजना॥ आत्मसंबंधिनी कृतिरात्मकृतिः संबंधश्चा
त्मनः कृतिं प्रति विषयत्वमाश्रयत्वं च॥ ननु कृतेरात्मपदे सिद्धा भवति विषयस्तु साध्य इत्येकस्योभयं विरुद्धमित्याशंकते॥ कथं
पुनरिति॥ यथा मृदः साध्यपरिणामाभेदेन कृतिविषयत्वं तद्वदात्मन इत्याह॥ परिणामादिति॥ आत्मानमिति सविरोध इति दो
षः॥ सिद्धस्यापि साध्यत्वे दृष्टांतमाह॥ विकारात्मनेति॥ ननु ब्रह्मण आत्मानमिति द्वितीयया कार्यात्मना साध्यत्वश्रुतेरस्तु
प्रकृतित्वं कर्तृत्वं त्वन्योक्तिरित्यत आह॥ स्वयमिति चेति॥ ब्रह्मणः कृतिकर्मत्वोपपादनार्थं परिणामादिति पदं व्याख्यायान्यथापि
व्याचष्टे॥ पृथक्सूत्रमिति॥ मृद्घट इतिवद्ब्रह्म सच्चत्यच्चेति परिणामसामानाधिकरण्यश्रुतेः ब्रह्मणः प्रकृतित्वमित्यर्थः॥ सत्य
त्यदं भूतत्रयं॥ [illegible]स्त्येरोक्षं भूतद्वयं निरुक्तं वक्तुं शक्यं घटादि॥ अनिरुक्तं॥ अशक्यं कपोतरूपादिकं ब्रह्मैवाभवदित्यर्थः॥ अत्र
सूत्रे परिणामशब्दः कार्यमात्रपरः न तु सत्यकार्यात्मपरिणामपरः॥ तदनन्यत्वमिति विवर्तवादस्य वक्ष्यमाणत्वात् योनिशब्दो
च प्रकृतित्वमित्याह॥ योनिश्चेति॥ कर्तारं क्रियाशक्तिमंतमीशं ज्ञानं नियंतारं पुरुषं प्रत्यंचं ब्रह्म परं योनिं ध्यानेन पश्यंतीत्यर्थः॥ प्रकृतिं
नन्वनुपादानेपि स्त्रीयोनौ योनिशब्दो दृष्ट इत्यत आह॥ स्त्रीयोनेरिति॥ शोणितमवयवशब्दार्थः॥ योनिशब्दस्य स्थानमप
र्थो भवति सोत्र भूतयोन्यादिशब्दे न ग्राह्यः ऊर्णनाभ्यादिप्रकृतदृष्टांतवाक्यशेषविरोधादित्याह॥ क्वचिदिति॥ हे इंद्र ते
नव निषद्ये उपवेशनाय योनिः स्थानं मया अकारि कृतमित्यर्थः॥ पूर्वपक्षोक्तानुमानानि अनूद्यागमबाध्यमाह॥ यत्तु
नत्वित्यादिना॥ नन्वनुमानस्य श्रुत्यनपेक्षत्वान्न तया बाध्य इत्यत आह॥ नहीति॥ जगत्कर्तृपक्षः श्रुत्यैव सिध्यति
या कृतिः सा शरीरजन्येति व्याप्तिविरोधेन नित्यकृतिमतोनुमानासंभवादतः श्रौतमीश्वरपक्षीकृत्यानुपादा

१२

219

नत्वसाधनेष्वव सेवोपजीव्यया प्रकृतित्वबोधकश्रुत्याबाधस्तस्यार्थः॥ यदुक्तं विलक्षणत्वाद्ब्रह्मणो न जगदुपादानत्वमिति तत्राह॥
पुनर्भेति॥ न विलक्षणत्वादित्यारम्भे त्वर्थः॥ अन्तरुभयरूपं कार्यं तं ब्रह्मणो लक्षणमिति सिद्धं॥ एतेन सर्वे व्याख्याताः॥७॥
अस्याधिकरणस्य तात्पर्यं वक्तुं वृत्तमनुवदति॥ ईक्षतेरिति॥ प्रधानवादस्य प्राधान्येन निराकरणे हेतुनाह॥ तस्य हीत्या
दिना॥ तद्यण्वादिवादानुपेक्षणीयादुर्बलत्वादित्यत आह॥ तेपीति॥ निर्मूलत्वात्कथं प्रतिपक्षाइत्यत आह॥ तेषामिति
तथाहि छांदोग्ये जगत्कारणतज्ज्ञापनार्थं पिता पुत्रमुवाच॥ आसां वृक्षाणां मध्ये एकं फलं भिन्धीति भिन्धि भगवन् इत्युक्ता
चपुत्रः पुनः पित्रा किमत्र पश्यसीत्युक्ते॥ न किंचन भगवन् इत्याह तत्र पित्राणिमानं न पश्यसीत्युक्तं तथा च न किंचन शब्दोप
न्यस्वभाववादो प्रतीयते॥ अणुशब्दात्परमाणुवाद इति॥ एवमसदेवेदमग्र आसीदणोरणीयानित्यादिलिंगं द्रष्ट
व्यं॥ अत्र अण्वादिवादाश्रोता एवेति संशये सत्सु [illegible] ण्वादित्रोब्धलाब्धेतानाशतिप्राप्तेतिदिशति॥ एतेनेति॥ अस्या
त्तिदेशत्वान्न पृथक् संगत्याद्यपेक्षा न किंचनास्तु अण्वो प्रत्यक्षायोग्यवस्तुपरत्वादणुशब्दस्य सूक्ष्माभिप्रायत्वादत्र
त्युक्तं तेषां वादानां प्रधानवादवदश्रौतत्वं ब्रह्मकारणश्रुतिबाधितत्वं च तस्माद्ब्रह्मैव कारणं तस्मिन्नेव सर्वेषां वेदांता
नां समन्वय इति सिद्धं॥७॥७॥ ७॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ शारीरकमीमां
साव्याख्यायां भाष्यरत्नप्रभायां प्रथमस्याध्यायस्य चतुर्थः पादः॥७॥७॥७॥ अध्यायः समाप्तः॥७॥७॥७॥७॥

१३

॥ प्रथमाध्यायचतुर्थपादः समाप्तः ॥ समाप्तश्च प्रथमध्यायः ॥

१३

॥द्वितीयाध्यायप्रारंभः॥

शा.भा.टि.रा.

१

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ सांख्यादिस्मृतियुक्तिभिर्न चलितो वेदान्तसिद्धान्तगो निर्मूले विहितागमे न विहितो
व्योमादिजन्माप्ययः ॥ ३ ॥ सत्संतविवर्जितश्रुतिवपुर्व्यापी च कर्ता शिवो लिंगेन प्रथितोऽपि नाम तनुकृत् जानकीशं भजे ॥ १ ॥
नामरूपे व्याकरवाणीति श्रुतेर्नामतनुकृदपि संज्ञामूर्तिव्याकर्तापि लिंगशरीरोपाधिना कर्तेति अंशांशति च प्रथि
तः प्रसिद्धो यस्तं प्रसंगात् चित्तं परमात्मानं मूलप्रकृतिनियन्तारं भजेदित्यर्थः ॥ स्मृतिप्रसंगात् पूर्वोत्तराध्याययोर्विष
यविषयिभावसंगतिं वक्तुं वृत्तं कीर्तयति ॥ प्रथमेऽध्याय इति ॥ जन्मादिसूत्रमारभ्य जगदुत्पत्त्यादिकारणं ब्रह्मेति प्रति
पादितं शास्त्रदृष्ट्या त्वित्यादिसूत्रेषु स एवाद्वितीयः सर्वात्मेत्युक्तं ॥ आनुमानिकमित्यादिना कारणान्तरस्याश्रौतत्वं
दर्शितमित्यर्थः ॥ एवं प्रथमाध्यायस्यार्थमनूद्य तस्मिन् विषये विरोधपरिहारविषयिणं द्वितीयाध्यायस्यार्थं पादशः सं
क्षिप्य कथयति ॥ इदानीमिति ॥ अत्र प्रथमपादे समन्वयस्य सांख्यादिस्मृतियुक्तिभिर्विरोधपरिहारः क्रियते ॥ द्वि
तीयपादे सांख्याद्यागमानां भ्रान्तिमूलत्वमविरोधाय कथ्यते ॥ तृतीयपादे प्रतिवेदान्तं सृष्टिश्रुतीनां जीवात्मश्रुतीनां च
व्योमादिमहाभूतानां जन्मलयक्रमादिकथनेनाविरोधः प्रतिपाद्यते ॥ चतुर्थपादे लिंगशरीरश्रुतीनामविरोध [illegible] ॥
अयमेवार्थः सुखबोधार्थं श्लोकेन संगृहीतः ॥ द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता ॥ भूतभोक्तृश्रुतेर्लिंगश्रुते
रप्यविरुद्धतेति ॥ तत्राज्ञाते विषये विरोधशंकासमाध्ययोगात् समन्वयाध्यायानन्तर्यमविरोधाध्यायस्य युक्तं ॥ तत्र
प्रथमाधिकरणतात्पर्यमाह ॥ प्रथममिति ॥ श्रौते समन्वये विरोधनिरासार्थत्वादस्य स्मृतिशास्त्राध्यायसंगतयः स्म
तस्थापनात्मकत्वात् सर्वेषामधिकरणानामेतत्पादसंगतिः ॥ अत्र पूर्वपक्षे स्मृतिविरोधादुक्तसमन्वयासिद्धिः फलं ॥
सिद्धान्ते तत्सिद्धिरिति विवेकः ॥ तत्र ब्रह्मण्युक्ते वेदान्तसमन्वये विषयः स किं सांख्यस्मृत्या विरुध्यते न वेति स्मृतिप्रामा
ण्याप्रामाण्याभ्यां संदेहे पूर्वपक्षमाह ॥ यदुक्तमिति ॥ तन्त्र्यन्ते व्युत्पाद्यन्ते तत्त्वान्यनेनेति तन्त्रं शास्त्रं कपिलोक्तं मन्वाद्यपं च तन्त्रि
स्मृत्यादिभिः प्रोक्ता एव सति वेदान्तानां ब्रह्मसमन्वये निरर्थकाः स्युरित्यर्थः ॥ तासामपि ब्रह्मार्थकत्वमस्ति स विरोध इत्य

ण्या

र

श्रु

पा

१

तआह ॥ तासु हीति ॥ ननु सांख्यस्मृतिप्रामाण्याय प्रधानवादग्रहे मन्वादिस्मृतीनामप्रामाण्यं स्यादित्यत्रास्मृता सांप्रधर्मे
सावकाशत्वात् प्रामाण्यं स्यादित्याह ॥ मन्वादीति ॥ तर्हि सांख्यादिस्मृतीनामपि धर्मे तात्पर्येण प्रामाण्यमस्तु तत्त्वं तु ब्रह्मै
वेत्यविरोध इत्यत आह ॥ नैवमिति ॥ तत्त्वे विकल्पनानुपपत्तेर्निरवकाशस्मृत्यनुसारेण श्रुतिव्याख्यानमुचितं सावकाशान्निर
वकाशं बलीय इति न्यायादित्याह ॥ तस्मादिति ॥ श्रुतिविरोधे स्मृत्यप्रामाण्यस्येष्टत्वात् पूर्वपक्षो न युक्त इति शंकते ॥ कथमि
ति ॥ येषां स्वातंत्र्येण श्रुत्यर्थं ज्ञातुं शक्नुवंति तेषामयं पूर्वपक्षो न भवेत् ॥ सांख्येषु श्रद्धालूनां तु भवेदित्याह ॥ भवेदिति ॥ तेषाम
तींद्रियार्थज्ञानवत्त्वात् तत्र श्रद्धा स्यादित्याह ॥ कपिलप्रभृतीनां चेति ॥ आदौ यो जायमानं च कपिलं जनयेदृषिं प्रसूतं विभृयात्
ज्ञानैः संपश्येत् परमेश्वरमिति श्रुतियोजना ॥ यथा सांख्यस्मृतिविरोधाद् ब्रह्मवादस्त्याज्य इति त्वयोच्यते ॥ तथा स्मृत्यंतरविरो
धात् प्रधानवादस्त्याज्य इति मयोच्यत इति सिद्धांतयति ॥ तस्य समाधिरिति ॥ तस्मात् ब्रह्मणः सकाशाद् व्यक्तं मायायां
लीनं सूक्ष्मात्मकं जगदिति यावत् ॥ इतिहासवाक्यान्युक्त्वा पुराणसंमतिमाह ॥ अतश्चेति ॥ प्रभवत्यस्मादिति प्रभवो जन्म
हेतुः प्रलीयतेऽस्मिन्निति प्रलयो लयाधिष्ठानं ॥ तस्मात् केवलादीश्वरात् कार्याः ब्रह्मादयः प्रभवंति स एव मूलमुपादानं ॥ किंप
रिणामि ॥ न ॥ शाश्वतिकः कूटस्थः अतः स नित्य इत्यर्थः ॥ ननु श्रुतिविरोधः किमिति नोक्त इत्यत आह ॥ स्मृतिबलेनेति ॥
स्मृतीनां मिथो विरोधे कथं तत्त्वनिर्णयस्तत्राह ॥ दर्शितं त्विति ॥ श्रुतिभिरेव तत्त्वनिर्णय इत्यर्थः ॥ स्मृतीनां का गतिरित्यत आह ॥
विप्रतिपत्तौ चेति ॥ वस्तुतत्त्वे स्मृतीनां मिथो विरोधे वस्तुनि विकल्पायोगात् क्लृप्तश्रुतिमूलाः स्मृतयः प्रमाणं ॥ इतरास्तु क
ल्प्यश्रुतिमूला न प्रमाणमित्यर्थः ॥ क्लृप्तश्रुतिविरोधे स्मृतिर्न प्रमाणमित्यत्र जैमिनीयन्यायमाह ॥ तदुक्तमिति ॥ औदुंबरीं
स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धा सा सर्वा वेष्टयितव्येति स्मृतिर्मानं न वेति संदेहे मूलश्रुत्यनुमानान्मानमिति प्राप्ते सि
द्धांतः क्लृप्तश्रुतिविरोधे स्मृतिप्रामाण्यमनपेक्ष्यं अपेक्षायां श्रुत्यंतरे यमिमिति यावत् ॥ हि यतो सति विरोधे श्रुत्यनुमानं
द्वातः क्लृप्तश्रुतिविरोधे स्मृतिप्रामाण्यमनपेक्ष्यं ...
भवति ॥ अत्र तु विरोधे सति श्रुत्यनुमानायोगात् मूलाभावात् सर्वैवेष्टन स्मृतिरप्रमाणमित्यर्थः ॥ अस्तु सांख्यस्मृ
तिः प्रत्यक्षमूले इत्यत आह ॥ न चेति ॥ योगिनां सिद्धिमहिम्ना तींद्रियज्ञानं संभावयितुं

शाक्यमिति शंकते ॥ शक्यमिति ॥ कपिलादिभिः किल्लादौ वेदप्रामाण्यं निश्चित्य तदर्थस्य धर्मस्यानुष्ठानेन सिद्धिः
संपादिता ॥ तया सिध्या प्रणीतस्मृत्यनुसारेणानादिश्रुतिपीडा न युक्तोपजीव्यविरोधादिति परिहरति ॥ न सिद्धे
रपीति ॥ अतिशंकितुमिति श्रुतीनां मुख्यार्थमतिक्रम्योपचरितार्थः शंकितुं न शक्यत इत्यर्थः ॥ स्वतःसिद्धेर्वेदोपजीव्यश्रुति
चिन्तानीश्वरस्य स्वतःसिद्धेर्मानाभावादंगीकृत्याप्याह ॥ सिद्धेति ॥ सिद्धानां वचनमाश्रित्य वेदार्थकल्पनायामपि सिद्धोक्ती
नां मिथो विरोधेऽश्रुत्याश्रितमन्वाद्युक्तिभिरेव वेदार्थनिर्णयो दुष्कर इत्यर्थः ॥ श्रुतिरूपाश्रयं विना सिद्धोक्तिमात्रं न तत्त्वनिर्णय
कारणमित्यक्षरार्थः ॥ ननु मंदमतेः सांख्यस्मृतौ श्रद्धा भवति तस्य मतिः वेदांतमार्गे कथमानेयेत्यत आह ॥ पुरतंत्रे सादि
ना ॥ ननु श्रुत्या कपिलस्य सर्वज्ञत्वोक्तेस्तन्मते श्रद्धा दुर्वारेत्यत आह ॥ याविति ॥ कपिलशब्दमात्रेण सांख्यकर्त्ता श्रौत इति भ्रां
तिरयुक्ता ॥ तस्य द्वैतवादिनः सर्वज्ञत्वायोगात् तत्र सर्वज्ञानसंभृतेन श्रुतः कपिलो वासुदेवांश एव स हि सर्वो मतज्ञानैर्वैदिकैः सां
ख्यमुपदिशतीति सर्वदर्शीति भावः ॥ प्रतप्तुः प्रदाहकस्य ॥ किंच यः कपिलं ज्ञानैर्बिभर्त्ति तमीश्वरं पश्येदिति विधीयते ॥ तथा चान्या
र्थस्येश्वरप्रतिपत्तिशेषस्य कपिलसर्वज्ञत्वस्य दर्शनमनुवादस्तस्य मानान्तरेणाप्राप्तिरन्यस्य स्वार्थसाधकत्वायोगान्नानु
वादमात्रात् सर्वज्ञत्वसिद्धिरित्याह ॥ अन्यार्थेति ॥ द्वैतवादिनः कपिलस्याश्रौतत्वं निरस्य ब्रह्मवादिनो मनोः श्रौतत्वमाह ॥
भवति चेति ॥ इतिहासेऽपि कापिलमतनिंदापूर्वकमद्वैतं दर्शितमित्याह ॥ महाभारतेऽपीति ॥ पुरुषा आत्मानः किं बहवस्तेऽपि
वा उत सर्वदेहानामात्मा एक इति विमर्शार्थः ॥ बहूनां पुरुषाणां शरीराणां देहानां यथैका योनिरुपादानं पृथिवी तथात्मानं
पुरुषमात्मानं विश्वं सर्वोपादानत्वेन सर्वात्मकं सर्वज्ञत्वादिगुणैः संपन्नं कथयिष्यामि विश्वं सर्वं लोकप्रसिद्धं देववति
र्यङ्मनुष्यादीनां मूर्धा नोऽस्येवेति विश्वमूर्धा एकस्यैव सर्वक्षेत्रेषु प्रतिबिंबभावेन प्रविष्टत्वादेवं विश्वभुजत्वादि
योजना ॥ सर्वभूतेष्वेकश्चरति ॥ अवगच्छति सर्वज्ञ इत्यर्थः ॥ स्वेच्छाचारी स्वतंत्रः नास्य नियंता कश्चिदस्ति सर्वेश्वरत्वस्य
र्थः ॥ यथासुखमिति ॥ विशोकानंदस्वरूपरतियावत् ॥ कापिलतंत्रस्य वेदमूलत्वमतिम्लेच्छ विरोधमुक्त्वा साक्षाद्वेदवि

= यथाऽऽदुहोतीति वा अयं तरस्मान्तो हो मो ॥ यथाऽऽदुहोती समनेनानूयते नैवंवाक्यांतरप्रा
हं सर्वज्ञसंज्ञानैर्बिभर्त्ति इति वाक्ये नानूद्यते ऽतोऽस्यानस्यार्थसाधकत्वमित्यर्थः

नो

२

225

शेषमाह॥श्रुतिश्चेति॥यस्मिन्ज्ञानकाले केवलं स्वतंत्रप्रकृतिकल्पनैव वेदविरुद्धं न किंतु तन्मभेदकल्पनाप्यपीति सि
द्धमिति संबंधः॥स्मृतिविरोधे वेदस्यैवाप्रामाण्यं किं न स्यादित्यत आह॥वेदस्य हीति॥वेदस्य प्रामाण्यं स्वतः सिद्धम
पौरुषेयत्वात् पौरुषेयवाक्यानां स्वार्थस्मृतिः तन्मूलानुभवयोः कल्पनया प्रामाण्यं ज्ञेयमिति व्यवहितं परतः प्रामा
ण्यमिति विप्रकर्षः श्रुतिस्मृत्योर्विशेष इत्यक्षरार्थः॥समयोर्विरोधे हि निरवकाशेन सावकाशो बाध्य इह स्वतः
परतः प्रामाण्ययोर्वैषम्यात् स्फुटतिनिश्चितप्रामाण्येन चानुपसंजातविरोधिना वेदवाक्येन विरुद्धस्मृतेरेव बाध
इति भावः॥तस्मादिति॥विशेषादित्यर्थः॥भ्रांतिमूलत्वसंभवादिति भावः॥महदहंकारो नाव[illegible]दप्रसिद्धो अहंका
रप्रकृतिकत्वेन तन्मात्राण्यप्रसिद्धानि स्मर्तुं न शक्यंत इत्याह॥इतरेषां चेति॥ननु महतः परमव्यक्तमिति प्रसि
द्धानि महदादीनीत्यत आह॥यदपीति॥सूत्रतात्पर्यमाह॥कार्येति॥सांख्यस्मृतेर्महदादिष्विव प्रधानेऽपि प्रामाण्य
नेति निश्चीयत इत्यर्थः॥सांख्यस्मृतेर्बाधेऽपि तदुक्तयुक्तीनां कथं बाध इत्यत आह॥तर्केति॥ब्रह्मण्युक्तसमन्व
यः प्रधानवादियोगस्मृत्या विरुध्यते न वेति संदेहे पूर्ववन्न्यायमतिदिशति॥एतेन योगः प्रत्युक्तः॥अतिदेशत्वा
त् पूर्ववत् संगत्याक्षेपादिकं द्रष्टव्यं॥पूर्वत्रानुक्तनिरासं पूर्वपक्षमाह॥अस्ति ह्यत्रेति॥निदिध्यासनं योगः॥त्री
णि उरोग्रीवाशिरांस्युन्नतानि यस्मिंश्शरीरे तत्त्र्युन्नतं त्रिरुन्नतमिति पाठः छांदसः॥युंजीतेति शेषः॥न के
वलं योगविधिः॥किंतु योगस्य ज्ञापकान्यर्थवाक्यादवाक्यान्यपि संतीत्याह॥लिंगानि चेति॥तां पूर्वोक्तां
धारणां योगविदो योगं परमं तप इति मन्यंते॥उक्तामेतां ब्रह्मविद्यां योगविधिं ध्यानप्रकारं च मृत्युप्रसादान्न
चिकेता लब्ध्वा ब्रह्म प्राप्त इति संबंधः॥योगस्मृतिः प्रधानादितत्त्वांशेऽपि प्रमाणत्वेन स्वीकार्या॥संप्रतिपन्नः प्रामा
णिकार्थैकदेशो योगरूपो यस्यास्तत्त्वादित्यर्थः॥अष्टकाः कर्त्तव्या गुरुरनुगंतव्य इत्यादिस्मृतीनां वेददिरुद्धार्थ

:स्मार्त्तसंख्याविशेषाः १

ना.पत्र.१६०२.०

३

लाकांप्र ३

स

कृत्वा न्मूलश्रुत्यनुमानेन प्रामाण्यमुक्तं प्रमाणलक्षणे॥ एवं योगस्मृतीनां योगे प्रामाण्यात्तत्वांशेपि प्रामाण्यमिति
पूर्वपक्षमनूद्य सिद्धांतयति॥ इत्यमिति॥ ननु बौद्धादिस्मृतयोत्र किमिति न निराकृता इत्यत आह॥ सतीष्वपीति॥
तारकत्वेन प्रसिद्धत्वादविशेषेः पशुप्रायैर्गृहीतत्वाद्दृढबाह्यत्वाच्चात्रोपेक्षेति भावः॥ तत्कारणमिति॥ तेषां प्रकृ
तानां कामानां कारणं सांख्ययोगाभ्यां विवेकध्यानाभ्याम् अपि पत्रं प्रयुक्तमा प्राप्तं देवं ज्ञात्वा सर्वपाशैर् विमुच्यामि
मुच्यत इत्यर्थः॥ समूलत्वे स्मृतिद्वयस्य निरासः किमिति कृत इत्यत आह॥ निराकरणं त्विति॥ इतिहेतोः कृतामि
तिशेषः॥ प्रत्यासत्तेरिति॥ श्रुतिस्थे सांख्ययोगशब्दयोः सजातीयश्रुत्यर्थग्राहकत्वादिति यावत्॥ किं सर्वांशेष्वस्मृ
त्यप्रामाण्यं नेत्याह॥ येन त्वंशेनेति॥ ब्रह्मवादस्य कणभक्षादिर्विरोधमात्रं स्यादिति दिशति॥ एतेनेति॥ श्रुतिविरो
धेनेत्यर्थः॥ उपकारकत्वं योनयुक्त इत्यांशयोः स्वयोरुपकारकः न सन्न बाध्यः किंतु तत्वांश इत्याह॥ तान्यपी
ति॥ तर्कोनुमानं तद्धेतुग्राहिका युक्तिरूपपात्तिः स्मृतीनामप्रामाण्यान्ताभिः समन्वयस्य नविरोध इति सिद्धं॥ नवि
विलक्षणत्वात्॥ वृत्तानुवादेनास्याधिकरणस्य तात्पर्यमाह॥ ब्रह्मास्येति॥ पूर्वपक्षमाक्षिपति॥ कुतः पुनरि
ति॥ अनवकाशं हेतुमाह॥ ननु धर्म इवेति॥ मानांतरानपेक्षे वेदैकसमधिगम्ये ब्रह्मण्यनुमानात्मकतर्क
स्याप्रवेशात्तेनाक्षेपस्यानवकाशः भिन्नविषयत्वात्तर्कवेदयोरित्यर्थः॥ सिद्धस्य मानांतरगम्यत्वादेकविषयत्वाद्वि
रोध इति पूर्वपक्षं समर्थयते॥ भवेदयमिति॥ अवष्टंभो दृष्टांतः॥ नन्वेकविषयत्वेन विरोधेपि श्रुतिविरोधान्मानां
तरमेव बाध्यतामित्यत आह॥ यथा चेति॥ प्रबलश्रुत्या दुर्बलश्रुतिबाधवन्निरवकाशमानांतरेण लक्षणा
वृत्त्या सावकाशश्रुतिनयनं युक्तमित्यर्थः॥ किंच ब्रह्मसाक्षात्कारस्य मोक्षहेतुत्वेन प्रधानं स्यात् अंतरंगंतर्की
त्तस्या परोक्षदृष्टांतगोचरत्वेन प्रधानवदपरोक्षार्थविषयत्वात्॥ शब्दस्तु परोक्षार्थकत्वाद्बहि

४

५

=वेदोताः कर्मादि मानास्य
कत्वेन सावकाशं इति म

रंगम्मतस्तर्केण बाध्यइत्याह ॥ दृष्टेति ॥ ऐतिह्यमात्रेण परोक्षतयेति यावत् ॥ अनुभवस्य प्राधान्यं दर्शयति ॥ अनुभवावसानं चेति
नैषा तर्केण मतिरित्यर्थवादेन तर्कस्य निषेधमात्रं न स्य विधिविरोधान्नैवमित्याह ॥ श्रुतिरपीति ॥ एवं पूर्वपक्षं
संभाव्य चेतनब्रह्मकारणवादिवेदांतसमन्वयः क्षित्यादिकं न चेतनप्रकृतिकं कार्यद्रव्यत्वात् घटवदिति सांख्य
योगन्यायेन विरुध्यते न वेति संदेहे स्मृतेर्मूलाभावाद्दुर्बलत्वेऽप्यनुमानस्य व्याप्तिमूलत्वेन प्राबल्यात्ते
न विरुध्यत इति प्रत्युदाहरणेन पूर्वपक्षयति ॥ न विलक्षणत्वादिति ॥ पूर्वोत्तरपक्षयोः समन्वयासिद्धिः
तत्सिद्धिश्चेति पूर्ववत् फलं जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात् ॥ यद्धि यद्विलक्षणं तन्न तत्प्रकृतिकं
यथा मृद्विलक्षणा रुचिकादयइत्यर्थः ॥ सुखदुःखमोहाः सत्वरजःतमांसि ॥ तथा च जगत् सुखदुःखमोहा
त्मकसामान्यप्रकृतिकं तदन्वितत्वात् यदित्थं तत्तथा मृदन्विता घटादयइत्याह ॥ मृदेवेति ॥ विलक्षणत्वं सा
ध्यति ॥ ब्रह्मविलक्षणत्वं चेति ॥ यथा हि एक एव स्त्रीपिंडः पतिसपत्न्युपपतीनां प्रीतिपरितापविषादादीन् क
रोति ॥ एवमन्येऽपि भावा द्रष्टव्याः ॥ तत्र प्रीतिः सुखं परितापः शोकः विषादो भ्रमः आदिपदात् रागादिविभ्रमः ग्रहः ॥
उभयोश्चेतनत्वेन साम्यादुपकार्योपकारकभावो न स्यादित्युक्तं ॥ स्वामिभृत्ययोर्व्यभिचारादिति शंकते ॥
ननु चेतनमपीति ॥ असंदेहस्येव स्वामि चेतनोपकारकत्वान्न व्यभिचार इत्याह ॥ नेत्यादिना ॥ उत्कर्षापकर्षशून्यत्वा
च्चेतनानां मिथो नोपकारकत्वमित्याह ॥ निरतिशया इति ॥ तस्मादुपकारकत्वादे ॥ अचेतनप्रकृतित्वं बल
न जगच्चेतनमेवेत्येकदेशिनमुत्थापयति योऽपीति ॥ घटादेश्चेतनत्वमनुपलब्धिबाधितमित्यत आह ॥ अवि
र्भावेति ॥ अंतःकरणान्यपरिणामित्वात् सतोऽपि चैतन्यस्यानुपलब्धिरित्यर्थः ॥ अंतःकरणादन्यस्य च
तदुपरागदशायामेव चैतन्याभिव्यक्तिर्नान्यदेति भावः ॥ रसभावे चैतन्यानभिव्यक्तौ दृष्टांतः ॥ यथेति ॥ आ

यथा

रा

क

४

मानात्मनोश्चेतनत्वेस्वस्वामिभावःकुतइत्यतआह॥एतस्मादेवेति॥साम्येपिप्रातिस्विकस्वरूपविशेषाच्छेषशे
षित्वेदृष्टान्तः॥यथाचेति॥चेतनाचेतनभेदःकथमित्यतआह॥प्रविभागेति॥चैतन्याभिव्यक्त्यनभिव्यक्तिभ्या
मित्यर्थः॥सर्वस्यचेतनत्वमेकदेश्युक्तमंगीकृत्यसांख्यःपरिहरति॥तेनापिकथंचिदिति॥अंगीकारंसहकोस्त्र
विशेषेणपरिहरति॥नचेत्यादिना॥इतरश्चेतनाचेतनरूपंवैलक्षण्यंतथात्वशब्दार्थः॥श्रुतार्थापत्तिःशब्देन
बाध्येतिभावः॥श्रुतिसाहाय्यात्रबाध्येत्युत्तरसूत्रव्यावर्त्यशंकेति॥नन्विति॥मृदादीनांवक्तृत्वादिश्रुतेस्त
दभिमानिविषयत्वात्तथाविज्ञानंचाविज्ञानंचेतिचेतनाचेतनविभागशब्दस्यापचरितार्थत्वंनयुक्तमितिसांख्यः
समाधत्ते॥अपिमानीति॥संवदनंविवादः॥नभूतमात्रमिंद्रियमात्रंवाचेतनत्वेनव्यपदिश्यते॥लोकेवेदेप्रवि
द्विभागबाधायोगादित्यर्थः॥विशेषपदस्यार्थान्तरमाह॥अपिचेति॥अहंश्रेयसेस्वश्रैष्ठ्यायप्राणाविवद
मानाइत्युक्तप्राणानांचेतनत्वाच्चिदेवतापदेनविशेषितत्वात्प्राणादिपदैरभिमानिव्यपदेशइत्यर्थः॥प्राणे
निःश्रेयसंश्रैष्ठ्यंमैत्रीविदिताप्राणाधीनाजाताइत्यन्वयः॥अनुगतिंबहुव्याचष्टे॥अनुगताश्चेति॥त
स्मैप्राणायबलिहरणंवागादिभिःस्वीयवशिष्ठत्वादिगुणसमर्पणंकृतं॥तेजआदीनामीक्षणंतयैवेतत्सापि
करणेचेतननिष्ठतयाव्याख्यातंद्रष्टव्यमित्यर्थः॥यस्मान्नास्तिजगतश्चेतनत्वंतस्मादितिपूर्वपक्षोपसंहारः॥
किंयत्किंचिद्वैलक्षण्यंहेतुःबहुवैलक्षण्यंवा॥आद्येव्यभिचारमाह॥नायमेकान्तोदृश्यतेहेतुरिति॥हेतोरस
लान्नव्यभिचारइतिशंकते॥नन्विति॥यत्किंचिद्वैलक्षण्यमस्तीतिव्यभिचारइत्याह॥अन्यतरेति॥शरीरस्यके
शादीनांचप्राणित्वाप्राणित्वरूपंवैलक्षण्यमस्तीत्यर्थः॥द्वितीयेपितत्रैवव्यभिचारमाह॥महानिति॥परिणामिकः
केशादीनांस्वगतपरिणामात्मकइत्यर्थः॥किंचययोःप्रकृतिविकारभावःतयोःसादृश्यंवक्तव्यं॥किमासंति

कं पत्वात्कं चिद्वेति ॥ आद्ये दोषमाह ॥ अनं तेति ॥ द्वितीयपक्षं स्य ब्रह्म जगतोरपि तत्सत्वात्प्रकृतिविकृतित्वसिद्धिरित्याह ॥ अ
ये त्यादिना विलक्षणत्वविकल्पदूषणांतरमाह ॥ विलक्षणत्वेनेत्यादिना ॥ जगति समस्तस्य ब्रह्मस्वभावस्य चेतनत्वादेरननु
वर्त्तनान्न ब्रह्मत्वकार्यमिति पक्षे सर्वसाम्ये प्रकृतिविकारत्वमित्युक्तं स्यात् [illegible] तदसंगतमित्याह ॥ प्रथमइति ॥ तृतीये तु दृष्टं
तापावइति ॥ न च जगन्न ब्रह्मप्रकृतिकं अचेतनत्वाद्व्यावदिति दृष्टांतोस्तीति वाच्यं ॥ अ[illegible] नादित्वस्योपाधित्वात् ॥ नन्व
ध्वंसे साध्याव्यापकता ॥ तस्यापि कार्यसंस्कारात्मकस्य भावत्वेन ब्रह्मप्रकृतिकत्वात्स्वभावत्वाग्रहे चानादिभावत्वस्योपा
धित्वादिति ॥ संप्रति कल्पत्रयसाधारणं दोषमाह ॥ आगमेति ॥ पूर्वोक्तमनुमानं ब्रह्मणः श्रुत्युक्ततर्कविषयत्वात्संभवा
न्न तर्केणाक्षेप इत्याह ॥ यत्तूक्तमित्यादिना ॥ लिंगसादृश्यपदप्रवृत्तिनिमित्तानां अभावाद्दनुमानोपमानशब्दा
नामगोचरो ब्रह्मलक्षणयोर्वैदिकैकवेद्यमित्यर्थः ॥ एषा ब्रह्मणि मतिस्तर्केण स्वतंत्रेण नापनेयेन संपादनीया यद्वा
कुतर्केण न बाधनीया कुतः किं कादन्येनैव वेदविदाचार्येण प्रोक्ता मतिः सुज्ञानायानुभवाय फलाय भवति ॥ [illegible]
प्रेष्ठप्रियतमेति ॥ नचिकेतसं प्रति मृत्योर्वचनं ॥ इयं विद्या सत्यपि यतः आसमंताद्धृत्यतं को वा अद्धा साक्षाद्वेद इति
श्रुतुवेदनं क इह लोके तत्प्रवोचत् प्राबोचत् छांदसो दीर्घलोपः यथावद्वक्ता नास्तीत्यर्थः ॥ प्रत्यग्वजन्म न विदुः मम[illegible] सर्वा
दिश्चेन जन्माभावान्निमिषेण मननविध्यपिव्याजेन श्रुत्युक्तश्रुत्सनपेक्षः ॥ श्रुसातत्वेन निश्चिते ससनुपश्चात्पुरुषदे
षस्यासंभावेनादेर्निरासायगृहीतः श्रु[illegible] सनुगृहीतः ॥ तमाह ॥ स्वज्ञातेति ॥ जीवस्यावस्थावतो देहादिप्रपंचयु
क्तस्य निष्प्रपंचब्रह्मैक्यमसंभवि द्वैतग्राहिप्रमाणविरोधात् ब्रह्मणश्चाद्वितीयत्वमयुक्तमित्येवं श्रौतार्थासंभा
वनायां तन्निरासाय सर्वावस्थास्वात्मनोनुगतस्य व्यभिचारिणीभिरवस्थाभिरनन्वागतत्वमसंस्पृष्टत्वं अव
स्थानां स्वाभाविकत्वे वन्हेरौष्ण्यवदात्मव्यभिचारायोगात् सुषुप्तौ प्रपंचध्वंसभावे सत्तासौम्येत्यु[illegible]क्तो भे
ददर्शनान्निःप्रपंचब्रह्मैक्यसंभवः ॥ यथा घटादयो मृदभिन्नास्तथा जगद्ब्रह्माभिन्नं तज्जत्वादित्यादिस्त

५

र्क आश्रीयत इत्यर्थः ॥ इतोन्यादृशतर्कस्यात्र ब्रह्मण्यप्रवेशादस्य चानुकूलत्वान्न तर्केणाक्षेपावकाश इति भावः ॥
ब्रह्मणि शुष्कतर्कस्याप्रवेशः सूत्रसंमत इत्याह ॥ तर्काप्रतिष्ठानादिति ॥ विप्रलंभकत्वमप्रमाणकत्वं यदुक्तं
एकदेशिना सर्वस्य जगतश्चेतनत्वोक्तौ विभागस्त्वनुपपन्न इति दूषणं सांख्यैर्न त[...]तिनैकदेशिनां भाग
श्रुतेश्चैतन्याभिव्यक्त्यनभिव्यक्तिभ्यां योजयितुं शक्यत्वात् सांख्यस्येहिदं दूषणं वक्तूपक्षेपायते ॥ प्रधानका
र्यत्वे सर्वस्याचेतनत्वेन चेतनाचेतनकार्यविभागसंभवादित्याह ॥ योपीत्यादिना ॥ सिद्धांते चेतनान्वितत्वे वैलक्ष
ण्यांगीकारे कथं ब्रह्मणः प्रकृतित्वमित्यत आह ॥ प्रत्युक्तत्वादिति ॥ अप्रयोजकव्यभिचाराभ्यां निरस्तत्वादित्यर्थः ॥
कार्यमसत्त्वः प्रागसदेव स्यात् स्वविरुद्धकारणात्मना सत्त्वायोगादित्यपसिद्धांतापत्तिमाशंक्य मिथ्यात्वात्कार्यस्य
कालत्रयेपि कारणात्मना सत्त्वमविरुद्धमिति समाधत्ते ॥ असदिति चेदित्यादिना ॥ असत्त्वस्यादिति सत्त्वप्रतिषेधो
निरर्थक इत्यर्थः ॥ कार्यस्य सत्ताभावे श्रुतिमाह ॥ सर्वं तमिति ॥ मिथ्यात्वमज्ञानतः शंकामनूद्य परिहरति ॥ नन्वि
त्यादिना ॥ विस्तरेण चैतदिति मिथ्यात्वमित्यर्थः ॥ सत्कार्यवादिसिद्ध्यर्थं कार्याभेदे कारणस्यापि कार्यवदशुद्ध्या
दिप्रसंग इति शंकासूत्रं व्याचष्टे ॥ अत्राहेति ॥ प्रतिसंसृज्यमानपदस्य व्याख्या कारणे इति यथा [...] जले लीयमानं ल
वणद्रव्यं जलं दूषयति तद्वदित्यर्थः ॥ सूत्रस्य [...] योजनांतरमाह ॥ अपि चेति ॥ सर्वस्य कार्यस्यापि तौ कारणवदेकरूप
त्वप्रसंग इत्यर्थः ॥ अर्थांतरमाह ॥ अपि चेति ॥ कर्मादीनामुपसंहृतिनिमित्तानां प्रलयेपि भोक्तृणामुत्पत्तौ तद्वदेव मुक्ता
नामप्युत्पत्तिप्रसंगादित्यर्थः ॥ शंकापूर्वकं व्याख्यांतरमाह ॥ अथेति ॥ यदि लयकालेपि कार्यं कारणा[...]द्विभक्तं तर्हि
स्थितिकालवल्लयाभावप्रसंगात् कार्येण द्वैतापत्तेश्चासमंजसमिदं दर्शनमित्यर्थः ॥ अपीतौ जगत् स्वकारणं दू
षयति ॥ कारणे लीनत्वान्मृदादिषु लीनघटादिवदिति सिद्धांतसूत्रं व्याचष्टे ॥ नैवेत्यादिना ॥ अपि गच्छल्लीयमानं

तआ

वि

त्व

५

विभागावस्थास्थितिकालं तत्त्वपक्षस्येति मधुरजलं लवणाकरस्योरणमिति अदृष्टांतः॥ किंच दूषकत्वे कार्यस्य स्थितिः
व स्याल्लवणादिवत्साह॥ अपीतिरेवेति॥ असति कार्यैतद्धर्मेण कारणस्य योगो न संभवति धर्मसत्त्वे धर्मिणामप्यसत्त्वा
दितिभावः॥ ननु सत्कार्यवादे लयेपि कार्यस्य कारणाभेदेनासत्त्वात् दूषकत्वं स्यादित्यत आह॥ अनन्यत्वेपीति॥ क
ल्पितस्याधिष्ठानधर्मवत्त्वमभेदात् न त्वधिष्ठानस्य कल्पितकार्यधर्मवत्त्वं तस्य कार्यात्पृथक्सत्त्वादित्यर्थः॥ किंचा
पीताविति विशेषणं व्यर्थमिति प्रतिबंध्या समाधत्ते॥ अत्यल्पं चेति॥ परिणामदृष्टांतं व्याख्याय विवर्तदृष्टांतं व्या
दा चष्टे॥ अस्ति चेति॥ मायाव्यनुपादानमित्यस्य दृष्टांतांतरमाह॥ यथेति॥ अस्यैव स्वप्नकाले दृष्टः संसर्गइत्यत आह॥
प्रबोधेति॥ जाग्रत्सुषुप्त्योः स्वप्नेनासंस्पर्शात्तत्कालेप्यस्पर्शइत्यर्थः॥ यथास्यैकजीवस्यावस्थात्रि संसर्ग
स्तदा सर्वज्ञस्य किं वाच्यमिति दार्ष्टांतिकमाह॥ एवमिति॥ जगज्जन्मस्थितिलयाईश्वरस्यावस्थात्रयं तदसंगित्वे
दृढसंमितिमाह॥ अत्रानादिमिति। यदा तत्त्वमसीत्युपदेशकाले प्रबुध्यते। मायानिद्रां त्यजति। तदा जन्मलयस्थित्य
र वस्थाशून्यमद्वैतमीश्वरमात्मत्वेनानुभवतीत्यर्थः। फलितमाह। तत्रेति। द्वितीयमसामंजस्यमनूद्य तेनैवसू
त्रेण परिहरति। यत्तु नरिति। सुषुप्तावज्ञानसत्त्वे पुनर्विभागोपपत्तेर्नोचमानमाह। श्रुतिश्चेति। सतिब्रह्म
ण्यैकीभूय न विदुरित्यज्ञानोक्तिः इह सुषुप्तेः प्राक्प्रबोधे येन येन जात्यादिना विभक्ता भवंति। तत्पुनः
रुत्थानकाले तथैव भवंतीति विभागोक्तिः॥ ननु सुषुप्तौ पुनर्विभागशक्तिमज्ञानसत्त्वेपि सर्वप्रलये तत्स
त्त्वं कुत इत्यत आह। यथाहीति। यथा सुषुप्तौ परमात्मनि सर्वकार्याणामविभागेपि पुनर्विभागहेतुरज्ञान
शक्तिरस्ति एवमपीतौ महाप्रलयेपि मिथ्याज्ञानसंबंधात्पुनः सृष्टिविभागशक्तिरनुमास्य ॥ यतः

भा०१

ना. भा. नि. ८. २१.
५५

स्थितावि दानीं मिथ्याज्ञानकार्ये विभागव्यवहारस्तत्त्वबोधाभावात्स्वप्नवद्बाधितो दृश्यते ॥ अतः कार्यदर्श
नात्कारणत्वसिद्धिरित्यर्थः ॥ अज्ञानां जीवानां महाप्रलयेप्यज्ञानशक्तिनियमात्पुनर्जन्मनियम इति
भावः ॥ एतेनेति ॥ जन्मकारणाज्ञानशक्त्यभ्युपगमेनेत्यर्थः ॥ वैलक्षण्यादीनां सांख्यपक्षेपि दोषत्वान्नास्माभि
स्तन्निरासप्रयासः कार्य इत्याह ॥ स्वपक्षेति ॥ सूत्रं व्याचष्टे ॥ स्वेति ॥ प्रादुष्युः प्रादुर्भवेयुः ॥ अत एवेति ॥ सत्त्व
कार्यस्य विरूपकारणात्मना सत्त्वायोगात्सांख्यस्यैवायं दोषो न कार्यमिथ्यात्ववादिन इति मंतव्यं ॥ अपीताविति
सूत्रोक्तदोषचतुष्टयमाह ॥ तथापीताविति कार्यवत्प्रधानस्य रूपादिमत्त्वप्रसंगः ॥ इदं कर्मादिकमस्योपा
दानं भोग्यमस्येत्यस्य नियमः ॥ बद्धमुक्तावस्थानयदि व्यवस्थार्थं मुक्तानां भेदाः संघातविशेषाः प्रधाने लीयंते
द्धानां भेदास्तु न लीयंत इत्युच्यते तर्हि अलीनानां पुरुषवत्कार्यत्वाभावात् इत्यर्थः ॥ किं च तर्कस्य संभावितं सभावित
दोषत्वात्तेन निर्दोषवेदांतसमन्वयो न बाध्य इत्याह ॥ तर्काप्रतिष्ठानादिति ॥ पुरुषमतीनां विचित्रत्वेपि कपिल
स्य सर्वज्ञत्वात्तदीयतर्के विश्वास इति शंकते ॥ अथेति ॥ कपिलो यदि सर्वज्ञः कणादो नेति का प्रमेति न्यायेन प
रिहरति ॥ एवमपीति ॥ सूत्रमप्यस्य शंकाभागं व्याचष्टे ॥ अन्यथेति ॥ विलक्षणत्वादितर्काणामप्रतिष्ठितत्वे
पि व्याप्तिपक्षधर्मतासंपन्नः कश्चित्तर्कः प्रतिष्ठितो भविष्यति तेन प्रधानमनुमेयमित्यर्थः ॥ ननु सोप्यप्रतिष्ठितः
तर्कजातीयत्वाद्विलक्षणत्वादिवदित्यत आह ॥ नहीति ॥ तर्कजातीयत्वादिति तर्कः प्रतिष्ठितो न वा ॥ आद्ये न
प्रतिष्ठितत्वसाध्याभावात् व्यभिचारः ॥ द्वितीयेपि न सर्वतर्काणामप्रतिष्ठितत्वं हेत्वभावादित्यभिसंधिमा
न्नाह ॥ एतदपीति ॥ किं चानागतपाकस्य साध्यं न पाकत्वादतीतपाकवदित्यादि इष्टसाध्यनानुमानात्मकतर्कस्य प्र
वृत्तिनिवृत्तिव्यवहारहेतुत्वान्नाप्रतिष्ठेत्याह ॥ सर्वतर्केति ॥ अध्वा विषयः पाकभोजनादि विषभक्षणादि श्व

स २   द्वि. भा   ब   २

नि ४२

संहरति ५ सम्यक्ज्ञानत्वं १

तद्सामान्येन पाकत्वादिना नागतविषये पाकादौ सुखदुःखहेतुत्वेनुमितस्यापत्यादिरित्यर्थः॥ किंच पुरुषेति
रमीमांसयोस्तर्केणैव वाक्यतात्पर्यनिर्णयस्य क्रियमाणत्वात्तर्कः प्रतिष्ठित इत्याह॥ श्रुत्यर्थेति॥ मनु
रपि केषांचित्तर्काणां प्रतिष्ठां मन्यत इत्याह॥ मनुरपीति॥ धर्मस्य शुद्धिरधर्मादेर निर्णयः॥ कस्यचित्तर्कस्या
प्रतिष्ठितत्वमंगीकरोति॥ अयमेवेति॥ सर्वतर्काणामप्रतिष्ठायां पूर्वपक्ष एव न स्यादिति भावः॥ पूर्वपक्षतर्कवन्नसि
द्धांतपक्षीतर्कोप्यप्रतिष्ठितः तर्कत्वाविशेषादिति वदंतमुपहसति॥ नहीति॥ क्वचित्तर्कस्य प्रतिष्ठायामपि जगत्
कारणविशेषतर्कस्य सा तत्र नास्तीति सूत्रशेषं व्याचष्टे॥ यद्यपीत्यादिना॥ भावस्य जगत्कारणस्य यथा[illegible]त्स्यम
द्वयत्वं मुक्तिनिबंधनं मुक्त्यालंबनं परमानंदचित्प्रभं॥ अतिगंभीरत्वं ब्रह्मणो वेदान्यमानागम्यत्वं दर्शयति॥ रू
पाद्यभावादिति॥ अविमोक्षो मुक्त्यभाव इत्यर्थांतरेणाह॥ अपि चेदित्यादिना॥ एकरूपवस्तुज्ञानस्य सम्यक्ज्ञानत्वेपि त
र्कजन्यत्वं किं न स्यादित्याह॥ तत्रैवं सतीति॥ तर्कोत्थितज्ञानानां मिथो विप्रपत्तेर्न सम्यक्ज्ञाने विप्रतिपत्त्ययोगादि
त्यर्थः॥ एकरूपेणानवस्थितो विषयो यस्य तत्तर्कप्रभवं कथं सम्यक्ज्ञानं भवेदिति योजना॥ ननु सांख्यस्य श्रेष्ठ
त्वात्तज्ज्ञानं सम्यगित्याशंक्य हेत्वसिद्धिमाह॥ न च प्रधानेति॥ ननु तार्किकैर्मिलित्वा निश्चिततर्कोत्थमति मुक्ति
हेतुरित्यत आह॥ न च शक्यत इति॥ तस्मात्तर्कोत्थज्ञानान्मुक्त्ययोगात्तर्केण वेदांतसमन्वय[illegible]बाधो न युक्त इत्यु
क्ते सम्यक्ज्ञानालाभेनानिर्मोक्षप्रसंगादिति सूत्रांशार्थमुपसंहरति॥ अतोन्यत्रेति॥ समन्वयस्य तर्केणाविरोधे
फलितमधिकरणार्थमुपसंहरति॥ आगमेति॥ ब्रह्म जगदुपादानमिति ब्रुवन्वेदांतसमन्वयो विषयः स किं
यद्विष्णुतत्वद्व्योपादानमिति वैशेषिकादिशैलिन न्यायेन विरुध्यते न वेति संदेहे सांख्यदृष्टांतेन किंशब्दमिति
तेपि वैशेषिकादीनां तर्के नातिकुशलत्वप्रसिद्धेस्तदीयन्यायस्याबाधितत्वाद्विरुध्यत इति प्रत्युदाहरणेन प्राप्तिः
दिशति॥ एतेनेति फलं पूर्ववत्॥ ननु सांख्यमतस्योपदेशस्ता किंक्रमन्तस्यातिदेशः किमिति हता वैपरीत्यस्यापि

सर्व

शा.भा.टि.रा.

संभवादित्याशंक्य पूर्वोत्तरयोरुपदेशातिदेशभावे कारणमाह ॥ वैदिकस्येति ॥ सत्कार्यत्वासंगत्वस्वप्रकाशत्वाद्यं
शेन वेदान्तदर्शनस्य प्रत्यासन्नः प्रधानवादः शिष्टैर्वृद्धादिभिः सत्कार्यत्वांशेन स्वीकृत इति प्रबलत्वादुपदेशः ॥ अ
णुवादिवादानां निर्मूलत्वेन दुर्बलत्वादतिदेश इति भावः ॥ किं निराकरणकारणमिति तद्वैष्यं नास्तीत्याह ॥ तुल्य
त्वादिति ॥ कारणमेवाह ॥ तुल्यमिति ॥ यदुक्तं विभुत्वान्नद्युपादानं ब्रह्मेति ॥ तत्र पक्षसाधकत्वेन श्रुतेरुपजीव्यत्वा
न्नपाबाधः ॥ महापरिमाणवत्त्वस्य सर्वसंयोगित्वरूपविभुत्वस्य निर्गुणे ब्रह्मण्यसिद्धेः श्रुतिर्द्रष्टव्या ॥ अतः समन्वयस्यतो
र्ककन्यायेन न विरोधः प्रतिसिद्धः ॥ अद्वितीयात् ब्रह्मणो जगत्सर्गादिवादी वेदान्तसमन्वयो विषयः ॥ स किं यन्निमित्ताभिन्नं
तन्नाद्वितीयकारणाभिन्नं यथा मृत्तन्तुजौ घटपटाविति तर्कसहितभेदप्रत्यक्षादिना विरुध्यते न वेति संदेहे ब्रह्मणि
तर्कस्याप्रतिष्ठितत्वेपि जगद्भेदे प्रतिष्ठितत्वाद्विरुध्यत इति पूर्वपक्षी मुक्तिः ॥ भोक्त्रापत्तेरिति ॥ विरोधादद्वैतासिद्धिः पूर्व
पक्षफलं सिद्धान्ते तत्सिद्धिरिति भेदः ॥ अनेन पक्षश्रुत्यासार्थनिर्णयात्तर्केणाक्षेपो न युक्त इत्युक्तमिति शंकते ॥ यद्यपीति ॥
मानान्तरायोग्यश्रुत्यर्थे भवत्सनाक्षेपः यस्त्वद्वितीयब्रह्माभेदाद्भुजङ्गादीनामभेदो ब्रह्मोपादानकत्वश्रुतिविषयः स श्रु
द्दिस्रोपूपरस्यार्थवादार्थवन्मानान्तरयोग्य एवेति द्वैतप्रमाणेनापह्रियत इति समाधत्ते ॥ तथापीति ॥ अन्यपरत्वं गौणार्थत्वं ॥
स्वविषये जगद्भेदे तर्कस्य प्रतिष्ठितत्वात्तेनाक्षेप इत्याह ॥ तर्कोपीति ॥ तर्कादेर्द्वैते प्रामाण्येपि ततः समन्वयविरोधे किमायातमिति शंकते ॥
किमतः इति ॥ पूर्वपक्षी समाधत्ते ॥ अत इति ॥ तर्कादेः प्रामाण्याद्द्वैतबाधकत्वं श्रुतेरयुक्तमित्यद्वैतसमन्वयबाधो युक्त इत्यर्थः ॥ इम
मर्थं शंकापूर्वकं स्पष्टयति ॥ कथमित्यादिना ॥ ननु भोक्तृभोग्ययोर्मिथ एकत्वं केनोक्तमित्याशंक्य श्रुतार्थापत्त्येत्याह ॥ तयोश्चे
ति ॥ तयोरेकब्रह्माभेदश्रवणादेकत्वं कल्प्यते एकस्माद्भिन्नयोर्भेदे एकस्यापि भेदापत्तेः ॥ तत्तद्भेदो बाध्येत इत्यर्थः ॥ इष्टापत्तिं
वारयति ॥ न चास्येति ॥ श्रुतेर्गौणार्थत्वेन सावकाशत्वान्निरवकाशद्वैतमानबाधो न युक्त इत्यर्थः ॥ ननु विभागस्याधुनिकत्वा
दनाद्यद्वैतश्रुत्याबाध इत्यत आह ॥ यथेति ॥ अतीतानागतकालेपि भोक्त्रादिविभागाश्रयो कालत्वाद्वर्तमानकालवदित्यनुमा
नाद्विभागो नाद्यनन्त इत्यर्थः ॥

= एकस्यैव परमात्मनो विलक्षदेहेषु प्रवेशेन भोक्तृत्वात्प्रतिदेहं तन्मोनमुक्तद्सांकर्य्यः कथं स्यादित्यर्थः ।४

एवं प्राप्ते परिणामदृष्टांतेनापाततः सिद्धांतमाह ॥ स्याल्लोकवदिति ॥ दृष्टांतेपि कथमेकसमुद्राभिन्नानां परिणामानां मिथो भेदः कथं वा तेषां भेदे सत्येकस्मादभिन्नत्वमाशंक्य न हि दृष्टेनुपपत्तिरिति न्यायेनाह ॥ न चेति ॥ एवं भोक्तृभोग्ययोर्मिथो भेदो ब्रह्माभेदश्चेत्याह ॥ एवमिहेति ॥ जीवस्य ब्रह्मविकारत्वाभावात् दृष्टांतवैषम्यमिति शंकते ॥ यद्यपीति ॥ औपाधिकं जन्मास्तीति तरंगादिसाम्यमाह ॥ तथापीति ॥ विभागो जन्म ॥ यद्यपि तथापीति शब्दैर्नैवोक्तः परिहारः ॥ ननु भोक्तृप्रतिदेहं विभागः कथमित्यत आह ॥ कार्यमनुप्रविष्टस्येति ॥ औपाधिकविभागे फलितमुपसंहरति ॥ इत्यतइति ॥ एकब्रह्माभिन्नत्वेपि भोक्त्रादेस्तरंगादिवद्भेदांगीकारान्नाद्वैतमानेनाद्वैतसमन्वयस्य विरोध इत्यर्थः ॥ पूर्वस्मिन्नेव पूर्वपक्षे विवर्तवादेन मुख्यं समाधानमाह ॥ तदनन्यत्वमिति ॥ समानविषयत्वं संगतिं वदन्नुक्तयोः परिहारयोः परिणामविवर्ताश्रयत्वेनार्थभेदमाह ॥ अभ्युपगम्येति ॥ प्रत्यक्षादीनामोत्सर्गिकप्रामाण्यभंगीकृत्य स्थूलबुद्धिसमाधानार्थं परिणामदृष्टांतेन भेदाभेदावुक्तौ संप्रत्यंगीकृतप्रामाण्यं तत्त्वावेदकत्वात्प्रत्याख्याय व्यावहारिकत्वे स्थापयते ॥ तथा च मिथ्याद्वैतग्राहिप्रमाणैरद्वैतश्रुतेर्न बाधः एकस्यापि ज्ञांदुइस्वगादिद्वैतदर्शनादित्ययं मुख्यः परिहार इति भावः ॥ एवमद्वैतसमन्वयस्याविरोधार्थं द्वैतस्य मिथ्यात्वं साधयति ॥ यस्मात्तयोरिति ॥ स्वस्वरूपैक्यकार्यकारणत्वापातइत्यत आह ॥ व्यतिरेकेणेति ॥ कारणात्पृथक्सत्त्वमनन्यत्वं कार्यस्य साध्यते नैक्यमित्यर्थः ॥ वाचारंभणं नाम मात्रं विकारो न कारणात्पृथगस्तीति एवकारार्थ इति ॥ श्रुतिं योजयति ॥ एतदुक्तमिति ॥ आरंभणशब्दार्थांतरमाह ॥ पुनश्श्रुति ॥ अपागात् अग्नेरग्नित्वमपगतं कारणमात्रत्वात् ॥ त्रीणि तेजोबन्नानां रूपाणि रूपं तन्मात्रात्मकानि सत्यं तेषामपि सन्मात्रत्वात् सदेव शिष्यत इत्यपि प्रायः ॥ जीवजगतोर्ब्रह्मानन्यत्वे प्रतिज्ञाबाधइत्याह ॥ न चान्यथेति ॥ तयोरनन्यत्वे क्रमेण दृष्टांतावाह ॥ तस्माद्यथेति ॥ प्रज्ञा बलादि इत्यर्थः ॥ दृष्टं प्रतीतिकं नष्टमनिरूप्य स्वरूपं तद्रूपेणानुपाख्यत्वादसत्ता स्फूर्तिशून्यत्वादनन्यत्वमिति संबंधः ॥ भट्टाद्वैतं स्वमतमुक्त्वा भेदाभेदमतमुत्थापयति ॥ नन्विति ॥ अनेकाभिः शक्तिभिस्तद्धीनप्रवृत्तिभिः परिणामे युक्तमित्यर्थः ॥ भेदाभेदमते सर्वव्यवस्था सिद्धिरसंत भेदे द्वैतमानबाध इत्यभिमानः ॥ दूषयति ॥ नेवं स्यादिति ॥ एवकारवाचारंभणशब्दाभ्यां विकारसत्तानिषेधात् परिणामवादः श्रुतिबाह्य इत्यर्थः ॥ [illegible]

ति४

= यदि [illegible] मिथ्याद्वैतं सत्याद्वैतस्य बाधकं स्यात्तर्हि [illegible] प्रकारा इयत पन्नष्येत इपन्नष्य जेतु एकस्मिन्नसते मिथ्याद्वैतं रज्यादय तो नवाधद्वि

पि.रा.　　　　　　　　　　　　धा २　　　　　　　　　　　　द्वै॰प्रा॰

८ किंच संसारस्य स■त्यत्वे तद्विशिष्टस्य जीवस्य ब्रह्मैक्योपदेशो न स्याद्विरोधादित्याह ॥ ■सत्यात्मेति ॥ एकत्वं ज्ञानकर्मस
मुच्चयसाध्यमित्युपदेशार्थः स्यात्त्वं स्यादसीति पदविरोधमेवमित्याह ॥ स्वप्नमिति ॥ अतस्तत्वज्ञानबाध्यत्वात्संसारित्वं
मिथ्येत्याह ॥ अतश्चेति ॥ स्वतः सिद्धोपदेशादित्यर्थः ॥ यदुक्तं व्यवहारार्थं नानात्वं सत्यमिति ■ तत्र किं नानात्वं व्यवहारा
र्थं प्राग्वा नाद्य इत्याह ॥ बाधितेनेति ॥ स्वभावो ह्यविद्या■ तया कृतः स्वाभाविकः ॥ ज्ञानात्पूर्वं प्रमातृत्वादिव्यवहारस्या
भावाच्च नानात्वमनर्थकत्वमित्यर्थः ॥ न द्वितीयः ज्ञानात्प्राक्कल्पितनानात्वेन व्यवहारोपपत्तौ नानात्वस्य सत्यत्वासिद्धेः ॥ परन्तु प्रमा
तृत्वादिव्यवहारः सत्य एव मोक्षावस्थायां निवर्तत इति तन्नेत्याह ॥ नचायमिति ॥ संसारसत्यत्वे तदवस्थायां जीवस्य ब्रह्मत्वं न स्या
स्य ७ त् ॥ भेदाभेदयोरेकदैकत्र विरोधात्ततो संसारी ब्रह्माभेदं संपादितं त्वावगमात् संसारोपि मिथ्यैवेत्यर्थः ॥ किंच यथा लोके क
नटे ८ श्चित्तस्करश्च■ बुध्यागृहीतोऽनृतवादी चेत्तप्तपरशुं गृह्णाति सद्ह्यते बध्यते च ॥ तथा नानात्ववादी बध्यते ॥ सत्यवादी चेन्न
दह्यते मुच्यते च ॥ तथैतदात्म्यमिदं सर्वमित्येकत्वदर्शी मुच्यत इति श्रुतदृष्टान्तेनैकत्वं सत्यं ॥ नानात्वं मिथ्येत्याह ॥ तस्करेति ॥
व्यवहारगोचरो नानात्वव्यवहाराश्रयः ॥ नानात्वनिंदया पुनरेकत्वमेव सत्यमित्याह ॥ मृत्योरिति ॥ किंचास्मिन्नभेदाभेदमते जीवस्य　८
ब्रह्माभेदज्ञानाद्द्वैतज्ञाननिवृत्तेर्मुक्तिरिष्टा सा न युक्ता भेदज्ञानस्य प्रमत्वानुपपत्तेः प्रमायाः प्रमान्तराबाध्यत्वादित्याह ॥
तथ्यात्वे नास क्वीनस्य　न चास्मिन्निति ॥ विपरीतस्यापि संभवादिति भावः ॥ इदानीं प्रत्यक्षादिप्रामाण्यान्यथानुपपत्त्या नानात्वस्य सत्यमिति पूर्वप　य
क्षबीजमुद्घाटयति ॥ नन्वित्यादिना ॥ एकत्वस्यैकान्ततः केवल्यं व्याहन्येरन्न प्रमाणानि स्युः ॥ उपजीव्यप्रत्यक्षादिप्रामाण्या
य वेदान्तानां भेदाभेदपरत्वमुचितमिति भावः ॥ ननु कर्मकारणानां यजमानादीनां विद्याकारकाणां शिष्यादीनां च कल्पितभेद
■मात्रिसकर्मज्ञानकाण्डयोः प्रवृत्तेः स्वप्रमेयस्य धर्मादेरबाधात्तु प्रामाण्यमव्याहतमित्याशंक्याह ॥ कथं चानृतेनेति ॥
धूलिकल्पितधूमेनानुमितस्य चन्द्रेरिव प्रमेयबाधापत्तेरिति भावः ॥ तत्राद्वैतविषये प्रत्यक्षादीनां यावद्बाधं व्यावहा
रिकं प्रामाण्यमुपपद्यत इत्याह ॥ अत्रोच्यत इत्यादिना ॥ सत्यत्वं बाधाभावः बाधो मिथ्यात्वनिश्चयः वस्तुतो मिथ्यात्वे
पि विकारेषु तन्निश्चयाभावेन प्रत्यक्षादिव्यवहारोपपत्ति■ तावुक्तदृष्टान्तं विवृणोति ॥ यथा सुप्तस्य प्राकृतस्येति ॥ एवं द्वै　८
तप्रमाणानां व्यवहारकाले बाध्यत्वाभावे बोधकत्वं व्यावहारिकं प्रामाण्यमुपपाद्याद्वैतप्रमाणानां वेदान्तानां से

की

र्वकालेषु वाध्यमानत्वाद्ब्रह्मबोधकत्वं तात्त्विकं प्रामाण्यमुपपादयितुमुक्तशंकामनुवदति ॥ कथं त्वसत्येनेति ॥ किमसत्यार्थसत्यं
नजायते किमुत सत्यस्य ज्ञानं नाद्यं दृष्टश्च न हि वंध्यावाक्याद्वज्ञानं सत्यमंगीकुर्मः ॥ अंगीकृत्यापि दृष्टांतमाह ॥ नैष
दोष इति ॥ सर्पेणादष्टस्यापि दृष्टत्वभ्रांतिकल्पितविषेण तत्सु स्मरणमूर्छादिदर्शनात् असत्यात्सत्यं न जायत
इत्यनियम इत्यर्थः ॥ दृष्टांतांतरमाह ॥ स्वप्नेति ॥ असत्यात्सर्पादिकादेः सत्यस्य दंशनस्नानादिज्ञानस्य कार्यस्य द
क्षात्कारनात्वव्याप्तिचार इत्यर्थः ॥ यथोक्तमादाय शंकते ॥ तत्कार्यमपीति ॥ उक्तमर्थं प्रकटयति ॥ अत्र ब्रह्मसा
दिना ॥ अवगतिः वृत्तिः घटादिवत् सत्यापि प्रातिभासिकस्वप्नदृष्टवस्तुनः फलं चैतन्यं बाधस्यापि व्यभिभव
गतिशब्दार्थः ॥ प्रसंगाद्देहात्मवादोऽपि निरस्त इत्याह ॥ एतेनेति ॥ स्वप्न[illegible]वगतेः स्वप्नदेहधर्मत्वे हि तस्य
भूया ॥ तादृशः स्वप्नोवगतेः इस बाधितावगतिप्रतिसंधानं न स्यात् ॥ अतो देहे भेदेऽपि अनुसंधानदर्शना
त्वदेहादन्योऽनुसंधातेत्यर्थः ॥ असत्यात्सत्यस्य ज्ञानं न जायत इति द्वितीयनियमस्य व्यभिचारमाह ॥ त
धानश्रुतिरिति ॥ न च स्त्रीयोषा मिथ्या स्वपितदर्शनात् सत्यादेव सत्यायाः सम्यग्ज्ञानमिति वाच्यं ॥ विषयविरि
ष्टेन दर्शनस्यापि मिथ्यात्वात् प्रकृतेऽपि सत्यब्रह्मणि मिथ्यावेदानुगतचैतन्याद् ज्ञानसंभवमिति भावः ॥ अ
सत्यात्सत्यस्य स्वप्नस्य ज्ञानमुक्त्वा निषेधस्य ज्ञानमाह ॥ तथेति ॥ असत्याद् सत्यस्य ज्ञाने दृष्टांतांतरमाह ॥ तथाका
रादिति ॥ रेखास्वकारत्वादिध्वांतास्याकारादयो ज्ञायंत इति प्रसिद्धमित्यर्थः ॥ एवमसत्यात्सत्यस्य जन्मोक्त्या
यदर्थक्रियाकारि तदेव सत्यमिति नियमोऽपास्तः अनृतात् सत्यस्य ज्ञानोक्त्या यदनृतकरणगम्यं तद्बाध्यं कूटलिंगा
नुमितवह्निवदिति व्याप्तिर्भग्ना ॥ तथा च कल्पितानामपि वेदांतानां सत्यब्रह्मबोधकत्वं संभवतीति तात्त्विकं प्रामा
ण्यमित्यर्थः ॥ यदुक्तं एकत्वे नानात्वव्यवहारसिद्ध्यै उभयं सत्यमिति ॥ तन्न ॥ भेदस्य लोकसिद्धस्यापूर्वफलत्ववद्भेद एकत्व
विरोधेन सत्यत्वकल्पनायोगात् ॥ किं च यद्युभयोरेकदा व्यवहारः स्यात्तर्हि सोऽदो दपि सत्यं ॥ नैवमस्ति ॥

तत्र २

ज्ञानेन चरमेणानपेक्षेण नानात्वस्य निःशेषं बाधात् श्रुतिज्ञाने नैवजनतस्येत्याह ॥ अपि चांते मिथ्यात्वमिति ॥
न नूपजीव्यद्वैतप्रमाणविरोधादेकत्वावगतिर्नोत्पद्यत इत्याह ॥ न चेयमिति ॥ तत्किल्लाःसौम्यस्य पितुर्वाक्या
त् श्वेतकेतुर्विज्ञातवान् इति ज्ञानोत्पत्तेः श्रुतत्वात् सामग्रीसत्त्वाच्चेत्यर्थः ॥ व्यावहारिकगुरुशिष्यादिभेद
मुपजीव्य जायमानवाक्यार्थावगतेः प्रत्यक्षादिगतं व्यावहारिकप्रामाण्यमुपजीव्यं तच्च पारमार्थिकैकत्वा
वगमेन न विरुध्यते ॥ किंतु तत्त्वावेदकत्वादुपजीव्यप्रत्यक्षादेस्तात्त्विकं प्रामाण्यं बाध्यत इति भावः ॥ किं चैक
त्वावगतेः फलवत्प्रमात्वान्निष्फलो द्वैतभ्रमो बाध्य इत्याह ॥ न चेयमिति ॥ ननु सर्वस्य द्वैतस्य मिथ्यात्वे
सत्यो मिथ्याजायत सत्यमित्यादिलौकिकव्यवहारः सत्यं चानृतं च सत्यमभवदिति वैदिकश्च कथमित्याशंक्य यथा
स्वप्ने इदं सत्यमिदमनृतमिति तात्कालिकबाध्याबाध्याभ्यां व्यवहारस्तथा दीर्घस्वप्नेऽपीत्युक्तं स्वप्नदृष्टांतं स्मारयति ॥
प्राक्चेति ॥ व्यवहारार्थं नानात्वं सत्यमिति कल्पनमसंगतमित्युपसंहरति ॥ तस्मादिति ॥ नेदं कल्पितं किंतु श्रुतं मि
ति शंकते ॥ नन्विति ॥ कार्यकारणयोरनन्यत्वांशोऽयं दृष्टांतो न परिणामित्वे ब्रह्मणः कूटस्थश्रुतिविरोधादिति परि
हरति ॥ नेत्युच्यत इति ॥ दृष्टांतोपरिणामित्वं प्रत्युपेतं चाहिंसं चक्रमेण विरुद्धमिति दृष्टांतेन शंकते ॥ स्थितीति ॥ कूटस्थ
स्य कदाचिदपि विक्रियानुपपत्तेः कूटस्थत्वव्याघातादिति आह ॥ नेति ॥ कूटस्थत्वासिद्धिमाशंक्याह ॥ कूटस्थं चेति ॥ कू
टस्थस्य निरवयवस्य पूर्वरूपत्यागेनावस्थांतरात्मकपरिणामायोगात् श्रुतिरजतवद्विवर्त एव प्रपंच इति भावः ॥ किंच
निष्फलस्य जगतः फलवन्निःप्रपंचब्रह्मधीशेषत्वेनानुवादात्र सत्यतेत्याह ॥ न च यथेत्यादिना ॥ तं यथा यथोपासते तदेव
भवतीति श्रुतेः ब्रह्मणः परिणामित्वविज्ञानात् प्राप्तिर्विदुषः फलमित्याशंक्याह ॥ न हि परिणामवत्त्वेति ॥ ब्रह्मविदाप्नो
ति परमिति श्रुतकूटस्थनित्यमोक्षफलसंभवे दुःखानि सपरिणामित्वफलकल्पनायोगादिति भावः ॥ ननु पूर्वं जन्मा
द्यस्य यत इति सूत्रे कारणप्रतिज्ञा कृता अधुना तदनन्यत्वमित्येतावता भेदप्रतिपादने ईशिजीविशितव्यभेदापवादात्

तत्र ३ स्य

रोप्यः स्यादिति शंकते ॥ कूटस्थेति ॥ कल्पितं द्वैतमपेक्ष्येश्वरत्वादिकं परमार्थतो नन्यत्त्वमित्यविरोधमाह ॥ नेत्यादिना ॥
अविद्यात्मके निद्रात्मनि लीने नामरूपे एव बीजं तस्य व्याकरणं स्पष्टाभिव्यक्तिः तदपेक्षत्वादीश्वरत्वादेर्न
विरोध इत्यर्थः ॥ संगृहीतार्थं विवृणोति ॥ तस्मादित्यादिना ॥ तत्त्वान्यत्वाभ्यामिति ॥ नामरूपयोरीश्वरत्वं वक्तु
मशक्यं जडत्वात् नापीश्वरादन्यत्वं कल्पितस्य पृथक् सत्तास्फूर्त्योरभावादित्यर्थः ॥ संस्कारात्मके नामरूपे या
रविद्येत्यविवक्षया शंकते ॥ मायेति ॥ नामरूपे चेदीश्वरस्याभिन्ने तर्हि ईश्वरो जडः स्यादित्यत आह ॥ ताभ्यामन्य इ
ति ॥ अन्यत्वे व्याकरणे श्रुतिमाह ॥ आकाशो हेत्यादिना ॥ अविद्योपाधिना कल्पितभेदेन बिंबस्थानस्येश्वरत्वम
ति बंधमुक्तानां नियम्यत्वमाह ॥ स्वस्वात्मकृतानीति ॥ नन्वत्र नाना जीवा भाष्यकारैरभिमता बुध्या
दिसंघातभेदेन भेदोक्तेः अविद्याप्रतिबिंबस्यैकस्य जीवस्योक्तं ॥ परमार्थतोर्हश्वरत्वादिहेत्वभावे स्मृतिमा
ह ॥ तथान्येति ॥ कथं तर्हि कर्तृत्वादिकमित्यत आह ॥ स्वभावस्त्विति ॥ अनाद्यविद्यैव कर्तृत्वादिरू
पेण प्रवर्तत इति भावः ॥ भक्ताभक्तयोः पापसुकृते नाददानत्वादीश्वरस्य वास्तवमीश्वरत्वमित्यत आह ॥ नाद
त्त इति ॥ न संहरतीत्यर्थः ॥ तेन स्वरूपेणाविकारेण न कर्तृत्वमीश्वरो मे नियंतेत्येवं भ्रमं [illegible] ॥ उक्तार्थः सूत्रसंमत
इत्याह ॥ सूत्रकारोपीति ॥ न केवलं लौकिकव्यवहारार्थं परिणामप्रक्रियाश्रयणं किंतु पारमार्थिकेत्याह ॥ प
रिणामप्रक्रियां चेति ॥ तदुक्तं ॥ कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्ततामिति ॥ एवं त
स्यानन्यत्वे प्रत्यक्षादिविरोधं परिहरन्ननुमानमाह ॥ भावेचेति ॥ कारणस्य भावे सत्त्वे उपलब्धौ च कार्यस्य स
त्त्वोपलब्ध्योश्चानन्यत्वमिति सूत्रार्थः ॥ घटो मृदनन्यः मृत्सत्त्वोपलब्धिविलक्षणनियतसत्त्वोपलब्धिमत्त्वात् ॥
मृद्वत् ॥ अन्यत्वेप्ययं हेतुः किं न स्यादित्यप्रयोजकत्वमाशंक्य निरस्यति ॥ नचेति ॥ मृद्घटयोरन्यत्वे गवाश्वयोरिव हेतु
स्थितिः स्यादित्यर्थः ॥ गवाश्वयोर्निमित्तनैमित्तिकत्वाभावाद्वैलक्षण्यं भावः ॥ अतो मृद्घटयोस्तेन हेतुनानिमित्तादिमत्ता

स्या०टि० श०

—अनात्मना तत्त्वमेव सत्यत्वसमर्थ संमानमर्थान्तरता १ — १ = नन्वादित्यूरूदृष्टान्तेन दिक्रैवत्वाद्युपादानोपादेयभावो भवेदितितत्त्वस्य छिन्नस्य च व्यणानियतत्वसंलोपलब्धिमत्वत्व . ण हेतो भवा दाद्विनार

१०

वः सिध्यति नानन्यत्वमित्यर्थान्तरतामाशंक्याह ॥ न चकुलालेति ॥ न चोपादानोपादेयभावे नार्थान्तत्वमिति ॥ मं दृ-
ष्टान्तेन तद्भावाभावेपि हेतुसत्वादन्यत्वेन गगनाश्ववत्तद्भावापोगाच्चेति भावः ॥ कुलालघटयोर्निमित्तादिभावे सत्यप्य-
न्यत्वात् कुलालसत्त्वे नियतोपलब्धिर्घटस्य नैव सत्त्वसाधर्म्यः ॥ यथाश्रुतस्य तत्र हेतौ व्यभिचारं शंकते ॥ न नि-
ति ॥ अग्निभाव एव धूमोपलब्धिरिति नियमात्मको हेतुस्तत्र नास्तीत्याह ॥ नेति ॥ अविच्छिन्नमूलदीर्घरेखा-
वरूधूमे नियमोस्तीति व्यभिचारमाशंकते ॥ अ थेति ॥ तद्भावनियतभावत्वे सति तद्बुध्यनुरक्तबुद्धिविषयत्वस्य
हेतोर्विवक्षितत्वान्न व्यभिचार इत्याह ॥ नैवमिति ॥ आलोकबुध्यनुरक्तबुद्धिग्राह्यरूपे व्यभिचारनिरासाय सत्यंत
आलोकाभावेपि घटादिरूपसत्वान्न व्यभिचार उक्तधूमविशेषस्याग्निबुद्धिं विनानुपलंभान्न तत्र व्यभि-
चार इत्यर्थः ॥ तथा च तयोः कार्यकारणयोर्भावेन सत्तया रक्तो सह हेतुतामिति भावोर्थः ॥ यद्वा तद्भावः सामानाधिक-
रण्यं तद्विषयकबुद्धिग्राह्यत्वं हेतुं वदामः मृद्घट इति सामानाधिकरण्यबुद्धिदर्शनादग्निर्धूम इत्यदर्शनादित्यर्थः ॥ अनुमाना-
र्थत्वेन सूत्रं व्याख्याय पाठांतरेण प्रत्यक्षपरतया व्याचष्टे ॥ भावाच्चेति ॥ पूर्वसूत्रोक्तारंभणशब्दसमुच्चयार्थः चकारः ॥
न चैकः पट इति प्रत्यक्षं पटस्य तंतुभ्यः पृथक्सत्वे प्रमाणं अपृथक्सत्ता कमिथ्याकार्यविषयत्वेनाप्युपपत्तेः ॥ अतः
आतानवितानसंयोगवंतस्तंतव एव पट इति प्रत्यक्षोपलब्धेः सत्वादन्यत्वमित्यर्थः ॥ परन्यायतं तादावतिदिशति ॥ तथे-
त्यादिना ॥ प्रत्यक्षोपलब्ध्या तत्तत्कार्यं कारणमात्रत्वं परिशिष्यत इत्यर्थः ॥ यत्र प्रत्यक्षं नास्ति तत्रैकार्यं विमतं कारणा-
दभिन्नं कार्यत्वात् पटवदित्यनुमेयमित्याह ॥ अनयेति ॥ कारणपरिशेषे प्रधानादिकं परिशिष्यतां नब्रह्मेत्यत आह ॥ त-
त्र सर्वेति ॥ ब्रह्मणि वेदांतानां सर्वेषां तात्पर्यस्योक्तत्वात्तदेवाद्वितीयं परिशिष्यते न कारणांतरं अप्रामाणिकत्वादिति भावः ॥
इदं जगत्सदात्मैवेति सामानाधिकरण्यश्रुत्या सृष्टेः प्राक् कार्यस्य कारणात्मनासत्वं श्रुतं तदन्यथानुपपत्त्या सत्वस्यापि
जगतः कारणादनन्यत्वं इत्याह सूत्रकारः ॥ सत्वाच्चेति ॥ श्रुत्यर्थं युक्तिमप्याह ॥ यच्च यदात्मनेति ॥ घटादिकं प्राक् मृदात्म-
ना वर्त्तते तत्तद्रूपस्य घमानत्वात् सामान्यतो व्यतिरेकेण सिकतात्मस्तैलवदित्यर्थः ॥ कारणवत्कार्यस्यापि सत्वात्सत्व

=अवतारे विकल्पितस्यायमर्थः ५

भेदेमानाभावात् कार्यस्य कारणादभिन्नसत्ताकत्वमिति सूत्रार्थः। तद्रूपान्तरमाह यथा चेति॥ इदानीं सतः कार्यस्य प्रागुत्तरका
लयोरसत्तायोगात् सत्ताव्यभिचारः तच्च सत्त्वं सर्वानुस्यूतचिन्मात्रमेकं तदभेदेन सती मृद् सन् घट इति भासमानयोः
कार्यकारणयोरनन्यत्वमित्यर्थः॥ नन्वेवं घटपटयोरप्येकसत्ताभेदादनन्यत्वं स्यादिति वाच्यं॥ वस्तुत एकसत्ताकत्वमनन
न्यत्वस्येष्टत्वात् तर्हि मृद्घटयोः को विशेषः तादात्म्यमिति ब्रूमः वस्तुतः सर्वत्र सत्त्वैक्येऽपि घटपटयोर्भेदेन सत्ताया
भिन्नत्वात् तादात्म्यं कार्यकारणयोर्भेदकस्य सत्ताभेदकत्वाभावादभिन्नसत्ताकत्वमिति विशेषः॥ उक्तं कार्यस्य प्रा
क्कारणात्मना सत्त्वमसिद्धमित्याशंक्य समाधत्ते॥ असदिति॥ अक्ताः शर्करा उपदध्यादिसुपक्रमे केनाक्ता इति
संदेहे तेजो घृतमिति वाक्यशेषात् घृतेनेति यथा निश्चयः एवमत्रापि तत्सदिति वाक्यशेषात् सन्निश्चय
इत्यर्थः॥ अभिन्नत्वात् तादात्म्यं कार्यकारणयोर्भेदस्य सत्ताभेदकत्वाभावादभिन्नसत्ताकत्वं॥ आसीदिति अती
तकालसंबन्धोक्तेश्चासद्व्याकृतमेवेत्यनन्यत्वमित्याह॥ असतश्चपूर्वोपरेति॥ उक्तन्यायं शब्दान्तरेति दिशति॥ अ
सद्वा इति॥ क्रियमाणत्वविशेषणमन्यस्यासंभावीति भावः सत्त्वानन्यत्वयोर्हेत्वन्तरमाह सूत्रकारः॥ युक्तेरिति॥ दध्या
द्यर्थिनां क्षीरादेः प्रवृत्त्यर्थान्यथानुपपत्तियुक्तिस्तया कार्यस्य प्राक्कारणानन्यत्वेन सत्त्वं सिध्यतीत्यर्थः॥ असतोऽपि का
र्यस्य तस्मादुत्पत्तेः कारणत्वविधायात् तत्र प्रवृत्तिरित्यन्यथोपपत्तिमाशंक्याह॥ अविशिष्टेति॥ असतस्तु सत्त्वभावादुत्प
त्पन्नतो वा सर्वस्मात् सर्वोत्पत्तिप्रसंगात् तत्तदुपादानविशेषे प्रवृत्तिर्न स्यादित्यर्थः॥ तदुक्तं सांख्यवृद्धैः असदकर
णादुपादानग्रहणात् सर्वसंभवाभावात्॥ शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यमिति॥ शक्तस्य का
रणस्य शक्यकार्यकारित्वात् शक्तिविषयस्य कार्यस्य सत्त्वमसतोऽशक्यत्वात् किंच सदेककारणाभेदात् कार्यस
दित्युक्तसांख्यार्थः॥ कार्यस्यासत्त्वेऽपि कस्मिंश्चिदतिशयात् प्रवृत्तिनियमोपपत्तिमिति शंकते॥ अथेति॥ अतिशयः
कार्यधर्मः कारणधर्मो वा आद्ये धर्मित्वात् प्रागवस्थारूपस्य कार्यस्य सत्त्वं दुर्निवारमित्याह॥ तर्हि ॥ शापव

=असतो वेत्यादेरर्थः कारणात् तत्त कार्यार्थि
भिन्नतदुपादानस्य ग्रहण... सर्वस्मात् सर्वसं

सा०टि०टी०

११

१. ॰समवायस्य धर्मत्वे पस बद्धत्वं किं त्वप्यादि सत्वमाह। असंबद्ध
यद्यसंबद्धस्यापि धर्मसंततिः। कांश्चिद अंश्च्य संयोगधर्मः

त्वादिति॥ द्वितीयेपि कार्यसत्वमायातीत्याह॥ शक्तिश्चेति॥ कार्यकारणाभ्यामन्या कार्यवदसती वा शक्तिर्न का नियामि
कायस्य कस्यचिदन्यस्य नरशृंगस्य वा नियामकत्वप्रसंगादन्यत्वासत्वयोः शक्तावन्यत्रैव चाविशेषात् तस्मात्कारणा
त्मनालीनं कार्यमेवाभिव्यक्तिनियामकतया शक्तिरिति शेषव्यं ततः सत्कार्यसिद्धिरित्यर्थः॥ किंच कार्यकारणयोरन्य
त्वे मृद्घटयोर्भिन्नयोः संतानवितिभेदबुद्धिः स्यादित्याह॥ अपिचेति॥ तयोरन्यत्वेपि समवायबलात्तथाबुद्धिर्नोदेतीत्याशंक्य
समवायं दूषयति॥ समवायेति॥ समवायः समवायिभिः संबंधो न वा आद्ये संबंधः किं समवायः उत स्वरूपमाद्ये समवा
यानवस्था द्वितीये मृद्घटयोरपि स्वरूपसंबंधादेवोपपत्तेः समवायासिद्धिः असंबद्ध इति पक्षे दोषमाह॥ अनभ्यु
पगम्यमान इति॥ द्रव्यगुणादीनां विशिष्टधीविरहप्रसंगः॥ असंबद्धस्य विशिष्टधीनियामकत्वायोगादित्यर्थः॥ वि
शिष्टनियामको हि संबंधः न तस्य नियामकांतरापेक्षा अनवस्थानादतः स्वपरनिर्वाहकः समवाय इति शंकते॥ अ
थेति॥ संबंध्यते स्वस्य स्वसंबंधिनश्च विशिष्टधियं करोतीत्यर्थः॥ प्रतिबंद्या दूषयति॥ संयोगोपीति॥ यत्तु गुण
त्वात्संयोगस्य समवायापेक्षा न संबंधत्वादिति तन्न॥ धर्मत्वात्समवायस्यापि संबंधांतरापत्तेरसंबद्धस्याधर्मत्व
स्य गोधर्मत्वाद्दर्शनात् किंच निष्क्रियाः सत्त्वादयो गुणा इति श्रुतिस्मृत्यादिषु व्यवहारादिच्छाधर्मो गुण इति परिभाषया समवाय
स्यापि गुणत्वाच्च जातिविशेषो गुणमिति परिभाषा तु समवायसिद्ध्युत्तरकालीना नित्यानेकसमवेता जातिरिति ज्ञानस्य सम
वायज्ञानाधीनत्वादतः समवायसिद्धेः प्राक् संयोगस्य गुणत्वमसिद्धमिति दिक्॥ किंच प्रतीत्यनुसारेण वस्तुस्वीकार्यमन्यथा
गोप्रतीतेरश्वआलंबनमित्यपि सुवचत्वात् तथा च मृद्घट इति अभेदप्रतीतेरभेद एव स्वीकार्यः॥ ताभ्यां च संतभिन्नस्य सम
वायस्य तन्नियामकत्वासंभवादित्याह॥ तादात्म्येति॥ एवं प्रतीत्यनुसारेण कार्यस्य कारणात्मना सत्त्वं॥ स्वरूपेण तु मिथ्यात्व
मित्युक्तं॥ वस्तुनिरूपणात्तु तस्य मिथ्यात्वमित्याह॥ कथं चेति॥ तत्राघमनुघावयति नः पयोदः तंत्वादिष्ववयवेषु त्रित्वादि
वत्स्वरूपेण वृत्तिरुत अवयवशः इति विकल्प्याद्यं दूषयति॥ यदीत्यादिना॥ व्यासज्य वृत्तिर्वस्तु प्रत्यक्षस्य यावदाश्रय प्रत्यक्ष
जन्यत्वात् संरतपटादेर्यावदवयवानामप्रत्यक्षत्वादप्रत्यक्षत्वं स्यादित्यर्थः॥ द्वितीयं शंकते॥ अथेति॥ यथाह तंतो

१०

प्र१

√ = यथेवू स्या व्यक्तौ गोत्वमनुभ्रमते नैवमेकस्मिं स्तं तौ पटो नुभ्रमत इत

रोत्वावयवशः स्वडुगोवर्त्तमानो हस्तमात्रग्रहेपिगृह्यते ॥ एवंपटे किंचिदवयवग्रहेणावयविनोग्रहसंभवेपिअवयवानाम
नवस्थास्यादिति दूषयति ॥ तद्यपीति ॥ आद्यद्वितीयपक्षद्वयं दूषयति ॥ अथप्रत्यवयवमित्यादिनो ॥ एकस्मिंस्तंतौ पट
मिवृत्तिकाले तंत्वंतरेवृत्तिर्नस्यात्तवृत्तावनेकत्वापत्तेरित्यर्थः ॥ यथायुगपदनेकव्यक्तिषु वृत्तावपिजातेरनेकत्वदोषोना
स्तितथावयविनइत्याशंकते ॥ गोत्वेति ॥ जातिवदवयविनोवृत्तिरसिद्धा ॥ अनुभवबाधाबादिति परिहरन्ति ॥ नतथेति ॥
दोषांतरमाह ॥ प्रत्येकेति ॥ अधिकोरात्तसंबंधाघुथादेवदत्तःस्वकार्यमध्ययनं ग्रामेरण्येवाकरोति ॥ तथागोरवय
वीस्वकार्यं क्षीरादिकंभंगपुच्छादावपिकुर्यादित्यर्थः ॥ एवंवृत्त्यनिरूपणादनिर्वाच्यत्वं कार्यस्यदर्शितं संप्रत्यसत्का
र्यवादेदोषांतरमाह ॥ प्रागिति ॥ यथा ... श्रुलतीसुक्ते च ठनंक्रियांप्रतिआश्रयत्वरूपंकर्तृत्वं घटस्यनाति ॥ ... प्य
टेजायतइतिजनिनक्रियाकर्तृत्वंअनुभूयते ॥ अतोजनिकर्त्तुःजनेःप्राक्सत्वंवाच्यं ॥ कर्तृरसत्वेक्रियायाअप्यसत्वापत्ते
रित्यर्थः ॥ जनेरनुभवसिद्धेपिसकर्तृकत्वेक्रियात्वेनानुमानमाह ॥ उत्पत्तिश्चेति ॥ असतोपिघटस्योत्पत्तौकर्तृत्वात्स्वरेपि
कुलालादेःसत्वात्कर्तृत्वमित्याशंक्याह ॥ घटस्यचेति ॥ घटेउत्पत्तिवदसत्वंकपालाद्युत्पत्तिरित्यतिदिशति ॥ तथेति ॥ ...
कामनूद्यदोषमाह ॥ तथाचेति ॥ अनुभवविरोधइत्यर्थः ॥ उत्पत्तिः ... भावस्याद्याविक्रियेतिस्वमतेनकार्यस
त्वमानीतं संप्रतिकार्यस्योत्पत्तिर्नामस्वकारणेसमवायः स्वस्मिन्नुसत्तासमवायोवेतितार्किकमतमाशंकते ॥
अथेति ॥ तन्मतेनापिकार्यस्यसत्वमावश्यकं असतःसंबंधित्वायोगादित्याह ॥ कथमिति ॥ असतोवेति दृ
ष्टांतोक्तिः ननुनरशृंगादिवत्कार्यं सर्वदासर्वत्रासन्नभवति किंतूत्पत्तेःप्राक्ध्वंसानंतरंचासत्वमध्ये सद
... वेतिवैषम्यात्संबंधित्वोपपत्तिरित्याह ॥ अभावस्येति ॥ अत्राभावशब्दोअसत्वशब्दापरपर्यायोव्याख्येयः
असतःकालेनासंबंधात्प्राक्ननयुक्तमित्यर्थः ॥ ननुकारकव्यापारादूर्ध्वंभाविनःकार्यस्यव्यापुत्रतुल्यत्वं कथमि
त्यतआह ॥ यदिचेति ॥ कार्याभावेःअसत्कार्यमित्यर्थः ॥ इत्युपपत्त्यतउपपन्नमसविष्यदित्यन्वयः ॥ कस्तर्हि निर्णी

सां-भ्या ३ स्य २

Marginalia (left): घ इत्यनीनर्हे से

Marginalia (right): न

शा॰ भा॰ टी॰ रा॰

१२

= अर्थमनतिक्रम्य वर्तत इति यथार्थमिति द्विधैव दर्शनमित्यर्थः ८

यस्त्वमाह॥ वयं त्विति॥ नासतो विद्यते भाव इति स्मृतेरिति भावः॥ सत्कार्यवादे कारकवैयर्थ्यं शंकते॥ नन्विति॥ सिद्धकारणानन्यत्वाच्च कार्यस्य सिद्धत्वमित्याह॥ तदनन्यत्वाच्चेति॥ अनिर्वाच्यकार्योत्पत्तौ कारणस्याभिव्यक्त्यर्थः कारकव्यापार इत्याह॥ नेषदिति॥ कार्यस्य सत्त्वमिच्छतां सांख्यानां सत्कार्यवादे कारकवैयर्थ्यं दोष आपतति॥ अभिव्यक्तेरपि सत्त्वाद्द्वैतवादिनां तु घटितघटनावभासनचतुरमायामहिम्ना स्वप्नवद्यथादर्शनं सर्वमुपपन्नं विचार्यमाणे सर्वमयुक्तं युक्तत्वे द्वैतापत्तिरिति मुख्यसमाधानेन समाधानान्तराभावात्॥ ननु कारणाद्भिन्नस्य भेदे वास्य घट इति समाधानं किन्न स्यादिति सांख्याशंक्यासत्पक्षस्य दूषणमुक्तं स्मारयत्याह॥ कार्याकारोपीति॥ अतः कारणादुदाभेदाभ्यां दुर्निरूपस्य सदसद्विलक्षणस्यानिर्वाच्याभिव्यक्तिरनिर्वाच्यकारकव्यापाराणां फलमिति पक्ष एव श्रेयानिति भावः॥ ननु मृद्घटः पृथुबुध्नत्वाद्यवस्थाविशेषो घट इष्यते॥ तथा च घटो मृद्भिन्नः तद्विरुद्धधर्माश्रयत्वात् वृक्षवदित्याह॥ नन्वेति॥ वस्तुतोन्यत्वसत्त्वे भेदः॥ हेतोर्व्यभिचारस्थलान्तरमाह॥ तथा प्रतिदिनमिति॥ प्रत्यहं पित्रादिदेहस्यावस्थाभेदेपि जन्मनाशयोरभावादभेदो युक्तः दा[illegible]र्भ्वेति के तु मृदादिनाशे सति घटादिकं जायते इति जन्मविनाशरूपविरुद्धधर्मवत्त्वात्कार्यकारणयोर्भेदो न युक्त इति शंकते॥ जन्मेति॥ कारणस्य नाशाभावेऽद्वैतसिद्धिरिति परिहरति॥ नेति॥ दधिघटादिकार्यान्वितत्वेन क्षीरमृदादीनां प्रत्यक्षत्वान्नाशासिद्धिरित्यर्थः॥ ननु यत्रान्वयो दृश्यते तत्र हेत्वसिद्धावपि यत्रांकुरादौ वटबीजादीनामन्वयो न दृश्यते तत्र हेतुसत्त्वाद्भिन्नत्वं स्यादित्यत आह॥ अदृश्येति॥ तत्रापि अंकुरादौ बीजाद्यवयवानामन्वयात्सत्त्व एव जन्मविनाशौ किं त्ववयवान्तरोपचयापचयाभ्यां तद्व्यवहार इत्यर्थः॥ अस्तूपचयापचयलिंगेन वस्तुभेदानुमानं ततो सत उत्पत्तिः सतो नाशः इत्याशंक्य व्यभिचारमाह॥ तत्रेति॥ पितृदेहेपि भेदसत्त्वान्न व्यभिचारस्तत्र बाधकमाह॥ पित्रादीति॥ एतेनेति कारणस्य सर्वकार्य[illegible]नेयकथनेनेत्यर्थः॥ स्वपक्षे दोषं परिहृत्य परपक्षे क्षेपं संजपति॥ यस्य पुनरिति॥ असतः कार्यस्य कारकव्यापाराहितातिशयाश्रयत्वायोगाद्विषमहमिन्द्रादेर्विषयत्वस्या

र्थ

तअ

वा

१२

=मुख्यकारणं ब्रह्म अवांतरकारणाभिप्रदादीनि तेषांमध्ये ऽवांतरकारणानन्यत्वमुपपादितमुपसंहरतीसर्थः २
=संकुचितपटः प्रसारितपटस्यानुपलभ्यमानत्वे सत्यपि नभिन्नसमस्तिसमवायमिति प्रे
=संकुचितपटः पलभ्यमाने प्रसारितपटस्यानुपलभ्यमानत्वेऽसत्यपि न भिन्नसमस्ति समवायमिति

प्रत्यस्मिन्नपि नेत्यादिना ॥ द्वितीयमाशंक्य
दितिशंकते ॥ समवायीति ॥ समवायिकारणात्कार्यं भिन्नमभिन्नं वेति विकल्प्याद्यं दूषयति ॥ नेत्यादिना ॥ द्वितीयमाशंक्य
द्वापत्तिमाह ॥ समवायीति ॥ कार्याणामवांतरकारणानन्यत्वमुपसंहरति ॥ तस्मादिति ॥ परमकारणा[illegible]नन्यत्वप्र
लितमाह ॥ तथाप्युक्तेति ॥ असत्कार्यवादे प्रतिज्ञाबाध्यः स्यादित्याह ॥ यदि तु प्रागुत्पत्तेरिति ॥ कार्यमुपादानाद्भि
त्रं तदुपलब्ध्यापत्तेरनुपलभ्यमानत्वात्ततोऽपि कपटुणामलाञ्छनशाकादिवत्त्वाशाइत्यत्र व्यभिचारं सूत्रं ॥ पटवच्चेति ॥
द्वितीयहेतोर्व्यभिचारं स्फुटयति ॥ यथा च संवेष्टनेनेति ॥ आयामो दैर्घ्यं ॥ तत्रैव विलक्षणकार्यकारित्वहेतुमाशंक्य
द्वितीयहेतोर्व्यभिचारं स्फुटयति ॥ यथा च प्राणादीति ॥ एवं जीवजगतोर्ब्रह्मानन्यत्वात्प्रतिज्ञासिद्धिरित्यधिकरणार्थमुपसंह
पिचारमाहस्त्रकारः ॥ यथा च प्राणादीति ॥ एवं जीवजगतोर्ब्रह्मानन्यत्वात्प्रतिज्ञासिद्धिरित्यधिकरणार्थमुपसंह
ति ॥ अतश्च कृत्स्नस्येति ॥ [illegible]भिन्नं ब्रह्म जगत्कारणमिति वदन्वेदांतसमन्वयो विषयः स यदि तादृक्ब्रह्म जगत्क
नयेत्तर्हि स्वानिष्टं नरकादिकं न जनयेत्स्वतंत्रचेतनत्वादिति न्यायेन विरुध्यते नवेति संदेहे पूर्वोक्तजीवानन्यत्वमुपजीव्य जीवहि
षाः ब्रह्मणि प्रसज्येरन्निति पूर्वपक्षसूत्रं गृहीत्वा व्याचष्टे ॥ इतरव्यपदेशादित्यादिना ॥ पूर्वपक्षे जीवाभिन्नसमन्वयासिद्धिः सि
द्धांते तत्सिद्धिरिति फलं हिताकरणे सत्र नञ्व्यत्यासेनाहितकरणं दोषो व्याख्यातः ॥ आदिपदेन संध्यात्यादिकं आपादयति ॥
नच स्वयमित्यादिना ॥ जीवेश्वरयोरभेदाज्जीवगता दोषाः ब्रह्मणि स्युः ब्रह्मगताश्च सृष्टिसंहारसर्व[illegible]स्मर्तृत्वादयो गुणा
जीवे स्युः न चेष्टापत्तिः जीवस्य स्वशरीरेऽपि संहारसामर्थ्यादर्शनादिति प्राप्ते सिद्धांतसूत्रं व्याचष्टे ॥ तुशब्द इत्यादिना ॥ जी
विश्वरयोर्लोके बिंबप्रतिबिंबयोरिव कल्पितभेदांगीकाराद्व्यवस्थेति सिद्धांतग्रंथार्थः यदि वयं जीवं स्वच्छारं ब्रूमः त
दादोषाः प्रसज्येरन्न तु तं ब्रूमः स त्वन्वयः ॥ किं चाभेदज्ञानादूर्ध्वं वा दोषा आपद्यंते पूर्वं वा नाद्य इत्याह ॥ अपि चेति ॥ उक्तमिथ्या
त्वान्विजं भितं स्फुटयति ॥ अविद्येति ॥ कर्तृत्वादिबुद्धिर्धर्मो व्यासेदेहधर्मो व्यासंदृष्टांतयति ॥ जन्मेति ॥ द्वितीयं प्रत्याह ॥
अबाधितेति ॥ ज्ञानादूर्ध्वं स्रष्टृत्वादिधर्माणां बाधात्पूर्वं कल्पितभेदेन व्यवस्थोपपत्तेर्न किंचिदवद्यमित्यर्थः ॥ ननु एकरूपे
करूपे ब्रह्मणि कथं जीवेश्वरवैचित्र्यं कथं च तत्कार्यवैचित्र्यं इत्यनुपपत्तिं दृष्टांतैः परिहरति सूत्रकारः ॥ अश्मादिवच्चेति ॥
किंपाको महातालफलं तत्तत्कार्यसंस्काररूपानादित्वात्तिभेदाद्वैचित्र्यमिति भावः ॥ सूत्रस्थचकारार्थमाह ॥ श्रुतेश्चेति ॥ ७ ॥

जीवा

रा

न

त्वं

ब्रह्मजीवगतदोषवत् जीवाभिन्नत्वात् जीववदित्याद्यनुमानं स्वतःप्रमाणानिरवद्यत्वादिश्रुतिबाधितं ॥ किंच कर्तृत्वभोक्तृ
त्वादिविकारस्य मिथ्यात्वात् जीवस्यैव तावद्दोषो नास्ति कुतो बिंबस्थानीयस्याशेषदर्शिनः परमेश्वरस्य दोषप्रसक्तिः ॥
ननु ब्रह्म न विचित्रकार्यप्रकृतिः एकरूपत्वात् व्यतिरेकेण मृत्तत्वादिवदिति ॥ एकरूपेस्व प्रदर्शीनविचित्रदृश्य वस्तुवैचि
त्र्यदर्शनेन व्यभिचारादित्यर्थः ॥ तस्मात् प्रपंचाभिन्ने ब्रह्मणि समन्वयस्याविरोध इति सिद्धं ॥ उपसंहारदर्शनात् ॥ अ
सहायाद्ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः स किं पदसाध्यं तत्र कारणमिति लोकिकन्यायेन विरुध्यते न वे
ति संदेहे पूर्वमौपाधिकजीवभेदाद् ब्रह्मणि जीवदोषान प्रसज्यत इत्युक्तं ॥ संप्रति उपाधितोपि विभक्तं ब्रह्मणः प्रेर
कादिकं सहकारि नास्तीति शंका नानात्वाभावादिति प्रत्युदाहरणेन पूर्वपक्षसूत्रं व्याचष्टे ॥ चेतनमित्यादिना ॥ फ
लं पूर्ववत्कारकाणामुपसंहारो मेलनं ॥ उक्तन्यायस्य क्षीरादौ व्यभिचार इति सिद्धांतयति ॥ नेष इति ॥ शुद्धस्य ब्रह्मणो
कारणत्वमिष्टमेव विशिष्टस्येश्वरस्य तु मायैव सहाय इति भावेनाह ॥ बाह्यमिति ॥ क्षीरस्यातपातंचनादि सहायोस्तीति
असहायत्वहेतोर्न व्यभिचार इत्याशंक्य सहायाभावेपि यस्य कस्यचित्परिणामस्य क्षीरे दर्शनात् व्यभिचारतादवस्थ्य
मित्याह ॥ नन्वित्यादिना ॥ तर्हि व्यर्थस्तत्राह ॥ त्वार्यत इति ॥ ननु त्वार्यते क्षीरं दधिभावायेशैघ्र्यं कार्यत इति ॥ किमर्थं कल्प्य
ते ॥ शक्तं क्षीरं सहायेन शक्तं क्रियत इति किं न स्यात्तत्राह ॥ यदि चेति ॥ शक्तस्य सहायसंपदा किं कार्यमित्यत्राह ॥ सा
धनेति ॥ सहायविशेषाभावे कश्चिद्विकारः क्षीरस्य भवति ॥ तत्रातंचनप्रक्षेपो शैघ्र्यार्थः तु तमदधिभावसाम
र्थ्यं व्यज्यत इत्यर्थः ॥ तर्हि शक्तिव्यंजकोपि सहायो ब्रह्मणो वाच्यस्तत्राह ॥ परिपूर्णेति ॥ निरपेक्षमायाशक्तिकमि
त्यर्थः ॥ तादृशशक्तौ मानमाह ॥ श्रुतिश्चेति ॥ ननु ब्रह्म न कारणं चेतनत्वे सत्यसहायत्वात् मृदादिशून्यकुलालादिवदिति न
क्षीरादौ व्यभिचार इति सूत्रव्याख्यासाशंकामाह ॥ स्यादेतदिति ॥ तस्यापि हेतोर्देवादौ व्यभिचारमित्याह ॥ देवादिवदिति ॥ लो
कवत्तेजापते यो नेनेति लोको मंत्रार्थवादादिशास्त्रे वृद्धव्यवहारश्च ॥ अभिध्यानं संकल्पः ॥ ननु देवा पूर्णनाभातद्दृष्टांते

सहायो ७
स्वतो १
र
त
१३

पुत्रशरीरेषु चेतनत्वं नास्ति वल्मीकादिषु पद्मिनी चेतनयोर्गर्भप्रस्थानकर्तृत्वे मेघशब्दः शरीरं च सहायोऽस्ति ॥ अतो विशि
ष्टहेतो नै व्यभिचार इति शंकते ॥ न यदि ब्रूयादित्यादिना ॥ व्यभिरोऽस्तीति परिहरति ॥ तं प्रति ब्रूयादिति ॥ अयं दोषः दृष्टांत
वैषम्यारब्धः अत्र हि हेतौ चेतनत्वं अहं धीविषयत्वेन रूपं चिन्नादृशस्यापन्नं देहसाधारणं ग्राह्यं ॥ ननु मुख्यानामतं तदकुलालद्
ष्टांते साधनं वैकल्यापत्तेः ॥ असहायत्वं चेतनस्य स्वातिरिक्तहेतुशून्यत्वं तदुभयं देवादिषु अस्तीति व्यभिचारः ॥ देहस्य स्वांतःपा
तित्वेन स्वातिरिक्तत्वाभावात् ॥ तथा च कुलालादिवैषम्यं लक्षण्यं देवादीनां घटादिकार्ये स्वातिरिक्तानपेक्षत्वादि दैवे लक्षण्यं
ब्रह्मणः देहस्याप्यनपेक्षणात् नरदेवादीनां कार्यारंभे नासेककरूपा सामग्री ॥ अयं तेहि महाभारते ॥ श्रीकृष्णस्य संकल्पमात्रेण द्रौ
पद्याः पटपरंपरोत्पत्तिः ॥ अतः सिद्धमसहायस्यापि कारणत्वं ॥ कृत्स्नप्रसक्तिः ॥ क्षीरदृष्टांतेन ब्रह्म परिणामीति क्रमो स्थाप
वपक्षे प्राप्ते शास्त्रार्थो विवर्तो न परिणाम इति निर्णयार्थमिदमधिकरणमिति पूर्वाधिकरणेनोत्तराधिकरणस्य कार्यत्व संगतिमा
ह ॥ चेतनमिति ॥ निरवयवात् ब्रह्मणो जगत् सर्ववदन्तसमन्वयो विषयः स किं यन्निरवयवं तन्नपरिणामीति न्यायेन विरुध्यते न वेति
संदेहे विरुध्यत इति पूर्वपक्षसूत्रं व्याचष्टे कृत्स्नेति ॥ ब्रह्मपरिणामीति वदता वक्तव्यं ब्रह्म निरवयवं सावयवं वा ॥ आद्ये सर्वं ब्रह्मणः
परिणामात्मना स्थितिः स्यादित्युक्तं व्यतिरेकदृष्टांतेन विवृणोति ॥ यदि ब्रह्मेत्यादिना पर्यवसानं स्यात् परिणतो भविष्यदेकदेश
श्चावस्थास्यत् परिणतो भविष्यत् युक्तश्रुतिभ्यो निरवयवत्वसिद्धेः फलितं दोषमाह ॥ तत्त्वश्चेति ॥ यदा परिणामव्यतिरे
केण मूलब्रह्मात्मा नास्ति तदात्माद्रष्टव्य इत्युपदेशोऽर्थशून्यः स्यादिति दोषांतरमाह ॥ द्रष्टव्यतेति ॥ ब्रह्मणः परिणामा
त्मना जन्मनां यागीकारे जो अमर इति श्रुतिविरोधश्चेत्याह ॥ अज इत्यादिति ॥ सावयवत्वपक्षमाशंक्य सूत्रशेषेण
परिहरति ॥ अथेत्यादिना ॥ परिणाममपक्षो दुर्घट इति पूर्वोक्तं तदसमदिष्टमेवेति ॥ विवर्तवादेन सिद्धांतयति ॥ श्रुतेरि
ति ॥ स्वपक्षे पूर्वोक्तदोषद्वयं नास्तीति सूत्रं योजयादर्शयति ॥ तुशब्देनेत्यादिना ॥ ईक्षितृत्वेन व्याकर्तृत्वेन चेक्ष
णीयव्याकर्तव्यप्रपंचात् पृथगीश्वरसत्वे श्रुतेर्न

न

कृत्स्नप्रसक्तिरित्याह॥ सेयं देवतेति॥ न्यूनाधिकत्वो वैषम्यकत्वं श्रुतमित्याह॥ तावानिति॥ इतश्चास्य विकृतं ब्र
ह्मेत्याह॥ तथेति॥ स वा एष आत्मा हृदीति श्रुतेरस्ति हृदयान्तरिक्षं ब्रह्मतदेति सुषुप्तिकालरूपविशेषणाच्चेत्यर्थः॥
लिंगांतरमाह॥ तथेन्द्रियेति॥ एतस्मादिति श्रुत्या ब्रह्मणस्तत्रातिषेधाद
वाङ्मनसगोचरत्वश्रुतेश्चास्ति कूटस्थं ब्रह्मेत्यर्थः॥ कृत्स्नप्रसक्तिदोषो नास्तीत्युक्त्वा द्वितीयदोषोपि नास्तीत्या
ह॥ नेचेति॥ ननु ब्रह्म कार्यात्मनाप्यस्ति पृथगप्यस्तिचेत् सावयवत्वं दुर्वारं निरवयवस्य एकस्य द्विधासत्त्वायोगाद
तोपद्विधात्तत्तत् सावयवमिति तर्कविरुद्धं ब्रह्मणो निरवयवत्वमिति विवर्त्तमजानतः शंकां गूढाशय एव परिहरति॥ श
ब्दमूलत्वं चेति॥ यदा लौकिकानां प्रत्यक्षदृष्टानामपि शक्तिरचिंत्या तदा शब्दैकसमधिगम्यस्य ब्रह्मणः किमुवक्तव्यं॥ अ
तो ब्रह्मणो निरवयवत्वं द्विधाभावश्च श्रुत्युक्तं यथाशब्दमभ्युपगंतव्यं न तर्केण बाधनीयमित्यर्थः॥ प्रकृतिभ्यः प्रसाध्य
वस्तुस्वभावस्त्यापयत् परं विलक्षणं कृत्वा को पदेशाग्न्यं तदचिंत्यस्वरूपमिति स्मृत्यर्थः॥ आशयानवबोधेन शंकते॥ ननु श
ब्देनापीति॥ यदा ब्रह्मपरिणामी सैकदेशिनामियं सिद्धांतस्त्वव्याख्यादर्शितो तामाक्षिपति॥ नत्विति॥ शब्दस्याप्ययोग्यता
ज्ञानसापेक्षत्वादित्यर्थः॥ ननु ब्रह्म सावयवं निरवयवं चेति विकल्पाश्रयणे सर्वश्रुतिसमाधानं स्यादित्यत आह॥ क्रियेति॥
निरवयवत्वे ब्रह्मणः प्रकृतित्वश्रुतिविरोधः सावयवत्वे निरवयवत्वशब्दविरोधः॥ विकल्पश्च वस्तुन्ययुक्तः॥ अतः प्रकारांतरानु
पलंभात् श्रुतीनां प्रामाण्यं दुर्घटमिति प्राप्ते स्वाशयमुद्घाटयति॥ नैष दोष इति॥ निरवयवस्य वस्तुनः कूटस्थस्याप्यविद्याक
ल्पितनामरूपविकाराङ्गीकारात् दुर्घटत्वदोषो नास्ति वास्तवकौटस्थ्यस्य कल्पितविकारप्रकृतित्वेनाविरोधादि
त्यर्थः॥ रूपभेदांगीकारे सावयवत्वं स्यादित्याशंक्योक्तं विवृणोति॥ नहीत्यादिना॥ कृत्स्नप्रसक्तिं निरस्य दोषांतरं निरस्यति॥
वाचारंभणेति॥ ननु श्रुतिप्रतिषिद्धस्य परिणामस्य कथं मिथ्यात्वं तत्राह॥ न चेयमिति॥ निःप्रपंचब्रह्मधीशेषत्वेन सृष्टि
रूपतेन प्रतिपाद्यत इत्यसकृदावेदितं॥ अतो विवर्त्तवादे न कश्चिद्दोष इत्युपसंहरति॥ तस्मादिति॥ पूर्वावस्थाना
शेनावस्थांतरं परिणामः॥ यथा दुग्धस्य दधिभावः

परिहारोपि वाच्यम्॥ नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे इति न्यायो दोषः॥३

पूर्वरूपानुपमर्देनावस्थांतरं विवर्त्तः॥ यथा शुक्तेः रजतभावः॥ तत्र ब्रह्मणो विवर्त्तोपादानत्वं स्वप्नसाक्षिदृष्टांतेन द्रढयन् मायावादं स्फुटयति स्व
प्नकारः॥ आत्मनि चैवेति॥ तथा योगा अश्वाः किं च कृत्स्नप्रसक्त्यादीनां सांख्यादिपक्षेपि दोषत्वान्नास्माकं प्रसङ्गो भावनीयत्वं॥ यश्चोभयोः समो
दोष इति न्यायादित्याह स्वपक्षेति॥ प्रधानस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे निरवयवत्वाभ्युपगमविरोधः इत्यत्र शंकते॥
नन्विति। किं साम्यावस्था गुणानां विकारः समुदायो वा आद्ये तस्यानन्तप्रकृतित्वं विकारत्वात्॥ द्वितीये प्रपंचाभावः समुदायस्यावस्तुत्वेन मू
लाभावात्॥ अथ निरवयवा गुणा एव विचित्रपरिणामानां प्रकृतिरिति चेत्तर्हि कृत्स्नप्रसक्तेर्मूलोच्छेदो दुर्वारः इत्यभिप्रेत्य परिहरति॥ नैवमि
त्यादिना॥ इति यतः अतः समानत्वान्नैवं पर्यनुयोज्य इत्यन्वयः॥ प्रत्येकं सत्त्वादिकमितरगुणद्वयसचिवं निरवयवं पर्युपादानं तेर्हि कृत्स्नस्यो
पादानस्य कार्यरूपत्वप्रसक्तेर्मूलोच्छेदः स्यादुक्ते निरवयवत्वे साध्यकुतर्कस्याभासत्वाद्गुणानां सावयवत्वमेव परिणामित्वेन महदादिवदतो न कृ
त्स्नप्रसक्तिरेकदेशपरिणामसंभवादिति शंकते॥ तर्केति॥ एतद्दोषाभावेपि दोषांतरं स्यादिति परिहरति॥ एवमपीति॥ ननु गुणानामवयवास्तंतु
वदारंभका न भवंति किं तु कार्यवैचित्र्यानुमिताः शक्तयः ताः शक्तयः परस्परं स्वाभाविकशक्तिभिर्ब्रह्मणोपि सावयवत्वं तुल्यमित्याह अथेत्यादिना॥
अणुवादेपि दोषसाम्यमाह॥ तथेति॥ सांख्यवद्दोषः समान इति शेषः संबंधः॥ निरवयवयोः परमाण्वोः संयोगः व्याप्यवृत्तिरव्याप्यवृत्तिर्वा
आद्ये तत्कार्यस्य द्व्यणुकस्यैकपरमाणुत्वापत्तेः प्रथिम्नो पार्थिकपरिमाणस्यानुपपत्तेः नाद्यणोरणंतरेणोपर्यधः पार्श्वतश्च व्याप्तो ततो
धिकद्रव्यं संपद्यते द्वितीये परमाण्वोः सावयवत्वापत्तिरित्यर्थः॥ ननु त्वं चोर इत्युक्ते त्वमपि चोर इतिवद्दोषसाम्योक्तिरयुक्ते सत आह॥ अपरि
हृतस्त्विति॥ उक्तं हि मायावादे स्वप्नवत् सर्वं सामंजस्यं अतो निरवयवे ब्रह्मणि समन्वयस्याविरोध इति सिद्धं॥ सर्वोपेता मायाशक्तिमतो ब्रह्म
णो जगत्सर्गं वदतः समन्वयस्य शरीरस्य न मायेति न्यायेन विरोधो [illegible]स्ति न वेति संदेहे न्यायस्यानाभासत्वादस्तीति पूर्वपक्षे पूर्वोक्तशक्तिमत्त्व
समर्थनादेकविषयत्वं संगतिं वदन् सिद्धांतसूत्रं व्याचष्टे॥ एकस्येत्यादिना॥ पूर्वोक्तपक्षयोर्विरोधाविरोधौ फलमित्युक्तमेवापादसमा
प्तेरवगंतव्यं॥ अभ्यात्तः अभिव्याप्तः॥ अवाक् वागिंद्रियशून्यः॥ अनादरो निष्कामः॥ पूर्वपक्षन्यायमनूद्य दूषयति॥ विकरणत्वादिति॥
देवादिचेतनानां शक्तानामपि देहाभिमाने सत्येव कर्तृत्वं दृष्टं तदभावे सुषुप्ते तन्न दृष्टं॥ अतो ब्रह्मणः शक्तत्वेपि देहत्वात् कर्तृत्वं नाप्यदे
हस्य शक्तिः संभवतीति शंकार्थः॥ विकरणस्य जीवस्य कर्तृत्वासंभवेपीश्वरस्य संभवतीति देवादिवदुपि लोकवत्सन्नोक्तं शरीरस्य
कल्पितस्य मायाश्रयत्वायोगात् निर्विशेषचिन्मात्रस्यैव मायाधिष्ठानत्वं युक्तमिति समाधानार्थः॥ न प्रयोजनवत्त्वात् प्रवृत्तिः फलात् ब्र
ह्मणः जगत्सर्ववदन्समन्वयो विषयः॥ स किं नष्टांतःप्रवृत्तनोपायः स निष्फलं वस्तु न रचयतीति न्यायेन विरुध्यते न वेति संदेहे पूर्व

ना

नाY

२८

स३

परिहारोपि वा सम ॥ नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे इति न्यायोक्तदोषः ॥

पूर्वरूपानुपमर्देनावस्थांतरं विवर्त्तः ॥ यथा शुक्तेः रजतभावः ॥ तत्र ब्रह्मणो विवर्त्तोपादानत्वं स्वप्नसाक्षिदृष्टं तेन दृढयन् मायावादं स्फुटयति स्व
त्रकारः ॥ आत्मनि चेति ॥ तथा योगा अप्युक्ताः किं च कृत्स्नप्रसक्त्यादीनां सांख्यादिपक्षेपि दोषत्वान्नास्मान् प्रत्युद्भावनीयत्वं ॥ यश्चोभयोः समो
दोष इति न्यायादि साह सूत्रकारः ॥ स्वपक्षेति ॥ प्रधानस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे निरवयवत्वाभ्युपगमविरोधश्चस्तत्र शंकते ॥
नाद्येति ॥ किं साम्यावस्था गुणानां विकारः समुदायो वा आद्ये तस्यानन्तप्रकृतित्वं विकारत्वात् ॥ द्वितीये प्रपंचाभावः समुदायस्यावस्तुत्वेन म
लाभावात् ॥ अथ निरवयवा गुणा एव विविधपरिणामानां प्रकृतिरिति चेत्तर्हि कृत्स्नप्रसक्तेर्मूलोच्छेदो दुर्वारः इत्यभिप्रेत्य परिहरति ॥ नैवमि
त्यादिना ॥ इति यतः अतः समानत्वान्नवयं पर्यनुयोज्या इत्यन्वयः ॥ प्रत्येकं सत्त्वादिकमितरगुणद्वयसचिवं निरवयवं चोपादानं तर्हि कृत्स्नस्यो
पादानस्य कार्यरूपत्वप्रसक्तेर्मूलोच्छेदः स्यात् निरवयवत्वे साध्यकृतर्कस्याभाससत्त्वाद्गुणानां सावयवत्वमेव परिणामित्वेन घटादिवदतो नकृ
त्स्नप्रसक्तिरेकदेशपरिणामसंभवादिति शंकते ॥ तर्केति ॥ एतद्दोषाभावेपि दोषांतरं स्यादिति परिहरति ॥ एवमपीति ॥ न नु गुणा अवयवास्तेन
वदारंभकान भवंति किंतु कार्यवैचित्र्यानुमिता शक्तयः ता शक्तयः स्वाभाविकशक्तिभिर्ब्रह्मणोपि सावयवत्वं तु न्यमिथ्या हा अथेत्यादिना ॥
अणुवादेपि दोषसाम्यमाह ॥ तथेति ॥ सांख्यवद्दोषः समान इति संबंधः ॥ निरवयवयोः परमाण्वोः संयोगः व्याप्यवृत्तिरव्याप्यवृत्तिर्वा
आद्ये तत्कार्यस्य द्व्यणुकस्यैकपरमाणुत्वापत्तेः प्रथिम्नो पार्थिकपरिमाणस्यानुपपत्तेः न द्व्यणोरण्वंतरेणापर्ययः पार्श्वेत अव्याप्तो ततो
धिकद्रव्यं संभवति द्वितीये परमाण्वोः सावयवत्वापत्तिरित्यर्थः ॥ ननु त्वं चोर इत्युक्ते त्वमपि चोर इतिवद्दोषसाम्योक्तिरयुक्ते सत आह ॥ परि
हृतत्वादिति ॥ उक्तं हि मायावादे स्वप्नवत्सर्वसामंजस्यं अतो निरवयवे ब्रह्मणि समन्वयस्याविरोध इति सिद्धं ॥ सर्वोपेता मायाशक्तिमतो ब्रह्म
णो जगत्सर्गं वदतः समन्वयस्याशरीरस्य न मायेति न्यायेन विरोधोस्ति नवेति संदेहे न्यायस्य नाभासत्वोदस्तीति पूर्वपक्षे पूर्वोक्तशक्तिमत्त्व
समर्थनादेकविषयत्वं संगतिं वदन् सिद्धांतसूत्रं व्याचष्टे ॥ एकस्येत्यादिना ॥ पूर्वोक्तपक्षयोर्विरोधाविरोधौ फलमित्युक्तमेव पाद समा
प्तेरवगंतव्यं ॥ अप्यातः अभिव्याप्तः ॥ अवाकु वागिंद्रियशून्यः ॥ अनादरो निष्कामः ॥ पूर्वपक्षन्यायमनूद्य दूषयति ॥ विकरणत्वादिति ॥
देवादिचेतनानां शक्तानामपि देहाभिमाने सत्येव कर्त्तृत्वं दृष्टं तदभावे सुषुप्तेन दृष्टं ॥ अतो ब्रह्मणः शक्तत्वेप्यदेहत्वान्न कर्तृत्वं नापदे
हस्य शक्तिः संभवतीति शेषार्थः ॥ विकरणस्य जीवस्य कर्त्तृत्वासंभवेपीश्वरस्य संभवतीति देवादिवदपि लोकरसत्रोक्तशरीरस्य
कल्पितस्य मायाश्रयत्वायोगात् निर्विशेषचिन्मात्रस्यैव मायाधिष्ठानत्वं युक्तमिति समाधानार्थः ॥ तत्प्रयोजनवत्त्वात्प्रतिपत्ता ब्र
ह्मणः जगत्सर्वं वदन् समन्वयो विषयः ॥ स किं न प्राप्तस्तनोयः स निषिद्धं वस्तु न रचयतिरति न्यायेन विरुध्यते न वेति संदेहे पूर्व

र२

मदेहस्यापि श्रुतिबलात् शक्तत्वेऽपि तस्य कर्तृत्वमुक्तं तदाक्षेपसंगत्या पूर्वपक्षसूत्रं व्याचष्टे ॥ अन्यथेत्यादिना ॥ ईश्वरस्य फलाभावेऽपि परप्रयोजनाय
सृष्टौ प्रवृत्तिरस्त्वित्याशंक्य श्रुतिमाह ॥ भवति चेति ॥ या प्रेक्षावत्प्रवृत्तिः सा स्वफलार्थेति [illegible] लोकप्रसिद्धिः ॥ न च दयालुप्रवृत्तौ व्यभिचा
रस्तस्यापि परदुःखेन सह न प्रयुक्तस्वचित्तव्याकुलतानिवृत्त्यर्थत्वादिति भावः ॥ किं च गुरुतरायासस्य फलं वाच्यमित्याह ॥ गुरुतरेति ॥ त
र्हि अस्तीश्वरस्यापि प्रवृत्तिः [illegible] स्वार्थेत्यत आह ॥ यदीयमपीति ॥ स्वार्थत्वे प्रवृत्तिस्वभावः प्रवोक्तः स्यादित्यर्थः ॥ ॥ ईश्वरः प्रेक्षावान्न प्रवर्तती सा
र्वाक्यश्रुतिविरोधमाह ॥ अपेत्यादिना ॥ बुद्धेरपराधो विवेकाभावः ॥ उक्तन्यायस्य राज्ञां लीलायां व्यभिचार इति सिद्धान्तसूत्रं व्याचष्टे ॥ तुशब्दे
नेति ॥ व्यतिरिक्ते लीलोतिरिक्ते ॥ क्रीडारूपविहारायेषु रम्यदेशेषु तेष्वित्यर्थः ॥ कदाचिद्राजादीनां लीलायामपि किंचित्फलं सुखोल्लासादि
कं संभाव्येत तथापि निश्वासादिप्रेक्षावत्प्रवृत्तित्वमस्ति ननु स्वस्वप्नत्रोद्देश्यं फलं किंचिदस्तीति व्यभिचारस्थलान्तरमाह ॥ यथा चेति ॥ प्राण
स्य स्वभावश्चलनं प्रश्वासं वोच्छ्वासादि हेतुरीश्वरस्य स्वभावः कालकर्मसहितमाया ॥ नन्वीश्वरस्य जगद्रचनायाः केवलं लीलात्वं किमित्युच्य
ते फलमेव किंचित्कल्प्यतां तत्राह ॥ नहीति ॥ आप्तकामत्वव्याघातादित्यर्थः ॥ नन्वीश्वरस्तूष्णीं किमिति न तिष्ठति किमिति स्वस्याफलां परेषां दुः
खावहां सृष्टिं करोतीत्यत आह ॥ न च स्वभाव इति ॥ कालकर्मादिसामग्र्यां सत्यां सृष्टेरूपामीतेरपरिहार्यत्वादित्यर्थः ॥ यदुक्तं गुरुतरायासत्वात्फ
लं वाच्यमिति ॥ तत्र हेत्वसिद्धिमाह ॥ यद्यपीत्यादिना ॥ अल्पप्रवृत्तेरपि फलं वाच्यं लोके तथादर्शनादित्यादितर्कस्यागमबाधमाह ॥ यदिना
मेति ॥ सृष्टि[illegible] श्रुतेरप्रवृत्तिर्नास्ति ॥ सर्वज्ञत्वश्रुतेरुन्मत्ततानास्तीति विभागः ॥ स्वप्नसृष्टिवदस्याः सृष्टेर्माया[illegible]मात्रत्वान्न फलापेक्षेत्याह ॥ न
चेयमिति ॥ न च निष्फलसृष्टिश्रुतीनामानर्थक्यं सफलब्रह्मधीशेषत्वेनार्थवत्त्वादि[illegible] न विस्मर्तव्यमित्यर्थः ॥ वैषम्यनैर्घृण्ये नेति दोषा
द्ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः ॥ स किं यो विषमकारी स दोषवानिति न्यायेन विरुध्यते न वेति संदेहे पूर्वत्र लीलापायत्वसृष्टेः समुक्तं तद
वकर्मादिसापेक्षस्य न युक्तं ॥ अनीश्वरत्वापत्तेर्निरपेक्षत्वे रागादिदोषापत्तेरिति साक्षेपसंगत्या पूर्वपक्षयति ॥ पुनश्चेत्यादिना ॥ ब्रह्मैव जगत्कारणमिति
जन्मादिसूत्रे प्रतिज्ञातोऽर्थः ॥ एषक जनः पामरः ॥ निरवद्यं निरंजनमिति श्रुतिः ॥ न मे द्वेष्योऽस्ति न प्रियः इति स्मृतिः ॥ स्वच्छत्वादीत्यादिपदेन कूटस्थ
त्वग्रहः स्वच्छत्वादिश्चासावीश्वरस्वभावश्चेति विग्रहः ॥ निमित्तमनपेक्ष्य विषमत्वकारित्वे वैषम्यादिदोषः स्यान्न तु तन्नपेक्षत्वमीश्वरस्यास्तीति सिं
द्धान्तयति ॥ एवं प्राप्ते इत्यादिना ॥ न च सापेक्षत्वेनीश्वरत्वं सेवामपेक्ष्य फलदातरि राज्ञीश्वरत्वानपायात् ॥ ननु तर्हि धर्माधर्माभ्यामेव [illegible] विचित्रा
सृष्टिरस्तु किमीश्वरेणेत्यत आह ॥ ईश्वरस्तु पर्जन्यवदिति ॥ साधारणहेतुसहितस्यैवासाधारणहेतोः कार्यकारित्वान्नेश्वरवैयर्थ्यं ॥ अन्यथापर्ज
न्यवैयर्थ्यप्रसंगादिति भावः ॥ यं जनमुन्नीषते ऊर्ध्वं नेतुमिच्छति तं साधु कारयति एष ईश्वर इत्यसन्वयः ॥ न चेत्केचिज्जनं साधु केचिदसाधु

द्वि.पा.
सूत्रं
२५

कर्मकारयतो वैषम्यं तदवस्थमिति वाच्यं॥ अनादिपूर्वार्जितसाध्वसाधुवासनया स्वभावेन जनस्य तत्तत्कर्मसु प्रवर्त्तकत्वादीश्वरस्य साधारण
हेतुत्वादतो न वैषम्यं ईश्वरस्येति भावः॥ प्रथमसर्गस्य वैषम्यहेतुकर्माभावादेकरूपत्वं स्यात्तथा तदुत्तरकल्पोनामपीत्याशंक्य समाधत्ते सूत्र
कारः॥ न कर्मेति॥ प्रथमसृष्टेः पश्चाद्भाविकर्मकृतं वैषम्यमित्यन्योन्याश्रयमाह॥ सृष्ट्युत्तरेति॥ आद्यायास्तु सृष्टेरेकरूपत्वलक्षणं॥
आद्यावेकरूपत्वे मध्ये विषमकर्मासत्तौ हेत्वभावेनोत्तरसृष्टीनामपि तुल्यत्वस्य दुर्वारत्वादिति द्रष्टव्यं॥ परिहारः सुगमः प्रथमसर्गः कश्चि
न्नास्तीति अत्र प्रमाणं पृच्छति॥ कथं पुनरिति॥ उपपत्तिसहितश्रुत्यादिकप्रमाणमिति सूत्रं व्याख्याय दर्शयति॥ उपपद्यते इति॥ हेतुं विने
व सर्गाङ्गीकारे ज्ञानकर्मकाण्डवैयर्थ्यं स्यादित्यर्थः॥ ननु सुखादिवैषम्ये ईश्वरो विद्या वा हेतुरस्तीत्याशंक्य क्रमेण दूषयति॥ न चेश्वरस्या
दिना॥ कस्तर्हि हेतुस्तत्राह॥ रागादीति॥ रागद्वेषमोहाः क्लेशास्तेषां वासनाभिराक्षिप्तानि कर्माणि धर्माधर्मव्यामिश्ररूपाणि तदपे
क्षाविद्या सुखादिसर्गवैचित्र्यहेतुः तस्मादविद्यासहकारित्वेन क्लेशकर्मणामनादिप्रवाहोङ्गीकर्त्तव्य इति भावः॥ किं च सृष्टेः सादित्वे प्र
थमुक्तशरीरस्योत्पत्तिर्न सिध्यति हेत्वभावात्॥ न च कर्म हेतुः शरीरात्कर्मासंभवात् तस्मात्कर्मशरीरयोरन्योन्याश्रयपरिहाराय
सर्वैरेव वादिभिः संसारस्यानादित्वमङ्गीकार्यमित्याह॥ न चेति॥ सर्गमुखे सत्यादौ प्राग्धारितं प्राणोपि सन्प्रत्यगात्मैव वि
धारणनिमित्तेन जीवशब्देनोच्यत इत्यत्राह॥ न च धारयिष्यतीति॥ गृहस्थः सन्दारान्भार्यामुपयामीत्यादावागामिविवक्षाश्र
यणमिति भावः॥ अस्य संसारवृक्षस्य स्वरूपं सत्यमिथ्यात्वे स्वपदेशं विना नोपलभ्यते ज्ञानं विनान्तोपि नास्ति नाप्यादिरुपलभ्यते॥
असत्त्वादेव न च संप्रतिष्ठा मध्ये स्थितिः दृष्टनष्टस्वरूपादिति गीतावाक्यार्थः संसारस्यादित्वेपि मिथ्यात्वादेकमेवाद्वितीयमिति सद्वधारण
मुपपन्नं॥ तस्मान्निरवद्ये ब्रह्मणि समन्वयाविरोध इति सिद्धं॥ सर्वधर्मोपपत्तेश्च॥ ३७॥ निर्गुणस्य ब्रह्मणो जगदुपादानत्वाद्वेदान्त
समन्वयो विषयः॥ स किं निर्गुणं तन्नोपादानं यथारूपमिति न्यायेन विरुध्यते न वेति संदेहे भवतीश्वरस्य विषमसृष्टिनिमित्तत्वे तत्प्रयो
जकस्य कर्मणः सत्त्वात्तदुपादानत्वं तद्व्यापकस्य सगुणत्वस्याभावादिति प्रत्युदाहरणेन प्राप्ते सिद्धान्तसूत्रतात्पर्यमाह॥ चेतनमिति॥
विवर्त्तोपादानत्वं निर्गुणस्याप्यविरुद्धं॥ अतात्त्विकस्य धर्माधिष्ठानत्वप्रयोजकस्य सत्त्वात्सगुणत्वं तद्व्यापकं शब्दादिगुणेषु निःसत्त्वादिदृश
मृदर्शनादिति भावः॥ यद्यपि सर्वज्ञत्वं सर्वशक्तित्वं च लोके कारणधर्मत्वेनाप्रसिद्धं॥ तथापि यो यस्य कर्त्ता स तस्य सर्वस्य ज्ञाता शक्त
श्चेति प्रसिद्धं॥ ईश्वरस्यापि सर्वकर्तृत्वश्रवणात्प्रसिध्यनुसारेण यन्निरतिशयसर्वज्ञत्वं सर्वशक्तित्वं च सिध्यतीत्यभिसंध्या

रा·भा·टि·टी·
२६

दि·भा·
समा

याह॥ सर्वज्ञं सर्वेशं॥ क्तीति॥ महामायमिति कर्तृत्वोपादानत्वकथनेन सर्वज्ञत्वाशंकापंकक्षालननायोक्तं॥ तस्माद्दोषनिषदर्शिद्धांतेन कश्चि
द्दोष इति सिद्धं॥ ७॥ ७॥ ७॥ श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्र
भायां द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः॥ ७॥ ७॥ ७॥ श्रीगणेशाय नमः॥ सांख्यतार्किकबौद्धाश्च जैनाः पाशुपता
दयः॥ यस्य तत्त्वं न जानंति तं वंदे रघुपुंगवं॥ १॥ ७॥ ब्रह्मणि सर्वधर्मोपपत्तिवत्प्रधानेपि तदुपपत्तिमात्रं व्यनिराचष्टे॥ रच
नानुपपत्तेश्च नानुमानं॥ ननु मुमुक्षूणां वाक्यार्थनिर्णयप्रतिबंधनिरासाय वेदांतानां तत्समन्वये निश्चेतुमिदं शास्त्रमारब्धं तच्च
निर्दोषतया निश्चितं॥ ततः परपक्षनिरासात्मको यं पादो स्मिन् शास्त्रे न संगतः॥ तन्निरासस्य मुमुक्षूणामनपेक्षितत्वादित्याक्षिपति॥
यद्यपीति॥ परपक्षनिराकरणं विना स्वपक्षे स्थैर्यायोगात् तत्कर्त्तव्यमित्याह॥ तथापीति॥ तर्हि स्वपक्षस्थापनात् प्रागेव परपक्षप्रत्या
ख्यानं कार्यमित्याह॥ वेदांतेति॥ वेदांततात्पर्यनिर्णयस्य फलवद्ज्ञानकारणत्वात्प्राथम्यादस्य हितत्वं॥ ननु दूषकरत्वात् परमतनि
राकरणं न कार्यमिति शंकते॥ नन्विति॥ तत्त्वनिर्णयप्रधाना खल्वियं कथा रत्ध्यात तत्त्वनिर्णयश्च परमतेषु दोषं विना न सिध्यतीति
सा च तेषु भ्रांतिमूलत्वनिश्चयं विना न सिध्यति॥ स च श्रमं पादं विनानेति स्वसिद्धांतसंरक्षणार्थत्वात् प्राधान्ये सिध्यर्थत्वाद्यं पादो स्मिन्
शास्त्रे संगतः॥ संगतत्वाद्वीतरागेणापि कर्तव्यः सभिसंध्यायो क्तांगीकारेण समाधत्ते॥ बाढमित्यादिना॥ अपदेशेन व्याजेन मंदमतीनां ते
षु महत्प्रसिद्धानि भिन्नानि बहूनि संतीति तन्निरासो यत्नः क्रियत इत्यर्थः॥ स्वमतरक्षापरमतदोषोद्घाटनप्रधानसिध्यर्थत्वादंगीकृतो नाप्यर्थ
दोषः परपक्षत्वबुध्याहि निरासो द्वेषमावहति॥ ननु तत्त्वनिर्णयस्य पराकृत इति मतं व्यर्थं पौनरुक्त्यं शंकते॥ ननीक्षतेरिति॥ पूर्वं सांख्या
दीनां श्रुत्यर्थानुग्राहकतर्कनिरासाच्छ्रौतत्वमुक्तं॥ संप्रति श्रुत्यनपेक्षास्तदीयाः स्वतंत्रा युक्तयो निरस्यंत इत्यर्थभेदान्न पुनरुक्तिरि
त्याह॥ तदुच्यत इति॥ प्रधानमचेतनं जगदुपादानमिति सांख्यसिद्धांतोत्र विषयः॥ स किं प्रमाणमूलो भ्रांतिमूलो वेति संदेहे सर्वधर्मोपपत्तेश्चे
त्युक्तधर्माणां संभवात्तदेवोपादानमित्याक्षेपसंगत्या प्रमाणमूलत्वं दर्शयन् पूर्वपक्षमाह॥ तत्र सांख्या इति॥ स्वसिद्धांतज्ञानस्य परमतनि
रासं प्रत्युपजीव्यत्वात् पादयोः संगतिः परमतनिरासात्मकत्वात् सर्वेषामधिकरणानामेतत्पादसंगतिः पूर्वपक्षे प्रमाणमूलमतविरोधा
दुक्तश्रुत्यर्थसमन्वयासिद्धिः फलं सिद्धांते तत्सिद्धिरिति आपादं द्रष्टव्यं॥ श्रौतसमन्वयदार्ढ्यार्थत्वादस्य पादस्य श्रुतिसंगतिरिति विवेकः॥ सिद्धं
त इति भेदाः विकाराः ये विकारा मेनान्वितास्ते तत्प्रकृतिका इति व्याप्तिमाह॥ यथेति॥ सर्वं कार्यं सुखदुःखमोहात्मकं वस्तु प्रकृतिकं तदन्वित
त्वात् घटवदित्यनुमानमाह॥ तथेति॥ किमर्थं प्रधानं परिणमत इत्यत आह॥ चेतनस्येति

सा
तआ
य

राग

२६

दै५

त

भोगादि करोतीति करणं

अर्थो भोगापवर्गरूपः ॥ तदर्थं च स्वभावादेव प्रवर्त्तते ॥ न तु केनचिच्चेतनेन प्रेर्यत इत्यर्थः ॥ तदुक्तं पुरुषार्थ एव हेतुः न केनचित्कार्यते करणं
मिति ॥ अनुमानांतराणि तैरुक्तानि स्मारयति ॥ तथेति ॥ उक्तं हि भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च कार्यकारणविभागा
दविभागात् वैश्वरूप्यस्य ॥ अत्र कारिकायां समन्वयादिति लिंगं व्याख्यातं शिष्टानि व्याख्यायंते ॥ तथाहि ॥ क्षित्यादीनां भेदानां कारण
मव्यक्तमस्ति परिमितत्वात् घटवत् ॥ न च दृष्टांते साध्यवैकल्यं घटोत्पत्तेः प्रागनभिव्यक्तघटादिरूपकार्यविशेषत्वेन मृदोप्यव्यक्तत्वा
त्तथा घटादीनां कारणशक्तितः प्रवृत्तेर्महदादिकार्याणामपि कारणशक्तितः प्रवृत्तिर्वाच्या तच्छक्तिमत् कारणमव्यक्तं ॥ किंच कारणा
त्कारणात्कार्यस्य विभागो जन्म दृश्यते ॥ क्षितेर्मृत्तिका जायते ततो घट इति ॥ एवमविभागः प्रातिलोम्येन प्रलयो दृश्यते घटस्य मृत्ति
कायां लयः ॥ तस्याः क्षितौ क्षितेरप्सु अपां तेजसीत्येतौ विभागाविभागौ वैश्वरूप्यस्य विचित्रस्य स्वभावजातस्य दृश्यमानौ प्रत्यक्षी
कृतौ क्वचित्कारणे विश्रांतौ विभागत्वादविभागत्वाच्च मृदि घटविभागाविभागवदित्यर्थः ॥ सिद्धांतयति ॥ तत्र वदाम इति ॥ किमनुमानैः
अचेतनप्रकृतिकत्वं जगतः साध्यते स्वतंत्राचेतनप्रकृतिकत्वं वा ॥ आद्ये सिद्धसाधनता ॥ अस्माभिरनादिमायांगीकारात् ॥
द्वितीये घटादिदृष्टांते साध्याप्रसिद्धिरित्याह ॥ यद्धीति ॥ स्वतंत्रमचेतनं प्रकृतिरित्येतद्दृष्टांतबलेन न तदा निरूप्येत यदि दृष्टां
तः कश्चित्स्यात् न तु दृष्टः कश्चिदित्यर्थः ॥ स्वतंत्रपदार्थमाह ॥ चेतनानधिष्ठितमिति ॥ परकीयस्य साध्याप्रसिद्धिमुक्त्वा सत्
प्रतिपक्षं वक्तुं यद्विचित्ररचनात्मकं कार्यं तच्चेतनाधिष्ठिताचेतनप्रकृतिकमिति व्याप्तिमाह ॥ गेहेति ॥ इदं जगत् चेतनाधि
ष्ठिताचेतनप्रकृतिकं ॥ कार्यत्वात् ॥ गेहवदिति प्रयोगः ॥ विपक्षे विचित्ररचनानुपपत्तिरूपं स्वतंत्रोक्तं बाधकतर्कं वक्तुं जगतो वै
चित्र्यमाह ॥ तथेति ॥ बाह्यपृथिव्यादि भोग्यं आध्यात्मिकं शरीरादि च भोगाधिष्ठानमिति विभागः प्रतिनियतो साधारणो
वयवानां विन्यासो रचना यस्य तादृगित्यर्थः ॥ इत्थं विचित्रं जगच्चेतनानधिष्ठिता जडप्रकृतिः कथं रचयेत् कथमपीत्यर्थः ॥
यच्चेतनानधिष्ठितमचेतनं तन्न कार्यकारीति व्याप्तिमुक्त्वा तर्कमूलभूतामाह ॥ लोष्ठेति ॥ चेतनाप्रेरितेषु लोष्ठादिषु कार्यकारिता
दर्शनादित्यर्थः ॥ किंचानादिजडप्रकृतिः चेतनाधिष्ठिता परिणामित्वात् मृदादिवदित्याह ॥ मृदिति ॥ ननु मृदादिदृष्टांते द्वयमप्यस्ति
अचेतनत्वं चेतनाधिष्ठितत्वं चेति तत्र परिणामित्वहेतोरचेतनत्वमेव व्यापकं मृदादिस्वरूपे तेनांतरंगत्वात् ॥ न तु चेतनाधिष्ठि
तत्वं व्यापकं तस्य मृदादि बाह्यकुलालादिसापेक्षत्वेन बहिरंगत्वात् तथा च परिणामित्वेपि मूलप्रकृतेरचेतनत्वेन [illegible] भोगो

५३

ने १

१८

नचेतनाधिष्ठितत्वेसांख्यं निषेधतीति॥ नचेति॥ महानसदृष्टांते तरंगस्यापि महानसस्वरूपस्य धर्मव्यापकत्वं नास्ति तद्भिन्नस्य
बहिरंगस्यापि वन्हेस्तदस्तीत्यंतरंगत्वं व्यापकत्वे प्रयोजकं न भवतीति भावः॥ किंच यदचेतनं तच्चेतनाधिष्ठितमेव परिणमते तदं
गीकारे बाधकाभावात् प्रस्तुतश्रुत्यनुग्रहाच्च तथांगीकार्यमित्याह॥ नचैवं सतीति॥ सुखदुःखमोहान्वयादिति हेतोरसिद्धिं द्योत
नार्थः सूत्रे चकार इति आह॥ अन्वयाद्यनुपपत्तेश्चेति॥ नानुमानं युक्तमित्यर्थः॥ आदिशब्दः परिणामादिग्रहार्थः॥ शब्दादीनां
बाह्यत्वान्तु भवादांतरसुखाद्यात्मकत्वमसिद्धं तन्निमित्तत्वाच्च॥ नहि निमित्तनैमित्तिकयोरभेदेन योगोऽस्ति दंडघटयोरदर्शना
दित्यर्थः॥ किंच घटे मदत्व सुखादिकं शब्दादावन्वितं स्यात् नहि सर्वैरविशेषेण सुखादिकमुपलभ्यते घटे मदत्वं तथोपलब्धि
रस्तीति योग्यानुपलब्ध्या हेत्वभावनिश्चय इत्याह॥ शब्दादीति॥ विषयस्यैकत्वेपि पुरुषवासनावैचित्र्यात् कस्यचित् सुखबु
द्धिः कस्यचित् दुःखबुद्धिः कस्यचित् मोहबुद्धिरुत्पद्यते अतो विषयाः सुखाद्यात्मका न भवंतीत्यर्थः॥ एवं समन्वयादिति हेतुं दूषयि
त्वा परिणामादिति हेतून् दूषयति॥ तथेति॥ बुध्यादीनां परिमितत्वेन संसर्गपूर्वकत्वसिद्धौ संसृष्टान्यनेकानि सत्वरजस्तमांसि सि
ध्यंतीति एकस्मिन् संसर्गाभावान्न ब्रह्मसिद्धिरिति सांख्यस्य भावः॥ किमिदं परिमितत्वं न तावद्देशतः परिच्छेदः पक्षांतर्गताकाशेन
व्यभिचारेण भागासिद्धेः॥ नापि कालतः परिच्छेदः सांख्यैः कालस्यानंगीकारात् अविद्यागुणसंसर्गेण सिद्धसाध्यत्वाच्च नापि
वस्तुतः परिच्छेदः सत्वादीनां परस्परं भिन्नत्वे सत्यपि साध्याभावेन व्यभिचारादित्याह॥ सत्वेति॥ यदुक्तं कार्यकारणविभागो यत्र
समाप्यते तत्प्रधानमिति तन्न॥ ब्रह्मणि मायायां वा समाप्तिसंभवात्॥ नचायं कार्यस्य विभागः सचेतनानधिष्ठितान्वेतने समा
प्यत इति व्याप्तिरस्ति॥ सर्वत्राचेतनेषु चेतनाधिष्ठानदर्शनादित्याह॥ कार्येति॥ एतेन विभागोऽपि व्याख्यातः॥ यत्तु यत्परिमितं तत्
द्रव्यकमप्रकृतिपूर्वकमिति व्याप्त्यंतरं तस्यापि गुणेषु घटनादिषु परिमितेषु व्यभिचारः॥ एतेन सहशब्दायोरेव प्रकृतिविकारभावाद
चेतनविकाराणामचेतनमेव प्रकृतिरिति निरस्तं॥ चेतनाधिष्ठाताचेतनप्रकृतिकत्वेपि सादृश्योपपत्तेः॥ न विलक्षणत्वादित्यस
त्र सादृश्यनियमस्य निरस्तत्वाच्च॥ एवं चेतनाधीनकारणशक्तितः कार्यप्रवृत्तिसंभवात् शक्तितः प्रवृत्तिलिंगमन्यथासि
द्धमिति भावः॥ स्वतंत्रमचेतनं कारणत्वेन नानुमातव्यं॥ तस्य स्वच्छंदप्रवृत्तेरनुपपत्तेः

=प्रधानस्य स्वातंत्र्ये चेतनानधिष्ठितत्वे प्रवृत्त्यभावप्रसंगो मृदादिदृष्टदर्शनादिपक्षे बाधक इति भावः ५

रिति चकारेणानुपपत्तिपदमनुषज्य सूत्रं योजनीयं॥ रचनाप्रवृत्त्योः को भेदः स्यात्तत्राद्यप्रवृत्तिस्वरूपमाह॥ साम्येति॥ गुणानां किल साम्या
वस्थातत्त्वानां प्रलयः तदा न किंचित्कार्यं भवति प्रलयाभावप्रसंगात् किं त्वादौ साम्यच्युतिरूपं वैषम्यं भवति॥ ततः कस्यचित् गुण
स्यांगित्वमुद्भूतत्वेन प्राधान्यं कस्यचिदंगत्वं शेषत्वमित्यंगांगिभावो भवति॥ तस्मिन् सति महदादिकार्योत्पादनात्मिका प्रवृत्तिः त
या विविधकार्याणां विन्यासो रचनेति भेद इत्यर्थः॥ गुणानां प्रवृत्तिः चेतनाधिष्ठानपूर्विका प्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्याह॥ सा
पीति॥ विपक्षे स्वतंत्रे प्रवृत्त्यनुपपत्तिरित्यर्थः॥ केचित्तु भेदानां प्रवृत्तिशक्तिमत्त्वाच्चेतनानधिष्ठितं चेतनप्रकृतिकत्वमिति शक्ति
तः प्रवृत्तिरिति लिंगं व्याचक्षते॥ अस्यापि गुणेषु व्यभिचारः॥ कार्यत्वविशेषणे च विरुद्धता॥ प्रवृत्तिशक्तित्वे सति कार्यत्वस्य प्र
यदिषु चेतनाधिष्ठितप्रकृतिकत्वे नोक्तसाध्यविरुद्धेन व्याप्तिदर्शनादिति प्रवृत्तेश्चेति सूत्रेण ज्ञापितं॥ ननु लोके स्वतंत्रा
चेतनानां प्रवृत्त्यदर्शनेऽपि प्रधाने सा प्रवृत्तिः सिध्यतु तत्राह॥ दृष्टाच्चेति॥ अनुमानकारणस्य तद्दृष्टांतं विनाऽतींद्रियार्थसिध्य
योगादिति भावः॥ ननु प्रधानस्य प्रवृत्तिं खंडयता चेतनस्य स्वत एव प्रवृत्तिर्वाच्या सा न युक्तेति सांख्यः शंकते॥ नन्विति॥ शुद्ध
चेतनस्य प्रवृत्त्ययोगमंगीकरोति॥ सत्यमिति॥ तर्हि केवलस्याचेतनस्य न प्रवृत्तिसिद्धिरन्यथास्त्वस्य योगात्तत्राह॥ तथा
पीति॥ केवलस्य चेतनस्याप्रवृत्तावपि चेतनाचेतनयोर्मिथः संबंधात् सृष्टिप्रवृत्तिरिति भावः॥ एवं वेदांतसिद्धांतं सांख्या
दूषयति॥ नन्विति॥ सर्वा प्रवृत्तिरचेतनाश्रयैव दृष्टा॥ न त्वचेतनसंबंधेन चेतनस्य क्वचित् प्रवृत्तिर्दृष्टा॥ तस्मादचेतनात् सृष्टि
रित्यर्थः॥ मतद्वयं श्रुत्वा मध्यस्थः पृच्छति॥ किं पुनरिति॥ यस्मिन्नचेतने रथादौ प्रवृत्तिर्दृष्टा तस्यैव सा न चेतनस्तत्र हेतुरिति किं सांख्य
मतं साधु उत येन चेतनेनाश्वादिना संयोगादचेतनस्यैव प्रवृत्तिस्तत्प्रयुक्ता सेति वेदांतिमतं वा साध्विति प्रश्नार्थः॥ सांख्य आह॥ नन्विति॥
उभयोः प्रवृत्तितदाश्रययोरित्यर्थः॥ दृष्टाश्रयेणैव प्रवृत्तेरुपपत्तावदृष्टचेतनप्रयुक्तिर्न कल्पनीयेति भावः॥ आत्मनोऽप्रत्यक्षत्वे कथं सि
द्धिस्तत्राह॥ प्रवृत्तीति॥ जीवद्देहस्य रथादिभ्यो वैलक्षण्यं प्राणादिमत्त्वलिंगं दृष्टमिति कृत्वा चेतनस्य सिद्धिरित्यन्वयः॥ जीवद्देहः
सात्मकः प्राणादिमत्त्वात्॥ व्यतिरेकेण रथादिवदित्यात्मसिद्धिरित्यर्थः॥ देहप्रवृत्तिः स्वाश्रयादन्येन ज्ञानवता सहभूता प्रवृत्तित्वाद्र
थप्रवृत्तिवदित्यस्यानुमानांतरस्य सूचनाय प्रवृत्त्याश्रये इत्युक्तं॥ सद्भावसिद्धिरेव न प्रवर्तकत्वमित्येवकारार्थः॥ अनुमितस्य सद्भावमा
त्रेण प्रवृत्तिहेतुत्वे सर्वत्राकाशस्य हेतुत्वप्रसंगादिति भावः॥ आत्मनोऽप्रत्यक्षत्वे चार्वाकाणां भ्रमोऽपि लिंगमाह॥ अत एवेति॥ अप्रत्यक्षत्व

पि

स२

256

देवेत्यर्थः॥देहान्यात्मनः प्रत्यक्षत्वे भ्रमासंभवादिति भावः॥दर्शनात्प्रवृत्तिचैतन्ययोरिति शेषः॥प्रवृत्तिं प्रत्याश्रयत्वमचेतनस्यैवेत्युक्तमंगीकृत्य चेतनस्य प्रयोजकत्वं सिद्धान्ती साधयति॥तद्दर्शीयत इति॥रथादिप्रवृत्तावश्वादिचेतनस्यान्वयव्यतिरेकौ स्त एताभ्यां चेतनस्य प्रवर्त्तकत्वं वादिनामपि संमतमित्याह॥लोकायतिकानामपीति॥यः प्रवर्त्तकः स स्वयं प्रवृत्तिमानश्वादिवदिति व्याप्तेरात्मनि व्यापकाभावान्न प्रवर्त्तकत्वमिति कश्चिच्छंकते॥नन्विति॥मण्यादौ व्यभिचारान्न व्याप्तिरिति परिहरति॥नेति॥वस्तुत एकत्वेपि कल्पितं द्वैतं प्रवर्त्तमस्तीत्याह॥नाविद्येति॥अविद्यया कल्पिते नामरूपप्रपंचे तयैवाविद्यारूपया मायया पआवेशाच्चिदात्मनः कल्पितः संबंधः तेस्य वशः सामर्थ्यं तेनांतर्यामीत्यादिकमीश्वरस्येत्युक्तत्वान्न दोषावसर इत्यर्थः॥अनादिजडस्य प्रवृत्तिश्चेतनाधीना प्रवृत्तित्वाद्रथादिप्रवृत्तिवदिति स्थितं तत्र क्षीरादौ व्यभिचारमाशंक्य तस्यापि पक्षसमत्वेनोक्तानुमानादागमेन च साध्यसिद्धेर्न व्यभिचार इति सूत्रं व्याचष्टे॥स्यादेतदित्यादिना॥साध्यपक्षेति॥साध्यवता पक्षेण तुल्यत्वादित्यर्थः॥अनुपन्यासो न व्यभिचारस्फूर्त्तिरिति यावत्॥क्षीरे प्रवर्त्तकत्वेन धेन्वादेः सत्त्वाच्च न व्यभिचार इत्याह॥चेतनायाश्चेति॥उपदेरिति अनुमानागमाभ्यामिति शेषः॥सूत्रकारस्य क्षीरवदित्यत्रापीति च वृत्तकृतः पूर्वापरविरोधमाशंक्य लोकदृष्ट्या शास्त्रदृष्ट्या च सूत्रद्वयमित्यविरोधमाह॥उपसंहारेति॥अस्तु प्रधानस्यापि धर्मादिकमपुरुषो वा प्रवर्त्तक इत्याशंक्य सूत्रं प्रवर्त्तांततद्व्याचष्टे॥सांख्यानामित्यादिना॥प्रधानव्यतिरेकेण कर्मणोनवस्थितेः पुरुषस्योदासीनत्वात्कदाचित्सृष्टिप्रवृत्तिः कदाचित्प्रलय इत्ययुक्तमित्यर्थः॥कर्मणोपि प्रधानात्मकस्याचेतनत्वात्सदासत्त्वाच्च न कदाचित्कप्रवृत्तिनियामकत्वमिति भावः॥पुनरपि दृष्टांतबलात्प्रधानस्य स्वत एव कादाचित्कप्रवृत्तिरित्याशंक्य निषेधति सूत्रकारः॥अन्यत्रेत्यादिना॥एधतीति॥कथमिति॥उत्तरं निमित्तांतरेति॥धेन्वादिनिमित्तांतरमस्तीति सिद्धांतयति॥अत्रोच्यत इति॥प्रहीणं नष्टं॥क्षीरस्य स्वेच्छया संपादयितुमशक्यत्वात्स्वाभाविकत्वमिति तत्राह॥नच यथाकाममिति॥प्रधानस्य न स्वतः प्रवृत्तिः स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्यापेक्षाभावप्रसंगादित्येकोर्थः॥तत्रेष्टापत्तिं निरस्यति॥रत्यतः प्रधानमिति॥उक्तप्रसंगस्येष्टत्वे प्रतिज्ञाहानिः स्यादित्यर्थः॥अथो संभवान्न स्वतः प्रवृत्तिरित्यर्थांतरं शंकापूर्वकमाह॥सपदीत्यादिना॥प्रयोजनमपेक्षितं चेद्वक्तव्यमित्याह॥तथापीति॥कूटस्थे पुरुषे स्वतः सुखादिरूपस्यातिशयस्याधातुमशक्यत्वादध्यासानंगीकाराच्च भोगो न युक्तः॥किंच प्रधानप्रवृत्तेर्भोगार्थत्वे मोक्षहेतुविवेक

ख्यास्यस्याद्वादनिर्मोक्षप्रसंगश्च॥अपवर्गार्थत्वेस्वरूपावस्थानरूपमुक्तेःस्वतःसिद्धत्वात्प्रवृत्तिवैयर्थ्यंभोगाभावप्रसंग
श्चेत्यर्थः॥तृतीयंदूषयति।उभयार्थतेति॥मीयंतेभुज्यंतइतिमात्राःभोग्याःऔत्सुक्यनिवृत्त्यर्थंयथाक्रियासुप्रवर्त्ततेलो
कःपुरुषस्यविमोक्षार्थंप्रवर्त्ततेतद्वदव्यक्तमितिकारिकोक्तंदूषयति॥नचेति॥औत्सुक्यमिच्छाविशेषःकेवलजडस्यासुने
वानयुक्तइत्यर्थः॥अस्तिपुरुषस्यदृक्शक्तिःचिद्रूपत्वात्॥अस्तिचप्रधानस्यसर्गशक्तिःत्रिगुणत्वात्तयोःशक्त्योःदृ[illegible]स
ष्टिविनाशार्थंक्याद्योगात्प्रधानस्यसृष्टौप्रवृत्तिरितिचेन्नशक्त्योर्नित्यत्वात्सृष्टिनित्यत्वापत्तिरित्याह॥दृक्शक्तीति॥पुरुष
स्यप्रवर्त्तकत्वंनिरस्तमपिदृष्टांतेनपुनराशंक्यनिषेधति॥पुरुषाश्मवदिति॥प्रधानस्यस्वातंत्र्यंपुरुषस्योदासीन्यंचाभ्युपेतंसन्न्य
तइतिवदंतंसांख्यंप्रत्याह॥कथंचेति॥पुरुषस्यपरिस्पंदःप्रयत्नगुणोवानास्तीतिचक्रहेतुद्वयं॥प्रधानपुरुषयोर्नित्यत्वाद्व्यापित्वाच्च
नित्यःसन्निधिःअश्मनस्तुपरिमार्जनमनुत्वेनस्थापनमित्यसंनिधिश्चेतिव्यापारोस्तीत्यनुपन्यासःसमदृष्टांतोपन्यासोनसंभवतीत्य
र्थः॥ननुचिज्जडयोर्दृग्दृश्यभावयोग्यतास्तितयातद्भावःसंबंधइत्यतआह॥योग्यतेति॥चिज्जडत्वरूपायायोग्यतायानित्यत्वात्सं
बंधनित्यत्वापत्तिरित्यर्थः॥यथास्वतंत्रप्रधान[illegible]प्रवृत्तिपक्षोभोगापवर्गोभयंवाफलमितिविकल्प्यदूषितः॥एवंपुरुषाधीनप्रधा
नप्रवृत्तिपक्षोपिफलाभावेनदूषणीयइत्याह॥पूर्ववदेति॥सिद्धांतेपरमात्मनउदासीनस्यकथंप्रवर्त्तकत्वमित्याशंक्याह॥परमा
त्मेति॥उभयंविरुद्धसत्यत्वात्अस्मन्मतेकल्पिताकल्पितयोरविरोधइत्यभिप्रायः॥किंप्रधानावस्थाकुर्वन्नित्याद्युत्तर[illegible]विका
रिणीआद्येदोषमाह॥तस्यामिति॥अंगांगिभावेसाम्यस्वरूपनाशःस्यात्ततःकौटस्थ्यभंगइतिभयादंगांगित्वानुप
पत्तेःसृष्ट्यनुपपत्तिरित्यर्थः॥द्वितीयंदूषयति॥बाधस्येति॥चिरकालस्थितस्यसाम्यस्यच्युतौनिमित्तंवाच्यंतन्नास्तीत्य
र्थः॥गुणानामितोनपेक्षस्वभावत्वात्स्वतोवैषम्यमित्युक्तंतत्रहेतुसिद्धिमाशंक्यसूत्रकारःपरिहरति॥अन्यथेति॥अ
नपेक्षस्वभावादन्यथासापेक्षत्वेनगुणानामनुमानात्पूर्वसूत्रोक्तोदोषोनप्रसज्यते॥नचैवमपसिद्धांतःकार्यानुसारेण
गुणस्वभावांगीकारादित्याह॥चलंगुणवृत्तमिति॥पूर्वसूत्रोक्तांगित्वानुपपत्तिदोषाभावमंगीकृत्यपरिहरति॥एवमपीति
कार्यार्थज्ञानशक्तिकल्पनेब्रह्मवादःस्यादित्यर्थः॥अंगीकारंत्यजति॥वैषम्येति॥सूत्रंव्याचष्टे॥परस्परेति॥तज्ञात्रमेव

स्य

नित्य

सांख्यमते

स्थ

ज्ञानेंद्रियमेकमनेकत्राबादि ज्ञानकारणं पंचकर्मेंद्रियाणि मनश्रुति सप्तेंद्रियाणि ज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि पंच मनश्चेत्येकादश
बुद्धिरहंकारो मन इति त्रीणि॥ एकमिति बुद्धिरेव॥ एवंपूर्वापरविरोधादिति व्याख्यायम्तु तिसृणि इति विप्रतिषेधा सर्पांतरमाह॥ प्रसि
द्ध इति॥ तस्मात्भ्रांतिमत्त्वात् सांख्यशास्त्रस्य तेन निर्दोषवेदांतसमन्वयस्य न विरोध इति सिद्धं॥ स्वमतासामंजस्यमसहमानः सांख्यः प्र
त्यवतिष्ठते॥ अत्राहेति॥ तप्यो जीवस्तापकः संसारस्तयोर्भेदानंगीकारात् लोकप्रसिद्धस्तप्यतापकभावो लुप्येतेत्यर्थः॥ विवृणोति॥ एकं ही
ति॥ तथाभेदव्यवहारलोपश्चासमंजस इत्यर्थः॥ ननु तप्यतापायोरैक्येपि मिथो भेदोस्त्येव॥ यथैकवन्ह्यात्मकयो रौष्ण्यप्रकाशयोस्ततो न व्यव
हारलोप इत्याशंक्य वन्हेरिव ताभ्यामात्मनो मोक्षो न स्यादित्याह॥ यदि वेत्यादिना॥ ननु सत्यपि धर्मिणि स्वभावनाशे मोक्ष उपपद्यते सत्यपि ज
लेवीच्यादिनाशदर्शनादित्याशंक्य दृष्टांतासिद्धिमाह॥ योपीति॥ किंच भेदांगीकारे पासिद्धांतः अनंगीकारे लोकप्रसिद्धिबाध इत्याह॥ प्रसिद्धश्चे
ति॥ अर्थोर्जनालाभादिनार्थिनं तापयतीति तापकः अर्थी तप्यस्तयोरभेदे बाधकमाह॥ यदीति॥ अर्थिनोन्यस्यार्थस्याभावा
दर्थित्वाभावव दर्थादन्यस्यार्थिनोसत्वादर्थत्वाभावः प्रसज्येतेत्याह॥ तथार्थस्यापि॥ प्रसंगस्येष्टत्वं निराकरोति॥ नचैतदस्तीति॥
अर्थत्वं हि कामनाविषयत्वं तच्च कामनाविषयत्वम्प्यादन्यस्य कामयितुरसत्वान्न स्यान्नहि स्वार्थमस्ति॥ काम्यस्यैव कामयितृत्वायोगा
त्तस्मात्भेदोंगीकार्य इत्यर्थः॥ इतश्चभेद इत्याह॥ संबंधीति॥ तथानर्थोनर्थिनावपि मिथ्यावित्यन्वयः॥ अर्थानर्थियोः स्वरूपोक्तिपू
र्वकं तापकत्वं स्फुरयति॥ अर्थिनोनुकूल इति॥ अद्वैतमते मुक्तेरयोगमुक्त्वा स्वमते योगमाह॥ जात्यंतरेति॥ तयोस्तप्यतापयोर्बुद्ध्या पुरुष
स्य संयोगः स्वस्वामिभावः॥ तस्य हेतुरनादिरविवेकस्तस्य परिहारो विवेकस्मात्तस्य मुक्तस्यापि पुरुषस्य कथंचिदुपचारा मोक्षोप
पत्तिरित्यर्थः॥ यथायोधगतौ जयपराजयौ राजन्युपचर्येते तथा पुरुषादत्यंतभिन्नबुद्धिगतौ बंधमोक्षौ पुरुषे उपचर्येते॥ ननु कं
सेवु च बध्यते मुच्यत इति सिद्धांतयति॥ अत्रेति॥ किं परमार्थदृष्ट्या तप्यतापकभावानुपपत्तिरुच्यते व्यवहारदृष्ट्या वा॥ नाद्य इत्याह॥ नैक
त्वादेवेति॥ दोषत्वमिति शेषः॥ तस्या अदोषत्वं विवृणोति॥ नवेदित्यादिना॥ एतन्नातिकं विषयविषयित्वं न तत्त्वतोस्तीत्यर्थः॥ यत्र तप्यतापकभावो
भावो दृष्टस्तत्रैवेति व्यवहारपक्षमादाय सिद्धांती ब्रूते॥ किं न पश्यसीति॥ देहस्यैतप्यत्वे देहात्मवादापत्तिरिति शंकते॥ नन्विति॥ अ
चेतनस्येव देहस्य तप्तिर्नेति वदता सांख्येन वक्तव्यं॥ किं चेतनस्य केवलस्य तप्तिः किं वा देहसंहतस्य उत आहो स्वित् सत्वस्य ना
द्य इत्याह॥ उच्यत इति॥ न द्वितीयस्तृतीयश्चेत्याह॥ नापीत्यादिना॥ चतुर्थं शंकते॥ सत्वमिति॥ सत्वरजसोस्तप्यतापकत्वे पु
रुषस्य बंधाभावात् शास्त्रारंभवैयर्थ्यमिति परिहरति॥ न ताभ्यामिति॥ असं

सं

त दी: ३

गतेपि पुरुषस्य तप्यसत्त्वप्रतिबिंबत्वात्तप्तिरिति शंकते ॥ सत्त्वेति ॥ नहि जलचंद्रस्य चलनवन्मिथ्यैव तप्तिरित्यस्मत्पक्ष आर्गे
रत्याह ॥ परमार्थत इति ॥ इत्यादिमात्रेण कथं मिथ्या तप्तयोग इति चेदुच्यते ॥ एवत्रादृष्टत्वबुद्धिसत्त्वसादृश्यं ब्रूते ॥ तच्च सा
दृश्यं पुरुषस्य तप्यत्वरूपं चेतनकल्पितमेव वस्तुतस्तत्प्रयुभावादित्युपपादयति ॥ नचेदिति ॥ पुरुषो वस्तुतस्तप्तिशून्यश्चेदविद्या
नदोषाय मिथ्या तप्तिपरत्वादित्यर्थः ॥ मिथ्या सादृश्यमेव दोष इति चेन्नेत्याह ॥ नहीति ॥ सविषत्वं निर्विषत्वं चेद्वराद्यर्थः क
ल्पित एव द्रष्टव्यः ॥ सांख्यस्याविद्याकृत तप्यतापकत्वे सति ममापि किंचिन्न दुष्यतीति किंतु इष्टमेव संपन्नमित्यर्थः ॥ यदि मिथ्यात
प्यत्वांगीकारे परसिद्धांतः स्यादिति तत्त्वैत्यासः संतप्यत्वं पुरुषस्योच्यते तथा प्यपसिद्धांतः कौटस्थ्यहानादनिर्मोक्षश्च सत्त्वस्यात्मव
न्निवृत्त्यसंयोगादित्याह ॥ अथेत्यादिना ॥ किंच रजस्तमसी सोनित्यत्वात्तदुःखसातत्यमित्याह ॥ नित्यत्वेति ॥ अत्र सांख्यः शंकते ॥ तप्येति ॥
सत्त्वं पुरुषो वा तप्यः शक्तिः तापकशक्तिस्तु रजः निमित्तमविवेकात्मकमदर्शनं तमः तेन सहितः सनिमित्तः संयोगः पुरुषस्य गुणत्वाभिन्न
रूपः तदपेक्षत्वादित्यर्थः ॥ मोक्षस्तत्प्रभावः निमित्तस्य निवृत्त्यभावान्न मोक्ष इति सिद्धांतीपरिहरतीनेति ॥ तमसो निवृत्त्यभावेपि विवेके
नोपरमान्मोक्ष इत्यत आह ॥ गुणानां चेति ॥ चलं गुणवृत्तमिति गीराकादिति भावः ॥ परपक्षे बंधमोक्षानुपपत्तिमुक्त्वा स्वपक्षमुपसंहर
ति ॥ औपनिषदस्येति ॥ वस्तुत एकत्वेन बंधाभावान्न मुक्त्यभावशंकावसरः ॥ व्यवहारे तु भेदांगीकारान्न तप्यतापकभावो बंधस्तत्त्वज्ञा
नान्निवर्त्तिष्यत इति न चोद्यावसरः ॥ एतावतानुवादेन महद्दीर्घवदिति स्वमतस्थापनात्मकाधिकरणस्य संगतिमाह ॥ प्रधाने
ति ॥ यद्यपि सांख्यमतनिरासानंतरं परमाणुवादो निराकर्त्तव्यः ॥ स्वमतस्थापनस्यास्मिन्पादे संगतत्वात्तथापि पूर्वत्र प्रधा
नगुणानां सुखादीनां जगत्यनन्वयात्प्रधानस्यानुपादानत्वमुक्तं ॥ तथा ब्रह्मगुणचैतन्यानन्वयात् ब्रह्मणोपि नोपादान
त्वमिति दोषाद्दृष्टांतसंगतिलाभादत्र समाधीयत इत्यर्थः ॥ चेतनात् ब्रह्मणो जगत्सर्गवादी वेदांतसमन्वयो विषयः स किंपः
समवायिकारणगुणाः स्वकार्ये द्रव्ये स्वसमानजातीयगुणारंभकत्वं तु शौक्ल्यवदिति न्यायेन विरुध्यते न वेति संदेहे न्यायस्या
व्यभिचाराद्विरुध्यत इति प्राप्ते व्यभिचारान्न विरोध इति सिद्धांतसूत्रं व्याचष्टे ॥ एषेत्यादिना ॥ यद्यपि न विलक्षणत्वादिसूत्रे चेतनादचे
तनसर्गः साधितः तथापि वैशेषिकन्यायस्य तदीयप्रक्रियया व्यभिचारोत्यर्थत्वादस्य सूत्रस्य न गतार्थता ॥ प्रलयकालेपरमा

णवोनिश्चलाअसंयुक्तास्तिष्ठंति॥सर्गकाले[illegible]चादृष्टवदात्मसंयोगात्तेषुकर्मभवति॥तेनसंयोगात्द्व्यणुकंतत्रस्तष्टिर्भवति॥का
रणगुणाःकार्यगुणांतरमारभंतइतिसामान्येनप्रकृत्तिमाप्युक्ताविशेषतस्तामाह॥यदाद्वाविति॥परमाणुःपरिमंडलः।तद्गतं
परिमाणंपारिमांडल्यमित्युच्यते॥तच्चस्वसमानजातीयगुणारंभकंनभवतीत्युक्तन्यायस्यव्यभिचारइतिभावः॥व्यभिचारस्थलांतर
माह॥यदापिद्वेइति॥द्वेद्वेइत्यादद्वयंपठितव्यं॥एवंसतिचतुर्भिर्द्व्यणुकैश्चतुरणुकारंभउपपद्यते॥यथाश्रुतेतुद्वाभ्यांद्व्यणुकाभ्यांमहत्त्वश्च
तुरणुकस्यारंभोनयुज्यते॥कारणगतंमहत्त्वंबहुत्वंवाविनाकार्येमहत्त्वायोगादितिमंतव्यं॥प्रकृतार्थकारास्तुयतुद्वाभ्यांद्व्यणुकाभ्याम
रब्धकार्येमहत्त्वंदृश्यते॥तस्यहेतुःप्रचयोनामप्रशिथिलावयवसंयोगइतिरावणप्रणीतेभाष्येदृश्यतइतिचिरंतनवैशेषिकरव्याप्य
भाष्यमित्याहुः॥सर्वथापिद्व्यणुकगतस्वत्वाणुत्वपरिमाणयोरनारंभकत्वाद्व्यभिचारः॥यद्यपितार्किकाद्वाभ्यामेवपरमाणुभ्यां
द्व्यणुकंत्रिभिर्द्व्यणुकैःत्र्यणुकमितिकल्पयंति॥तथापितर्कस्याप्रतिष्ठानान्नात्रनियमइतिमत्वाइत्युक्ते॥यदापिबहवइति॥कारण
गुणाःशुक्लादयःसमानजातीयगुणारंभकाःकार्यद्रव्यपरिमाणंतुनकारणगुणपरिमाणारभ्यंकिंतुकारणगतसंख्यारभ्य
मितिप्रक्रियेतुल्येइत्यर्थः॥एवंप्रक्रियांदर्शयित्वासूत्रंयोजयन्व्यभिचारमाह॥तदेवमितिं॥परमाणुभ्यएवमहद्दीर्घत्वेसतिनिय
तप्रक्रियामाश्रित्योक्तंनियतप्रक्रियामाश्रित्यव्यभिचारमाह॥यथावेति॥अणुह्रस्वेभ्याद्व्यणुकेभ्योणुद्रव्यंनजायतेह्रस्वम
पिनजायतइतिव्यभिचारइत्यर्थः॥सूत्रेवाशब्दश्चार्थानुक्ताणुसमुच्चयार्थः॥तथोचह्रस्वपरिमंडलाभ्यांद्व्यणुकपरमाणुभ्याम
हद्दीर्घाणुवच्चेतनाच्चेतनंजायतइतिसूत्रयोजना॥तत्रह्रस्वात्महद्दीर्घंत्र्यणुकंपरिमंडलाद्दणुद्व्यणुकमितिविभागः॥दृष्टां
तवैषम्यंशंकते॥अथमन्यसइति॥अचेत[illegible]नैवविरोधिगुण[illegible]सतआह॥नचचेतनेति॥कार्यद्रव्यस्यपरिमाणांतराक्रांतत्वमंगीकृ
त्यविवक्षितांशसाम्यमाह॥मैवमिति॥अंगीकारंत्यजति॥नचेति॥उत्पत्तेःप्राक्हिपरिमाणांतरंविरोधिभवति॥तदुत्पत्तेःप्राक्विरोध्यभा
वाद्व्यणुकेपारिमांडल्यारंभःकिंनस्यादित्यर्थः॥ननुविरोधिपरिमाणेनसहैवद्रव्यंजायतइत्यतउतआह॥आरब्धमपीति॥सहोत्पत्ता
वपसिद्धांतः॥अतोविरोध्यभावःसिद्धइत्यर्थः॥अणुत्वा[illegible]धारंभेव्यग्रत्वात्पारिमांडल्यादिःस्वसमानगुणानारंभकत्वमित्याशंक्य
निषेधति॥नचेति॥व्यग्रत्वमन्यथासिद्धंतत्रहेतुः॥परिमाणांतरस्येति॥अन्यहेतुकत्वेसूत्राण्युदाहरति॥कारणेति॥कारणानांद्व्यणु
काणांबहुत्वात्त्र्यणुकेमहत्त्वंमहदोमहत्त्वात्परेमहत्त्वंद्वित्वपिंडारब्धोतिस्थूलतूलपिंडेप्रचयादवयवसंयोगविशेषान्महत्त्वमित्यर्थः॥

मा

२

महत्त्वविरुद्धमणुत्वं परमाणु...न द्वित्वसंख्यया द्व्यणुके भवतीत्याह ॥ तदिति ॥ यन्महत्त्वस्यासमवायिकारणं तदेव महत्त्वसमानाधिकरणस्य दीर्घ
त्वस्य ॥ यच्चाणुत्वस्यासमवायिकारणं तदेवाणुत्वाविनाभूतह्रस्वत्वस्यासमवायिकारणमित्यतिदिशति ॥ एतेनेति ॥ अतो महत्त्वादौ अहेतु
त्वात् पारिमाण्डल्यादीनां [illegible] ग्रहमसिद्धमिति भावः ॥ तेषां सन्निधिविशेषाभावान्न समानगुणारम्भकत्वमित्यपि न वाच्यमित्याह ॥ नेत्ये
ति ॥ पारिमाण्डल्यादीनामपि बहुत्वादिवत् समवायिकारणगतत्वाविशेषादित्यर्थः ॥ तेषामनारम्भकत्वे कार्यद्रव्यस्य विशेषचिह्नगुणाऽको
तत्त्वं व्यग्रत्वमसन्निधिर्वा न हेतुरित्युक्तिफलमाह ॥ तस्मादिति ॥ यत्तु कारणगुणः स्वसमानगुणारम्भक इति व्याप्तेः सामान्य
गुणेषु पारिमाण्डल्यादिषु व्यभिचारेऽपि यो द्रव्यसमवायिकारणगतो विशेषगुणः स स्वसमानजातीयगुणारम्भक इति व्याप्ते
श्चैतन्यस्य विशेषगुणत्वारम्भकत्वं दुर्वारमिति ॥ तन्मंदं ॥ चित्रपटहेतुतन्तुगतेषु नीलादिरूपेषु विजातीयचित्ररूपहेतुषु व्यभि
चारात् चैतन्यस्यात्मत्वेन गुणत्वाभावाच्चेति मन्तव्यं ॥ तस्मात् चेतनादि जातीयारम्भोऽयुक्त इति स्थितं ॥ तत्रोदाहरणान्तरमाह ॥ सं
योगाच्चेति ॥ चेतनं ब्रह्म कार्योपादानत्वात् द्रव्यं तच्च विलक्षणस्योपादानमिति [illegible] प्रकृते किंचित् द्रव्यमेव विलक्षणकार्यकरमुदाहार्
यं न संयोगस्य गुणस्योदाहरणमिति शंकते ॥ द्रव्य इति ॥ गुणात् द्रव्यवत् चेतनादचेतनारम्भ इति विलक्षणारम्भकत्वांशोऽयं दृष्टान्त
इति परिहरति नेति ॥ अनियमः कणादसंमत इत्याह ॥ सूत्रकारोऽपीति ॥ एतावता कथमनियमस्तत्राह ॥ एतदुक्तमिति ॥ न विलक्ष
णत्वन्यायेन पुनरुक्त्यभावेऽप्यतिदेशाधिकरणेन पुनरुक्तिरिति शंकते ॥ नन्वतिदेश इति ॥ समानगुणारम्भनियमस्य पारिमाण्ड
ल्यादिदृष्टान्तेन भंगार्थमस्यारम्भ इत्याह ॥ सत्यमिति ॥ तस्यैवातिदेशस्येत्यर्थः ॥ वैशेषिकमतपरीक्षामारभते ॥ उभयथापि न कर्म
तस्तदभावः ॥ नास्य प्रासंगिकेन पूर्वाधिकरणेन संगतिरपेक्षितेति मन्वानः प्रधानस्येश्वरानधिष्ठितस्याकारणत्वेऽपि परमाणूनां
तदधिष्ठितानां कारणत्वमस्त्विति प्रत्युदाहरणसंगत्या सांख्याधिकरणानन्तर्यमस्यावदंस्तात्पर्यमाह ॥ इदानीमिति ॥ द्व्यणुकादिक्रमेण
परमाणुभिर्जगदारभ्यत इति वैशेषिकराद्धान्तो विषयः ॥ स किं मानमूलो भ्रान्तिमूलो वेति संशये हेतुं पूर्वपक्षयति ॥ स चेति ॥ तैः पयादिभिः सा
मान्यतः क्षित्यादेः कार्यद्रव्यत्वं तेनेत्यर्थः ॥ विमतं सावयवं क्षित्यादिकं स्वन्यूनपरिमाणसंयोगसचिवानेकद्रव्यारब्धं कार्यद्रव्यत्वात् घटादिवदिति प्र
योगः ॥ स्वेष्टपरमाणुसिध्यर्थानि साध्यविशेषणानि ॥ नन्वेतावता कथं परमाणुसिद्धिस्तत्राह ॥ सन्न्यायमिति ॥ विमतं सावयवत्वं पक्षतावच्छेदकं
यतो निवर्तते ॥ सन्न्यूनपरिमाणस्यापकर्षस्य पर्यन्तत्वेनावसानभूमित्वेनावगतः परमाणुरित्यर्थः ॥ यावत्सावयवमनुमानप्रवृत्तेः द्व्यणु

कन्नूनद्व्यंनिरवयवंसिध्यतीतिभावः॥जगन्नित्यत्ववादात्कार्यद्रव्यत्वहेत्वसिद्धिरितिवदंतंप्रत्याह॥सर्वंचेति॥विमतमाद्यंतवत्सावयवत्वात्पट
वदित्यर्थः॥हेतोरसिद्धिंनिरस्याप्रयोजकत्वंनिरस्यति॥नचेति॥नेकतिविध्याइत्याकांक्षायामाह॥नानीति॥प्रलयेप्येषामपिनाशात्तत्रजगत्का
रणत्वमित्या[illegible]शंक्याह॥नेषांचेति॥अवयवानांविभागान्नाशाद्वावयविनोनाशः परमाणूनांनिरवयवत्वेनावयवविभागादेर्नाशहेतोरसंभ
वान्ननाशइत्यर्थः॥तेषांनित्यत्वेफलितंसृष्टिक्रममाह॥ततइति॥एवंकाणादमतस्यमानमूलत्वात्तेनवेदांतसमन्वयस्यविरोधादसिद्धिरि
तिपूर्वपक्षेफलंतस्यभ्रांतिमूलत्वादविरोधइतिसिद्धांतयति॥तत्रेदमिति॥प्रलयेविभक्तानांपरमाणूनामन्यतरकर्म[illegible]णोभयकर्मणा
वासंयोगोवाच्यः॥कर्मणश्चनिमित्तंप्रयत्नादिकंदृष्टंयथाप्रयत्नवदात्मसंयोगाद्देहचेष्टावाय्वाद्यभिघाताद्वृक्षादिचलनंहस्तनोदनादिष्वादि
गमनंतद्वदणुकर्मणोदृष्टंनिमित्तमभ्युपगम्यते॥नवाद्वितीयेकर्माणुसंत्तिः॥नाद्यःप्रयत्नादेःसृष्ट्युत्तरकालीनत्वादित्युभयथापिनकर्मसंभव
ति॥अतःकर्मासंभवान्नतत्संयोगपूर्वकद्व्यणुकादिसर्गस्याभावइतिसूत्रार्थः॥स्थिरस्यवेगवद्द्रव्यसंयोगविशेषोभिघातः॥सर
वच्चलस्यनोदनमितिभेदः॥दृष्टनिमित्ताभावेऽदृष्टवदात्मसंयोगादणुषुकर्मेतिशंकते॥अथादृष्टमिति॥विकल्प्यपुरःसरंदूषयति॥तस्यन
रिति॥जडात्मवदणोराश्रयत्वंकिंनस्यादितिमत्वाविकल्पःकृतइतिमंतव्यं॥अत्रापिसूत्रंयोजयति॥उभयथेति॥जीवेनाधिष्ठितमदृष्ट
निमित्तमस्त्वित्यतआह॥आत्मनश्चेति॥अचेतनत्वान्नाधिष्ठातृत्वमितिशेषः॥भिन्नेश्वर[illegible]स्याधिष्ठातृत्वमग्रेनिराकरिष्यते॥
अचेतनत्वमदृष्टस्यकर्मनिमित्तत्वाभावेहेतुरुक्तः॥हेत्वंतरमाह॥आत्मसमवायित्वेति॥गुरुत्ववददृष्टमपिस्वाश्रयसंयुक्तेक्रियाहेतु
रितिशंकते॥अदृष्टवतेति॥विभुसंयोगस्याणुषुसदासत्वान्नित्यक्रियासातत्येप्रलयाभावःस्यादितिदूषयति॥संबंधेति॥काचित्कप्र
वृत्तेरदृष्टनियम्यत्वाद्योगेपीश्वर[illegible]न्नियमइत्यतआह॥नियामकांतरेति॥यत्नानंतच्छरीरजन्यमितिव्याप्तिविरोधेननित्ययत्ना
नासिद्धेस्तत्कृणईश्वरोनास्ति॥अस्तित्वेपिसदासत्वान्ननियामकत्वमितिभावः॥सूत्रार्थंनिगमयति॥तदेवमिति॥संयोगस्यहेतु
[illegible]खंडयित्वास्वरूपंखंडयति॥संयोगश्चाणोरिति॥संयोगस्यव्याप्यवृत्तित्वेएकस्मिन्नितरस्यांतर्भावात्कार्यस्यपृथुत्वायोगा
त्सर्वंकार्यंपरमाणुमात्रंस्यादित्यर्थः॥किंचसांशद्रव्येसंयोगस्यैकांशावृत्तित्वंदृष्टंतद्विरोधादव्याप्यवृत्तित्वंनकल्प्यमित्याह॥दृष्टेति॥परमा
णोःसंयोगएकदेशेनचेदितिसंबंधः॥दिग्भेदेनकल्पितप्रदेशस्यसंयोगस्यापिकल्पितत्वात्ततःकार्यंनोत्पद्येतउत्पन्नंवामिथ्यास्यादित्यपसिद्धां
तइत्यर्थः॥काणादानांसर्गप्रत्युक्तौसूत्रंयोजयित्वाप्रलयनिरासेपिसूत्रंयोजयति॥यथाचेति॥परमाणूनांकर्मणासंयोगात्सर्गःविभागात्
प्रलयइतिप्रक्रियानयुक्तायुगपदनंतपरमाणूनांविभागनियतस्याभिघातादे

दृष्टस्य निमित्तस्यासत्वात् धर्माधर्मरूपादृष्टस्य सुखदुःखार्थत्वेन सुखदुःखयोश्चान्यत्र प्रयोजकत्वायोगान्नादृष्टनिमित्तेन कर्म
णा विभागः संभवति॥ तथा च दृष्टादृष्टनिमित्तयोरसत्वादुभयथापि संयोगार्थत्वेन विभागार्थत्वेन च कर्म नास्तित्वात् अतः कर्मा
भावात्॥ तयोः संयोगविभागपूर्वकयोः सर्गप्रलययोरभाव इति सूत्रयोजना॥ समवायाभ्युपगमाच्च तदभावः अणुवादासंभव इ
ति योग्यतया संबध्यते द्व्यणुकसमवायिनो परमाणुभिन्नत्वे साम्यात् द्व्यणुकवत् समवायस्यापि समवायांतरमित्यनवस्थितिरित्यर्थः॥ न
न्विह तंतुषु पट इत्यादिविशिष्टधीनियामकः समवायो न संबंधांतरमपेक्षते॥ स्वरूपेणैव नित्यसंबंधत्वादिति शंकते॥ नन्विहेति॥ संयोग
स्यापि स्वरूपसंबंधोपपत्तेः समवायो न स्यादिति दूषयति॥ नेति॥ संबंधिभिन्नत्वे तदपेक्षा समवायस्यापि तुल्या॥ गुणपरिभाषाश्चेति॥
गुणत्वाभावेपि कर्मसामान्यादीनां सर्वेषामयं गौणिकारोतु गुणत्वे समवायित्वेन व्यापकं॥ नापि व्याप्यं गुणस्यापि समवायवत् स्वरूपसंबंधसंभ
वेन व्याप्त्यनुकूलतर्काभावात्॥ तस्मात् संबंधिभिन्नत्वमेव संबंधांतरापेक्षायां कारणं तस्य समवायेपि तुल्यत्वादनवस्था दुर्वारा सा च मूल
क्षयकरी तया समवायासिद्धौ समवेतद्व्यणुकासिद्धिरित्यर्थः॥ सूत्रं व्याचष्टे॥ अपि चेति॥ अनुभयस्वभावत्वे नैमित्तिकप्रवृत्तिर्वा व्यानिमित्त
त्वकालादृष्टादिकं नित्यसंनिहितमिति नित्यमेव प्रवृत्तिप्रसंगः॥ तस्यानिमित्तत्वे प्रवृत्त्यभाव इत्यर्थः॥ किंच परमाणवः सावयवाः कारणवं
तः कारणापेक्षया स्थूला अनित्याश्च रूपवत्वात् तद्वदेव सत्वात् गंधवत्वात् स्पर्शवत्वात् घटवदिति सूत्रं योजयितुं परप्राप्तिं यु
माह॥ सावयवा नामि सादिना॥ नन्वत्र परमाणुत्वं पक्षतावच्छेदकं तद्विरुद्धं स्थूलत्वं कथं साध्यते तत्रेति चेन्न वायुत्वतेजस्त्वादेः
पृथगवच्छेदकत्वान्न चाप्रयोजकता कारणमन्यत्वे नित्यत्वे चात्मवद्रूपादिमत्वायोगान्न च तर्हि वायुः कारणवानिति पृथक्सा
ध्याने रूपादिहेतूनां भागासिद्ध्यभावेपि सिद्धसाधनता स्यादिति वाच्यं॥ यत्र स्पर्शस्तत् सकारणं यत्र रूपं तत् सकारणमिति व्या
प्तिग्रहकाले वायुत्वाद्यवच्छेदेन साध्यसिद्ध्यभावादिति भावः॥ परमाणवो नित्याः सत्वे सत्यकारणवत्वादात्मवदिति सत्प्रतिपक्षमु
त्थाप्य विरोध्यासिद्ध्या दूषयति॥ यच्च नित्यत्वमिति॥ सत्वं भावत्वं प्रागभावनिरासार्थं नित्यत्वप्रतिषेधः सप्रतियोगिकः॥ अभावत्वा
त् पटवदिति नित्यत्वस्य क्वचित् सिद्धौ कार्यमौषधमिति विशेषतः कार्ये नित्यत्वप्रतिषेधात् कारणभूतपरमाणुषु नित्यत्वं सिध्यति॥ अन्योन्यप्रतियो
ग्यभावप्रतिषेधानुपपत्तेरिति काणादोक्तमनूद्यान्यथासिद्ध्या दूषयति॥ यदपीति॥ कार्ये नित्यत्वप्रतिषेधव्यवहारमंगीकृत्य ब्रह्मणि

ने

म

८.१.५७२

नि

ग.भा.टी.८ | द्वि.प्र.

२२

तियोगिप्रसिद्धिरुक्ता॥ वस्तुतस्तु विशेषव्यवहार एवं सिद्धः कारणनिरासस्य प्रमाणांतरेण ज्ञानं विना कार्यमनिरूपितिव्यवहारयोगादित्सा
ह॥ न च शब्देति॥ यदि प्रमाणांतरं कारणनिरासे स्यात्तदा पूर्वव्यवहारः सम्यक्त्वं भवति॥ ततो मूलज्ञानात्प्राग्व्यवहारमात्रात्र वस्तुसिद्धिः॥ वटे
यक्षव्यवहारादपि तत्सिद्धिप्रसंगात् मूलज्ञानेनतु तेनैव विशेषसिद्धे व्यवहारोपन्यासवैयर्थ्यमिति भावः॥ एवं परमाणुनिरासे काणादसूत्रद्वयं नि
रस्य तृतीयं निरस्यति॥ यदपीति॥ सतां मणूनां दृश्यमानस्थूलकार्याणां प्रसक्षेण कारणाज्ञानमविद्येति यदि सूत्रार्थः तर्हि प्रसक्षकारणत्वे
निरासे हेतुः स्यात्तत्र द्व्यणुके व्यभिचारादित्यर्थः॥ यद्यारंभकद्रव्यशून्यत्वं हेतुविशेषणं तदा विशेष्यवैयर्थ्यमापद्येत पुनरुक्तिश्चेत्याह॥
अथेत्यादिना॥ परमाणवो निरासाः नाशकानुपलंभादात्मवदिति सूत्रार्थमाशंकते॥ अपापीति॥ तत्त्वाद्यवयवानां विभागान्नो
शाद्वा पटादिनाशो दृष्टः॥ तच्च द्वयं निरवयवाणूनां नास्तीति नित्यत्वमित्यर्थः॥ परिणामवादमाश्रित्याणूनां नाशकं किंचित्संभव
तीति परिहरति॥ अवयवानां संयोगेन द्रव्यांतरोत्पत्तिरारंभ इति यदि मतं स्यात्तदा द्रव्यविनाशो द्वाभ्यामेवेति नियमः स्यान्नारंभे मानम
त्ति संयुक्तं लन्यपटादर्शनादतः कारणमेव स्वतो निर्विशेषं विशेषवदवस्थासना कार्यमिति सनुभवबलादास्थेयं तथा चाणूनामप्यविघ्नापरि
णामरूपाणां प्रलयनिमित्तेन कालादिनापिंडात्मकस्वरूपतिरोभावेन कारणभावापत्तिर्विनाश उपपद्यते॥ यथाग्निसंपर्काल्लघृतकाठिन्यमवय
वसंयोगस्यावयवानां च नाशं विनैव विलीयते तद्वन्न च काठिन्यस्य संयोगविशेषत्वेन गुणत्वात्॥ द्रव्यनाशोनुदाहरणमिति शंक्यं॥ गुणवद्द्रव्य
स्यापि कुतश्चिद्विनाशसंशो नोदाहरणात् गुणपरिभाषायाश्चातंत्रत्वात् वस्तुतस्तु घृतं कठिनं द्रव्यमिति सनुभूयत घृतपरिणामविशेषो द्रव्यत्वे
पि अवयवविभागादेव तस्य नाश इति वाच्यं॥ घृतस्य परिणामिन एकत्वेन विभागासंभवात् परमाणुकाठिन्यनाशे तदसंभवाच्चेति भावः॥
किंच प्रलये नासीद्यो नान्यत् किंचनेत्यणूनां नाशसिद्धिस्तस्मात्तेषां परमकारणत्वमित्युपसंहरति॥ तस्मादिति॥ यद्यस्मादधिकगु
णवत्तत्तस्मात्स्थूलमिति व्याप्तिमुक्ताविकल्पयति॥ तद्वदिति॥ पार्थिवः परमाणुः अधिकगुणस्तत एकैकन्यूनगुणा जलादिपरमा
णव इति कल्प्यते नवा आद्ये दोषमाह॥ कल्प्यमान इति मूर्तरूपचयात्॥ स्थौल्यात् इत्यर्थः॥ पार्थिवोणुराप्यात्स्थूलं भवेदधि
कगुणत्वात् घटवदित्येवं प्रयोक्तव्यः॥ अप्रयोजकत्वं निरस्यति नैर्वंतर्येणेति॥ दृष्टविरोधः स्यादिति भावः॥ नेति पक्षे सर्वेषां
अणूनां साम्यस्य मेकैकगुणत्वं वा स्याच्चतुर्गुणत्वं वा उभयथापि दोषमाह॥ अकल्प्यमान इत्यादिना॥ न केवलमणुवा
दस्यायुक्तत्वादुपेक्षा किंतु निःशेषबहिष्कृतत्वात् ग्रंथतो धृतश्चाग्राह्यत्वमित्याह॥ अपरिग्रहाच्चेति॥ चकारार्थं प्रपंचयितु

नेति

द्र न

२

मुपक्रमते ॥ अपि चेति ॥ अत्यंतभेदज्ञापकमाह ॥ भिन्नलक्षणानीति ॥ द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वजातयो लक्षणानि गु
णाश्रयत्वाद्युपाधयो वा निर्गुणत्वे सति जातिमत्क्रियात्वं गुणलक्षणं संयोगविभागयोर्निरपेक्षकारणं कर्म नित्यमेकमनेकस
मवेतं सामान्यं नित्यद्रव्यवृत्तयो विशेषाः नित्यसंबंधः समवायः इति भिन्नानि लक्षणानि ॥ तैर्मिथोऽत्यंतभेदसिद्धिरित्यर्थः ॥ त
थात्वमसंगतं भिन्नत्वं ॥ तेन विरुद्धयोर्धर्मधर्मिभावः ॥ गुणादयो न द्रव्यधर्माः स्युः ततोऽत्यंतभिन्नत्वात् शशकुशादिवदित्यर्थः ॥ भेदे बाधक
मुपन्यस्याभेदमाह ॥ अथ पृथक्त्वतीति ॥ गुणादिषु तदधीनत्वं तावदन्वयव्यतिरेकसिद्धं ॥ तथा च गुणादयो द्रव्याभिन्नाः द्रव्याधीनत्वात् ॥ यद्य
स्मात् भिन्नं तन्न तदधीनं शशाभिन्नः कुश इत्यर्थः ॥ अभेदे द्रव्यं गुण इति शब्दप्रसंगे भेदः कथं तत्राह ॥ कल्पितभेदोऽप्यस्तीति साशयः ॥ अन्य
थात्यंतभेदवदत्यंताभेदेऽपि धर्मधर्मित्वायोगादिति मंतव्यं ॥ अस्तु गुणादीनां द्रव्यतादात्म्यमितिवदंतं तार्किकंमन्यं प्रत्याह ॥ तथा सतीति ॥ द्रव्या
सांख्यो न्वेदांतीत्याशयः ॥ यद्वा कापिलस्यापि तादात्म्यसिद्धांत इति सांख्यग्रहणं ॥ पदर्पितदधीनत्वं तत्प्रमेत्वं तच्च धूमे नास्ति ॥ अग्निं विना
-चा पि भावात्तथापि तत्कोर्प त्वं तदधीनत्वं मत्वा व्यभिचारं शंकते ॥ नन्विति ॥ कार्यत्वमन्यत्वं चांगीकरोति ॥ सत्यमिति ॥ तथापि तादात्म्येन
प्रतीयमानस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याशयः ॥ अस्य हेतोरन्यथासिद्धिमाशंकते ॥ गुणादीनामिति ॥ गुणादीनां द्रव्येण
भेदाभावेऽपि अयुतसिद्धत्वेन तादात्म्यप्रतीतिसिद्धिरित्यर्थः ॥ दूषयितुं विकल्पयति ॥ तत्पुनरिति ॥ शौक्ल्यस्य पटनिष्ठत्वात् पटस्य
तंतुदेशत्वात् पटशौक्ल्ययोरपृथग्देशत्वाभावाच्छुक्लः पट इति सामानाधिकरण्यप्रतीतिर्न स्यादित्याद्यं दूषयति ॥ अपृथग्देश
त्व इति ॥ काद्दणो स्तत्रद्रूपं व्याचष्टे ॥ तत्त्वतो हीति ॥ स्वभावोक्तिः स्वरूपं तस्यापृथक्त्वे स्वादिष्टाभेदसिद्धिरित्याह ॥ अपृथक्स्वभावत्व
इति ॥ अभेदे युक्तिमाह ॥ तस्येति ॥ गुणस्येत्यर्थः ॥ एवं षट्पदार्थाः अत्यंतभिन्ना इति सिद्धांतोऽनुभवविरोधेन दूषितः ॥ सिद्धांतांतरं
दूषयति ॥ युतेति ॥ अयुतसिद्धत्वं किमुक्तयोरुतान्यतरस्य नाद्य इत्याह ॥ प्रागिति ॥ द्वितीयमाशंक्य दूषयति ॥ अथेत्यादिना ॥ कारणस्य पृथ
क्सिद्धत्वेऽपि कार्यस्य अपृथक्सिद्धमित्युक्तमुपेत्य संबंधोऽसिद्धस्यासिद्धस्येति वे विकल्प्य पिशाद्यं दूषयति पि वाद्वितीयं शंकते सिद्धस्त्वेति ॥ स
तोरप्राप्तयोः प्राप्तिः संयोग इत्यभ्युपगमात् तंतुपटयोरपि संयोगापत्तिरित्यपसिद्धांतः स्यादित्यर्थः ॥ सद्योजातपटस्य क्रियाभावात् कथं संयोग
स्तत्राह ॥ यथेति ॥ किं च संबंधस्यापि संबंधेऽनवस्थानादसंबद्धस्यानियामकत्वात् संबंधोऽपि दुर्निरूपः इत्याह ॥ नापीति ॥ संबंधः संबंधि

२३

भिन्नस्तद्विलक्षणशब्दधीगम्यत्वाद्वस्त्वंतरवदिति शंकते ॥ संबंधीति ॥ कल्पितभेदसाधने सिद्धसाध्यनता वस्तुभेदसाधने तु व्यभि-
चार इति समाधत्ते ॥ नैकत्वेपीति ॥ स्वरूपेणैव मनुष्यादिशब्दभागेव पुत्राद्यपेक्षया पितेत्यादिविलक्षणशब्दधीगम्यो भवती ॥ न
चाभिधत इति व्यभिचार इत्यर्थः ॥ फलितमाह ॥ इत्युपलब्धीति ॥ विलक्षणशब्दधीगम्यत्वादित्युपलब्धिघटितेन लक्षणेन
लिंगेन प्राप्तस्य वस्तुतस्तस्य संयोगादेः संबंधिव्यतिरेकेणानुपलब्धेरभावो निश्चीयत इत्यर्थः ॥ नह्यंगुलिद्वयस्य नैरंतर्यातिरेके-
ण संयोगउपलभ्यते समवायस्तु न कस्यापि कचिदप्यनुभवमारोहतीति भावः संबंधस्य संबंध्यभेदे संबंधिनः सदासत्त्वात्सर्व-
दा संबंधबुद्धिप्रसंग इति शंकां निषेधति ॥ नापीति ॥ परापेक्षया नैरंतर्यावस्थायामंगुल्योरूपरूपिणोश्च संबंधधीर्नेष्यत इत्यु-
क्तमित्यर्थः ॥ पूर्वं परमाण्वोः संयोगनिरासेन द्व्यणुकादिसृष्टिर्निरस्ता ॥ संप्रत्यदृष्टवदात्मनाणूनां संयोगोणुबुद्धिपाहेतुराद्यमन-
सोः संयोगो बुध्याद्यसमवायिकारणं निरस्यते ॥ तथाण्वात्मेति ॥ निरस्तमपि कल्पितप्रदेशपक्षमतिप्रसंगाख्यदोषांतरेण स्फुटं पु-
नरुद्भावयति ॥ कल्पिता इति ॥ कल्पनमूहः ॥ ऊहितार्थाः संतो संतो वाद्वितीयेन संयोगसिद्धिः स्वस्वाभावयोरेकत्र व्यवस्थाछेदकाः सत्वा-
दाद्येतदूहमात्रेण सर्वार्थसिद्धिप्रसंगः ऊहस्य स्वाधीनत्वात्प्रत्यक्षत्वं निरवधित्वं तत्संभवात्चेत्यर्थः ॥ यद्यूहात्सर्वसिद्धिः तदा पदार्थ-
बंधमुक्तिनियमा लुप्येरन्निति स्याह ॥ नचेत्यादिना ॥ संयोगं दूषयित्वा समवायं दूषयति ॥ किंचान्यदिति ॥ तन्मते दूषणांतरमुच्यत इत्यर्थः ॥
संश्लेषः संग्रहः ॥ यतएकाकर्षणे नापराकर्षणं तस्यानुपपत्तिरित्यर्थः ॥ द्व्यणुकं निरवयवासमेतं सावयवं वा शंकां नाशे संभवेत्तत्त्वमिति वदि-
ति भावः ॥ ननु द्व्यणुकस्यासमवेतत्वे तदाश्रितत्वं न स्यात् संबंधं विना तदयोगात् ॥ न च संयोगादाश्रितत्वं कार्यद्रव्यस्य प्रत्यक्षसंयोगादि-
ति शंकते ॥ कार्येति ॥ प्रकृतिविकारयोरभेदाश्रयाश्रयित्वानुपपत्तिरिष्टेति परिहरति ॥ नेति ॥ भेदात्तद्भाव इति वदंतं प्रत्याह ॥ इतरेतराश्र-
यत्वादिति ॥ कथं तर्हि कार्यस्य कारणाश्रितत्वव्यवहारः कल्पितभेदादित्याह ॥ कारणस्यैवेति ॥ परमाणूनां निरवयवत्वमप्युक्तं मित्याह ॥ किंचेति ॥
परमाणवः सावयवाः अल्पत्वात् ॥ घटवद्दिक्पक्षे तेषां दिग्भेदावधित्वं न स्यादात्मवदित्यर्थः ॥ ननु परमाण्वपेक्षया यैयं प्राचीदक्षिणेत्यादिदि-
ग्भेदव्यवहारस्तदवधित्वेनयेवयवास्तथयोच्यंते त एव मम परमाणवस्तेपि सावयवाश्चेत्तदवयवा एवेत्येवं यतः परं न विभागः स एव निरवय-
वः परमाणुरिति शंकते ॥ यांस्त्वमिति ॥ परिहरति ॥ स्यादेति ॥ अयमर्थः ॥ यत्सर्वात्मनाविभागायोग्यं वस्तु स परमाणुरितियद्युच्यते त-
र्हि ब्रह्मणएव परमाणुसंज्ञा स्यात् तस्यान्यस्याल्पस्य दिग्विभागार्हत्वेनावयवविभागावधिरूपं भावात् यदि दृष्टिवियदादिजातीयोल्प

न ण५ यु५

परिमाणविश्रांतिभूमिर्यः स परमाणुरित्युच्येत तर्हि तस्य न महत्कारणत्वं विना विशेषात्त्वात् घटवत् नेहत्वसिद्धिः अणवो विनाशिनः पृथिव्यादिज्ञा
तीयत्वात् घटवदिति साधनादिति ॥ संप्रति निरवयवद्रव्यस्य नाशहेत्वभावाद् आत्मवदविनाश इत्याशंकस्य पूर्वोक्तं परिहारं स्मारयति ॥
विनश्यंत इत्यादिना ॥ आत्मातिरिक्तस्य आज्ञानिकत्वाद्द्रव्यस्य निरवयवत्वमसिद्धं निमित्तनाशादिना नाशात् विनाशः प्रलये प्रलये संभव
ति ॥ मुक्तौ ज्ञानाद् ज्ञाननाशोत्पत्ती पाणुनाशासंभव इति भावः ॥ यदुक्तं प्रत्कार्यद्रव्यं तत् संयोगसचिवानेकद्रव्यारब्धमिति तत्रेत्याह ॥
तथा कार्यारंभोपीति ॥ केवल्यप्राधान्यं कार्यद्रव्यारंभे तावपि हेतुत्वात् संयोगस्यैकशरीरारंभकसंयोगात् दध्यारंभके न संयोगांतरं तथा च
दध्यादौ व्यभिचारान्न व्याप्तिरित्यर्थः ॥ किं च यत् कार्यद्रव्यं तत्तद्व्यारब्धमिति च व्याप्तिरस्तु लाघवात् ननु संयोगसचिवस्वन्यूनपरिमा
णानेकद्रव्यारब्धमिति गौरवात् दीर्घविस्तृतदुकूलारब्धरज्जौ न्यूनपरिमाणारब्धव्यभिचाराच्च ॥ न च रज्जुर्न द्रव्यांतरमिति वाच्यं ॥ अव
यविमात्रे विप्रलापात् ॥ किं च निरवयवद्रव्यत्वस्यैकाप्रवृत्तित्वे लाघवान्निरवयवानेकाणुसिद्धिः ॥ यत्त्वणुत्वतारतम्यविश्रांतिभूमि
त्वेन तत्सिद्धिरिति ॥ तन्न ॥ त्र्यणुक एवोत्कृष्टविश्रांतेः ॥ न च तत एव तद्विनामानेजगद्बलवदिति वाच्यं ॥ पृथिवीत्वादिना साव
यवत्वानित्यत्वयोरनुमानात्र चावयवत्वस्य क्वचिद्विश्रांतो परमाणुसिद्धिः अविश्रांतावनवस्थेति वाच्यं ॥ मायायां ब्रह्मणि
वावयवत्वविश्रांतिसंभवात् नो न किंचिदणुसद्भावे प्रमाणं निरवयवानां संयोगसमवाययोरसंभवात् समवेतद्व्यणुका
द्यारंभकत्वायोग इत्यादिबाधकमुक्तमेव ॥ संप्रत्युपरितनवाक्यशेषं प्रस्तुतयन्नधिकरणार्थमुपसंहरति ॥ तदेवमि
ति ॥ तस्माल्लक्षांतिभूतले न वैशेषिकमतेन वेदांततात्पर्यस्याविरोध इति सिद्धं ॥ वैशेषिकं निरस्य वैनाशिकं निरस्यति ॥ समुदाय इ
ति ॥ परिमाणभेदेन देहादेहांतरविनाशांगीकारादर्धवैनाशिको वैशेषिकः ॥ तस्य निरासानंतरं सर्वक्षणिकवादी बुद्धिस्थेय निरस्यत
इति प्रसंगसंगतिमाह ॥ वैशेषिकेति ॥ नाभाव उपलब्धेरिति ॥ निरसनीयसिद्धांतादन्न निरस्यसिद्धांतस्य भेदं वक्तुं तत्सिद्धांतं विभजते ॥ स चेति ॥
ननु सुगतप्रोक्तागमस्यैक्यात् कुतो बहुप्रकारतात आह ॥ प्रतिपत्तीति ॥ एकस्यैवागमस्य व्याख्यातुः शिष्यस्यावस्थाभेदेन बुद्धिभेदात् बहुप्रकारतेत्य
र्थः ॥ तानेव प्रकारानाह ॥ तत्रेति ॥ सौत्रांतिको वैभाषिको योगाचारो माध्यमिकश्चेति चत्वारः शिष्यास्तेषां यथा बाह्यार्थानां परोक्षत्वापरोक्षत्व
विवादेप्यस्तित्वे संप्रतिपत्तेस्तयोः सिद्धांतमेकीकृत्य निरस्यत इत्याह ॥ तत्र ये सर्वास्तित्वेति ॥ भूतं भौतिकं बाह्यं चित्तं चैत्तं च कामाद्यांतरमिति विभा
गः ॥ तत्र संदिह्यते किं मानमूलोयं भ्रांतिमूलो वा पंसिद्धांत इति ॥ तत्र मानमूल इति पूर्वपक्षयन् सिद्धांततेदीयं दर्शयति ॥ तत्र भूतमिति ॥ ७ ॥ ६ ॥

रा

श्री

मंदमध्यमो नमः चे । रा
मेदात ✓

भा॰भा॰टि॰ टी॰

२४

वी॰

स्थिरः प्रपंचो ब्रह्महेतुक इति वेदांतसिद्धांतस्य मानम् । क्षणिकसिद्धांतविरोधादसिद्धिः पूर्वपक्षफलं सिद्धांते तदविरोध इति ज्ञेयं ॥ पृथिव्या
दितत्त्वचतुष्टयं विषयेंद्रियात्मकं भौतिकं च परमाणुसमुदाय एव नावयव्यंतरमिति मत्वा परमाणून् विभजते ॥ चतुष्टये चेति ॥ चतुर्वि
धा इत्यर्थः ॥ खरः कठिनः तत्स्वभावाः पार्थिवाः परमाणवः स्निग्धाः आप्याः उष्णास्तैजसाः ईरणं चलनं स्वभावो वायवीयानामिति बाह्य
समुदायमुक्त्वाध्यात्मिकसमुदायमाह ॥ तथेति ॥ सविषयेंद्रियाणि रूपस्कंधः विषयाणां बाह्यत्वेपि देहस्थेंद्रियग्राह्यत्वादाध्यात्मिक
त्वं ॥ अहमहमित्यालयविज्ञानप्रवाहो विज्ञानस्कंधः ॥ सुखाद्यनुभवो वेदनास्कंधः ॥ गौरश्व इत्येवं नामविशिष्टः सविकल्पप्रत्ययः
संज्ञास्कंधः ॥ रागद्वेषमोहधर्माधर्माः संस्कारस्कंधः तत्र विज्ञानस्कंध आत्मेत्यभिमानात्तेति गीयते ॥ अन्ये चत्वारः स्कंधाश्चैत्ताः तेषां संघातः
आध्यात्मिकः सकललोकयात्रानिर्वाहक इत्यर्थः ॥ अवयवातिरिक्तावयव्यनुपलब्धेरवयवाः स्कंध्यंते ॥ यत्सत्तत्क्षणिकं
यथा विद्युदिति तेषां क्षणिकत्वमिति मानम् । ठायंसिद्धांत इति प्राप्ते सिद्धांतसूत्रं योजयति ॥ योयमिति ॥ सगोदोपरमाणूनां
स्कंधानां च स्वतः संघातस्तावन्न संभवति ॥ अचेतनत्वात् ॥ नापि चित्ताख्यमपि ज्वलनं विज्ञानं समुदायहेतुः संघाते
देहाकारे जाते विज्ञानं विज्ञाने जाते संघात इत्यन्योन्याश्रयात् न च क्षणिकविज्ञानादन्यः कश्चिज्जीव ईश्वरो वा त्वयाभ्युप
गम्यते यः संघातकर्त्ता भवेत् न च कर्त्तारमनपेक्ष्याणवः स्कंधाश्च स्वयमेव संघातार्थं प्रवर्त्तेरन् इति वाच्यं ॥ अनिरोधस्ये
ति ॥ आनैरंतर्ये सिद्धे रागादय इत्यालयसंतानः स किं संतानिभ्यो विज्ञानेभ्योन्य अनन्यो वा आद्येपि स्थिरः क्षणिको वा ॥ ना
द्यः ॥ अस्मदिष्टनित्यात्मवादप्रसंगात् ॥ द्वितीये दोषमाह ॥ क्षणिकत्वेति ॥ क्षणिकस्य जन्मातिरिक्तव्यापारो नास्ति ॥ तस्मात्त
स्य परमाण्वादिमेलनार्थप्रवृत्तिरनुपपन्ना क्षणिकत्वव्याघातादित्यर्थः ॥ एतेनानन्यः संतान इति पक्षो निरस्तः क्षणिक
स्य मेलकत्वानुपपत्तेः तस्मात् संहंतुरसत्त्वात् संघातानुपपत्तिरित्यर्थः ॥ संहंतुरभावेपि संघातोपपत्तिमाशंक्य निषेधति ॥ इ
तरेति ॥ कार्यं प्रत्ययते गच्छतीति प्रत्ययः कारणं ॥ अविद्यादिभिरेवार्थात् संघातसिद्धे व्यवहारोपपत्तिरित्यर्थः ॥ अविद्यादीना
ह ॥ क्षणिकेषु स्थिरत्वबुद्धिरविद्या ततो रागद्वेषमोहाः संस्कारा भवंति तेभ्यो गर्भस्थस्याद्यं विज्ञानमुत्पद्यते तस्माच्चालयविज्ञा
नात् पृथिव्यादिचतुष्टयं नामाश्रयत्वान्नाम भवति ॥ ततो रूपं सितासितात्मकं शुक्लशोणितं निष्पद्यते गर्भस्थकललबुद्बुदा

ने चेति

भानिर्मोक्षप्रसंगात् । नन्वालयविज्ञानसं
संहंतास्ति । यत आह ८

२४

वस्था नामरूपशब्दार्थ इति निष्कर्षः ॥ विज्ञानं पृथिव्यादिचतुष्टयं रूपं चेति षडायतनानि यस्येन्द्रियजातस्य तत् षडायतनं ॥ नामरूपेन्द्रि-
याणां मिथः संयोगः स्पर्शः ॥ ततः सुखादिका वेदना ॥ तया पुनः विषयतृष्णा तया प्रवृत्तिरूपादानं ॥ तेन भवत्यस्माज्जन्मेति भ-
वो धर्मादिः ततो जातिर्देहजन्म पंचस्कन्धसमुदाय इति यावत् ॥ जातानां स्कन्धानां परिपाको जरा ॥ स्कन्धनाशो मरणं ॥ म्रियमाण-
स्य पुत्रादिस्नेहादन्तर्दाहः शोकः ॥ तेन हा पुत्रेत्यादिप्रलापः परिदेवना ॥ अनिष्टानुभवो दुःखं ॥ तेन दुर्मनस्ता मानसी व्यथा
इति शब्दो मानावमानादिक्लेशसंग्रहार्थः ॥ न केवलं सुगतानामेवाविद्यादयः संमताः किंतु सर्ववादिनामपीत्याह ॥ सर्वेषा-
मिति ॥ अविद्यादिहेतुका जन्मादयो जन्मादिहेतुकाश्चाविद्यादय इति मिथो हेतुहेतुमद्भावाद् घटीयन्त्रवत् संघातसिद्धिरिति शंकामु-
पसंहरति ॥ तदेवमिति ॥ सिद्धान्तभागं व्याचष्टे ॥ तत्रेति ॥ अविद्यादीनामुत्तरोत्तरहेतुत्वमंगीकृत्य संघातहेत्वभावात् संघातो न
स्यादिति सूत्रे प्रवेशं स्मारयति ॥ नन्विति ॥ किमविद्यादयः संघातस्य गमका उतोत्पादका इति विकल्प्याद्ये संघातस्योत्पा-
दकं किंचिद्वाच्यं तन्नास्तीत्याह ॥ अत्रोच्यते ॥ यदीति ॥ आश्रयाश्रयिभूतेष्विति भोक्तृविशेषणं अदृष्टाश्रयेष्वित्यर्थः ॥ य-
द्यस्थिरेष्वणुषु संघातयोग्येषु कर्तृषु चादृष्टसहायेषु सत्सु ज्ञानाभावमात्रेण संहतिकर्त्रयोगात् संघातापत्तेर्निमित्तं ना-
स्तीत्युक्तं तद्दाक्षिणिकपक्षे तन्नास्तीति किमु वक्तव्यमित्याह ॥ किमिति ॥ आशयाश्रयः संघातकर्त्ता तच्छून्येष्वित्यर्थः ॥ आश्र-
याश्रयिशून्येष्विति पाठे उपकार्योपकारकत्वशून्येष्वित्यर्थः ॥ द्वितीयं शंकते ॥ अथापीति ॥ संघातस्याविद्यादीनां चोत्प-
त्तौ अन्योन्याश्रयः स्यादिति दूषयति ॥ कथमिति ॥ स्वाभाविकः खल्वयं संघातानां हेतुहेतुमद्भावेन प्रवाहो संहन्तारमपेक्षते ॥ न
पूर्वसंघाताश्रया अविद्यादय उत्तरसंघातप्रवर्तका इति नान्योन्याश्रयदोषोपीत्याशंकते ॥ अयमन्यस इति ॥ स्वभावस्यानि-
यमानियमयोरपसिद्धान्तापातः स्यादिति परिहारार्थः ॥ पूर्यते गलति चेति पुद्गलो देहः ॥ किं च भोक्तुः क्षणिकत्वपक्षे भोगा-
पवर्गव्यवहारोपि दुर्घट इत्याह ॥ अपि चेति ॥ यो यदिच्छति स तत्काले नास्ति चेदिच्छा व्यर्था अस्ति चेत् क्षणिकत्वभंग इत्यर्थः ॥ प्र-
कृतं संघातनिरासमुपसंहरति ॥ तस्मादिति ॥ द्विविधो हि कार्यसमुत्पादः सुगतसंमतः हेत्वधीनः कारणसमुदायाधीनश्चेति ॥
तत्राविद्यातः संस्कारस्ततो विज्ञानमित्येवंरूपः प्रथमः पृथिव्यादिसमुदायात् काय इत्येवं द्वितीयः ॥ तत्राद्यमंगीकृत्य द्वितीयः सं-
घातकर्त्रभावेन दूषितः ॥ संप्रत्याद्यं दूषयति सूत्रकारः ॥ उत्तरेति ॥ क्षणिकोर्थः क्षणस्तेनुच्यते निरु[illegible]च्यमानत्वं विनाशाकसान्नि

सति २

ध्यं निरूढत्वमतीतत्वं ॥ ननु कार्यकाले विनाशाव्याप्तत्वेपि पूर्वक्षणे सत्त्वात् क्षणिकार्थस्य हेतुत्वमक्षतमिति शंकते ॥ अथ भावे
ति ॥ सद्रूपइत्यर्थः ॥ किं हेतोरुत्पत्तिरिक्तः कार्योत्पादनाख्यो व्यापारः अनतिरिक्तो वा नाद्य इत्युक्तो द्वितीयं शंकते ॥ अथे
ति ॥ भावउत्पत्तिः ॥ उक्तं हि ॥ भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते इति येषां क्षणिकभावानां या भूतिः सैव क्रिया कारकं
चेत्यर्थः ॥ नष्टस्यापि निमित्तत्वं स्यान्नोपादानत्वं ॥ तथा च मृदादेर्घटादिकालासत्त्वेपि घटाद्यनुत्पत्तिः सत्त्वे च क्ष
णिकत्वहानिरिति परिहरन्ति ॥ तथापीत्यादिना ॥ प्रथमपक्षोक्तं दोषं [illegible] दूषयति ॥ विनैवेति ॥ वस्तुनो जन्मध्वंसानिरूपणा
च्च नक्षणिकत्वमित्याह ॥ अपि चेति ॥ तयोः स्वरूपत्वे वस्तुन्यंतर्भावात् वस्तुनो नाद्यनंतत्वमित्यपि दूषयंत्यं ॥ द्वितीयं शं
कते ॥ अथास्तीति ॥ विशेषमेवाह ॥ उत्पादेति ॥ दूषयत्येवमिति ॥ ताभ्यां संसर्गे वस्तुनः क्षणिकत्वभंगः स्यात् ॥ संस
र्ग एव नास्तीति तृतीयकल्पमुत्थाप्य दूषयति ॥ अथांत्यतेति ॥ सूत्रं व्याख्यातुं वृत्तं स्मारयति ॥ क्षणभंगेति ॥ किं कार्यो
त्पत्तिर्निर्हेतुका सहेतुका वा आद्ये प्रतिज्ञाहानिरित्याह ॥ अथासत्वे सेवेत्यादिना ॥ विषयकरणसहकारिसंस्काराश्च
तुर्विधा हेतवस्तान् प्रतीत्य प्राप्य चित्तरूपादि विज्ञानं चेतना चित्तालेको सुखादयश्च जायंत इति प्रतीत्यार्थः ॥ यथा
नीलविज्ञानस्य नीलं च वस्त्वालंबनप्रत्ययो विषयः ॥ चक्षुः करणमधिपतिप्रत्ययः ॥ सहकारिप्रत्यय आलोकः ॥ स
मनंतरपूर्वप्रत्ययः संस्कार इति भेदः ॥ प्रतिज्ञाहानिं पुरुषदोषमुक्त्वा वस्तुदोषमाह ॥ निर्हेतुकायां चेति ॥ सहेतुक
त्वपक्षे न्वयिकारणस्य मृदादेः कार्यसहभावापत्त्या क्षणिकत्वप्रतिज्ञाहानिरिति ॥ सूत्रशेषं व्याचष्टे ॥ अथोत्तरक्ष
णेत्यादिना ॥ सम्यक् क्रियंत इति संस्काराः आद्यंतवंतो भावा इत्यर्थः ॥ एवमाद्यसूत्राभ्यां समुदायो निरस्तः उत्त
रसूत्राभ्यां कार्यकारणक्षणिकत्वे निरस्ते संप्रति तदभिमतं द्विविधं विनाशं दूषयति ॥ प्रतिसंख्येति ॥ संस्कृतम
साध्यं बुद्धिबोध्यं प्रमेयमात्रं त्रयात् तुच्छरूपादन्यदित्यर्थः ॥ किं तत्त्रयं तदाह ॥ तदपीति ॥ निरूपाख्यो निःस्वरूपं प्रतीतिं
पासंख्या संतं भावमसंतं करोमीत्येवंरूपा संख्याबुद्धिः प्रतिसंख्या तया निरोधः कस्यचित् भावस्य भवति ॥ अबुद्धिपूर्व
कस्तु संतानाशो द्वितीयः ॥ स्वरसभंगुराणामित्याह ॥ विपरीत इति परप्रक्रियामुक्त्वा सूत्रं व्याचष्टे ॥

ख्या

२५

भाग ३

तेषामिति॥भावाः संतानिनः संतानो नाम भावानां हेतुफलभावेन प्रवाहस्तस्मिन् संताने चरमक्षणः क्षणांतरं करोति वा
न वा॥आद्ये चरमत्वव्याघातः संतानाविच्छेदात्॥द्वितीये चरमस्यासत्वप्रसंगः॥अर्थक्रियाकारित्वं सत्वमिति त्वत्सिद्धां
ताच्चरमस्यासत्वे पूर्वेषामप्यसत्वप्रसंगः॥अर्थक्रियाशून्यत्वात्॥तस्मात् संतानस्याविच्छेदासंभवान्निरोधाप्राप्तिरि
त्याह॥न तावदिति॥न द्वितीय इत्याह॥नापीति॥घटकपालचूर्णाद्यवस्थासु सेयं मृदिति प्रत्यभिज्ञानाद्दर्शनादन्वयिभावस्य
स्यां मृदादेर्नास्ति कविनाश इत्यर्थः॥बीजांकुरादिषु प्रत्यभिज्ञानादर्शनादन्वयिनो विच्छेद इत्यत आह॥अस्पष्टेति॥अंकुराद
न्व योनुस्यूतान्वयिभावस्था कार्यत्वात् घटवदित्यन्वयविच्छेदसिद्धिरित्यर्थः॥यस्मात् भावानां स्थायित्वं तस्मात्प्रतिक्षणनिरोधा
संभवस्तूपसंहारः॥अविद्यादीनां प्रतिसंख्यानिरोधं तदभिमतं दूषयति॥उभयथेति॥यमनियमादयः परिकराः सर्वं
दुःखं क्षणिकमिति भावनोपदेशो मार्गोपदेशः॥आगमप्रामाण्यादिति तत्राकाशस्य कार्यत्वोत्पत्त्याघटादिवद्वस्तुत्वं
प्रसिध्यतीत्यर्थः॥नन्वागमप्रामाण्ये विप्रतिपन्नान् सुगतान् प्रत्याकाशस्य वस्तुत्वं कथं सिध्यतीत्यत आह॥विप्रतिपन्नानि
ति॥शब्दो वस्तुनिष्ठः गुणत्वात् गंधादिवदित्यनुमानादाकाशस्य वस्तुत्वं सिध्यति पृथिव्याद्यष्टद्रव्याणां श्रोत्रग्राह्यगुण
त्रयत्वायोगादित्यर्थः॥आकाशस्याभावत्वं प्रत्याख्यायावर्वत्वं दूषयति॥अपि चेति॥यथैकघटसत्वेपि घटसामान्याभावे
नास्ति तथैकपक्षिसत्वेपि मूर्त्तद्रव्यसामान्याभावात्मकाकाशो नास्त्येवेति पक्ष्यंतरसंचारो न स्यादित्यर्थः॥देशविशे
षावच्छेदेनावरणाभावोस्तीत्याशंक्याभावावच्छेदकदेशविशेष एवाकाशो नाभाव इत्याह॥यत्रेत्यादिना॥पतिष्यति पक्षी
संचरिष्यतीत्यर्थः॥आकाशस्यावस्तुत्वं स्वग्रंथविरुद्धं चेत्याह॥अपि चेति॥किं सम्यक् निश्रय आश्रयो स्याद्इति किं
व सन्निश्रयाश्रवस्तुनः शशविषाणस्याश्रयत्वादर्शनादिति भावः॥व्याघातांतरमाह॥अपि चेति॥ध्वैसाप्रतियो
गितारव्या धर्मा निसत्वं नास ति संभवति धर्मिणो सत्व व्याघातादित्यर्थः॥आत्मनः क्षणिकत्वं दूषयति॥अनुस्मृतेरि
ति॥अनुभवजन्यास्मृतिरनुस्मृतिस्तस्या अनुभवसमानाश्रयत्वात् दुभयाश्रयात्मनः स्थायित्वमित्यर्थः॥क्षणिकत्वेदा
नद्यानुसंधानं च न स्यादित्याह॥कथं घहमिति॥पूर्वदर्शनकर्त्तुरद्राक्षमिति स्मरणकर्तैक्यप्रत्यभिज्ञानाच्चात्मनः स्थायित्वमि
त्याह॥अपि चेति॥योहमदः पूर्वमद्राक्षं स एवाहमद्य तत्स्मरामीति प्रत्यभिज्ञानाकारोद्दृष्टव्यः इदं पश्यामीति ज्ञानांतर

संबंध्यकथनं योहमद्राक्षं सोहं पश्यामीति प्रत्यभिज्ञानां तत्प्रयोतनार्थं विपक्षे बाधकमाह॥ यदीति॥ द्रष्टस्मर्त्रोर्भेदे हं स्म
रामि अन्यो द्राक्षीदिति प्रतीतिः स्यादित्यत्र दृष्टांतमाह॥ यत्रैवमिति॥ प्रत्ययमाह॥ स्मरामीति॥ स्मरामि अहमन्यो द्राक्षीदिति प्रत्य
यापत्त्या तत्र भिन्नमेव कर्त्तारं लोको वगच्छतीत्यविवादमि ~~त्यर्थः~~ त्यर्थः॥ प्रकृते तत्प्रत्यभिज्ञायां तादृशापादप्रत्ययस्य बाधकस्या
दर्शनात् आत्मनः स्थायित्वं दुर्वारमित्याह॥ इहत्वहमदइति॥ यथाग्नेः औष्ण्यादिकं न बाध्यते कश्चित् तथा नाहमद्राक्षमिति पूर्वद
र्शिनं न निकृंतद्रष्टत्वेन न बाधाभावात् प्रत्यभिज्ञा प्रमेत्युक्तं भवति॥ तथा द्रष्टस्मर्त्रोरैक्ये सति स्थायित्वं फलितमित्याह॥ तत्रैवं स
ती क्षणद्वयसंबंध्येप्यात्मनस्तीपूक्षणे भंगो स्थितिं वदंतं प्रत्याह॥ तथेति॥ वर्त्तमानदशामारभ्याऽत्तमाप्रा सादामरणादनं
तरामनंतरां स्वस्यैव प्रतिपत्तिमात्मैककर्तृकां प्रत्यभिजानन्नाजन्मनश्च वर्त्तमानदशापर्यंतं अतीताः प्रतिपत्तीः स्वकर्त्तृकाः
प्रतिसंदध्यानः सन्निति योजना॥ दीपज्वालादिवात्मनि प्रत्यभिज्ञानं सादृश्यदोषादिति शंकते॥ सदृति॥ सादृश्यज्ञानस्याप्य
र्थप्रतियोगिज्ञानाधीनत्वात् स्थिरस्य ज्ञातुरसत्वात् सादृश्यज्ञानं संभवति॥ सत्वे वापसिद्धांतः स्यादिति परिहरति॥ तमित्या
दिना॥ स्यादेतत् न सादृश्यप्रत्ययः पूर्वोत्तरवस्तुद्वयज्ञानजन्यस्तद्द्वयसादृश्यावगाहीति किं तर्हि कश्चिदेव विकल्पः स्वाका
रमेव बाह्यत्वेन विषयीकुर्वाणः क्षणांतरास्पर्शी अतो न स्थिरद्रष्टृपक्ष इति शंकते॥ तेनेदमिति॥ अत्र वक्तव्यं सादृश्यप्रत्यये
तेनेदं सदृशमिति वस्तुत्रयं भासते न वेति नेति वदतः स्वानुभवविरोधः॥ किं चार्थभेदाभावात् पदत्रयप्रयोगो न स्यात्॥
तस्मात् पदत्रयेण मिथः संसृष्टभिन्नार्थभानादभानमसिद्धमिति परिहरति॥ नतेनेति॥ अथ भासते वस्तुत्रयं तच्च प्रत्य
याभिन्नमेव न बाह्यमिति चेन्न त्रयाणामेकप्रत्ययाभेदे मिथोप्यभेदापत्तेः इष्टापत्तिरिति ब्रुवाणं विज्ञानवादिनं
प्रत्याह॥ यदा हीति॥ वस्तुत्रयं ज्ञेयं सादृश्यप्रत्ययाभिन्नं सर्वलोकप्रसिद्धत्वच्चेन्नांगीक्रियते स्थायिद्रष्टृप्रसंग
भयेन तर्हि तदाकाराणां क्षणिकविज्ञानानां मिथो वार्त्तीनभिन्नत्वादेकस्मिन् धर्मिणि विरुद्धानेकपक्षस्फुर
णात्मकविप्रतिपत्त्यसंभवात् स्वपक्षसाधनादिव्यवहारोनुपपन्न अतो यथानुभवं ज्ञानज्ञेयभेदोंगीकार्यः॥ त
था च तेनेदं सदृशमिति बाह्यार्थयोर्ज्ञानपूर्वकं सादृश्यं जानत आत्मनः स्थायित्वं दुर्वारमित्यर्थः॥ ननु संस्येव

ननु सः क्षणिकत्वलक्षणा निर्विकल्पकग्राह्याः सविकल्पाध्यवसेयास्तु स्थायित्वसादृश्यादयो बाह्याः कल्पिता अवसी
संते॥ अतो विप्रतिपत्त्यादि व्यवहार इति बौद्धार्थवादमाशंक्य निरस्यति॥ एवमेवेति॥ यत्प्रमाणसिद्धं तदेव वक्त
व्यं नहि क्षणिकत्वे किंचित्प्रमाणमस्ति॥ नचेदानीं घट इति प्रत्यक्षमवर्त्तमानकालावच्छिन्नं सत्वं घटस्य गोचरयद्व
र्त्तमानक्षणमात्रसत्वरूपे क्षणिकत्वेमानमिति वाच्यं॥ तस्य वर्त्तमानत्वमात्रगोचरत्वेन कालांतरासत्वासिद्धेः॥
नच यत्सत् तत् क्षणिकमिति व्याप्तिरस्ति विद्युदादेरपि द्वित्रिक्षणस्थायित्वेन दृष्टांताभावान्न च स्थायिन मनुमाना
रमंतरेणानुमानं संभवति॥ तस्मादनुमानसिद्धार्थवक्तातथागतो श्रद्धेयवचनत्वर्थः॥ किं च सादृश्यं प्रत्यभिज्ञा
यां दोषतया निमित्तं विषयतया वा॥ आद्ये स्वरूपं सत् ज्ञातं वा॥ नाद्यः मंदांधकारे शुक्तिमात्रग्रहेऽप्ये साज्ञानेपि रूप्याभेद
भ्रमापत्तेः॥ न द्वितीयः॥ स्थायिज्ञातारं विना तत् ज्ञानासंभवस्योक्तत्वात्॥ नापि विषयतया निमित्तमित्याह॥ नचेति॥ सोहमि
त्युल्लेखात् नाहं सदृश इत्युल्लेखादित्यर्थः॥ सोहमिति प्रत्यभिज्ञाया भ्रमत्वं निरस्य संशयत्वं निरस्यति॥ क्वचिदिति॥
जडार्थे प्रत्यभिज्ञातेपि वा ... संभावनया संशयः कादाचित्कः स्यान्नात्मनीत्यर्थः॥ असंदिग्धाविपर्यस्त प्रत्यभिज्ञाविरोधा
दात्म क्षणिकत्वमसंगतमित्युपसंहरति॥ तस्मादिति॥ अभावः शशविषाणवदसंतासन्निसंगी ... मृदादिना
शादसतो घटादिकं जायते सुगता वदंति तद्दूषयति॥ नासत इति॥ न केवलं ... उपद्यते किंतु स्वयं दर्शयंति च॥ हे
नैः प्रकृतार्थं गमयतः॥ मृदादिकं उपमृद्य घटादेः प्रादुर्भावादिति शंकमर्थमाह॥ विनष्टादिति॥ कारणनाशात् कार्यज
न्मेसत्युक्तिमाह॥ कूटस्थादिति॥ विनाशशून्यादित्यर्थः॥ निरस्यनिरतिशयस्य कार्यशक्तत्वेन तत्कार्याणि सर्वाण्येकस्मिन्ने
व क्षणे स्युस्तथाचोत्तरक्षणे कार्याभावादसत्वापत्तिः॥ नच सहकारिकृतातिशयक्रमात् कार्यक्रमइति युक्तं अतिशयस्या
तिशयांतरापेक्षायां अनवस्थानादनपेक्षायां कार्यस्याप्यतिशयानपेक्षत्वेन सहकारिवैयर्थ्यात्तु तस्मान्न स्थायिभावा
त्कार्यजन्मेत्यर्थः॥ क्षणिकभावस्य हेतुत्वमुत्तरोसादेचेत्यत्र निरस्तं॥ अभावस्य हेतुत्वनिरासार्थं सूत्रं व्याचष्टे॥ तत्रेदमिति॥

बुद्धः

सा

ध

तम

शा.भा.टि.२०

२८

यदि बीजाभावस्याभावांतराद्विशेषः स्यात्तदा विशेषवदभावाद्वारा बीजादेवांकुर इति लोकायतिकानामभ्युपगमोऽर्थवानुस्या
त्तेस्तोस्तीत्याह ॥ येनेति ॥ स्फुटं पोजयति ॥ निर्विशेषस्येति ॥ शशविषाणादेः कार्यकारित्वस्यादृष्टत्वात्तदभावस्यासतो हे
तुत्वमि[illegible]त्यर्थः ॥ अस्त्वभावस्यापि विशेष इत्यत आह ॥ यदीति ॥ अभावस्य हेतुत्वेति प्रसंग इति तर्कमुक्त्वानुमानमाह ॥
नापीति ॥ अभावो न हेतुरसत्वात् संमतवदित्यर्थः ॥ अभावो न प्रकृतिः कार्यानन्वितत्वाद्यथा शशरावा घटानन्वितस्तंतुर्न शरा
वादिप्रकृतिरिति तर्कपूर्वकं[illegible]माह ॥ अभावाच्चेति ॥ अतोऽन्वितत्वान्मृदादिर्भाव एव प्रकृतिरित्याह ॥ यदीति ॥ स्थायिनः कारण
त्वायोगमुक्तमनूद्य दूषयति ॥ यत्तूक्तमित्यादिना ॥ अनुभवबलात् स्थिरभावानामेव सहकारिसन्निधिक्रमेण कार्यक्रमहेतु
त्वमंगीकार्यं ॥ न च [illegible]शक्तस्य सहकार्यपेक्षा न युक्तेति वाच्यं ॥ यतो शक्तस्यानापेक्षे सदा सहकारिविघ्नं स्यात् ॥ ततः स्वतो
दोस्वतोतिशयश्चेन्ये[illegible]तापादि सहकारिकृतातिशयक्रमाद्बुचकादि कार्यक्रमः ॥ न चातिशयस्यातिशयांतरानपेक्ष
त्वे कार्यस्यानपेक्षेति वाच्यं ॥ घटस्य मृदनपेक्षत्वे कार्यत्वाविशेषात् पटस्यापि मृदनपेक्षाप्रसंगादन्वयव्यतिरेकाभ्या
मपेक्षा सहकारिष्वपि तुल्या ॥ यदुक्तं कार्याभावदशायां कारणस्यासत्वापत्तिरिति तन्न ॥ अकारणस्यापि बाध्या
भावेन सत्वोपपत्तेः ॥ न ह्यर्थक्रियाकारित्वमेव सत्वं असतस्तद्योगेन सत्वस्य ततो भेदात् सतो ह्यर्थक्रियाकारि
त्वं नासतः अतः कारणतावच्छेदकमबाधितस्वरूपात्मकं सत्वं कारणाद्भिन्नमेव तस्मादनुस्यूतस्थिरभावानां हे
तुत्वमुपपन्नमिति भावः ॥ पूर्वापरविरोधमप्याह ॥ अपि चेति ॥ अभावादुत्पत्तौ शशविषाणादप्युत्पत्तिः स्यादित्यु
क्तं ॥ अतिप्रसंगांतमाह ॥ उदासीनानामिति ॥ अनीहमानानां प्रयत्नशून्यानां अमत्रं घटादिपात्रं तच्चानस्य व्याप
रयतः ॥ तस्मात् ॥ भ्रांतिमूलेन क्षणिकबाह्यार्थवादेन कूटस्थनित्यब्रह्मसमन्वयस्य न विरोध इति सिद्धं ॥ नाभावउ
पलब्धेः ॥ अखंडनिर्विशेषब्रह्मविज्ञानं बाह्यार्थोपादानवद्वेदांतानां भिन्नं साकारं क्षणिकं विज्ञानं न ततोऽन्यो
र्थोऽस्तीति योगाचारमतेन विरुध्यते न वेति तन्मतस्यमानत्वांतिमूलत्वाभ्यां संशये पूर्वोक्तबाह्यार्थवादनिरासमु
पजीव्य पूर्वपक्षमाह ॥ एवमित्यादिना ॥ पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलं ॥ नन्वेकस्य सुगतागमस्य कथं बाह्या

द्वि.स्या.

भि

२८

र्थसत्त्वासत्त्वयोरस्त्वात्सर्वं विरोध्यादिस्यात्त्वं क्वाधिकारिभेदाद विरोध इति चेदत्र विज्ञानवादिनः सुगताभिप्रायज्ञा हि वे
न मंदाधिकारिभ्यो बाह्यार्थवादित्वं श्रेष्ठ्यमाह॥ केषांचिदिति॥ उक्तं च धर्मकीर्तिना॥ देशनालोकनाथानां स
त्त्वाशयवशानुगा इति सुगतानामुपदेशाः शिष्यमत्यनुसारिण इत्यर्थः॥ न च सति बाह्यार्थे मानमेयव्यवहारः क
थं तत्राह॥ तस्मिन्निति॥ विज्ञानमेव कल्पितनीलाद्याकारत्वेन प्रमेयमवभासात्मना मानं फलं॥ ज्ञात्त्यात्मना मा
नं ज्ञात्त्यात्मत्वाकारेण प्रमातेति भेदकल्पनया व्यवहार इत्यर्थः॥ मुख्य एव भेदः किं न स्यादत आह॥ स्वरूपेति॥
न हि बुध्यनारूढस्य नीलादेः प्रमेयत्वव्यवहारोऽस्ति॥ बुध्यारूढ आकार एव प्रमेयं न बाह्यमित्यर्थः॥ बाह्यार्थासत्त्वे प्र
माणपूर्वकं युक्तिरूपन्यस्यति॥ कथमिति सौदिना॥ ज्ञेयं ज्ञानातिरिक्तेन सत् तदतिरिक्तेनासंभवात् नरशृंगवदित्याह॥ त
दसंभवादिति॥ असंभवं विवृणोति॥ स हीति॥ परमाणवश्चेदेकस्थूलत्वे संभवतीति ज्ञानं न स्यात् सम्यग्रहस्तसन्निवेश इत्यर्थः॥
अवयव्यसत्त्वेऽपि जात्यादयो बाह्यार्थाः स्युरत आह॥ एवमिति॥ जातिगुणकर्मणां धर्मिणः सकाशादभेदे सतभेदे वाध
र्मिवद्धर्म्यन्तरवच्च न धर्मधर्मिभावः॥ भेदाभेदौ च विरुद्धाविति न संतीति जात्याद्यर्था इत्यर्थः॥ ज्ञानस्य ज्ञेयसारूप्यरूप
विशेषसंबंधाभावे सर्वविषयत्वापत्तेर्विशेषांगीकार्यः तथा च ज्ञानगतविशेषस्यैव ज्ञानेन विषयीकरणान्न बाह्यार्थसि
द्धिर्मानाभावात् गौरवाच्चेत्याह॥ अपि चेति॥ पक्षपातो विषयविशेषवैशिष्ट्यव्यवहारः॥ किं च ज्ञानाभिन्नज्ञानोपलंभाद
ण नियतोपलंभग्राह्यत्वात् ज्ञानवदित्याह॥ अपि चेति॥ ज्ञानार्थयोर्वास्तवे भेदेऽपि सहोपलंभनं स्यात् ग्राह्यग्राहकत्वाव
दित्यत आह॥ न चैतदिति॥ क्षणिकज्ञानस्यार्थेन संबंधहेतुत्वाभावान्न ग्राह्यग्राहकभाव इत्यर्थः॥ जाग्रद्विज्ञानं न बाह्याल
बनं विज्ञानत्वात्स्वप्नादिज्ञानवदित्याह॥ स्वप्नेति॥ विज्ञानानां वैचित्र्यानुपपत्तिबाधितमनुमानमिति शंकते॥ कथमिति॥
अन्यथोपपत्त्या परिहरति॥ वासनेति॥ अनादिसंतानानां तत्पूर्वपूर्वज्ञानमेव वासना तद्वशादनेकक्षणव्यवधानेऽपि नीला
द्याकारज्ञानं वैचित्र्यं भवति॥ यथा बीजवासनया कार्पासरक्तत्वं तद्वदित्यर्थः॥ उपमवादिसंमतत्वाच्च वासनैव ज्ञान

किंच
व
ज्ञेयं

वैचित्र्यहेतुत्वेन बाह्यार्थ इत्याह ॥ अपि चेति ॥ क्षणिकविज्ञानमात्रवादस्य मानमूलत्वाज्जेन नित्यविज्ञानवादो विरुध्यत
इति प्राप्ते सिद्धान्तसूत्रं व्याचष्टे ॥ नाभाव इत्यादिना ॥ किं बाह्यार्थस्यानुपलब्धेरभावः उत ज्ञानात् भेदेनानुपलब्धेः नाद्य
इत्युक्तमुपलब्धेरिति ॥ द्वितीयं शङ्कते ॥ ननु नाहमिति ॥ ज्ञानज्ञेययोर्विषयविषयिभावेन भेदस्य साक्षिप्रत्यक्षसिद्धत्वात्प्र
त्यक्षविरुद्धमभेदाभिधानमित्याह ॥ बाढमित्यादिना ॥ तद्वचनादपि जनो बाह्यार्थं ज्ञानात् भेदेनैवोपलभत इत्याह ॥ अत एवे
ति ॥ बाह्यार्थस्यात्यन्तासत्त्वे प्रसक्तोपलम्भायोगात् दृष्टान्तत्वासम्भवाच्च बहिर्वदित्युक्तं न स्यादित्याह ॥ इतरथेति ॥ अबाधित
भेदानुभवाद्देवकारो युक्तो न वकार इत्याह ॥ तस्मादिति ॥ ज्ञेयार्थो ज्ञानातिरेकेणासन्नसम्भवादित्युक्तं बाध्याद्दूष
णमिति शङ्कते ॥ नन्विति ॥ कोऽसावसम्भवः असत्त्वं वा असत्त्वनिश्चयो वा अयुक्तत्वं वा उत्कटकोटिकसंशयात्मकसम्भ
वस्याभावो वा ॥ नाद्यः ॥ साध्याभेदात् न द्वितीयः स्थूलोऽपि घटस्तम्भाविति समूहालम्बने स्थूलत्वबुद्धित्वघटत्वस्तम्भत
रूपविरुद्धधर्मवतोरर्थयोरेकत्वादेकस्मात् द्वयावगाहि ज्ञानात् भेदसत्त्वनिश्चयेनासम्भवासिद्धेरित्याह ॥ नायं साध्व
िति ॥ सम्भवः सत्तानिश्चयः प्रमाणाधीनः ॥ असम्भवो सत्त्वनिश्चयः प्रमाणाभावाधीनः नैवं परीक्ष्यमिति व्यवस्थामेव स्फुटयति ॥
यद्वीति ॥ उक्तव्यवस्थायाः फलं बाह्यार्थस्य प्रत्यक्षादिभिः सम्भवं वदन्नेव तृतीयं दूषयति ॥ हेति ॥ प्रमाणनिश्चित बाह्यार्थस्य
स्तम्भादेः परमाणुत्वस्याभेदाभेदविकल्पैरयुक्तत्वमात्रेण सत्त्वनिश्चयो न युक्तः ॥ असत्पक्षे पयुक्तत्वस्य तुल्यत्वात् च घटस्थूलस्यैकस्य वि
ज्ञानस्य स्थूलानेकसमूहालम्बनस्य विषयाभेदोऽयुक्तः स्थूलत्वानेकत्वप्रसंगात् ॥ न च व्याप्तिः समूहालम्बनोच्छेदे विज्ञानानामपि
योवार्तान [illegible] मितैतया विषयद्वित्वादिव्यवहारलोपापत्तेः तस्मादयुक्तत्वेऽपि यथानुभवं व्यवहारयोग्यार्थः स्वीकार्यः ॥ न चतुर्थः निश्चि
तेताद्दृशसम्भवस्यानुपयोगात् तस्य क्वचित्प्रमाणप्रवृत्तेः प्रसंगत्वादिति भावः ॥ यच्चोक्तं ज्ञानगतार्थसारूप्यस्यैव ज्ञानालम्बनोपप
त्तेर्बहिरर्थाभाव इति तत्राह ॥ नन्वेति ॥ पक्षगौरवमुक्तं तन्न दूषणं प्रामाणिकत्वादित्याह ॥ बहिरिति ॥ यत एव ज्ञानार्थयोर्भेदः सर्वलोके
साक्ष्यनुभवसिद्धः ॥ अत एव सहोपलम्भनियमोऽपि नाभेदसाधक इत्याह ॥ अत एवेति ॥ यथा चाक्षुषद्व्यरूपस्यालोकोपलम्भ

ना
त्व
त्ये
२८

न

नियतोपलम्भैकत्वेपि नालोकाभेदः॥ तथार्थस्य न ज्ञानाभेदः भेदेपि ग्राह्यग्राहकभावेन नियमोपपत्तेः॥ न च ज्ञानस्य क्षणिकत्वा
त् स्वभिन्नग्राह्यसंबंधायोगः स्थायित्वादिति भावः॥ विरुद्धमेनेकार्थेष्वपि भिन्नं एकत्वात् गोत्ववदिति सत्प्रतिपक्षमाह॥
अपि चेति॥ न चोहेत्वसिद्धिः॥ ज्ञानं ज्ञानमित्येकाकारप्रतीतेः ज्ञानैक्यनिश्चयात्॥ न च सा जातिविषयाव्यक्ति
भेदानिश्चयादित्याह॥ न विरोधस्येति॥ घटादेश्चेत न्याद्भेदमुक्तो वृत्ति ज्ञानाद्भेदमाह॥ नथेति॥ घटो द्वाभ्यां
भिन्न एकत्वात्॥ क्षीरवदित्यर्थः॥ ज्ञानभिन्नार्थानंगीकारे स्वशास्त्रव्यवहारलोपं बाधकमाह॥ अपि चेति॥ क्र
मिकयोः स्वप्रकाशयोः क्षणिकज्ञानयोर्मिथो ग्राह्यग्राहकत्वमयुक्तमनभ्युपगतं च तथा च तयोर्भेदप्रतिज्ञानयु
क्ता धर्मिप्रतियोगिनोर्मिथः परेण चाग्रहेण भेदग्रहायोगात्॥ तथा च तयोर्भेदग्राहकस्थाप्यात्मा तद्भिन्न एव द्रष्ट
व्यः॥ एवं पक्षसाध्यहेतुदृष्टान्तभेदाभावे दृष्टं क्षणिकमसदिति प्रतिज्ञानयुक्ता॥ सर्वतो व्यावृत्तं व्यक्तिमात्रं स्वलक्षणं॥
अनेकानुगतं सामान्यमतद्व्यावृत्तिरूपमिति प्रतिज्ञानयुक्ता॥ सर्वानेकार्थानां ज्ञानमात्रत्वेन मिथः परेण वा दुर्ज्ञान
त्वात्॥ उत्तरनीलज्ञानं वास्यं पूर्वं नीलज्ञानं वासकमिति प्रतिज्ञानयुक्ता॥ तयोर्भिन्नस्य ज्ञातुरभावात्॥ किंच अविद्यो
पप्लवो विपर्यासंसर्गः तेन नीलमिति सद्भ्रमः॥ नरविषाणमिति असद्भ्रमः अभूर्तमिति सदसद्भ्रमः॥ सतो विज्ञानस्यासतो
नरविषाणस्य चाभूर्तत्वादिति प्रतिज्ञा दुर्लभा॥ अनेकार्थज्ञानसाध्यत्वात् अज्ञानेनास्य बंधो ज्ञानेनास्य मोक्ष इति च प्रति
ज्ञाबद्धर्थज्ञानसाध्या आदिपदेन सामान्यतदृष्टग्राह्यमनिष्टसाध्यमिति शिष्यहितोपदेशोनेकसाध्योग्रहीतः तस्मात्प्र
तिज्ञादिव्यवहाराय ग्राह्यग्राहकभेदोंगीकार्य इति अर्थः॥ ज्ञानार्थयोर्भेदे युक्त्यन्तरमस्तीत्याह॥ किं चान्यदिति॥ विज्ञानवदर्थ
स्याप्यनुभवाविशेषात्स्वीकारो युक्त इत्यर्थः॥ स्वविषयत्वादि ज्ञानं स्वीक्रियते नार्थः परग्राह्यत्वादिति शंकते॥ अथ विज्ञानमि
ति॥ विरुद्धस्वीकृत्या विरुद्धत्वजताबोध्यत्तनयेन मोघ्यं दर्शितमित्याह॥ असंतेति॥ ज्ञानं स्ववेद्यमिति अंगीकृत्य सर्वो धर्म्यमापादितं
वस्तुतः स्ववेद्यत्वमयुक्तमित्याह॥ न चेति॥ कर्त्तरि क्रियां प्रति गुणत्वे प्रधानत्वात्स्वकर्मत्वायोगात्स्वकर्मतायोगात्तद्वेदन

न

ज्ञान ५

द्वा.ध्या.टी.२१०

२१

द्वि.ध्या.

कर्मत्वमसदित्यर्थः॥ नच स्वविषयत्वमात्रं स्ववेद्यत्वमिति वाच्यं॥ अभेदे विषयविषयित्वस्याप्यसंभवादिति भावः॥ ज्ञानस्य स्ववे
द्यत्वाभावे दोषद्वयं स्यादिति शंकते॥ नन्विति॥ अनवस्थानं च साम्यं चेति दोषद्वयं परिहरति॥ तदुभयमपीति॥ अनित्यज्ञानस्य स्ववे
द्यत्वादिमत्वेन घटवज्जडस्यत्वेन स्वीयजन्मादिग्रहायोगादस्ति ग्राहकाकांक्षा साक्षिणस्तु सत्तापास्फूर्तौ च निरपेक्षत्वान्नावस्था
नापि साम्यं चिज्जडत्ववैषम्यादित्यर्थः॥ साक्षी कें सत आह॥ स्वयंसिद्धस्येति॥ निरपेक्षस्य साक्षिणो सत्वे क्षणिकविज्ञा
नपेक्षा सिद्धेः सोऽगीकार्य इत्यर्थः॥ अनित्यज्ञानस्वरूपसाधकत्वाच्च साक्षी स्वीकार्य इत्याह॥ किं चेति॥ विज्ञानं ज्ञानांतर
नपेक्षमिति ब्रुवतात स्याप्रामाणिकत्वमुक्तं स्यात् स्वयंप्रथत इति ब्रुवता ज्ञातत्वमन्यत्वं चोक्तं स्यात्तथा च ज्ञात ज्ञाना
विषयत्वात् शिलास्थप्रदीपवदसदेव विज्ञानं स्यादतस्तत्साक्ष्यपेक्ष्यमित्यर्थः॥ विज्ञानस्यस्वान्यज्ञानत्वमन्युपगमेऽनेव
त्वयापाद्यते न चासत्वापत्तिः ज्ञातत्वादिति वाच्यं॥ स्वस्यैव ज्ञातत्वादिति शाक्यः शंकते॥ बाढमिति॥ अभेदे ज्ञातृज्ञेय
त्वायोगात् ज्ञानांतरमावश्यकमिति परिहरति॥ नेति॥ विमतं ज्ञानं स्वातिरिक्तवेद्यं वेद्यत्वाद्घटवदित्यर्थः॥ अतिरिक्तः
साक्षी किमन्यवेद्यः स्ववेद्यो वा॥ आद्येऽनवस्था द्वितीये विज्ञानवाद एव भंग्यंतरेणोक्तः स्यादिति शंकते॥ साक्षिण इति॥
त्वया विज्ञानं जन्मविनाशयुक्तमुच्यते॥ अतः कार्यस्य जडत्वनियमात्तस्यातिरिक्तवेद्यत्वमस्माभिः साधितं कूटस्थचिद्रूपसाक्षिणो
कानपेक्षत्वान्नानवस्थेति चोक्तमतो महद्वैलक्षण्यमावयोरिति परिहरति॥ नविज्ञानस्येति॥ एवं वेद्यविज्ञानवदर्थस्याप्युपलब्ध्येन बाह्या
र्थाभावः सूक्तं संप्रति जाग्रद्विज्ञानं स्वप्नादिविज्ञानवत्त्वबाह्यालंबनमिति अनुमानं दूषयति॥ वैधर्म्याच्चेति॥ किमत्र निर्विषयत्वं साध्य
मुत पारमार्थिकविषयशून्यमथवा व्यावहारिकविषयशून्यत्वं॥ नाद्यः॥ स्वप्नादिविभ्रमाणामपि मिथ्यार्थालंबनत्वेन दृष्टांते साध्य
वैकल्यात्॥ नद्वितीयः सिद्धसाधनादिति सूत्रस्थचकारार्थः॥ तृतीये तु व्यवहारदशायां बाधितार्थग्राहित्वं उपाधिरित्याह॥ बा
ध्यते हीत्यादिना॥ निद्राग्लानमितिकरणदोषोक्तिः साधनव्यापकत्वं निराह न चैवमिति॥ किं च प्रमाणजानुभवरूपत्वं लिंगः पक्षे
प्रमाणजं स्वप्नज्ञानं दृष्टांत इति वैधर्म्यांतरं॥ परमतेन स्वप्नस्य स्मृतित्वमंगीकृत्याह॥ अपि चेति॥ स्मृतिप्रत्यक्षोपलब्ध्योर्द्वे
धर्म्यांतरमाह॥ अर्थविप्रयोगेति॥ असंबद्धस्यावर्तमानस्य स्मृतेरर्थो विषय इति निरालंबनत्वमपास्यः कदाचिद्भवेत्॥

२१

279

दि

नच संप्रयुक्तवर्त्तमानार्थमात्रग्राहित्वादुपलब्धेति भावः ॥ प्रवेक्ति प्रमाणाप्रमाणजत्वे वैधर्म्येति फलमाह ॥ तत्रैवं सतीति ॥
वैधर्म्ये सतीत्यर्थः ॥ अप्रमाणजे तोपाध्येर्निराळंबनत्वानुमानं न युक्तमिति भावः ॥ वैधर्म्यास्ति किं निरस्यतीति ॥ न चे
ति ॥ बाधमप्याह ॥ अपि चेति ॥ वस्तुतो यद्यपि तु प्रत्ययस्य निराळंबनत्वं धर्मो यदि स्यात्तदा किं दृष्टांतग्रहेण प्रसक्त
तोर्वक्तृत्वात्र्याख्यत्वात् ॥ नहि वन्हेरौष्ण्यं दृष्टांतेन वक्तव्यं ॥ यदि न वस्तुतो धर्मोस्ति तदापि किं दृष्टांतेन ॥ बाधितं दृष्टांत
सहस्रेणापि दुःसाध्यत्वात् अतः स्वतो निराळंबनत्वे नोक्तो साधु त्वं तस्यानुभवबाधितत्वान्नानुमानमारब्धं तथापि
बाध्यो न मुञ्चतीत्यर्थः ॥ उक्तोपाधिरपि न विस्मर्तव्य इत्याह ॥ दर्शितेति ॥ सूत्रव्यापारसंस्मारयित्वा दूषयति ॥ यदुक्तमि
त्यादिना ॥ भावः स्यात्तेः सत्तायां ॥ ननु बाह्यार्थानुपलब्धावपि पूर्वपूर्ववासनावशादुत्तरोत्तरविज्ञानवैचित्र्यमस्तु बीजांकुरव
दनादित्वादित्यत आह ॥ अनादित्वेपीति ॥ बीजादंकुरो दृष्ट इति अदृष्टेपि तज्जातीययोः कार्यकारणभावकल्पनायुक्ता इह त्व
नुभवनिरपेक्षवासनयोरेव कल्प्यत्वादनादित्वकल्पना निर्मूलेति नाभिप्रेतधीवैचित्र्यसिद्धिरित्यर्थः ॥ न
नु निरपेक्षवासनानां सत्त्वे धीवैचित्र्यमसत्त्वे नेति स्वप्ने दृष्टमिति समूलानैस्येत्यत आह ॥ यादिति ॥ वासनानां बाह्यार्थानुभ
वकार्यत्वे सति नैरपेक्ष्यासिद्धेर्न स्वप्नादिदृष्टिरित्यर्थः ॥ कार्यत्वे ग्राहकं व्यतिरेकमाह ॥ विनेति ॥ अर्थानुभवकार्याणां वासना
नां तदनपेक्षत्वायोगात् न तदुक्ता स्वप्नादिदृष्टिरित्युक्तमपि न बाह्योपलब्धिवैचित्र्यस्य वासनां विनापि भावे केन व्यतिरेकव्य
भिचाराच्च न केवलवासनामात्रकृतं धीवैचित्र्यं किंत्वर्थानुभवे सति वासनासतीति नेत्यन्वयव्यतिरेकाभ्यां वासनामूलानुभवाव
च्छेदकार्थकृतमेवेति बाह्यार्थसद्भावसिद्धिरित्याह ॥ अपि चेति ॥ यः संस्कारः स साश्रयो लोके दृष्टः यथा वेगादिरिष्वाद्याश्रय
अतो विज्ञानसंस्काराणां न भावः आश्रयानुपलब्धेरित्यर्थांतरमाह ॥ अपि चेति ॥ अस्त्वालयविज्ञानमाश्रय इत्यत आह ॥ क्षणि
कत्वाच्चेति ॥ सूत्रं व्याचष्टे ॥ यदपीति ॥ सहोरसन्नयोः सव्येतरविषाणवदाश्रयाश्रयिभावायोगात्पौर्वापर्ये वा धेयक्षणासत्त्वे
आधारत्वायोगात् सत्त्वे क्षणिकत्वव्याघातात् नाधारत्वमालयविज्ञानस्य क्षणिकत्वात् प्रवृत्त्यादिविज्ञानवदित्यर्थः ॥ अस्तु तर्हि आल
यविज्ञानसंतानाश्रया वासना इत्यत आह ॥ नहीति ॥ सविकारः कूटस्थो वा स्थाय्यात्मा यदि नास्ति तदा संतानस्यावस्तुत्वादाश्र

पि ४
यो ५

स्य
पु
ती
र्थ
व

पेक्षमपह्नुसनानामाध्यानंनिक्षेपोपेच स्मृतिप्रसिद्धेः पश्चात्तन्मूलो व्यवहारः तत्सर्वं न संभवतीत्यर्थः ॥ यदि व्यवहारार्थमालयस्थापितं
तत्तापसिद्धांतस्याह ॥ स्थिरेति ॥ स्वतंत्रमतिदेशार्थत्वेनापि व्याचष्टे ॥ अपि चेति ॥ मतद्वयनिरासमुपसंहरति ॥ एवमिति ॥ ज्ञानज्ञेयात्म
कस्य सर्वस्य सत्त्वासत्त्वाभ्यां विचारासहत्वाच्छून्यतावशिष्यत इति माध्यमिकपक्षस्यापि मानमूलत्वमाशंक्य सूत्रकारः किमिति
नैराचकारेत्यत आह ॥ शून्येति ॥ आदरः पृथक्सूत्रारंभो न क्रियत एतान्येव तन्मतनिरासार्थत्वेनापि योज्यंत इत्यर्थः ॥
तथाहि ॥ ज्ञानार्थयोर्नाभावः प्रमाणत उपलब्धेः ॥ ननु जाग्रत्स्वप्नौ ज्ञानार्थशून्यावस्थात्वात्सुषुप्तिवदित्यत आह ॥
वैधर्म्याच्च न स्वप्नादिवत् स्वप्नः आदिर्यस्याः सुषुप्तेः तद्वदेतरावस्थयोः शून्यत्वमुपलब्ध्यनुपलब्धिवैधर्म्यलक्षण
बाधितज्ञानार्थोपलब्धिबाध्यात् सुषुप्तावप्यात्मज्ञानसत्त्वेन साध्यवैकल्याच्च नालं शून्यानुमानमित्यर्थः ॥ किंच नि
रधिष्ठाननिषेधायोगादधिष्ठानमेव तत्त्वं वाच्यं तस्य च नभ्रमतेनाभावः मानतोनुपलब्धेरित्याह ॥ नाभावोनुपलब्धेः ॥ उ
पलब्ध्यनुपलब्ध्यनुपलब्धिलक्षणं यद्वैधर्म्यं तच्छून्यतेनयति सा चासौ बाधितज्ञानार्थोपलब्धिस्तद्रूपबाध्यादि
त्यर्थः ॥ तदर्थमाह ॥ नह्ययमिति ॥ यद्भाति तन्नासदिति सूत्रसंगतः प्रपंचस्य न शून्यत्वं बाध्याभावादित्यर्थः ॥ नैव सत्त्वास
त्त्वाभ्यां विचारासहत्वाच्छून्यत्वं मिथ्यात्वसंभवादिति भावः ॥ क्षणिकत्वाच्चेति सूत्रं क्षणिकत्वापदेशाच्चेति पठनीयं ॥
शून्यविरुद्धक्षणिकत्वोपदेशादसंगतप्रलापी सुगत इत्यर्थः ॥ सुगतमतासांगत्यमुपसंहरति ॥ सर्वथेति ॥ सर्व
ज्ञस्य कथं विरुद्धप्रलापस्तत्राह ॥ प्रद्वेषो वेति ॥ वेदबाह्या अत्र प्रजा [illegible] ग्राह्याः ॥ अतो भ्रान्त्यैकमूलसुगतसिद्धां
तेन वेदांतसिद्धांतस्याविरोध इति सिद्धं ॥ नैकस्मिन्नसंभवात् ॥ मुक्तकच्छमते निरस्ते मुक्ताम्बराणां मतं बुद्धिस्थं भ
वति तन्निरस्यत इति प्रसंगसिद्धिमाह ॥ निरस्त इति ॥ एकरूपं ब्रह्मेति वैदिकसिद्धांतस्यानेकांतवादेन विरो
धोस्ति न वेति ॥ तद्वादस्य मानभ्रांतिमूलत्वाभ्यां संदेहे मानमूलत्वात् विरोध इति पूर्वपक्षफलमभिसंधाय त
न्मतमुपन्यस्यति ॥ सप्त चेति ॥ जीवाजीवौ भोक्तृभोग्यौ विषयाभिमुख्येनेंद्रियाणां प्रवृत्तिरास्रवः तां संवृणोतीति
संवरो यमनियमादिः ॥ निर्जरयति नाशयति कल्मषमिति निर्जरस्तप्तशिलारोहणादिः बंधः ॥ कर्ममोक्षः कर्मपा

नि

—रा

३०

संगति ४

शनाशेषस्य लोकाकाशप्रदेशस्य सततोर्ध्वगमनं॥ नन्वास्रवादीनां भोग्यां तर्भावात् कथं सप्तत्वमित्यत आह॥ संक्षेपतस्ति
ति॥ संक्षेपविस्तराभ्यां मुक्तार्थेषु मध्यमतिसाविस्तारांतरमाह॥ तयोरिति॥ अस्तिकायशब्दः सांकेतिकः पदार्थवाची
जीवश्चासावस्तिकायश्चेत्येवं विग्रहः प्र्यंते गलंतीति पुद्गलाः परमाणुसंघाः कायाः॥ सम्यक्पूरस्तनुमेयोध
र्मः॥ ऊर्ध्वगमनशीलस्य जीवस्य देहस्थितिहेतुरधर्मः॥ आवरणाभावः आकाशस्तदर्थः॥ पंचपदार्थानामवांतरभेद
माह॥ सर्वेषामिति॥ अयमर्थः॥ जीवास्तिकायस्त्रिविधः॥ कश्चिज्जीवो नित्यसिद्धः अर्हन्मुख्यः॥ केचित्सांप्रतिकमु
क्ताः केचिद्बद्धा इति॥ पुद्गलास्तिकायः षोढा॥ पृथिव्यादिचत्वारिभूतानि स्थावरं जंगमं चेति॥ प्रवृत्तिस्थितिलिंगौ
धर्माधर्मावुक्तौ॥ आकाशास्तिकायो द्विविधः॥ लोकाकाशः सांसारिकः॥ अलोकाकाशः मुक्ताश्रयः इति॥ बंधाख्यं कर्मा
ष्टविधं॥ चत्वारि घातिकर्माणि चत्वार्यघातीनि॥ तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमांतर्यं चेति॥ घातिकर्मा
णि॥ तत्त्वज्ञानान्न मुक्तिरिति ज्ञानमाद्यं कर्म॥ आर्हततंत्रश्रवणान्न मुक्तिरिति ज्ञानं द्वितीयं॥ बहुषु तीर्थकरप्रदर्शितेषु
मोक्षमार्गेषु विशेषानवधारणं मोहनीयं॥ मोक्षमार्गप्रवृत्तिविघ्नकरणमांतर्यं॥ इमानि चत्वारि श्रेयोहंतृत्वात् घातिकर्माणि॥
अघातीनि चत्वारि कर्माणि॥ वेदनीयं नामिकं गोत्रिकमायुष्कमिति॥ ममवेद्यं तत्त्वमस्तीत्यभिमानो वेदनीयं॥ एतन्नामाहम
स्मीत्यभिमानो नामिकं॥ अहमत्रभवतो देशिकस्यार्हतः शिष्यवंशप्रविष्टोस्मीत्यभिमानो गोत्रिकं॥ शरीरस्थित्यर्थं कर्मायुष्कं॥
अथवा शुक्रशोणितमिश्रितमायुष्कं॥ तस्य तत्त्वज्ञानानुकूलदेहपरिणामशक्तिर्गोत्रिकं॥ शक्तस्य तस्य द्रवीभावात्मकः कलला
वस्थाया बुद्बुदावस्थापाश्वारंभकः क्रियाविशेषो नामिकं॥ सक्रियस्य बीजस्य जाठराग्निवायुभ्यामीषद्घनीभावो वेदनीयं॥
तत्त्वेदनानुकूलत्वात्॥ तान्येतानि तत्त्वावेदकशुक्लपुद्गलार्थत्वादघातीनि॥ तदेतत्कर्माष्टकं जन्मार्थत्वाद्बंधः॥ आस्रवा
दिद्वारेति॥ स्वयं प्रक्रियामात्रानुमन्येति द्योतयति॥ स्वसमयपरिकल्पितानीति॥ स्वीयतंत्रसंकेतमात्रकल्पितानीत्यर्थः॥ पदार्थानि
मुक्तानामनेकांतत्वं वदंतीत्याह॥ सर्वत्रेति॥ अस्ति च नास्ति च विरुद्धधर्मद्वयमादाय वस्तुमात्रे न्यायं योजयंति॥ सप्तभंगीनाम
स्तित्वादीनां भंगानां समाहारः सप्तभंगी तस्या नयो न्यायः॥ घटादेर्हि सर्वात्मना सदेकरूपत्वे प्राप्यात्मनाप्यस्यैव सदिति तस्या

का

त्यं

प्रयेपक्षे त्वो कस्याक्षेत्र न स्यादत्तोप्यत्र त्वादि रूपेण कथंचिदस्ति प्राप्यत्वादि रूपेण कथंचिन्नास्ती सेव मनेकरूपत्वं वस्तुमात्र
स्यास्येयमिति भावः ॥ केते सप्त भंगा स्त्रा नाह ॥ स्यादस्तीति ॥ स्यादित्यव्ययं तिङ् तप्रति रूपकं कथंचिदर्थकं स्यादस्ति
कथंचिदस्ती सर्थः ॥ एवमग्रेपि ॥ तत्र वस्तुनोस्तित्ववांछायां स्यादस्ती त्याद्यो भंगः प्रवर्त्तते ॥ नास्तित्ववांछायां स्यान्ना
स्तीति द्वितीयो भंगः ॥ क्रमेणो भयवांछायां स्यादस्ति नास्ति चेति तृतीयो भंगः ॥ युगपदुभयवांछायामस्ति नास्तीति श
ब्दद्वयस्य सहकृद्वक्तुमशक्यत्वात् स्यादवक्तव्यं चतुर्थो भंगः ॥ आद्य चतुर्थ भंगयोर्वांछायां स्यादस्ति चावक्तव्यश्चेति पं
चमो भंगः ॥ द्वितीय चतुर्थे छायां स्यान्नास्ति चावक्तव्यश्चेति षष्ठो भंगः ॥ तृतीय चतुर्थे छायां स्यादस्ति नास्ति चावक्तव्य
श्चेति सप्तमो भंग इति विभागः ॥ एवमेकमनेकत्वं चेति द्वयमादाय स्यादेकः ॥ स्यादनेकः ॥ स्यादेको नेकश्च ॥ स्यादवक्तव्यः ॥
स्यादेको वक्तव्यः ॥ स्यादनेको वक्तव्यः ॥ स्यादेको नेकश्चावक्तव्यश्चेति ॥ तथा स्यान्नित्यः स्यादनित्य इत्यादि ऊह्यं ॥ एवमनेक
रूपत्वेन वस्तुनि प्राप्ति त्यागादि व्यवहारः संगच्छते ॥ एकरूपत्वे सर्वं सर्वत्र सर्वदास्त्येवेति व्यवहार विलोपापत्तिः स्यात्तस्मादनेकांतस
र्वमितसर्वे कं रूपत्व त्रिवाद बाध इति प्राप्ते सिद्धांतयति ॥ अत्रेति ॥ यदस्ति तत् सर्वत्र सर्वदा स्त्येव ॥ यथात्मत्वात्मा ॥ न चैवं तत्प्राप्तये
यत्नो न स्यादिति वाच्यं ॥ अप्राप्ति भ्रांत्या यत्न संभवात् ॥ यन्नास्ति तन्नास्त्येव ॥ यथा शशविषाणादि ॥ प्रपंचस्तूभयविलक्ष
ण एवेत्येकांतवाद एव युक्तः नानेकांतवादः ॥ तथाहि ॥ किं येनाकारेण वस्तुनः सत्वं तेनैवाकारेणासत्वमुताकारांतरेण ॥
द्वितीये वस्तुनः आकारांतरमेवासदिति वस्तुनः सदेकरूपत्वमेव ॥ न हि दूरस्थ ग्रामस्य प्राप्तेरसत्वे ग्रामोप्यसन्न भ
वति ॥ प्राप्त्या सत्वे प्राप्तियत्नानुपपत्तेः ॥ अतो यथाव्यवहारं प्रपंचस्यैकरूपत्वमास्थेयं ॥ नाद्य इत्याह ॥ नायमिति ॥
ननु विमतमनेकात्मकं वस्तुत्वान्नारसिंहवदिति चेन्न ॥ घट इदानीमस्त्येवेत्यनुभव बाधात् ॥ किंच जीवादि पदार्था
नां सत्वं जीवत्वादि रूपं चास्त्येव नास्त्येवेति च नियतं वा उतानियतं ॥ आद्ये व्यभिचार इत्याह ॥ यदीति ॥ द्वितीये पदा
र्थ निश्चयो न स्यादित्याह ॥ इतरथेति ॥ अनेकांतं सर्वमित्येव निश्चय इति शंकते ॥ नन्विति ॥ तस्य निश्चयरूपत्वं नि
यतमनियतं वा ॥ आद्ये वस्तुत्वस्य तस्मिन्नेवैकरूप निश्चये व्यभिचारः ॥ द्वितीये तस्य संशयत्वं स्यादित्याह ॥ नेति

दा१ ति२

प्रमायामुक्तन्यायं प्रमात्रादिष्वतिदिशति॥ एवमिति॥ निर्धारणं फलंप्रस्य प्रमाणादेस्तस्येत्यर्थः॥ इत्येवं सर्वत्रा नि
र्धारणे सत्युपदेशो निष्कंपप्रवृत्तिश्च न स्यादित्याह॥ एवं सतीति॥ अनेकांतवादे अस्तिकायपंचत्वमपि न स्या
दित्याह॥ तथा पंचा॥ नामिति॥ यदुक्तमवक्तव्यं तत्किं केनापि शब्देनावाच्यत्वं उत सदसदनेकशब्दावाच्य
त्वं नाद्ये व्याघातादित्याह॥ नचैषामिति॥ उच्यंते चावक्तव्यादिपदैरिति शेषः॥ न द्वितीयः॥ सदसदेकवक्तृमु
खजानेकशब्दानामप्रसिद्धेर्निषेधायोगात्॥ शेषस्यापि मुखभेदात्तत्रार्थस्य युगपद्विरुद्धधर्मवांछायां
तु मूकत्वमात्रमवक्तव्यपदेन विवक्षितमिति वाच्यं॥ तादृशवांछाया एवानुत्पत्तेरिति॥ किंच विरुद्धानेकप्र
लापित्वादर्हन्नाप्तइत्याह॥ उच्यमानाश्चेत्यादिना॥ इति च प्रलपन्निरन्वयः॥ अर्हन्निति शेषः॥ अनाप्तपक्ष
स्यैवांतर्गतः स्यान्नाप्तपक्षस्येत्यर्थः॥ इतश्चासंगतोनेकांतवाद इत्याह॥ स्वर्गेति॥ किंचानादिसिद्धोर्हन्मुक्तिः अन्येनुह
तनुष्ठानान्मुच्यंते अननुष्ठानाद्ध्यंतरस्यार्हततंत्राव्यवस्थतत्स्वभावानां त्रिविधजीवानां त्रैविध्यानियमोपि न स्यादित्याह॥
अनादीति॥ प्रपंचितं सूत्रार्थं निगमयति॥ एवमिति॥ एतेनेति॥ सत्त्वासत्त्वयोरेकत्रनिरासेनेत्यर्थः॥ परमाणुसंघाताः पृ
थिव्यादयइति दिगंबरसिद्धांतः किमिति सूत्रकृतोपेक्षितस्तत्राह॥ यत्विति॥ जीवस्य देहपरिमाणतां दूषयति॥ एवं चेति॥
अकृत्स्नं मध्यमपरिमाणत्वं तेनानित्यत्वं स्यादित्यर्थः॥ अर्थांतरमाह॥ शरीराणां चेति॥ विपाकेः कर्मणामभिव्य
क्तिः जीवस्य हस्तिगजशरीरं व्याप्तिमतः कार्त्स्न्येशरीरैकदेशे निर्जीवः स्यादित्यर्थः॥ पुंत्तिकादेहे हस्तिनो जीवो न प्र सूक्ष्मकीट
शोत् देहाद्बहिरपि जीवः स्यादित्यर्थः॥ किंच बाल्ये देहमात्र आत्मा ततः स्थूले युवदेहे कथंचित्स्यादिति हस्तिदेहः स
जीवो न स्यादित्याह॥ समान इति॥ यथा दीपावयवानां घटे संकोचो गृहे विकासस्तथा जीवावयवानामिति देहमानत्वनिय
मं शंकते॥ स्यादिति॥ दीपांशवज्जीवांशा भिन्नदेशा एकदेशा वेति विकल्प्याद्ये त्यक्तदेहाद्बहिरपि जीवः स्यादिति दूषयति॥
विभागमित्यादिना॥ दीपस्य तु न घटाद्बहिः सत्त्वं॥ अधिकावयवानां नाशात्॥ द्वितीयं दूषयति॥ अप्रतिघातइति॥ ७॥

32

अवयवानां नित्यत्वं चास्तिं । अल्पत्वादीपांरा वदित्याह ॥ अपि चेति ॥ एवं जीवावयवा नित्या इति मते देहमानत्वं निरस्तं सं
प्रति जीवस्य केचिदेव कूटस्थावयवा अन्ये त्वागमापायिन इति शंकते ॥ अथेति ॥ बृहत्तनुकायाप्तो जीवस्यावयवा आगमा
पायाभ्यां देहमानत्वमित्यर्थः ॥ सूत्रेण परिहरति ॥ नत्रापीति ॥ आगमापायो पर्यायः किमागमापायिनामवयवाना
मात्मत्वमस्ति न वा आद्य आह ॥ विकारादिदोषेति ॥ कोसौ बंधमोक्षाभ्युपगम इत्यत आह ॥ कर्माष्टकेति ॥ व्याख्या
तमेतत् ॥ आद्यकल्पे दोषांतरं वदन् कल्पांतरमाद्दूषयति ॥ किंचेति ॥ अवस्थितैष्टकूटस्थावयवस्य दुर्ज्ञानत्वादात्मज्ञानाभावा
न्मुक्तिरित्यर्थः ॥ यथा दीपावयवानां आकारस्तेजस्तथात्मावयवानामाकारे कारणाभावादागमापायो युक्ताविस्या
ह ॥ किंचेति ॥ सर्वजीवसाधारणः प्रतिजीवमसाधारणो वेत्यर्थः ॥ किंचात्मन आगमापायिनां त्वावयवत्वे सतिवि
यंतः आयांत्यवयवाः कियंतोपयंतीत्यज्ञानादात्मनिश्चयाभावादनिर्मोक्षः स्यादित्याह ॥ किंचेति ॥ अपि चावयव
रूपावयविस्त्वे जीवस्यानित्यत्वं अवयवसमूहत्वे चासत्वं आत्मत्वस्य यावदवयववृत्तित्वे यत्किंचिदवयवापायेपि
सद्यः शरीरस्याचेतनत्वं गोत्ववत्प्रत्येकं समाप्तौ एकस्मिन् शरीरे आत्मनानात्वं स्यादतो न देहपरिमाणत्वसाव
यवत्वे आत्मन इत्युपसंहरति ॥ अत इति ॥ सूत्रस्यार्थांतरमाह ॥ अथवेति ॥ स्थूलसूक्ष्मशरीरप्राप्ता बकात्स्न्यात्ति
ह्वारेणात्मानित्यतायामुक्तायां सुगतवत्संतानरूपेणात्मनित्यतामाशंक्यानेनोत्तरमुच्यत इत्यन्वयः ॥ पर्यायेण स
स्यव्याख्या स्रोत इति देहभेदेन परिमाणस्यात्मनश्चानवस्थानेपि नाशोपि स्रोतः प्रवाहस्तदात्मकस्यात्मव्यक्तिसंताने
स्यनित्यतयात्मनित्यतो स्यादित्यत्र दृष्टांतमाह ॥ यथेति ॥ सिग्वस्त्रं विगतं येभ्यस्ते विसिचो दिगंबरास्तेषामित्यर्थः ॥
पर्यायेण संतानोदप्यात्मनित्यस्यो विरोध इति ॥ नन्वकुतः विकारादिप्रसंगः संतानस्यावस्तु न आत्मत्वे शून्यवादः संतान
स्यवस्तुत्वे संतान[illegible]तिरेके च कूटस्थात्मवाद अनतिरेके जन्मादिविकारो विनाशो मुक्त्यभावश्चोक्तदोषप्रसंगात्तुसं
तानात्मपक्षो नुपपन्न इति सूत्रार्थः ॥ ११ ॥ मंस्थूलत्वात्सूक्ष्मत्वाद्देहाग्न्हातितद्देहपरिमाण एव जीव इति नियमं दूषयति ॥ अंसेति ॥
अंत्यशरीरपरिमाणस्यावस्थितेर्नित्यत्वदर्शनादुक्तयोराद्यमध्यपरिमाणयो

या

32

न्य

निस्सत्वप्रसंगादविशेषस्त्रयाणां नित्यपरिमाणानां साम्यं स्याद्विरूपपरिमाणानामेकत्रायोगादिति सूत्रयोजना ॥ आ
द्यमध्यपरिमाणे नित्ये आत्मपरिमाणत्वादंत्यपरिमाणवत् ॥ न चाप्रयोजकता ॥ परिमाणनाशे सत्यात्मनोपि
नाशादात्मपरिमाणनित्यत्वे योगादिति भावः ॥ परिमाणत्रयसाम्यापादनफलमाह ॥ एकेति ॥ अंत्यसशरीरसमा
न्येव पूर्वशरीराणि स्युः विषमशरीरप्राप्तावात्मनस्तत्परिमाणत्वे परिमाणत्रयसाम्यानुमानविरोधादित्यर्थः ॥ पू
र्वकालत्रयेपि परिमाणत्रयमंगीकृत्य सांसदृष्टांतेन नित्यमनुमाय साम्यमापादितं ॥ संप्रसंगस्य मुक्तपरिमाणस्याणुत्वस्थूलत्व
योरन्यतरत्वेनावस्थिते तत्त्वदेशांसमाद्यमध्यमकालयोरपि नित्यत्वात् स्यात्प्रागसत्वोनित्यत्वायोगात्तथा चाविशेषः कालत्रयेपि
जीवपरिमाणाभेद इत्याह ॥ अथवेति ॥ तस्मात् त्र्यंशैकशरणक्षपणकसिद्धांते नाविरोधः समन्वयस्येति सिद्धं ॥
पसुरसामंजस्यात् ॥ लुंचितकेशमतनिरासानंतरं जगद्व्यापिशैवमतं बुद्धिस्थं निराक्रियत इति प्रसंगसंगतिमाह ॥ इदानीमि
ति ॥ सामान्यत ईश्वरनिरास एवात्र किं न स्यादिति शंकते ॥ तदिति ॥ स्वोक्ति विरोधान्नैवमित्याह ॥ प्रकृतिश्चेत्यादिना ॥ प्रति
ष्ठापितत्वात्केवलनिमित्तेश्वरप्रतिषेधोवगम्यत इत्यसन्त्वमपः ॥ व्याहतो विरुद्धोभिव्यवहारउक्तिर्यस्य स तथा अद्वितीयब्रह्मप्र
कृतिकं जगदिति वदतो वेदांतसमन्वयस्य केवलेश्वरो न प्रकृतिरिति शैवादिमतेन विरोधोस्ति न वेति संदेहे तन्मतस्यमानमूल
त्वाद्विरोधे सति वेदांतोक्ताद्वयब्रह्मासिद्धिरिति फलमभिप्रेत्य सत्वासत्वयोरेकत्रासंभववत्कर्तृत्वोपादानत्वयोरप्येकत्रा
संभवात्कर्त्तैवेश्वर इति पूर्वपक्षं कुर्वन्न्वर्वांतरमतभेदमाह ॥ सा चेति ॥ सेश्वराः सांख्याः सांख्यशब्दार्थः ॥ चत्वारो मा
हेश्वराः ॥ शैवाः पाशुपताः कारुणिकसिद्धांतिनः कापालिकाश्चेति ॥ सर्वेप्यमी महेश्वरप्रोक्तागमानुगामित्वान्माहे
श्वरा उच्यंते ॥ कार्यं महदादिकं ॥ कारणं प्रधानं ईश्वरश्च ॥ योगः समाधिः ॥ विधिः त्रिषवणस्नानादिः ॥ दुःखांतो मो
क्ष इति पंच पदार्थाः ॥ पशवो जीवास्तेषां पाशो बंधस्तन्नाशाय इत्यर्थः ॥ पाशुपतागमप्रामाण्यात्पशुपतिर्निमित्तमे
वेति मतमुक्तानुमानिकेश्वरमतमाह ॥ तथेति ॥ विमतं सकर्तृकं कार्यत्वात् घटवदिति वैशेषिकाः कर्त्तारमीश्वरं सा
धयंति कर्मफलं सपरिकराभिज्ञदातृकं कालांतरभाविफलत्वात् सेवाफलवदिति गौतमादिगंबराश्च ज्ञानैश्वर्ये

प ३

हा॰ प्रा॰ टि॰ टी॰

३३

कर्षः क्वचिद्विश्रांतः सातिशयत्वात्परिमाणवदिति सांख्यसौगतपातंजला इति मतेनोक्तं केचित्तु कथंचिदिति॥ सिद्धांतय
ति॥ अत इति॥ आगमादिना निर्दोषेश्वरसिद्धेः कथं दोषवत्त्वमित्याह॥ किमिति॥ न तावत् स्वस्वागमादीश्वरनिर्णयः॥
आगमानां निर्मूलत्वेनाप्रामाण्यात्॥ नच सर्वज्ञज्ञानं मूलं॥ तत्र मानाभावात्॥ न चागम एव मानं॥ आगमप्रामा
ण्यनिश्चये मूलनिश्चयस्तन्निश्चये तन्निश्चय इत्यन्योन्याश्रयात्॥ नच पुरुषवचसां स्वतो मानत्वमुक्तं॥ मिथो
विरोधेन तत्त्वाव्यवस्थानाच्च॥ नाप्यनुमानादीश्वरः सर्वज्ञः कर्त्ता चेति निर्णयः संभवत्यनुमानस्य दृष्टानुसारि
त्वेन दृष्टविपरीतार्थासाधकत्वात्॥ तथाच लोके यादृशाः कर्त्तारो दृष्टास्तादृशा एव जगत्कर्त्तारो रागद्वेषादिमंतः सि
ध्येयुर्यदि लोके विचित्रप्रासादादिकर्त्तुरेकत्वादर्शनेऽपि जगत्कर्त्तारि लाघवादेकत्वं नित्यज्ञानं निर्दोषत्वं च क
ल्प्यते तर्हि द्व्याणुकोपादानमपि कल्प्यतां॥ कर्त्तुरेवोपादानत्वेन लाघवात्॥ अन्यथा स्वतंत्रप्रधानपरमाणवाद्युपादा
नकल्पना गौरवाद्दृष्टत्वाच्चेत् कर्त्तुर्द्व्याणुकोपादानत्वासिद्धिरेकत्वादिकमपि न सिध्येत्॥ अस्माकं त्वपौरुषेयतया स्वतः
सिद्धप्रमाणभावया श्रुत्या स्वप्रमेयबोधने दृष्टांतानपेक्षया भवत्येव लोकविपरीताद्वितीयकर्त्तुपादानात्मकसर्व
ज्ञनिर्दोषेश्वरनिर्णयः॥ निर्णीते च तस्मिन् धर्मिग्राहकमानबाधात्र रागादिदोषापादनस्यावकाश इत्यनुमानिके
श्वरादिष्वेव वैषम्यं तदपि प्रसाधितस्येश्वरस्यासामंजस्यमाह॥ हीनेति॥ यदि कर्त्तुरुपादानत्वमदृष्टत्वान्न कल्प्यते त
र्हि निर्दोषस्याप्यदृष्टत्वाद्यो विषमकारी स दोषवानिति व्याप्तिदर्शनेश्वरो जगत्कर्त्ता दोषवान् स्यात्॥ न चात्र धर्मिग्राह
कानुमानबाधः॥ कार्यत्वलिंगस्य कर्त्तृमात्रसाधकत्वेन निर्दोषो दोषवानुदासीन इत्यत्र तत्त्वानवोत्कर्षसमा जाति व्यापकधर्मापादा
नात्॥ दोषाभावे तद्व्याप्यविषमकर्त्तृत्वायोगाच्च दृष्टांतस्था व्यापकधर्माणां पक्षे आपादानं ह्युत्कर्षसमा जातिर्यथा
शब्दोऽपि यदि कृतकत्वेन हेतुना घटवदनित्यः स्यात्तर्हि तेनैव हेतुना सावयवोऽपि स्यादिति॥ नह्यत्रानित्यत्वस्य व्यापकं सावयव
त्वं गंधादौ व्यभिचारादिति भावः॥ ननु प्राणिकर्मप्रेरित ईश्वरो विषमफलानि प्राणिनः करोतीति न वैषम्यमिति शंकते॥ प्रा
णीति॥ जडस्य कर्मणः प्रेरकत्वायोगात्तमेवमित्याह॥ नेति॥ न चेश्वरप्रेरितं कर्मेश्वरस्य प्रेरकमिति वाच्यमित्याह॥

क॰ पा॰

त
त्ये
त्यौ

कर्त्त

३३
के

= रागद्वेषमोहा

कर्मेति ॥ अतीतकर्मणा प्रेरित ईश्वरो वर्त्तमानं कर्म तत्फलाय प्रेरयतीत्यनादित्वात् प्रेर्यप्रेरकभावस्य नानुपपत्तिरिति शंकते ॥
नानादित्वादिति ॥ अतीतकर्मणोऽपि जडत्वान्नेश्वरप्रेरकता ॥ न चैतदपीश्वरेण प्रेरितं सदीश्वरं प्रेरयति ॥ उक्तान्योन्याश्रयात्
ततोऽप्यतीतकर्मप्रेरितेश्वरप्रेरितत्वं तदेवेश्वरं वर्त्तमाने कर्मणि फलदानाय प्रेरयतीति चेन्न ॥ मानहीनाया मूलक्षयावहाया अन-
वस्थायाः प्रसंगात् ततः कर्मानपेक्ष एवेश्वरो विषमसृष्टेरसामंजस्यं दुर्वारमित्यर्थः ॥ यत्तु फलदाने ईश्वरस्य कर्मनिमित्तम-
त्वं न प्रेरकमिति नोक्तदोष इति ॥ तन्न ॥ विषमकर्मकारयितुरीश्वरस्य दोषवत्त्वानपायात् पूर्वकर्मापेक्षया कर्मकारयितृत्वे चे-
का प्रामाणिकानवस्थानादस्माकं त्वेषह्येव साध्वसाधु कारयतीति निरवद्यमिति च श्रुतिमूलं पूर्वकर्मापेक्षाकल्पनमिति
वैषम्यं ॥ किंच परमतानुसारेणापीश्वरस्य रागादिमत्त्वं प्राप्नोतीत्याह ॥ अपि चेति ॥ प्रवर्त्तकलिंगाद्दोषा इति तार्किकाणां
स्थितिस्तथा चेश्वरः स्वार्थरागादिमान् प्रवर्त्तकत्वात् संमतवत् न च कारुणिके व्यभिचारः परदुःखप्रयुक्तस्वदुःखनिवृत्त्यर्थत्वात्त-
स्य स्वार्थः ॥ उदासीनः प्रवर्त्तक इति च व्याहतमिति योगान्प्रत्याह ॥ पुरुषेति ॥ प्रधानवादे दोषांतरमाह सूत्रकारः ॥ संबंधे-
ति ॥ ईश्वरेणासंबद्धस्य प्रधानादेः प्रेर्यत्वायोगात् संबंधो वाच्यः स च संयोगः समवायो वा नास्तीत्यर्थः ॥ कार्यबलात्
प्रेरणयोग्यताख्यः संबंधः कल्प्यतामित्यत आह ॥ नाप्यन्य इति ॥ ईश्वरप्रेरितप्रधानकार्यं जगदिति सिद्धं चेत् संबं-
धकल्पना स्यात्तच्चाद्याप्यसिद्धमित्यर्थः ॥ मायाब्रह्मणोस्त्वनिर्वाच्यतादात्म्यसंबंधः देवात्मशक्तिमिति श्रुतेः
किं च वेदस्यापूर्वार्थत्वान्न लोकसिद्धकुलालसंबंधो वैदिके नानुसर्त्तव्यः ॥ आनुमानिके त्वनुसर्त्तव्य इति विशेषमा-
ह ॥ अपि चेति ॥ सर्वज्ञस्यागमप्रामाण्यस्य चेत्यन्योन्याश्रयः ॥ अनुमानात् सर्वज्ञसिद्धेः निरस्तत्वात् ॥ न ह्यम-
नस्कस्य ज्ञानं संभवति ज्ञानं मनोजन्यमिति व्याप्तिविरोधान्नित्यज्ञानकल्पनानवकाशादिति भावः ॥ प्रधानवत्प-
रमाणूनामपि निरवयवेश्वरेण संयोगाद्यसंभवात् प्रेर्यत्वायोगः प्रेरकत्वे चेश्वरस्य दोषवत्त्वमित्याह ॥ एवमन्यास्व-
पीति ॥ ईश्वरस्य प्रधानादिप्रेरणानुपपत्तेश्चासामंजस्यमित्याह सूत्रकारः ॥ अधिष्ठानेति ॥ प्रधानादिकं चेतनस्या

त्व

स्व

६२

ना.प्र.टी. र.

३४

स्वभोगाहेतुत्वे विशिष्टस्याप्रत्यक्षत्वस्येत्यर्थः = ५

नाधिष्ठेयं अप्रत्यक्षत्वादीश्वरवत् व्यतिरेकेण मृदादिवदित्यर्थः॥ चक्षुरादौ व्यभिचारमाशंक्य निषेधति॥ करणवदिति॥ रूपमुद्भूतं
नास्तीत्यप्रत्यक्षत्वं स्फुरयति॥ रूपेति॥ स्वभोगाहेतुत्वे सतीति विशेषणान्न व्यभिचार इत्यत आह॥ तथापीति॥ भो
गः सुखदुःखानुभवः आदिपदाद् विषयोपलब्धिग्रहः॥ न च ये चेतनाधिष्ठेयं तत्तदीयभोगहेतुत्वे सति प्रत्यक्षमिति व्यतिरेक
व्याप्तौ करणेषु व्यभिचारतादवस्थ्यमिति वाच्यं॥ भोगाविशिष्टस्याप्रत्यक्षत्वस्य हेतुत्वात् करणेषु च विशेषणाभा
वेन विशिष्टस्य हेतोरभावान्न च विरोध्यवेयर्थ्यं॥ परार्थपाचकाधिष्ठेयपाकाद्यादौ व्यभिचारान्न च प्रधानादेरीश्वरप्रत्यक्ष
त्वाद् विरोध्यासिद्धिः॥ अतीन्द्रियत्वरूपाप्रत्यक्षत्वस्य सत्वादिसत्वेऽपि प्रायः॥ जीवे करकृणताप्रयोगादयोऽदृश्यं तेषु चेत्तु प्रधानत्वं
तासेन हृदयं तरे सत्यतरार्थः॥ विपक्षे दोषं वदन्न प्रयोजकत्वं हेतोर्निरस्यति॥ करणेति॥ प्रधानादेर्प्रेर्यत्वांगीकारे प्रे
रकभोगहेतुत्वं स्यादितीन्द्रियस्य प्रेर्यस्य भोगहेतुत्वनियमादित्यर्थः॥ सूत्रद्वयस्यार्थान्तरमाह॥ अन्यथा वेति॥ यः प्र
वर्तकः स तनःसशरीरीति लोके व्याप्तिर्दृष्टेश्वरस्य च शरीरानुपपत्तेर्न प्रवर्तकत्वमिति सूत्रार्थमाह॥ इतश्चेति॥ विमतं
सेश्वरं कार्यत्वाद्घटवदिति कल्प्यतोराजवत्सशरीर एवेश्वरः स्यादित्युक्तं तत्र शापत्तिं निरस्यति॥ न च तद् दुर्गायि
तुमिति॥ न च नित्यं शरीरं सर्गात् प्रागपि संभवतीति वाच्यं शरीरस्य भौतिकत्वनियमादित्यर्थः॥ अस्तु शरीर एवेश्वरस्तत्र
आह॥ निराधिष्ठानेऽस्येति॥ जीवस्यैव शरीरं भौतिकं ईश्वरस्य तु स्वेच्छानिर्मितं प्रागपि स्यादिसाशंक्य निरस्यति॥ करणव
दिति॥ करणान्यत्र संतीति करणवत् शरीरं॥ इच्छामयशरीरकल्पनैवानुपपन्ना मानाभावात्॥ दृष्टभौतिकत्वनियमविरो
धाच्चेति मन्तव्यं॥ एवमीश्वरस्य अनुष्णतर्केण कर्तृत्वनिर्णयो नेत्युपपाद्य नित्यसर्वज्ञत्वनिर्णयोऽपि न संभवतीत्याह सूत्रकारः॥
अंतवत्त्वमिति॥ प्रधानपुरुषेश्वरत्रयमनित्यं स्यात् परिच्छिन्नत्वात् घटवदित्याह॥ पूर्वस्मिन्निति॥ संख्यावा परिमाणं वेयत्ता
तत्था च निश्चितसंख्या निश्चितपरिमाणत्वाच्चेति हेतुद्वयं यद्यपि संख्यावत्त्वमात्रं हेतुः संपन्नस्तथापि सर्वज्ञत्वानिश्च

नु ३
४ हेतुत्व

३४

य

-यदि संख्यावत्त्वमात्रं हेतुस्तर्हि तस्याप्रमादिभिः पक्षधर्मतया निश्चयादसिद्धिः स्यादतो यद्यपि संख्यावत्त्व
ते तत्तदपि सर्वज्ञेनेश्वरेण तस्य निश्चितत्वात्ना सिद्धिरिति सर्वज्ञानिश्चयेन हेत्वसिद्धि
श्च द्योतयितुमित्यर्थः = ९

येन हेतुसिद्धिनिरासं द्योतयितुं निश्चितपदं तत्राप्यहेतोरसिद्धिर्नास्तीत्याह ॥ संख्यापरि[illegible]माणमिति ॥ संख्यास्वरूपमित्यर्थः ॥
द्वितीये हेतुं साधयति स्वरूपेति ॥ प्रधानादयो निश्चितपरिमाणाः वस्तुत्वाद्भिन्नत्वाद्घटवदित्यर्थः ॥ ननु प्रधानपुरुषे
श्वराः त्रय इति ज्ञातेऽपि जीवानामानंत्यात्कथं संख्यानिश्चयस्तत्राह ॥ पुरुषेति ॥ जीवसंख्या[illegible]श्वरेण निश्चीयते अनि
श्चये नैव सर्वज्ञत्वायोगादित्यर्थः ॥ हेतुसिद्धेः फलमाह ॥ ततश्चेति ॥ माषराशिवत्केषांचिज्जीवानां संपत्सु द्धयश्च नस्येपि
त्येवं सर्वमुक्तेः इदानीं शून्यं जगत्स्यादित्यर्थः ॥ निःसंख्यानत्वे दोषादिति भावः ॥ ननु ईश्वरः शिष्यतामिति चेन्न तस्यापि भि
न्नत्वेनांतवत्त्वात् किं चेशितव्याभावादीश्वराभावः स्यादित्याह ॥ प्रधानमिति ॥ दोषांतरमाह ॥ प्रधानेति ॥ इयत्तानिश्चया
भावान्न श्रूयते इति द्वितीयं शंकते ॥ अथेति ॥ इयत्ता नास्ति न निश्चीयते चेत्यर्थः ॥ प्रधानादयः संख्यापरिमाणवंतः द्रव्यत्वान्म
षादिवदित्यनुमानादस्तीयत्ता तदज्ञाने स्यादसर्वज्ञता इयत्तायां चांतवत्त्वमप्यक्षतमिति परिहरति ॥ तत इति ॥ तस्मात्केवल
कर्त्रीश्वरवादस्य निर्मूलत्वात्कर्त्रुपादानाद्वयेश्वरसमन्वयविरोध इति सिद्धं ॥ पंचपदार्थवादिमाहेश्वरमतनिरासानंत
रं चतुर्व्यूहवादबुद्धिस्थं निरस्यति ॥ उत्पत्त्यसंभवादधिकरणतात्पर्यमाह ॥ येषामिति ॥ अधिकरणारंभमाक्षिपति ॥ न
न्विति ॥ वेदाविरुद्धांशमंगीकृत्य वेदविरुद्धं जीवोत्पत्त्याद्यंशं निराकर्तुमधिकरणारंभ इत्याह ॥ उच्यत इति ॥ अत्र भागवत
पंचरात्रागमो विषयः स किं जीवोत्पत्त्यंशे मानं न वेति संदेहे बाधानुपलंभान्मानमिति पूर्वपक्षयति ॥ तत्रेति ॥ पूर्वप
क्षे तदागमविरोधाज्जीवाद्भिन्नब्रह्मसमन्वयासिद्धिः सिद्धांते तदंशे तस्यामानत्वादविरोधात्तत्सिद्धिरिति फलभेदः ॥
सावयवत्वं निरस्यति ॥ निरंजनेति ॥ कथं तद्धर्मद्वितीये वासुदेवे मूर्तिभिदस्तत्राह ॥ स इति ॥ व्यूहो मूर्तिः स विज्ञेयः शास्त्रार्थमु
क्त्वा सहेतुं पुरुषार्थमाह ॥ तमि[illegible]तमिति ॥ यथोक्तव्यूहवंतं सर्वप्रकृतिं निरंजनं विज्ञानरूपं परमात्मानमिति यावत् ॥
वाक्कायचेतसामवधानपूर्वकं देवतागृहगमनमभिगमनं पूजाद्रव्याणामर्जनमुपादानं इज्या पूजा स्वाध्यायोऽष्टाक्षरादिज
पः ॥ योगो ध्यानं ॥ तत्राविरुद्धांशमुपादत्ते ॥ तत्रेति ॥ समाहितः श्रद्धावित्तो भूत्वेति तं यथा यथोपासते इत्याद्याः श्रुतिः ॥ मत

पा

भा.टि.र.
३५

स

र्मके मत्सरमत्सराच्यास्मृतिः॥ विरुद्धांशमनूद्य दूषयति॥ न सृनुरिति॥ सूतहान्यादिदोषआदिशब्दार्थः॥ न्यायोपेतयाऽज्ञआ
त्मैसादिश्रुत्या पांचरात्रागमस्यांशे मानत्वावृत्तिश्च या जीवाभिन्नब्रह्मसमन्वयस्थैर्यमितिभावः॥ जीवस्योत्पत्तिं नि
रस्यजीवान्मनसउत्पत्तिं निरस्यति॥ न च कर्तुरिति॥ यस्मात्कर्तुः करणोत्पत्तिर्न दृश्यते तस्मादसंगता कल्पनेत्यन्व
यः॥ सिद्धानां करणानां प्रयोक्ता कर्तेति प्रसिद्ध्यर्थो हि शब्दः॥ वर्णनं निर्मूलमित्याह॥ न चेति॥ ननु लोके कश्चिच्छिल्पि
वरः कुठारं निर्माय तेन वृक्षं छिनत्तीति दृष्टमिति चेत्तस्य शिल्पिनो हस्तादिकरणांतरसत्त्वात्कुठारकर्तृत्वं युक्तं॥ जी
वस्य तु करणांतरासत्त्वान्मनसः कर्तृत्वं विनैव करणं कर्तृत्वे या मनो वैयर्थ्यमिति भावः॥ संकर्षणादिनामुत्पत्तिसंभवे
पि व्यूहचतुष्टयं स्यादिति सूत्रव्याख्यानं मा शंकते॥ अथापि स्यादिति॥ ज्ञानैश्वर्ययोः शक्तिरांतरं सामर्थ्यं बलं शरी
रसामर्थ्यं वीर्यं शौर्यं तेजः प्रागल्भ्यं एतैरन्विता यस्मात्संकर्षणादयः तस्मादीश्वरा एवेत्यर्थः॥ सर्वेषामीश्वर
त्वे पांचरात्रोक्तिमाह॥ वासुदेवा एवेति॥ निर्दोषा रागादिशून्या निरधिष्ठानाः प्रकृतिजन्या निरवद्या नाशादिरहिता इत्य
र्थः॥ ईश्वरत्वादजन्मा संभवो गुण एवेत्याह॥ तस्मादिति॥ सूत्रेण सिद्धांतयति॥ अत्रेति॥ एवमपि चतुर्णामीश्वरत्वेन
विज्ञानत्वाद्यादिभावेपीत्यर्थः॥ प्रकारांतरमाह पृच्छति॥ कथमिति॥ किंच त्वारः स्वतंत्रा भिन्ना एव उतैकस्य विकारत्वे
नाभिन्नाः आद्यमनूद्य दूषयति॥ यदीत्यादिना॥ द्वितीये विकाराः प्रकृतितुल्या वा न्यूना वा आद्यमुद्भाव्य दूषयति॥
अथेत्यादिना॥ न्यूनत्वपक्षेपि सिद्धांतमाह॥ न च पंचेति॥ यदि न्यूना अपि भगवतो व्यूहास्तदा चतुष्ट्वव्याघात इत्या
ह॥ न चेतरेति॥ इतश्च जीवोत्पत्तिवाद उपेक्ष्य इत्याह सूत्रकारः॥ विप्रतिषेधाच्चेति॥ स्वस्यैव गुणत्वं गुणित्वं च विरु
द्धं॥ आदिपदात्प्रद्युम्नानिरुद्धौ भिन्नावात्मनस्तु ल्क्वात्मन एवेतरतिविरुद्धोक्तिग्रहः पूर्वापरविरोधादसंगतमि
ति सूत्रार्थमुक्त्वार्थांतरमाह॥ वेदेति॥ एकस्यापि तंत्राक्षरस्याध्येता न चतुर्वेदिभ्योधिक इति निंदादिपदार्थः॥ तस्मान्
मिथो विरुद्धाभिः पौरुषेयकल्पनाभिर्नापौरुषेयवेदांतसमन्वयविरोध इति सिद्धं॥ ७॥ ७॥ ७॥ इति श्रीमत्परम॰

ब्र.सू.भा.
नाद्य

३५
वृध

स३

न्कराचार्यगोविंदानंदभगवतः कृतौ श्रीमच्छा॰ भी॰ व्या॰ रत्नप्रभाख्यायां द्वि॰ ध्यायस्य द्वि॰ पादः समाप्तः ॥छ॥छ॥छ॥छ॥
श्रीगणेशाय नमः ॥ हरिः ओम् ॥ वियदादिविषयं ... सीतासायाञ्ज मधुव्रतं ॥ निसर्गचिद्विकर्त्तारमभिन्नं सर्वेश्व
रं भजे ॥ १ ॥ जीवस्यानुत्पत्तिप्रसंगेनाकाशस्याप्युत्पत्त्यसंभवमाशंक्य परिहरन्नादावेकदेशिमतमाह ॥ नवियदश्रु
तेः ॥ वियत्प्राणपादयोरर्थं संक्षिपन् पूर्वपादेन संगतिमाह ॥ तिष्ठितौ ॥ भिन्नोपक्रमत्वमेवाह ॥ केचिदित्यादिना ॥ तत्र तत्रो
क्तश्रुतीनां मिथो विरोधशंकानिरासो वियत्पदार्थः ॥ लिंगशरीरश्रुतीनां तन्निरासः प्राणपादार्थः ॥ यथा मिथो वि
रोधात् पूर्वपराविरोधाच्च परपक्षा उपेक्ष्याः तथा श्रुतिपक्षोऽपि उपेक्ष्य इति शंको ... पादद्वयस्यारंभात् पूर्वपादेन
दृष्टांतसंगतिरिति समुदायार्थः ॥ आकाशवाय्वोरुत्पत्तिमामनंति तैत्तिरीयकाः नामनंति छंदोगाः ॥ जीवस्य प्राणानां
चोत्पत्तिं सर्वत्र आत्मानो व्युच्चरंतीति वाजिनः एतस्माज्जायते प्राण इत्याथर्वणिकाः श्रामनंति नान्य एव माकाशपू
र्विकां सृष्टिं ... क्वचित् सृष्टिः ॥ क्वचित्तेजः पूर्विकेति क्रमविरोधः आदिपदात् स इमान् लोकान् सृजते सक्रमः क्वचि
त् सप्तप्राणाः क्वचिदष्टौ विंशत्यादिसंख्याद्वारकश्च विरोधो ग्राह्यः प्रपंचः पादद्वयं तथा च पादद्वयस्य श्रुतीनां मिथो विरोधनि
रासार्थत्वात् श्रुतिशास्त्राध्यायसंगतयः सिद्धाः ॥ आकाशस्योत्पत्त्यनुत्पत्तिश्रुत्योर्मिथो विरोधोऽस्ति न वेति वाक्यभेदैक
वाक्यताभ्यां संदेहे यद्युत्पत्तिस्तदा वाक्यभेदेन विरोधादप्रामाण्यं अनयोः श्रुत्योरिति पूर्वपक्षयिष्यन् आदावनुत्पत्तिपक्षमेक
देशी गृह्णातीत्याह ॥ तत्र तावदिति ॥ उत्पत्तिश्रुतिर्मुख्या नास्तीति गूढाभिसंधिः ॥ संप्रति पूर्वपक्षयति सूत्रकारः ॥ अस्ति त्वि
ति ॥ एकवाक्यत्वेन प्रामाण्यसंभवे किमिति श्रुत्योरप्रामाण्यमिति शंकते ॥ नन्वेकवाक्यतेति ॥ एकवाक्यत्वासंभवादप्रामाण्यं युक्त
मित्याह ॥ सत्यमित्यादिना ॥ एकस्य युगपत् कार्यद्वयासंभवेऽपि क्रमेण संबंधसंभवादेकवाक्यतेति मुख्यसिद्धांती शंकते ॥ ननु
सकृदिति ॥ अप्रामाण्यवादी दूषयति ॥ नैवमिति ॥ क्रमो न युज्यते द्वयोः श्रुतप्राथम्यभंगापत्तेरित्यर्थः ॥ एकस्माद्धि दध्नबीजाद्दल
द्वयवदस्तु भयं प्रथममित्यत आह ॥ नन्वेति ॥ वायोरग्निरिति क्रमश्रुतिभंगादिति शेषः ॥ छांदोग्यश्रुतेस्तैत्तिरीयविरुद्धा

ए
क्य
वे दा
दे
श्रुते

मा॰ २ थ२

न्या०टि०रा०
३८

ब्र.व्या.त्व
प्रा.२१

र्थत्वमुक्तं।।तित्तिरिश्रुतेस्तद्विरुद्धार्थत्वमाह।।एतेनेति।।एतस्यार्थमाह।।तस्मादिति।।छांदोग्ये श्रुतं तेजसः प्राथम्यं अत्र तु वायो
र्न्यत्वमित्यर्थः।।किंच स सदार्थः आत्मा छांदोग्ये तेजस उपादानं श्रूयते अत्र तु वायोरिति नैकवाक्यत इत्याह।।वायोरिति।।ए
वं श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे प्राप्ते स एव वियदनुत्पत्तिवादी स्वमतेन प्रामाण्यं ब्रुवन्नित्याह।।अस्मिन्निति।।एवम
ध्यायसमाप्तेरधिकरणेषु प्रथमं विरोधात् श्रुत्यप्रामाण्यमिति पूर्वपक्षफलं ततः एकदेशीसिद्धान्तः पश्चान्मुख्यसिद्धान्ते
श्रुतीनामविरोधेन एकवाक्यतया ब्रह्मणि समन्वयसिद्धिरिति फलं क्रमश्च सर्वत्र गंतव्यः।।तत्र श्रुत्योर्विरोधे सत्यध्ययनविधृ
पात्तयोरप्रामाण्यायोगाद्वियदुत्पत्त्यसंभवरूपतर्कानुगृहीतच्छांदोग्यश्रुतिर्मुख्यार्था इतरा गौणी अविरोधः इत्येकदेशिम
तं विवृणोति।।नास्तीत्यादिना।।आकाशो नोत्पद्यते सामग्र्यभावादात्मवत्।।न चाविद्याब्रह्मणोः सत्त्वात्तत्सिद्धिः।।वि
जातीयत्वेनानुपारंभकत्वायोगादसंयुक्तत्वाच्च।।संयोग एव हि द्रव्यस्यासमवायिकारणमतः समवाय्यसमवायिनोरसत्त्वा
न्नेह तत्सिद्धिरित्यर्थः।।प्रागभावशून्यत्वाच्च सदाकाशो नोत्पद्यत इत्याह।।उत्पत्तिमतां चेति।।प्रकाशश्चात्रासुषानुभवः
आदिपदात्तमोध्वंसपाकयोर्ग्रहणं।।ननु द्रव्यारंभकत्वं घटाकाशस्य कार्यत्वं च प्रत्यक्षेणोपपत्ति।।परमाण्वाश्रयत्वात्।।अतो न
प्रागभाववत्त्वमित्यर्थः।।प्रागभावासत्वेऽप्युत्पत्तिः।।किं हीति सूक्ष्मत्वाश्रयो वकाशः।।सूक्ष्मात्रपः छिद्रमत[illegible]त्रपः सुषिरमिति भेदः।।
किं चात्मवदाकाशो न जायते विभुत्वादस्पर्शद्रव्यत्वाच्चेत्याह।।पृथिव्यादीति।।तस्मादुक्तलक्षणब्रह्म[illegible]णी द्रष्टव्येत्यन्वयः।।भेदे
नैगौणित्वे वैदिकोदाहरणमाह।।वेदेप्यारण्यानिति।।आकाशेष्विति।।भेदव्यपदेशो गौणेण शक्तिसंबंधः।।न केवलं तर्कादाका
शस्यानुत्पत्तिः किंतु श्रुतितोपीत्याह।।सूत्रकारः।।शब्दाच्चेति।।नित्यभावस्यानादित्वादिति भावः।।आत्मेति।।चशब्दस्तूदा
दाहरणमित्यन्वयः।।आकाशः शरीरमस्येति बहुव्रीहिणा अनंतसाम्यप्रमाणात् ब्रह्मवदाकाशस्यानादित्वमित्यर्थः।।
पदोत्तरमिति।।शंकोत्तरमिति यावत्।।तान्येव शंकापदानि पठति।।स्यादेतदिति।।अधिकारे प्रकरणे पृथक्कस्मिन्न ब्र
ह्मप्रकरणे अन्नं ब्रह्म आनंदो ब्रह्मेति वाक्ययोर्ब्रह्मशब्दस्यान्ने गौणत्वमानंदे मुख्यता तथैकवाक्यस्थस्यैकस्यापि सं
भूतशब्दस्य गुणमुख्यार्थभेदो योग्यताबलादित्याह।।नैनं चेति।।उदाहरणांतरमाह।।यथा चेति।।अभेदोपचार

ण्वा
३६
स्याच्चेति

त्वं

भक्तिः॥मुख्यसिद्धांतसाक्षित्वेपेति॥कथंपुनरिति॥सएवाक्षेपद्वयंस्पष्टयति॥नन्विति॥अद्वितीयत्वश्रुतिबाधः सर्वविज्ञानप्र
प्रतिज्ञाबाधश्चेत्यर्थः॥प्रथमामाक्षेपंदृष्टांतेनपरिहरति॥एकमेवेति॥कार्यरूपद्वितीयप्रसक्त्यै प्रागवस्थायामवधारणश्रु
त्यर्थस्य सर्थः॥कुलालगेहेऽमत्राणि घटशरादिनिपात्राणि एकमेवेत्यवधारणव्यावर्त्यं कार्यमिति व्याख्याया द्वितीयपदव्यावर्त्य
माह॥अद्वितीयश्रुतिरिति॥आकाशस्याद्वितीयत्वमंगीकृत्य साद्वितीयादिपदसंकोचः कृतस्तदपि नास्तीत्याह॥ननु नभसो
सापीति॥धर्मसाम्ये ब्रह्मनभसोः कथं भेदस्तत्राह॥सर्गकालेत्विति॥धर्मसाम्याद्द्वितीयत्वोपचार इत्यर्थे श्रुतिमाह॥त
थाचाकाशेति॥द्वितीयमाक्षेपं परिहरति॥अत एवेति॥अभेदोपचारादेवेत्यर्थः॥नभसो ब्रह्मतत्कार्याभ्यामपि न देशाका
लत्वाच्च तत्तज्ज्ञाने ज्ञानमित्याह॥अपिचेति॥एवमाकाशस्यानुत्पत्तौ सर्वश्रुतीनामविरोध इत्येकदेशिसिद्धांतः प्राप्तः
तं मुख्यसिद्धांती दूषयति॥प्रतिज्ञेति॥अहानिर्बाधः॥सामयजुरथर्वणशाखाभेदज्ञापनार्था इति शब्दाः॥न काच
नेति॥आत्मभिन्नं ज्ञेयं नास्तीत्यर्थः॥ननु सर्वस्य ब्रह्माव्यतिरेकात्प्रतिज्ञाया अहानिरस्तु तथापि श्रीवादिवदनुस
त्वस्यापि नभसो ब्रह्मणि कल्पितत्वेनाव्यतिरेकात्प्रतिज्ञासिद्धिः किं न स्यात् किमुत्पत्त्येत्यत आह॥शब्दस्येति॥अव्य
तिरेक एव न्यायस्तेनेत्यर्थः॥अयं भावः॥जीवस्य तावदात्मत्वाद्ब्रह्माव्यतिरेकः अज्ञानतत्संबंधयोः कल्पितत्वेनाव्य
तिरेकः स्वतंत्राज्ञानायोगादज्ञानान्यजडद्रव्यस्य तु कार्यत्वेनैवाव्यतिरेकसिद्धिः तस्याकार्यत्वे प्रधानवत्स्वातंत्र्याद्व्य
तिरेकायोगात्तथाहुर्न्यायविदः॥निसद्व्याणि स्वतंत्राणि भिन्नान्यनाश्रितानीति॥तस्मात्प्रतिज्ञासिद्धये आकाशस्य
कार्यत्वेनैवाव्यतिरेको वाच्य इति॥दृष्टांतस्य प्रसिद्धिसावोस्यशाखानाह॥तथाहीति॥तेनतेनदृष्टांतेनेति यजुर्विंदु
ध्यादिदृष्टांतेन॥आथर्वणेऽर्णनाभ्यादिदृष्टांतेनेत्यर्थः॥यजुषि प्रतिज्ञासाध्यकारदं सर्वमिति शब्दाः॥आथ
र्वणे ब्रह्मैवेदमिति शब्दा इति विभागः॥एवमाकाशोत्पत्तिकथनादेकदेशिमतं दूषितं श्रुत्यप्रामाण्यवादी स्वोक्तं
स्मारयति॥ससंदर्शितमिति॥मुख्यसिद्धांतमाह॥नेकेति॥तत्तेजोऽसृजतेति सहश्रुतस्य स्रष्टुराकाशा

294

गo प्रा० दि० रा०   छ० प्या० त०

36

न्या

तेजोप्यां युगपत् संबंध्येतिति रिक्रमबाधात् क्रमेणाकाशस्रष्टृ तेजोस्रजतेति संबंधे तेजःप्राथम्यभंगाद्वस्तुविकल्पा-
संभवेन तयोः शाखाभेदेन प्राथम्यव्यवस्थायामपि प्रयोगात्रैकवाक्यतेति प्राप्तं मुख्य एव दूषयति॥ नैवदोषइति॥ अ
प्रामाण्यकल्पनाद्वरं अपौरुषेयश्रुतीनामेकवाक्यत्वेन प्रामाण्यकल्पनं तच्चैकवाक्यत्वं बलवच्छ्रुत्या दुर्बलश्रुतेः
कल्प्यं बलवतीच तित्तिरिश्रुतिः प्रकृतिपंचकस्यापौर्वापर्याख्यक्रमस्य श्रुतत्वात् छांदोग्यश्रुतिस्तु दुर्बला तेजःप्रा
थम्यस्याश्रुतत्वात्तेजःसर्गमात्रं तु श्रुतं तत्तीयत्वेन परिणेयमिति सैकवाक्यतेत्यर्थः॥ यदुक्तं एकदेशिना छांदोग्यश्रुत्याका
शसत्तिर्यावर्तत इति तन्निरस्तं॥ किंच सा श्रुतिः किं तेजोजन्मपरा उत तेजोजन्मविषयस्तु सत्तित्वपरा॥ आद्ये न त
द्वारणमित्याह॥ न हीति॥ अविरोधादित्यर्थः॥ न द्वितीयः श्रुत्यंतरविरोधेनोपायपरत्वकल्पनायोगाद्वाक्यभेदापत्ते
श्चेत्याह॥ एकस्येति॥ नन्वेकस्य स्रष्टुरनेकार्थसंबंधवद्वाक्यस्याप्यनेकार्थता किं न स्यादित्यत आह॥ स्रष्टुरिति॥ ए
कस्य कर्तुरनेककार्यसंबंधो दृष्टः न त्वेकस्य वाक्यस्य नानार्थकप्रयोगे तु पपआनये सा दावाव सो वाक्यभेद एव आ
नयनस्यार्जलक्षीराभ्यां पृथक् संबंधादित्यर्थः॥ फलितमाह॥ तस्मैकेति॥ एकस्य शब्दस्यावृत्तिं विना नेकार्थत्वं
नास्ति चेद् सृजतेति शब्दस्य छांदोग्योपसंहृताकाशादिसंबंधार्थमावृत्तिदोषः स्यादित्यत आह॥ नन्वेति॥
छांदोग्यस्थितेजोजन्माकाशादिजन्मपूर्वकं तेजोजन्मत्वात्तित्तिरिस्थतेजोजन्मवदित्याकाशादिजन्मो
पसंहारे तदाकाशमसृजतेति शाख्यांतरस्यैव कल्पनान्नावृत्तिदोष इत्यर्थः॥ श्रुत्यंतरस्थः क्रमः श्रुत्यंतरेग्रा
ह्य इत्यत्र दृष्टांतमाह॥ यथा चेति॥ स्रष्टोतासूर्यतासूर्याभ्यां दृष्टांतश्रुतिवैषम्यं शंकते॥ नन्वित्यादिना॥ ते
जःप्राथम्यस्वीकारे आकाशसर्गोप्यमीत द्रूर्मः प्राथम्यं चेति द्वयं श्रुतं बाधनीयमिति गौरवमाकाशप्राथम्ये
त्वार्थिकतेजःसर्गप्राथम्यमात्रं बाध्यत इति लाघवमिति मत्वाह॥ नेत्युच्यत इति॥ किंच प्रधानधर्मि साम॥

वो

नानार्थत्वं दृष्टं

36

क

दूरंगुणकृतस्य तेजःप्राथम्यस्य धर्मस्यासाग इत्याह ॥ नहीति ॥ किंच किं सच्छिपरश्रुतिसिद्धत्वात्तेजःप्राथम्यं गृह्यते उत प्रथ-
मस्थाने तेजसः सर्गश्रुत्यार्थात् प्राथम्यप्रावाश्राद्यपरस्याह ॥ अपि चेति ॥ द्वितीयमनूद्य दूषयति ॥ अर्थाद्धीति ॥ यदुक्तं
वस्तुनि विकल्पासंभवात् तयोः प्राथम्यं शाखाभेदेन व्यवस्थितं न भवति नो पुनः पयोर्द्दिदं लोकं कुरवत् समुच्चि सोऽस
त्याप्राथम्यं ॥ वायोरग्निरिति क्रमबाधापत्तादिति तदिष्टमेवेत्याह ॥ विकल्पेति ॥ न केवलं श्रुतिद्वैरविरोधः
सौहार्दं वास्तीत्याह ॥ अपि चेति ॥ वियदुपसंग्राह्यमित्यन्वयः ॥ वियदनुत्पत्तिवादिनोक्तमनूद्य प्रतिज्ञायाअद्वि-
तीयश्रुतेश्च मुख्यार्थतात्पर्यानुगमात्रगौणार्थेनेति दूषयति ॥ यच्चोक्तमित्यादिना ॥ प्रकृतिविकारन्यायः तदनन्य-
त्वन्यायः उदके क्षीरस्थमपि क्षीरज्ञानानुग्रह्यते भेदादिति भावः ॥ मास्तु सम्यक्ज्ञानं श्रुते प्रतीति मूलहासंभवादि-
त्याशंक्य पौरुषेयत्वान्नैवमित्याह ॥ न च वेदस्येति ॥ मायाप्रांतिः तपालीकं मिथ्याभाषणं तेन वंचनमयथार्थबोध-
नं आदिपदाद्विप्रलिप्सा प्रमादकरणापाटवानि गृह्यंते प्रतिज्ञामुख्यत्वमभिधाया द्वितीयश्रुतिमुख्यतामाह ॥ साव-
धारणेति ॥ सर्वद्वैतनिषेधपरेत्यर्थः ॥ उभयगौणत्वेऽद्भुतवदुपन्यासो मदादि दृष्टांते स्वतत्साधनं न स्यादिति दोषां-
तरमाह ॥ नन्वित्यादिना ॥ कार्यमेवस्वकेदेशा आकाशो नो सघटेसामग्रीश्च अन्यत्वादि सत्त्वाकारो ॥ विकारः विभ-
क्तत्वात् घटादिवदिति ॥ सत्प्रतिपक्षमाह ॥ यस्त्वित्यादिना ॥ यो विभक्तः स विकार इत्युक्त्वा यस्त्ववि-
कारः स न विभक्तः यथात्मेति व्यतिरेकव्याप्तिमाह ॥ नत्वविकवितमिति ॥ दिगादिषु व्यभिचारमाशंक्य
पक्षसमत्वान्नैवमित्याह ॥ एतेनेति ॥ विभक्तत्वेनेत्यर्थः ॥ आत्मनि व्यभिचारं शंकते ॥ नन्विति ॥ धर्मिसमानसत्ता-
कविभागस्य हेतुत्वात् परमार्थात्मविभागस्य कल्पितत्वेनाभिन्नसत्ताकत्वान्न व्यभिचार इत्याह ॥ नेति ॥ अत्रैशान-
न्यदुष्यत्वविशेषणं अतो नाज्ञानतत्संबंधादौ व्यभिचारः ॥ न चाल्ला कार्यः विभक्तत्वात् वस्तुत्वात् घटवदित्याभास-
तुल्यमिदं अनुमानमित्याशंक्याह ॥ नः परमकारणत्वेन श्रुतस्य कार्यत्वेन अन्यत्वाप्रसंग इति बाधकसत्त्वान्न स्या-

नि ३

यो

चा

भा

गा०भा०टि०२७०

३८

सत्त्वं नात्र किंचिद्बाधकमस्ति प्रस्तुत आकाशस्याकार्यत्वे नित्यानेकद्रव्यकल्पना श्रोत्रप्रतिज्ञाहान्यादयो बाधकाः
संतीति नाभासत्वं तुल्यमित्याह ॥ आत्मन इति ॥ इष्टप्रसंग इति वदंतं प्रत्याह ॥ आत्मत्वादिति ॥ आत्माभावः केन
चित् ज्ञायते न वा ॥ आद्ये यो ज्ञाता स परिशिष्यत इति न शून्यता द्वितीये हि न शून्यता मानाभावादित्यर्थः ॥ किंच
यदि कार्यसत्तास्फूर्त्योरन्यापेक्षत्वं तन्निराकार्यमात्मत्वकार्यो निरपेक्षत्वान्न बाधयोग्य इत्याह ॥ न ह्यात्मन इत्यादि
ना ॥ कस्यचित् कारणस्यागंतुकः कार्यो न हि ॥ सत्तास्फूर्त्योः सिध्योरनन्यापेक्षत्वादित्यक्षरार्थः ॥ तत्र स्फू
र्तेरनन्यापेक्षत्वं विवृणोति ॥ नहीति ॥ ननूक्तं सुरेश्वराचार्यैः ॥ प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा ॥ यस्य
प्रसादात् सिध्यंति तत्सिद्धौ किमपेक्षत इति ॥ तथा च श्रुतिरपि ॥ पुरुषः स्वयं ज्योतिस्तस्य भासा सर्वमिदं
विभातीति ॥ नन्वात्मनः स्वतःसिद्धौ प्रमाणवैयर्थ्यं तत्राह ॥ तस्येति ॥ ननु प्रमेयस्यापि स्वप्रकाशत्वं किं न स्या
दित्यत आह ॥ नहीति ॥ अतो न प्रमाणवैयर्थ्यमिति भावः ॥ आत्मापि मानाधीनसिद्धिकः किं न स्यादित्यत आ
ह ॥ आत्मा त्विति ॥ अयमर्थः ॥ निश्चितसत्ताकं हि ज्ञानं प्रमेयसत्तानिश्चायकं गेहे घटो दृष्टो न वेति ज्ञानसं
शये न दृष्ट इति व्यतिरेके निश्चये चार्थस्वरूपानिश्चयात् ॥ ज्ञानसत्तानिश्चयश्च न स्वतः कार्यस्य स्वप्रकाशत्वा
योगात् नापि ज्ञानांतरादनवस्थानादतः साक्षिण्येव ज्ञानसत्तानिश्चयो वाच्यः ॥ तत्र साक्षिणश्चेत् ज्ञानाधीन
सत्तानिश्चयः अन्योन्याश्रयः स्यादतः सर्वसाधकत्वादात्मा स्वतःसिद्ध इति ॥ स्वप्रकाशस्यापि बाध्यैः किं न स्यादि
त्यत आह ॥ न चेति ॥ जडं हि परायत्तप्रकाशत्वादागंतुकं बाध्ययोग्यं न स्वप्रकाशात्मस्वरूपं तस्य सर्वबाध्यसाक्षिस्व
रूपस्य निराकर्त्रंतराभावात् स्वस्य च स्वनिराकर्तृत्वायोगात् ॥ नहि सुनिपुणो नापि स्वाभावो द्रष्टुं शक्यत इत्यर्थः ॥ एवं स्व
तः स्फूर्तिद्वारात्मानबाध्यत्वमुक्त्वा स्वतः सत्तावत्त्वाच्च न बाध्य इत्याह ॥ तथाहमेवेति ॥ ज्ञानज्ञेययोः सत्ताव्यभिचारेऽपि
ज्ञातुः सदैकरूपत्वान्न व्यभिचार इत्यर्थः ॥ मा भूज्जीवतो ज्ञातुरन्यथाभावः मृतस्य तु स्यादित्यत आह ॥ तथेति ॥ उच्छेदे

सत्ता

३८

पिन

विनाशोऽन्यथा स्वभावत्वं मिथ्यात्वं वा संभावयितुमशक्यं अहमस्मीत्यनुभवसिद्धसत्स्वभावस्य बाधकाभावादित्यर्थः॥ एव
मात्मनः शून्यत्वनिरासेन शून्यताप्रसंगस्यानिष्टत्वमुक्तं ततश्चात्मनः कार्यत्वानुमानं आभासइत्याह॥ एवमिति॥ अको
र्यत्मनः सिद्धौ तस्याविद्यासहितस्योपादानत्वेऽदृष्टादिनिमित्तस्य च सत्त्वादाकाशानुत्पत्तिहेतोः सामग्रीशून्यत्वस्य
स्वरूपासिद्धेरुक्तसत्प्रतिपक्षबाधोच्चाकाशस्य कार्यत्वं निरवद्यमित्याह॥ कार्यत्वं चेति॥ आत्माविद्ययोर्विजातीयत्वान्नाका
शारंभकत्वमित्युक्तमनूद्य निरस्यति यत्त्वित्यादिना॥ स्वरूपासिद्धिमप्याह॥ विभुत्वादीनां चेति॥ सर्वमूर्त्तसंयोगः परिमाणवि
शेषो वा विभुत्वं निर्गुणात्मनि दृष्टान्ते नास्ति संयोगस्य सावयवत्वनियतत्वात्तत्र साध्यविरुद्धत्वाच्च स्वरूपोपचयरूपं तु वि
भुत्वं मात्माकाशयोर्न समं ज्यायानाकाशादिति श्रुतेः॥ क्वचिदाकाशसाम्यं तु ब्रह्मणो यत्किंचित्सर्वसर्वसंबंधेन व्यपदि
श्यते असत्कृतेन वा पंचीकरणादस्पर्शत्वमसिद्धं कार्यद्रव्यत्वान्निरवयवत्वम[illegible]प्यसिद्धं द्रव्यत्वजातिश्चात्मन्यसिद्धेत्यर्थः॥ नि
त्यत्वांशेन साम्यं न विवक्षितं ननु स यथानंतोऽयमाकाश एवमनंत आत्मेति श्रुतिर्नित्यत्वेनैव साम्यं ब्रूते नेत्याह॥ ए
तेनेति॥ आकाशस्य कार्यत्वेनानित्यत्वादित्यर्थः॥ श्रुतिस्त्वापेक्षिकानंत्यद्वारा मुख्यानंत्यं संबोधयतीति भावः॥ न्यन
हा चाकाशस्य न मुख्योपमानत्वमित्याह॥ ज्यायानिति॥ मुख्योपमानासत्त्वे श्रुतिर्नतस्येति॥ तस्मादाकाशस्योपमा
नत्वमात्रेण नित्यत्वं नास्तीत्यर्थः॥ अनित्यत्वे श्रुतिमाह॥ अतोऽन्यदिति॥ यत्तु एकस्यैव संभूतशब्दस्य गौणत्वं मुख्यत्वं
चेति॥ तन्न॥ आकाशेऽपि तस्य मुख्यत्वसंभवादित्याह॥ तपसीति॥ बलवत्तित्तिरिश्रुत्या छान्दोग्यश्रुतेर्नयनादेकवाक्यत
यासद्यष्टिर्ब्रह्मास्मिन्निति समन्वयसूत्रमुपसंहरति॥ तस्मादिति॥ किंकारणमात्रस्य साजात्यनियमः उत समवायिनः त
त्राद्यं निरस्य द्वितीयं शंकते॥ स्यादेतदिति॥ किं समवायितावच्छेदकधर्मेण साजात्यमुत सत्त्वादिना॥ नाद्य इत्याह॥
तद्पीति॥ न च रज्ज्वादिना द्रव्यान्तरमिति वाच्यं॥ पटादेरपि तथात्वापातात्॥ द्वितीयोऽसमदिष्टः॥ आत्माविद्ययोर्द्वि
सत्त्वेन साजात्यादित्याह॥ सत्त्वेति॥ उपादानस्य साजात्यनियमं निरस्य संयुक्तानेकत्वनियमम द्वितीयस्यासंगस्याप्या
त्वेन उपादानत्वसिद्धये निरस्यति नापीत्यादिना॥ किमारंभकमात्रस्यायं नियमः उत द्रव्यारंभकस्य नाद्य इत्याह॥ अणिविति॥

सा२

=ननु क्षीरं न नश्यतीति चेन्नाहितद्रसांतरमेवारभ्यते न दध्यामलकं द्रव्यमित्यत आह रसेति। ननु गुणएवैकद्रव्यारभको
न द्रव्यमिति स्यात्तुपाप्मातून द ... एकद्रव्यारभ्यत्वमित्यत आह द्रव्येति। ४) ३ =आद्यं ... कृतुः ... कादेः

द्व्यणुकस्य ज्ञानस्य चासमवायिकारणसंयोगजनकमाद्यं कर्म प्रयत्नादृष्टवदात्मसंयुक्ते अणुमनसी आद्यकर्मारंभके
तथापि कर्म समवायिन एकत्वादनेकत्वानियममंगमित्याह॥ एकैकेति॥ द्रव्यांतरैः समवायिभिरित्यर्थः॥ क्षितौ मुख्य
प्यारंभवादानंगीकारेण दूषयति॥ द्रव्येत्यादिना॥ नत्वेष्टुपगम्यते तस्मान्नैष नियम इति शेषः॥ यत्तु क्षीरपरमाणु
षु रसांतरोत्पत्तौ तैरेव दध्यारंभ इति तन्न॥ क्षीरनाशे मानाभावात् रसवद्धर्मोपेक द्व्यारभ्यत्वसंभवात् च द्व्यणु
कसंकेतस्य पौरुषेयस्य स्वसर्वनिर्णयाह॥ तु त्वादिति भावः॥ पिठरपाकवादे वयविन्ये वरंसन्ति॥ लोके कर्तुः सहाय
दर्शनात्॥ असहायान्ब्रह्मणः कथं सर्ग इति तत्राह॥ तथा चोक्तमिति॥ प्रागभावशून्यत्वं हेतुरप्रसिद्ध इत्याह॥
पश्चोक्तेत्यादिना॥ शब्दाश्रयत्वं विशेषः शब्दादिमानाकाशः प्रलयेनास्ति॥ नासीद्रजो नो व्योमेति श्रुतेः॥ ननु
काशाभावे काठिन्यं स्यादिति चेन्न सुशिक्षितो पंने यायिकत्तनयः नह्याकाशाभावस्तत्र मूर्तो वा काठिन्यं किं तु मूर्त
द्रव्यविशेषः तत्संयोगविशेषो काठिन्यं तच्च प्रलयेनास्तीति भावः॥ आकाशशरीरं ब्रह्मेति श्रुतेरन्यो लय
वद्ब्रह्मस्वभावस्याकाशस्य सति ब्रह्मणि कथमभावस्तत्राह॥ यथा चेति॥ विभुत्वादाकाशसमं ब्रह्मेति श्रुत
र्थः॥ विभुत्वास्पर्शद्रव्यत्वनिरवयवद्रव्यत्वलिंगानां विभक्तत्वादिलिंगसहितागमबाध्यमाह॥ यदपीत्यादिना॥
र्थः॥ विभुत्वास्पर्शद्रव्यत्वनिरवयवद्रव्यत्वलिंगानां ... गुणाश्रयत्वमेव हेतुः॥ तच्चस्व समानसत्ताक गुण
प्यर्मि विकाराभावे गुणनाशेन स्यादितितर्काधर्मनिमित्तापदं गुणाश्रयत्वमेव हेतुः॥ ... स्वरूपासिद्धिमप्याह॥ विभुत्वादीनां चेति॥ सर्वमूर्तसंयो
वत्वमतो निर्गुणात्मनि व्यभिचारः मूर्तत्वमादिशब्दार्थः॥ स्वरूपासिद्धिमप्याह॥ विभुत्वादीनां चेति॥ सर्वमूर्तसंयो
गः परिणाम विशेषेणाविभुत्वं निर्गुणात्मनि दृष्टांते नास्ति संयोगस्य सावयवत्वनियतस्याजत्वसाध्यविरुद्धता च स्वरूपोप
न यरूपं तु विभुत्वमात्माकाशयोर्न समंजसं तथानाकाशादिति श्रुतेः॥ क्वचिदाकाशसाम्यं तु ब्रह्मणो यत्किंचित्सर्वसंबंधेन
व्यपदिश्यते॥ असक्तत्वेन वा पंचीकरणादस्पृष्टत्वमसिद्धं कार्यद्रव्यत्वान्निरवयवत्वमप्यसिद्धं द्रव्यत्वजातिश्चात्मन्यसिद्धेत्यर्थः

टी म

=सर्वमूर्तसंयोगस्य विभुत्वलक्षणस्येत्यर्थः २

सो

निरवयवत्वेन साम्यं न विवक्षितं ननु सर्वं यथा नंतोयमाकाश एवमनंत आत्मेति श्रुतिर्निरवयवत्वे नैव साम्यं ब्रूते तेनेत्याह ॥ एने
नेति ॥ आकाशस्य कार्यत्वेनानित्यत्वादित्यर्थः ॥ श्रुतिस्त्वापेक्षितानंत्यं स्वाधारमुख्यानंत्यं बोधयतीति भावः ॥ अनेन ताच्छी
काशस्य न मुख्योपमानत्वमित्याह ॥ ज्यायानिति ॥ मुख्योपमानासत्त्वे श्रुतिर्न तस्येति ॥ तस्मादाकाशस्योपमानत्वमा
नत्वमात्रेण निरवत्वं नास्तीति भावः ॥ अनित्यत्वे श्रुतिमाह ॥ अतोन्यदिति ॥ यत्तु एकस्यैव संभृत शब्दस्य गौणत्वं मुख्य
त्वं चेति तन्न ॥ आकाशे रोपितस्य मुख्यसंभवादित्याह ॥ तपसीति ॥ बहुवृत्तित्तिरिश्रुत्या छांदोग्यश्रुतेर्नयनादेकवाक्य
तया सर्वत्र ब्रह्मात्मनि समन्वय इत्युपसंहरति ॥ तस्मादिति ॥ एतेन मातरिश्वा व्याख्यातः ॥ अतिदेशात्वीत्र पृथक् संगत्यापे
क्षा ॥ तत्तेजोसृजतेति श्रुतेराकाशाद्वायुरिति श्रुत्याविरोधोस्ति न वेति एकवाक्यत्वभावाभावाभ्यां संशये गौणपक्षपूर्वपक्षसिद्धां
तपक्षानतिदिशति तत्रापीत्यादिना ॥ पूर्वत्राकाशानंतर्यं तेजसः स्थापितं तत्र वायुतेजसोः तुल्यवदानंतर्यं वायोरग्निरिति श्रु
तिक्रमबाधात् वो बाधिपर्ये तेजः श्राधम्यभंगान्नैकवाक्यतेति पूर्वपक्षे गौणवाक्यमिति प्राप्यमाह ॥ तन्नवेति ॥ अस्तमयप्रतिषेधो मु
ख्या सत्स संभवे लिंगं वायुश्चांतरिक्षं चैतदमृतमिति तस्यैव लिंगस्याभ्यासः वायुरेव व्यष्टिः समष्टिरिति सर्वात्मत्वं लिंगांत
रमादिशब्दार्थः ॥ तथा संवर्गविद्यायां वायुर्हि वै तान् सर्वानग्न्यादीन् संहरतीति शब्दमात्रेणैश्वर्यश्रवणं लिंगांतरग्र
हः ॥ एतेल्लिंगे वायुमुख्यायैतत्र ति प्रतीतेरुपसत्ति गौणीत्यविरोधः ॥ श्रुत्योरिति प्राप्तेप्रतिपिपादयिषितप्रतिज्ञा श्रु
तेर्बलीयस्त्वात्तत्साध्यकानां तत्र तत्र बाधे सति वाक्यानां भक्त्यस्त्वादुक्तेविभक्तत्वादि लिंगानुग्रहाच्च मुख्यैव वायो
रुत्पत्तिस्तथा चाकाशाद्वायुस्तस्मात्तेजोसृजतेति श्रुत्योरेकवाक्यतया ब्रह्मणि समन्वयः ॥ लिंगानित्यपास्य वा
युस्तावकत्वादपेक्षितत्याख्येयानीति मुख्यसिद्धांतमतमाह ॥ प्रतिज्ञेत्यादिना ॥ कृतं प्रतिविध्यानं आपेक्षि
कत्वेन समाध्यानयस्य तन्नथा ॥ अधिकरणारंभमाक्षिप्य काममधिकामीशंकामाह ॥ नन्वित्यादिना ॥ वायुर्हि वै तान् सर्वा
न् सर्वं केरत्यादिशब्दमात्रं शंकामूलं नार्थैरिति द्योतनार्थं मात्रपदं तामेव शंकामाह ॥ संवर्गेति ॥ व्यष्टिसमष्ट्युपास्तिर्वा

त्व न ता घ

१२

ना०भा०टि०रा०

द्वि०ध्या०

४०

युंदिशां च संवेदेत्युपास्तिश्चादिशब्दार्थः ॥ असंभवस्तु सतोनुपपत्तेः ॥ अनाद्यनंतं महतः परं ध्रुवं न चास्य कश्चि
ज्जनिता स चादिर्ब्रह्मानादित्वश्रुतीनां ह जातो भवसि विश्वतोमुख इत्युत्पत्तिश्रुत्या च विरोधोस्ति न वेत्येकवाक्यता
भावाभावाभ्यां संदेहे अस्ति विरोध इति पूर्वपक्षो यथा वाय्वादेरमृतत्वादिकमुत्पत्तिश्रुतिबलादापेक्षिकं
तथा ब्रह्मानादित्वमापेक्षिकमिति दृष्टांतसंगमा एकदेशिपक्षं प्रापयति ॥ वियदिति ॥ ब्रह्म कुतश्चिज्जा

५

यते कारणत्वादाकाशादिति अनुमानानुग्राह्यजन्मश्रुतिर्बलीयसीत्याह ॥ तथेति ॥ न चानादिकारणाभा
वेनानवस्था बीजांकुरवदनादित्वोपपत्तेः ॥ दीपाद्दीपवद्ब्रह्मांतराद्ब्रह्मांतरोत्पत्तिश्रुत्या चानादित्वश्रुति
मैपि स्यनादित्वं घनं तद्ब्रह्म समन्वयासिद्धिरिति प्राप्ते मुख्यसिद्धांतमाह ॥ तामिति ॥ ब्रह्म न जायते कारणशून्य
त्वान्नरविषाणवत् व्यतिरेकेण घटवच्चेत्यनुमानानुग्राह्याद्विपक्षे चाकारणककार्यवादप्रसंगाद्ब्रह्मानादित्वश्रु
तयो बलीयस्य इति कारणत्वलिंगबाध्याजन्मश्रुतिः कार्या ... देन व्याख्येयेत्यनाद्यंतस्य ... न्वयासिद्धि
रिति सिद्धांतफलं न च हेत्वसिद्धिः कारणस्यानिरूपणात् तथाहि ॥ किं सन्मात्रस्य ब्रह्मणः सन्मात्रमेव सामान्यं का
रणं सद्विशेषो वा असद्वानत्र व्यापीत्याह ॥ सन्मात्रं हीत्यादिना ॥ दीपस्तु दृष्टांतरे निमित्त ... मित्यनुदाहरणं
वियत्पवनयोर्ब्रह्मणश्च विभक्तत्वाविभक्तत्वाभ्यां कारणभावाभावाभ्यां च वैषम्यं ॥ कारणत्वलिंगस्याप्रामा
णिकानवस्थातर्केणापि बाध्यमाह ॥ न च विकारस्येत्यादिना ॥ कारणस्यानभ्युपगमे यदृच्छावादप्रसंगः ॥ अनादिका
रणानभ्युपगमेनवस्थाप्रसंगः तदभ्युपगमे ब्रह्मवादप्रसंगः कारणांतरस्य प्रधानादेर्निरासादिति भावः ॥ तेजोतः त

४०

थाह्याह ॥ तत्तेजोसृजत ॥ वायोरग्निरिति च श्रुत्योर्विरोधोस्ति न वेति संदेहे सामान्यात् सामान्योत्पत्त्यसंभवेपि
ब्रह्मवाय्वोः सामान्ययोस्तेजोरूपविशेषोपादानत्वसंभवात्तुल्यबलतयास्ति विरोध इति प्रत्युदाहरणेन पूर्वपक्षः ॥

६

वि

सर्वत्राध्यापसमाप्तेरेक[illegible]वाक्यत्वासंभवसंभवौ संशयबीजं पूर्वपक्षे श्रुतीनां विरोधादप्रामाण्यं फलं सिद्धांते प्रा-
माण्यमिति तु क्रमेस्मर्तव्यं ॥ एवं पूर्वपक्षे कार्यमात्रस्य विवर्तत्वात् कल्पितस्य वायोस्तेजः । कल्पनाधिष्ठानत्वा-
पेगात् ॥ ब्रह्मैव वा तेजस उपादानं सर्वकार्याणां ब्रह्मैवोपादानमित्यर्थे श्रुतीनां तात्पर्यस्वाच्च तदनुरोधाद्वायो-
रिति क्रमार्थी पंचमीत्यविरोध इत्येकदेशी सिद्धांतं प्रापयति ॥ प्राप्तं तावद्ब्रह्मयोनितेज इत्यादिना ॥ श्रुती-
नां विरोधमात्रोपन्यासे पूर्वपक्षः ॥ अपसिद्धांतेनाविरोधात्तावदेकदेशिपक्ष इति ज्ञेयं ॥ तदुभयमपि मुख्यसि-
द्धांतापेक्षया पूर्वपक्षत्वेन व्यवस्थाप्यते ॥ सिद्धांतयति ॥ एवं प्राप्त इति ॥ कदर्थिता बाधितार्थेति यावत् ॥ वायोस्ते-
जः प्रकृतित्वं पंचमीश्रुत्या निर्धारितं ॥ न च कल्पितस्योपादानत्वासंभवः ॥ अधिष्ठानत्वासंभवेपि मृदादि-
वत्परिणामित्वसंभवात्तु सतस्तु ब्रह्मणः छांदोग्ये स्रष्टृत्वमात्रं श्रुतं नोपादानत्वं न च बहु स्यामिति कार्योप्रे-
देक्षणलिंगादुपादानत्वसिद्धिः लिंगाच्छ्रुतेर्बलीयस्त्वेन श्रुतिविरोधेन लिंगस्यानेयत्वात् नयनं चेच्छ वायोर्ब्रह्मा-
नन्यत्वात्तदायुजस्यापि तेजसो ब्रह्मप्रकृतिकत्वमविरुद्धमिति सिद्धांतग्रंथाशयः ॥ इहाधिकारादिति ॥ वायोरग्निः संभ-
वतीति वाक्ये संबंधादित्यर्थः ॥ तदधिकारे संभूत्यधिकारे निरपेक्षकारकविभक्तेरुपपदसापेक्षविभक्त्यपेक्षया प्रब-
लत्वाच्च न क्रमार्था पंचमीत्याह ॥ अपि चेति ॥ ऊर्ध्वमनंतरमिति वोपपदं विना पंचमीमात्रात् क्रमो न भातीति कल्प्य उपपदा-
र्थप्रयोगः ॥ प्रकृत्याख्यापादानकारके तु निरपेक्षं पंचम्या प्राप्तेति विशेषतोत्र प्रकरणादपादानार्थितं पंचम्याः क्लृप्तं कल्प्येन च
कल्प्ये सति विरोधे बाध्यमिति स्थितिरित्यर्थः ॥ पारंपर्यजत्वमेवाह ॥ परमेति ॥ तस्माद्धेनोः यं तत्पक्षीरं साक्षात्का

न ५

ग

ना

१०१मा०टि०२।० यद्धापी सादिना३

द्वि०ध्या०

पेद्ध्यादिकं तु पारंपर्येणमित्यर्थः ॥ दधिसंस्पृष्टं कठिनक्षीरमामिक्षा ब्रह्मणो वायुभावेमानमाह ॥ दर्शयति चेति ॥ पारंपर्ये
जस्यापि तज्जत्वव्यपदेशो ...तिमाह ॥ तथा चेति ॥ अंतःकरणादिभ्यो जायमानवाय्वादीनां मन्त एवेत्सवधारणक
यभिसारो स्याहाँ ब्रह्मणाद्यापरंपरयोईश्वरत्वं रूपत्वात्तज्जत्वादपरमकारणान्तरनिरासार्थं अवधारणं युक्तमिति शेषः ॥
एतत्सदार्थमाह ॥ तासामिति ॥ तज्जत्वानि साधुत्वश्रुतीनां साक्षात्ब्रह्मणाद्या ब्रह्मजत्वमात्रोपपत्तेरित्यर्थः ॥ अत्र
मश्रुतीनां बलवत्क्रमश्रुत्यनुसारेणैकवाक्यत्वाद्वियदाद्युक्ता तेजःकारणब्रह्मणि समन्वय इति सिद्धं ॥ आपः ॥ अ
तिदेशोयं तथा ह्याथर्वणे मुंडकग्रंथे एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य
धारिणी तिमंत्रे अपां ब्रह्मजत्वं श्रुतं अग्नेरापइति श्रुसा तस्य विरोधोस्ति न वेति संदेहे तुल्यत्वादस्ति विरोध इति
पूर्वपक्षे अपामग्निदाहकत्वेन विरोधादग्निजत्वासंभवात् क्रमार्थपंचमी सविरोधेरसाधिकाशंकायामुक्तते
जोन्यायमिति दिशय व्याचष्टे ॥ अन्तरेति ॥ प्रत्यक्षविरोधे कथमपामग्निजत्वनिर्णयस्तत्राह ॥ सतिवचनइति
त्रिवृत्कृतयोरप्तेजसोर्विरोधे प्यग्नेरापइति वचनादतींद्रिययोस्तयोर्नास्ति विरोध इति निर्णीयत इत्यर्थः ॥
नकेवलं श्रुत्यविरोधज्ञानायायमतिदेशः किंच प्रकृतोक्तक्रमनिर्णयार्थं चेत्याह ॥ तेजसस्त्विति ॥ तेजो भावापन्नं
ब्रह्मणि श्रुतिसमन्वय इति सिद्धं ॥ पृथिव्यधिकाराधिकाररूपशब्दांतरेभ्यः विषयमुक्त्वान्न शब्दमहाभूतप्रकरणाभ्यां
संशयमाह ॥ ता इति ॥ अभ्यवहार्यं भक्ष्यमत्र श्रुतौ मपन्नमोदनादिकं न तदा अद्भ्यः पृथिवीति श्रुत्या विरोधः ॥ यदि
पृथिवी तदा न विरोध इति फलं बोध्यं अप्पृथिव्योः कार्यकारणभावादधिकरणसंगतिः ॥ अन्नश्रुतिरविशेषान्नवत्व
लिंगाभ्यां पूर्वपक्षः ॥ तदेव तत्रैव तथा च क्वचिदन्नं क्वचिदद्भ्यः पृथिवीत्येतोन्नमिति विरोधात्रैकवाक्यतेति प्राप्ते
सिद्धांतयति ॥ एवं प्राप्त इति ॥ अधिकारः प्रकरणं रूपं चिह्नं पयः क्षीरं तद्वसा दुरं श्वेतं अंगारवत् रोहितं रक्तं ॥

स्म वा तस्म तु पं ४०

शब्दान्तरशाद्बितं स्थानं व्याचष्टे ॥ श्रुत्यन्तरमपीति ॥ अबानन्तर्यं पृथिव्याः स्थानं श्रुत्यन्तरसिद्धं तेनाप्यन्नस्य पृथिवी
त्वमित्यर्थः ॥ तत्तत्र सृष्टिकाले यदपां शरः योमंडवत्घनीभावः आसीत् स एव समहन्यत कठिनसंघातोऽभूत् सा

परिणतिः ३

पांकठिनसंहतिः पृथिव्यभूदिति श्रुत्यर्थः ॥ ब्रीहाद्यन्नसर्गः कस्मिन् स्थान इति विवक्षायामाह ॥ पृथिव्या स्तीति
पंचमीयं ॥ दृष्टिमन्त्रलिंगसहितान्नश्रुतेः कथं प्रकरणलिंगस्थानैर्बाध इत्याशंक्याह ॥ वाक्यशेषोपीति ॥
प्रबलदुर्बलप्रमाणसन्निपाते बहूनां दुर्बलानामसंतबाध्यादूरं प्रबलप्रमाणस्याल्पबाधेन कथंचिन्नय
नमिति न्यायेन श्रुतिलिंगयोरन्नमात्रनिष्ठत्वं बाधित्वा नानैवौमकपृथिवीनिष्ठत्वं नीयते ताभ्यामन्नमात्र
ग्रहे प्रकरणादीनां पृथिवीमात्रविषयाणामसंतबाधापत्तेरिति भावः ॥ अन्नस्य वृष्टिजत्वोक्तिद्वारा पृथिव्या अपू
जन्यत्वं सूच्यते ॥ पृथिव्यन्ना ॥ पृथिवीत्वादन्नवदिति सनुमानादि सक्षरार्थः ॥ एवं तित्तिरिश्रुत्यनुसारेण छंदोग
श्रुतेर्नयनादविरुद्धो भूतसृष्टिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं ॥ संप्रति तानि भूतान्याश्रित्य साश्रयाश्रयिभावसं
गसातेषां स्वातंत्र्यमाशंक्य निषेधति ॥ तदभिध्यानादेव तु तल्लिंगात् सः ॥ उक्तभूतान्याश्रित्य संशयपूर्वपक्षौ दर्शयति ॥
किमिमानीत्यादिना ॥ संशयबीजानुक्तौ पूर्वोत्तरपक्षयुक्तयो बीजमिति ज्ञेयं ॥ नन्वत्र भूतानां किं स्वतंत्रेणोपादानमाशंक्य
ते कर्तृत्वं वा नाद्यः रचनानुपपत्तेरित्यादिन्यायविरोधादिति शंकते ॥ नन्विति ॥ न द्वितीयः ॥ अचेतनत्वादिति भावः ॥ यथा म

त्य

नुष्यादिशब्दैस्तत्तद्देहाभिमानिनो जीवा उच्यंते ॥ तथाकाशाद्वायुरित्यादिश्रुतौ आकाशादिशब्दैस्तत्तद्भूताभिमानिदेवता
उच्यंते ॥ तासां स्वकार्ये वाय्वादौ कर्तृत्वसंभवान्निरपेक्षनिमित्तत्वं पंचम्यर्थः ॥ एवं तदात्मानं स्वयमकुरुतेति श्रुतौ स्वयमिति
विशेषणात् ब्रह्मणोन्यानपेक्षं सर्वकर्तृत्वं श्रुतं तथा च मिथो निरपेक्षेश्वरभूतकर्तृश्रुत्योर्विरोधान्न ब्रह्मणि समन्वय इति

प

सफलं पूर्वपक्षमाह ॥ नैष दोष इति ॥ भूतानां तदभिमानिदेवतानामित्यर्थः ॥ यथाकाशादिभावापन्नब्रह्मणः

भ.गी.टी.

४२

सर्वोपादानत्वं तत्र यातदभिमानिदेवताजीवभावमापन्नब्रह्मणः कर्तृत्वमिति परंपरया ईश्वरकर्तृत्वश्रुत्यविरोधः स्वयमिति विशेष
णं ईश्वरांतरनिरासार्थं न जीवभावापेक्षानिरासार्थमित्येकदेशीसिद्धांतदूषणीयः मुख्यसिद्धांतमाह ॥ एवं प्राप्त इति ॥ आकाशा
दिशब्दैर्न देवतालक्षणा मुख्यार्थबाधकाभावात् पंचम्यश्च प्रकृतिवाचिन्यः तत्र रूढतरत्वात् तथा चाचेतनानां कर्तृत्वमेव नासि
कुतः ईश्वरानपेक्षकर्तृत्वं यद्यपि देवतानां कर्तृत्वं संभवति तथापि ईश्वरनियम्यत्वश्रवणाच्चेतनानामपि न स्वातंत्र्यं किमुताचे
तनानां अतस्तासां न स्वातंत्र्यमिति मतोक्तं तल्लिंगादिति तत्तच्चेतनाधिष्ठितस्य ब्रह्मण उपादानत्वेपि जीवव्यावृत्तेश्वरताका
रेणैव साक्षात्सर्वकर्तृत्वं न जीवत्वद्वारा तस्य सर्वनियंतृत्वात् तल्लिंगादिसूत्रार्थः ॥ प्रकरणाच्च साक्षात्सर्वकर्तृत्वमित्याह ॥ तथेति ॥ प
वीक्षमनुष्य निरस्यति ॥ यदिति ॥ परमेश्वरस्यांतर्यामिभावेनावेशः संबंधः तद्वशाद्गतेक्षीक्षणश्रवणं नैतावता तेषां चेत
नत्वं स्वातंत्र्यं वेत्यर्थः ॥ अनेनेन तदभिध्यानादिति पदं व्याख्यातं तत्र सूत्रयोजना ॥ स ईश्वरस्तत्तदात्मना स्थितोपि साक्षा
देव सर्वकर्ता तस्यांतर्यामित्वलिंगात् जीवत्वद्वारा कर्तृत्वं नाम जीवस्यैव कर्तृत्वमिति अंतर्यामिणः कर्तृत्वासिद्धेरंतर्यामि
त्वायोगात् तदभिध्यानादेवेश्वरेक्षणादेव प्रवृत्तेषु श्रुतेक्षणोपपत्तेश्चेति तत्तेज ऐक्षतेति श्रुतईक्षिता परमात्मैवेत्यत्र
श्रुत्यंतरं प्रकरणं चाह ॥ नान्यदिति ॥ तस्मादीश्वरपदार्थलोपप्रसंगेनेश्वरादन्यस्य स्वातंत्र्याभावान्नेश्वरकर्तृत्वश्रुतेर्न
तच्छ्रुत्याविरोध इति सिद्धं ॥ विपर्ययेण तु ॥ यद्यप्यत्र श्रुतिविरोधो न परिक्रियते तस्य संगतिस्तथाप्युत्पत्तिक्रमे निरूपिते
लयक्रमो बुद्धिस्थो विचार्यत इति प्रासंगिक्यावेवपादावांतरसंगतिरिति मत्वाह ॥ भूतानामिति ॥ अत्रोत्पत्तिक्रमाद्वि
परीतक्रमनिर्णयात् सिद्धांते भूतानां प्रातिलोम्येन लयध्यानपूर्वकं प्रत्यक्ब्रह्मणि मनःसमाधानं फलं पूर्वपक्षे तु का
रणनाशे सति कार्यनाश इति सर्वलयाधारब्रह्मासिद्धेरुक्तसमाध्यसिद्धिरिति भेदः ॥ सतीति महाभूतानां लये क्रमचिं
तासएव नास्तीति केचित्तान्प्रत्याह ॥ त्रयोपीति ॥ अनियमस्य सनास्थयोक्तं श्रौतस्य प्रलयस्य क्रमाकांक्षायां श्रौतोत्पत्ति
क्रम एव ग्राह्यः श्रौतत्वेनांतरंगत्वादिसेवं पूर्वपक्षः ॥ सति कारणे कार्यं न लयं प्रतीतीति लोके दृश्यते ॥ तथा च श्रौतोत्पत्तिक्र
मालयेन गृह्यते ॥ किंतु लौकिकक्रम एव गृह्यते ॥ श्रुतेर्लौकिकदृष्टपदार्थबोधाधीनत्वेन श्रौतादपि लौकिकस्यांतरंगत्वाद्योग्यता

४२

305

ना०भा०टी०रा०

४३

ब्र
सू
नी
ला

स्यादिममर्थेन विकारार्थतेति वाच्यं॥ करणानां विपन्नत्वेन कार्यतया कारणाकांक्षायामन्नमयमित्यादिश्रुतेराकांक्षि
तौ त्तिप्रयर्थमसति बाधके मयटो विकारार्थतायायुक्तत्वात् प्राचुर्यार्थत्वेन नाकांक्षितोक्तिप्रसंगाच्च नैव तेजोबन्नप्राणाने
वाक् प्राणमनसां वृद्धिः तदभावे तन्नाशादिति विकारत्वस्य दर्शितत्वान्नात्र विवादावसरः॥ यद्वा स्थूलस्य तदधीनानां तेषां वृद्धिवि
कारोमेंडथीः श्रूयमाणो भौतिकत्वलिंगं प्राणेंद्रियमनांसि भौतिकानि तदधीनवृद्धिमत्त्वाद्देहवदिति भावः॥ ननु तेषां भौ
तिकत्वे कथमाथर्वणे पृथक् जन्मकथनं फलजन्मो तेप्येव तज्जन्मसिद्धेरित्यत आह॥ व्यपदेशोपीति॥ प्रौढवादेन तेषामभौतिक
त्वमुपेत्यापि श्रुत्यविरोधमाह॥ अथवेति॥ करणोत्पत्तानां च पूर्वापरत्वे मानाभावात् नोक्तभूतक्रमभंगः॥ न चाथर्वणवाक्यं मा
नं पाठमात्रेदित्यर्थः॥ तर्हि क्रमभंग कथं क्रमनिर्णयस्तत्राह॥ तथेति॥ इदं स्थूलं तु सन्तेः प्राक् प्रजापतिः सूत्रात्मासीत्॥ अत्र सृष्ट
भूतानामेकप्रजापतिसर्गः प्रथमः ततो मन आदिसर्ग इति क्रमो भातीति भावः॥ एवं च भूतकरणोत्पत्तिश्रुत्योरविरोधाद्ब्रह्म
णि समन्वयसिद्धिरिति सिद्धान्तफलं गमयति॥ तस्मादिति॥ चराचरत्वाविरोधात्॥ एवं तावत्सदवाच्यकारणनिर्णयाय कृत
श्रुतीनां विरोधो निरस्त इदानीमापादसमाप्तेस्त्वंपदार्थश्रुत्युपयोगिजीवश्रुतीनां विरोधो निरस्यते॥ इह जीवो न जायते म्रियते इ
त्यादिश्रुतेः जातेष्टिश्राद्धशास्त्रेण विरोधोस्ति न वेति संदेहे विरोधोस्तीति प्राप्ते लोके किं जन्मादिव्यपदेशास्त्र सहायाज्जातेष्ट्या
दिशास्त्रेण जीवाजत्वादिश्रुतिबाध इति पूर्वपक्षयति॥ नेति॥ तथा च कारणेनोत्पत्तिक्रमेण भूतक्रमस्य बाधाभावेपि जी
वोत्पत्तिक्रमेण बाध्यः स्यादिति प्रत्युदाहरणसंगतिः पूर्वपक्षे जीवब्रह्मैक्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः॥ चेतनजन्मा
द्युद्देशेन चेतनस्य तस्य जन्मान्तरीयफलसाधनं जातकर्मादिसंस्कारो विधीयते॥ तथा चोद्देश्यविधेययोर्मिथो विरोधे सति वि
धेयाविरोध्येनोद्देश्यं नेयमिति न्यायाज्जन्मादिकं देहोपाधिकं न स्वतः इति सिद्धान्तयति॥ नामित्यादिना॥ जीवापेतं जीवेन सक्तं इदं शरी
रं जन्मादिव्यपदेशास्त्वचरदेहविषयो मुख्यः जीवे तु भाक्तो गौणः औपाधिकजन्मादिविषयः सादुपाधिजन्मनाशेभावादस्तसप्त
वादिति सूत्रार्थः॥ जीवस्योपाधिकजन्ममरणयोः श्रुतिमप्याह॥ स वा इति॥ जायमान इत्यादि पदार्थमाह॥ शरीरमिति म्रीयमाणत्वमा

ध
४३

चष्टे॥ उत्क्रामन्निति॥ ननु तत्र तत्र जीवस्य जन्मादि निरस्यते अत्रापि तन्निरासे पुनरुक्तिरित्यत आह॥ जीवस्येति॥ त
देवं जातेष्ट्यादिशास्त्रस्यौपाधिकजन्मादिविषयत्वाज्जीवानाद्यंतत्वश्रुतिविरोध इति सिद्धं॥ नात्माऽश्रुतेर्नित्यत्वाच्च
ताभ्यः॥ अग्नेर्विस्फुलिंगवदेतस्मादात्मनः सर्वे जीवा आत्मानो व्युच्चरंतीत्यादिजीवोत्पत्तिश्रुतीनां स एष इह प्रवि
ष्ट आनखाग्रेभ्यः अजो ह्यात्मेत्याद्यनुत्पत्तिश्रुतीनां च मिथो विरोधात्संशये॥ मोक्षांतदेहजन्मनाशयोर्जीवे जन्म
नाशौ देहांतरभोग्यस्वर्गादिहेतुविध्याद्यसंभवात्कल्प्यौ घटतु योर्न महद्वजीवस्यतौ किं न स्यातां तत्संभवादिति प्रत्युदा
हरणेन पूर्वपक्षमाह॥ तत्र प्राप्तं तावदिति॥ फलं पूर्ववत् उपरोध्यो बाध्यः॥ नन्वविकृतब्रह्मैवात्र प्रविष्टं जीवो न तत्त्वांतरमि
ति प्रतिज्ञासिद्धिस्तत्राह॥ न चेति॥ जीवः परस्माद्भिन्नः विरुद्धधर्मवत्त्वात् भिन्नस्याविकारित्वे प्रतिज्ञा बाध्य इति त
र्कोपेतविभक्तत्वलिंगानुगृहीतोत्पत्तिश्रुतेर्बलीयस्त्वात्प्रवेशश्रुतिर्जीवरूपविकारात्मना प्रविष्ट ईश्वर इति व्याख्येये
ति समुदायार्थः॥ सरूपा इति दृष्टांतश्रुतेर्भावा जीवा इति निश्चीयते॥ ननु आत्मन आकाशः संभूत इत्यादौ जीवोत्पत्त्यश्र
वणादनुत्पत्तिस्तत्राह॥ न चेति॥ एवं विकारत्वे सति विकारप्रपंचात्मना स्वात्मानमकुरुतेतिवद्विकारजीवात्मना प्रवेशा
द इत्यर्थः॥ अजत्वादिश्रुतिः कल्पमध्ये जीवस्यानुत्पत्त्यादिविषया तत्त्वमसीतिश्रुतिश्च मृद्घट इतिवद्वाक्यवत् व्याख्येये
ति प्राप्ते सिद्धांतयति॥ एवमिति॥ धर्मिवत्तत्सत्त्वे विभागो हेतुरौपाधिको वा नाद्य असिद्धेरित्याह॥ अत्रोच्यते नात्मेति॥ द्वि
तीये जीवस्य न स्वतो विकारत्वसिद्धिः अप्रयोजकत्वादित्याह॥ बुद्ध्यादीति॥ औपाधिके भेदे मानमाह॥ तथा चेति॥
मयपदेन विकारार्थत्वमाशंक्याह॥ तन्मयत्वं चेति॥ जाल्मः कामजडः स्त्रीपरतंत्रः स्त्रीमय इतिवज्जीवस्य स्वरूपाज्ञानात्
बुद्ध्यादिपरतंत्रत्वेन भेदकर्तृत्वादिकात् प्राचुर्यार्थे मयट्प्रयोग इत्यर्थः॥ लिंगानि निरस्य तदनुग्राह्यश्रुतेर्गतिमाह॥ य
दपीति॥ जीवस्यौपाधिकजन्मनाशयोः श्रुतिमाह॥ एतेभ्य इति देहात्मना परिणतेभ्यो भूतेभ्यः समुत्थाय जनित्वा ता
न्येव नश्यमानान्यनु पश्चाद्विनश्यति प्रेत्यौपाधिकमरणानंतरं संज्ञा नास्तीत्यर्थः॥ ननु प्रज्ञानघनः संज्ञा नास्तीति च

तथेति

भा

विरुद्धमित्यत आह॥ तथेति॥ उपाधिलयादित्युपशेषज्ञानाभावस्य संज्ञाभावो नात्मस्वरूपविज्ञानाभावस्तदुत्तरं प्रतिपादय
तिश्रुतिरित्यन्वयः॥ अत्रैवामानिविज्ञानघनेप्रेत्य संज्ञानास्तीत्युक्त्या मामोहांतं मोहमध्यं प्रापीति मापीपददपादि
तवा निमेर्थनज्ञानाभिन्न हि तदुक्ते स्यर्थमितिमैत्रेयीप्रश्नार्थः मुनिराह॥ नवाइति॥ मोहं मोहकरं वाक्यं॥ उच्छि
तिः पूर्वावस्थानाशोधर्मो यस्येत्युच्छित्तिधर्मा अपरिणामी॥ तस्माद विशीत्यर्थः तर्हि नप्रेत्य संज्ञेतिकथमुक्तं तत्रा
ह॥ मात्रेति॥ विषयैरसंसर्गोक्त्यर्थोक्तमित्यर्थः॥ बिंबप्रतिबिंबयोरिव विरुद्धधर्मभेदो व्यस्तरसत्र हेतुमाह॥ अ
तदुर्ध्वमिति॥ जीवस्य विकारित्वे मुक्त्यमोगात्तत्वमसीति वाक्यमखंडार्थमिति वक्तव्यं॥ तथा च फलवत्प्रधान
वाक्यापेक्षितजीवनित्यत्वश्रुतीनां बलवत्वादुत्पत्त्यादिकमप्यस्तमनुवदत्युत्पत्त्यादिश्रुतीयर्थाविरोध इति सि
द्धं॥ नोत एव॥ अत्रैवायं पुरुषः स्वयं ज्योतिरित्यात्मनः स्वप्रकाशत्वश्रुतीनां पत्यं चक्षुः श्रृणवन् श्रोत्रमित्यादिसज्ञानव
त्वश्रुतिभिर्विरोधोत्र निरस्यते॥ अस्य लोकस्य चक्षुर्द्रष्टा॥ श्रोत्रं श्रोतेत्यर्थः॥ प्रागुक्तजीवानुत्पत्तिहेतुमादाय स्वप्र
काशत्व साधनात्तु साध्यप्रभावः संगतिः॥ अनुत्पत्तो हि स्वप्रकाशं ब्रह्मैवोपहितं जीव इति जीवस्य स्वप्रका
शतासिध्यति॥ न चैवं गतार्थता अनुत्पन्नस्यापि जीवस्य स्वप्रकाशत्वे ज्ञानसाध्यत्वेनवैयर्थ्यमिति तर्कसहितानि
त्यज्ञानश्रुतिबलेन स्वप्रकाशत्वश्रुतेर्बाध्यता यावब्रह्मान्यत्वशंकायां तदैक्ययोग्यतायै स्वप्रकाशत्वस्यात्र साधनात्॥
तथा च पूर्वपक्षे जीवस्य ब्रह्मैक्यायोग्यतासिद्धांते तद्योग्यतेत्यापादसमाप्तेः फलं अवगंतव्यं॥ इष्टापत्तिं निराचष्टे॥ नेयथ
इति॥ साधनोत्थीनज्ञानहानत्रस्वप्रकाशो जीवो व्यतिरेकेणाद्वरवदित्याह॥ अतः कदाचिदिति॥ यथाश्रुते भाष्ये हेतोः सा
साध्याविशेष इति मंतव्यं॥ अतो जीवस्य स्वप्रकाशत्वश्रुतिर्बाध्येति प्राप्ते सिद्धांतयति॥ एवमिति॥ नेपरब्रो निश्चयार्थः॥
न केवलं स्वप्रकाशब्रह्माभेदाज्जीवस्य स्वप्रकाशता किंतु श्रुतितोपीत्याह॥ विज्ञानमयेति॥ योयं विज्ञानमय इति श्र

म

४४

प

करणस्यार्थः ॥ असुप्तः स्वयं भासमान एवात्मा सुप्तानलुप्तव्योरान्वागादीनभिलक्ष्य चाकशीतीति स्वप्नार्थान्पश्यतीतिय
वत् ॥ अत्र स्वप्ने विज्ञातृबुद्धिसहस्य साक्षिणो विज्ञातेर्विनाशो नास्तीत्यर्थः ॥ घ्राणादिजन्यगंधादिज्ञानानुसंधानसिद्धये आ
त्मनो ज्ञानरूपत्वं वाच्यमिति श्रुत्यंतरेणाह ॥ अथेति ॥ आत्मनो नित्यचिद्रूपत्वेपि स्वत्वेऽसंगत्वान्मार्गघ्राणादिसंबंधात्तत्सं
बंधघटनात्मकवृत्त्यर्थानि ज्ञानसाधनानीति न तेषां वैयर्थ्यमित्याह ॥ नगंधेति ॥ परिच्छेदो वृत्तिः गंधाय तत्कोच्चरांते:
करणवृत्त्यपेक्षत्यर्थः ॥ सुप्तावस्थायां आत्मसत्वेपि चेतन्याभावात् [illegible] चिद्रूपत्वोक्तं दूषयति ॥ यद्वेति ॥ तत्तदा सुप्तो
न पश्यतीति यत्तत्र पश्यन्नेवालुप्तज्ञान एव सन्न पश्यतीत्यत्र हेतुः ॥ नहीति ॥ नोशायोग्यत्वादित्यर्थः ॥ किमिति न पश्यती
त्यत आह ॥ न त्विति ॥ वृत्तेः साधनाधीनत्वात्तया स्वरूपज्ञानस्य साधनाधीनत्वे हेतुरसिद्ध इत्युक्तं साधनवैयर्थ्यं न कोपि नि
रस्तः ॥ एवं नित्यसाधानि सज्ञानश्रुतीनां वृत्तिविषयत्वं व्याख्यातं ॥ आत्मा नत्वानंदमता त ॥ इत्यादितर्कान्याऽगमबाधि
णतासमर्थया भावाच्च न स्वसमवेतज्ञानवेद्यताकर्मकर्तृत्वविरोधाच्च ॥ किंच निरवयवात्मनो मनःसंयोगायोगात् ज्ञानित्यसज्ञानगु
मनःपरिणामत्वश्रुत्या कामः संकल्प इत्यादया जडत्वान्नास्माकं ज्ञाने द्वैविध्यगौरवं नित्यसनवयुमात्मनः [illegible] लापवादात्मैव ज्ञानं चेतेश्च
सिद्धं ॥ स्वप्रकाशत्वादात्मस्वरूपादीपवद्द्वैहिष्टं परिमाणमेवाश्रितात्माध्यारोप्यत्वावेन मध्यमपरिमाणो मनः स्वप्रकाशत्वमिति
विचारयति ॥ उत्क्रांतिगत्यागतीनां विषयसंशयो दर्शयति ॥ इदानीमिति ॥ नात्मा श्रुतेरित्यादिनागतार्थत्वेनोत्तरे हि भावेन वासंगस
ऋत्वश्रुतीनां महत्त्वश्रुतीनां चाविरोधकपन्नार्थमस्याधिकरणस्यारंभ इत्याह ॥ नन्वित्यादिना ॥ नकेवलं श्रुतौ लोकोप्यनु
पपन्नात्मनोणुत्वे किं त्वे बोणुरात्मेति श्रुत्यापीत्याह ॥ स्वशब्देनेति ॥ पूर्वपक्षे जीवस्याणुत्वाद्ब्रह्मैक्यासिद्धिः सिद्धांतेत्व

कू ॥

रा० भ० टि० २१०

५५

तत्सिद्धिरिति मत्वा सूत्रं व्याकुर्वन्पूर्वपक्षमाह ॥ तत्र प्राप्तमित्यादिना ॥ श्रुतेरणुरिति उत्तरसूत्राद्वाकृष्य सूत्रं पूरितं उत्क्रा-
न्तिः श्रूयत इति शेषः ॥ समुमुक्षु जीवि एते वै व्याधिभिः ॥ तस्माद्ब्रह्मलोकादिमं लोकं प्रति कर्मकर्तुमायातीत्यर्थः ॥ उत्क्रा-
न्ति रामेनो देहान्निर्गमो न संभवति ॥ येनाणुत्वं स्यात् किंतु स्वामित्वनिवृत्तिरिति केचित्तदंगीकृत्याप्यणुत्वमावश्यक-
मित्याह ॥ स्वात्मनेति ॥ उत्क्रान्तेरुत्तरयोर्गत्यागत्योः स्वात्मना कर्त्रा संबंधादणुत्वमिति सूत्रयोजना ॥ पाकोऽपस्यप-
क्तुर्वर्तते गमनाश्रयस्यागंतृत्वोक्तिः किं न स्यादित्यत आह ॥ गमेरिति ॥ गमनस्य कर्तरि संयोगविभागरूपातिशयहे-
तुत्वात्कर्त्राश्रितत्वं लोकसिद्धमित्यर्थः ॥ जीवोऽणुर्मध्यमपरिमाणत्वे सति गतिमत्त्वात्परमाणुवदित्याह ॥ अमध्य-
मिति ॥ अंगीकारं सजाति ॥ स सोऽक्षेति ॥ न स्वाम्यनिवृत्तिमात्रमुत्क्रान्तिरित्यर्थः ॥ देहान्निर्गम एवोत्क्रान्तिरिति सूत्रलिंगां-
तरमाह ॥ देहप्रदेशानामिति ॥ अपादानत्वमत्र विवक्षितं ॥ अन्येभ्यो वा मुखादिभ्य एष आत्मा निष्क्रामतीति शेषः ॥ किंच
देहमध्येऽपि जीवस्य गत्यागतिश्रुतेरणुत्वमित्याह ॥ स इति ॥ इंद्रियाणि गृह्णन् स्वापादौ हृदयं स जीवो गच्छति ॥ शुक्रं
प्रकाशकं इंद्रियग्राममादाय पुनर्जागरितस्थानमागच्छतीत्यर्थः ॥ इतराधिकारात् ब्रह्मप्रकरणात् ॥ ननु महत्वश्रु-
तेः कथं परप्रकरणस्थत्वमित्यत आह ॥ परस्यैवेति ॥ पादे दांते श्रुतिः सा परप्रकरणस्थत्वात् तु तत्संगतस्यात्त्वत्स्थं त्वेव ब्रह्म-
रूप्याधीतत्वाच्चेत्याह ॥ विरजेति ॥ निर्दोष इत्यर्थः ॥ विज्ञानमयप्रश्नस्य प्रकरणं बाध्यमिति शंकते ॥ नन्विति ॥ अ-
णोर्जीवस्य ब्रह्मणा भेदाभेदांगीकाराच्छास्त्रीयाभेददृष्ट्या महत्वोक्तिर्यथा वामदेवस्याहं मनुरिति सर्वात्मत्वोक्ति-
रित्यविरोधमाह ॥ शास्त्रेति ॥ एवमुत्क्रान्त्यादिश्रुत्याणुत्वमनुमितं तत्र श्रुतिमप्याह ॥ स्वशब्देति ॥ बालाग्रादुध्य-
तः शततमो भागस्तस्मादप्युध्यतः शततमो भागो जीव इति उभ्यं समानमनुमानमसंतान्यत्वमित्यर्थः ॥ वालः केशः

पि

ना

ण

५५

ध्या ४

तीव्रप्रोतापः शलाकाग्रमाराग्रं तस्मादुच्यते मात्रामानं यस्य सो जीवस्तथा ॥ आत्मसंयुक्तायास्त्वचो देहव्यापित्वस्य त्रोऽपि लब्ध्यिकरण
स्य महिम्नात्मनो व्यापिकार्यकारित्वमविरुद्धं ॥ त्वगात्मनोरिति ॥ संबंधस्य त्वगवयवेषु निष्ठत्वादवयविनश्चैकत्वादात्मसंयोगस्य कृ
त्स्नत्वङ्निष्ठते सर्थः ॥ सिद्धे हीति ॥ ननु सिद्धमित्युच्यते सर्थः ॥ विशेष एव वैशेष्यं चंदनबिंदोरल्पत्वस्य प्रत्यक्षत्वात् त्वग्व्या
प्त्या शीतोऽपि कार्यकारित्वकल्पना युक्ता जीवस्य त्वणुत्वे संदेहात् व्यापिकार्यदृष्ट्या व्यापित्वकल्पनमेव युक्तं व्यापिका योऽस्य योऽव्या
पी स तु स्वर्गादिति सूत्रशंकाभागार्थः ॥ आत्मात्यः व्यापिकार्यकारित्वात् चंदनबिंदुवदिति अनुमानमयुक्तं त्वगादौ व्यभिचारादि
त्याह ॥ न चात्रानुमानमिति ॥ पूर्वोक्तश्रुतिभिर्जीवस्याणुत्वनिश्चयात् हृदि स्थत्वश्रुतिभिरेकदेशस्थत्वनिश्चयाच्च न दृष्टांतवैष
म्यमिति परिहारभागार्थमाह ॥ अत्रोच्यत इति ॥ आत्मवत् तद्धर्मज्ञानस्याप्यणुत्वं स्वतः कदाचित्तु देहपरिमाणत्वमित्युक्त्वा स्वतय
व्यापित्वमिति मतांतरमाह ॥ गुणाद्वेति ॥ वाशब्देन चंदनदृष्टांतापरितोषः सूचितस्तमाह ॥ स्यादिति ॥ उत्तरसूत्रव्यावर्त्यशंकते ॥
कथमिति ॥ ज्ञानं न गुणिव्यतिरिक्तदेशव्यापि गुणत्वात् रूपवत् ॥ न च प्रभायां व्यभिचारः तस्या अपि द्रव्यत्वात् इति प्राप्ते गंधे व्यभिचा
रमाह ॥ अत्रोत्तरमिति ॥ गुणस्य व्यतिरेक आश्रयविश्लेषः ननु विश्लिष्टावयवानामल्पत्वात् द्रव्यक्षयो न भातीत्यत आह ॥ अक्षी
प्रमाणमपीति ॥ अपि च प्रचारणे पूर्वावस्थालिंगेनाक्षीयमाणमेवतद्द्रव्यमनुमीयत इत्यर्थः ॥ विमतं अविश्लिष्टावयवं पूर्वावस्था
तो गुरुत्वापचयहीनत्वात् संमतवदिति भावः ॥ शंकते ॥ स्यादेतदिति ॥ विश्लिष्टानामल्पत्वादित्युपलक्षणमवयवांतराणां प्रवेशादि
त्यपि द्रष्टव्यं ॥ विशेषो वयवानां विश्लेषप्रवेशरूपः सन्नपि न ज्ञायते ॥ तथा च गुरुत्वापचयो न भवतीति हेतोरन्यथासिद्धिरिति शंका
र्थः ॥ आरभ्यंतो यमूर्वाः परमाणवस्त्रसरेणवो वा नाघ्रातारूपवत् भूयस्याप्यनुपलब्धिप्रसंगादिति परिहरति ॥ नेति ॥ द्वितीयं प्रत्या
ह ॥ स्फुटेति ॥ त्रसरेणुगंधश्चेत्स्फुटो न स्यादित्यर्थः ॥ अतो गंधस्य पुष्पादिदेशस्थैव गुणिव्यतिरेको वाच्य इति भावः ॥ गंधो न गुणि
विश्लिष्टः गुणत्वात् रूपवदिति शंकते ॥ रूपेति ॥ विश्लेषस्य प्रत्यक्षत्वाद्बाध इत्याह ॥ नेति ॥ आत्मनश्चैतन्यगुणेनैव देहव्याप्तिरित्य

त्वश्रुतिमाह सूत्रकारः ॥ तथा च दर्शयतीति ॥ तथा चाचष्टे ॥ हृदयेति ॥ तत्रैव श्रुत्यंतरार्थं सूत्रं ॥ पृथगिति ॥ विज्ञानमिंद्रियाणां ज्ञान
रातिं विज्ञानेन चैतन्यगुणेनादाय चेतरः स्येः ॥ एतं चैतन्यगुणव्याप्तिगोचरमभिप्रायं ॥ तत्रासाणुत्वविभुत्वश्रुतीनां विरो
धादप्रामाण्यप्राप्तावणुत्वं जीवस्य विभुत्वमीश्वरस्येत्यविरोधः स एकदेशिपक्षो दर्शित इति तं दूषयन् सिद्धांतसूत्रं व्याचष्टे ॥
तद्गुणसारत्वादिना ॥ तस्मात् ब्रह्माभिन्नत्वात् विभुर्जीवः ब्रह्म यदि स्यान्नु मानं गृहीते श्रुतिस्मृती आह ॥ तथा च स वा एष पर
ति नित्यः सर्वगतः स्थाणुरचलोऽयाः स्मार्त्तवादाः एतेन जीवस्य ब्रह्माभेदज्ञानेनाणुत्वाभावधीः तस्यां तद्विरुद्धान्योन्याश्रय
इति निरस्तं ॥ प्रधानमहावाक्यानुगुणश्रुतिस्मृतिभिरणुत्वाभावनिश्चयानंतरमभेदज्ञानात् प्रधानवाक्यविरोधे गु
णभूताणुत्वश्रुतीनामौपाधिकाणुत्वविषयत्वकल्पनात् गुणे त्वन्याय्यकल्पनेति न्यायादिति भावः ॥ किं च सर्वदेहव्यापि
चैतन्यानुभवान्यथानुपपत्त्याणुत्वश्रुतयोऽप्यस्ताणुत्वविषयत्वेन नेयाः ॥ कथंचिद्दर्थवादा नेयाः ॥ लौकिकन्यायादपि ते
षां दुर्बलत्वादिति न्यायादिति मत्वाह ॥ नाणोरिति ॥ शंकते त्वगिति ॥ यच्चोक्तं त्वक्संबंधस्य त्वग्व्याप्त्या देहव्यापिनी वेदना
स्यादित्युक्तिप्रसंग इति दूषयति ॥ नेति प्रसंगस्येष्टत्वं निरस्यति ॥ पादतल एवेति ॥ तस्मादल्पमहतोः संयोगेन महद्व्यापीकत्व
कसंयोगस्य देहव्याप्त्यदर्शनात् ॥ तथा चाण्वात्मसंयोगस्त्वगेकदेशस्थ एवेति देहव्यापिवेदनानुपपत्तिः ॥ न चासिद्धांते त्व
गात्मसंबंधस्य व्यापित्वात् कंटकसंबंधे देहव्यापिवेदनाप्रसंग इति वाच्यं ॥ यावती विषयसंबद्धा त्वक् तावद्व्याप्यात्मसंबंध
स्तावद्व्यापिवेदनाहेतुरिति नियमात् न चैवं विषयत्वक्संबंध एव तद्धेतुरस्तु किमात्मव्याप्त्येति वाच्यं ॥ वेदना हि सुखं दुःखं त
दनुभवश्च ॥ न चैषां व्यापकानां कार्याणामल्पमुपादानं संभवति ॥ कार्यस्योपादानादाधिक्येनानुपपत्तेः ॥ न चैषां व्यापकत्व
मसिद्धं ॥ सूर्यतप्तस्य गंगानिमग्नस्य सर्वांगव्यापिदुःखसुखानुभवस्य दुरपन्हवत्वात् ॥ यदुक्तं गुणस्यापि गुणिविश्लेषो
योगः स्यादिति तन्नेत्याह ॥ न चाणोरिति ॥ गंधो नाश्रयाद्विश्लिष्यः गुणत्वात् रूपवदिति सूत्रागममाह ॥ तथा चेत्

या

ना
णवा
गे
ध
२६

ए

मिति॥ नच प्रत्यक्षबाधः॥ गंधस्य प्रत्यक्षत्वेपि निराश्रयत्वाऽस्याप्रत्यक्षत्वान्महत्त्वांत्रसरेणौ नामनुद्भूतस्पर्शानामुद्भूतगं
नो॥२ धानामागमात्स्फुरगंधोपलंभसंभवः अवयवांतरप्रवेशात्तेनसह साम्यलब्धत्वक्षय इति भावः॥ एवं चैतन्यस्य गु
णत्वमुपेत्य नित्यत्वात्पर्यायगुण्यात्माणुत्वं निरस्तं संप्रति तस्य गुणत्वमसिद्धमित्याह॥ यदि चैतन्यमिति॥ उत्क्रांत्यां विभुत्वे
प्रसोध्याणुत्वायुक्तेः गतिप्रदर्शनार्थं सूत्रं व्याचष्टे॥ कथमित्यादिना॥ अंतरा विज्ञानमनसी हृदि स्थितिं च प्रकृतां बु
द्धिर्योग्यत्वात्तेनैव परामृश्यते॥ बुद्धिगुणानामात्मन्यध्यासात् अणुत्वाद्युक्तिर्न स्वतः आनंत्यश्रुतिविरोधादित्या
ह॥ तथा चेति॥ अकार्यकारणद्रव्यसमानाधिकरणत्वात् तत्त्वमसीति वाक्यस्य सोयमिति वाक्यवदखंडाभेदार्थत्वादानं
त्यंस्य समणुत्वमध्यस्तमित्यर्थः॥ उक्तं चैतद्गुणाधिकरणे प्रतिपाद्यविरुद्धमुद्देश्यगतविशेषणं अविवक्षितमिति॥ वालाग्र
वाक्यमाराग्रवाक्यं चेत्युन्मानद्वयमुक्तं तत्राद्यं निरस्य द्वितीयं निरस्यति॥ तथैव तरस्मिन्नपीति॥ बुद्धेर्गुणेन निमित्तेनात्मन्यध्य न
स्तो गुणो भवतीति तेनात्मगुणेनाध्यस्तेन नैवाराग्रपरिमाणोपलक्षश्च जीवो दृष्टः स्वतस्त्वनंत एवेत्यर्थः॥ न चक्षुषा गृह्यते नापि
वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान इत्युक्तः एषोणुरात्मेत्युक्तः
पर एव॥ यदि जीवस्तथाप्यध्यस्ताणुत्वं अणुशब्दार्थ इत्याह॥ जीवस्यापीति॥ यदुक्तं पृथगुपदेशाच्चैतन्यगुणेनैवात्मनो देहव्यापि
रिति तत्राह॥ तथा प्रज्ञयेति॥ बुद्ध्या प्रज्ञेत्यर्थः॥ यदि चैतन्यं प्रज्ञा तदा भेदोपचार इत्याह॥ व्यपदेशमात्रं चेति॥ ननु चैतन्यं गुणश् रा
त त्ति भेदो मुख्योस्त्वित्यत आह॥ न ह्यत्रेति॥ निर्गुणश्रुतेरित्यर्थः॥ अन्यदपि पूर्वोक्तं बुद्ध्याद्युपाधिकमित्याह॥ हृदयेत्यादिना॥
सोत्रं दृष्टांतं विवृणोति॥ यथेति॥ असत्त्वमित्यापाततः असंसारित्वमापाद्य शेषसुबोधं॥ ननु स्वतः संसारित्वमस्तु किं बुद्ध्यु
पाधिनेत्यत आह॥ यावदेव चायमिति॥ समानो बुद्धितादात्म्यापन्नः सत्यविज्ञानं ब्रह्म तन्मयो विकारोणुरित्यर्थः किं न स्यादत
आह॥ प्रदेशांतर इति॥ विज्ञानमयो बुद्धिप्रचुर इत्यर्थः॥ केन समान इत्याकांक्षायामिति शेषः॥ श्रुतिबलात् बुद्धिमेव त्यसा

र्यात्मभाभित्वमुक्तं सति मूलेकार्यस्य वियोगासंभवाच्चेति पुनस्याप्याह ॥ अपि च मिथ्येति ॥ सम्यक् ज्ञानादेव बुध्यादिबंधध्वं
सस्य सत्र श्रुतिमाह ॥ दर्शयतीति ॥ महान्तमसेति सम्बन्धः ॥ आदित्यवर्णं स्वप्रकाशं तमसः परस्ताद् दर्शनास्पृष्टमित्यर्थः ॥ याव
दात्मभानिल स्यात्सिद्धिः शंकते ॥ नन्विति ॥ सुषुप्तौ बुद्धिसत्वेब्रह्मसंपत्तिर्न स्यात् ॥ प्रलये पतसत्वे प्रलयव्याहतिरित्यर्थः ॥ स्थूल
सूक्ष्मा सनाबुद्धेर्यावदात्मभावित्वमस्तीत्याह ॥ पुंस्त्वेति ॥ पुंस्त्वं रेतः आदिपदेन श्मश्र्वादिग्रहः ॥ अस्य बुद्धिसंबंधस्येत्यर्थः ॥
स्वापे बीजात्मनासतो बुध्यादेः प्रबोधे भिव्यक्तिरित्यत्र श्रुतिमाह ॥ दर्शयतीति ॥ न विदुरित्यविद्यात्मक बीजसद्भावोक्तिः
तु व्याघ्रादयः पुनरागच्छंतीत्यभिव्यक्तिनिर्देशः ॥ बुद्धिसद्भावे मानं माह सूत्रकारः ॥ निरुक्तेति ॥ मनसा ह्येव पश्यति ॥ बुद्धिश्चेन
विचेष्टति ॥ विज्ञानं यज्ञं तनुते ॥ चेतसा वेदितव्यः ॥ चित्तं च चेतयितव्यं चेति ॥ तत्र तत्र श्रुतिषु मन आदिपदैर्वाच्यं तावदबुद्धिद्रव्यं
प्रसिद्धमित्यर्थः ॥ कथमेकस्यानेको क्तिरित्यत्राह ॥ क्वचिच्चेति ॥ गर्ववृत्तिकोहंकारो विज्ञानं चितश्च ध्यानं स्मृतिश्च ध्यानं चित्तमित्य
पिइष्टव्यं ॥ यद्यपि सा क्षिप्रत्यक्षासिद्धमंतःकरणं श्रुत्युदितं च तथापि प्रेक्षकश्रुत्येव विवदमानं प्रति व्यासंगानुपपत्त्या तत्सा
धयतीति ॥ तच्चेत्यादिना ॥ सूत्रं योजयति ॥ अन्यथेति ॥ पंचेंद्रियाणां पंचविषयसंबंधे सति निसंयुगपत्पंचोपलब्ध्ययः स्युः ॥ म
नो तिरिक्तसामग्र्याः सत्वात् ॥ यदि सत्सामग्र्यपि सामग्र्यां उपलब्ध्यभावस्तर्हि सदैवानुपलब्धिप्रसंगात् इत्यर्थः ॥ अतः का
दाचित्कोपलब्धिर्नियामकं मन एष्टव्यमिति भावः ॥ ननु सत्यपि कराग्निसंयोगे दाहकादाचित्कत्ववदुपलब्धेः कादाचित्क
त्वमस्तु किं मनसेत्यत्राशंक्या न्यतरानियमो वेत्यत्र व्याचष्टे ॥ अयवेति ॥ सत्यां सामग्र्यां निरोपलब्धिर्वा गीकार्यो ॥ अन्य
तरस्य कारणस्यके न चिच्छक्तिप्रतिबंधनियमो वांगीकार्यः ॥ यथा मणिनाग्निशक्तिप्रतिबंधइति वाकारार्थः ॥ अस्तु प्रतिबं
धइत्यत आह ॥ न चेति ॥ न चेंद्रियस्येवास्तु शक्तिप्रतिबंधइति वाच्यं ॥ प्रतिबंधकाभावात् ॥ न च दृष्टसामग्र्यां सत्यां अदृष्टं प्र
तिबंधकमिति युक्तं अतिप्रसंगात् ॥ न च व्यासंगः प्रतिबंधकः मनो सत्त्वे तस्यासंभवात् ॥ तथाहि रसादीनां सहोप

न्द्र

या

मंतव्यं

लब्धिप्राप्तेरसवृत्त्वात्पोव्यासंगोरूपाद्युपलब्धिप्रतिबंधको वाच्यः स च गुणत्वाद्गुण्याश्रयः॥ तत्रात्मनोसंगान्निर्गुणकूटस्थ
स्य गुणत्वायोगात् मन एव गुणित्वेनैष्टव्यमिति व्यासंगानुपपत्त्या मनःसिद्धिः॥ एतदपि प्रेत्याप संहरति॥ तस्मादिति॥ अन्यथा
नंबुत्सा॥ न चानिच्छतोपि दुर्गंध्याद्युपलब्धावनुत्सोपलब्धिनियामिकेति वाच्यं॥ अनेकविषयसन्निधौ क्वचिदेव तस्या
नियामकत्वांगीकारात्॥ येषां मते पुनरिच्छादीनामात्मधर्मत्वं तेषां मनो दुर्लभमिति॥ इच्छादिधर्मिणो वात्मनो व्यासंगो
पपत्तेः॥ संप्रति व्यासंगस्य मानत्वे श्रुतिमाह॥ तथा चेति॥ न केवलं व्यासंगान्मनःसिद्धिः किंतु कामाद्याश्रयत्वेनापी सा
ह॥ कामादयश्चेति॥ बुद्धेः प्रामाणिकीत्वोक्तिफलमाह॥ तस्मादिति॥ एवमात्मन्यणुत्वाध्यासो त्यास्वाभाविकं महत्त्वं स्थापि
तं॥ संप्रति ततो बहिष्कर्तृत्वं साधयति॥ कर्ता शास्त्रार्थवत्त्वात्॥ स नित्यचिद्रूपो महानात्मा कर्तैव स संगत्वश्रुतीनां
विध्यादिश्रुतीनां च विप्रतिसासंज्ञाये बुद्धिकर्तृत्वेनैव विध्यादिशास्त्रोपपत्तेरकर्तात्मेति सांख्यपक्षप्राप्तौ सिद्धांतय
पन्नेव तद्गुणसारत्वोक्त्यात्मनि कर्तृत्वाध्यासस्यापि सिद्धत्वात्पुनरुक्तिमाशंक्य सांख्यपक्षनिरासार्थमात्मनि क
र्तृत्वाध्यासप्रपंचनान्न पुनरुक्तिरित्याह॥ तद्गुणेति॥ अधिकारः प्रसंगः॥ वस्तुतो संगत्वमविघातः कर्तृत्वमि
त्यसंगत्वकर्तृत्वश्रुतीनां अविरोधोक्तेः कर्तृत्वविचारात्मकाधिकरणत्रयस्य पादसंगतिः श्रुतीनां मिथो विरोधा
विरोधौ पूर्वोत्तरपक्षयोः फलं परत्र पूर्वपक्षे वंध्याभावो धात्र्वेयर्थ्यं फलं सिद्धांते कर्तृत्वादिसंबंधसत्त्वाच्छास्त्रा
र्थवत्त्वेति भेदः॥ ननु बुद्धिकर्तृत्वेन शास्त्रार्थवत्त्वास्तु किं जीवकर्तृत्वेनेत्यत्राह॥ तादृक्कर्तुः सत्त्वरति॥ ममेदं कर्तृ
व्यमिति बोधसमर्थस्य चेतनस्यैव कर्तृत्वं वाच्यं॥ न त्वचेतनाया बुद्धेः॥ किं च भोक्तुरात्मन एव कर्तृता वाच्या॥
शास्त्रफलं प्रयोक्तरीति न्यायादिति भावः॥ संध्यं स्थानं स्वप्नः अमृतः स आत्मा यत्र ईयते गच्छतीति विहारोप
देशात् आत्मा कर्ता प्राणानां मध्ये विज्ञानेन बुद्ध्या विज्ञानसमर्थमिंद्रियजातमादायेत्युक्ते॥ इति प्राणान् गृहीत्वोपरि

रा॰ सा॰ दि॰ ८

४८

वर्त्तत इति उपादानकर्तृत्वमात्मनः अकर्तृत्वे उपादानानुपपत्तेरिति भावः ॥ विज्ञानशब्दो जीवस्य निर्देशो न चेत्तदा प्रथमानि
र्देशाद्विपर्ययः करणत्वद्योतितृतीयया निर्देशः स्यात्तस्मादिह श्रुतौ तनुत इत्याख्यातेन कर्तृवाचिना विज्ञानपदस्य सा
मानाधिकरण्यनिर्देशात् क्रियाया मात्मनः कर्तृत्वं स्यादिति सूत्रभाष्ययोरर्थः ॥ सूत्रांतरमवतारयति ॥ अत्रोहेति ॥
जीवः स्वतंत्रश्चेदिष्टमेव कुर्यात् स्वतंत्रश्चेत्र कर्त्ता स्वतंत्रः कर्त्तेति न्यायादित्यर्थः ॥ सत्यपि स्वातंत्र्ये कारकवैचित्र्यादेनि
यता प्रवृत्तिरिति परिहरति ॥ यथेति ॥ दृष्टांता संप्रतिपन्नात्मा कते उपलब्धावपीति ॥ चक्षुरादीनां चैतन्येन वि
षयसंबंधापर्यवसानत्वसंबंधोपलब्धौ चात्मनश्चैतन्यस्वभावत्वेन स्वातंत्र्यात् दृष्टांतसिद्धिरित्याह ॥ नेति ॥ नन्वा
त्माविषयसंबंधोपकरणान्यपेक्षते चेत्कथं स्वतंत्रः स्यादित्याह ॥ अपि चेति ॥ स्वातंत्र्यं नाम न स्वान्यानपेक्षित्वं ईश्वरस्या
पि प्राणिकर्मापेक्षत्वेनास्वातंत्र्यप्रसंगात् ॥ किंतु स्वेतरकारकप्रयोक्तृत्वे सति कारकात्रयेत्वं स्वातंत्र्यं ॥ तेन स्वतंत्रोपि
जीवः इष्टसाधनत्वभ्रान्त्या सानिष्टसाधनमप्यनुतिष्ठतीति यतात्प्रवृत्तिः स्वातंत्र्यं चेत्स्यविरुद्धमित्यर्थः ॥ जीवस्य क
र्तृत्वे हेत्वंतरार्थं सूत्रं ॥ शक्तीति ॥ बुद्धेः करणशक्तिर्विपरीता कर्तृशक्तिः स्यादित्यर्थः ॥ ततः किं तत्राह ॥ सत्याच्च बुद्धेरिति ॥
यो हं भोगम्यः स कर्त्ता स एव जीवो यत्तदपेक्षितं करणं तन्मन इति जीवकर्तृत्वसिद्धिरित्यर्थः ॥ तान्सोप्यन्विष्यन्त्ये धानु
पपत्त्यापात्मनः कर्तृत्वं वाच्यमित्याह ॥ समाध्यभावाच्चेति ॥ मुक्तिफलभोक्तुरेव तदुपायसमाधिकर्तृत्वं युक्तं ॥ अन्यथात्मनो क
र्तृत्वे बुद्धेरपि भोक्तृत्वाः कर्तृत्वायोगोत्तु समाध्यभावप्रसंग इत्यर्थः ॥ यथा चतक्षोभयथा ॥ उक्तमोक्षनः कर्तृत्वमुपजी
व्य संशयपूर्वपक्षावाह ॥ एवं तावदित्यादिना ॥ सांख्यनिरासेनात्मनः कर्तृत्वे साधिते बाधकाभावात्तत्सत्यमिति मीमां
सकादिपक्षः प्राप्तः ॥ न चासंगत्वागमेन बाधः ॥ अहं कर्तेत्यनुभवसहितकर्तृत्वश्रुतिबलेन तस्यागमस्य स्तावकत्वादि
ति प्राप्ते उक्तसूत्रमेवासिद्धांतयति ॥ न स्वाभाविकमिति ॥ यदुक्तं बाधकाभावादिति तदसिद्धमित्याह ॥ अनिर्मोक्षइति ॥
ननु कर्तृत्वेनात्मक्रियाशक्तिं मुक्तावप्यस्ति तथापि शक्तिकार्यस्य क्रियारूपस्याभावान्मुक्तेः पुरुषार्थत्वसिद्धिरि

स्य

क

४८

तिशंकते ॥ ननु स्थितायामिति ॥ सांशत्वे कथं कार्यपरिहारः तत्राह ॥ तत्परिहारश्चेति ॥ मुक्तौ शसहे कार्यमपि स्या
त्तु शक्त्याभावेन तत्प्रयोगात् ॥ अस्ति हि प्रलयेपि कार्यं पुनरुद्भवयोग्यं सूक्ष्मं शक्त्यं तथा च शक्त्याद्यभावादिनिमि
त्तैः सहितकार्याक्षेपान्मुक्तिलोपः इति परिहरति ॥ न निमित्तानामपीति ॥ स निमित्तस्य कार्यस्य शक्त्या शक्यहे
न संबंधान्निमित्तानामपी परंपरया शक्तिसंबंधत्वमुक्तं मंतव्यं ॥ संबंधेनेन संबंधिनेत्यर्थः ॥ यद्वा शक्तिर्लक्ष्ये
ण माक्षेपकं यस्य कार्यस्य तेन कार्येण यः संबंधस्तेनेति व्यधिकरणे तृतीये ॥ ननु नरस्य कर्मणा देवत्ववत् ब्रह्मत्वबल्ला
त् कर्तुरेवाकर्तृतासिद्धिरिति शंकते ॥ नन्विति ॥ ज्ञानादकर्तृतारूपमोक्षश्चेत् कर्तृत्वमाविद्यकं स्यादतो ज्ञानमज्ञा
नस्येवानिवर्तकं ॥ यदि कर्मणा मोक्षस्तत्राह ॥ नेति ॥ आत्मनः स्वाभाविकं कर्तृत्वमभ्युपगम्यानिर्मोक्ष उक्तः संप्रति अ
सं निर्विकारत्वानेकश्रुतिव्याकोपान्न स्वाभाविकमित्याह ॥ अपि चेति ॥ न चाप्यस्त्यनेकश्रुतीनां स्तावकत्वकल्पनं यु
क्तं ॥ न चाहं कर्तेत्यनुभवो विरुध्यते ॥ तस्य सन्निध्योदासीनकर्तृत्वावगाहिनोऽध्यासत्वेनाप्युपपत्तेरित्यर्थः ॥ कर्तृत्व
स्याध्यस्तत्वे श्रुतिमाह ॥ तथा चेति ॥ विद्वदनुभवबाधितं कर्तृत्वमित्याह ॥ नेहीति ॥ बुद्ध्यादिसंघातव्यतिरिक्तो यदि
परस्मादन्यश्चेत्तेनोनेस्यात्तदा पर एव संसारी प्रसज्येत तच्चानि■ष्टं■ परस्य नित्यमुक्तत्वव्याघातादिति शंकते ॥ पर
एवेति ॥ न वयं शुद्धस्य चिद्धातोः परस्य बंधं वदामः ॥ किंतु तस्यैवाविद्याबुद्ध्यादिप्रतिबिंबितस्याविद्ययाभिन्नस्य जीवत्वं
प्राप्तस्य बंधमोक्षाविति ब्रूमः ॥ कल्पितभेदोपि लोके बिंबप्रतिबिंबयोर्धर्मव्यवस्थापको दृष्ट इति परिहरति ॥ नावि
चेति ॥ अविद्योपहिते बंधो न तु शुद्धात्मनीत्यत्र श्रुतिमाह ॥ तथा चेति ॥ कर्तृत्वस्य बुद्ध्युपाध्यन्वयव्यतिरेकानुविधा
यित्वात् श्रुतेश्च न स्वाभाविकत्वमित्याह ॥ तथा समेति ॥ आत्मैव काम्यते आनंदत्वात् आत्मकामं ... स्वरूपं स्वा

317

तिरिक्तकाम्यासत्त्वादकामं॥ आप्तकामत्वादकामत्वात्त्वाप्तकाममं विशोकत्वाच्चेत्याह॥ शोकेति॥ शोकांतरं दुःखस्पृष्ट
मित्यर्थः॥ तस्यैव सुषुप्तात्मरूपस्य परमपुरुषार्थतामाह॥ एषेति॥ गतिः प्राप्यं संपदैश्वर्यं लोको भोग्यसुखं चैतेन
स्मादन्यन्नास्तीत्यर्थः॥ आत्मास्वतो कर्ता बुद्ध्याद्युपाधिना तु कर्तृत्वमुपपद्यत इत्युक्तस्तत्रार्थे सूत्रं योजयति॥
तदेतदाह यथा चेति॥ संप्रसादः सुषुप्तिः यथा स्फटिकस्य लौहित्यं कुसुमाद्युपाधिकं तथात्मनः कर्तृत्वं बुद्ध्याद्युपाधिकं
अन्वयव्यतिरेकाभ्यां सिद्धं॥ न च तौ बुद्धेरात्मकर्तृत्वे करणत्वविषयौ नोपादानत्वविषयाविति युक्तं करणत्वात् कार्यान्वयमुपा
दानत्वस्यांतरंगतया चित्संवलितबुद्धेस्ताभ्यामुपादानत्वस्यैव सिद्धेः॥ एवं चिदाभासव्याप्तबुद्ध्याख्याहंकारस्य कर्तृत्वोपा
दानत्वे महावाक्यसंमतिश्चेति भावः॥ ननु तक्षा स्वहस्तादिना वास्यादिप्रेरणत्वात्स्वतःकर्ता आत्मा तु निरवयवत्वाद
शक्त इति दृष्टांतवैषम्यमाशंक्योपाधिककर्तृत्वांशेन विवक्षितेन साम्यमाह॥ तक्षदृष्टांतश्चेति॥ शास्त्रेणानूद्यमानं
कर्तृत्वं स्वाभाविकमेव किं न स्यादित्यत आह॥ न च स्वाभाविकमिति॥ उपाध्यभावकाले श्रुतं कर्तृत्वं स्वाभाविकमेवेति
शंकते॥ ननु संध्य इति॥ किंच करणैर्विशिष्टस्य कर्तृत्वे तेषां कर्त्रंतरत्वायोगात् तृतीयाविभक्तिः स्यान्न चैवमस्ति तत्र
केवलात्मनः कर्तृत्वमित्याह॥ तथेति॥ स्वप्ने विहारे तावदुपाध्यभावो सिद्ध इत्याह॥ न तावत्संध्य इति॥ विहारस्य मिथ्या
त्वात्तत्कर्तृत्वमपि मिथ्येत्याह॥ विहारोपीति॥ जक्षदुज्जानश्च करणविशिष्टे कर्तृत्वे करणे [illegible] कर्तृविभक्तिः स्यान्न कर
णविभक्तिरित्युक्तमित्याह॥ भवति च लोक इति॥ कर्तृत्वेपि करणविभक्तिर्न विरुध्यते दृष्टत्वादस्ति च कर्तृत्वश्रवणे गो
विज्ञानं यज्ञं तनुत इत्यादाविति भावः॥ उपादानस्य सकर्तृत्वमंगीकृत्य केवलात्मनः कर्तृत्वं निरस्तमिदानीं तस्याक्रि
यत्वात्कर्त्रपेक्षेत्याह॥ अपि चेति॥ पूर्वं विज्ञानं जीवश्शंगीकृत्य जीवस्य कर्तृत्वे तनुत इति श्रुतिरुक्ता संप्रति तत्पाश्रुत्यानु

स्वा

स्य

स्य

४१

हितात्मनः कर्तृत्वमितिप्राप्तो विज्ञानं बुद्धिरेव तस्या एवात्र कर्तृत्वमुच्यते तदुपहितात्मनः कर्तृत्वसिद्धपक्षमभिप्रेत्याह ॥ य
स्त्विति ॥ यो यं विज्ञानमयइत्यादिश्रुतिषु विज्ञानशब्दस्य बुद्धौ प्रसिद्धत्वादत्र च मनोमयकोशानंतरं पठितत्वाच्च हृदि
लिंगाच्च बुद्धिरेव विज्ञानमित्यर्थः ॥ तत्रैव लिंगांतरमाह ॥ विज्ञानं देवाइति ॥ महद्यक्षं प्रथमजमित्यादिश्रुतौ हिरण्यगर्भ
ब्रह्मात्मकबुद्धेर्ज्येष्ठत्वोक्तेरत्र देवेरिंद्रियै रूपास्यमानं ज्येष्ठं ब्रह्म विज्ञानं बुद्धिरेवेत्यर्थः ॥ यद्वा पूज्यं ॥ किंचश्रुत्यंतरे पत्तस्य बु
द्धिकार्योक्तेरपि यज्ञकर्तृ विज्ञानं बुद्धिरित्याह ॥ स एष इति ॥ चित्तेन ध्यात्वा वाचा मंत्रोक्त्या यज्ञो जायते ततश्चित्तस्य वाचःपू
र्वोत्तरभावो यज्ञ इत्यर्थः ॥ पक्षोक्तं बुद्धेः कर्तृत्वं त्रान्तिके परीत्यसंगइतितत्र ॥ विक्रियंतेतदुक्ताः ज्वलंति काष्ठानि बिभर्ति
स्थालीति स्वस्वव्यापारेषु सर्वकारकानां कर्तृत्वस्वीकारादित्याह ॥ न चेति ॥ तर्हि बुध्यादीनां कर्तृत्वे करणत्वं नातीति नस्या
दित्यत आह ॥ उपलब्धीति ॥ यथा काष्ठादीनां स्वव्यापारे कर्तृत्वे पि पाकापेक्षया करणत्वं तथा बुध्यादीनां ध्यवसायसंक
ल्पादिक्रियाकर्तृत्वे प्युपलब्ध्यपेक्षया करणत्वमित्यर्थः ॥ ननु तर्हि उपलब्धिः कस्य व्यापार इत्यत आह ॥ सान्वेति ॥ तर्हि
तस्या मा केवलः कर्ता स्यात् यस्य यो व्यापारः स तस्य कर्तेति स्थितेरित्यत आह ॥ न चेति ॥ उपलब्धेर्नित्यत्वे बुध्यादीनां
कथं करणत्वमुक्तमिति चेदुच्यते ॥ अखंडसाक्षिचैतन्यं बुद्धिवृत्तिभिर्मित्रं सद्विषयावच्छिन्नत्वेन जायते तदभिव्यक्त्या
वच्छिन्नत्वेन जायते तथा च विषयावच्छिन्न चैतन्याख्योपलब्धौ बुध्यादीनां करणत्वं बुध्याद्युपहितात्मनः कर्तृत्वं न
केवलस्येत्य च बुद्धेरेव तत्कर्तृत्वं चैतन्यस्य जडव्यापारित्वायोगादिति भावः ॥ पक्षोक्तं बुद्धेः कर्तृत्वे स एवाह धीगम्यो
जीव इति तस्य करणांतरं कल्पनीयं तथा च नाममात्रे विवाद इति ॥ तत्र केवलात्मनः कर्तृत्वमुक्तमिति भ्रांतिं निरस्य
ति ॥ अहंकारेति ॥ सांख्यनिरासार्थं बुध्यभेदेनाध्यस्तचिदात्मकाहंकारगतं कर्तृत्वं यदुक्तं तदहं धीगम्यस्य बुद्धिवि
शिष्टात्मन एव न केवलस्य साक्षिणो भवितुमर्हति ॥ दृश्यधर्मस्य साक्षिस्वभावत्वायोगात् ॥ एवं विशिष्टात्मनः कर्तृ

सा०प्रका०वि०टी०

५०

द्वि०ध्या०

त्वे विशेषणीभूतजडबुद्धेरेवकरणत्वोपपत्तेर्नेकरणांतरकल्पनाप्रसंगः॥ अध्यासं विनाकेवलबुद्धिकर्तृत्वादिनस्तुकर
णांतरप्रसंगो दुर्वारइत्यर्थः॥ एवंशास्त्रार्थवत्त्वादिहेतूनामात्मनः कर्तृत्वमात्रसाधकत्वेपिस्वाभाविककर्तृत्वसाधनसा
मर्थ्याभावादध्यस्तमेवकर्तृत्वं विध्यादिकर्तृत्वश्रुतीनामुपजीव्यं तस्मादसंगत्वकर्तृत्वश्रुतीनामविरोधइतिसिद्धं॥ परात्तु
तच्छ्रुतेः॥ यथास्फटिकलौहित्याध्यासे लोहितद्रव्यंकरणं तेनायंस्फटिको लोहितइत्यनुभवात्तथा कामादिपरिणामिबुद्धि
स्तानिकर्तृत्वाध्यासेकरणमित्युक्तं तदध्यस्तकर्तृत्वमुपजीव्यजीवस्यकारकसंपन्नत्वादीश्वरस्य कारयितृश्रुतेश्च संशयमाह
यदिदमिति॥ अत्रपूर्वपक्षएवसादिश्रुतीनां कर्तृस्वातंत्र्यद्योतकविध्यादिश्रुतिभिर्विरोधसमाधानात् पादसंगतिः॥ कर्ममी
मांसकमतेनपूर्वपक्षयति॥ तत्रेत्यादिना॥ बुध्यादिकारकसंपन्नत्वादीश्वरव्यतिरेकेकर्तृत्वव्यतिरेकानुपलब्धेर्नेश्वरः प्रयो
जकः किंचप्रयोजकत्वेनैर्घृण्यादिप्रसंगइत्याह॥ कृतप्रयत्नकेनत्विति॥ इत्तोत्तरमिदंन्वो घमितिशंकते॥ नन्विति॥ एवं
जीवस्यधर्माधर्मवत्त्वसिद्धवत्कृत्य तत्सापेक्षत्वाद्विषमजगत्कर्तृत्वमविरुद्धमित्युक्तं संप्रतिपराधीनत्वेनजीवस्य
कर्तृत्वेसिद्धे धर्माधर्मवत्त्वसिद्धिः तद्वत्त्वसिद्धौ तत्सापेक्षकारयितृत्वसिद्धिरीश्वरस्यकारयितृत्वेसिद्धे जीवस्यकर्तृत्वसि
द्धिरितिचक्रकापत्तेः कर्मसापेक्षत्वं नसंभवतीत्युच्यतइत्याह॥ सत्यमिति॥ अस्तुकर्मानपेक्षस्यप्रवर्तकत्वंतत्राह॥ अ
कृतेति॥ अनपेक्षस्यप्रवर्तकत्वे धर्मवतोनरान्दुःखेनाधर्मवतः सुखेनयोजयेत् कारुणिकत्वेवासर्वे सुखिनएकरूपाः
स्युरितिजगद्वैचित्र्यंविध्यादिशास्त्रंचनस्यात्तस्माद्विध्यादिशास्त्रार्थवत्तायरागद्वेषाद्यपत्तेःस्वतएवजीवस्यकर्तृत्वंवाच्यं
तथाचकारयितृश्रुतिविरोधईश्वरस्ताविकावासाश्रुतिरितिप्राप्तेसिद्धांतयति॥ एतोमिति॥ यथाचंदनादिसामग्र्यांसत्यां
धर्मव्यतिरेकेसुखव्यतिरेकग्रहाभावेपि पुण्योवैपुण्येनकर्मणाभवतीत्यादिशास्त्रप्रामाण्याद्धर्मस्यहेतुत्वसिद्धिरेवमी
श्वरस्यापिशास्त्रबलात्कारयितृत्वसिद्धिरितिभावः॥ धर्माधर्माभ्यामेवफलवैषम्यसिद्धेरलमीश्वरेणेत्याशंक्यबीजै
रिवांकुरवैषम्यसिद्धेः पर्जन्यवैयर्थ्यंस्याद्यदिविशेषहेतूनांसाधारणहेतुपेक्षतातत्रवैयर्थ्यं तर्हीश्वरस्यापिसाधारणहे

५०

तुल्यत्वेऽपि वैषम्यमित्याह ॥ पर्जन्यवदिति ॥ दृष्टान्तं विवृणोति ॥ यथेति ॥ अतिदीर्घवल्लीग्रं यथा गुच्छाः पुष्पस्तबका वा ॥ गु
ल्मो लतास्तबकस्य इति भेदः किमीश्वरस्य कारयितृत्वे जीवस्य कर्तृत्वं न स्यादित्यापाद्यते उक्तचक्रकापत्तिर्वा नाद्य इत्याह ॥
नैष दोष इति ॥ अव्यापकोऽपि जीवस्य बन्धमोक्षव्याप्ययेन कर्तृत्वदर्शनादिति भावः ॥ चक्रकं निरस्यति ॥ अपि चेति ॥ अ
नवच्छिन्नजीवस्य कर्तृत्वमीश्वरस्य कारयितृत्वं चेति शेषः ॥ ईश्वरस्य सापेक्षत्वे विध्यादिशास्त्रप्रामाण्यान्यथानुपपत्ति
प्रमाणयति ॥ कथमित्यादिना ॥ एवं सापेक्षत्वे सत्यवैयर्थ्यं भवति अन्यथा न पक्षत्वे वैयर्थ्यं प्रपंचयति ॥ ईश्वर इति ॥
तयोः स्थाने स एव नियुञ्ज्यात् अपि चेत् तयोः कार्यं स एव कुर्यादिति यावत् ॥ अथ चेज्जीवस्य निरपेक्षेश्वरतन्त्रत्वादि आ
दिशास्त्रमकिंचित्करमनर्थकं स्यादिति संबन्धः ॥ आदिशब्दार्थमाह ॥ तथेति ॥ पुरुषकारः प्रयत्नः पूर्वोक्तदोषो
कृताभ्यागमादिः तस्मात्कर्मसापेक्षेश्वरस्य कारयितृत्वादेष ह्येव साध्वित्यादिश्रुतेर्विध्यादिश्रुतेश्च अविरोध इति सिद्धं ॥
अंशाएके ॥ निरंशः स्वप्रकाशो न अणुरकर्ता जीव इति शोधितत्वंपदार्थस्य ब्रह्मैक्यसाधनेन भेदाभेदश्रुतीनां
विरोधसमाधानात्पादसंगतिः पूर्वपक्षे प्रत्यगभिन्नब्रह्मासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः ॥ पूर्वोक्तोप
कार्योपकारिकभावाक्षिप्तं जीवेशयोः संबन्धं विषयीकृत्य द्विविधदृष्टत्वदर्शनात् संशयमाह ॥ तत्रश्चेति ॥
प्रसिद्धस्वस्वामित्वसंबन्धसंभवाद्यः कश्चित्संबन्धस्य नियमो न युक्त इत्यरुचेराह ॥ अथवेति ॥ अनेनय आ
त्मनितिष्ठन्नित्यादिश्रुतिप्रसिद्धभेदकोटिर्दर्शिता ॥ एवं तत्त्वमसीत्यादिश्रुतिसिद्धाभेदकोटिर्दृष्टव्या ॥ तथा च
भेदाभेदश्रुतीनां समबलत्वाद्विरोधे सति संबन्धानिश्चयात् संबन्धापेक्षस्य पूर्वोक्तोपकार्योपकारकभावस्या
सिद्धिरित्याक्षेपात् संगतिः लोकसिद्धानर्थात्मकभेदानुवादित्वेन भेदश्रुतीनां दुर्बलत्वादज्ञातफलवदभेदश्रुत्य
नुसारेण कल्पितभेदनिबन्धनो अंशांशिभावः संबन्ध इति सिद्धान्तयति ॥ अत इत्यादिना ॥ अग्नेः सांशत्वेऽपि निष्कलत्वेने-
रस्य कथं सांशत्वमत आह ॥ अंश इवेति ॥ जीवस्य सनुषंगः ॥ भेद एव चेत् स्वस्वामिभावो युक्तो नांशांशिभाव इति

षि

नथ

र्त्रां कृते॥ ननु चेति॥ अभेदस्यापि सत्वादंशांशिभावं इत्याह॥ अंतर इति॥ यं च सिंगछमि यदास्ते यो नामरूपे निर्माय प्रवि
श्य व्यवहरन्नवर्त्तते तं विद्वानमृतो भवतीति श्रुत्यर्थः॥ श्रुतिसिद्धाभेदयुक्तिमाह॥ चैतन्यं चेति॥ जीवो ब्रह्मैव चेतन
त्वाद्ब्रह्मवदित्यर्थः॥ अस्य सहस्रशीर्षः पुरुषस्य तावान्प्रपंचो महिमा विभूतिः पुरुषस्तस्मात्प्रपंचाज्ज्यायान् महत्त्व
रः भूतानि देहिनो जीवा इत्यत्र नियामकमाह॥ अहिंसन्निति॥ तीर्थानि शास्त्रोक्तकर्माणि तेभ्योऽन्यत्र सर्वप्राणिहिंस
मकुर्वन्ब्रह्मलोकमवाप्नोतीत्यर्थः॥ अत्र भूतशब्दस्य प्राणिषु प्रयोगात्सूत्रोक्तमंत्रेपि तथेति भावः॥ भूतानां पादत्वे
ध्यं शंकृतस्तत्राह॥ अंशाः पाद इति॥ जीवस्य पुरुषसूक्तमंत्रोक्तभगवदंशत्वे भगवद्गीतामुदाहरति सूत्रकारः॥ अपि चे
ति॥ अस्तु तर्हि [illegible] भिन्नेश्वरशिष्यशासितृव्यभावप्रसिद्धेः शासितव्यजीवस्य कथमीश्वरांशत्वं मात्रांश्यकल्पितभेदेनापीशितव्यं
प्रपत्तेरन्यथासिद्धाभेदशास्त्रबलादंशत्वमित्याह॥ यत्तु सादिना॥ औपाधिकेश्वरस्य नियंतृत्वे जीव एव तन्नियंता किं
न स्यादित्यत आह॥ निरतिशयेति॥ नितरां हीनः शरीराद्युपाधिः आज्ञानिकोपाधितारतम्यादीशेशितव्यव्यवस्था नव
स्तुतः॥ तदुक्तं सुरेश्वराचार्यैः॥ ईशेशितव्यसंबंधः प्रत्यगज्ञानहेतुजः॥ सम्यग्ज्ञाने तमोध्वस्तावीश्वराणामपीश्वर इति
उत्तरसूत्रमवतारयति॥ अत्राहेति॥ ईश्वरः स्वांशदुःखैर्दुःखी अंशित्वाद्देवदत्तवदित्यर्थः॥ ततः किं तत्राह॥ ततश्चेति॥ सं
नात्सर्वात्रादुःखसमष्टिव्याप्यपेक्षया संसारो वरं तत्र स्वदुःखमात्रानुभवादित्यर्थः॥ नैवं पर इति प्रतिज्ञां विभजते॥ यथा
जीव इति॥ देवदत्तदृष्टांते भ्रांतिकामकर्मरूपदुःखसामग्रीमत्त्वमुपाधिः तदभावान्नेश्वरस्य दुःखित्वप्राप्तिः उक्तं चैतद
नौपाधिकप्रतिबिंबयोर्व्यवस्थेति भावः॥ दुःखस्य भ्रांतिकृतत्वं प्रपंचयति॥ जीवस्यापीत्यादिना॥ भ्रांतो स सांदुः
खमित्यन्वयमुक्त्वा भ्रांत्यभावे दुःखाभावदर्शनाच्च भ्रांतिकृतं दुःखमिति निश्चीयत इत्याह॥ व्यतिरेकेति॥ इतरे पुत्र
भिमानमन्येष्वित्यर्थः॥ जीवस्यापि सम्यक्ज्ञाने दुःखाभावो दृष्टः किमु वाच्यं नित्यसर्वज्ञेश्वरस्येत्याह॥ अतश्चेति॥
एवमंशित्वहेतोः सोपाधित्वमुक्त्वा यांशी स वस्तुतः स्वांशधर्मवानिति व्याप्तिं स्फुटत्रयेप्यव्यभिचारयति॥ प्रका

खा २

324.

शावदिति॥वस्तुतः स्वांशादुःखित्वसाध्यस्यदेवदत्तदृष्टांतेवैकल्यमाह॥जीवस्येति॥कल्पितदुःखित्वसाध्यंतु स्वांशसा
ध्यभावात् ईश्वरे नास्तीत्युक्तं॥किंचजीवस्येश्वरस्यवा वस्तुतोदुःखित्वानुमानंनयुक्तमागमबाध्यादित्याह॥तथा
चेति॥दुःखित्वेतज्ज्ञो वोपदेशोनस्यादित्याह॥ सर्पः॥स्वसाध्यनुमानंबाध्यमित्याह॥स्मरंतिचेति॥सूत्रेव्याचष्टे॥
स्मरंतीति॥तत्रजीवपरयोर्मध्येकर्मात्माकर्माश्रयोजीवः दशेंद्रियाणिपंचप्राणाःमनोबुद्धिश्चेतिसप्तदशसंख्या
कोराशिर्लिंगं॥सूत्रेचशब्दः श्रुतिसमुच्चयार्थइत्याह॥चशब्दादिति॥यथादिःसः प्रकाशस्यदोषैर्नलिप्यतेतथेत्य
र्थः॥यतोबाह्योसंगःतस्मान्नलिप्यते॥एवमंशित्वकृतदोषमीश्वरेनिरस्यांशित्वंदेहाद्युपाधिकमितिस्फुटयितु
मंशतस्वरूपैक्यमादाययाक्षिपति॥अत्राहेत्यादिना॥कथंतर्हीत्यन्वयः॥तद्देशादंशभेदान्निरवयवब्रह्मणोमुख्यांशो
नसंभवतीतिवदतासिद्धांतिनाभेदोनास्तीत्युक्तंभवति॥भेदाभावेचांशांशित्वाभावादनुज्ञादिभेदव्यवहारानुपपत्ति
रित्साक्षेपाभिप्रायः॥नवयंभेदस्यासत्वंनरूपगवत्तत्क्रमः किंतुमिथ्यात्वंवदामः॥तथाचदेहाद्युपाधिभेदेनांशजी
वानामाब्रह्मवोध्यात्कल्पितभेदात्भेदव्यवहारोपपत्तिरितिसूत्रेणसमाधत्ते॥तामित्यादिना॥ननुभ्रांतेःकुतस्त्रि
न्निवृत्तौव्यवहारविच्छेदःस्यादितमत आह॥नष्टस्यादिति॥प्रततासंततताविशेषोभेदः॥अनियोज्यत्वात्ब्रह्मविदःशा
स्त्रानर्थक्यमितिभिसाह॥नतस्येति॥नियोगविषयदेहताभावादात्मन्यसाध्येनियोगानुपपत्तेर्नब्रह्मविन्नियोज्यइत्य
र्थः॥नन्वामुष्मिकफलहेतुकर्मणिदेहभिन्नात्मविवेकिनएवाधिकारोवाच्यस्तथाचब्रह्मविन्नियोज्यःविवेकित्वा
त्कर्माधिकारिवदितिशंकते॥शरीरव्यतिरेकेति॥परोक्षविवेकस्यापरोक्षभ्रमाविरोधित्वात्कर्मिणोदेहाभेदभ्र
मोस्तितथाच भ्रमउपाधिरितिपरिहरति॥नेत्यादिना॥यथा[illegible]ङ्गिनंतद्वद्देहमित्यपश्यतःभ्रांतस्यसार्थः॥ब्रह्म
विन्ननियोज्योऽभ्रांतत्वात्सुषुप्तवदित्याह॥नहीति॥देहादिष्वसंहतत्वदर्शिनःसंहतत्वदर्शनभ्रान्त्यस्येत्यदर्शनांति
रहितस्यसुप्तस्येतियावत्॥अज्ञस्यापिभ्रांतस्वभावकालेनियोज्यत्वंनदृष्टंकिमुवाच्यमात्मविदस्तस्यार्थः॥अनियो

व्योमवे

५२ — ना — कर्मादि

ज्यत्वे बाधकमात्रं ध्यपरिहरति ॥ नचेति ॥ विषयवैराग्यस्य ज्ञानार्थमपेक्षितस्य ज्ञानानंतरमनुवृत्त्या विषयेषु प्रवर्त्तकराग
निवृत्तेर्नातिप्रसंग इत्यर्थः ॥ तदुक्तं भगवता ॥ रसोप्यस्य परं दृष्ट्वा निवर्त्तत इति ॥ एवमनुज्ञादिप्रसंगेनानियोज्यत्वे
विदुषउक्त्वा प्रकृतमुपसंहरति ॥ तस्मादिति ॥ एकस्याप्युपाधिभेदादनुज्ञापरिहारयोर्दृष्टांतमाह ॥ ज्योतिरिति ॥
क्रव्यं मांसमत्तीति क्रव्यादो मुचिः श्मशानाग्निरित्यर्थः ॥ ननु कोन्तरत्वेन सूत्रं व्याचष्टे स्यातामित्यादिना ॥ यद्यपि स्थूल
देहसंबंधादुपादानपरित्यागौ स्यातां तथाप्यन्यकृतकर्मफलमितरेण विभुज्येत इति कर्मफलव्यतिरेकेसांकर्यं स्या
त् ॥ देहविशिष्टस्य स्वर्गादिभोगाय योगेनाविशिष्टात्मन एकस्येव भोक्तृत्वात् तस्मात्स्वर्गीनरकीचेति व्यवस्थासि
द्धये आत्मस्वरूपभेदो वाच्य इति शंकार्थः ॥ परिहरति ॥ असंतत इति ॥ सत्यं न संततिरस्ति तथापि नासांकर्यं यद्यनुपहितात्मनु एव भोक्तृत्वं स्यात्तत्रैतदस्ति तद्गुण
सारत्वादिसूत्रात्मोपाधिबुद्ध्युपहितस्यैव कर्तृत्वादिस्थापनात् तथा च बुद्धेः परदेहासंबंधात्तदुपहितजीवस्य
नास्ति परदेहसंबंध इति बुद्धिभेदेन भोक्तृभेदान्नैसांकर्यमिति समाधानार्थः ॥ अंशांशसाघसूत्रे जीवस्यांशत्वप
टाकाशस्येवोपाध्यवच्छेदबुद्ध्योक्तं संप्रत्येवकारेणावच्छेदपक्षारुचिं सूचयन्रूपंरूपं प्रतिरूपो बभूवेत्यादिश्रु
तिसिद्धप्रतिबिंबपक्षमुपन्यस्यति भगवान्सूत्रकारः ॥ आभास एवेति ॥ स परमात्मैवानुपहितो जीवो न भवति
उपाध्यनुभवात्रापि ततो भिन्नः स एष इह प्रविष्ट इत्याद्यभेदश्रुतिस्मृतिविरोधात्तस्मादविद्यातत्कार्यबुद्ध्या
दिप्रतिबिंब एव जीव इत्यर्थः ॥ अस्मिन्पक्षे बुद्धिप्रतिबिंबभेदात्स्वर्गीतरादिव्यवस्था जीवत्वस्याविद्यकत्वादि
धयामोक्षश्चसुपपद्यत इत्याह ॥ अत एवेत्यादिना ॥ यद्वायं भास्करस्य प्रलापः प्रतिबिंबस्य नोपाधेः संसृष्टत
याकल्पितत्वं किंतु स्वरूपेणैवातः कल्पितप्रतिबिंबस्य मुक्तो स्थित्वा योगान्न जीवत्वमिति स नास्ति भ्रांतरजस्या
ज्ञानकृतस्य पेक्षणीयः ॥ यदि दर्पणे मुखं शुक्तौ रजतवत्कल्पितं स्यात्तदानेदं रजतमितिवत्स्वरूपबाधवन्नेदं मु
खमिति बाधः स्यात् न तु नास्ति दर्पणे मुखमिति संसर्गमात्रबाधान्न दीयं मुखमेवेदमिति बाधितमुखात्तदनुभ

ग

ह ०३

वात्संस्पष्टत्वेनैव कल्पितमंत्र प्रवेशावाक्ये श्राविकृतब्रह्मण एव प्रतिबिंबभावाख्यप्रवेशोक्तेर्न स्वरूपकल्पनांपरा
क्रांतं चात्र दर्पणटीकायामाचार्यैरित्युपरम्यते ।। एवं स्वमते स्वरूपैक्यमुपपादितं जीवभेदादसांकर्यमुक्तं संप्रति
सूत्रे चकारसूचितं परेषां सांकर्यं वक्तुमुपक्रमते ।। येषामित्यादिना ।। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्मा
धर्मभावनानवात्मविशेषगुणासंनिधानाद्धीत्यादिपदशेषोदासिन्यमुक्तं सांख्यः स्वाभिप्रायं शंकते ।। स्यादेत
दिति ।। सर्वेषां पुंसां प्रकृतिसांनिध्याविशेषेपि प्रकृतिरेव प्रतिपुरुषं नियमेन भोगापवर्गार्थं प्रवर्त्ततेत
थाचोद्देश्यपुरुषार्थनियता प्रधानप्रवृत्तिरिति भोगादिव्यवस्था ।। अन्यथानियतप्रवृत्त्यनंगीकारे स्वम
हाख्यख्यापनार्था प्रधानस्य प्रवृत्तिरित्युद्देश्यविघातः स्यादित्यर्थः ।। जडप्रधानस्याविवेकाभावात्पुरुष
र्थस्याप्यनागतस्याचेतनस्य नियामकाभावान्न व्यवस्था मानयुक्तिमत्यन्यत्वादित्याह ।। नैतदिति ।। यो हि निया
मकाभावेनोद्देश्यविघातमापादयति तं प्रति तस्यैवापादनमिष्टमिति भावः ।। तार्किकमतेपि भोगादिसांक
र्यमाह ।। कणादानामिति ।। हेतुर्मनःसंयोगः फलं सुखादि ।। यदात्मादृष्टकृतो मनःसंयोगः स तदात्मन ए
व सुखादिहेतुरिति व्यवस्थां शंकते ।। स्यादेतदिति ।। सूत्रेण परिहरति ।। नेत्याहेति ।। एवं मनःसंयोगव
ददृष्टस्यापि सर्वात्मसाधारणत्वान्न व्यवस्थेत्यर्थः ।। रागादिनियमात्त्वादृष्टनियमः स्यादाशंकोत्तरत्वे
न सूत्रं गृह्णाति ।। स्यादेतदित्यादिना ।। अनियमउक्तदोषः ।। आत्मांतरप्रदेशस्य परदेहे तद्भावाद्व्यवस्थे
तिशंकार्थः ।। किं मनसा संयुक्त एवात्मनः प्रदेश उत कल्पितः ।। आद्ये सर्वात्मनां सर्वदेहेषु तद्भावादव्यवस्था ।।
द्वितीयं दूषयति ।। नत्वनवेशाविकरति ।। सर्वात्मसान्निध्ये सति कस्यचिद्देशः कल्पयितुमशक्यः नियामकाभा
वादित्यर्थः ।। देशे शाकल्यनामंगीकृत्याह ।। कल्पेति ।। कार्यमस्ति संख्यादिकं ।। यस्यात्मनो यच्छरीरं तत्रत

त्वो

उद्देश्य

नं

देवप्र

२ = यत्रादृष्टोत्पत्तिस्तस्यैव भोगो यो भोक्ता स एवात्मेति स्थिते चलनप्रदेशस्याणोरेवात्मत्वं स्यात्तदतिरिक्तात्मनि प्रमाणाभावादिति भावः ॥ २

५२

स्यैव भोग इति व्यवस्थामाशंक्याह ॥ शरीरमपीति ॥ प्रदेशपक्षे दोषांतरमाह ॥ प्रदेशेति ॥ यस्मिन्नात्मप्रदेशेऽ
दृष्टोत्पत्तिः स किं चलः स्थिरो वा नाद्यः अचलेंद्रियत्वं शरीरस्य चलनविभागयोरसंभवादंशवात्मवादापाताच्च ॥
द्वितीये तस्मिन्नेव प्रदेशे परस्यापि भोगदर्शनाददृष्टं मत्सीसे केनापि शरीरेण द्वयोरात्मनो भोगप्रसंगः ॥
यद्यात्मभेदात्प्रदेशयोर्भेदः तथापि तयोरेकदेहांतर्भावात् भोगसांकर्यं तदवस्थं ॥ सावयवत्वादप्रसंग
श्च ॥ किंच यद्यात्मनः प्रदेशः शरीरादिसंयोगाददृष्टमुत्पन्नं तत्रैव चलप्रदेशोऽस्थितमिति स्वर्गादिशरीरावच्छि
न्नात्मन्यदृष्टाभावाद्भोगो न स्यादतः प्रदेशभेदो न व्यवस्थापकः ॥ यत्र त्रोऽसन्नमदृष्टं साश्रये यत्र कश्चिद्भोगहेतु
रिति स्वर्गादिभोगसिद्धिरिति ॥ तन्न ॥ भोगशरीरात्तद्दूरस्थादृष्टे मानाभावादिति भावः ॥ यद्यपि केचिदात्म
नस्यैकत्वेऽप्यात्मनां भेदेन संयोगव्यक्तीनां भेदात्कयाचित्संयोगव्यक्त्या कस्मिंश्चिद्देवात्मन्यदृष्टादिकमित्यसां
कर्यमिति तन्न ॥ संयोगव्यक्तीनां वैजात्याभावेन सर्वासामेवैकदेहांतः सर्वोत्पत्स्वदृष्टहेतुत्वापत्तेः ॥ तथा सत्येषाम
नामेकस्मिन्देहे भोक्तृत्वं दुर्वारं किंच बहूनां विभुत्वमंगीकृत्य सांकर्यमुक्तं स प्रतिकर्तृणां विभुत्वमसिद्धमहमि
हैवास्मीत्यल्पत्वानुभवान्मानाभावाच्चेत्याह ॥ सर्वगतत्वानुपपत्तिश्चेति ॥ किंच बहूनां विभुत्वे समानदेशत्वं वाच्यं
तच्चायुक्तमदृष्टत्वादित्याह ॥ देशेति ॥ ननु रूपरसादीनामेकदेशत्वं दृष्टमिति चेन्नायमस्मत्संमतो दृष्टांतः रू
पस्य तेजोमात्रवृत्तिरसस्य जलमात्रगंधस्य पृथिवीमात्रत्वादिमेवं तत्तद्गुणस्य स्वस्वधर्मिणो नाभेदात्तेजआदि
धर्म्यतिरिक्तधर्म्यभावात् ॥ किंच आत्मनां बहुत्वमप्यसिद्धमात्मत्वरूपलक्षणस्याभेदात्तथा च देवदत्तात्मा
यज्ञदत्तात्मनो न भिन्नः आत्मत्वाद्यज्ञदत्तात्मवत् ॥ अत्र वैशेषिकः शंकते ॥ अंत्यविशेषेति ॥ नित्यद्रव्य

शो गो वा सं

५३

पात्र ३

निःसद्व्यमात्रवृत्तयो विशेषास्ते च स्वपरस्वाश्रयव्यावर्त्तका एव न स्वेषां व्यावर्त्तकमपेक्षंत इत्यंसा उच्यंते॥ तथात्म
विशेषरूपलक्षणभेदादात्मभेदस्य सर्पः॥ नन्वात्मवादी ह्यन्यनात्मनः सकाशादात्मभेदज्ञानार्थं विशेषक
ल्पना आत्मत्वादेवानात्मभेदसिद्धेः नाप्यात्मनां मिथो भेदज्ञानार्थं तत्कल्पना आत्मभेदस्याप्यसिद्धेः॥ न च वि
शेषभेदकल्पनादेवात्मभेदकल्पना युक्ता आत्मभेदज्ञानाभावात्सुखभेदसिद्धिः स्यात् सिद्धौ तत्ज्ञप्तिरित्यन्योन्याश्रयादिति
परिहारार्थः॥ यत्तु बहूनां विभुत्वे आकाशादिकं दृष्टांतयति सोप्यसंमत इत्याह॥ आकाशादीनामिति॥ विभुत्वे
कल्पितत्वेन कार्याणां विभुभेदः॥ यथैकस्मिन्नाकाशे भेरीवीणादिभेदेन तारमन्द्रादिशब्दव्यवस्था एवमेकस्मिन्नप्या
त्मनि बुध्युपाधिभेदेन सुखादिव्यवस्थोपपत्तेरात्मभेदेपि व्यवस्थानुपपत्तेस्तत्त्वानुभवभेदकल्पनेत्युपसंहरति॥ त
स्मादिति॥ एवं कृत्स्नोक्तश्रुतीनां विरोधाभावाद्ब्रह्मण्यद्वये समन्वय इति सिद्धं॥७॥७॥७॥ इति श्रीमत्परमहंसप
रिव्राजकाचार्यश्रीमद्गोविंदानंदशिष्यस्य श्रीमद्रामानंदस्य कृतौ शारीरकसूत्रशांकरभाष्यटिकायां भाष्यरत्न
प्रभाभिधायां द्वितीयाध्यायस्य तृतीयो विपादः संपूर्णः॥२॥३॥७॥७॥७॥७॥७॥७॥७॥७॥

विशेष

न

॥ द्वितीयाध्यायस्य तृतीयः पादः समाप्तः ॥

॥श्रीगणेशाय नमः॥ॐ॥ ॥सर्वाधिकरणे कर्तुः स्वरूपं विचार्य तदुपकरणानामिंद्रियाणामुत्पत्तिं साधयति॥ तथा प्रा
णाः॥ अत एवोत्तु विचारानंतरं भौतिकप्राणविचार इति हेतुहेतुमद्भावं पादयोः संगतिमाह॥ वियदादिति॥ तमेव विप्रतिषेध
माह॥ तत्रेत्यादिना॥ यद्यपि प्राणानामनुत्पत्तावेकविज्ञानप्रतिज्ञानुपपत्तेर्वियदधिकरणन्यायेन तेषामुत्पत्तिः सिद्ध्यति
तथापि प्रलये प्राणसद्भावश्रुतेर्गतिकथनार्थमेतदधिकरणमित्यपौनरुक्त्यं॥ अत्र प्राणा विषयस्ते किमुत्पद्यंते न वेति श्रुतीनां विप्रति
पन्नाः संशये तासां समबलत्वादनिर्णयः स्यात् प्रामाण्यमिति पूर्वपक्षफलं॥ तत्र गौणवादिसमाधानमाह॥ अथवेति॥ प्राणानां प्रलये सद्भा
वश्रुतेर्निरवकाशत्वेन बलीयस्त्वादुत्पत्तिश्रुतिर्जीवोत्पत्तिश्रुतिवद्गौणी स्यादविरोध इत्यर्थः॥ अप्रमाणपक्षवद्गौणपक्षोऽपि मुख्यसिद्धां
तिनः पूर्वपक्ष एवेति ज्ञापनार्थमथवेत्युक्तं॥ मुख्यसिद्धांतमाह॥ अत इति॥ तथाशब्दमाक्षिपति॥ कथमिति॥ आनुलोम्यमानस्यमित्य
र्थः॥ साम्यं स्फुटयति॥ यथा दृष्टस्येति॥ दूषणवत्प्राणा इत्यनन्वितं यद्यप्यदृष्टवत्प्राणा अप्युनियता इति सूत्रमन्वेति॥ तथापि पुन

उ. व

रुक्तं॥ जीववत्प्राणानामुत्पद्यंत इति सूत्रार्थश्चेदपि सिद्धांत इत्याक्षेपार्थः॥ समाधत्ते॥ तदुदाहरणेति॥ दृष्टांतोदाहृतो तिकसान्निहितो वा
च्यः स्यंगीकृस्येकवाक्यत्वेन सान्निध्यमुक्तं॥ संप्रति नायं नियमः जैमिनिभगवता व्यवहितदृष्टांतस्यांगीकृतत्वादित्याह॥ अथ
वेति॥ अस्ति तृतीयाध्याये अश्वप्रतिग्रहेष्ट्यधिकरणं॥ तस्येदं विषयवाक्यं यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्क
पालान्निर्वपेदिति॥ एतदुत्तराधिकरणे किमियं वारुणीष्टिर्दातुरुत प्रतिग्रहीतुरिति विशये प्रतिगृह्णीयादिति श्रुतेः प्रतिग्रही
तुरित्याशंक्य प्रजापतिर्वरुणायाश्वमानयत् स स्वं पक्रमेदात् कीर्तनाल्लिंगाद् अश्वदातुरेवेति सूत्रस्येति॥ अतः प्रतिगृह्णीयादित्य
स्य परस्याश्वान्यः प्रतिग्राहयेदित्यर्थः॥ दद्यादिति यावत्॥ योऽश्वदाता तस्य वारुणीमिष्टिं कुर्यादिति वाक्यार्थे स्थिते चिंता अश्व
दाननिमित्तेयमिष्टिः किं लौकिके अश्वदाने वैदिके वेति॥ तत्र न केसरिणो ददातीति निषिद्धलौकिकाश्वदाने दोषसंभवात् त
न्निरासार्थमियमिष्टिरिति दोषाल्लिंगाल्लौकिके स्यादिति सूत्रेण प्राप्ते सिद्धांतः॥ अत्र हि वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णा

पि

नीतिदातुर्दोषसंकीर्त्तेरिति विहितावरुणशब्दोत्र जलोदराख्यरोगे रूढः॥ न च लौकिके श्वदाने यं रोगो भवतीति प्रसिद्धं॥ न च्चानेनै
ववाक्येन प्रसिद्धिः॥ दाने दोषसन्निरासार्था चेष्टिरिति वदतो [illegible] वाक्यभेदात्॥ [illegible] न च वरुणोतीति ... वरुणशब्दो
निषेधातिक्रमकृतदोषानुवादक इति युक्तं॥ रूढिः स्यागापातात्॥ तस्यागे च वैदिके पि दाने श्वस्यागजन्यदुःखप्राप्तं ... सत्याश॰
क्रामित्यनुवदितुं तस्मात् प्रमानुवाद्यर्थवादोयमिति यज्ञसंबंधिन्य श्वदाने इयमिष्टिरित्येव विचार्यो तं॥ पानव्यापन्नं तद्ददिति॥ सोम
पाने क्रियमाणे व्यापद्वमनं यदि स्यात् तदा ऐन्द्रं सोमेन्द्रं श्यामाकं चरुं निर्वपेदिति श्रूयते॥ तत्रा श्वप्रतिग्रहे ष्ट्यधिकरणपूर्वपक्षन्या
यो बहुसूत्रे व्यवहितस्तद्ददिति परामृश्यते॥ तद्द्वल्लौकिके धातुसाम्यार्थं पीतसोमस्य वमने अयं चरुः स्याद्वमननिमित्तेष्टि
यज्ञोषास्य दोषस्य दृष्टस्येन्द्रियेण वीर्येण व्यृ...नेय सोमवमतिस्यनुवादादिति पूर्वपक्षसूत्रार्थः॥ वैदिके तु सोमपाने शेषप्रतिय
त्तेजीतत्वाद्वमनेपि न दोष इति प्राप्ते सिद्धान्तः॥ लौकेवमनेन तेन्द्रियशोषस्य धातुसाम्यकरत्वेन गुणत्वान्न दोषता वेदे तु मामेवाउत्पा
क्रिमतिगा इति सम्यग्जरणार्थमंत्रलिंगाद्वमने कर्मवैगुण्यात्तस्य दोषता तस्माद्वैदिकसोमवमने सोमेन्द्रश्चरुरिति स्थितमित्येव
मादिषु सूत्रेष्वित्यर्थः॥ ननु प्रतिज्ञापि गौणी किं न स्यादित्यत आह॥ तथा च प्रतिज्ञानार्थमिति॥ उपक्रमोपसंहाराभ्या
प्रतिपिपादयिषितादद्वितीयत्वप्रतिज्ञानुरोधेन प्राणोत्पत्तिर्मुख्यैवेति भावः॥ मुंडकवाक्यस्य तरेपि प्रतिज्ञादर्शनात्साम्
ख्येस्याह॥ तथेति॥ एषा प्रतिज्ञा प्राणोत्पत्तिमुख्यत्वे हेतुत्वेन दृष्टेत्यर्थः॥ इदानीं प्रलये प्राणसत्त्वश्रुतेर्गतिं प्रश्नपूर्व
कमाह॥ कथमित्यादिना॥ नेदं वाक्यं महाप्रलये परमकारणस्य ब्रह्मणः प्राणवत्त्वपरं किं त्ववान्तरप्रलये हिरण्यगर्भाख्या
वान्तरप्रकृतेः प्राणसद्भावपरमित्यर्थः॥ ननु हिरण्यगर्भस्य विकारस्य सहैकधैव तदाविकारासत्त्वं कथं नेत्यत आह॥ स्व
विकारेति॥ स्वस्य कार्यं ब्रह्मणो यत्कार्यं स्थूलं तस्योत्पत्तिरित्यर्थः॥ ननु यथाश्रुति महाप्रलये प्राणसद्भावरूपलिंगप्रा
णानुत्पत्तिसाधकं किमित्यवान्तरप्रलयपरतया नीयत इति चेदेतस्माज्जायते प्राण इत्यादिप्रबलश्रुतिबला
दिति वादामः॥ ननु विकारस्य ब्रह्मणः कथं प्रकृतित्वमित्यत आह॥ व्याहृतेति॥ हिरण्यगर्भः समवर्त्तताग्र इत्यादि

१५

श्रुतावादिकर्तास्वकर्तृत्वानामित्यादिसूत्रे तो च विकारास्तेनामपि मूलकारणावस्थारूपाणां ब्रह्मविराडादीनां प्रकृतिविकारभा
वेन प्रसिद्धिरस्ति॥ पूर्वापेक्षया विकारस्याप्युत्तरापेक्षया प्रकृतित्वमित्यर्थः॥ केचिदियादधिकरणानुरोधेनेदं सूत्रं व्याचक्ष
ते तान्दूषयति॥ वियदिति॥ तस्माज्जायत इति पदस्याकाशादिषु मुख्यस्य प्राणापेक्षया प्राचीनेषु प्राणेषु श्रुते मुख्यं जन्मेति सू
त्रयोजना॥ तत्सामान्यादिति॥ तेनाकाशादिजन्मना सामान्यमेकशब्दोक्तत्वं तस्मादित्यर्थः॥ एकस्मिन्वाक्ये एकशब्दस्य क्वचि
न्मुख्यत्वं क्वचिद्गौणत्वमिति विरुद्धं न युक्तमिति न्यायमन्यत्राप्यतिदिशति॥ यत्रापि पश्चाच्छ्रुत इति॥ यच्चोक्तं छांदोग्ये प्राणाना
मुत्पत्तिर्न श्रूयत इति॥ तत्राह॥ तत्पूर्वकत्वाद्वाच इति॥ अत्र सूत्रे वाक्यं प्राणमनसोरुपलक्षणं वाक्प्राणमनसां तेजोबन्न
पूर्वकत्वोक्तेरश्रवणमसिद्धमिति योजना॥ नैयायिकादिभिश्चक्षुरादीनां सामान्यं करणत्वं तत्सामान्यादित्यर्थः॥ अन्नमयं हि सो
रे मुख्य इति वत्तिवर्तन एव प्राणानां ब्रह्मकार्यत्वं तेजोबन्नानां ब्रह्मविकारत्वात्॥ यदि प्राणस्य वायोर्जलविकारत्वायो
गात्तदधीनस्थितिकत्वमात्रेण भाक्तत्वं तथापि प्राणानां विकारत्वे भूताधीनस्थितिकत्वं लिंगमयदोक्तमिति सिद्धं ब्रह्म
कार्यत्वं स प्राणमसृजत इत्यादिश्रुतेस्तत्र स्पष्टं ब्रह्मकार्यत्वोक्तेश्च तस्मात्प्राणानामुत्पत्तिश्रुतीनां सद्भावश्रुत्याविरोधात्का
रणे ब्रह्मणि समन्वय इति सिद्धं॥ लिंगशरीरविचारात्मकाधिकरणानां लिंगात्वं पदार्थभेदधीफलमिति द्रष्टव्यं॥ एवं जन्म
लक्षणसत्ताकानां प्राणानामुपजीव्योपजीवकत्वसंगत्या संख्यानिर्णेतुं श्रुतीनां विरोधात्संशये पूर्वपक्षयति॥
सप्तगतेर्विशेषितत्वाच्च॥ विशयः संशयः इंद्रियाण्यत्र विषयः॥ पंच धींद्रियाणि वाङ्मानश्चेति सप्त प्राणाः एत
एव हस्तेन सहाष्टौ ग्रहत्वं बंधकत्वं गृह्णंति बध्नंतीति ग्रहा इंद्रियाणि तेषां बंधकत्वं विषयाधीनमित्यतिग्रहाः॥ ग्र
हानतिक्रांता विषया इत्यर्थः॥ द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वाक् चेति सप्त शीर्षण्याः अर्वाक्प्राणौ द्वाववाचौ पायूपस्थौ चेति नव॥
ज्ञानकर्मेंद्रियाणि दश मे पुरुषे हि दे प्राणा आत्मा मनएकादशः प्राण इति सिद्धांतकोटिरुक्ता॥ तत एव बृहदारण्यका

१६

= व्यति व्यतिमतो स्तद्वा वाय सा ज्ञा सं ब न्धं यं न च तदादानादीनां श्रोत्रादीनां चास्ति। आदानादीनां द्रव्य कर्म द्वा ... श्रोत्रा राजादि या हस्त्यो श्च दानादीनां वाय वीय त्वा छोत्रा दीनां ना स्त स्वाद्य इत्यर्थः २

बुद्ध्या सह द्वादशां हंकारेण सह त्रयोदश श्रुतितः सप्तत्वावगते र्ये शीर्षण्याः सप्त प्राणा इति शीर्षण्योद्देशेन प्राणत्वविशे षणात्स॥ शीर्षण्यानां प्राणत्व शक्तिं तेंद्रियत्व परिसंख्यया सप्तैव प्राणा इति सूत्रयोजना॥ सप्तत्वं वीप्सा विरुद्धमिति शं कते न विति। गुहायां हृदये शेरत इति गुहाशयाः स्वस्थाने षु निहिता निश्चिता इत्यर्थः॥ विते न चतुर्दशत्वं मंतव्यं। एवं पक्षी परिहरति। नैष दोष इति। सिद्धांतिनाप्येकादश सु मनोवृत्ति भेदान्निश्चयात्मिका बुद्धिर्गर्वात्मको हंकारः स्मर णात्मकं चित्तमिति द्वादशादि संख्यां न सर्वो वनीतं तो वरं प्राथमिक सप्तत्वे न सर्वो वोल्लाघवादिति प्राप्ते सिद्धांत इति॥ अत्रेति आदानेन कर्मणा गृहीतः संबद्धः संबंधमेवाह॥ हस्ता श्चामिति॥ अतोधिक संख्याश्रुत्यनायामंत र्भावायोगा त्सप्तैव प्राणास्तु लाघवानुरोधादि सेवं न मंतव्यमित्यन्वयः॥ तर्हि कतींद्रियाणि इत्याकांक्षया माह॥ उत्तरेति॥ श्रुतीनां मिथो विरोधे सति निर्मनांतरानुगृहीताश्च निर्बलयसीति न्यायेन कार्य लिंगानुमानानुगृहीतैकादश प्राणश्रुत्यनु सारेणान्याः श्रुतयो नेया इत्यभिसंधायाह॥ सत्यमिति॥ एकादश कार्यलिंगान्याह॥ शब्देति॥ त्रयः कालास्त्रैकाल्य तद्विषया वृत्तिर्यस्य तत् त्रैकाल्यवत् इंद्रियां तराणां वर्तमानमात्रग्राहित्वात् अतीतानागतमनो गोचरं कार्यमित्यर्थः॥ वि शेषितत्वादि सूत्रं निरस्यति॥ अपि च सप्तेति॥ न च तावतामित्या ... दानादीनां श्रोत्रादिभ्यो न्यत्वे जात्यादित्यर्थः॥ तेषां तद्धानि स्वबधिरादीनां मादानादिन स्यादिति भावः॥ कथं तर्हि छिद्रे प्राणशब्द इत्याशंक्य लक्षणयेत्याह॥ मुख्यस्येति॥ सप्त प्राणाः प्रभवंति स्रूपा सनार्थं अष्टौ ग्रहा इति श्रुति ... पलक्षणार्था पारस्परस्य पदानां मपि बंधकत्वाविशेषादिति विवेक्त व्यं॥ न चेदं सूत्र व्याख्यानम संगतं पंचधीन्द्रिय वाङ्मनसां सप्तत्वावगतिः शीर्षण्यानां चतुर्णां विशेषितमिति हेत्वोर्वै व्यधिकरण्यात् हेतूक्त परिसंख्यादोषा चेत्स्य चैवाह॥ इयमपरेति॥ इंद्रियाणि कतीति संदेहे पूर्वपक्षसूत्रं योजयति॥ सप्तेति॥ मंजीवात्मनं ये प्राणाः सह गच्छंतीति तेषामेव भोग हेतुत्वादिंद्रियत्वमित्यर्थः॥ यत्राव स्थायामेष चाक्षुषश्चक्षुषि स्थितो

= ते शुद्धी र्षण्येषु दृष्ट्वा पारस्परत्वे संख्यान स्यादेष त्वो ... तु पूर्वं सप्तत्वायोगादित्यर्थः २

नुग्राहकः सूर्यांशरूपः पुरुषः पराङ्पर्यावर्त्तते चक्षुर्देशात् स्वांशिनं सूर्यं प्रतिगच्छति॥ अथ तदानीमयं मुमूर्षुररूपज्ञो भवतिदे वांशो देवं प्रविष्टे लिंगांशश्चक्षुर्हृदये मनसैकीभवति तदा येन पश्यतीति पार्श्वस्था आहुरित्यर्थः॥ आदिपदान्न जिघ्र ति न वदति न रसयते न शृणोति न मनुते न स्पृशति न विजानातीति गृह्यते॥ समानामेव जीवेन सह गतिरिति सिद्धं॥ न

दृष्टस्य हस्तादीनामपि गतिप्रतीतेरिति सिद्धांतयति॥ एवमित्यादीना॥ हस्तादिबंधस्या मोक्षात्सह गतेः स्मृतिमाह॥ पुर्यष्टकेनेति॥ प्राणादिपंचकं भूतसूक्ष्मपंचकं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं अंतःकरणचतुष्टयमविद्याकामः कर्मचे ति पुर्यष्टकमात्मनो ज्ञापकत्वाल्लिंगं सति संभवे सर्वश्रुतिसंकोचो न युक्त इत्याह॥ सर्वशब्दोपीति॥ तस्मात्संख्याश्रुतीना मविरोधादेकादशेंद्रियकारणे ब्रह्मणि समन्वय इति सिद्धं॥ अणवश्च॥ प्राणाः सर्वेनंता इति श्रुतेरिंद्रियाणां विभुत्वान्नेषा मुत्क्रांतिरसिद्धा किंतु तत्तद्देहे तेषामभिव्यक्तिरूपाः प्रादेशिक्यो वृत्तयः संतिभेता सामुत्क्रांत्यादि[illegible]रिति सांख्या नामाक्षे पस्तत्संगत्या प्राणाः किंपरिमाणा इति संदेहे सिद्धांतयति॥ अधुनेत्यादिना॥ उत्पत्तिसंख्यानिर्णयानंतरं परिमाणं निरूप्यत इत्य र्थः॥ अनुद्भूतरूपस्पर्शत्वं सूक्ष्मत्वं परिच्छेदोल्पत्वं बुद्ध्यादिनां विभुत्वेन तदुपाधिकमात्मनोणुत्वादिकं न सिद्ध्येदित्युक्तन्यायविरो धमाह॥ तद्गुणसारत्वमिति॥ उक्ताक्षेपमनूद्य निरस्यति॥ सर्वगतानामिति॥ अनंतश्रुतेरुपासनार्थत्वान्नोक्तांत्यादिश्रुती नां तयाविरोध इति सिद्धं॥ श्रेष्ठश्च॥ अतिदेशत्वान्न संगत्याद्यपेक्षा तथा प्राणा इत्युक्तन्यायोत्रातिदिश्यते॥ ननु प्राणोत्रा यते न वेति संशयाभावादतिदेशो न युक्त इत्याक्षिपति॥ किमर्थ इति॥ निश्चितमहाप्रलये प्राणसद्भावश्रुत्या धिकाशंका माह॥ नासदासीदित्यादीति॥ नासदासीदित्यादिव्याख्याति इत्यर्थः॥ तर्हि तदा प्रलयकाले मत्पत्सर्गसमकार्यं वा नासीदप्र तंच देव भोग्यं नासीत्॥ तथ्याः प्रकेतःचिद्रूपश्चंद्रअह्नः प्रकेतः सूर्यश्च नास्तां स्वधया सहैस्यन्वयः पितृभ्यो देयमन्नं स्वधा॥ स्वेन धृता माया स्वधा तया सह तदेकं ब्रह्म आनीदासीदिति परमार्थः॥ परिहारः स्फुटो धः॥ ननु श्रेष्ठशब्दस्य प्रा

यद्वा।

अत्रानीदिति तच्छेषां कृत्वं वक्ति पूर्वपक्षार्थः॥ तस्माद्धान्यत्परः पर मन्यच्च किमपि न बभूवेत्यर्थः १

…तथेति॥ [illegible]

॥३१॥

णे प्रसिद्ध्यभावाल्लक्षणस्य त्रमितित आह॥ श्रेष्ठ इति॥ नेति श्रुतिं व्याचष्टे॥ ज्येष्ठश्च प्राण इत्यादिना॥ स्वयं वेदेन संसवे तद्धर्मेन सवेदिसर्थः॥ वागादिर्जीवनहेतुत्वं प्राणस्य गुणः एवमानिच्छस्य विरोधात् प्राणो स्यतिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं॥ इंद्रियाणि विचार्य तद्व्यापारात् प्राणपृथक्त्वं तु मुख्यत्वेति दिष्टा संप्रत्युत्पन्न प्राणस्वरूपं पृथक्करोति॥ न वायुक्रिये पृथगुपादेशात्॥ मुख्यः प्राणः किं वायुर्मात्रं उत करणानां सारण व्यापारः आहोस्वित् तत्त्वांतरमिति वायुप्राणयोर्भेदाभेदश्रुतीनां मिथो विरोधात् संशये पूर्वपक्षमाह॥ तत्रेति॥ द्वितीयं सांख्यपूर्वपक्षमाह॥ अथवेति॥ सिद्धांतत्वेन सूत्रमादत्ते॥ अत्रोच्यत इति॥ मनोरूप ब्रह्मणो वाक् प्राणश्चक्षुः श्रोत्रं श्च तु ष्यात्वं श्रुता वुक्तं तत्र प्राणो वायुना [illegible] विवेकेन भाति अभिव्यज्यते अभिव्यक्तः संस्तपति कार्यक्षमो भवतीत्यर्थः॥ श्रुतिषु तत्र तत्र प्राणस्य वागादीनां च मिथः संवादलिंगेन पृथगुपस्तिलिंगेन चेंद्रियतद्भिन्नव्यापारेभ्योऽपि भिन्नत्वमित्याह॥ [illegible] प्राणस्येंद्रियवृत्तित्वं श्रुत्या निरस्य युक्त्यापि निरस्यति॥ न च समस्तानामिति॥ या चक्षुरादीनां साधारण्य वृत्तिः सेव न श्रोत्रादिसाध्या करणानां प्रत्येकमेकेक[illegible] पगद्दादिवत्तावेव देहे तुल्यान्य वस्समुदायस्य वृत्तिः संभवति तस्यासत्वादित्यर्थः॥ प्रमाणाभावादिति श्रोत्रादिनामेक प्राणाख्य व्यवस्यनुकूल परिस्पंदेषु मानाभावाच्छ्रवणादिनामपरिस्पंदत्वेन विजातीयानां परिस्पंदरूप प्राणजनानुकूलत्वाद वांतर व्यापाराभावान्न समस्तनाभावाच्छ्रवणादिनामपरिस्पंदत्वेन वागादीनिव प्राधान्यं वाच्यं नैतदस्तीत्याह॥ तथा प्राणस्येति॥ यथा मद्दोकरणवृत्तिः प्राण इत्यर्थः॥ किं च प्राणस्य वृत्तित्वे वागादीनिव प्राधान्य वाच्यं नैतदस्तीत्याह॥ तथा प्राणस्येति॥ यथा मद्दो द्रवोन वस्त्वंतरं नापि मन्मात्रं तद्विकारत्वात्तथा वायोर्विकारः प्राण इत्यभेदश्रुतेर्गतिमाह॥ उच्यत इति॥ देहं प्राप्तः पंचावस्थोविकारात्मना स्थितो वायुरेव प्राण इत्यर्थः॥ प्राणस्य करण[illegible]वृत्तित्वाभावे जीववद्धोक्तृत्वं स्यादिति शंकते॥ स्यादेतदिति॥ प्राणो न भोक्ता भोगोपकरणत्वात्॥ चक्षुरादिवदिति सूत्रार्थमाह॥ तु शब्द इत्यादिना॥ यथा ब्रह्म द्रष्टंतरयोः सर्वत्र सहप्रयुज्यमानत्वेन सामत्वेन वा साम्यात् सहपाठस्तथा करणैः सहोपकरणत्वेन साम्यात् प्राणस्य पाठ इति न द्वेषसिद्धिरित्यर्थः॥ किं च प्राणो न भोक्ता सावयवत्वाज्जडत्वाद्धोति कल्पादेहवत्॥ ननु यद्भोगोपकरणं तत्सविषयं दृष्टं यथा चक्षुरादिकं प्राणस्य तु निर्विषयत्वादसाधारणकार्याभावाच्च नोपकरणत्वमिति शंकते स्यादेतदिति॥ उक्तव्या

रू

द्र

॥

मेः शरीरे व्यभिचाराद्धि इंद्रियधारणोक्तस्याप्यसाधारणकार्यसत्त्वाच्च निर्विषयस्यापि प्राणस्य शरीरवद्भोगोपकरणत्व
मक्षतं ॥ ननु चक्षुरादिवत् ज्ञानकर्मकरणत्वमस्ति येन सविषयत्वं स्यादिति परिहरति ॥ न तावदित्यादिना ॥ अहं श्रेयसि स्व
श्रेष्ठनातिभिन्नं चक्षुरादिरिति विवादं चक्रिरे ॥ तद्धृतिमात्रहीनमिति मूकादिभावे न स्थितमित्यर्थः ॥ अवरं नीचं कुलायं देहाख्यं
गृहं प्राणेन रक्षन् जीवः स्वपितीत्यर्थः ॥ तदेव तदानीमेव तेन प्राणेन यदश्नाति जीवस्तैः प्राणकृताशनेनेति यावत् ॥ एवं न
श्रुतेः प्राणस्यासाधारणं कार्यमस्ति स्फुटं तत्रैव देहत्वं रार्थं सूत्रं व्याचष्टे ॥ इतश्चेत्यादिना ॥ वृत्तिरवस्था ग्निमथनादीनां
वीर्यवत्कर्मकामादिवृत्तिवत् ज्ञानेपि पंचत्वनियमो नास्ति स्यात् स्वयमेवोह्यं स्वपक्षान्तरं गृह्णाति ॥ नन्वत्रापि स्यादि
ना ॥ प्रमाणं प्रमितिः विपर्ययो भ्रमः शशविषाणादिज्ञानं विकल्पः तामसी वृत्तिर्निद्रा स्मृतिः प्रसिद्धा भ्रमनिद्रयोरविद्यावृत्ति
त्वान्मनोवृत्तित्वमित्यरुच्या स्वमतमाह ॥ वक्ष्यतीति ॥ सूत्रस्यार्थान्तरमाह ॥ जीवेति ॥ तदैं प्राणवायोर्भेदश्रुतेरविरोध इतिसि वं
द्धं ॥ एवं मुख्यप्राणस्योत्पत्तिं स्वरूपं चोक्त्वा परिमाणसंदेहे अणुत्वमिति दिशति ॥ अणुश्चेति ॥ अधिकाशंकामाह ॥ ननु
विभुत्वमपीति ॥ प्लुषिर्मशकादपि सूक्ष्मो जन्तुः युक्तिके उच्यते नागो हस्ती प्राणस्य उत्क्रामतीति श्रुत्याल्पत्वं प्राणस्य भाति समो
नेन सर्वेणेति श्रुत्या विभुत्वमिति विरोधे आध्यात्मिकप्राणस्याल्पत्वमाधिदैविकस्य विभुत्वमिति विषयभेदाद्द्वयोरवि
रोध इति समाधत्ते ॥ तदुच्यत इति ॥ किंचोपक्रमे प्राणस्य प्लुष्यादिसमत्वेनाल्पत्वोक्तेः सम एभिस्त्रिभिर्लोकैरिति वि
राड्देहसाम्यं समेनानेनेति सूत्रात्मत्वमिति विषयव्यवस्था सुस्थेत्याह ॥ अपि चेति ॥ अर्थश्चेत्यत्र सर्वेनताइंतीदि
ध्यानं समुपासनार्थमिति समाहितं अत्र तु प्राणविभुत्वमाधिदैविकमिति समाधानान्तरोक्तेरपौनरुक्त्यं ॥
अन्ये तु प्रसंगात् तत्र सांख्याक्षेपो निरस्तः अत्र तु श्रुतिविरोधो निरस्त इत्यपौनरुक्त्यमाहुः ॥ सर्वप्राणस्याध्या
त्मिकाधिदैविकविभागेनाणुत्वविभुत्वव्यवस्थोक्ता तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्व
माह ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ वागादीनामाग्न्यपि वदति चक्षुषा रूपाणि पश्यतीति तत्तीयाश्रुत्यासान्वयोति

।.ना.टि.रु.
१४७

द्वि. ध्या

रेकत्वस्यावागादीनां निरपेक्षसाधनोक्तिविरोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनाग्न्याद्युपादानात्कत्वपरा ननु ते
षामधिष्ठातृदेवतापरा न च स्वकार्ये शक्तानामपि वागादीनामचेतनत्वादधिष्ठात्रपेक्षा न विरुध्यत इति वाच्यं ॥ जीवस्याधि
ष्ठातृत्वात्किं च देवानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन्देहे स्यात्तथा चैकत्रानेकभोक्तृणां विरोधादुर्बलं जीवस्य भो
क्तृत्वं न स्यादिति पूर्वपक्षार्थः ॥ सिद्धान्तयति ॥ एवं प्राप्त इत्यादिना ॥ अग्निर्वाग्भूत्वादित्यश्चक्षुर्भूत्वेति च तद्भावो नाग्न्या
दिदेवताधिष्ठेयत्वरूप एव संबंधो न तदुपादानकत्वरूपः दूरस्थादित्यमंडलादेर्मुखस्थचक्षुराद्युपादानत्वासंभवादि
त्याह ॥ अग्नेश्चायमिति ॥ वायुः प्राणाधिष्ठाता भूत्वा नासापुटे प्राविशदिति व्याख्येयमित्याह ॥ तथेति ॥ भातिदीप्यतेऽन
पतिस्वकार्यं करोतीत्यर्थः ॥ एतस्मिन्नधिष्ठात्रधिष्ठेयत्वरूपार्थे लिंगान्तरमाह ॥ स वै वाचमिति ॥ स प्राणो वाचं प्रथमामुद्गी
थकर्मणि प्रधानामत्यन्तादिपापरूपं मृत्युमतीत्यावहन्मृत्युनामुक्तां सत्ताग्निदेवतात्वं प्रापितवानित्यर्थः ॥ किंच ॥ मनस्या
द्भिर्वागग्न्यभिवानं प्राणः चक्षुरादित्यमित्यादिश्रुतिरप्यधिष्ठात्रधिष्ठेयत्वसंबंधद्योतनपतीत्याह ॥ सर्वत्रेति ॥ ननु शा
कटादीनां बलीवर्दादिप्रेरितानां प्रवृत्तिर्दृष्टाक्षीरादीनां त्वनधिष्ठितानामपि दध्यादिप्रवृत्तिर्दृश्यते न तथा चोभयथा
संभवे कथं निश्चीयत इत्याह ॥ उभयथोपपन्नो नेति ॥ उक्तदोषान्तरनिरासाय सूत्रमवतारयति ॥ यदपीति ॥ शारीरेणे
वेति भोक्तेति शेषः ॥ संबन्धो भोक्तृभोग्यभावः ॥ अथ देहे प्राणप्रवेशानन्तरं पत्रगोलके एतच्छिद्रमनुप्रविष्टं चक्षुरिन्द्रि
येतत्र वस्तु अस्मिमानी स अस्माच्चाक्षुषस्तस्य रूपदर्शनाय चक्षुः यथ्यास्माकरणान्यपेक्षते ध्यापित्यज्ञानतदा
श्रयाहंकारान्यो वेद स आत्मा चिद्रूप एव करणानि तु गंधादिवन्नेये पेक्षंते न त्वेतच्यायेति श्रुत्यर्थः ॥ किंच ये हंरूप
मद्राक्षं स रागवाहं श्रणोमीति संधानादेकः शारीर एव भोक्ता न बहवो देवा इत्याह ॥ अपि चेति ॥ कदाचिद्देवाना
मन्नभोक्तृत्वं कदाचिज्जीवस्येत्यनियमो स्थित्याशंक्य स्वकर्मार्जिते देहे जीवस्य भोक्तृत्वनियमान्नैवमित्याह
तत्र कारः ॥ तस्य चेति ॥ उत्क्रमणादिषु जीवस्य प्राणाद्यपिचारात्तस्यैव प्राणस्वामित्वं देवतानां तु परस्वांमि

२

प्रति ३

=देवतानामधिष्ठातृत्वेऽपि जीव एव भोक्ता तस्य भोक्तृत्वेन देहस्वामित्वात् देवानां तु अधिष्ठातृत्वमात्रम् इत्यर्थः ३

करथसारथिवदधिष्ठातृत्वमात्रमिति व्याख्यांतरमाह॥ शारीरेणैव चानित्यइति॥ यथा प्रदीपादिः करणोपकारकतया करणपक्षस्यांतर्गतस्तथादेवाः करणोपकारकाएवन भोक्तारइत्यर्थः॥ जीवस्यादृष्टद्वाराकरणाधिष्ठातृत्वाद्गृहस्वामीव भोक्तृत्वं देवानां तु करणस्वरूपोपकारमात्रतया सारथिवदधिष्ठातृत्वमितिन जीवे नान्यथासिद्धिः॥ देवानामधिष्ठातृत्वेनास्मिन्देहे भोक्तृत्वानुमानं तु न ह वै देवान्पापं गच्छतीति श्रुतिबाधितं तस्माच्चक्षुरादिरूपाणि पश्यतीति श्रुतेः साधनत्वमात्रबोधित्वादग्निर्वाग्भूत्वेत्यादावधिष्ठातृदेवतापेक्षबोधकश्रुत्यविरोधइतिसिद्धं॥ तत्त्विंद्रियेषु तदधिष्ठातृदेवतासु चिंतितान्येव प्राणवृत्तिव्यतिरेकेण न संतीत्याशंकापरिहारायाह॥ त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥ प्राणादिंद्रियाणां भेदाभेदश्रुतिभ्यां संशयं वदन्पूर्वपक्षयति॥ मुख्यश्चेत्यादिना॥ हंतइदानीमस्यैवमुख्यप्राणस्य सर्वे वयं स्वरूपं भवामेति संकल्प्यते वागादयस्तथाभवन्तिसम। भेदश्रुतेस्त्वर्थः ते प्राणादभिन्नाः प्राणपदवाच्यत्वात् प्राणवदित्याह॥ प्राणेति॥ ते प्राणाः श्रेष्ठादन्यत्र अन्यइति प्रतिज्ञार्थत्वेन पदत्रयं व्याचष्टे तत्त्वांतराण्येवेति॥ तद्व्यपदेशादित्यत्र नञ्छेदः प्रतिज्ञातान्यत्वं परामृशति॥ प्राणा इंद्रियाणीत्यपर्यायशब्दाभ्यामन्यत्वोक्तेरिति हेतूपपादनार्थत्वेन पुनस्तानि सूत्रपदानि योजयति॥ तद्इत्यादिना॥ सूत्रस्य विश्वतोमुखत्वादुभयार्थत्वमलंकारएन न दूषणमेतेन प्रतिज्ञाव्याहारस्तच्छब्दस्याप्रकृतभेदापरामर्शित्वं चेतिदोषद्वयमपास्तं शब्दभेदाद्धस्तभेदसाधनेऽतिप्रसंग इत्याह॥ नन्विति॥ प्राणवन्मनसोपींद्रियत्वाभेदस्यादित्यर्थः॥ अपर्यायसंज्ञाभेदात्स्वतंत्रसंज्ञिनःवस्तुभेदइत्युत्सर्गः स च मनःषष्ठानीन्द्रियाणीत्यादिस्मृतिबाधान्मनस्यपोद्यते प्राणे तु बाधकाभावादुत्सर्गसिद्धिरिति समाधत्ते॥ सत्यमित्यादिना॥ मन इंद्रियाणि चेति भेदोक्तिर्गोबलीवर्दन्यायेन स्थेयासिद्धा तेमनसः प्रमापादनत्वादात्मवदनिंद्रियत्वमिष्टं तन्नोत्सर्गबाधइति केचित्॥ किं चैतस्माज्जायते प्राण इंद्रियाणि चेति पृथग्जन्मव्यपदेशात्स्वतंत्रवस्तुभेदइत्याह॥ व्यपदेशभेदश्चेति॥ एकस्मिन्वाक्ये प्राण इंद्रियशब्दभेदस्याप्रमत्तेन पुनरुक्तिभयान्नत्वमतेचेतिव्या[illegible]तइत्यर्थः॥ एवं भेदेनापर्यायसंज्ञाभ्यामुक्तेः पृथग्जन्मोक्तेश्चेति तद्व्यपदेशादितिहेतुर्व्याख्यातः भेदश्रुतेरिति सूत्रेण प्रकरणभेदोहेतुरुक्तइतिन

घ

यो नरः मंथते ह देवाः शास्त्रीयेंद्रियवृत्तयः मनोवृत्तिरूपा असुराणां जयार्थमुद्गीथकर्मणि प्रथमं व्याप्तां वाचमूचुस्त्वं न उद्गायास्तु रर्नेशा
र्थमिति तथास्त्विति सा स्वीकृत्य यंती वाचमनृतादिदोषेण विध्वंसितवंतोसुरा इत्येवं क्रमेण सर्वेष्विंद्रियेषु पापग्रस्तेषु पश्चाद्दयेति
ति प्रकरणं विच्छिद्य प्रसिद्धमास्यमवमासन्यं मुख्यं प्राणमूचुस्त्वं न उद्गायेति तेन प्राणेनोद्गात्रा निर्विषयतया संगदोषशून्ये नासु
रा नष्टा इत्यसुराणां विध्वंसिनो मुख्यप्राणस्योपासनेन सर्वद सिद्धिरित्याह ॥ तेहेति ॥ तानि त्रीण्यन्नान्यात्मने स्वार्थं प्रजापतिः कृतवा
नित्यर्थः ॥ विरुद्धधर्मवत्त्वाद्भेद इत्याह ॥ वैलक्षण्या चेति ॥ मसूरा संगदोषः वागद्येवान्नं धनवतीत्यर्थः ॥ बहुभिर्भेद लिंगै
र्विरोधाद्यागादीनां प्राणरूपभवनं प्राणाधीनस्थितिकत्वरूपं व्याख्येयमत एव प्राणशब्दस्येंद्रियेषु लक्षणा बीजं श्रुतौ तेन स्मादंतर
नेनेति पराम्रष्टमिति तन्मेदापेदश्रुत्योर्विरोध इति सिद्धं ॥ उत्पत्तिरुत्पादनेति चकार्यककर्त्रोर्व्यापारो प्रसिद्धो तत्र जगदुत्पत्तिश्रु
ति विरोधमतीतेन पादद्वयेन निरस्तः संप्रत्युत्पादनश्रुतिविरोधो निरस्यते तत्रापि सूक्ष्मभूतोत्पादनं पारमेश्वरमेवेति श्रुति
ष्वविप्रतिपन्नं स्थूलभूतोत्पादने त्वस्ति श्रुतिविप्रतिपत्तिरिति तन्निरासार्थमाह ॥ संज्ञामूर्तीति ॥ नामरूपभेदोत्करणमिन्नः
प्राण इत्युक्तं तत्प्रसंगेन स्थूलनामरूपक्लृप्तिः किंकर्तृकेति चिंत्यत इत्यनंतरसंगतिः ॥ प्रक्रियाप्रकरणं ईक्षणमेवादा
हं तेत्यादिना ॥ हंताहमिमा देवतास्तिस्रः अनुप्रविश्येति संबंधः ॥ तासां तिसृणां देवतानामेकैकां देवतां तेजोबन्नात्म
नाम्यास्त्रिवृत्कां करीष्यामीति श्रुतिः पंचीकरणोपलक्षणार्था ॥ छांदोग्ये प्याकाश्या वा योरुपसंहारस्योत त्वादेवं स्थूली
कृतेषु प्राणिनां व्यवहारः सेत्स्यतीति परदेवताया संकल्पार्थः ॥ जीवेनेति पदस्य व्याकरवाणीत्यनेन संबंधसंभवासंभवा वा
भ्यां संशयमाह ॥ तत्रेति ॥ पूर्वपक्षे जीवस्यैव कर्तेति कृत्स्नसृष्टृत्वाद्ब्रह्मणः सर्वकर्तृत्वसिद्धिः ॥ सिद्धांते तत्सिद्धिरिति फलं
जीवेनेत्यस्य व्याकरवाणीति प्रधानक्रियापदेन संबंध इति पूर्वपक्षमाह ॥ तत्र प्राप्तमिति ॥ परदेवतायां अद
ते सेकथंमुत्तमपुरुषप्रयोग इत्याशंक्य प्रयोजकत्वात्कर्तृत्वोपचार इत्याह ॥ यथा लोक इति ॥ सिद्धांतयति तु शब्देन
नेत्यादिना ॥ प्रत्याहरति प्रतिजानीत इत्यर्थः ॥ अनेन स्थूलसर्वसर्गे जीवस्यासामर्थ्यं द्योतितं ॥ तथाच पदान्वयस्य पदा
र्थयोग्यताधीनत्वाज्जीवरूपेण प्रविश्याहमेव व्याकरवाणीत्यन्वयो न तु जीवेन व्याकरवाणीति न नु तर्हि प्रवेशक्रिया

=पाठ प्रलयस्तासां मध्ये केषांचित्त्रिवृतं त्रिवृतं यूरवाणी स्यादेव पठितासां नामरूपे व्याकरवाणी ति तस्य व्याख्यानमिति सर्वं पाठवैपरीत्यमि

जीवकर्तृकव्याकरणमीश्वरकर्तृकमिति कृतः दोषमेत्याप्रत्ययोनस्यादित्यत आह ॥ नन्वजीवेनात्मनेति वचनात् तस्य स
र्यो जले प्रविष्ट इति प्रतिबिंबभावाख्यप्रवेशस्य सूर्यस्येव कर्तृत्वप्रयोगाज्जीवात्मना प्रवेशो पीश्वर एव कर्त्रेति
त्वाश्रुतिर्युक्तेति ध्येयं ॥ नैनैषभेदश्चेज्जीव एव व्याकर्ता । किं न स्यादित्याशंक्य कल्पनया भिन्नस्य तस्याशक्तत्वा
च्छ्रुतिविरोधाच्चमैवमित्याह ॥ परमेश्वर एवेति ॥ प्रत्येकं महाभूतसर्गस्य प्रागुक्तत्वादिह व्याकरणवाक्ये यत्त
त्पूर्वकं स्थूलभौतिकसर्ग उच्यत इति

॥ पाठव्यत्ययेन सूत्रस्थचितं सूत्रार्थमाह ॥ त्रिवृत्क
रणापूर्वकमिति ॥ ईश्वरकृतव्याकरणत्वे दृष्टमित्यत आह ॥ तत्रेति ॥ इदानीं नामरूपव्याकरणे क्रममाह ॥ तत्राग्नि
रिति ॥ यद्यप्यतः प्रभवादिसूत्रे वेदशब्दपूर्विकार्थसृष्टिरुक्ता तथाप्यव्यक्तात्मना स्थितादर्थस्य सृष्टौ सत्यां स्फुरना
मसंबंधापि व्यक्तिरत्रोक्तेत्यविरोधः ॥ नन्वग्न्यादीनां तेजस्तानामेव श्रुतावुदाहरणाद् जलयोर्व्याख्यानमत्र म
विवक्षितमित्यत आह ॥ अनेनेत्वेति ॥ उपक्रमे तासामध्य इति शेषः ॥ यत्कृयोन रूपादिकं शुक्लत्वादिविशेषाका
रेणाविज्ञातमिव स्वभवति तद्देवतानां समुदायरूपमित्यर्थः ॥ बाह्यं त्रिवृत्करणमुक्त्वाध्यात्मिकमपरं सूत्रो
क्तं विलक्षणं वदन्नुत्तरसूत्रमवतारयति ॥ मांसादिमित्यादिना ॥ पुरुषशरीरं प्राप्येकैकात्रिवृद्भवति का
र्यं त्रयात्मना भवतीत्यर्थः ॥ उत्तरसूत्रेणाशंकितं दोषं निरासितुमाशंकाविषयमाध्यात्मिकत्रिवृ
त्करणं दर्शयतीति भावार्थः ॥ नन्वन्नमयं मांसादिकं यथा भौममित्यत आह ॥ त्रिवृत्कृतानामपि रेवेति ॥

६

॥प्राणस्य वायोरकार्यसमोपचारीकं द्रष्टव्यं॥ एवं विषयमुक्त्वा दोषं शंकते॥ आत्रादिति॥ तदुत्तरत्वेन सूत्रं व्याचष्टे॥ तुशब्देनेति॥ स्वभागाधिक्यं वैशेष्यं किमर्थं सूत्रनिस्तत आह॥ व्यवहारप्रसिद्ध्यर्थमिति॥ एवं समन्वये तिन्यायसमन्वितरश्रुतिविरोधो ब्रह्मणि वेदांततात्पर्यस्येति सिद्धं॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदानंदशिष्यस्य श्रीमद्रामानंदस्य कृतौ शारीरकशांकरभाष्यटीकायां रत्नप्रभायां द्वितीयाध्यायस्य चतुर्थः पादः समाप्तश्चायं द्वितीयाध्यायः॥ ॥२॥४॥ ॥

श्री

॥ त्व तीगाध्यायस्वारं[illegible]न: ॥

शा.भा.टि.२.

नसा प२

॥ॐ॥ यं हि वैराग्यसंपन्नास्तत्समर्थविवेकिनः ॥ लभंते साधनैर्दांतास्तं सीतानायकं भजे ॥१॥ तदंतरप्रतिपत्तौ रंहति संपरि
ष्वक्तः प्रश्ननिरूपणाभ्यां ॥ वृत्तमनूद्य तृतीयाध्यायार्थमाह ॥ द्वितीय इत्यादिना ॥ अविरुद्धे वेदांतार्थे तद्वा नचिंतावसर इसे
नयोरध्याययोर्हेतुहेतुमद्भावः ॥ लिंगोपाधिसिद्धो तदुपहितजीवसंसारचिंतेति पादयोरपि तद्भावः संगतिः ॥ अत्र
प्रथमपादे वैराग्यं ॥ द्वितीये स्वप्नाद्यवस्थोक्त्या त्वंपदार्थो ब्रह्मतत्त्वं चोच्यते तृतीये वाक्यार्थस्तदर्थमुपासनाश्च वि
चार्यंते चतुर्थपादार्थमाह ॥ सम्यग्दर्शनादिति दर्शनोपायाः संन्यासादयः मुक्तिरूपफलस्य स्वर्गवत्तरतम्य
नियमाभावएकरूपत्वमिति त्यात् ॥ प्रसंगात्तदेहात्मदूषणं पंचसु ध्रुक्पर्जन्यपृथिवीपुरुषयोषित्स्वग्निलध्यानं पं
चाग्निविद्या यस्मात्कर्मणा गत्यागतिरूपोऽनर्थस्तस्मात्कर्मफले जुगुप्सां घृणां विरक्तिं कुर्वीतेति पंचाग्निविद्योपसंहारे
श्रवणाद्वैराग्यार्थं प्रदर्शितइत्यन्वयः न्वास्त्रादिसूत्रे नित्यानित्यविवेकरूक्तं वैराग्यमुक्तं इह तद्दार्ढ्याय गत्यागतिकु
त्साभावनोक्ततेत्युच्यतइत्यपौनरुक्त्यं अधिकरणविषयमाह जीवइति अविद्याप्रसिद्धं विद्येति पाठे उपासनाप्र
ह्या ॥ कर्मधर्माधर्माख्यं पूर्वप्रज्ञा जन्मांतरसंस्कारः अथ मरणकाले प्राणास्तदयेजीवेनैरुक्तिं मवंती सर्वेः रूपं शरीरं ॥
पंचीकृतभूतभागाः उत्तरदेहपरिणामिनो भूतसूक्ष्माः वेदांतार्थज्ञानसाधनविचारत्वात्सर्वाधिकारणानां श्रुतिशा
स्त्राध्यायसंगतयः वैराग्यफलकत्वादेतत्पादसंगतिः पूर्वाधिकरणे व्यवहारार्थं पंचीकरणमुक्तं स व्यवहारोऽत्र
निरूप्यतइति फलफलिभावोऽवांतरसंगतिः अत्र पूर्वपक्षे निराश्रयप्राणगत्यभावान्न वैराग्यं सिद्धांते भूताश्रयप्रा
णगतेर्वैराग्यमिति फलभेदः ते ज्योमात्राश्चक्षुरादयः पश्यति जीवतीति वाक्यशेषात् आपः पंचस्वग्निषु हु
ताः पंचम्यामाहुतौ हुतायां यथा पुरुषवाच्याः पुरुषाख्या नापरिणमंते तथा किं वेत्थेति श्वेतकेतुं प्रति राज्ञः प्रवाहणस्य

१ ण॥२ ग त

तृतीयाध्या मपादारं सं वि २५ १

प्रश्नः तस्यचोत्तराज्ञानेन पितरंप्रतिराज्ञैवासौवावलोकोगौतमाग्निस्तत्रश्रद्धारव्यार्थपः आहुतिः पर्जन्याग्नौसोमरूपाः

इहरवल्वग्निहोत्रेश्रद्धयाहुतादध्यादिरूपाआपोयजमानसंलग्नाः स्वर्गलोकंप्राप्यसोमारव्यदिव्यदेहात्मनास्थिताः क

र्मातेदन्ताः पर्जन्येहूयंतेततोवृष्टिरूपाः पृथिव्यामन्नरूपाः पुरुषेरेतोरूपाः योषितिहुताउत्थायः पुरुषशब्दवाच्याः पुमा

त्मकाश्चवंतीतिनिरूपणंकृतंतानन्वेतदेहंसन्काद्भिः स्वहगतस्यपश्चाद्देहांतरप्राप्तिरिस्फुक्तं तद्यथात्रणजलायुका

त्रणांतरंगत्वापूर्वंत्रणंस्यज [illegible] तितथाजीवोदेहांतरंगत्वापूर्वदेहंस्यजतीतिश्रुतिविरोधादितिशंकते नन्व

न्येति इहैवकर्मीयैर्भाविदेहेदेवोहमित्यादिभावनयागहीत्वापूर्वंदेहंस्यजतीतिश्रुत्यर्थः अतोनविरोधइतिस

माधत्ते तत्रापिति भावनायाःदीर्घीभोग्याभाविदेहविषयत्वं घटाकाशवदुपहितोजीवः सूक्ष्मोपाधिगत्यालो

कांतरंगच्छतीतिपंचाग्निश्रुत्यत्तः प्रकारस्तद्विरोधादन्याः कल्पनाः सर्वाः अनादर्तव्याइत्यन्वयः सांख्यकल्प

नामाह व्यापिनामिति सुगतकल्पनामाह केवलस्येति निर्विकल्पकज्ञानसंतानरूपस्यात्मनोदेहांतरेशाब्दा

दिसविकल्पकज्ञानारव्यवृत्तिलाभोभवतीत्यर्थः काणादकल्पनामाह मनइति देहांतरंप्रतिमनोमात्रंग

च्छतींद्रियाणितुमूर्तनान्येवारभ्यंते दिगंबरकल्पनामाह जीवइति ननुपाकस्वेदगंधस्वरूपकार्यत्रयोप

लब्धेस्त्र्यात्मकोदेहइत्ययुक्तं प्राणावकाशयोरप्युपलब्धेर्देहस्यपंचभूतात्मकत्वादित्यत्र व्याख्यांतरमाह पुन

श्चेति देहधारकत्वाज्ज्ञातनैस्त्रिधातुत्वात्त्र्यात्मकइत्यन्वयः देहस्यकेवला [illegible] येवातः पित्तंचतेजः संनस्या

त्ताभिति भावः पृथिवीतरभूतापेक्षयाबाहुल्यं किंचदेहनिमित्तानांकर्मणामब्बाहुल्यात्ताभिर्भूतांतरा

ण्युपलक्ष्यंतइत्याह कर्म चेत्यादिना उत्क्रांतोप्राणादेरुबीजपंचभूतात्मयाःप्राणत्वाजी

पृथिव्यादितराणियानितेजआदीनितदपेक्षयेत्यर्थः २४

भो२

वद्देहस्थ प्राणवदित्याह प्राणगतेश्चेति प्राणानां गतिरस्ति देहस्यांशत्यनिवेधति। अग्न्यादिति अदर्शनादोषधिवन
स्पतिगमनस्येति शेषः लोमान्यपियन्तीत्यर्थः प्राणानाम ग्न्यादिषु लयस्य मुख्यत्वे जीवस्य गतिभोगयोरयोगात्सर्वे प्र
णा अनूत्क्रामन्तीति विरस्पष्टश्रुतेर्लोमादि गौणलयप्रायपाठाच्च गौणत्वमित्यर्थः भूतान्तरयुक्तानामपां गतिमुक्त्वा
पुरुषवचस्त्वं तासामाक्षिप्य समाधत्ते प्रथम इति ननु प्रथमपदं व्यर्थं उत्तराग्निषु अपां श्रवणादित्याशंक्य
सोमवृष्ट्यन्नरेतसामब्रूपत्वात् उत्तरत्र तासां श्रवणमस्ति न प्रथम इत्याह यदि नामेति पंचाग्निषु पामाहुति
त्वे सिद्धे तासां पंचम्यामाहुतौ पुरुषवचस्त्वं भवेत् न तत्सिद्धं प्रथमाग्नौ तासामनाहुतित्वादिति शंकार्थः एवं हि
श्रद्धाशब्देनापां ग्रहे सति प्रश्नोत्तरोपसंहाराणां संगानादेकार्थं चोद्यवाक्यतोपपद्यते अग्ने तु चतुर्ष्व
ग्निष्वपामाहुतित्वाच्चतुर्थ्यामाहुतावितिवाच्यं अतः प्रश्नोपसंहारयोः पंचम्यामिति श्रवणात्प्रथमाग्नावप्याव
एवग्राह्याइतिसमाधानार्थः अनपः अन्यत्र एतदेवेति श्रद्धाशब्दस्यापरत्वं दर्शयतीत्यर्थः उपपत्ते
रित्यस्यार्थान्तरमाह श्रद्धाकार्यमिति तस्याः श्रद्धाहुतेः सोमः संभवतीत्यादिना श्रद्धायाः सोमादीनां पूर्वपूर्व
परिणामत्वं श्रुतं तत्तो द्रवपरिणामित्वा [illegible] श्रद्धाया अपां प्रसंगाया अमुख्यश्रद्धाया आहुतित्वायोगाच्चेत्यर्थः
श्रद्धाशब्दस्याप्सु सूक्ष्मत्वगुणेर्वृत्तिमुक्त्वा लक्षणां वक्तुं श्रद्धाया अद्भिरेककर्महेतुत्वं वा संबंधमाह श्रद्धापू
र्वेति अस्मै यजमानाय स्थानोर्ध्वमापः श्रद्धां सभमंने [illegible] जनयंतीति श्रुत्यर्थः अपां गतिमुपेत्या
द्भिः सह जीवानां गतिमाक्षिप्य समाधत्ते अथापीत्यादिना धूमलोकाग्नौ श्रद्धाहुतेः सोमो राजा संभवतीत्यु
क्त्वा तस्मरोषे धूमादिमार्गेण कारणाचंद्र समं प्राप्ताइष्टादिकारिणः एष सोमो राजेत्यु [illegible] तः सोमरा

स्तऊन१

गतिं निवृणोति तेषां चाग्निहोत्रेति निधनं मरणं तन्निमित्तकमंते इष्टिविध्यानं असौ यजमानः ४२

जशब्दसामान्यादिष्टादिकारिणां जीवानां श्रद्धाशब्दिताद्भिः सह गतिरिह श्रद्धाहुतिवाक्ये प्रतीयत इत्यर्थः तेषां सूक्ष्मा
भिर्व्याप्त्वं रूपाभिः पंचीकृताभिरद्भिः संबंधं वदन्नुत्तरे स्वर्गाय गच्छतीति मंत्रार्थः कुतद्रव्यरूपाणामपां गमने कु
तत्तमाह तथा चेति अग्निहोत्रप्रकरणे जनकेन याज्ञवल्क्यं प्रति नत्वेवैनयोः सायंप्रातराहुत्योः सम्भुत्क्रांतिं न ग
तिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थेति षट्प्रश्नाः कृतास्तेषां निर्वचनमपि राज्ञैव तेवा
एते आहुती हुते उत्क्रामतः ते अंतरिक्षद्वारा दिवं गच्छतः ते दिवमेवाहवनीयं प्रतिष्ठां कुर्वाते दिवं तर्पयतस्ते ततः
पुनरावर्तेते ततः पृथिव्यां पुरुषे योषिति च हुते पुरुषरूपेणोत्तिष्ठत इति वाक्यशेषेण कृतं स प्रस्तुतरसूत्रव्या
ख्यं शंकते कथमित्यादिना अत्र सोमाख्यानस्य चंद्रस्य इष्टादिकारिणामिति भोक्तिनिरासार्थं श्रुतं ल
क्ष्माह तेचंद्रमिति यथा यज्ञे चमसस्थं सोमं सिजआप्यायस्व क्षीयस्वेत्यौ लो हू पुनः पुनराप्याय्य पुनः पु
नरपक्षप्य भक्षयंत्येवमेतानिष्टादिकारिणो नरूपान् भक्षयंतीति देवा इत्यर्थः अधिक्रियते पुरुषो विधिना संबध्य
तेऽनेनेत्यधिकारः फलकामनाशास्त्रानर्थक्यवारणायान्नत्वं गौणमिति भावः केन दोषेण ते षां देवभोग्यत्वे
त्यत आह अनात्मवित्वाच्चेति यथा पशुर्भोग्य एवमज्ञः स इह स्वेदधी मान्देवानां भोग्य इत्यर्थः आत्मशब्दस्य
मुख्यत्वेनत्वेन सूत्रांशं व्याख्याय प्रकृत पंचाग्नयः सूत्रकृतात्मत्वेनोपचरिता इति व्याख्यांतरमाह आत्मेत्या
त्यादिना विद्यास्तुत्यर्थमनात्मत्वं नमु मित्यत्र श्रुतं तदर्थे सूत्रशेषं व्याचष्टे तथा हीति एवं गतिपर्यालो
चनया वैराग्यमितीदं इदानीं तस्यानेतरभाविनीमागतिं निरूपयति कृतात्यय इति भोक्त

सि ४२

॥३॥ ॥

य कर्मसमाप्त्यानंतर्यमथशब्दार्थः यथेतमित्यारभ्य श्वादियोनिमित्यंतं वाक्यं यावत्तावदाम्नायत इति योजना अत्र
यावत्संपातमिति विशेषणाद्रमणीयचरणा इति वाक्याच्च संशयमाह तत्रेति अनुशयः कर्ममात्रं पूर्वपक्षे कर्माभावे
नागतेरनियमात् वैराग्यादार्ढ्यं सिद्धांते कर्मसत्त्वेनागतिनियमाद्वैराग्यदार्ढ्यमिति भेदः तेषामिष्टादिकारिणां
यदा तत्कर्म पर्यवैति परिक्षीणं भवति तदा पुनरावर्तंत इति श्रुत्यंतरेणापि कृत्स्नकर्मणश्चंद्रलोके भुक्तत्वमुच्यत इ
त्यर्थः यावत्संपातमित्याद्यसंकोचो न युक्तः श्रुत्यंतरविरोधादित्याह नैवमिति अयं नरो यत्किंचिदिह लोके कर्म करोति त
स्यां तत्फलं परलोके प्राप्य कर्मार्थं पुनरायातीति श्रुत्यर्थः कर्माभावे श्रुतिमुक्त्वा युक्तिमाह अपि चेति अ
निवृत्तिः फलोन्मुखतामरणेनाभिव्यक्तस्य सर्वस्य कर्मणः परलोके भोगस्यावश्यंभावात्कर्माभाव इत्यर्थः च
रणास्थ्यशीलमात्रादवरोह इति प्राप्ते सिद्धांतप्रतिज्ञां व्याचष्टे येनेत्यादिना तत्रावरोहतां जीवानां मध्ये ये के
चिदिह कर्मभूमौ रमणीयचरणाः पुण्यकर्माणः पुण्ययोनिं प्राप्नुयुरिति तदभ्याशो ह अवश्यं हीत्यर्थः कपूयं पापं दृष्टा
दृष्टस्य श्रुतिमर्थं युक्त्यांतरमाह दृष्टश्चेति पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्यादिशास्त्रेण सुखदुःखयोर्ध
र्माधर्महेतुत्वमवगतं ततश्च जन्मारभ्य दृष्टो भोगः कर्महेतुकः भोगत्वात् स्वर्गभोगवदित्यनुशयसिद्धिः विपक्षे च
हेत्वभावात् भोगस्याकस्मिकत्वप्रसंग इत्यर्थः स्मृतौ वा आश्रमा आश्रमिणः प्रेत्य स्वस्वलोकांतरे कर्मफलं भुक्त्वा
ततः शेषेण भुक्तादन्येन कर्मणानुशयाख्येन पुनर्जन्म प्रतिपद्यंत इति संबंधः विशिष्टदेशादयो मेधांतादयः गुणा
येषु ते तथोक्ताः श्रुतं ज्ञानं वृत्तमाचारः स्वाभिमतानुशयं वक्तुं पृच्छति कः पुनरिति कृतस्य कर्मणः स्वर्गे
सति भुक्तस्य कर्मणो लेशोनुशयस्तद्वानवरोहति भांडे स्नेहलेशस्य दृष्टत्वात् ततः शेषेणेति स्मृतेश्चेत्येक

त   ति   क   शा ३ ॥ ३ ॥   भोगे   कृ

देशिव्याख्यामाह केचिदित्यादिना क्षियमानेस्नेहे नवियुज्यमाने नतु भोगनाशात् कर्मणो लेशो न युक्त इति शंके

ते नन्विति कृत्स्नकर्मणो भोगो जातेनाशः स्यान्नतु भोगो जात इति परिहारार्थः भोगो न जायत इत्ययुक्तमिति शं

कते नन्विति भोगः सावशेषो जात इति समाधत्ते बाढमित्यादिना इदमेकदेशिव्याख्यानं दूषयति नचेति स्वर्ग

कामो यजेतेत्यादिशास्त्रेण स्वर्गभोगार्थं कार्य चोदितं तच्छेषस्य मर्त्यभोगहेतुत्वे शास्त्रविरोध इत्यर्थः किंच स्व

र्गहेतुकर्मशेषादवरोहकपूयवोन्यापत्तिश्रुतिविरोधश्चेत्याह अवश्यंचेति स्वाभिमतमनुशयमाह तस्मादि

ति पूर्वपक्षबीजमनूद्य दूषयति यदित्यादिना क्षपयित्वा पुनरागच्छतीति प्राप्यान्तमिति वाक्येन गम्यत इति योज

ना जन्मारभ्यदृष्टभोगलिंगात् रहीनयारमणीयचरण इत्यैहिकानुशयाख्यकर्मविशेषपरयाविरोध

यस्मिंश्चेति यावत्संपातमिति च सामान्यशब्दयोरामुष्मिकविषयत्वेन संकोचो न्याय्य इति भावः मरणं कृत्स्नक

र्माभिव्यंजकमित्युक्तं उक्तानुशयश्रुतिविरोधादित्याह तदपीति बलवदनारब्धकर्मप्रतिबंधाच्च न कृत्स्न

कर्माभिव्यक्तिरित्याह अपि चेत्यादिना ... तस्य कृत्स्नकर्मव्यंजकत्वे हेतुर्नास्तीति भावः प्रश्नं

भिन्नरंश्च कंते आरब्धेति प्रारब्धवदनारब्धस्यापि बलवतः प्रतिबंधत्वात् सर्वकर्मणः फलदानायाभि

व्यक्तिरिति समाधत्ते यथेति अनारब्धफलत्वाविशेषात् सर्वकर्मणामभिव्यक्तिमाशंक्य मिथो विरुद्धस्वर्ग

नरकादिदेहफलानामेकदेहारंभत्वासंभवउक्तस्तं विवृणोति नहीति अस्तु तर्हि दुर्बलस्य कर्मणो नाश

इत्यत आह नपीति नापुरुतंक्षीयते कर्मेत्येकांत उत्सर्गः सच प्रायश्चित्तब्रह्मज्ञानध्यानैर्बाध्यते न मरणमात्रेणेत्यर्थः

यकृद् मि पु — क ल

कूर प्रापणस्य=५ म३

२३   ५२   ३।१।२

मरणेन दुर्बलकर्माविनाशे मानमाह स्मृतिरिति कर्मनाशपक्षं निरस्य प्रकृतकृत्स्नकर्माभिव्यक्तिपक्षे दोषांतरमाह
यदि चेति कृत्स्नकर्मणामेकस्मिन्देवादिजन्मनि भोगेन क्षयात् जन्मांतरस्यै नाभावाभमुक्तिरित्यज्ञदेवस्य
कष्टादृशास्यादित्यर्थः श्वशूकरखरोष्ट्राणां गोजाविमृगपक्षिणां चंडालपुल्कसानां च ब्रह्महा योनिमृच्छतीत्या
दिस्मृतिविरोधाच्च न सर्वकर्मणामेकजन्मारंभकत्वमित्याह ब्रह्मेति नन्वेकस्य कर्मणः कथमनेकजन्मफल
कत्वं अदृष्टत्वादित्यत आह नचेति किंच व्यंजकत्वेपि मरणस्य किं सर्वकर्मव्यंजकत्वं कल्प्यते उत यत्किंचित्कर्मव्यं
जकत्वं नाद्यः इहकृतकारीर्यादेरत्रैव फलहेतोर्मरणाव्यंग्यत्वासंभवादित्याह द्वितीयं निरस्य न परोक्तं दृष्टांतं
विघटयति प्रदीपेति रूपाणां प्रदीपवन्मरणं न कस्यचिदपि कर्मणो व्यंजकं किंतु प्रबलकर्मप्रतिबंधाभा
वे दुर्बलं व्यज्यत इत्यर्थः एवं मरणस्य व्यंजकत्वानंगीकारेण प्रदीपदृष्टांतो निरस्तः अंगीकारेप्यनुकूलो दृष्टां
त इत्याह स्थूलेति सूक्ष्ममनुद्भूतरूपं इति मरणे सर्वकर्माभिव्यक्त्यसिद्धिरिति शेषः एवं सर्वकर्मसंघ एक
जन्मारंभक इत्येकभविकः कर्माशय इति मतनिरासमुपसंहरति तस्मादिति चरणश्रुत्यात्ततः शेषे
सति अनुशयसद्भावादित्यर्थः न चानभिव्यक्तकर्मसद्भावादित्यर्थः ननु मुक्त्यनुपपत्त्यांगीका
णे स्यादित्यत आह सा प्रबलप्रतिबंधादिति न्यायेन
ये एकभविक इत्यत आह शेषेति सूत्रशेषं व्याचष्टे ते चेत्यादिना अवरोहमार्गश्छंदोग्ये श्रूयते तस्मिन्याव
त्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तंते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भू
त्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा
इति जायंतेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीयचरणा रमणीयां यो

प

निमापद्यंत इति धूमाद्यध्वना यथेतं यथागतं यथेतमध्वानं पुनरायंतीत्यर्थः धूमादित्वपितृमार्गस्य रात्र्या
दिकं नोक्तं अधिकं चाभ्रादिकमुक्तमिति मत्वा सूत्रकृतोक्तं यथेतमनेवं चेति अवशिष्टश्रुत्यर्थो ऽस्फु
टी भविष्यतीति संप्रति श्रुतिस्थचरणशब्दमाक्षेपपूर्वकं सूत्रकृद्व्याचष्टे चरणादिति चेदिति अद्रोहः स
र्वभूतेषु कर्मणा मनसा गिरा अनुग्रहश्च दानं च शीलमेतद्विदुर्बुधा इति स्मृतावक्रोधादयः शास्त्रार्थज्ञा
नरूपं च शीलं सर्वकर्मांगमुक्तं तद्वाचकं चरणपदमंगिनः श्रौतादिकर्मणो लक्षकं कर्मण एवोत्तरावस्था
धर्माधर्माख्या पूर्वमिति कर्मलक्षणयैव तदभिप्रायपूर्वी स्यानुशयैर्द्धि रिति कार्ष्णाजिनिमतं तदेव शंका
समाधनाभ्यामाह अनिर्थक्यमिति चेत्यादिना सूत्रेण चरणपदवाच्यस्यैव ग्रहणसंभवात् लक्षणा
युक्तेति शंकिते वक्तृते नन्विति प्रतिषिद्धशीलं क्रोधानृतादिरूपं किं च शीलस्य निष्फलत्वायोगा
च्छतयोन्यापत्तिस्तस्यैव फलं नानुशयस्येत्याह आनर्थक्यं चेति वेदास्तदर्थकर्माण्याचारं विना न फ
लंतीति स्मृत्या शीलस्य कर्मांगत्वान्न पृथक्फलापेक्षांगिफलेनार्थवत्त्वाच्चांगमात्राद्योन्यापत्तिः फल
मिति वाच्यं ग्रहणायोगाल्लक्षणा युक्तेति समाधानार्थः यद्याचारस्य स्नानादिवत्पुरुषसंस्कारतया पुरुषार्थ
त्वं तदा विरोध इत्याह पुरुषार्थत्वेपीति अंगावबद्धोपास्तिवदाचारो ऽर्थवानित्यर्थः अस्तु तर्हि शी
लाख्याचारादेव योन्यापत्तिरित्याशंक्य पुण्यो वै पुण्येन कर्मणेत्यादिश्रुतिविरोधान्मैवमित्याह
कर्मचेति पारयमाणः शंकः यद्यपि क्रोधादिरूपं शीलं साधारणधर्मात्मकं विशेषरू
पात्कर्मणो भिन्नं तथापि चरणाचारशब्दौ कर्मवाचिनौ न शीलवाचकाविति लक्षणावसर इति बादरिमतं

प ✓

सि
न्ने
न्या
ति १

न१
थे१
नाप

आचारोपीति १

सदाचाररूपविशेषाद्वितरविशेषः इत्यादिकर्मरूपस्तन्यरइत्यर्थः ३४

नुरस्वासिद्धांतमाह सुकृतेति चरणशब्दार्थमुपसंहरति कर्मण एवाचारत्वे यथाकारी त्यादिभेदोक्तिः कथमित्यत आह व्यपदेशेति निरूपपदा चारशब्दात्सदाचाररूपो विशेषो भाति अतस्तत्समभिव्याहृतः कर्मसामान्यवाचको यथाशीतिशब्दस्तद्वितरविशेषपरः एवमनवद्यानि कर्माणीति सामान्यतः अस्माकं सुचरितानीति विशेष इति विवेकः तस्मादनुशयबलादागतावश्यंभावानुसंधानाद्वैराग्यमिति सिद्धं एवं पुण्यात्मनां गत्यागति चिंतया वैराग्यं निरूप्य पापिनां तच्चिंतया तन्निरूपयति अनिष्टादिकारिणामपि च श्रुतं ये वै के चेत्यविशेषश्रुतेर्वैवस्वतं संगमनं जनानामिति श्रुतेश्च संशये प्रथमाधिकरणेन सिद्धं नियमाक्षेपसंगत्या पूर्वपक्षसूत्रं व्याचष्टे तत्रेत्यादिना यमराजं पापिजनानां संगमनं स्थानं हविषा प्रीणयतेति श्रुत्यर्थः पूर्वपक्षे पुण्यवतामेव चंद्रगतिरिति नियमाभावात्पुण्यवैयर्थ्यं पापाद्वैराग्यादार्ढ्यं चेति फलं सिद्धांते पापिनां चंद्रलोकदर्शनमपि नास्तीति पुण्यसार्थकत्वं वैराग्यदार्ढ्यं चेति फलं पंचमाग्नौ देहारंभ इति नियमात्पापिनामपि प्रथमं चंद्रलोकाग्निप्राप्तिर्वाच्येत्याह देहारंभ इति पापिनां स्वर्गभोगाभावेपि मार्गीत राभावाच्चंद्रगतिरिति भावः सिद्धांतसूत्रं व्याचष्टे तत्रेत्यादिना संयमने यमलोके यमकृता यातना अनुभूयावरोहंतीत्येवमारोहावरोहाविति योजना सूत्रस्य ज्ञेया प्रथतां यत्र मागच्छतां सम्यक्परस्तात्प्राप्यत इति संपरायः परलोकस्तदुपायः सांपरायो बालं न परलोकोस्तीति

मानी स ः मे ममय मस्य वश

मापद्यते इत्यर्थः पापिनां यमवश्यतावादिविशेषश्रुतिस्मृतिबलात् ये वै के चेत्यविशेषश्रुतिरिष्टादिकारिविषयत्वेन व्या

ये १

मत्तं विशेषतो चित्तरागेण मत्तं मोहात्प्रमादं कुर्वतं प्रति न भाति स च बालो यः स्त्रीवित्तादि ॰ कोलि ३

॥५॥

वैवस्वतमिदिस्त्वेदाह श्रुतेरर्थः

दृ १

॥८

स्येत्येतिभावः सूत्रत्रयस्यभाष्यंसुबोधं यदुक्तंमार्गांतराभावात्पापिनामपिचंद्रगतिरितितन्न तृतीयमार्ग-
श्रुतेरित्याह विद्याकर्मणोरिति मार्गद्वयोक्त्यनंतरं तृतीयमार्गोक्तिप्रारंभार्थः श्रुतावथशब्दः एतयोर्वि-
द्याकर्मणोः पथिद्वयसाधनयोरन्यतरेणापिसाधनेनयेनज्ञानयुक्तास्तेजन्ममरणावृत्तिरूपतृतीय-
मार्गस्थानिभूतानिभवंतिक्रियावृत्तौ लोट् तेनपापिनांचंद्रगत्यभावाच्चंद्रलोकोनसंपूर्यत इति श्रुत्यर्थः
प्रतिपत्ताविति प्राप्तिसाधनइत्यर्थः अपिचपापिनांचंद्रगतावसौलोकः संपूर्येत अतश्चनसंपूर्यत इत्येतच्छ्रुति-
वचनंविरुद्धंप्रसज्येतेत्यन्वयः अवरोहादसंपूरणमश्रुतेनकल्प्यं श्रुतहान्यापत्तेरित्याह नअश्रुतत्वादि-
ति अवरोहएवतृतीयस्थानंश्रुत्युक्तमिसत आह अवरोहस्त्विति इममध्वानंपुनर्निवर्तंतइतीष्टादि-
कारिणामवरोहोक्तेरनिष्टादिकारिणामवरोहस्यार्थसिद्धत्वात्पुनरुक्तिर्व्यर्थेत्यर्थः अथैतयोरिति
सेत तस्थानशब्दोमार्गलक्षकइतिद्रष्टव्यं एवमपि
ज्ञोबश्रुतेर्मार्गांतराभावाच्चेति पूर्वपक्षबीजद्वयंनिरस्यतृतीयबीजनिरासार्थंसूत्रमादत्ते यत्तुनारि-
सादिना विद्याकर्मशून्यानांकृमिकीटादिभावेनजायस्वेत्यादिश्रुत्यानिरंतरंजन्ममरणोपलब्धे-
र्नाहुतिसंख्यादरइत्यर्थः पुरुषशब्दाच्चैवमित्याह अपिचेति मनुष्यदेहस्यापिनाहुतिसंख्या-
नियमइत्याह अपिचेत्यादिना विधिनिषेधरूपार्थद्वयेनाक्षेपेदेहः स्यादित्यर्थः अनियमेस्मृतिसं-
वादार्थंसूत्रं स्मर्यतेपीति लोकस्यतेनेनेतिलोकोभारतादिरुक्तः स्मरणार्थमप्याह बलाकेति अंडजानिस्वजाः जानिचस्वेदजा

मार्गांतरोपक्रमबाधस्तत्
कृबाधश्च

निचोद्भिज्ज्ञानिचेतिश्च सवर्दंभेन सूत्रं व्याचष्टे अपिचेति अन्यत्राप्युपनिषदादिकारिष्विसर्थः अनयाश्च सा चातुर्वि
ध्यंकथमुक्तंश्च संतरे त्रीण्येवेस वधारणविरोधादितित्रांकोत्तरत्वेन सूत्रमादत्ते नन्विसादिना जीवजंजरा
युजंमनुष्यादि भूमिमुद्भिद्य जायते वृक्षादिकं उदकं भित्वा जायते यूकादिजं गेमितिभेदः संशोकः स्वेदः
एवं पापिनां गतिं विचार्य संप्रतीष्टादिकारिणामवरोहे विशेषमाह साभाव्यापत्तिरुपपत्तेः यथे
तमनेवं चेत्यत्र करीसाय थागतं धूमाद्यध्वानं पुनर्निवर्त्तंते निवृत्ताश्चानुशयिनः कर्मातेदलदेहा आ
काशंगताः आकाशसदृशा भवंति आकाशसादृश्यानंतरं पिंडीकृता इति सूक्ष्मलिंगोपहिताः वायुनेत
स्ततश्चनीयमाना वायुसमा भवंति सोनुशयिसंघो वायुसमो भूत्वा धूमं गतस्तत्समो भवति धूमसमो भूत्वा
भ्रसमो भवती आपो बिभर्तीत्यभ्रं मेहतीति सिंचतीति वृष्टिकर्त्ता मेघस्तत्समो भूत्वा वर्षधाराद्वारा पृ
थिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धांतगसाश्च स्वर्थः पूर्वोत्तरयुक्तिद्वयं संत्राय बीजं मंत
व्ये पूर्वत्र मार्गद्वयमुक्त्वा तृतीय लोकेयुक्तं स्थानत्राद्धस्य मार्गलक्ष कत्वं इह तु दुग्धं दधि भवतीसादि
प्रयोगे भवतेश्च ते विकारस्वरूपापत्तो मुख्यत्वात्सादृश्यापत्तिर्लक्षणा बीजं नास्तीति प्रस्क दाहरण
संगतिः श्च तिमुख्यत्वं फलमिति पूर्वपक्षः अनुशयिनां पूर्वसिद्धाकाशादिस्वरूपापत्त्य[illegible]गा
लक्षणेति सिद्धांतयति एवमिसादिना समानोभावो धर्मो यस्य तद्भावः साभाव्यं साम्यमिति सूत्र
पदार्थः एवं हेतदितिएतद्भवनमेवं सादृश्यरूपमेवोपपद्यत इसर्थः अनुशयिनामाकाशादिभ्यो न्यथा गमनानुपपत्त्या विसाद
लक्षणेसाह॥ अकाशस्व ेति संयोगलक्षणमाशंक्याह विभुत्वादिति भवति श्च सा संयोगलक्षणायामनुवा

ग्दी। ।। म त्स यो ग्दी ८८

रू दि

निर्गमनान्यथानुपपत्त्या २

दःस्यादित्यर्थः विविधश्रुतसाम्यमवरोहे भवतीत्यनुसंधानाद्वैराग्यमित्युपसंहरति अत इति नातिचिरेण उत्तंसादूर्ध्वं मुंजीबले क्लेशं तृणं चिराचिरं दर्शनात्संशयं वदन्पूर्वपक्षयति तत्रेत्यादिना अनियमात्कदाचिद्विलंबेन योन्यापत्तिरिति पूर्वपक्षलं सिद्धांते तु व्रीहियवादिभावापन्नानुशयिनां विलंबेन निर्गमनमिति विशेषादाकाशादिभावाच्छीघ्रं निर्गम इत्यविलंबेन योन्यापत्तिरित्यनुसंधानाद्वैराग्यदार्ढ्यमिति विवेकः नन्वाकाशादिष्वनुशयिनां सुखं व्रीहियवादिषु दुःखमिति दुःशब्दघ्राति न चिराचिरनिर्गमनमित्यत आह सुखदुःखताविशेषश्चायमिति अवधिःकालः अन्याभिपात् अतिक्रमार्थं क्रमाद्यधिकरणानां क्रमो बोध्यः इत्यभूमौ वर्षधाराप्रपतितास्तेनुशयिनो व्रीह्यादिसाम्येन जायंत इति श्रुत्यर्थः अत्र जायंत इति श्रुतेः पूर्वत्राकाशादिवर्षांतसादृश्योक्तेश्च संश्लेषमा

तत्रेति अस्मिन्नेव धोवर्षसादृश्यानंतरमित्यर्थः दुर्निष्प्रपतरशब्देन चिरनिर्गमनलक्षणोक्तानयुक्ता दुःखेन निर्गमनमिति अत्र पूर्वपक्षे स्थावरत्वनिरूपणे अधिकारिणां यल्लगौरवं मुख्यसंभवादित्याक्षेपसंगत्या पूर्वपक्षयति किंतावदित्यादिना ननु देहोत्पत्त्या जीवानां जन्मत्वाभत्स्वतो व्रीह्यादेस्तु सिद्धांते व्रीह्यादिसंश्लेषमात्रं परिहर्तुं यल्लाघवं वैराग्यधौव्यं चेति विवेकः ननु स्थावरतां नरस्त्याद्यास्यतीति नदेहत्वमित्यत आह स्थावरभावस्येति स्थाणुमन्येनुसंयंतीत्याद्याश्रुतिः शरीरजैः कर्मदोषैर्यातिस्थावरतामिति स्मृतिः कत्वर्थं हिंसादेरपि हिं

ननु स्वर्गिणां पापाभावात्कथं स्थावरत्वं तत्राह पश्चिति सोमाद्यभिषवभक्षणसुरागृहादिशब्दार्थः नन्वयं हिंसादेरपि न हिंस्यादित्यादिशास्त्रनिषिद्धत्वाकारेण दुरितापूर्वं कारित्वमविरुद्धमिति सांख्यासलादिसामान्येन निषेधशास्त्रस्यप्रवृत्तेर्न हिंस्यादित्यादिशास्त्रनिषिद्धत्वाकारेण दुरितापूर्वं कारित्वमविरुद्धमिति सिद्धांतयति आहुः अतो व्रीह्यादिभावोनुशयिनां नर्न्मरूपः कर्मविशेषपरामर्शं विना शेकत्वा सूर्वोक्ताकाशादिभाववदिति सिद्धांतयति

एवंप्राप्त इत्यादिना पूर्ववदिति पदं दृष्टांतत्वेन हेतुं शास्त्रेन च व्याख्यातं यदत्र प्रकरणे कर्मविशेषपरामर्शपूर्वकमुच्यते तज्ज्ञेयम् अपि च योयोह्यन्नमत्तियोरेतः सिंचति तद्भूय एव भवतीति नास्त्यत्रोषे व्रीह्यादिषु न्मेति व्यतिरेकदृष्टांतमप्याह यत्त्विति अपि च योयोह्यन्नमत्तियो रेतः सिंचति तद्भूय एव भवतीति नान्यसाह अपि चेत्यादिना प्रविष्टस्यानुशयिसंघस्याभद्वारा रेतः सिक्तुरूपयोगः श्रुतः तदन्यथानुपपत्त्यापि जन्मश्रुतिर्न मुख्येत्याह अपि चेत्यादिना प्रविष्टस्यानुशयिसंघस्याभद्वारा रेतःसिक्तुरूपयोगः श्रुतः तदन्यथानुपपत्त्यापि जन्मश्रुतिर्न मुख्येत्याह एतेनेत्युक्तानुमानार्थापत्तिभ्यां जायत इति श्रुते व्रीह्यादिरूपदेहनाशे देहिनामुत्क्रांतिरवश्यंभावात् अतः सिंच्योगो न स्यादित्यर्थः ननु व्रीह्यादेर्भोगायतनत्वानंगीकारे पूर्वोक्तश्रुतिस्मृतिप्रसिद्धिमुख्यार्थत्वमनुशयिभोगायतनत्वं च व्रीह्यादेः प्रतिबूयादित्यर्थः ननु व्रीह्यादेर्भोगायतनत्वानंगीकारे पूर्वोक्तश्रुतिस्मृतिप्रसिद्धिमुख्यार्थत्वमनुशयिनां भोगायतनत्वं च व्रीह्यादेः प्रतिबूयादित्यर्थः अयं धर्म इत्यादिना शुद्धिबाधक इत्यत आह नचेति वैदिकं कर्माशुद्धं न भवति शास्त्रविहितत्वादिति सूत्रार्थं प्रपंचयति अयं धर्म इत्यादिना यो देशे प्रातःसायंकाले जीवनादिनिमित्तकृतमग्निहोत्रं धर्मो भवति स एवाशुचिदेशे मध्यरात्रे मरणादिनिमित्ते कृतः

प्रतिप कूलसे न ब्रूयात् सिराकु यीदिति यावत्

ग्र.भा.टि.रा

निर्णयः१

सत्त्वधर्मो भवतीति शास्त्रैः कसाध्य इत्यर्थः ततः किं तत्राह शास्त्राच्चेति ननु या हिंसा सोऽधर्म इत्युत्सर्गस्य विशेषविधि
ना बाधोऽत्र न युक्तः नाभिचरेदिति निषिद्धश्येनस्य पुरुषार्थत्ववत् निषिद्धहिंसादेरपि क्रतूपकारकत्वाविरोधादिति
तत्राह उत्सर्गापवादयोरिति अयमर्थः काम्यकर्मणि सर्वत्र करणांशे रागतः प्रवृत्तिरंगेषु विधित इति स्थितिः
तथा च श्येनाख्ये कर्मणि निषिद्धेऽपि रागप्राबल्यात्प्रवृत्तिः स्यात् क्रत्वंगहिंसादौ तु विधित एव प्रवृत्तिर्वाच्या
स च विधिरुत्सर्गप्राप्तमनर्थहेतुत्वं न बाधेत तर्हि प्रवर्तको न स्यात् प्रवर्तकत्वे वा विधिरनर्थाय स्यादतो नि
रवकाशो विधिः सावकाशमुत्सर्गमविहितहिंसादिषु स्थापयतीतीदं च निषेधशास्त्रस्य हिंसात्वादिसामा
न्येन प्रवृत्तिमंगीकृत्योक्तं वस्तुतस्तस्य रागप्राप्तहिंसाविषयत्वाद्वैधहिंसायामप्रवृत्तेर्नाशुद्धत्वशंकावसर
इति द्रष्टव्यं प्रतिरूपं दुःखरूपं तस्य फलं नेति योजना इह व्रीह्याद्यभावे कर्मिदधिकारः कर्मपरामर्शी
नास्तीत्युक्तं अपि व्रीह्यादिभावानंतरं रेतःसिग्भावः श्रुतः तत्रापि स्थानुशयिनो रेतःसेककर्तृत्वायोगा
योगमात्रं वाच्यं तद्वदुपक्रमेऽपि योग एष्टव्यः अन्यथोपक्रमोपसंहारयोर्विरोधः स्यादिति मत्वोक्तमित्यवि
रोध इति योनेः शरीरमुक्ते न व्रीह्यादिशरीरत्वमनुशयिनामिति सूत्रार्थः एवं कर्मिणां गत्यागती संसारे दुर्वा
र इत्यनुसंधानात्कर्मफलाद्वैराग्यं तत्त्वज्ञानसाधनं सिद्धमिति पादार्थमुपसंहरति इति सिद्धमिति ॥ ॥७॥ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदानंदशिष्यस्य श्रीमद्रामानंदस्य कृतौ शा
रीरसूत्रशांकरभाष्यटिकायां भाष्यरत्नप्रभायां तृतीयाध्यायस्य प्रथमः पादः समाप्तः १

हस्ताक्षरवारेनासिक

ॐ ॥ ॥ संध्ये सृष्टिराह हि ॥ ॥ उक्तं वैराग्यसाध्यस्य त्वंपदार्थविवेको वाक्यार्थज्ञानसाध
नमस्मिन्पादे निरूप्यत इति पादयोर्हेतुसाध्यभावसंगतिमाह ॥ अतीतेनेति ॥ साधनवि
चारत्वादेवास्य पादस्यास्मिन्नध्याये संगतिः । अस्मिन्पादे स्थानत्रयोपेतः सतः धातुरुद्देश्यप्रे
नप्रपञ्चं जिज्ञासितत्वंपदार्थावस्थाद्वारा विविच्यते । तदारम्भपादसमाप्तेर्विधेयत्वंपदार्थ
विवेकः ॥ तत्र पूर्वं गतागतनिचिन्तया जाग्रदवस्था निरूपिता तदनन्तरभाविनी स्वप्नावस्था
भ्रकृत्स्ने विषयोऽस्य तत्र स्वप्ने रथादि सृष्टेरुक्तेस्तदभावोक्तेश्च संशये वदन्पूर्वपक्षस्तत्र
योजयति ॥ तत्र संशय इत्यादिना । स्वप्ने रथादयो जाग्रद्रथादिवद्व्यावहारिकसत्ताका
उत शुक्तिरजतवन्नेत्यत्रातीतिका इति संशयार्थः ॥ आरंभणाधिकरणेऽप्यस्य पारमा
र्थिकत्वनिषेधादिति मन्तव्यं ॥ अत्र पूर्वपक्षे जाग्रत्स्वप्नयोर्जीवस्याविवेकासिद्धिः ॥ सि
द्धान्ते प्रातीतिकत्वप्रसिद्ध्या विवेकात्स्वयंज्योतिष्ट्वसिद्धिरिति फलं ॥ मुमुक्षोः सर्वैर्द्वेषो
पसंहारादेवं ल्लोकाननुभवे सति वासनामात्रेणैमं लोकं स्मरतः कर्मवशात् हृदयेन मनसा पर

पो१

ब्र.भा.र.टी.

॥८॥

लोकस्फुर्तिरूपः स्वप्नो भवति सोयं लोकद्वयसंधौ भवतीति संध्यः स्वप्नः तथा च श्रु
तिः तस्मिन्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं चेति ॥ अथ
स्वप्नः कादाचित्क इत्यस्य [illegible] । निश्चयोस्य स्वप्नस्य प्रबोधसंप्रसादसंधिभवत्वमुक्तं ॥ स्व
प्नेनु मर्त्यचक्षुराद्यजन्यरूपादिसाक्षात्कारवत्त्वं परलोकलक्षणं दैवचक्षुराद्यजन्य
तद्वत्त्वं मर्त्यलोकलक्षणं च स्वप्ने स्तीति लक्षितो लोकद्वयस्य द्रष्टृत्वान्निद्रस्य स्वप्नस्येव लो
कद्वयसंध्यत्वं ग्रामद्वयस्य मध्यमार्गस्येव संध्यत्ववदिति व्याचक्षते । न केवलमस्यास्य
प्रातीतिकं व्यावहारिकस्य सत्त्वं किंतु सकर्तृकत्वादपीत्याह ॥ सृष्टिं करोति ॥ किंच स्वप्नार्थाः
सस्याः ॥ ज्ञानज्ञानिमितत्वात् ॥ आकाशादिवदिति सूत्रार्थमाह ॥ अपि चेत्यादिना ॥ रूढ
मात्रं क्व प्रकरणान्निरस्यति ॥ नन्वित्यादिना ॥ यः सुप्तेषु निर्व्यापारेषु करणेषु जागर्ति
तदेव शुक्रं स्वप्रकाशं ब्रह्मेत्यर्थः ॥ स्वप्नस्य जाग्रदर्थैः समानदेशत्वं तैरभेदश्च तेषा
सस्यत्वे तात्पर्यमित्याह ॥ अथो खल्वाहुरिति ॥ स्वप्नरथादयः भातीति काः जाग्रदृष्या
दे कूपसामग्रीं विना दृष्टत्वाच्छुक्तिरूप्यादिवदिति सिद्धांतयति ॥ नुत्राब्दइत्यादिना ॥ नि

७

८

358

मा गं तं श्रावयमतिप्रवृद्धो जनः पार्श्वस्थान्प्रतीति शेषः। एतत्स्वपनं यथास्यात्तथा यत्र काले स्वप्न ५

न्मात्रनिष्ठाविद्याचित्त्वावच्छेदेन जीवेऽपि स्थिता रथाद्याकारा मायेति सूत्रभाष्ययोरुक्ता
मायाविषयोरभेदज्ञापनाय मात्रपदं न तु सत्तिप्रमातर्यबाध्यत्वरूपव्यावहारिकसत्यत्वस्य
निरास उक्तः। कार्त्स्न्यमत्र जाग्रतियाक्लृप्तसामग्रीतज्जन्यत्वं परमार्थवस्तुनो जाग्रदर्थस्य
कार्यस्य धर्मः सत्यत्वव्यापकः। तदभावं स्वप्ने स्फुटयति। न तावदित्यादिना॥ संवृते संकीर्णे॥
पर्यंतुगं तु विपर्यं तु यात्स्वा चरति तदा स्वैरारीरे यथेष्टं चरतीत्यर्थः॥ बहिरिवेति कुला
याद्देहाद्बहिरिवात्मल आत्मा चरित्वा यत्रकामं यथेष्टमीयते विहरतीत्यर्थः॥ गुणमाह॥ योही
ति॥ देहान्निर्मोहीन त्वगुणे न बहिष्ठ वेदेहस्थोऽपि बहिरस्थ इत्यर्थः॥ एवं सतिश्रुतियुक्ति

न

भ्यामंतरेव स्वप्ने सतीत्यर्थः। विप्रलंभो विभ्रमः। योग्यदेशाभावमुक्त्वा कालाभावमाह॥
कालेति॥ अत्र रात्रिसमयेऽपि केतुमालादिवर्षीतरे वासरो भवतीति भारत इत्युक्तं॥ एवं प
क्षानुमानानां जाग्रदर्थदृष्टांते क्लृप्तसामग्रीजन्यत्वमबाधयोग्यत्वं वोपाधिरिति सूत्रभाष्य
योः॥ स्वप्नस्य भ्रांतिमात्रत्वेन सूचितोऽप्यर्थः सत्यो न स्यादिति त्रं को नरत्वेन सूत्रांतरं व्याचष्टे॥

मायेत्यादिना॥ मंत्रेण देवतानुग्रहेणौषधिसेवया वा स्वप्नाः सत्यसूचका अतस्तस्याः स्फुरि स
त आह॥ तत्रापि त्ववतु नामेति॥ सत्यहर्षहेतोरपि शुक्तिरूप्यस्य त्वादर्शना दिति भावः॥
यथा ऽपि द्वारा लांगलस्पर्शादि जीवननिमित्तत्वं तथा स्वप्नस्यो ऽकुरदृष्टद्वारा स्वप्नस्यापि निमि
त्तत्वं। न तु कुंभं प्रति कुंभकारस्येव साक्षात्स्वप्नकर्तृता सामग्र्या वबाधयोरुक्त्वादित्याह॥
यदुक्तमित्यादि॥ तथा च स्वप्नस्य सकर्तृकत्वमुपपन्न॥ मीतिहेतोरसिद्धिरिति भावः॥ श्रुतितात्प
र्यविरोधाच्च न स्वप्नस्य सत्त्वमित्याह॥ अपिचेति॥ स्वतिकरसंकरः श्रुत्यातस्यरतय संसर्गः॥ जा
गरितादपि ऽशुद्धादिति भावः॥ फलितमाह॥ तस्मादिति एतेनेति भाष्यकेन संसर्गः। द्वितीयस्तु चौक्त
प्राज्ञकर्तृकत्वे हेतुरपि स्वप्नस्याकं श्रुतौ निषिद्धत्वात् प्राज्ञस्य सर्वेश्वरत्वासिद्धेः नाधि
इत्याह॥ यदप्युक्तमित्यादिना॥ स्वयं विहत्य जाग्रद्देहं निश्चेष्टं कृत्वा स्वयं वासनामयं देहं नि
र्माय स्वेन भासा स्वीयबुद्धिवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येन च स्वप्नमनुभवतीत्यर्थः
न केवलं बृहदारण्यके जीवस्य स्वप्नकर्तृकत्वं श्रुतं किंतु काठकेऽपीत्याह। इहापीति। जीवो
कौ ब्रह्मप्रकरणविरोध इत्यत आह॥ तस्येति॥ एवं हेतोः श्रुतिसिद्धत्वं निरस्य द्वितीयमंगी
करोति। न चास्माभिरिति॥ तर्हि हेतुसिद्धेः स्वप्नस्य सत्यत्वमित्याशंक्य सत्यत्वं व्यावहारिकं

पारमार्थिकं वेति विकल्प्य व्यवहारकाले बाधदर्शनाभावादित्याह ॥ पारमार्थिकस्त्विति ॥ द्वितीये
दृष्टान्तस्य साध्यवैकल्यमित्याह ॥ न चेति ॥ केस्तर्हि स्वप्नस्य जाग्रतो विशेषो न कथ्यत इत्याशं
क्य प्रातिभासिकत्वमित्याह ॥ प्रातिकिति ॥ पूर्वं कृत्स्नसामग्र्यभावात् स्वप्नो मायेत्युक्ते संकल्पमा
त्रेणापि सत्यसृष्टिसंभवादिति शंकां कृत्वा परिहरन् सूत्रं व्याचष्टे ॥ अथापि स्यादित्यादिना ॥
सत्यसंकल्प [illegible] स्य हि संकल्पात्सृष्टिः
सत्या भवति जीवस्य च सत्यसंकल्पत्वं प्रत्यक्षमिति परिहारार्थः ॥ तर्हि विरुद्धधर्मवत्त्वा
[illegible] जीवस्येश्वरत्वं नास्त्येवेति शंकते ॥ किमिति ॥ नास्तीति नोक्तं [illegible]
स्ति तत्पुनरीश्वरप्रसादात्कस्यचिदभिव्यज्यत इत्याह ॥ न नास्तीति ॥ विधूतध्वान्तस्यानि
ष्पापस्य संसिद्धस्य [illegible] मादिविभूतिजस्येत्यर्थः ॥ ब्रह्मैवाहमिति निदिध्यासात्साक्षात्कृत
सर्वपापानामविद्यादिक्लेशानामपहानिरपक्षमस्तब्धो भवति क्षीणे [illegible] क्लेशैस्त
त्कार्यजन्ममरणात्मकबंधध्वंस [illegible] निर्गुणविद्याफलमुक्तं सगुणफलमाह ॥ [illegible]
स्येति ॥ परस्याभिध्यानाद्ब्रह्मैवाहमिति ध्यानाद्बंधमोक्षापेक्षया मन्त्रोक्ते हानिर्द्वया

येत्यर्थेति यं विभ्वैश्वर्यं अणिमादिरूपं मर्त्ये देहपाते सति सिद्धदेहे भवति तद्योगानंत
रमात्मज्ञानात्कैवल्यादेतम्भ्रन्यत्रआप्तकामः शास्वयंज्योतिरानंदो भवतीति क्रममु
क्तिरित्यर्थः ॥ उक्तैश्वर्यप्रतिरोभावे देहाभिमानो हेतुरिति कथनार्थस्तत्रं तन्निरा
स्याशंकामाह ॥ कस्मादिति ॥ तस्य स्वावरणं नास्तीत्यंगीकृतं [illegible]स्यकल्पितावरणं
साधयति ॥ उक्तं तद्भासादिना ॥ जीवस्येश्वरस्य चांगीकृतस्वावरणकल्पनातो नर
मन्यत्र कल्पनेत्याशंकामुद्भाव्य तस्या निरस्यति ॥ नान्विसादिना ॥ स्वप्ने प्या
लोकादेः सत्त्वे जाग्रतीनात्मनः स्वप्रकाशत्वमस्फुटं स्यात्तत्र तु भासित्वेस्या
लोके द्विपाद्यसत्त्वे प्यध्यपरोक्षमात्मज्योतिष्यएनेति स्फुटं सिध्यति तस्मादेशा
दि[illegible] सास्थ्यवचनं स्वप्नस्य जाग्रत्तुल्यभा ॥ नाभिप्रायमित्यर्थः ॥ तत्र बाह्यकरणो
परमे सति मनोवासनोद्दीपिताविद्याविल्लासात्मके स्वप्नमात्मनः साक्षिणः स्वयं
ज्योतिष्ट्वार्थेवि चार्यप्रतियोग्यनुयोगिभावसंगत्या प्रतियोगी स्वप्नः अनुयोगी सुषुप्तिः

= प्रतियोगी स्वप्नः अनुयोगी सुषुप्तिः = १

= नाड्यादिषु त[illegible]भी[illegible]तेः प्रबंधे नेकांस्याः पस्पर्थेन नमुक्त नाडी ३
तंपकानो [illegible]थ्यः ५

स्वप्ना

वस्थमनो ल्लयात्मकं स्वसुषुप्तिं विचारयति ॥ । तदभावो नाडिषु तत्परे । ।रात्मनि च ॥ । तदेवस्वपनं यथा स्यात्तथा यत्र के लेसुषुप्तः समस्तोनिरस्तबाह्यकरणे मनो लया त्समस्त कुण सम्पन्नसर्पः ॥ । तस्यापेना स्याद्ध नाडीपुरीततो नाडीपरमात्म नेष्वसमुच्चयपक्षं तो आह ॥ अन्यत्रेति ॥ परमात्ममात्रे श्रुतिराह ॥ अपीकाशस्तदिदं छेद्रस्यादिना ॥ । नाडीपुरीतद्ब्रह्मसु सुसम्पन्नो श्रुतेः समुच्चयश्रुतेश्च संशयमाह तत्रेति ॥ सर्वपक्षे स्यो विकल्पाज्जीवस्य ब्रह्मैक्यानिर्णयः ॥ सिद्धांतेन तु नाडीभिः पुरीततं गत्वा न एदि ब्रह्मण्येव ते तदिति समुच्चया तन्निर्णय इति विवेकः ॥ एकपुरोडाशार्थं त्वं ब्रीहीयवयोर्दष्टं नाड्यादीनामेकस्मिन्नुपरूपार्थेनिरपेक्षस्थानत्वं तु कुन इत आह ॥ नाड्यादीनां चेति ॥ सतिब्रह्मणीत्यादीना श्रुतेर्नसुसमीतिन्यार्थः ॥ आयतनत्रब्दा तस्थानमर्थ आधारत्वं गम्यत इत्याह ॥ नैषादोषप्रति ॥ अन्यत्रावस्था द्वयेश्रांतो जीवो विश्रांतिस्थानं प्राणारव्यसब्रह्मोसम्प

ति सुषुप्तावितिश्रुत्यर्थः॥ सप्तमीश्रुत्या निरपेक्षाधारत्वभानाद्विकल्प आशंक्यः॥
कदाचित्समुच्चित्यापि नाड्यादीनां स्थानत्वमिति न समुच्चयश्रुतिविरोध इति
पूर्वपक्षार्थः॥ सिद्धांतयति॥ एवं प्राप्त इति॥ सूत्रे चकारः पुरीतत्समुच्चयार्थः
यदा नाड्यः सुषुप्तिस्थानं तदा पुरीतत्स्थानं न भवतीति श्रुतस्थानस्य त्वपक्षे
यदा नाड्यः सुषुप्तिस्थानं तदा पुरीतत्स्थानं भवतीति ॥ व्रीहियवयोरस्वर्गसाधक
बाधः स्यादिति न पुनरुक्तं इत्याह। विकल्पो ह्येषामिति॥ व्रीहियवयोः स्वर्गसाधक
त्वमिति भावः॥ यत्तु सप्तमीश्रुत्या नाड्यादीनामेकफलकत्वमितितन्नेत्या
ह॥ नह्येकेति॥ प्रासादस्य पर्यंकधारणमर्थः पर्यंकस्य तु शयनमिति फल
भेदेऽप्येकविभक्तिर्दृश्यते व्यवधानाव्यवधानाभ्यां शयनसाधनत्वेन समुच्च
य इत्यत्र तथेहापि नाडीपुरीततोर्जीवस्य संचारद्वारा ब्रह्मण्येव सुप्तिरिति समुच्च
यश्रुत्यर्थः॥ नाडीनां प्राणस्य चैकेन वाक्येनोपादानान्नियमः समुच्चय इत्याह॥

एकवाक्येति॥ आधारत्वमात्रं सप्तम्यर्थो न निरपेक्षत्वं अतो न मुच्चयस्य

सप्तम्या बाधइत्याह ॥ नचैवमपीतिसमुच्चयेपीत्यर्थः ॥ अत्र नाडीष्वितो ना
डीषूभोक्तुः सुषुप्तिर्नविवक्षितात्रित्रिमसंबद्धनाडीरूपमार्गस्थत्वर्थस्त्यादित्या
ह ॥ अपिचेति ॥ पित्तेनविषयेक्षणाभावेसुखदुःखयोरभावान्नद्धेतुधर्माध
र्मात्मकपाप्मास्पर्शइत्यर्थः ॥ अपहतपाप्मब्रह्मसंपत्त्या वापाप्मास्पर्शइ
त्याह ॥ अथवेति ॥ अस्मिन्व्याख्यानेतात्पर्यमाह ॥ एवंचसतीति ॥ तासुत
दाभावनस्यास्मिन्प्राणएवैकधाभवतीतिश्रुतेः समुच्चयः अपाश्रितो भवती तो
त्यर्थः ॥ नाडीब्रह्मणोर्गुणप्रधानभावेनसुप्तौसमुच्चयपक्षमुपेत्य ब्रह्मणो
ऽपीत्याह ॥ तथेत्यादिना ॥ आकाशेब्रह्मण्यपीन्द्रोतइत्युपक्रम्यततोनिःसृत्य
वस्त्यपुरीतन्निद्रेतइत्युक्तं तस्माच्चनाडीद्वारापुरीततंगत्वा ब्रह्मणिशेते
इतिसमुच्चयः सिद्धइत्याह ॥ तथानाडीति ॥ तेजसासंपन्नोभवतीत्यत्र

न संपरिष्वक्त इति सत्त्वाश्रयोः श्रुतेः पंचसुप्तिस्थानानि। अत आह। सत्त्वाश्र
ये इति।। किंच ब्रह्मनंदप्राप्तिसाधनैकपुरीतडाद्यनिष्पत्तौ भिन्नो न पेक्षतया सम
र्थत्वाच्छक्तो ब्रीहियवयोर्विकल्पः नाड्यादीनां तु ब्रह्मनिरपेक्षतया सुषुप्त्याजीवा
धारत्वासामर्थ्यान्न विकल्प इत्याह।। अपि च नाड्यादि इति।। उपाधिलिंग आश्र
य नाडीपुरीततोरूपहितं न जीवाश्रयत्वं परंपरया वाच्यं तदपि सुषुप्तौ न संभवति उ
पाधेस्तत्र दिशयर्थः।। ननु ब्रह्मणापि जीवस्य न मुख्यं स्थानं अभेदादित्यत आह।। आ
धारत्वमिति।। जीवस्य ब्रह्मण्यभेदेनावस्थानं नाडीपुरीततेस्तु लीनोपाधे
र्जीवस्यास्थितिरेव न संभवतीत्येकार्थ्ये सामर्थ्याभावान्न विकल्प इत्यर्थः।। सु
षुप्तौ जीवस्य भेदकोपाधिलयात् ... कथं ब्रह्मणाभेदस्य विकल्पो न युक्त इत्याह
अपि चेति।। किं नाड्यादीनामन्यतमस्थाने केचित्सुषुप्तिवादिनापि सुषुप्तं न
विशिष्यत इति विकल्प्यंत एव न तु नरास्यतेत्याह।। अपि च स्थानेति।। भेदा
क्या। च हृद्गौ ... ति विकल्पः 3

स्या३

भावोहि भेदस्थाना भावे हेतुः नाडी पुरीतद्गतस्य तु जीवस्य भेदावस्थत्वाभ्दे द
विज्ञाने कारणं नास्तीत्यर्थः॥ द्वैतावस्थस्यापि द्वैतानाज्ञाने हेतुत्वं कते॥ ननु भेद
नि॥ द्रष्टुर्द्दृश्याद्दूरत्वं भाविकमौपाधिकं वा तत्राद्यं स्वदृष्टांतमन्दधद्दूषय
ति॥ बाढमिति॥ द्वितीयं प्रत्याह॥ उपाधिगतमेवेति॥ उपाधिभिन्नस्येवनाड्या
दौ स्थापे कतिपयसन्निकृष्टार्थज्ञानप्रसंगात्सुषुप्तिव्याघातः स्यादुपाधिल
येत्वन्यत्रजीवस्यास्थित्यभावात्॥ ब्रह्मण्येव स्थापः प्राप्तस्य यदस्यार्थः॥ एवं विकल्प्यानि
रस्य नाडीपुरीततोर्ब्रह्मणा सह तुल्य वत्समुच्चयमफलत्वेनदूषणेनगुणप्रधा
नत्वेनसमुच्चयमुपसंहरति॥ नन्वेवमित्यादीना॥ किंच ब्रह्मणः सकाशा
ज्जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्याह सूत्रकारः॥ ॥ अतः प्र
बोधइति॥ ॥ नाडीपुरीततोः काप्युत्थानापादानत्वाश्रवणान्नसुषुप्ति

(सा. भा. टि. रा.

= यथि तत्स्थानत्वं नाड्यादिस्थानत्वसंभवादित्यर्थः। तथा च कश्चिद्ब्रह्मणि सुप्तो भवति कश्चिन्नाड्यादिषु सुप्तो ब्रह्मणि सुप्तस्योत्थानासंभवेऽपि नाड्या-
सुप्तस्य तत्संभवात् तेषामपि जिकत्येन सुप्तिस्थानत्वमिति भावः = ५ तु २

९३

त. प्र. टी.

स्थानत्वमित्यर्थः ॥ तस्मादुपाधिलये जीवस्य ब्रह्मणाभेदादौपाधिक एव भेद इति निर्वि-
वेकाद्वाक्यार्थाभेदसिद्धिरिति स्थितं ॥ । स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ सु-
षुप्तौ उपाधिनाशात्कर्मानुस्मृत्यादेर्दर्शनात्संशयस्तस्माद्ब्रह्मणो जीवस्यो-
त्थानं कृते ब्रह्मैव सुषुप्तिस्थानमित्युक्तमयुक्तं सुप्तादन्यस्याप्युत्थानसंभवेन सु-
षुप्तस्य नाड्यादिस्थानत्वसंभवादिसाक्षेपसंगत्या नियामकाभावादनियम
इति पूर्वपक्षमाह ॥ तस्याः पुनरित्यादिना ॥ पूर्वपक्षे ज्ञानवैयर्थ्यं [illegible]सुषुप्त्यै-
वापुनरावृत्तिरूपमुक्तिसिद्धेः सिद्धांते त्वज्ञानबन्धनात्मना स्थितस्याज्ञान-
वत्त्वेन पुनस्तस्यैवोत्थानावश्यंभावादज्ञाननाशाय ज्ञानापेक्षेति फलं ॥ इष्ट-
रो वेस्य नैयमदादर्यायो नं सवा ऽन्येकस्यैव पूर्वपक्षः ॥ ज्ञानं विनाबु[illegible] ध्यादु-
पाधेरत्यंतनाशाभावात् [illegible] या बुद्ध्योपहितो जीवः सुषुप्तौ कारणात्मना स्थित

= ब्रह्मणि सु-
त्यर्थः ४

५५

४३

कर

स्तथैव तदा नाकर्मानुभवसंस्कारवशोपहितउन्निष्ठतीति सिद्धांतयति ।। सएवेत्यादिना ।
साभिकृतस्य ऽपूर्वदेहं तस्यएकस्यैवज्योतिषो मादेरनेकजन्मानेकदुःखापातोतिप्रसंगः
स्यादिति मुक्तानुसंबद्धत्वं चिंतां पर्यभिज्ञामाह ।। सोहमिति ।। अयनंगमनं अयःयोनिं तत्र
दिद्दृक्षस्थानं प्रतिनियतं गमनं यस्य भवति तथा प्रतियोन्यागच्छति जागरणायेति श्रुत्यर्थः ।। न
विंदती सज्ञानसत्त्वात्सुप्तस्थो [illegible] स्थाने नियम उक्तः ।। इह पूर्वप्रबोधे येभवंतितएवत
दोत्तरप्रबोधेये भवंतीत्यर्थः विधिं व्याचष्टे । कर्मेति ।। सएवोत्तिष्ठतीति निश्चीतइत्यर्थः ।। य
ऽपचैवोत्स्य युक्तत्वं तस्माह ।। ऽपीचेत्यादिना ।। ऽन्योत्थाने सुखादेर्न पूर्वकर्म
कार्यतेत्यकृतसुखाद्यागमः ।। पूर्वस्मिञ्जीवकृतकर्मनाशश्चेत्यर्थः ।। पूर्वपक्षमुक्त्वा दृष्टं
तं वैषम्येण दूषयति ।। यस्तुनरित्यादिना ।। ऽस्मात् [illegible] मपीविवेचनेनाण्यदृष्टा
पक्षइत्यर्थः [illegible] करोतीति मत्वा दृष्टांतमाह ।। दृश्यते चेति ।। ब्रह्मा [illegible] भेदाद्बजीवस्यज
न बिंदुवैषम्यमित्याह ।। [illegible] ऽपि चेति ।। ऽभेदे सत्यन्यो वोत्तिष्ठतीति चिंतान

=प्रसिद्धावस्थाश्र न स्य प्र सु षुप्ति मरणा नि = ४

य२

विकारास्त्रानुं कस्य बुद्धिभेदेन जीवभेदा त्रिंस्यति ह ॥ एवं सतीति ॥ सुषुप्ते बुद्धिनाशेन प्र सह बु

ध्यकपादिभेदादेकजीवव्यवहारोनस्यादित्यत आह ॥ सएवाहमिति ॥ स्थूलस्सूक्ष्म स्मनातिष्ठये

कोपाधिरित्यर्थः ॥ प्रवस्थात्र पादात्मानं विनिश्चयमूर्छातो विवेचयति ॥ ॥मुग्धे र्द्धसंपत्तिः

परिशेषान् ॥ मूर्छा प्रसिद्धावस्था तर्ग तावापंचमावस्था वेत्यवस्थाचतुष्टयप्रसिद्धध्दे र्मुग्ध

स्यत द्वेलक्षण्यान्न संशये सोहमिति प्रत्यभिज्ञयो त्थितस्य सुषुप्ता भेदवादिनो ज्ञाना

भावाविशेषेण लिंगेन सुषुप्तिरेव मूर्छेति प्रत्यभिज्ञानात् सुषुप्त्यतर्गता मूर्छेति दृष्टांत

संगत्या पूर्वपक्षमाह ॥ नि स्त्रस्तावदिति ॥ पूर्वपक्षे प्रसिद्धावस्थातः पृथगात्मनो मूर्छातो

विवेकार्थ यत्नासिद्धिः फलं ॥ सिद्धांतेष्टयापत्न धोव्यमितिभेदः ॥ परीशेषं दर्शयन्

सिद्धांतयति ॥ न तावदित्यादिना ॥ जाग्रदपि जागरावस्थेपि स्यर्थः ॥ ऐंद्रियमैकर्षज्ञा

नं देहधारणं च तस्या स्तिन मुग्धस्येति वैषम्यो न्याद्रूपपति ॥ नेस्या दिना ॥ मूर्छापा जा

गरा भेदमु क्तो स्वप्नमृति भ्यां भेदमाह ॥ नापीत्यानो दि ॥ लक्षण भेदं उक्तो निमि

त्तभेदमाह ॥ निमित्तेति ॥ प्रत्यभिज्ञाप्यासिद्धेत्याह ॥ नन्वेति ॥ उत्कसारूप्यवैरूप्या

आलन्ध्यंते स्मरांति दिषं मरणं सुषुप्ताज्ञमूर्छयो: द्विं चेतनात्ये

मु२

ष्या अर्द्धसंपत्तिः सर्वैः सुषुप्ते धर्मैरसंपन्नो मुग्धः सुषुप्तो न भवति सर्वैर्मरणाव
स्था धर्मैरसंपन्नेर्मृतो विनकिंत्वसंपूर्णतारंगत इति सूत्रार्थः ॥ अत्र सूत्रे जीवस्य ब्र
ह्मणार्द्धसंपत्तिरुक्तेतिभ्रान्तं तन्निराकृते ॥ कथमिति ॥ यस्सुषुप्तप्रतिसंसंपन्नत्वेश्रुतं
तदुपाध्यभावाभिप्रायं उपाध्यभावश्च मुग्धस्यापि समम् इति यतस्तस्मात् अत्र संप
त्तिरेवेत्यर्थः ॥ सुषुप्तस्य कालकर्मासंबंधेषु ब्रह्मस्थानं कथमित्याशंक्यत त्कार्यो भो
वात्तदसंबंधोक्तिरित्याह ॥ जीवेहीति ॥ ब्रह्मणार्द्धेसंपत्तिमंगीकृत्य परिहरति
न ब्रूम इति ॥ मुग्धत्वं हि सुषुप्तस्यार्द्धेन निःसंज्ञत्वादिधर्मेण साम्येन संपन्नं भ
वति मरणस्यार्द्धेन कंपादिना संपन्नमित्यर्द्धसंपत्तिरित्यर्थः ॥ एतो पि सुषुप्ति वैष
म्यमित्याह ॥ द्वारं चेति ॥ अप्रसिद्धमंगीकृत्योक्तं प्रसिद्धिरप्यस्तीत्याह ॥ प्रसिद्धं
चेति ॥ आयुर्वेदो वैद्यशास्त्रं ॥ प्रसिद्धे कथं विवादस्त्याशंक्य पंचमत्येन प्रसिद्धे
रित्याह ॥ अर्द्धेति ॥ सुषुप्तिमृत्योर्धर्मार्द्धसंपत्त्या तदंतरभावबुद्धिर्लौकिकानामित्यर्थः

सर्वाभिरवस्थाभिरलिप्तस्य स्वप्न इति विचार्य पादसमाप्तेस्त्वंपदार्थं निरूपितु का
मः प्रथमं तस्य निर्विशेषत्वमाह ॥ ॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥ उ
द्देश्यस्त्वंपदार्थे जिज्ञासोः परमानंतरं तत्स्वरूपब्रह्मविचारस्यावसरसंगतिमाह ॥ ये
ति ॥ सविशेषत्वं निर्विशेषत्वं चेत्युभयं लिंगमुपलक्ष्यते याभिस्ता उभयलिंगाः श्रु
तयः ॥ संशयबीजत्वेन संगतिरित्यर्थः ॥ यथाविधं सुषुप्तिमरणोभयरूपं मुग्धत्वं
तथा श्रुतिप्रामाण्यादुभयरूपं ब्रह्म ध्येयमिति दृष्टान्तेन पूर्वपक्षः निर्विशेषमेकरस
रूपमेव ज्ञेयमिति सिद्धांतयति ॥ एवमिति ॥ किमुभयरूपत्वं स्वतः उत स्वतो निर्गुण
स्य सर्वगंधत्वादिविशेष उपाधितः सत्य[illegible] स्वतः सविशेषमेव ब्रह्मेति तत्राद्यं
निरस्य द्वितीयमनूद्य दूषयत्यपीति ॥ [illegible] तर्हीति ॥ [illegible] ननूपाधिः ब्रह्मणि विशेषः
कल्पितः औपाधिकस्य स्फटिकलौहित्यवदिति [illegible] अर्थः ॥ उपाधेः सत्यत्वे पातत्कृतं मिथ्ये
ति दृष्टं ब्रह्मणि तदुपाधीनां मिथ्यात्वात्तत्कृतो विशेषो मिथ्येति किमु वाच्यमित्याह ॥ उ
पाधीनामिति ॥ [illegible] तीयं निरस्य [illegible] ति ॥ सर्वस्य विशेषस्य कल्पितत्वादेवेत्यर्थः ॥ नि

टि.स्पा.टि.

र
रो
रो
रुद
१५

षेधश्च न चैवमिति स्यात्॥ सर्वत्रैवेति॥ भिद्यत इति भेदो विशेषो निर्विशेषत्वं च तत्र विधि
शेषस्यापि चेत्तेरुभयरूपत्वं स्यादिति शंकां व्याचष्टे॥ अथापि स्यादिति॥ पूर्वो
क्तविरोधं स्मारयति॥ ननूक्तमिति॥ भेदश्चेति प्रामाण्यार्थमौपाधिकरूपभे
दस्वीकारेण विरोध इति समाधानार्थः॥ किं तु पाधिगत एव रूपभेदो ब्रह्मण्युपच
र्यत इत्यानार्थं तु तोपाधियोगात्॥ तस्याविरुद्धरूपवत्तया ब्रह्मणो भेदो भवतीति॥ अ
घोरम दिष्टसिद्धिः॥ द्वितीयमभेदश्च स्यादूषयति॥ नेति ब्रूम इति॥ द्वैतनिंदापू
र्वकमद्वैते चैक्यं निर्विशेषं तत्त्वमिति सूत्रार्थमाह॥ अपि चैवेति॥ भोक्तृजीवो भोज्यं
हि वादितयोः श्रुतिनामभिन्नचरं चमत्त्वाविचार्यमेनमन्यो कं तत्सर्वं त्रिविधं ब्रह्मै
वेति जानीयादित्यर्थः॥ द्विविधश्च तौ श्रुतौ सतां निर्विशेषत्वे किं नियामकमिति
शंकते॥ कथं पुनरिति॥ तत्परात्तत्परविरोधे तत्परं बलवदिति न्यायो नियामक
इत्याह॥ अरूपवदेवेति॥ उपासनापरवाक्यं साकारे तात्पर्याभावेऽपि देवताविग्रह॥

373

पा०

।व दिवदाकारसिद्धिमात्रं कथं निष्प्रपंचश्रुतिविरोधो ऽनन्यैवमित्याह ॥ तेषु सत्स्विति ॥
कल्पितद्वैते सावकाशत्वात्सप्रपंचश्रुतयो दुर्बला इत्याह ॥ प्रकारांतरेणेति ॥ नन्वा
कारवाक्यानामुदधिकल्पितसर्वगंधत्वादिनार्थवत्त्वं किमिति वर्ण्यते वैय्यर्थ्यमेवो
च्यतां तत्राह ॥ न हि वेदवाक्यानामिति ॥ नन्वेवमपि स्फुरत्युभयरूपत्वांगीका
रे श्रुतीनां व्यवस्थितत्वेपीत्यर्थः ॥ उपाधीनां कल्पितत्वादौपाधिकस्य सत्य
त्वानुपपत्तेर्न सत्यमुभयरूपत्वमिति पूर्वमुक्तं संग्रहीतसत्त्वं निर्विशेषत्वमिथ्यात्व
विरोधस्त्विति स्फुच्यते इत्युभयरूपत्वांगीकारेपि न पूर्वापरविरोध इत्याह ॥ नेति ब्र
मरणि ॥ द्वैतं मिथ्या चेज्ज्ञाने न बाधादुपासनादिव्यवहारो न स्यादित्याशंक्य बाधा
त्वागेव सत् इत्याह ॥ सत्यमिति ॥ यतः श्रुतिश्चिन्मात्रं महान्तमविशेषो मिथ्येति
स्त्वत्रार्थमाह ॥ ॥ आह चेति ॥ ॥ सैंधवघनो लवणपिंडः ॥ किं च श्रुतिस्मृत्योः पर
ज्ञातिषेधेन ब्रह्मोपदेशान्निष्प्रपंचं ब्रह्मेत्याह ॥ दर्शयति चेति ॥ अपवर्गहेतोरनन्यं
तरं ज्ञानहेतुत्वान्नेति नेत्युपदेशः श्रुत इत्यर्थः ॥ अपधि ॥ अन्यत्र ॥ पुनः पुनरथो

ण

स्य

हिमाद्रीनां निर्बंधकारिणं द्वितीयेऽत्तीये च यथाभ्रेत्तूष्णींभावं स्पर्को वा चोपशान्तो निस्पंदतः अ
स्तस्मात्तूष्णींभाव एवोत्तरमिति ।। सोन्त्र अध्योशब्दस्तथार्थकामं अपादिमत्कार्यं तत्त्वभ
क्तीसनादिमत् ।। सदिंद्रियबंधे । अस्यस्यरोक्षं च नस्यचक्षकाशत्वादिसर्प्पः ।। सर्वभक्त
गुणे ईयग्रंथादिभिर्गुणैः मांस्मूर्तिमिंतं पञ्चमसीतिय सामाया अतएव सद्वैनो भगवानितिमाद्र
षुं नार्हसी वस्तूलेद्वैतातीतत्वादिसर्प्पः ।। किंच यथा जलाद्युपाधिकल्पितः स्वर्यस्व
द्वादे भेदं चलनादिधर्माण्वमात्मनइति दृष्टांतश्च्कते श्रुतिर्विशेषततत्त्वनिस्पाह ।। ।
अतएवचोपमेति ।। ।। जलसुप्रतिबिंबत्वाकारेण स्वयं स्वाभासत्वद्योतना
नेपस्तूर्यकेतिकेशसयः ।। यथायं ज्योतिर्मयो विवस्वानपो भिन्ना एकोपी घटभेदेन
भिन्न आपोनुगच्छन्बहुधा क्रियते एवमजोयमात्मादेवः स्वयंप्रकाश एकोप्यु
पाधिनामा यथा क्षेत्रेष्वनुगच्छन्भेदरूपः क्रियते इति योजना ।। इहात्म
स्वदृष्टान्त नेपेंकास्तत्रमंबुवदिति ।। आत्मनो निस्पत्वात्तदूरस्थोपाध्य
भावात्स्वभावाप्य । बुध्यादिषु गति बिंबभदो नस्य कोइस्पर्शः ।। उपाध्यंतर्भा

र २

र

धा.टी.२

375

= अतिस्वच्छरूपोतिर्हदप्रतिबिंबितार्कस्यास्याप्यवहितान्यजल्लेप्रतिबिंबदर्शनादित्यर्थः ५

वेनतात्कल्पितधर्मेणसमत्रविवक्षितांशास्तेनसाम्येनसमाधानसूत्रं॥ ।वृद्धिह्रा
सेति॥ ।दृष्टान्तसाम्येपि नीरूपात्मनःप्रतिबिंबःस्वबुध्याकथंकल्प्यत
इत्यसंतत्राह॥ नचेदमिति॥ अयतेनकल्प्यतइत्यर्थः॥ न तदृष्टान्तस्यसूर्यका
दिवस्तूपन्यासेनकिंफलमित्यतआह॥ शास्त्रेति॥ आत्मनिर्विशेषसूफलमि
त्यर्थः॥ अविरोधइतिनवेषम्यमित्यर्थः॥ आत्मप्रतिबिंबश्चरूपनीपेरूदृश्यस्या
द्वापुद्दिवेसनुमानेआकाशेव्यभिचारः॥ अल्प॰ तेनिरुक्ताकाशप्रतिबिंबदर्श
नोदुपाधिरस्वच्छत्वमपि क्वचिदनपेक्षितमितिभावः॥ गवेराश्कतेश्वोकानुमान
बाधइत्याहसूत्रकारः॥ दर्शनाच्चेति॥ ।द्विपदः पुरोमनुष्यादिदेहाश्चक्रेच
तुष्पदःपुरःपेश्चनूकृत्वापुरश्चपुरायाभिव्यक्तेपुरस्तात्सइच्छवःपक्षीलिंगशरी
रीभूत्वापुरउक्तानिशरीराण्याविशत् समप्रविष्टोपिपुरुषःपूर्णएवेत्यर्थः॥ तेनिरूप्यकेलि
गस्यपक्षाधक्के:पक्षित्वंमंतव्यं॥ एवंप्रतिबिंबाभावेनभेदादेकल्पितत्वान्निर्विशेषंब्रह्मे
तिस्वमतमुपसंहरति॥ तस्मादिति॥ एकदेशिव्याख्यामुत्थापयति॥ अत्रेति॥ न

जप

ह

पृ

५

१

स्थाननेऽपीत्याद्येकमधिकरणं तत्र ब्रह्मणो निष्प्रपंचत्वे स्थिते किं लक्षणं ब्रह्मेति संदेहे
प्रकाशात्मवत्स्यादि द्वितीयमधिकरणं ग्रहणेन सद्रूपमेव ब्रह्म किंतु प्रकाशरूपं चिद्रूपं च । कुत
श्रुतेः पर्यायत्वे संपत्तानं संदेवसाम्यैस्फुभयपक्षे तद्धि रूपे ब्रह्मण पर्यवसानादिति पूर्वपक्षे सि
द्धांतः । आहोश्चित्तान्मात्रं । सन्मात्रे ब्रह्म निरांतानस्य सत्ता नातिरेकादिति । इदं द्विती
याधिकरणं दूषयति ॥ अत्र वक्तव्यमिति ॥ द्वितीयाधिकरणस्य किं ब्रह्मणो नेहरूपस्येत्यस्य निरा
सः फलमुत बोधनिरासः आहोस्वित्सत्तानिरास इति । विकल्प्यस्य येष्वाद्यानर्थक्यं प्र
पंचनिरासेनैव गतार्थत्वात् ताभ्याह ॥ यदि तावदिति ॥ न द्वितीय इत्याह ॥ न चेति ॥ ब्रह्मणो बोधस्व
पत्वनिरासे जडत्वापत्त्या भेदश्रुतिबाधप्रसंग्यादित्याह ॥ तृतीयं दूषयति नहि तावदित्याह ॥
नापीति ॥ सत्तानिरासे बोधस्य तुच्छत्वं चस्यादित्याह ॥ कथमिति ॥ न च बोधस्य सत्ता
नातिरेकान्नतुच्छतेति वाच्यं ॥ सद्बोधपदयोर्वान्यानातिरेके पर्यायत्वप्रसंगात्तु ॥
एवं सिद्धांतं फलाभावेन दूषयित्वा पूर्वपक्षं दूषयति ॥ नापीति ॥ प्रसंगमेवाह ॥ सत्त्वेति

प

स्यादन्वत्वभिन्नत्वं निष्प्रपंचैकरूपत्वासिद्धांविते रोधाभिन्नोभयस्यैव पूर्वपक्षानुसर्तुनमित्य
र्थः ॥ उभयश्रुतिबलादुसर्तुनमिति शंकते ॥ श्रुतत्वादिति ॥ मेरुविंध्यवत्परस्परं भिन्नस
त्वावबोधयोरेकत्र साभेदशंकाश्रुतिन्नूतेनापि न युक्तेत्याह ॥ नेति ॥ सर्वबोधयोर्भेदोस्ति
न वा ॥ आद्ये श्रुतेरपि विरुद्धार्थत्वानुपपत्तेर्न पूर्वपक्षोत्थानमित्युक्त्वे संगतिं दिनीयं शंकते
॥ अपसत्तेनेति ॥ सर्वबोधपदयोर्वाच्यभेदेपि लक्ष्यैक्यापपातरवं डार्थस्वीकारादिसर्थः
॥ अखंडार्थस्य पूर्वपक्षत्वेनस्मात् सिद्धांतत्वात् ॥ किंचानसेत्राप्योप्युक्तदत्याह ॥ तथा
पीति ॥ एकाधिकरणपक्षे सत्रांणिकथं नेयानीत्यत आह ॥ सत्राणीति ॥ स्वपक्षेस्तत्र
सर्वं जस्याभिसाह ॥ अपि त्वेति ॥ अवश्यापेक्षितगसर्थत्वेनोत्तरसूत्राणां पूर्वैकवाक्यत्व
नाधिकरणभेद इति भावः ॥ आकारश्रुतीनां कल्पिताकारेगतिरितिस्थमतमुक्तं
प्रपंचविलयवादिनस्तु मनोमयः प्राणशरीरः सत्यकाम इत्याद्याकारश्रुतीनां तदितरा
कारप्रवि [illegible] लयोगनिरित्याहु मनोमय इति कोर्थः मनोपातिरिक्तोपाधिशून्य इत्यर्थः ॥ एवं प्राण

शरीरपदेन प्राणातिरिक्तोपाधिनिषेधान्मनसोऽप्यभावसिद्धिः॥ एवं सर्वेशब्दा अनाकार
समर्पणे वेति तन्मतमनूद्य दूषयति॥ यद्यपीत्यादिना॥ किं ज्ञेयब्रह्मप्रकरणस्थानामा
काररूशब्दानां निषेधपरत्वमुतोपासनाप्रकरणस्थानामपि। नत्राद्यमंगीकरोति॥ यद्यही
ति॥ अस्य जीवभावं प्रसिस्थेः चरस्य दहराहरयो विषयाहरणाद्दृशोर्द्विधाप्यो प्राणिभेदापेक्षय
शता निसहस्त्राणि च ते पामीश्वरादेरूहमाशंक्याह॥ अयमिति॥ श्चैदूर एव हरयइत्यर्थः
द्वितीयं दूषयति॥ ये पुनरिति॥ मनोमयादिशब्दानां मुख्यवृत्त्या गुणपरत्वसंभवे निषेधल
क्षणा न युक्तेत्याह॥ सोऽचेति॥ किं चाकारानाकारश्रुति द्वैविध्ये सति ब्रह्मानाकरमेवत्य
त्र किं विनिगमकमिति शंको स्थानादस्थूलादिश्रुतीनां निराकारतात्पर्यं निया
मकमिति कथ्यतां अर्थमिदं सूत्रमर्थवद्भवति सर्वश्रुतीनां निषेधपरत्वे तु शंकानुष्ठाना
न्नियामकत्वं अर्थस्यादित्याह॥ सर्वेषां चेति॥ नन्वनुपासनार्थक शब्दानां स्वार्थे फल
भावात्स्वफलेन निषेधवाक्यशेषत्वमित्याशंक्य फलस्य श्रुतत्वान्नान्यशेषतेत्याह॥ फ
लमपि ति॥ उपर्थेक्याभावाद्वाक्यानेकवाक्यतेत्याह॥ कथं चेति॥ अर्थैक्यं शंकते॥ एकेति॥

पि

वा

श्रु १

श्रु ६

यथाफलत्वस्य समाधूर्वीरक्तनियोगैक्यादंगप्रधानवाक्यानामेकवाक्यतातत्यातत्वावबोधका
मस्य प्रपंचप्रविलयविषयक एको नियोगरूपोर्थोस्तीत्याकारानाकारवाक्यानां सर्वेषामे
कवाक्यत्वमित्यर्थः॥ नियोगास्य द्वाद्दूषयति॥ नेति॥ विषयं करोति॥ ननु द्वैतेति॥ प्रसन्नीं
प्रतिबंधकं ननु प्रपंचविलये ब्रह्म लयः स्याद्भेदादित्यत आह॥ ब्रह्मस्वभावो हि प्रपंच इ
ति॥ कारणं हि कार्यस्वरूपमतः कार्यनाशेपि कारणस्य न लयो घटनाशेपि मृद्दर्शनादि
त्यर्थः॥ प्रपंचस्य सत्यस्य कल्पितस्य वा लये विधिरित्यादि विकल्प्याद्यं दूषयति॥ नेत्रप
दिना॥ वदिति॥ स्पष्टज्ञानादध्वस्ते मुसलादिना चक्रस्य द्वैतध्वंसायोगात् नभोयस्य न
विधिवदन्वयविषयोयं विधिः किं यमुक्तादिमुक्तवत्सर्वमुक्तिः स्यादित्यर्थः॥ द्वितीय
मनूद्य दूषयति॥ अप्येत्यादिना॥ उपदेशजन्यज्ञानादेवाविद्याप्रपंचलयसिद्धेर्नि
योगो व्यर्थ इत्यर्थः॥ किंच ब्रह्मज्ञानादौ विधिः किं ब्रह्मण्यज्ञाते ज्ञाते वा नाद्य अज्ञातत्वा
दित्याह॥ अनावेदिते त्विति॥ द्वितीयं करोति॥ नन्विति॥ उपदेशादेव ज्ञाते ब्रह्मणि सा
क्षात्कारद्वैतबाधयोः सिद्धेर्विधिवैयर्थ्यं सिद्धस्य विधिना कर्तुमयोगादित्याह॥ नेति॥

380

एवं विषयाभावान्नियोगाभावमुक्त्वा नियोज्याभावात्तदभावमाह ॥ नियोज्योपि चेति ॥ अपंचीकृतभू
तोपाधेरेवेत्यर्थः ॥ आद्ये जीवनाशाद्दुःध्यायोगः ॥ द्वितीये नियोज्यासिद्धिः ॥ तर्हि ज्ञाने विधिराश्र
यानां का गतिरित्यत आह ॥ दृष्टव्यादिशब्दानामिति ॥ ननुक्तं ज्ञानं स्वरूपतः साधनव्यापारवि
धिः किमिति कल्प्यत इत्याशंक्य ज्ञानस्य पुरुषकृत्यसाध्यत्वादित्याह ॥ ज्ञेयाभिमुख्यस्या
पीति ॥ किंच ज्ञानविधिवादिना ज्ञेयं ब्रह्मा वश्यं वेदांतैर्ज्ञापनीयं विषयाज्ञाने बोधे विधि बो
धायोगात् ॥ तथाच वेदांतैरेव ज्ञानोत्पत्तेर्विध्यानर्थक्यमित्याह ॥ तस्मादिति ॥ ज्ञानार्थि
नं प्रतीत्यर्थः ॥ ननूत्पन्नं ज्ञानमन्यथा कर्तुं विधिरर्थवानिति नेत्याह ॥ नचेति ॥
ननु नाग्निर्योषिदिति प्रत्यक्षप्रमाणादुत्पन्नमपि ज्ञानं तामग्निं ध्यायेदिति विधिनान्य
था क्रियते तद्वदत्रापि इत्यत आह ॥ यदि हीति ॥ अन्यथा धीः कृतिसाध्या चेत्क्रियैव स्यात्
सिनैव चेत्स्वातंत्र्ये वा तो मानं विना विधीतो ज्ञानासिद्धेर्मानमस्ति तत्र ज्ञाने विधि
र्मुधेत्यर्थः ॥ वेदांतेषु विधिवादिनोन्यच्चदूषणमस्तीत्याह ॥ किंचान्यदिति ॥
॥ कस्मात्मैकये नियोगश्चेनेष्टं तत्रैकस्य प्रामाण्यमातृत्वार्थभेदाद्वाक्यभेदो वि
वा०

गी॰भा॰टि॰टी॰

२०

मा१

निरस्त॰ ध्दार्थत्वादप्रामाण्यं चेनिदूषयति॥ अपेत्यादिना॥ किं च श्रुतं ब्रह्म न श्रुतो निषिद्धं वेदांते
षु नत्क ल्पनेन्च कर्मजन्यस्यान्मोक्ष स्यानित्यत्वसानिवृत्तयत्वादि प्रसंगइत्याह॥ नियो
गपरतायां चेति॥ फलितमाह॥ उक्तत्वाच्चेति॥ इदानीं प्रौढवादेन नियोगसंगीकृत्यतद्द
त्वं खंडयति॥ अभ्युपगम्यमानेतिपी॥ भिन्नोक्रियाना चोद्यशब्दः शब्दांतरं पधाय जानि
ददातीति तत्पेहापि वेदोपासीतेति शब्दभेदः निर्गुणभेदः प्रकरण भेदः मुक्त्यभ्युदयफ
लभेदइत्येतैः प्रमाणे निर्गुण ज्ञान सगुणोपासना विषयकोनियोगभेदइत्यर्थः॥ कथं
तेर्धर्मांगागिना नेषु नियोगैक्यं तत्राह॥ प्रयाजेति॥ एकस्मै वस्वर्गकामस्य सांगप्र
धानाधिकारात्तस्याधकलानुर्वैक्यादेकवाक्यत्वेत्यर्थः॥ इहापि निर्गुणसगुणविद्ययो
रकाधिकारान्नियोगैक्यमस्त्वेत्याह॥ नत्विहेति॥ मुक्त्यभ्युदयार्थभेदान्निधयोर्वि
रुध्दार्थ निरपेक्षयोरंगांगित्वायोगान्न नियोगैक्यं न च निर्गुणविद्यानियोगएक एवस
गुणविद्या तंगीकारादि॥ ना॰ च्यं अहो निपरीतं पां डित्यमायुष्मतः विषयेयोपविद्यायो
विधिविधेयोग्यायामविधिरितितस्मात्साकारनोपासनामाकारत्नयद्वाराणि निर्गुणवाक्यैक
वाक्यतागानिरस्यद्वारे न किंतु तेषां कल्पिताकारोगतिस्त्वदुपासनयैर्भ्युदयासि
ति

त॰ व्या॰ हि

सगुण

ऊ॰५५

३८२

सूर्य५

द्वेर्निर्गुणवाक्यानां तु परमार्थालंबनत्वमित्यस्मद्गुरु एवं निभागस्सार्थीर्थानि समुपसंहरति ॥ तस्मा
दिति ॥ अत्र णो निर्विशेषरूपी न्मा त्र अमुत्का सर्वनिषेधावधिसद्रूपत्वमाह ॥ प्रकृते न नेतं
हीश निषेधतिनतो अनी चन्द्रमः ॥ पृथिव्यप्तेजो मूर्तत्रयं मूर्तं वाय्वाकाशद्वयममूर्तमि
मितिरशिद्वयमुक्तं मूर्तद्वयस्यामूर्तस्य सारः मूर्तरण्डारम हिरण्यगर्भो यएषएतस्मि
न्मण्डले पुरुषो यश्चायं दक्षिणे क्षिणि पुरुषद्वय उक्तः ॥ तस्य वासनामयानि स्वप्नरूपाणि न
यथा महारजनं वासोयथा पाण्ड्वाविकं यथेन्द्रगोप इत्युपमाभिरुक्तानि चित्राणि तत्र महारज
नं हरिद्रा तया लिप्तं वस्त्रं माहारजनं पाण्ड्वाविकमतिधवलं कंबलादि। केचित्तु श्रुतिमुप
लक्षणं कृत्वा स्वरूपं वर्णयन्ति मूर्तान्यमूर्तानि पञ्चीकृतानि मूर्तानि तन्मात्राण्यमूर्तं रस
वोत्पत्तिकारणानां चपंच भौतिकी सिद्धिरिति व्याचक्षते । अथ सत्यस्यात्मक अपंचो
तत्र न तस्मात इत्यादेरुपस्य निषेधावधित्वास्त्यत्वेन नेति नेतीति निषेधे नोपदेशः क्रियत इत्यर्थः
॥ नेति शब्दार्थमाह ॥ नहीति ॥ तस्मात् इति नेत्यन्यत्परमस्ति नेति नेतीत्यस्य चेतद्इत्यर्थः ॥ अ
न्यतानिरासावधिभूतो सत्यस्य सत्यमिति सिद्धान्तरिसाम इत्यर्थः ॥ अत्र निषेधावधिरूपेणानु
पलब्धो संनुमयमाह ॥ तत्र को स्यत्यादिना ॥ नद्वारगयोगस्य न कर्तस्येति शब्दोपस्कं

८।०

ति
यं
त्य
र्थ॰३
पंर॰२
सेन२

शा.भा.टि.टी.

२१ रुपि

पिन वस्तुनिषेधकत्वादित्यर्थः ॥ इतिशब्दोऽन्निषेधसामान्यसमर्पणे विशेषाकांक्षायाः
करणाद्दृष्टद्वयस्य ब्रह्मणश्च निषेध्यत्वभाना संभवाय मुक्तात्पूर्वोक्तं निर्विशेषं ब्रह्म नास्ती
त्यौपदेसंगत्या पूर्वपक्षयति ॥ तत्र प्रकृतस्येति ॥ पूर्वपक्षे नसदार्था भानाभ्यासो भे
दासिद्धिः सिद्धांते तत्सिद्धिरिति फलं ॥ निरधिष्ठानानिषेधादर्शनात् सर्वनिषेधो न युक्त
इत्यरुच्या प्रपंचे ब्रह्मनिषेधद्वयमाह ॥ अथवेति ॥ एकब्रह्मण एव निषेधे कारद्वय
स्य पौनरुक्त्यमित्यत आह ॥ अभ्यासस्त्विति ॥ उत्सूत्रमेवतावत् सिद्धांत मुपक्रमते
एवमिति ॥ प्रत्यगसंगद्रष्टा इति वदन् प्रसाह ॥ किंचेत्यादीति ॥ तत्त्वेति प्रतिषेधनी
सर्थः ॥ अधिष्ठानानवशेषे तत्प्रमाणरूपहेत्वभावान्निषेधवाक्यार्थप्रमानस्या दि
दमत्र नास्ति । लोके निषेधस्य साधिष्ठानस्यैव प्रामितिदर्शनादित्यर्थः ॥ किं
चापन्हदाति तस्मादिस्फुरत्सर्गस्य भाताभावाधिष्ठानप्रमितिरपवादे न तया पूर्वभा
नस्य भ्रमत्वनिश्चये नार्थसत्त्वापलापात् । अपवादानंगीकारे तु स्वगतः प्रपंचस्य
सत्यत्वापत्ते निषेधानुपपत्तिरित्याह ॥ अपरिशिष्यमाणे चेति ॥ अधिष्ठानसत्त्वं
विना न्योतिनिषेधायोगात् शून्यवादो न युक्त इत्युक्तपूर्वनादिनः पक्षांतरं दूषयति ॥

त.प्रपा

१२

२२

नग्रूपीति ॥ देहात्माभिमानवल्लौकिकमानप्राप्तद्वैतस्य निषेधो युक्तो न वेदांतप्रमितब्र
ह्मण इति भावः ॥ सुदुर्लक्षं वाङ्मनसातीतत्वान्निषेधार्हं ब्रह्मेति नत्राह ॥ वाङ्मनसेति ॥ ब्रह्म
णो वागाद्यतीतत्वं निषेधार्थं न चेत्किमर्थं तदुक्तिरित्यत आह ॥ प्रतिपादनेति ॥ उक्तार्थे संनिये
जयति ॥ तदेव दिशा दिना ॥ द्वे वाव ब्रह्मणो रूपे इत्यस्यैव प्राधान्येन प्रकृतत्वान्नेतीतिनि
षेध इत्यर्थः ॥ नन्वादित्यमंडले पुरुष इति ब्रह्मप्राप्यं प्राधान्येनोक्तमित्याशंक्य पुरुषलिंग
स्या ऽमूर्तरसत्वेऽश्रुतत्वान्न जनितस्य भानास्य तत्र रूपत्वं श्रुत इत्याह ॥ तज्ज्ञानि न
मेवेति ॥ रूपरूपिणोरभेद उक्तः ॥ ननु वासनामयं रूपमेव किमित्यनुपमीयते प्रसिद्धं रू
पमेव किं न स्यादित्यत आह ॥ अमूर्तरसस्येति ॥ रूपद्वयस्यैव प्राधान्येन ग्रहणत्वे फ
लितमाह ॥ नादिति ॥ योगित्वेन समर्पितत्वस्यार्थः ॥ न चार्थतः प्राधान्याद्ब्रह्मणो नि
षेधः स्यात्सो ऽस्योन्नास्ति यत्र राज निषेधप्रसंगादिति भावः ॥ किं चात्र ब्रह्मणः प्रतिपा
द्यत्वान्न निषेध इत्याह ॥ उपपत्तेश्चेति ॥ ननु ब्रह्मणो निषिद्धस्याप्यन्यत्रास्थितिसं
भावे कल्पितत्वमित्याह ॥ तदास्पदं देहीति ॥ उपादानेन निषिद्धस्यान्यत्रास्थितिरित्यर्थः ॥
यत्तु द्वैतनिषेधे प्रत्याख्यादिविरोध इति तत्राह ॥ मुक्तं चेति ॥ स्थापितं स्यात्तं भणा

न १

नति १

नऽ

द्व

न

ग.भा.टि.र.
२२

सू.भा.टि

धिकरणे प्रसङ्गादेव्यावहारिकं प्रामाण्यं न तत्त्वावेदकमिति ॥ अनन्तत्वात् निषेधान्वयविरोध इति
भावः ॥ ननु वस्तुत्वाद्द्वैतवद्ब्रह्मणोऽपि निषेधः स्यादित्याशङ्क्याह ॥ नेतीति ॥ द्वैतभावाभावसाक्षि
त्वादद्वयत्वान्न निषेध इत्यर्थः ॥ नचेत्यादि स्पष्टार्थम् ॥ यद्यपि निषेधाभ्यासस्तत्परस्तथापि नच नि
षिध्यते इति तत्राह ॥ द्वौ चेत्यादि ॥ उद्देश्यविधेयार्थानां संख्यासाम्ये यथाक्रमं संबं
ध इति न्यायो यथासंख्यमनुदेशः समानामिति पाणिनिसूत्रसिद्धस्तेनानन्तरूपद्वै
द्वैतेन निषेध द्वयविधिरित्यर्थः ॥ वीप्सापक्षे सर्वं दृश्यं निषेधाज्जिज्ञास्यं तत्त्वमिति
... विशिष्य निषेधे जिज्ञासा न स्यादित्यर्थः ॥ सू ग्रा
विशेषमाह ॥ परिगणितेति ॥ ... निषेधानुपपत्त्या ब्रह्मास्तीत्यवगतं न्यायः पुनः परमस्तीति निष्कृतिः
तत्त्वं व्याचष्टे ॥ एतस्मादिति ॥ ... अनतिरिक्तं ब्रह्मेत्यर्थः ॥ स्पष्टमन्यत् ॥ नन्वग्राह्यत्वाद्ब्रह्म नास्तीति
साक्षादपि ब्रवीतीत्यर्थः ॥ तदव्यक्तमिति ॥ ... ब्रह्मेत्यर्थः ॥ स्पष्टमन्यत् ॥ ...
शंकानिरासार्थं सूत्रं व्याचष्टे ॥ ... रूपाद्यभावाद्द्रव्यक्रमिन्द्रियादिलिंगं न ... ग्रा
त्वादित्यर्थः ॥ अन्यैर्देवैरिन्द्रियान्तरैर्न गृह्यत इत्यन्वयः ॥ तर्हि कदाप्यग्राह्यमिति शंकोत्तरसूत्रं
व्याख्याति ॥ अपिचैनमिति ॥ चस्त्वर्थः ॥ इन्द्रियैर्न गृह्यते अपितु संराधने शास्त्रसंस्कृतमन
स्यर्थः ॥ भक्तिध्यानाभ्यां प्रत्यगात्मनः प्रवित्ते प्रकर्षेण निधानं स्थापनं प्रणिधानं जपनमस्कार व

ग्रा

२२

पश्यति मो सा यद् स था ।ततः कर्मणा विस्पुद्धाचेतो शानात्ययत तो कर्षेण ध्यायंस्तात्रिष्कलं ४

चक्षु

राद्रि १ दिद्रा ब्दार्थः ।। स्वयंभूरीश्वरः । खानिइंद्रियाणि परां बहिर्मुखानि ग्राहकाणि कृत्वा व्यतृणत् हिंसितवा

न् । सहि तेषां नाशको देवं सदर्थ ग्राहितया सर्जनं तस्मात्तेषां तथा स्रष्टत्वात् सर्वो लोकः पराग र्थ

मेव पश्यति नात्मानं कश्चित्तु धीरो धीमान् । आवृत्तचक्षुर्निरुद्धेंद्रियः । शुद्धेचेतसि प्रत्य

गात्मानं शास्त्रेणैक्षदपश्यदित्यर्थः ।। विनिद्रा विजितश्वासाः संतुष्टा हेतु जितेन्द्रियाः प्राणायाममनि

ग ष्टत्वं युंजाना ध्यायिनः । योऽस्य आत्मा योगिनां यथा प्रकाशादय उपाधिषु भिद्यंते नस्व

तः । एवं प्रकाशश्चिदात्मापि ध्यानादिकर्म वपुर्धीभिर्भिन्नेस्व तस्तस्यापि वेशेष्यमेकरस्त पा

मेव तत्त्वमसीत्यभ्यासादितिसूत्रयोजना । जीवस्य अहतार्म फल श्रुतिरूपलिंगादभि त्व

द उभोपाधिकएवेत्याह सूत्रकारः ।। अतो नंतेनेति भेदा भेद पूर्वपक्षे सूत्रद्वयस्य संगति

माह ।। तस्मिन्नेवेति ।। यथाहित्वेनाभेदः कुंडलाद्यवस्यस्य सर्पात्मस्याविशेषस्य कुंडलत्वे

न भेदस्तथाजीवस्य ब्रह्मत्वेनाभेदो जीवत्वेन भेदः ।। प्रकाशस्तर्यप्रकाशौ शरीरेष्वतेज

स्त्वधर्माविच्छेदेनभेदा भेदवजीवपरयोरपि एकेनेना मत्वधर्मेण भेदाभेदौ श्रुति

बलात्स्यातामिति सूत्रद्वयार्थः ।। कुंडलत्वं वक्रमाकारत्वं ।। आभोगत्वं वक्राकारत्वं

= स्तुर्यप्रकाशयोरपितेजस्त्वेन सामान्यांशेनाभेदो व्यक्त्यंशेन भेदस्तथात्मत्व सामान्यांशेन जीवपरयोरभेदो व्यक्त्यंशेन भे

सूर्यः = २

त

णं श्रुत्यर्थदीर्घदण्डाकारत्वं उक्तं तस्य स्वरूपमादिशब्दार्थः ॥ सिद्धांतसूत्रे पूर्वपक्षे इति ॥ धर्मभेदेनैकध
र्मिणा वा भेदाभेदस्वीकारे भेदस्य सत्यत्वादभेदवर्णनव्याहतिः स्यात् ॥ एकत्रैव भेदाभेदस्वीकार
लोके विरोधकथा च्छेदयस्यापि द्रष्टव्यम् ॥ तस्मान्निष्प्रपंचे चिदेकरसे ब्रह्मणि न सद्वितीयत्वमस्ती
ति सिद्धं ॥ यदुक्तं नेति नेतीत्यादिश्रुतिभिर्ब्रह्मणोऽतिरिक्तं वस्तु न सिध्यतीति तदयुक्तं
सेत्वादिश्रुतिभिर्वस्त्वंतरास्तित्वभानादित्याक्षिपति ॥ ।परमत इति ॥ ।यद्यपि द्युभ्वाद्य
धिकरणे सेतुशब्दो विधारकत्वेन गौणो व्याख्यातः ॥ तथाप्युन्मानादिश्रुतीनां गति
र्जानतायं पूर्वपक्षः ॥ तत्रोन्मानादिश्रुतीनां मुख्यत्वात् सद्वयं ब्रह्मेति फलं सिद्धांते तु को
द्वितीयाऽसिद्धिरिति विवेकः ॥ ब्रह्म सद्वयं सेतुत्वात् लौकिकसेतुवत् ॥ तीर्णत्वश्रुतेश्च
स्यात् ॥ सेतुं तीर्त्वेति नागत्वं वा तत् ... सर्वमिति वै चोक्ते रीतिप्रचुरादेशौ ज्ञातव्यौ इद
तु देवनामात्रप्रकाशादि श्रुत्यभ्यंतरस्तु कलाप्रकाशवान्नाम पादः पृथिव्यंतरिक्षं द्यौः स
मुद्र इत्यनंतवान्नाम पादः ॥ अग्निः सूर्यश्चंद्रो विद्युदिति ज्योतिष्मान्नाम पादः ॥ प्राणः
श्रोत्रं चक्षुः मन इत्यायतनवान्नाम पाद इति चतुष्पाद्ब्रह्म [illegible] निपानां मध्ये प्रत्येकं
शफा अस्य स्पष्टा शफपादेषु चतुर्षु प्रत्येकं चतस्रः कलाः इति षोडशकलमित्यर्थः

व
त
।सद्वयम् ८
अस्य
सेर दीर

षोडशपणपरिमितेन ताम्रं कार्षापणसंज्ञं भवति ॥ तद्वस्तु इदं पंचभस्नपरिमितत्वादि सर्थः ॥ संबंधित्वाच्च
नगरवादि साह ॥ तथा संबंधीति ॥ अन्यदमितमिति ॥ असंख्यातमित्यर्थः ॥ अन्यस्पर्द्धे अल्पत्वेन
मितत्वनियमादिति मितत्वभेदेनोक्तसाशेषटवदिसाह ॥ भेदव्यपदेशश्चेति ॥ अस्याक्षिप्तस्यास्यानुनादि
सस्केनसहेतिपावत ॥ आधारतोतिदेशानश्च भेदमुक्ताबधितो पितमाह ॥ तावधिकं चेति ॥ सिद्धां
तस्तं व्याचिष्टे ॥ तुशब्देनेत्यादिना ॥ यदन्यत्तत्किं साधुनादिवा ॥ नाधः ॥ माना
भावात् ॥ कानस्य प्रमानन्यत्तानिर्णेत्री स्कत्का न द्वितीयः ॥ तु सतेरद्दस्तावधारणादि साह ॥ नन्व
प्रत्व्यातरिक्तमिति ॥ उक्तानुमाना नानागमबाधइतिभावः ॥ उक्तस्मारपित्याहहेतुनामासिद्धिमा
॥ नतुस्वेति साद्दिना ॥ किं सेतुतश्च स्वपरसिद्धिरस्वोद्धा नाधइस्कत्को द्वितीयत्राकृते ॥ नत्र
परस्मिन्निति ॥ सेतुस्वालिंगेनार्थं द्वतीयत्तश्चकाति बोधनमन्याप्यामित्साह ॥ नन्चेति ॥ लिंगं च
सिद्धमित्साह ॥ अपिचेति ॥ विधारकत्वेतु कल्पितहिती पापेक्षप्यापीभुज्यतइतिभावः ॥
तीर्पात्तहेतुरप्यासिद्धइत्साह ॥ सेतुतीर्त्तिलि ॥ परीमनत्वमप्यासिद्धमित्साह ॥ बुध्यमुदीति ॥ वाक्प्राणश्चक्षुः
श्रोत्राणि मनसः पादाः अग्निवाय्वादित्यदिशः आकाशस्य पादाः ध्यानार्थं कल्पितास्तद्द्वलनणउन्मानमि
सर्थः ॥ लौकिकं दृष्टांतमाह ॥ अथवेति ॥ पादकल्पनां विना पिव्यवहारः किं नस्यादिसत आह ॥ नहीति ॥ का
र्षापणस्य व्यवहारायपादकल्पनावन्मदाधिपांध्यानव्यवहारायब्रह्मणउन्मानकल्पनेसर्थः ॥ संबंधभेदोक
ल्पितानस्साद्वितीयसाधकाविसाह ॥ स्थानेति ॥ स्थानस्पोंधिबुध्द्यादिरेकस्यैवोपाधिनाभिन्नस्योपाधि
शांतौ सस्सांसंबधउपचर्यतेयथासौरालोकादेरंगुल्याद्युपाधिना भिन्नस्योपाधिवियोगेमहालोकाद्या
नासंबंधोपचारस्तद्वत् ॥ तथादिसच्चक्षुषोः स्थानयोर्भेदाद्धिरण्मयपुरुषभेदकल्पनेसर्थः ॥ मुख्यावे

भा॰भा॰टी॰र॰ | २४ | त॰व्या॰द्वि

संबंधभेदो किं न स्यात् तामित्यत्राह॥ उपपत्तेश्चेति। स्वरूपेण ब्रह्मणा जीवस्य संबंधो भेदो न वृत्तिरस्त्यो युज्यते
न मुख्यः संयोगादिः वस्तुद्वयाभ्यस्तत्त्वाभावात् भेदोऽपि न स्यात् एकत्वश्रुतेरित्यर्थः॥ ननु द्वितीयाभावे सर्वगतत्वश्रुति
विरोधः स्यादित आह॥ अनेन सर्वगतत्वमिति॥ द्वितीयं ससंगत्वे सत्त्वादिव ब्रह्मणो व्यापकतास्यात् अन्यस्य सत्त्वप्र
तीत्यादिश्रुतेः॥ किंच निरवयवासंगब्रह्मणः सम्बन्धे चसंबंधायोगात् अतो वैकुंठसर्वगतत्वश्रुतिविरोधः इति भावः
॥ अधिष्ठाने नासदध्यस्तं जगद्व्याप्तं। अध्यस्तत्वाद्रज्वा व्याप्तसर्पवदिति न्यायः॥ एवं तत्पदलक्ष्यं संशो
ध्य वाक्यार्थमाह॥ फलमत उपपत्तेः॥ निर्विशेषत्वादन्यः स्वभावः फलहेतुत्वाख्यः इष्टं सुखं देवादि
नां॥ अनिष्टं दुःखं नारकिणां व्यामिश्रं मनुष्याणां संसारो जन्मस्थिति प्रवाह॥ गोचर आश्रयो यस्य तत् सं
सारगोचरं॥ अत्र कर्मेश्वरयोः फलहेतुत्वश्रुतेः संशयमाह॥ किमिति॥ अत्र पूर्वपक्षे फलदातुरीश्वरस्य
त्वसदभावस्य स्यासिद्धेर्लक्ष्यासिद्धिः सिद्धांते सिद्धिरिति फलभेदः॥ पूर्वोक्तनिर्विशेषत्वमुपजीव्य फ
लदातृत्वमपीश्वरस्य नास्तीति पूर्वपक्षो ध्यानात्संगतः॥ यद्यपि सर्वगतत्ववस्फलदातृत्वं व्यवहारदशा
यां सिद्धांतितं तथापि कर्मण एव फलदातृत्वमिति शंकानिरासेनोक्तलक्ष्यार्थनिर्वाहो वाक्यार्थनिर्णया
र्थमस्याधिकरणस्यारंभ इति मत्वा सिद्धांतं तावदाह॥ तत इति॥ स्वर्गादिकं विशिष्टदेशकालकर्मा
भिज्ञदातृकं कर्मफलत्वात् सेवाफलवदित्यनुमानं न्यायसाहाय्यम् पूर्वोक्तफलसिद्धिर्नो घटस्याह॥ अभावादि
ति॥ द्वितीयं शंकते॥ स्यादिति॥ कर्मनाशक्षणमारभ्यानभिव्यक्तस्वर्गसुखादिसत्त्वे मानं नास्तीति दूषय
ति॥ तदपीत्यादिना॥ तृतीयं शंकते॥ अपेति॥ अपूर्वं किं स्वतंत्रमेव फलदानाय प्रवर्तते चेतनाधिष्ठि
तं वा॥ नाद्य इत्याह॥ तदपीति॥ द्वितीये त्वदृष्टानभिज्ञजीवस्याधिष्ठातृत्वायोगादीश्वरस्याधिष्ठातृत्वसिद्धि
४ रदृष्टकल्पनिर्यागादिक्रियारूपं कर्म तावत् क्षणिकं तस्य नाशात् कालांतरभाविस्वर्गफलं ४

त | कु॰६ | त्य ३ | २४

रिति भावः ॥ श्रौतदृष्टादिनापूर्वेणास्तीत्याह ॥ न दर्शनत्वइति । क्षणिकयागादेः श्रुतस्वर्गादिहेतुत्वानुपपत्त्या स्थाय्यपूर्व
सिद्धिरिति – चेन्न कर्मभिराराधितादीश्वरादेव स्थायिनः फलसिद्धेरित्यर्थः केवलतर्केणापूर्वं न सिध्यतीति
भावः ॥ श्रुतत्वाच्चेतु ग्रौवानिस्पत्त्योदाहृताभिये इह रमणीयचरणा इत्यादिश्रुतिस्मृतिभिरपूर्वसिद्धिरप्येताभि
रीश्वरस्यापि फलदातृत्वं स्वीकार्यमित्याह ॥ श्रुतत्वाच्चेति सूत्रकारः । अन्नमासमंताद्वणिभ्यो ददातीत्यन्नादः
वसुदानो धनदाता कर्मणापूर्वस्य वा जडत्वे नोपकरणमात्रत्वात्तत्र ईश्वर एव फलदातेति सिद्धांतो दर्शितः ॥
इदानीं पूर्वपक्षयति ॥ धर्मं जैमिनिरिति ॥ विधिश्रुतिरित्यर्थः तस्यां लिङः प्रत्ययस्य प्रेरणारूपत्वेनायागो निष्पत्स्त्वाद्वाबाग
मायागः स्वर्गसाधनमिति गम्यते यागस्येष्टसाधनत्वाभावे प्रेरणानुपपन्नेरित्यर्थः ॥ अपूर्वद्वारा कर्मणः फल
मुपपद्यत इत्युक्ताः सिद्धांतं दूषयति ॥ ईश्वरास्तु नेति ॥ ईश्वरः किं कर्मानपेक्षः फलं ददाति उत सापेक्षो वा आद्य
त्वाह ॥ वैषम्येत्यादिना ॥ द्वितीये संवेष्टनसंस्कारानमस्तकटवेष्टनवत्कर्मापूर्वादेव फलसिद्धेः किमीश्व
रेणेति भावः ॥ अत्र नयवदामः ॥ चंदनकटादिदृष्टसंपत्त्येव सुखादिसंभवे कृतं धर्माधर्माभ्यामिति श्रुतिबलादेव
पेक्षापात्रेश्वरेण किमपराद्धं ॥ अनतीश्वरानपेक्षात् केवलात्कर्मणः फलमयुक्तमिति सिद्धांतयति ॥ पूर्वं त्विति ॥ अचेत
नस्य कर्मणः स्वतः परस्य प्रयोगात् सेवादिदृष्टान्तानुसारि श्रुतेर्बलीयस्त्वात्सर्ववेदांतेष्वीश्वरस्य जगद्धेतुत्वश्रु
तेश्चेश्वराधिष्ठितात्कर्मणो जगद्धेतः पातिफलसिद्धिरिति समुदायार्थः ॥ ॥ इति श्रीमत्परमहं
सपरिव्राजकाचार्यश्रीमद्गोविंदानंदशिष्यस्य श्रीमद्रामानंदस्य कृतौ शारीरकभाष्यटीका
यां भाष्यरत्नप्रभायां तृतीयाध्यायस्य द्वितीयः पदार्थः पादः समाप्तः ॥२॥ ॥ ॥

त्ता॰ ध्या॰ द्वि॰ पा॰
२५

॥ तृतीयाध्यायस्य द्वितीयः पादः समाप्तः ॥

तत्त्वप्रा

२५

१तिलाएवनिकास्तेषौस्वामिनंदैवं सोमंतिलोसि सोमदेवस्य इति वचनादित्यर्थः ॥१॥

ॐ ॥ ॥मार्तंडध्वांतनाशायातिर्लेक स्वामिनं मुदे ॥ विघ्नेशं विघ्नविध्वंसं प्रणमामि मुहुर्मुहुः ॥१॥ ब्रह्मस्वरूपं निर्धार्य तः
ज्ञानसाधनोपासनास्वरूपमाह ॥ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॥ । पादसंगतिमाह ॥ व्याख्यातमिति ॥ प
र्वपादे तत्त्वंपदार्थविवेकः कृतः इह तत्फलं वाक्यार्थज्ञानं मानंदादयः प्रधानस्येति सूत्रेणापुनरुक्तापेक्षितपदतद्व्या न
र्थोपसंहारेण निर्धार्यत इति फलफलिभावः संगतिः ॥ सगुणे वाक्यार्थविद्याचिंता तु तद्विद्यानां चित्तैकाग्र्यद्वारा निर्गु
न णज्ञानसंधेनत्वात्क्रियत इति मंतव्यं ॥ संप्रति निर्गुणज्ञो भेदाभेदविचारविषयत्वेनोक्तमिति मन्वान आक्षिपति ॥ नन्वि
ति ॥ वेद्यभेदे विद्याभेदश्चिंतास्यात् ब्रह्मणस्तु वेद्यस्यैक्यान्न चिंतावसर इत्यर्थः ॥ ब्रह्मैक्येपि धर्मभेदाच्चिंतोत्थ
त आह ॥ एकरूपत्वाच्चेति ॥ निर्धर्मत्वादित्यर्थः ॥ एकरूपेपि ब्रह्मण्यनेकप्रकारसंभवाद्भिदशंके यत आह ॥ न चैसा ही
शा दिना ॥ पूर्वपक्षे ज्ञानभेदशंकानुपपत्तिमुक्त्वा चोदनाद्यभेदात् नाभेद इति सिद्धांतोप्ययुक्त इत्याह ॥ नोप्यस्येति ॥ एवंपी
दारं समाक्षिप्य समाधत्ते ॥ तदुच्यत इति ॥ सगुणविद्यास्वेवं भेदाभेदश्चिंता क्रियते निर्गुणविद्यायां त्वैक्यं सिद्धमिति वा
च्यं । र्थरूपगुणोपसंहारमात्रं क्रियते वाक्यार्थनिर्णयायेति भावः ॥ पंचाग्निप्राणदहरशांडिल्यवैश्वानरादि
विद्या मिथो भिन्ना इति नानाशाखादिभेदादित्यत्र वक्ष्यते ॥ अत्र तु मिथो भिन्नाः सत्यः किं प्रतिशाखं भिद्यंते न वेति
नामादिभेदाच्चोदनाद्यविशेषाच्च संशयः पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः सिद्धांते त्वभेदादुपसंहार इति फल र
भेदः ॥ पूर्वतंत्रे शाखांतराधिकरण पूर्वपक्षसूत्रं ॥ नामरूपधर्मविशेषपुनरुक्तिनिंदाशक्तिसमाप्तिवचन
प्रायश्चित्तान्यार्थदर्शनाच्छाखांतरे कर्मभेदः स्यादिति तत्रोक्ता हेतवो नामादयो विद्याभेदार्थमिहोच्यंते ॥ अथै
ष ज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणाख्य

२६

गुणविधिमात्रांशत्व ज्योतिरिति पदस्य कर्मान्तरनामत्वसंभवे ज्योतिष्टोमलक्षणत्वायोगादेवेति प्रकरणविच्छेदाच्च ज्योति
ष्टोमात्कर्मान्तरं विशिष्टदक्षिणाकं विधीयत इति नाम्नः कर्मभेदकत्वमुक्तं ज्योतिरादिष्विव स्यादिपदेनाध्वर्यवं हौत्रमिति
संज्ञाभेदात्कर्मभेदो ग्राह्यः॥ तप्तक्षीरं दध्या कठिनमामिक्षा तद्द्रवं जलरूपं वाजिनमिति भेदः॥ तप्ते पयसि दध्या
नयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वैश्वदेवे आमिक्षायागे वाजिनाख्यगुणविधिः वाजिभ्य इति विश्वे
देवानुवादादिसाकांक्षा॥ आमिक्षाप्रकृत्युपसर्जनत्वेनोक्तविश्वेदेवानां वाजिभ्य इत्यनुवादायोगादुत्पत्तिशिष्टामिक्षाव
रुद्धे कर्मणि वाजिनद्रव्यस्यानाकांक्षितस्य विध्ययोगाद्वाजिदेवत्यो वाजिनयागः कर्मान्तरमिति द्रव्यदेवतास्वरू
पभेदात्कर्मभेदः सिद्ध इति॥ आदिपदादैन्द्रं दध्यैन्द्रं पय इति द्रव्यभेदाद्यागभेदो ग्राह्यः एवमिहापि पञ्चाग्निष
डग्निरूपभेदाद्द्विधा भेदो वाजिहोमयोः तथा रेतोन्नपानावागादयः धर्मा होम्ये तत्सहिता वाजिनामिति प्राणविद्याभे
दः कारीरिवाक्याध्ययने तैत्तिरीयकाणां भूमौ भोजनं धर्मविशेषो नान्येषां अग्न्याध्ययने केषांचिदुपाध्याया
यर्थमुदकाहरणं धर्मो नान्येषां अश्वमेधाध्ययने श्वघासाननमनं केषांचिदेव नान्येषां न च तान्येव कारी
र्यादीनि कर्माणि धर्मविशेषमपेक्षन्ते नापेक्षन्ते चेति युक्तं॥ अतो धर्मविशेषाद्यागान्तरे कर्मभेदः शंकितः
तथात्रापि मुण्डकाध्ययने केषांचिदेव शिरस्यङ्गारपात्रधारणरूपं व्रतं नान्येषामिति विद्याभेदः स्यात्॥ पुन
रुक्तिरभ्यासः॥ यथा समिधो यजति तनूनपातं यजति इति पञ्चकस्याभ्यासाद्याज्यानां भेद उक्तः॥ तथात्राख्या
तेऽभ्यासो द्विधा भेदः आदिपदान्निंदादिग्रहः प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रमित्यनुदि
तहोमस्य यदुदिते सूर्ये प्रातर्जुहुयात् यथातिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति तादृगेव तद्
यदुदिते होमस्य च निंदाश्रुतेर्भेदः एकस्यैवोदितानुदितहोमातिक्रमरूपप्रायश्चित्तादर्थ्यग्निहोत्रभेदः
वेदोपासनाद्यनयोरभ्यासादिसर्थः॥३

नुदिते वानुष्ठानायोगात् तथोदितात्

शांकितः एतेनिंदा । प्रायश्चित्ते वेदांतविद्यासु नविद्येते इति नोदाक्षिप्येते ॥ यथा सर्वशाखाविहितस्य कर्मणो ज्ञानुक
र्तुचाशाके भेदस्तथा सर्ववेदांताध्ययनज्ञानादिशाखेस्तानदेशात विद्याभेदः स्यात्तथा शाखानां सर्वासामेकरूपा समाप्तिर्नो
च्यते किंतु कस्याश्चित्केचित्कर्मणि समाप्तिरतः समाप्तिवचनभेदात्तिति शाखं कर्मभेदः शंकितः तथा कस्यचिद्वेदां
तस्योंकारे सावीत्स्यसमाप्तिः कस्याचिदन्यत्रेति विद्याभेदः अन्यार्थदर्शनमर्थवादस्तद्भेदात्कर्मभेदवद्विद्याभेद
इति पूर्वपक्षस्तत्रोक्ता हेतवो दर्शितास्ते ह्यस्मिन्सिद्धांते पूर्वपक्षे चात्रोपयुज्यंते इति तथा शाष्ठांतराप्यासस्संख्या
गुणप्रक्रियानामधेयानि कर्मभेदकानि तत्र नामधेयगुणौ रूपमभ्यासश्चेति त्रयं व्याख्यातं यजेद्दद्याज्जुहु
यादिति परुति शाब्दभेदे . तथा स्वर्गभेदात्तदवच्छिन्नभावनाख्यकर्मभेद उक्तस्तथात्र वेदोपास्त्तर
स्यादिशाब्दभेदाद्विद्याभेदस्तिस्र आहुतीर्जुहोतीति संख्यया कर्मभेदवद्वायुप्राणौ द्वौ संवर्गाविति द्वित्वसंख्या
यासंसर्गविद्याभेदः स्यात् नित्याग्निहोत्रप्रकरणात्प्रकरणांतरे कुंडपायिनामयने मासमग्निहोत्रं जु
हुतीति श्रुतमग्निहोत्रं प्रकरणांतरस्थत्वात्कर्मांतरमिति सिद्धांतितं तथात्र वेदांतभेदे प्रकरणभेदा
दुपास्तिभेद इति पूर्वपक्षः ॥ सिद्धांतयति ॥ एवमिति ॥ सर्ववेदांतेः प्रतीयंते सर्ववेदांतप्रत्ययानि ते विहिता मी
सर्वः उक्तनामादिभिरग्निहोत्रादिकर्मणां प्रतिशाखं भेदे प्राप्ते शाखांतधिकरणसिद्धांतसूत्रं ॥
एकं वा संयोगरूपचोदनाख्याविशेषादिति ॥ तत्र चोदनाविधायकः शब्दश्चोदितः प्रयत्नो वा तस्याविशे
षमाह । यथैकस्मिन्निति ॥ एकधात्वर्थहोमावच्छिन्नं प्रयत्ने [illegible]भिसर्धः ॥ यथा ज्योतिष्टोमादि गुणकलापा
विद्या सर्वशाखास्वेका तथा पंचाग्निविद्याप्येका फलसंयोगाद्यविशेषात् ॥ तथाः न्यापि विद्या अभिन्ना

प्रयत्नेऽभ्यवतदुपास्ति२

या ५

हुंउपा
संकेर
सेषा:
भयने
घयनः
इति

न्या.नि.रा.

२७

२
न्या.मा.त

रत्याह॥ एवं पंचाग्नीति॥ पूर्वपक्षे हेतू निराचष्टे॥ येविति॥ काठकमित्यादिनाम्नः कर्मभेदो न युक्तः कुतः अन्योद
नाभिधानत्वात्॥ काठकादिशब्दानां ग्रंथनामतया कर्मवाचित्वाभावात् तद्भिन्ननाम शाखाग्रंथभेदेपि दृष्टिहि
तकर्मैकमेव॥ अल्परूपभेदोपि न कर्मैक्यविरोधी॥ धर्मविशेषस्त्वध्येय ।नागं न कर्मांगमतो न कर्मभेदकं॥
शाखाभेदे पुनरुक्तिरसिद्धा॥ निंदाः न्यार्थदर्शनयोरपि न भेदकत्वे॥ तत्तद्विधिस्तुतिमात्रत्वात्॥ बहुशाखाध्य
यनंशक्तावपि स्वशाखानुक्तविशेषस्यापेक्षितस्यान्यतो ग्रहणसंभवादशक्तिरभेदिका॥ एकस्मिन्नपि
कर्मण्यंगलोपादिना प्रायश्चित्तसंभवति॥ एवं समाप्तिवचनं भेदोप्युपन्नयोजनकूटस्यैव कर्माभेदप्रमाणप्रा
बल्ये भेदहेतवः परिहृताइत्यर्थः॥ तर्हि शाखांतरन्यायेनैव कर्मैक्यवद्विद्यैक्य*सिद्धेः पुनरुक्तिरित्यत आ
ह॥ इहापीति रूपस्याप्रसक्तिशिष्टत्वं विशेषः॥ पंचाग्नीन्वेदेत्याद्युपासनोत्पत्तिविधिस्थपंचाग्न्यादिरूपभे
दादुपासनाभेदः स्यादामिक्षावाजिनरूपभेदात्कर्मभेदवदित्यधिकाशंकानिरासार्थत्वान्नेयं न पौनरुक्त्यम
स्याधिकरणस्येति मत्वाशंकां व्याचष्टे॥ स्यादित्यादिना॥ अस्य प्रथकृत्वा सूत्रत्वात्कर्मन्यायानां मानसविद्यासु
विनास्त्वं दुर्योजत्वाच्च पुनरुक्तिगंधोपि नास्तीति मंतव्यं॥ ननु तत्स्य प्रेतस्य दाहार्थमग्निरंत्येष्टिगतः षष्ठो
पः प्रसिद्धवद्वाजिभिरुक्तः स छांदोग्येउपसंहार्य इति न रूपभेदस्तत्राह॥ न चात्रेति॥ अस्तु प्रश्नेन न गुणवत्तो
रेतसो वाजिनामावापः छांदोग्यानां च तस्योद्धारस्ततः किमित्यत आह॥ आवापेति॥ छांदोग्येष्वषष्ठाग्न्य
भावप्रसंगीकृत्याल्परूपभेदो न विद्यैक्यविरोधीति परिहरति॥ निषद्स्यादिना॥ अंगीकारं स्यजति॥

क २

न्या

ज

प्रा

२(५

पठ्यतेपीति॥ इतरेस्मात्लोकांतरं प्रेतं गतं स्नातयोग्न्ययेहरंतीत्यर्थः॥ ननु छंदोगेप्यग्निमात्रं श्रुतं वाजिभिस्तु समिदा
दिविशेषः पठ्यत इति रूपभेदस्तदवस्थ एवेत्याह॥ वाजसनेयिनस्त्विति॥ षष्ठाग्नेस्तु विशेषस्यानुवादमात्रत्वे
नानुपास्यत्वात्पंचाग्नय एवोपास्या उभयत्रेति न रूपभेद इत्यर्थः॥ सविशेषस्य षष्ठाग्नेरुपास्यत्वेपि न रूपभेद इत्या
ह॥ अथापीति॥ छांदोग्यवादिनां पंचानामग्नीनामग्नित्वसंपत्तिविधिनेवार्थात्संचत्वं संपत्तिकल्पिताग्नीनां सिद्धमनु
वादेन षष्ठोपत्वे न विधीयत इत्यर्थः॥ छंदोगे। वाजिशाखाप्रसिद्धे तत्र उपसंहर्तव्यमित्युक्तानुपसंहरेपि नावि
द्याभेदकरमित्याह॥ न चावतापीति॥ एवं रूपभेदेन विद्याभेद इत्युक्त्वा धर्मविशेषेपि न भेदक इत्याह॥ स्वाध्याय
स्येति॥ गोदानवदध्ययनांगत्वेन शिरोव्रतमाथर्वणिकानां सत्यविहितं न विद्यांगमित्यर्थः॥ अधिकाराच्चेति
व्याचष्टे॥ नैतदिति॥ एतत्संरक्षं मुण्डकमननुष्ठितशिरोव्रतो नरो नाधीत इति श्रुते मुण्डकाध्ययनांगमेव शिरो
व्रतमित्यर्थः॥ ननु विद्यांगत्वे नापीदं व्रतं श्रुतमिति शंकते॥ नन्विति॥ सर्वशाखसु ब्रह्मविद्यैकत्वे द्विधा संयुक्तं
व्रतमिति पि सत्रे वैसंनध्येन न च संबध्यत इति विद्याभेदस्यर्थः॥ प्रकृतग्रंथवाच्येत छष्ट ब्लाब्रह्मप्रकाशक
थपरा ब्रह्मविद्या ज्ञाप्द इति परिहरति॥ नेति॥ तस्यां शिरोव्रतस्य मुण्डकाध्ययने नियम इत्यत्र सर्ववेदितिनिदर्श
न निर्देशः॥ सवाहोमाः आथर्वणैः स्वसूत्रे उदित एकाग्निरेकर्षि संज्ञया प्रसिद्धस्तस्मिन्नग्नौ कार्याइति यथा
नियम्यंते तथेत्यर्थः॥ निंच वेद्यैक्येन निर्गुणविद्यैक्यं तावत्प्रतिदर्शयति तत्सन्निधिपाठात्सगुणविद्यानाम
पि सर्वशाखास्वैक्यसिद्धिरित्याहस्य चकारः॥ दर्शयति चेति॥ सगुणमप्येकं वेदत्रये वेद्यं दर्शयतीत्याह॥ तथे
ति॥ किं च शाखांतरोक्तपदार्थस्य शाखांतरे सिद्धवत्परामर्शो विधेक्यं दर्शयतीत्याह॥ तथाम हदुक्थमित्यादिना॥

चा

नां

एषनरएतस्मिन्नुदरमल्पमप्यंतरंभेदंयदापश्यत्यथतदातस्यसंसारभयंभवत्येवयस्माद्विदुषोनरस्यभेददर्शिनस्तदे
वब्रह्मभयंकरंभवतिब्रह्मैवाहमिसमन्वानस्येत्यर्थः॥प्रादेशमात्रमुपास्तइतिसिद्धेदुपादानंवैश्वानरविद्यैक्यंद
र्शयतीत्याह॥ तथेति॥ किंचसर्वेषुवेदांतेषूद्गीथादीनांप्रत्ययमानत्वेनहेतुनातदेवावगम्यते॥अन्यत्रेत्याह॥नातेषा
मन्यत्रोपास्यमर्थमुपासनमितितत्तदुपास्तीनामपिसर्ववेदांतप्रमाणकत्वेनैक्यंबाहुल्येनसिद्धमित्याह
तथेति॥ब्रह्मविद्यैक्यवदुद्गीथादिविद्यैक्यमित्यर्थः॥सर्वशाखास्वेकविद्यैक्यचिंतायाःफलमाह॥उपसंहारइ
ति॥शाखाभेदेसमानविद्यायांश्रुतागुणायथाश्रुतिव्यवस्थितायुनेत्राश्रुताउतरशाखासुउपसंहर्तव्याइति
संदेहेविद्यैक्येपितत्रतत्रोक्तैरेवगुणैर्विद्याप्रकारसिद्धेःशाखाभेदेनगुणाव्यवस्थिताइतिपूर्वपक्षःतत्र
विद्यैक्यचिंतानैष्फल्यमितिफलसिद्धांतत्वेनसूत्रंव्याचष्टे॥स्थितेचेत्यादिना॥गुणानांगुणप्रविनाभावादेतत्
शाखास्थविद्याशाखांतरोक्तविद्यागुणवतीतदभिन्नत्वात्तद्विद्यावदित्यनुमानाद्विद्यैक्येगुणोपसंहारसिद्धिरि
त्यर्थः॥प्रधानैक्येतदुपकारकाणामंगानामुपसंहारेदृष्टांतमाह॥विध्यधिशेषवदिति॥उक्तमेवव्यतिरेकमु
खेनाह॥यदिहीति॥नन्वाग्नेयथागावरुद्धानांगुणानांततोभिन्नेसोर्यप्राप्तिवद्विद्यांतरस्थगुणानांवि
द्यांतरेप्राप्तिःकिंनस्यादित्यतआह॥प्रकृतीति॥प्रकृतिगुणानांविकारेप्राप्तिर्युक्ताविद्यानांतुप्रकृतिविकृ
तिभावासिद्धेर्नतत्प्राप्तिरित्यर्थः॥नैवमिति॥गुणानुपसंहारानेत्यर्थः॥उत्तरसूत्राणांमनेसूत्रेणपौन
रुक्त्यंवारयति॥असत्येवेति॥पूर्वचोदनाद्यविशेषादुत्सर्गतोविद्यैक्यमुक्तंतस्यापवादमाह॥अन्यथात्व
मिति॥अत्रवाजिनामुद्गीथब्राह्मणंछंदोगानांमुख्यप्राणाध्यायंचविषयमाह॥वाजेत्यादिना॥तेहदेवाः

द्वि
कु
ने

=तथा वाचात देवानां वचनं तथैव तदुक्तं ततः आतन्व कर्मणि प्रवर्त्तो सं ह्यालंग पाप्मना गत स्वेतिनिंदितेति द्रष्टः

सात्त्विक इतरः प्राणा अन्योन्यमरुचुः इतेदानीमस्मिन्यज्ञे उद्गीथेनौद्गात्रेण कर्मणा इज्जस्तमो शक्तिरूपा न सुरान्
तीसदेव स्वर्गं गच्छामेति॥ ते चैवं निर्दोषमुद्गीथकर्तारमुपास्यं निर्द्धारयितुं इतरसंवादः प्रथमं वाचं परीक्षि
तवंतः त्वमौद्गात्रं नोस्माकं कुर्विति तैर्यो त्वन्न्यतं तथा घ्राणं चक्षुः श्रोत्रं मनोस्यपि क्रमेणासुरपाप्मना ग्रस्ता
नीति निंदित्वा आसन्यं मौख्ये भवं मुखमध्यस्थं प्राणमुपास्यं निर्द्धारितवंत इत्यर्थः॥ तत्रत्रान्योन्याभि
भवात्संकुचे प्रश्ने ते देवाः एवं वदुद्गीथमाहृतवंतः॥ अनेनोद्गीथेनेनान सुराञ्जयेमेत्यर्थः॥ भेदाभेदस्ता
वान्यां संशयमाह॥ तत्रेति॥ अत्र पूर्वाधिकरणोक्तसिद्धांतन्यायेनोद्गीथविद्येति संलेख्यमिति पूर्वपक्षे मिथो
गुणोपसंहारः फलं सिद्धांते संज्ञैक्ये विविधैक्यापवादादनुपसंहार इति॥ एवं यत्र एवं न्याये न पूर्वपक्ष
स्तत्रापवादिकी संगतिमंतव्या सर्वत्र स्व सिद्धांति शंकाभागं व्यं चेष्टे॥ ननु युक्तमिति॥ संपूर्णोद्गीथकर्मक
र्त्ता प्राणो वाजिनामुपास्यः उद्गायेति कृत्स्नश्राष्टात्॥ छंदोगानां तूद्गीथावयव ओंकारः प्राण इत्योपास्य ओमित्येत
दक्षरमुद्गीथमित्युपक्रम्य प्राणमुद्गीथमिति कर्मरूपत्वश्राष्टात्॥ पाचकत्वे कर्मणोरुपास्ययोर्भेदाद्वियोरन्य
या संभेद इति शंकार्थः॥ उद्गीथत्वेनेति॥ ओंकारत्वेनेत्यर्थः॥ अल्परूपभेदो नाविद्यैक्यविरोधी स्यादितिन्याये
न पूर्वपक्षीपरिहृति॥ नैष इति॥ असुरास्ययाभिप्रायः असुरजयार्थसंवादः यथाश्मानं प्राप्य लोष्ठो विध्वंस
ते तथा प्राणं हंतुमागता असुरास्तस्य वीर्येण स्वयमेव ध्वस्ता इति श्रुत्यनुभयत्रेत्यर्थः॥ अल्परूपभेदमं

गीरूस्यापि विधेयैक्यमुक्तं सोपिना। रत्तीत्याह॥ वाजेति॥ उद्गीथकर्मरूपत्वेन प्राणस्योपास्यत्वश्रुतेस्तादेकत्र श्रुतं कर्तृत्वमप्युपास्य
त्वे दृष्टव्यमित्यर्थः॥ बहुविरुद्धरूपभेदान्न विधेयैक्यमिति सिद्धांतयति॥ नवेति॥ अक्षरं विशिनष्ट्युद्गीथमिति॥ तदवय
वमित्यर्थः पृथिव्यादिरसानां रसतम ॐकार आप्तिसमृद्धिरिति गुणानुक्त्वा गुणवत्योंकारे प्राणदृष्टिविधानाया ६
ख्यायिकाप्रसक्तेत्याह॥ रसतमेति॥ ननु वाजिवाक्यैकवाक्यार्थत्वाच्छांदोग्योपक्रमस्थमुद्गीथपदं संपूर्णसामभक्ति
परमस्तु प्राणमुद्गीथमित्यत्राप्युद्गीथकर्ता प्राण उपास्य इति व्याख्यायतामित्यत आह॥ तत्र यद्युद्गीथेति॥ ॐ
कारोपास्त्युपक्रमभंग उद्गीथपदे कर्तृलक्षणा चेति दोषद्वयं स्यादित्यर्थः॥ ननु सिद्धांतेपि तस्य देवयवलक्ष
णा स्वीकार्या ततो वरं कर्तृलक्षणाश्रुत्यंतरानुग्रहात्तथा चोपसंहारे कर्तृप्राणोपास्तिनिश्चयादुपक्रमेपि
निश्चय इत्यत आह॥ उपक्रमेति॥ संदिग्धोपक्रमो हि वाक्यशेषान्निश्चीयते यथाक्ताः शर्करा इत्यत्राज्येन द्रव्यसं
देहे तेजो वै घृतमिति वाक्यशेषान्निश्चयः॥ इह तूपक्रमे क्षरस्योपास्यत्वं निश्चितं तत्समानाधिकरणोद्गीथपदस्या
वयवलक्षणा निश्चितेति प्राणमुद्गीथमित्युपसंहारस्तदेकार्थतया नेय इत्यर्थः॥ एवं छांदोग्य ॐकार उपास्य
उक्त इति ननु प्राण इत्युपास्यभेदा[illegible]धा भेद इत्याह॥ वाजेति॥ यदुक्तं वाजश्रुतावपि प्राणस्योद्गीथरूपत्वश्रुते
रूपस्यैक्यमिति तद्दूषयति॥ यद्यपीत्यादिना॥ तत्रोद्गीथ उपास्यतया नोक्तः किंतु प्राणस्योपास्य गुणतयेत्यर्थः
किं चोद्गीथ ॐकारे छांदोग्ये अत्र तु भक्तिरित्युपास्यभेद इत्याह॥ सकलेति॥ प्राणस्य जडत्वाज्ञातृत्वं तत्कि
कृतोद्गीथत्वमेव वाजसनेयिभिरपि ग्राह्यमित्यैक्यमाशंक्याह॥ नचेति॥ स उद्गाता वाग्विशिष्टेन प्राणेनोद्गात्रं कृतवा

ते।१ = उद्गीथावयव ॐकारे प्राणदृष्टिः कर्तव्येत्यर्थः ४

द्वि

नित्यश्रुतेरसंभवो विनेत्यर्थः ॥ यदुक्तं बुद्ध्युत्तरार्थाविशेषाद्द्वैध्यमिति तत्राह नचेति ॥ एकत्वोद्देशात् प्राण
उपास्यो न्यत्रोंकार इत्यसंततेर्गोपास्यरूपभेदस्य स्पष्टत्वेन तिबहिरंगार्थवादसाम्यमात्रेण नोपासनैक्यं युक्तमित्यर्थः ॥ वाक्यसा
म्यमात्रेणार्थैक्यं नास्तीत्यत्र दृष्टांतमाह ॥ तथाहीति ॥ तं वा एतमजया पशुभिरर्द्धयति वर्द्धयस्य स्यादव्यं यस्य ह
विनिनित्यस्य पुरस्तात् चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये मध्यमाः स्युस्तान् अग्नये दात्रे पुरोडाशमष्टाकपालं कु
र्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमित्यस्याभ्युदयवाक्यं ॥ अस्यार्थः
यस्य यजमानस्य चतुर्दश्याममावास्याभ्रांत्या दर्शकर्मार्थं व्रतस्य पुरस्तात् पूर्वेह्नि वित्ते दुलदधिपयोरूपं निरुप्तं
दर्शदेवताभ्यो ग्न्यादिभ्यः संकल्पितं चंद्रमाश्चपश्चादभ्युदेति तमेतं यजमानं कालव्यत्ययापराधात् देवनिरूपं सं
हविः प्रजादिनार्द्धयति वियोजति येशत्रुं चास्य वर्द्धयति यस्माल्लक्षणं तिमान्यजमानोयेमध्यमादिभावेन त्रेधा
कृता तंडुलादध्यादिसहितान्निरुप्तास्तान्विभजेदग्न्यादिभ्यो वियोजयेद्धि योज्यच दातृत्वादिगुणकादिभ्यो दर्शदेव
भिन्नेभ्यो निर्वपेदिति ॥ दधनु दधिमिश्रं स्थविष्ठतंडुलचरुं ॥ शृते दुग्धे णिष्ठचरुमित्यर्थः अत्र कोपराधे देवानां तत्र
पुनः प्रायश्चित्तरूपं दर्शादिके कर्म विधीयत इति भासे तंडुलत्रैधा वाद्यनुवादेन विभजेदिति हविषः प्रकृतदेवावियो
गेन तस्मिन्नेव दर्शकर्मणि देवतांतरसंबंधमात्रविधानं न कर्मांतरमिति सिद्धांतितं एवमभ्युदयवाक्ये कालापरा
धे नोपक्रमाद्दर्शकर्मण्येव हविषः पूर्वदेवतास्योपनयो वियोध्यवसितः पशुकामवाक्ये तु यद्यपि ये स्थविष्ठास्ता
नग्नये सनिमते ष्टाकपालं निर्वपेद्ये मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं ये क्षोदिष्ठास्तानिंद्राय प्रदात्रे दध
श्चरुमिति निर्देशो भ्युदयवाक्यसमो सितथापि यः पशुकामः स्यात्सोमावास्यामिष्ट्वा वत्सानपाकुर्यादिति निरु

स्ता

ला

दर्शकर्मसमाप्त्युत्तरं दर्शार्थवत्सापाकरणविध्युपक्रमात् प्रकृतमास्यप्ययागांतरविधिरेव नास्यदयवाक्येनार्थे
नामितितपा प्रकृतेऽपि निर्देशसाम्यं न विधेयैक्यप्रयोजकमित्यर्थः॥ वत्सानपाकुर्यान्मातृदेशाद्देशांतरं नयेदित्यर्थः
स्योक्तं दृष्टांतं व्याचष्टे॥ परो वरीयस्त्वादिवदिति॥ परउ इति स्यैकारांतं परस्मात्सरस्मात्सो वरांश्च वरतर इ
ति परोवरीयानित्येकं पदं अनंत आकाश आख्यः परमात्मा तदृष्ट्यालंबनत्वादुद्गीथस्तद्योक्त इत्यर्थः॥ आका
शात्मनाहिरण्यश्मश्रुपुरुषात्मना चोद्गीथोपास्तिसाम्येऽपि विधौ भेदवदिहापि भेद इत्यर्थः॥ संदेहं
पूर्वपक्षबीजमुद्भाव्य दूषयति॥ संज्ञानइति॥ रूपास्य रूपभेदाद्द्विधा नानात्वं यदुक्तं तद्ध्यस्य क्षराद्युगतं
बलेसंसलातुपौरुषेयीदुर्बल इत्यर्थः॥ संदेहकं कर्मैक्यव्यभिचारित्वेत्याह॥ अस्ति चेति॥ किंतु संदेहकं सर्व
त्राप्रमाणमेव नेत्याह यत्रेह हीति॥ असति बाधके संदेहकमपि मानं यथा स्वर्गी विद्येति संसेक्या सर्वशा
खासु तद्विधेयैक्यं तथा पंचाग्न्यादिविधेयैक्यमित्याह सूत्रे दर्शितमित्यर्थः॥ व्याख्येयमसमंजसं॥ सोमा
नाधिकरणं विषयीकृत्य संशयमाह॥ ॐमित्येतदिति॥ अध्यासादिपदार्थान्व्याचष्टे॥ तत्राध्या
सइत्यादिना॥ बुद्धिपूर्वको भेदारोपोऽध्यासः बाधोऽपवादः॥ एकत्वं वास्तवाभेदः॥ विशेषणं व्यावृ
त्तिकमिति विवेकः॥ पूर्वमुद्गात्रकर्मा सकोद्गीथावयव ओंकारस्य मध्येयस्य विशेषणं सिद्धवत्कृत्य
पक्षभेदाद्द्विधा भेदः सिद्धांतिनः स न युक्त इत्याक्षेपसंगत्या पूर्वपक्षयति॥ तत्रेति॥ अत्र पूर्वपक्षे पूर्वो
क्तसिद्धांतासिद्धिः फलं सिद्धांते तत्सिद्धिरिति मत्वा सिद्धांतसूत्रं व्याचष्टे॥ चशब्द इत्यादिना॥ पक्षत्रयस्य

वत

रू

३०

गुणयोग

=तस्य उद्गीथस्य वाक्यादिततद्विषयत्वगुणपरत्वादुद्गीथशब्दस्येत्यर्थः तथा च रसतमं ओंकारो उद्गीथ इत्येकबुद्धिविषयत्वेन पर
संबंधोऽप्रसिद्धः कल्पनीय इत्यर्थः २

दुष्टत्वं प्रतिज्ञाया अध्यासपक्षे दोषमाह ॥ तत्राध्यासइति ॥ यस्योद्गीथस्य बुद्धिरोंकारे ध्य अध्यस्यते तदा चोद्गीथशब्द
स्योंकारे लक्षणा स्यात्तद्बुद्धिविषयत्वगुणपरत्वात् तथा च संबंधोऽप्यप्रसिद्धः कल्पनीयः प्रतीकोपास्तेः फलं च कल्प
मिति गौरवं स्यादित्यर्थः फलं न कल्प्यमिति शंकते ॥ आपतइति ॥ ओंकारं आप्तिः समृद्धिरिति चोपास्ते स कामा
नाप्नोतीति श्रुतं फलं नाध्यासव्ये इत्यर्थः ॥ उद्गीथोंकारयोरन्यतरबुध्यान्यतरबुध्यपवादमंगीकृत्यान्यतरमिथ्या
बुद्धिनिवर्तित्वे फलत्वं युक्तं संप्रत्यन्यतरबुद्धेरनंतित्वान्नापवादइत्याह ॥ न कदाचिदपीति ॥ भ्रांतिश्चेन्निवर्ते
त न तु निवर्तते अतः स भ्रांतिरित्यर्थः किं च तत्वबोधकाद्वाक्याद्भ्रांत्यपवादो भवति नेदं वाक्यं तत्वपरमित्या
ह ॥ न चेति ॥ घटकुंभशब्दयोरिवोंकारोद्गीथशब्दयोः पर्यायत्वपक्षं दूषयति ॥ नापीति ॥ पर्यायत्वमपि नास्ती
त्याह ॥ न चेति ॥ परिशिष्टविशेषणपक्षं सूत्रं योजयति ॥ व्याप्तेरिति ॥ ओमित्येतदक्षरमुपासीतेत्यत्र सर्ववेद
व्याप्योंकारग्रहे प्राप्तो प्रसज्यते तन्निरासार्थमुद्गीथावयवत्वं च विशेषणं समंजसमित्यर्थः ॥ अध्यासप
क्षे तद्बुद्धिविषयत्वगुणयोगरूपः संबंधः कल्प्यतइति विशेषपक्षे लक्षणा ॥ अवयवलक्षणा तु सन्निकृष्टा अवय
वावयविसंबंधस्य क्लृप्तत्वात् यथावयवे दग्धे पटो दग्ध इति लोके प्रयोगाच्च नामादौ ब्रह्मशब्दस्य त्वगत्या
ब्रह्मदृष्ट्याश्रयत्वगुणलक्षणाश्रिता तत्र प्रतीकोपास्तेर्विवक्षितत्वादिह तु पत्नीकोपास्तिर्विधित्संत्यन्ने ओं
साधिगुण ओंकारे प्राणदृष्टिविधानेन च शक्य [illegible] स्यादतः सर्ववेदव्याप्योंकारनिरासेनोंकारे प्राण
दृष्टिविधानार्थं विशेषणमेव समंजसं कल्पनालाघवादिति सिद्धं ॥ सर्वाभेदादन्यत्रेमे ॥ विषयं वक्तुं संग

३

नि

=लक्षितत्व
इत्यर्थः ५

तमर्थमाह॥ वाजिनामिति॥ वाचो वसिष्ठत्वगुणः वाग्मिनः सुखवासदर्शनाच्चक्षुषः प्रतिष्ठागुणश्च क्षुभ्नतः पादप्रतिष्ठा
दर्शनाच्छ्रोत्रं संपद्गुणकं श्रवणेन सर्वार्थसंपत्तेः मन आयतनत्वगुणं तस्य वृत्तिद्वारा सर्वभोग्याश्रयत्वात्ते च गुणाः प्रा
णस्य श्रेष्ठ्यं निःश्रेयसवागादिसत्त्वस्मिन्नपि नाडीतिशाखान्तरे समतोऽर्थः विषयमाह॥ अन्येषामित्यादिना॥ निःश्रेयसस्य
श्रेष्ठ्यादानं निर्धारणं प्रस्तुतस्यार्थः॥ देवता वागादयोऽहं श्रेयसे स्वश्रेष्ठ्याय स्पर्धाः॥ एवं शाखा श्रेष्ठ्यगुणकप्रा
णप्रसक्तिशानाच्च संशयमाह॥ तत्रेति॥ गुणानामनुपसंहारोपसंहारावेव पूर्वोत्तरपक्षयोः फलं॥ उद्गीथवाविशेष
णादेकार सर्ववेदव्याप्तिव्याप्तिवदत्र गुणमात्रमाह केवं शाखाध्यानांतर गुणव्यवस्थारिति दृष्टांतेन पूर्वपक्ष
यति॥ तत्र व्याख्यामिति॥ यथा वागादिस्थः प्राणश्रेष्ठस्य सिद्धमर्थीत यायएवं श्रेष्ठं गुणं विद्यानुपास्ते स प्राणश्रेष्ठ
विदित्वाध्यात्वा श्रेष्ठो भवतीति स्पर्धः॥ एवं जातीयकविधेयस्त्वान्यमाप्य वसिष्ठत्वादिगुणजातमेव शाखान
गृह्णातिश्च तावत्सुबिचारादिति प्राप्ते सिद्धांतयति॥ अस्मेरन्नेति॥ वाजसनेयिब्राह्मणे तावद्वेवशब्देन वसिष्ठत्वादिगु
णजो तस्य प्राणविद्यासंबंधः सिद्धः सैव विद्या कौषीतकिश्रुतौ प्रत्यभिज्ञायते तथा च गुणानां गुणविनाभावेनार्थतः
प्राप्तानामपि श्रुतगुणेरविरोधात् सैव श्रुतमार्थं च गुणजातं श्रुत्यर्थाभ्यां संनिहितत्वाविशेषात् कौषीतकिगतेनैव
शब्देनैव परामृश्यत इत्याह॥ तथापीति॥ कौषीतकिश्रुतिस्थः प्राणो वसिष्ठत्वादिगुणकः श्रेष्ठप्राणत्वाद्वाजिश्रुति
स्थप्राणवदिति श्रुतगुणानुमाने सति श्रुतहानिर्नास्ति विरोधादि स्तुत्यं तस्य पश्यति॥ नन्वेवं सतीति॥ गुणिना गुणाः
श्रुता एवेत्यत्र दृष्टांतमाह॥ नहीति॥ फलितमाह तस्मादिति॥ आनंदादयः प्रधानस्य॥ ब्राह्मणो ज्ञेयस्ये क्वचित्
विशेषत्वाच्च संशयमाह॥ तेषु संशय इति॥ पूर्वपक्षे सत्यादिपदानुपसंहारादावाप्यर्थानवधारणं सिद्धांते स्व

श्रुतौ
क्
३०

समानाधिकरणान्यानंदादिपदानि स्वार्थानामानंदत्वादीनां परस्परं विरुद्धानां तेष्वेकस्य योर्थ्यार्थत्वायोगात् तूनान स्यच व्यांस्यक्त
पारस्परूतानामानंदादिपदार्थानां परस्परैक्यस्यवास्यार्थस्याविरुद्धत्वादानंदत्वाद्यधिष्ठानभूतां अखंडां व्यक्तिं लक्षयंतीत्यर्थः = ५

व्यारणामिति कलें ॥ प्राणस्य सविशेषत्वाधिकृतः शाखांतरीयवलिष्ठत्वाद्युपसंहारः ब्रह्मणस्तु निर्विशेषत्वात् स्वरा
ख्वागतपदैरेव प्रमितिसिद्धेर्व्यर्थः पदांतरोपसंहार इति प्रत्युदाहरणेन पूर्वपक्षः सिद्धांतमाह ॥ इदमिति ।
आनंदत्वसत्यत्वज्ञानत्वादिसामान्यानि ब्रह्मणि कल्पितो धर्मास्तेषां सर्वशाखासूपसंहारो नाम तद्वा
चकानंदादिपदानामेकवाक्यत्वं तयोश्चारणमानंदः सत्यं ज्ञानमनंतं ब्रह्म शुद्धमद्वयमात्मेति तानि च समा
नाधिकरणानि पदानि विरुद्धधर्मत्यागेन सर्वाधिष्ठानेकतामेकामखंडव्यक्तिं लक्षयंतीति ॥ न चैकेनैव पदे
न तल्लक्ष्यसिद्धेः पदांतरं व्यर्थमिति [illegible] वाच्यं ॥ एकस्मिन्पदे विरोधाभावेन लक्षणानवतारात् द्वित्रिपदद्वयोर्वि
लक्षणावत्तरतिति तथाप्यानंदो ब्रह्मेत्युक्ते दुःखत्वात्यंतं भ्रांतिनिरासेपि सत्त्वजडत्वादि भ्रमो भवेदतस्त
न्निरासार्थं सत्यज्ञानादिपदानि प्रयोक्तव्यानि ॥ न च भ्रमस्यानवधित्वादाकाशमपर्यवसितं स्यादिति वाच्यं सवि
दानंदात्मकं सर्वधर्मशून्यमद्वयमविकल्पं ब्रह्मास्मीति विशेषदर्शिने सर्वभ्रमनिरासात् ॥ तच्चाविशेषदर्शने
यावद्भिः पदैर्भवति तावंति पदान्युपसंहर्तव्यानीति भावः ॥ ब्रह्मैकरूपत्वेदानंदत्वादिधर्माणां सर्वत्र प्राप्तिस
हि सगुणब्रह्मविद्यागतधर्माणामपि स्यादिति शंकानिरासार्थं सूत्रं व्याचष्टे ॥ प्रियेति ॥ पुत्रदर्शनसुखं प्र
दि यं ॥ तल्लाभे मोदस्तस्य विद्याधातिशये प्रमोद इत्येवं तारतम्यवंतो धर्मा अद्वयत्वेन प्राप्नुवंति तेषामब्रह्म
रूपाणां ब्रह्मज्ञानानुपयोगादिति भावः ॥ तेषां ब्रह्मत्वे धर्मत्वं चासिद्धमित्याह ॥ न चैतदिति ॥ ब्रह्मणि चित्तावताने
पाये सति तेषां प्राप्तिः स्यादित्याशंक्याह ॥ एवमपीति ॥ अज्ञेयत्वादेषां न ज्ञेयब्रह्मणि प्राप्तिरित्यर्थः ॥ किमर्थं तर्हि

सूत्रमिममवतारयन्नाह॥ ब्रह्मधर्माणामिति क्रत्वाचिंताफलमाह॥ सर्वेति॥ सेयेबाह्यधर्माणामनुपयोगादप्राप्तिरितिन्या
यात्तं यदामत्वादीनामप्राप्तिरिति सूत्रं व्याख्येयमित्यर्थः॥ ज्ञानानुपयोगेपि ध्याने तेषां धर्माणामुपयोगादुपा
स्य ब्रह्मैक्यात्सर्वास्वन्योन्यविद्यासु स्यादिसाधंक्यात्॥ तेषु हीति॥ ध्यानविधिपरतंत्राणां धर्माणां यथाविधिव्यव
स्थेत्यर्थः॥ संपद्धामत्वादिधर्मेभ्य आनंदादीनां वैषम्यं ज्ञानोपयोगित्वादित्याह॥ इतरे त्विति॥ सत्यज्ञानानंदा
त्मब्रह्मशब्दाः पंचलक्षणत्रापसंहर्तव्या इति सिद्धं॥ आध्यानाय॥ वाक्यभेदाभेदानवधारणात्संशयमाह॥ तत्रेति
पूर्वपक्षे वाक्यभेदाद्विद्याभेदः सिद्धांते वाक्यैक्याद्विद्यैक्यमिति फलं॥ पूर्वत्र ब्रह्मस्वरूपाणामानंदादीनामुपसंहार्य
णां ब्रह्मज्ञानफलोपायत्वमुक्तमत्र तु ब्रह्मस्वभावस्यार्थादिपरत्वस्यानुपसंहार्यत्यनदुपायत्वमुच्यत इत्येकफ
लकत्वं संगतिः॥ तत्र सर्वत्वे विशिष्टत्वेनार्थादीनां पूर्वतया प्रतिपाद्यानां भेदाद्वाक्यभेदो न दोष इति पूर्वपक्षः॥
उत्तरसूत्रे सिद्धांतप्रतिज्ञामात्रं हेतुं व्याचष्टे॥ पुरुष एवेति॥ फलवत्वे सत्यपूर्वत्वात्पुरुष एवैकवाक्येन प्रतिपाद्य स
मफलार्थादीनां परत्वं तु तत्परत्वेनोच्यत इत्यर्थः॥ किं च पुरुषात्परं किंचित्सा काष्ठेति वेदः परनिषेधलिंगेन
सर्वबाधावधित्वलिंगेन च पुरुषैकतात्पर्यदर्शनात्पूर्वस्मात्सर्वस्मादपरस्यापरस्य परत्वोक्तिस्तदर्थेति द्रष्टव्यमि
त्याह॥ अपि चेति॥ आध्यानाय नाम त्र्यो॥ क्रि॥ ध्यानायेत्यत्र ध्यानपूर्वकं पुरुषदर्शनायैव स्वश्रुतिः प्रयोजना
भावादिति सूत्रं योजयति॥ आध्यानायेति॥ आत्मत्वादिलिंगैश्च पुरुष एव प्रतिपाद्य इत्याह॥ आत्मशब्दाच्चे
ति॥ किं च तद्विष्णोः परमं पदं पुरुषान्न परं किंचिदिति रूपक्रमोपसंहारयोरेकरूप्यात्कूटस्थफलवदेकपुरु
षपरत्वेनैकवाक्यत्वनिश्चये सति वाक्यभेदफलभेदकल्पनानयुक्ता गौरवादित्याह॥ अपि चेति॥

धना
व
६५

आत्मगृहीतिः॥ मीथच्छब्दात्॥ लोकानाह॥ अंभ इति॥ अंभः स्वर्गः मरीचयोंतरिक्षलोकः मरो मर्त्यलोकः आपः पा
तललोकः रसार्थः॥ आत्मशब्दस्य ब्रह्मणि सूत्रात्मनि च प्रयोगात्संशयमाह॥ तत्रेति॥ अत्र पूर्वपक्षेणाव्यस्य सू
त्रोपात्तिपरत्वात्परब्रह्मधर्माणामानंदादीनामैतरेयकेऽनुपसंहारः सिद्धांते ब्रह्मपरत्वादुपसंहार इति
कल्पे पुरुषवाक्याद्भेदप्रसंगाद्धीदिनाम्यानां नाधीदप्रतिपादकत्वमित्यर्थक्तेन तदादेहापि प्रजापते रेतो देवा
इति पूर्वस्मात्प्रजापतिवाक्याद्भेदप्रसंगादात्मा वा इदमित्यादिवाक्यस्य न ब्रह्मपरत्वमिति दृष्टांतेन पूर्वप
क्षयति॥ न परमात्मेत्यादिना॥ वाक्यस्य प्रजापतौ तात्पर्यदर्शनादित्यर्थः॥ पूर्वपक्षमाक्षिप्य लोकसृ
ष्टिलिंगात्प्रजापतौ वाक्यान्वय इत्याह॥ नन्वित्यादिना॥ लोका एव महाभूतानीत्यत आह॥ लोकाश्चेति॥ लो
कशब्दस्य भूतार्थे त्वेषु रूढत्वाद्भौतिका एव लोकाः निर्वचनाच्चेत्याह॥ तथा चेति॥ अंभो मरीचीर्मरमाप इति स्र
मित्यादि स्वयमेव श्रुतिर्व्याचष्टे॥ परेण दिवं दिवः परस्ताद्द्यौः प्रतिष्ठेत्यंभः सोऽन्तरिक्षं योऽलोकस्तदंभो तारक्षं मरीच
यः पृथिवी मरो या अधस्तात्ता आप इति॥ ननु लोकसृष्टिरपीश्वरादस्तु नेत्याह लोकेति पुरुषविधो नराकार आ
त्मा हिरण्यगर्भः आपिपीलिकाभ्यः सर्वमसृजत इत्यर्थः श्रुतानां लोकानामित्यर्थः॥ प्रकरणादपि लोकस्र
ष्टा प्रजापतिरित्याह॥ एतरेयिणोपीति॥ रेतः कार्यमिति यावत्॥ ब्रह्मलिंगानि प्रजापतौ योजयति॥
आत्मशब्दोपीत्यादिना॥ किंच प्रजाः सृष्ट्वा ताः प्रति गोगार्थं गामानयल्लोकस्रष्टा तथाश्वमानयत्तास्त
ुः प्रजापतिस्त्वे लिंगमित्याह॥ अपि चेति॥ आत्मशब्दस्य चिदात्मनि मुख्यत्वान्मुख्यग्रहे बाधकाभावा

सा०प्र०भा० टि०रा०

33

दृतरस्येक्षणादेरनुकूलत्वात्परमात्मग्रहणमिति सिद्धांतयति॥ एवं प्राप्त इति॥ महाभूतस्य च पूर्वकं लोका
नसृजतेति व्याख्येयमिति भावः॥ पूर्वपक्षबीजमनूद्य दूषयति॥ अन्वयादिति॥ आत्मा वा इदमेक एवा
ग्र आसीत् प्रज्ञानं ब्रह्मेति चोपक्रमोपसंहारस्थात्मब्रह्मश्रुतिभ्यामेकत्वावधारणप्रवेशादिलिंगैश्च
लोकस्य सृष्ट्यादिलिंगबाध्येन परब्रह्मग्राह्यमिति भावः॥ स पर[illegible]मेश्वर एतमेव सीमानं मूर्ध्नः केशवि
भागावसानं विदार्य छिद्रं कृत्वा तया ब्रह्मरंध्राख्यया द्वारा लिंगविशिष्टः प्रविष्टवानित्यर्थः॥ मां विना
यादृशा गादिभिः स्वस्वव्यापारः कृतः अथ तदाहं क इति स्वपदार्थं विचार्य स्वयमेव तमेव ज्ञा[illegible]धि
तमात्मानं ब्रह्म तततमं व्यं सैतममपश्यत् तरा कारलोपः छांदसः प्रज्ञानं चिदात्मा नेत्रं नीयते नेने
ति नियामकं यस्य तत्तस्य तन्नेत्रं चिदात्मनि प्रत्यनित्यर्थः उक्तव्याख्याने गुणोपसंहारस्यास्फुटत्वा
त्र पादसंगतिरिति मत्वैव व्याख्यांतरमाह॥ अपरेति॥ उदर्कः उपसंहारः सृष्टस्यानात्मसाधा
रण्यात्संज्ञायमाह॥ तत्रेति॥ पूर्वपक्षे सत्त्वात्सामान्येन आत्मसंपदुपास्तिः धांदोग्ये वाजिश्रुतेनिर्गु
णविधेति भेदा+क्रियो गुणानुपसंहारः सिद्धांते तूपपत्रनिर्गुणविधेः स्यादुपसंहार इति फलभेदः पदानं
ज्ञातो शक्ति ग्रहात्सृष्टोपि सत्ताजातिवाचीश्रुपक्रमस्यानिश्चितार्थत्वादसंजाताविरोध्युपक्रमबलेन
तादात्म्यापदेशः संपत्तिपरतया नेय इति पूर्वपक्षे निष्कर्षः॥ सर्वत्र वा कौ क्वाद यादिपरत्वैं संभाविधेयमुक्तं॥

स०व्या० टी०

२

33

त्र

इह। तु सदात्मशब्दाभ्यां जासालवाच्यार्थमुपक्रमभेदाद्वाक्यभेदे सतिविद्याभेद इति प्रत्युदाहरणसंगतिः। न चात्म
शब्दो जातिवाचकः आत्मव्यक्तेरेकस्याज्ञातस्त्वभावात्किं तु सर्वान्तरवस्तुवाचकः कल्पितजातिवाचित्वेऽप्युपक्रम
भेदः स्फुट एव सत्तात्मत्वयोर्भेदादिति मंतव्यं॥ सिद्धां। तयेति तथोक्तसादिना॥ उपक्रमान्वयादिरूपक्रमाधीन
त्वादुपसंहारस्येत्यर्थः॥ तत्रावधारणं सदेनात्मशब्दहीनोत्तसांयुज्यत इत्याह॥ तत्रेति॥ सदेवमेवेत्यवधा
रणं॥ अनेन जीवेनात्मनेति सदेवताकर्तृकोजीवस्यात्मशब्देन परामर्शः॥ सुप्तो जीवः सता संपन्नो भवती
ति कथनं स्वयं एवमात्मगवान्विलापयत्विति परिचोदनात् सदिति पदेन सत्ताश्रय उच्यते न जातिमात्रं क
र्तृवाचित्वं तस्यायोगात्॥ तथा चोपक्रमे सत्ताश्रयसामान्योक्तौ आश्रयरसाकांक्षायां वाक्यशेषादात्मेति निश्चय
इत्याह॥ न चेति॥ सामान्याश्रयस्यात्मनात्मसाधारण्यमुपेत्योक्तं तदपि नास्त्याकाशपदवत्सदस्य व्यक्तिवाचित्वाद्व्यक्ति
श्च बाधायोग्याच्चिदात्मैवेति न वाजिछांदोग्ययोरुपक्रमवैषम्यमित्याह॥ सच्छब्देति॥ वैषम्यमुपेत्याप्याह॥ आम्ना
नेति॥ वाजिवाक्ये त्वमर्थस्य तदर्थपर्यंतस्य तत्त्वस्य प्रतिपादनं छांदोग्ये त्वेतु तदर्थस्य त्वमर्थपर्यंतस्य प्रतिपा
दनमिति प्रकारभेदेऽपि वाक्यार्थैक्यादैक्यमिति फलितमाह॥ तस्मादिति॥ कार्याख्यानादपूर्वं॥ भे किमन्नं किं वा
सः इति प्राणेन पृष्टा वागादयः श्वचक्रदिदं किंचित्प्राणिजातमाकृमिभ्यस्तेनान्नमापो वास इति सर्वप्राणिकं पुस्तमान्नं
यदिदं मनुष्याद्युपशुभ्यादिपर्यन्तमन्नं तत्प्राणस्य तवान्नं आपः आच्छादनमित्युपासके न चिंतनीयमित्यर्थः॥ शारवाद्वयेप्यवि
शेषश्रुतिमुक्ताविशेषश्रुतिभेदमाह॥ अनंतरं चेति॥ तस्मादपां प्राणवस्त्रत्वादशिष्यंतोऽशनं कुर्वतः श्रोत्रियाः एतत्कुर्वंति

त्र २

410

स्मा॰भा॰टि॰ र॰
३४

र॰ प्या॰ त॰

किं तद्भोजने पूर्वमूर्ध्वं चाचमंतीति यत्तु तदद्भिः प्राणं परिदधत्याच्छादयंतीत्यर्थः॥ पूर्वोत्तराचमनीयसंबंधिनीष्वप्सु
प्राणवासस्त्वचिंतनरूपमनग्नताध्यानं कार्यमिति भावः। तत्तस्मादित्यस्यार्थः। यतः एवं विद्वांसोऽशनास्याग्रे ऊर्ध्वं चाचामंत एव
मेवान्नप्राणं तत्तेनाचमनेनानग्नमाच्छादितं कुर्वंतो मन्यंते खिन्नयंति तस्मादेवं विदितार्थीन्नोऽप्युपासनं एवं कुर्यादिति वा
जिकृत्यर्थः॥ अत्रोभयोरप्यपूर्वत्वात्संशयमाह॥ तत्किमिति॥ संदिग्धत्वदुपक्रमस्य वाक्यशेषान्निर्णयं वदाचाम
तीति पदस्य बिल्वसंदेहे आचामेदिति वाक्यशेषाद्विधित्वनिर्णय इति दृष्टांगत्वात्पूर्वपक्षमाह॥ किं तावदिति॥
लानसोनोपासनांगविधिविचारात्पादसंगतिर्बोध्या पूर्वपक्षे प्राणविद्यांगत्वेनापूर्वाचमनविहितमन्यत्रोपसं
हर्तव्यमिति फलं सिद्धांते तस्य विधेयत्वाभावांगत्वेनोपसंहार इति विवेकः उभयविधाने वाक्यभेदः स्यादित्यरुच्याप
क्षांतरमाह॥ अथवेति॥ प्रशस्तं हीदमाचमनं यस्मादनेन प्राणमनग्नं मन्यंत इति स्तुतिः॥ प्रसिद्धानुवादेनाप्रसिद्धं वि
धेयमिति न्यायेन सिद्धांतयति॥ एवमिति॥ प्रयतस्य प्रयतत्वं तत्रो भावः प्रयतः शुद्धिमत्वाद्दीमित्यर्थः॥ स्मृत्या शुद्ध्यर्थं
कार्यत्वेनाविहितस्य कर्तृकर्मांगतया प्राप्ताचमनानुवादेनापूर्वमनग्नताध्यानमेव विधीयत इति सूत्रार्थः॥
स्मार्तमाचमनं श्रुत्यानानूद्यते किंत्वनया श्रुत्या विहितं स्मृत्यानूद्यत इति शंकते॥ नन्विति॥ श्रुतिस्मृत्योरनयोर्न
मूलमूलिभावः भिन्नविषयत्वादिति परिहरति॥ नेति॥ छिन्नोनिसमुपस्पृशेदित्याद्याः स्मृतयः॥ आचम
नांतरविधिमुपेत्य मूलमूलित्वं निरस्तं॥ संप्रति विधिरसिद्ध इत्याह॥ ॥ न चेयं श्रुतिरिति॥ अत
एवेति॥ आचमनविध्यभावादेवेत्यर्थः॥ अप्सु प्राणवासस्त्वध्यानाख्यः संकल्पः प्राणविद्यांगत्वेनावि

धि
च

तसं

र

रु॰ धे॰
३४

धीयत इत्याह॥ तस्मादिति॥ स्वयं चेति अपूर्वत्वादित्यर्थः॥ शुध्यर्थं विनियुक्तस्याचमनस्य प्राणाच्छादनार्थत्वं विरुद्धमित्याशंक्याह॥ न चैवं सतीति॥ आचमनस्याच्छादनार्थमसिद्धमित्यर्थः॥ किं च यथा पूर्ववाक्ये प्राणस्यान्नध्यानमंगं विहितं तथात्राप्युवासो ध्यानं विधीयते॥ अन्यथाचमनविधौ पूर्वत्र ध्यानविधिरुत्तरत्र क्रियाविधिरित्यर्द्धवैरूप्यं स्यादित्याह॥ अपि चेति॥ भक्षयेदिति न्यायाभावाच्छादनस्य सर्वस्य मनुष्येणोपासकेन भोक्तुमशक्यत्वाच्चेन पूर्ववाक्ये क्रियाविधिरित्यर्थः॥ इतश्चाचमनमत्र न विधेयमित्याह॥ अपि चेति॥ अनग्नमन्यं न इत्यत्र वासस्त्वध्यानमपि न विधेयं दोषसाम्यादिति शंकते॥ नन्विति॥ उभयोरप्यनुवादत्वे वैफल्यादवश्यमेकानुवादेनैकं विधेयं तच्च विधेयं वासो ध्यानमेव वासः कार्यस्यानग्नत्वस्याख्यानादपूर्वत्वाच्चेति समाधानार्थः॥ पूर्ववादितिस्म्पत्याप्राप्तमित्यर्थः॥ आचामेदिति न विधिः किंतु विष्णुरुपांशुयष्टव्य इतिवदनुवाद इत्यत्र लिंगमाह॥ अत एवेति॥ तस्मादेवंविद शिष्यन्नाचामेदशित्वाचाचामेदिति वाक्यस्याविधित्वे काण्वैरपठनं लिंगमित्यर्थः॥ तर्हि पाठबलान्माध्यंदिने आचमनविधिः काण्वे ध्यानविधिरिति कस्यचिन्मतं निराकरोति॥ यापीति॥ समानएवं चाभेदात्॥ ॥ शांडिल्यनदृष्टान्त्वात्मान्नाकिता॥ अंतर्हृदये व्रीह्यादिवत्सूक्ष्मोस्ति इतीत्यर्थः॥ अभ्यासप्रत्यभिज्ञानाभ्यासं न्यायमाह॥ तत्रेति॥ गुणानुपसंहारोपसंहारोपपक्षयोः फलं पूर्वत्र प्राप्ताचमनानुवादेनानग्नताध्यानविधिरुक्तः॥ एकत्वेव शाखायां विप्रकृष्टदेशस्थवाक्ययोरेकस्य विधित्वमन्यस्यानुवादत्वमित्युक्तं नयाद्वयोरपि विधाविधित्वमिति प्रसंगादाह॥ एणेन पूर्वपक्षयति॥ कि तावदिति॥ पत्युयस्पुनरुक्तं तद्द्वियातरमितिनव्याप्तिः प्राणपंचाग्न्यादिविद्यासु व्यभिचारादिसानुक्यशाखाभेदपुनरुक्तिरसिद्धेत्युक्तमित्याह॥ भिन्नास्विति॥ यथा-

त्रा

ग्निहोत्रवाक्ये कर्मविधिर्दध्ना जुहोतीति वाक्ये गुणविधिस्तथाऽऽरण्यस्थानविधाभेद इत्याशंक्याह॥ नच्चा
त्रैकमिति॥ उक्तगुणानां पुनरुक्तिर्वृथा स्यादतो ध्यासादिद्वारा भेदः प्रयाजभेदवदिति भाव॥ उक्तगुणोक्तिर्नैवथा
कतिपयगुणविशिष्टोपास्याभेदप्रत्यभिज्ञानार्थत्वात् तदुपास्यरूपाभेदाद्विन्ननुणस्वास्विवसमानन्त्रा
ख्यायामपि विधैक्यमिति सिद्धान्तसूत्रं योजयति॥ पधेति॥ सोऽत्रश्च कारोऽप्यर्थो व्याख्यातः॥ यत्र बहवो गुणाः
श्रुतास्तत्र प्रधानविधिरन्यत्र तदनुवादेन गुणविधिरिति निश्चयादग्निरहस्ये प्रधानविधिरुक्तस्तत्र गुण
विधिरिति भावः॥ ॥संबन्धादेवमन्यत्रापि॥ स्याद् तद्यत्सद्वाक्यान्मात्मकं सत्यं परोक्षमूर्त्तात्मकं हिरण्यग
र्भाख्यं ब्रह्मोपक्रम्य तदुक्तं यत्तत्सत्यं स यो सावादित्यः॥ वि मंडले॥ न॥ तत्रस्थाने पुरुषः करणात्मकः सत्वा
ध्यात्ममक्षिस्थानस्थ इत्युपदिश्य तस्य भूरिति शिरो भुव इति बाहू स्वरिति पादाविति व्याहृतिरूपशरीर
मुक्त्वा द्वे उपनिषदौ रहस्यदेवतानामनी उपदिष्टे तस्यादित्यमंडलेस्थस्याहरिति नाम प्रकाशकत्वात्
तस्याक्षिस्थस्याहमिति नाम प्रत्यक्त्वादिति। इदं नामद्वयं विषयस्तत्र नामिनः सत्याख्यस्य ब्रह्मण एकत्वात्स्थान
भेदोक्तेश्च संशयमाह॥ तत्रेति॥ पूर्वपक्षे प्रतिस्थानं नामद्वयोपसंहारः सिद्धान्ते यथाश्रुत्येकैक नामानुष्ठा
नमिति फलं। दृष्टान्तसंगत्या पूर्वपक्षसूत्रं व्याचष्टे॥ पधेति॥ यथा विद्यैक्यादुपसंहार उक्तः॥ एवम
न्यत्रापि विद्यैक्ये नियामुपसंहारो भवितुमर्हतीत्यर्थः॥ संबन्धे ब्रह्मरूप कमाभेदस्तावता वक्ष्यादित्यपुरुषा
वन्योन्यस्मिन्प्रतिष्ठितावादित्यरश्मीनां च क्षुषि च क्षुषश्चादित्ये प्रतिष्ठानादिति व्यतिषक्तपाठोऽभिथः सं

३
तु
३०

५ भेदेन विशिष्टपूरुषभेदात् नामव्यवस्थामाह । नान्विसादिना ॥ विशिष्टसंबंधे दृष्टान्तमाह । अस्तीति । प्रति दृष्टान्तस्य स्वरूपसंबंधि
दृष्ट्येव प्रकृते दृष्टान्तत्वं नास्तीत्याह । नामेति । इत्युक्तनामव्यवस्था या मतिदेशो । लिंगमित्याह । दर्शयति चेति । विद्यैक्यादेवोपसंहारसि

श्लेषमाहस्तां विद्यैक्यसिद्धिः । विद्यैक्येपि किं स्यात्तत्राह ॥ कथमिति ॥ विद्यैक्येपि स्थान भेदादुपनिषदोरसंकरः
स्यादिसाशंकां दृष्टान्तेन परिहरति ॥ योकीति ॥ नाम्यैक्ये नामसंकरो युक्तस्तथा चाक्षिस्थो हरिरिति नाम वा न स
स्य ब्रह्मत्वादादित्यस्थश्च वदितिप्राप्ते सिद्धान्तसूत्रं योजयति ॥ नवेति ॥ नाम्नोरूपासनस्थानविशिष्टसंबंधि
त्वादित्यर्थः ॥ तस्यापनिषदहरहमिति चवाक्यद्वयेनतच्छब्दपराम्रष्टयोः सन्निहितस्थानविशिष्टयोः पुरु
षयोर्नामसंबंधपरेणोपसंहारानुमानबाध्यमिति भावः ॥ विशेष्यैक्यान्नामसंकरइत्याशंक्यस्थानभे
देनोक्तगुणानां विनातिदेशामनुपसंहार इति सिद्धं ॥ ॥ संभृतिद्युव्याप्त्यपिचातः ॥ ॥ ब्रह्मैव ज्येष्ठकारणं
येषां तानि ब्रह्मज्येष्ठानि निलोपः छांदसः । वीर्याणि पराक्रमविशेषा आकाशोत्पादनादयः तानि च वीर्याणि संभृ
तानि निर्विघ्नं सम्भृतानि सर्वं नियंतुः कार्येनिघ्नकर्तुरसत्त्वात्तच्च ज्येष्ठं ब्रह्माग्रेदनाद्युसतेः मागे वदिवं स्वर्गं
माततान ॥ व्याप्तवत्सदा सर्वव्यापकमित्यर्थः ॥ सर्वमाप्यमस्यस्पर्द्धा नर्हत्यमिति वा क्यन्नोक्त स्थागुणाः प्रभृति
पदग्राह्याः । खिले श्रुति विधिनिषेधशून्यवाक्येष्वित्यर्थः ॥ ब्रह्मसंबंधादि द्याभेदभानाद्व संशयमाह ॥
तास्विति ॥ अनारभ्याधीतब्रह्मविभूतीनां ब्रह्मसंबंधेन सर्वब्रह्मविद्यासु प्रत्यभिज्ञानादुपसंहार इति पू
र्वपक्षः ॥ सिद्धान्तमाह संभृतीति ॥ संभृतिश्च द्युव्याप्तिश्च संभृतिद्युव्याप्ती । तदपि सर्वत्र नोपसंहर्तव्यमुपनि
षदोरिवव्यवस्थायकविशेषयोगादिति सूत्रयोजना ॥ आध्यात्मिकापतनविशेषयुक्तविद्यास्वाधिदैविकवि
भूतीनां प्रत्यभिज्ञानेऽत्यभावान्नव्याप्तिरित्युक्तेहेतुं शंकते ॥ नन्वेतास्विति ॥ अपि ⬛ दैविकत्वसाम्यादाध्या
त्मिकायतनहीनत्वसाम्याद्वातत्तद्विद्यासु संभृत्यादीनां प्राप्तिरिति शंकार्थः । उक्तहेतुद्वयन गुण ⬛ प्रापकमा

°कोदात् नाम्नोर्व्यवस्थानात् संभृत्यादिगुणविशिष्टस्य ब्रह्मणः शांडिल्यादिविद्योक्तगुणविशिष्ट ३

त॰ध्या

पिदैविकविद्यानां तुल्यदहरादीनामायतनहीनविद्यानां च मिथो गुणसांकर्यप्रसंगात्तस्मात्कतिपयसमा
नगुणविशिष्टोपास्यरूपैक्यं विद्यैक्यमावहद्गुणप्राप्तिहेतुस्तदभावे न प्राप्तिरिति परिहरति॥ सत्यमित्या
दिना॥ एवं नविशिष्टं ब्रह्मणश्च मिथो भेदे न रूपभेदात् संभृत्यादीनां नोपसंहार इत्युक्तन्यायालिंदे
नृत्यादस्य न संगत्याद्यपेक्षाय एकस्मिन्नुद्गीथे परोवरीयस्त्वादिगुणोपास्तेर्हिरण्यश्मश्रुत्वादुपास्ति
र्भिद्यते तथैकस्मिन्नपि ब्रह्मणि विद्याभेदोपपत्ते ब्रह्मस्वरूपाभिज्ञान गुणप्राप्ति विकेत्याह॥ परोवरीयस्त्वा
दिवदिति॥ तस्मात्संभृत्यादिगुणविशिष्टविद्यांतरविधिमिति प्रसिद्धं॥ ॥पुरुषविद्यायां॥ छांदोग्यस्थं
विद्यामाह॥ अस्तीति॥ पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनमथ यानि चतुश्चत्वा
रिंशद्वर्षाणि। तन्माध्यंदिनं सवनमथ यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयं सवनमिति प्रसिद्धपुरुषसाम्या
र्ध्वं सवनत्रयं कल्पितं॥ स यदशिशिषति यत्पिपासति यन्न रमते ता दीक्षा अथ यत्तपोदानादि सा दक्षिणा
मरणमेवावभृथः वस्वादिरूपा मे प्राणा इदं सवनत्रयं यावदायुरनुसंतनुते साशीः अक्षितमस्यच्युतमसि
प्राणसंशितमसीति मंत्रत्रयप्रयोगः षोडशाधिकशतवर्षजीवित्वफलमित्युदितं॥ संनूर्यार्थं
शाखांतरीयपुरुषविद्यामाह॥ तैत्तिरीयकाइति॥ अत्र विदुषो यज्ञस्येति षष्ठ्याः सामानाधिकरण्यवैयधिकरण्या
निश्चयासंनूयमाह॥ तत्रेति॥ उपसंहारानुपसंहारावेव फलं पूर्वत्रासाधारणगुणस्य भिन्नानाभावात्
संभृत्याद्यो विद्याभेद उक्तः इह तु साधारणमरणावभृथगुणविशिष्टपुरुषयज्ञरूपैक्यप्रसक्ते भिन्नानाथ
दिधैस्यमिति लिंगस्य दाह॥ पूर्णेन प्राप्ते सिद्धांतयति॥ नोपसंहर्तव्या इति॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमा
नः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शर

१ अथ यदश्नाति यत्पिबति यद्रमते तदुपसदः॥ अथ यद्ध

मयितादक्षिणावामेध्यातास्राणउद्गाता चक्षुरध्वर्युर्मनोब्रह्मेतिवहुनरधर्मवैलक्षण्यान्नस्तैक्यप्रत्यभिज्ञेत्यर्थः॥
वेदःकुरुमुष्टिःनूमयितादमोदक्षिणेत्यन्वयः॥ किंच छांदोग्यत्रिधाविभक्तायुषिसवनत्वकल्पनाऽत्रतु सायं
कालादावितिवैरूप्यमाह॥ यदपीति॥ यन्मरणंतदवभृथायद्भमतेतदुपसद इतितित्तिरिश्रुतौसारूप्यमपिभा
तीत्यतआह॥ यदपिकिंचिदिति॥ गत्वाष्ठ्योश्वतुष्ट्वाल्वसारूप्यवदिदसारूप्यंनैक्यप्रयोजकमित्यर्थः॥ किंचघ्रा
दोगेपुरुषयज्ञयोरैक्यंस्यात्तेऽत्रतुभेदइतिवैरूप्यांतरमाह॥ नचेति॥ यद्यपि निषादस्थपतिन्यायेन सामाना
धिकरण्यंषष्ठ्यायुक्तं तथाप्यप्रसिद्धैक्यकल्पनागौरवा यज्ञस्यात्मेतिभेदोत्तरेकस्यैवयज्ञत्वयजमानत्ववि
रोधादात्मविदोयाज्ञःप्रसिद्धस्तस्येतिवैयधिकरण्यमेवयुक्तं॥ किंचविदुसंबधियज्ञरूपविनूष्यानुवा
देनविद्वदंगैरंगसंपद्विधानेकवाक्यताप्रतीयतेतस्यासत्यांविनूष्यस्यांगानांचपृथग्विधिनादिनस्तवावाक्य
भेददोषःस्यादित्यर्थः॥ किंचसत्यादिष्वोन्यासएवात्यरेच्च यदितिसंन्यासमुक्त्वा सवेस्वर्वमिदंजगदित्येवंत
मात्मानंज्ञात्वाभयोनमस्समुपयातिविद्वानिति संन्यासमुक्त्वा सा ध्यात्मविद्यापुरस्तात्प्राजापत्या
नुवाके उपदिस्यानंतरानुवाके नस्यैवंविदुषइत्यस्य आत्मविद्यानुवादेनमन्त्रांसार्थत्वेनतच्छेषतयायज्ञ
सपत्तिःक्रियतेफलेक्यश्चनःछंदोगानांतुस्वतंत्रविद्याविधिरित्याह॥ अपिचससंन्यासामिति॥ च्छितांफल
माह॥ तस्मादिति॥ ॥ वेधाद्यर्थभेदात्॥ ॥ देवतामभिचारकर्त्ताप्रार्थयते॥ सर्वमिति॥ हे देवते मद्रिपोःसर्वमं
गंप्रविध्यविदारयविशेषतश्चहृदयंभिंधिमनीःशिराःप्रवृंजन्नाशयन्निरश्वाभितोनानूयएवंत्रिधाविप्रक्तो

विभ्रिष्टो भवतु मे मा त्रुटिरित्यर्थः ॥ हे देव सवितः यज्ञं तस्य तनिं च प्रसुव निर्वर्तयेत्यर्थः ॥ उक्थैः श्रवाश्वेनो भोयस्येंद्रस्य
सख्यं हरितमणिव । नीलोसीत्यर्थः ॥ नोऽस्माकं मूं सुखं भूरो भवत्वित्यर्थः ॥ अग्निष्टोमो ब्रह्मैव स्वयस्मिन्नहनि
क्रियते तदपि ब्रह्म तस्माद्य एतद्देहः साध्यं कर्मोपयंत्यनुतिष्ठंति तद्ब्रह्मणैव साधनेन ब्रह्मोपयंतितेच क्रमेणा
मृतत्वमाप्नुवंतीति योजना मंत्रादिषु तत्तदुपनिषद्विद्याशेषत्वे प्रमाणभावाभावाभ्यां संशयमाह ॥ कि
मिति ॥ फलं पूर्ववत् ॥ ननु तेषां शेषत्वे मानाभावान्नोपसंहार इति प्राप्ते ॥ नत्वेषामिति ॥ मंत्रार्थस्य तत्तद्वि
द्याशेषः फलवद्विद्यासन्निहितत्वान्नूनं तैत्तिरीयकगतपुरुषयज्ञवदिति समाधत्ते ॥ बाढमिति ॥ तथा च दृष्टांतसं
गतिः ॥ सिद्धांतिपक्षे सान्निध्यवैयर्थ्यं बाधकमाह ॥ नहीति ॥ अफलमंत्रादीनां फलवच्छेषत्वबोधनं सन्निधेरर्थ
वत्त्वं तत्तस्मिन्नभवेत्तस्य कस्मादर्थशून्यस्मै नासौ सन्निधिराश्रयितुं नहि युक्त इत्यर्थः ॥ नन्वपाठे त्वकस्माद्भवतु वि
नासावर्थो नाश्रयितुं नहि युक्त इत्यर्थः ॥ ननु मंत्राणां विद्यासमवेतार्थप्रकाशनसामर्थ्याभावान्न विद्याशे
षत्वमिति प्राप्ते ॥ नन्विति ॥ पुरस्तादुपसदां प्रवर्ग्येण प्रचरंतीति वाक्येन प्रवर्ग्यस्य क्रतुशेषत्वं श्रुतं अग्नि
ष्टोमादेश्च तत्तद्वाक्येन सर्गाद्यर्थत्वमतो न विद्यार्थत्वमित्याह ॥ कथं चेति ॥ मंत्राणां विद्यासमवेतहृदयनाड्यादि
लिङ्गकानुवाकत्वमस्तीत्याह ॥ नेव इति ॥ उपास्तिषु मंत्रप्रयोगः क्वापि न दृष्ट इत्यत आह ॥ दृष्टश्चेति ॥ पुत्रस्य दीर्घा
युष्ट्वार्थं छांदोग्ये त्रैलोक्यकोशोपास्तिरुक्ता तत्र पितुः स्वयंप्रार्थनामंत्रः तत्रामुनेति पुत्रस्य त्रिर्नाम गृह्णाति
अमुना पुत्रेण सह भूरितीमं लोकमनु च प्रपद्ये ॥ न मे पुत्रवियोगः स्यादित्यर्थः ॥ तत्तद्वाक्येनान्यत्र विनियुक्ता
नामपि कर्मणां सन्निधिना विद्यासु विनियोगो न विरुद्ध इत्यत्र दृष्टांतमाह ॥ वाजपेय इति ॥ ब्रह्मवर्चस

कामो बृहस्पतिसवेन यजेतेति वाक्येन ब्रह्मवर्चसफले विनियुक्तस्यापि बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्प
तिसवेन यजेतेति वाजपेयप्रकरणस्थवाक्येन वाजपेयांगतया विनियोगवदविरोधस्तस्यार्थः ॥ यद्यप्येकेन
वाक्येन प्रकरणांतरस्थबृहस्पतिसवस्य प्रत्यभिज्ञानमंगत्वविधानं च कर्तुमयुक्तं वाक्यभेदप्रसंगादतो मा
साग्निहोत्रवत्कर्मांतरमेव बृहस्पतिसवाख्यमंगतया विधीयत इति न विनियुक्तस्य विनियोग इति मद्गुरु
तंत्रदूषसिद्धं तथापि यथा नित्याग्निहोत्रस्याश्वमेधप्रकरणे वाग्यतस्येतां रात्रिमग्निहोत्रं जुहोतीति तिना मन्त्रा प्रत्य
भिज्ञा यथा वा दर्शपूर्णमासविकृतीष्टौ वाज्यभागौ यजतीत्येकस्मिन्वाक्ये प्रकृतिस्थाज्यभागयोः पदेन प्र
त्यभिज्ञानं वाक्येन विधानं तथात्रापि बृहस्पतिसवपदेन प्रत्यभिज्ञायां वाक्येनांगता विधानं किं न स्यान्न च साध्य
भावार्थविधायकाख्यातपरतंत्रं नाम पदं न सिद्धधर्मप्रत्यभिज्ञाक्षममिति वाच्यं ॥ सिद्धस्याप्यंगतया पुनः साध्य
त्वसंपादनेन यथासिद्धरूपता तस्यैव विधिः स्यादिति वाच्यं दृष्टत्वान्न च पूर्वतंत्रविरोध उत्तरतंत्रस्य प्रसिद्धार्थकत्वा
मपारतंत्र्योपपत्तेर्न चैवं सति कुण्डपायिसत्रेऽयं गत्वेन नित्याग्निहोत्रस्यैव विधिः स्यादिति वाच्यं दृष्टत्वान्न च पूर्वतं
त्रविरोध उत्तरतंत्रस्य बलीयस्त्वात्सर्वतंत्रस्य स्वतंत्रपरतंत्रभावनाभेदे तात्पर्याच्च । तस्मादेकस्यैव बृहस्पति
नामकस्य धात्वर्थस्य ब्रह्मवर्चसे विनियुक्तस्यापि वाजपेयांगतया विनियोग इति भगवत्पादतात्पर्यं ॥ अस्ति
च विनियुक्तस्य विनियोगे सर्वसंमतमुदाहरणं खादिरत्वादिकं तस्य क्रतौ विनियुक्तस्य वीर्यादिफलेऽपि विनियो
गादि तथा मंत्रकर्मणामन्यत्र विनियुक्तानां विधानशेषत्वमिति प्राप्ते सिद्धान्तयति ॥ नैषामित्यादिना ॥ विद्यासुहृदया
दिसंबंधेऽपि नैधाध्यर्थानाम संबंधात्स्तुतमंत्रार्थानाम अभिचारादिसंबंधलिंगेन सन्निधेर्बलीयसा अभिन्वा

रादावेव मंत्राणां विनियोग इत्यर्थः ॥ देवस्य त्वा सवितुः प्रसुव इति प्रदक्षिणतोऽग्निं पर्युक्षेदिति वाक्यादग्निपर्युक्षणे सावि
त्रं जुहोति कर्मणः पुरस्तात् सवने सवने जुहोतीति वाक्याद्वाजपेये च कर्मविशेषसंबंधोऽस्य मंत्रस्येत्यर्थः ॥ तद्विशेष
ति ॥ उक्तं न्यायं भवेत्तावद्यद्यसौ दिश्यतीति दिशति ॥ एवमन्येष्वपीति ॥ प्रमाणांतरं प्रकरणादिकं ॥ ननु लिंगादिभिरन्य
त्र विनियुक्तानामपि सन्निधिना विद्यास्वपि विनियोगोऽस्तु विशेषादित्युक्ते तत्राह ॥ दुर्बलो हीति ॥ समवाय
समानविषयत्वे न द्वयोर्विरोधे परस्य दौर्बल्यं ॥ कुतः अर्थविप्रकर्षात् स्वार्थबोधे न परस्य पूर्वव्यवधानेन प्रव
त्तेरित्यर्थः ॥ अयमाशयः ॥ एकत्र विनियुक्तस्य निराकांक्षत्वादन्यत्र विनियोगो विरुद्ध एवं परं तु विनियोज
कप्रमाणयोः समबलत्वेनान्यतरविनियोगो यागायोगादगत्याकांक्षासादने न विनियुक्ते विनियोगः स्वीक्रिय
ते ॥ यथा खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्यादिति वाक्याभ्यां क्रतौ विनियुक्तस्य खादिरत्वस्य वी
र्यफले विनियोगः ॥ यत्र तु प्रमाणयोरतुल्यत्वं तत्र न स्वीक्रियते प्रबलप्रमाणे न दुर्बलाविनियोगबाधात् ॥
यथा कदाचन स्तरीरसि नेंद्र सश्चसि दाशुषः इत्यृचः ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति तृतीया विभक्तिश्रुत्यान्यनिर
पेक्षया गार्हपत्योपस्थाने नैतस्य बोधयति किंचित् लिंगं प्रकाशनमात्रं करोतीति तेन च लिंगेनानेन मंत्रेणेंद्र उपस्थाप
यितव्य इति श्रुतिः कल्पनीया तया शेषत्वबोधकं लिंगं झडिति स्वार्थबोधकश्रुत्या बाध्यं ॥ तथा लिंगेन वाक्यं
बाध्यं यथा स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मे
ध सुमनस्यमान इति मंत्रभागयोः प्रत्येकं सदनकरणे पुरोडाशासादने च लिंगप्रकाशनसामर्थ्यात् लिं[illegible]
गेन

४ शेषत्वबोधकस्येंद्रप्रकाशनसामर्थ्यरूपात् लिंगात् [illegible] शेषत्वं बाध्यते लिंगात् तेन [illegible]

= सा न प्रकरणादुत्कृष्टाहीनं प्रति कर्षः कर्ष-
नमिति यावत्

श्रुतिद्वारा विनियोगे सति प्रतीतमेकवाक्यत्वं बाध्यते तस्य कृत्स्नेपि मंत्रे सदनकरणप्रकाशसामर्थ्यं पुरोडाशासाद
नप्रकाशनसामर्थ्यं च लिंगं कल्पयित्वा श्रुतिं कल्पयन्नेवोभयत्र कृत्स्नमंत्रविनियोगबोधने द्वाभ्यां लिंगश्रु
तिभ्यां व्यवधानेन श्रुत्येकव्यवहितलिंगाद्दुर्बलत्वान्न च सामर्थ्यं न कल्प्यमिति वाच्यं असमर्थस्य विनियोगायो
गात् अत एव गंगापदस्य तीरबोधविनियोगे लक्षणारूपं सामर्थ्यं कल्प्यते तथा वाक्येन प्रकरणं बाध्यं यथा सान्तप्र
करणाम्नातद्वादशोपसदां द्वादशाहीनस्येति वाक्येनाहीनांगत्वबोधकेन प्रकरणप्राप्तसान्तांगत्वबाधाद्दुर्बलकर्षः
प्रधानस्यांगाकांक्षारूपं प्रकरणं तस्यांगप्रधानवाक्यैकवाक्यतासामर्थ्यश्रुतिभिः कल्प्यमानाभिः स्वार्थवि
नियोगप्रमितौ व्यवधानेनांगसामर्थ्यश्रुत्योर्द्वयोः कल्पकवाक्याद्दुर्बलत्वात्॥ तथा प्रकरणेन सन्निधिर्बाधः
यथा राजसूयप्रकरणे ननु दत्तेर्गलाभिषेचनीयाख्यसोमयागविशेषसन्निधिः पठ्यमाना सिद्धकल्पकत्वेन
संभुनः शेपोपाख्यानादेरभिषेचनीयशेषत्वं बाधित्वा कृत्स्नराजसूयशेषत्वमापादितं सन्निधेः प्रकरणादि
कल्पकत्वेन कृप्तप्रकरणाद्दुर्बलत्वात् तथा सन्निधिना समाख्या बाध्यते तथाहि पौरोडाशिकसमाख्याके कांडे आ
ग्नेयपुरोडाशादिकर्मणां क्रमेण मंत्रा आम्नातास्तत्र दधिपयोरूपसान्नाय्यसन्निधौ शुंधध्वं दैव्याय कर्मण इति मंत्र
आम्नातस्तत्र समाख्याबलेनास्य मंत्रस्य पुरोडाशपात्रशुंधनशेषत्वं प्राप्तं सन्निधिना बाधित्वा सान्नाय्यपात्रशुं
धनशेषत्वमापादितं पुरोडाशसंबंधिकांडं पौरोडाशिकमिति पौरुषसमाख्यापायाः कांडं तेन मंत्रस्य पुरोडाशसंबंध
पनशेषत्वमापाद्यते सन्निध्याद्यपेक्षत्वेन दुर्बलत्वादिति॥ एवं विरोधे सति
सामान्यबाधकत्वेपि शेषशेषिभावरूपविनियोगबाधकत्वं सन्निध्याद्यपेक्षत्वेन दुर्बलत्वादिति॥

श्रुतिर्बाधिके व समाख्या बाध्यैवमध्यस्थानां तु चतुर्णां पूर्वं बाध्यत्वं परं बाधकत्वं चेति श्रुतिलिंगसूत्रार्थः ॥ तस्माल्लिं
गादिनान्यत्र विनियुक्तानां मंत्राणां दुर्बलसंनिधिना न विद्यासु विनियोग इति सिद्धं ॥ तथा कर्मणामिति कर्मणां वा
कंयं विद्योपकारस्येताभिः सहैकफलत्वेन्चमानं किंचिन्नास्तीत्यर्थः ॥ अपि चेत्यस्यार्थं ॥ ननु तर्हि वेधादिवाक्यानां
मुपनिषद्भिः सहपाठस्य का गतिस्तामाह ॥ आरण्यैति ॥ तस्माद्वेधादिमंत्रकर्मणां विद्यास्वनुपसंहार इति सिद्धं ॥
॥ ॥ हानौ तूक्तं ॥ ॥ यथाश्वो रजोयुक्तानि जीर्णरोमाणि त्यक्त्वा निर्मलो भवति तथाहमपि पापं विधूय कृतात्मानि
र्मलीकृतचित्तः सन्यथा वा राहुग्रस्तश्चंद्रो राहोर्मुखात्प्रमुच्य स्वच्छो भवति तथा शरीरं धूत्वा त्यक्त्वा देहाभि
मानान्मुक्तः सन्कृतं कृतस्थो ब्रह्मलोकं अभिसंभवामीत्यर्थः ॥ यथा नद्यः समुद्रं प्राप्य नामरूपे त्य
जंति तथा विद्वानित्यर्थः ॥ निरंजनः शुद्धः साम्यं ब्रह्म। तस्य परं तस्य विदुषः दायं धनं तत्तेन। विद्याबलेन सुकृत
दुष्कृते त्यजतीत्यर्थः ॥ उपायनं ग्रहणं तस्य त्यागपूर्वकत्वात् त्यक्तयोर्ग्रहणायोगात् योगार्थादायानि यत्र तु सा
गए व श्रुतः तत्राहानोपायनयोः सहभावस्यावश्यकत्वानावश्यकत्वाभ्यां संशयमाह ॥ सत्र चेति ॥ अत्र पूर्वपे
क्षेस्तेति प्रकर्षासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलं ॥ यद्यपि तांड्याथर्वणश्रुत्योः निर्गुणविद्यार्थयोः कर्महाने मे व श्रु
तं नोपायनं तथापि कौषीतकीश्रुतौ पर्यंकस्थसगुणब्रह्मविद्यायामुपायनेश्रुते मंत्रोपसंहर्तव्यमिति सा तूक्तस्य विद्या
भेदान्नोपसंहार इत्याह ॥ विद्यान्तरेति ॥ किंच यथा मंत्रकर्मणामनावश्यकत्वाद्विद्यास्वनुपसंहारस्तथा पाप
रूपादानं विनापि हानसंभवे नोपादानस्यानावश्यकत्वान्न प्राप्तिरिति सूत्रार्थः ॥ अश्वरोमदृष्टांतेन विधू
तयोः पुण्यपापयोः परत्रावस्थानसापेक्षत्वात्परैरुपादानं वाच्यमिति भावः विद्याभेदे गुणानुपसंहार इति व्य

दृष्टांतसंगता प्राप्ते सिद्धांतयति हानौ त्वित्यादिना। उपायनशब्द
शेषत्वाद्धानशब्देनापेक्षितत्वादिति २

त्यं

वे

वस्थानुष्ठानविषया न स्तुतिविषयेत्याह ॥ तदुच्यत इति । मन्यते सूत्रकार इत्यर्थः ॥ ननु श्रुतहानार्थवादेनापि स्तुतिसि-
द्धेः किमर्थवाद आनीयते तत्राह ॥ स्तुतिप्रकर्षो लाभायेति । नन्वर्थवादस्य विधिना संबंधः प्रसिद्धो नार्थवादांतरेण सत
आह ॥ प्रसिद्धश्चेति ॥ इतो भूर्लोकादित्यर्थः । हे मंत त्रिष्टुब्गायत्र्योरेकयोः संप्रत्युक्तेवः यजुष्यस्य पुरुषरूपकल्पनायां सेंद्रि-
यत्वाद्ये त्रिष्टुभो भवतु इत्युक्ते बह्वृचब्राह्मणे तत्र त्रिष्टुभोः छंदोमात्रत्वात्कथमिंद्रियत्वकल्पने साकांक्षा मंत्रं या यजुर्वा-
क्यसंबध्यत इत्यर्थः ॥ नन्वमूर्तयोः पुण्यपापयोरुपादानस्यासंभवादनुपसंहार इत्यत आह ॥ स्तुत्यर्थत्वाच्चेति
विद्वन्निष्ठयोरेवतयोः फलं परे प्राप्नुवंतीति विद्यासामर्थ्यादिरूपयंतिपदेनोच्यत इत्यर्थः ॥ नन्वन्यनिष्ठकर्मणोऽन्यत्र
फलसंचारः कथं ननु वचनबलादिति चेन्न । फलमुपयंतीत्यश्रुतेः ॥ न च यथा पुत्रकृतश्राद्धस्य पितृषु फलं तथा-
त्रेति वाच्यं । यस्य फलमुद्दिश्य तत्पुत्रस्य कर्म विहितं तस्य तत्र फलमिति न्यायेन पितॄणां तदुद्देशेन स्वकर्मणा व्यधिक-
रणफलत्वेऽपि विदुषः कर्मकालेऽनुद्दिष्टव्यधिकरणफलायोगात् किंच विदुषो देहपातकर्मणोः सत्त्वाद्यावज्जीवविद्वत्से-
वकस्य द्वेषिणो वा फलं न स्यादित्यत आह ॥ नातीवाभिनिवेष्टव्यमिति । विद्वत्सेवाद्वेषाभ्यां विद्वन्निष्ठपुण्यपापतुल्यपुण्य-
पापे सेवकद्वेषिणोर्जायेते जातयोः फलं स्वीकार उपायनमिति परिहारस्य सुलभत्वादनाग्रह इत्यर्थः ॥ उपायना-
देः स्तुतित्वे लिंगमाह ॥ उपायनेति ॥ उपायनविवक्षायामुपायनस्यैवोपसंहारं सूत्रकारो ब्रूयादतः शब्दस्य तं ब्रु-
वन् स्तुतित्वं सूचयतीत्यर्थः ॥ विद्याविचारात्मकपादस्य तद्विचारस्य का संगतिरित्यत आह ॥ तस्मादिति ॥ शाखांतर-
स्थो विशेषः शाखांतरे विद्यासहस्रवद्दृष्टांतमाह ॥ कुशेति ॥ कुशा उद्गातृणां स्तोत्रगणनार्थाः शलाका दारुमय्यः

ता.१४१.टि.टा.

४०

त.च्या.ल.

गोकुशायूयंयानस्यस्याः सप्तमहावृक्षोवनस्पतिः॥ तत्रभवाः स्वतामिदं छंभूतामियंमापानमां रक्षतेतियजमानप्रार्थना
॥ अत्रतामितिस्त्रीलिंगनिर्देशादेदुंबर्यइतिभाष्याच्चशालाकासुकुशानामबस्यस्त्रीत्वंमंत्रपदर्भविषयस्यनस्त्रीत्वं
अस्त्रीकुशानित्यनुशासनात्कुशं छंदोदृष्टांतंव्याचष्टे॥ यथावेति॥ नवाक्षराणिछंदांसिआसुराण्यवमानानि। देवानि
तेषांकश्चिच्छंदोभिस्तुवतइत्यत्राविशेषप्राप्तौपैंगिवाक्याद्विशेषग्रहइत्यर्थः॥ स्तुतिंविधत्तेतिपथेति। अति
रात्रेषोडशिनोग्रहस्यांगभूतंस्तोत्रंकदेतिछंदोगाबीनामाकांक्षायामुदयसमयाविष्टसूर्येणषोडशिनस्तोत्र
मित्यार्चश्रुतेः कालविशेषग्रहइत्यर्थः। स्वचोधीयतइत्यर्चाः तुपगानंविभजन्ते॥ यथेति॥ ऋत्विजउपगायंती
मित्यार्चश्रुतेः कालविशेषग्रहइत्यर्थः॥ तस्मादध्वर्युभिन्नाऋत्विजउपगायंतीतिविशेषग्रहइत्यर्थः॥ ननुकुशा
स्यविशेषश्रुतेनाध्वर्युरुपगायतीतिश्रुत्यंतरादध्वर्युभिन्नात्रऋत्विजउपगायंतीतिविशेषग्रहइत्यर्थः॥ ननुकुशा
दिवाक्यानामपिकिमितिविशेषश्रुत्यंतरेकवाक्यताऽभ्युपगम्यतेतत्राह॥ श्रुत्यंतरस्थंतंहीति॥ सामान्यविशेष
दिवाक्यानामपिकिमितिविशेषश्रुत्यंतरेकवाक्यता अभ्युपगम्यते नाध्वर्युरितिनिषेधादविशेषश्रुतेश्चाध्वर्युरुपगायतिनोपगाय
येयोरेकवाक्यतारूपायोगतोसत्यांवाक्यभेदंकृत्वानाध्वर्युरितिनिषेधादविशेषश्रुतेश्चाध्वर्युरुपगायतिनोपगाय
तीत्येवंसर्वत्रविकल्पोनयुक्तः। व्रीहियवयोस्तुगत्याविकल्पआश्रितइत्यर्थः॥ विकल्पस्यान्याय्यत्वमष्टदोषदुष्ट
त्वात्तथाहि। यदिव्रीहिवाक्यमाश्रीयेततदाययवाक्यस्येष्टप्रामाण्यत्यागआनिष्टाप्रामाण्यस्वीकारः कदाचित्यव
वाक्याश्रयणेसत्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यत्यागश्चेत्येकस्मिन्यवबाक्येचत्वारोदोषाभवंति॥ एवंव्री
हिवाक्येपिचत्वारोदोषाइत्येवंदुष्टविकल्पपरिहारायभिन्नशाखयोरप्येकवाक्यतांजैमिनिसंमतेत्याह॥ तदुक्तं
मिति॥ ज्योतिष्टोमप्रकरणेदीक्षितोनजुहोतीतिश्रुतंयावज्जीवमग्निहोत्रंजुहुयादितिवाक्यस्यनैमित्तिकत्वान्नमग्निहो

टस

४०

त्रं जुहुयादिति चान्यत्र भ्रान्तं तत्र यदि नदीक्षितवाक्यं होमप्रतिषेधकं स्यात् तदाऽऽनर्थक्यान्निषेधोनुष्ठेयः यावज्जी
वविधिना होमोनुष्ठेय इति विकल्पः स्यात् स चान्याय्यः अपितु यावज्जीववाक्यं प्रति नदीक्षितवाक्यस्य शेषत्वा नञः
इतरपर्युदासार्थकः स्याद् दीक्षितोन्यलक्षकः स्यान्न होमप्रतिषेधकस्तस्माददीक्षितो यावज्जीवं जुहुयादित्ये
कवाक्यतेति। नदीक्षिताधिकरणसिद्धान्तसूत्रार्थः॥ अत्र भगवत्पादैः सूत्रे मेव पठितं मिश्रैस्तु पर्युदासाधिकरण
सिद्धान्तसूत्रं अपितु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति स्थले मन्त्रार्थतः पठितमित्य
क्तं। तच्चिन्त्यं सूत्रार्थस्तु यजतिषु येयजामह इति प्रयोक्तव्यमिति श्रुतं नानुयाजेषु येयजामहं करोतीत्यपि श्रुतं तत्र
नकारस्य निषेधकत्वे अतिरात्रे षोडशीग्रहणाग्रहणयोरिवानुयाजेषु पक्षत्वा विकल्पेषासप्रयोक्तव्यं निषेधान्न प्रयोक्तव्य
मिति विकल्पस्यान्याय्यत्वाद् येयजामह विधेरेवानुयाजवाक्यमेकदेशः स्यात् पर्युदासरूपा विधिवाक्यशेषः स्या
दिति यावत् तथा चानुयाजभिन्नेषु यागेषु येयजामह इति प्रयोक्तव्यमित्येकवाक्यतेति॥ ॥ वर्णकान्तरमाह। अथवेति॥
पूर्वत्र विप्रोषितं कर्म हानिरिति सिद्धवत्कृत्य उपायेनोपसंहार उक्तः अत्र संशयसाध्यत इति भेदः। उभयत्र लक्षणासाम्या
त्संशयमाह। किमिति॥ विप्रोषिते नश्यति फलद्वयमश्वमेधादिषु दृष्टं पूर्वस्वभावाच्युतिरन्यत्र संक्रान्तिश्चेति तत्र संक्रा
तिरूपहानिर्लक्षणीया किंवा च्युतिरिति संशयः। तत्र विप्रोषितनश्यतिशब्दस्य कम्पनं मुख्यार्थ इति तावत् सर्वसंमतं। तत्र
नयोः पुण्यपापयोर्न संभवति॥ अलस्तयोर्यः स्वभावः फलदातृत्वशक्तिस्तन्नश्वालनं विधियया प्रतिबन्धान्तरच्युतिः स्या

Marginal notes (left margin): न … ति

सा॰ भा॰ लि॰ टा॰

४१

=चिप्पनेन पदस्य मुख्यार्थेन कयेनेन समस्यहेतुहेतुमद्भावलक्षणेनसंबंधे नेन सर्षः ८

टा॰ व्या॰

लक्षणीया न हानिरमूर्तयोरन्यत्र संक्रांतयोगादन्यसापेक्षत्वाच्चेति पूर्वपक्षार्थः॥ सिद्धांतयति॥ हाना वेवेति॥ यदित्यु तिमात्रं लक्ष्यं तदोपयंतीत्यनन्विनस्या न्वयस्य धुनोते रूपायनशब्दसान्निध्ये तत्र हानिर्लक्ष्यते न केवलधुनोते हीन निश्चान्यत्रविदुषः स्वयकादे तुल्यकर्मसंक्रांतिरिति नासंभवदुक्तिवाच्यं केवलधुनोतेरपि मुख्यार्थासंभवे नान्य अलक्ष्यतया बुद्धिस्थहानिलक्षणायाएवयुक्तत्वादिति भावः॥ उपायनस्यामुख्यत्वान्तकापि हानिलक्षणाबी जत्वमिति त्वां॥ किंत्या पुण्यपापयोः फलतः स्वीकारात्मकमुपयानं हानिं विनानुपपन्नं तल्लक्षणानिर्णायकमिति परिहरति॥ यद्यपीत्यादिना॥ यथान्यत्रश्रुतमोदुंबरत्वादिकं कुशादिनिर्णीयकं तथेदमुपायनं विधूननस्य हानत्वे निश्चायकमित्याह॥ क्वचिदपीति॥ विधूननं मुख्यक्रियमिति नो च्यते तत्राह॥ न चेति॥ तथापि हानं कथं लक्ष्यत इत्या शंक्यमुख्यसंबंधादित्याह॥ अश्वश्चेति॥ अनुपपत्तिसंबंधौ लक्षणाबीजरूपावुक्तालक्षकं पदं निर्दिशति॥ अश्वइ वेति॥ विधूयेतिपदं दृष्टं तेहानपर्यंतं सदा घटतीति केपि हानलक्षकमित्यर्थः॥ यद्वा हानवाचकमेवास्तु न च धूञ् कंपने इति धातुपाठविरोधस्तस्योपलक्षणार्थत्वादित्याह॥ अनेकेति॥ नानार्थानेकस्य मुपायनं विधूननस्य हानत्वे निश्चाय कमित्यत्र जैमिनिसूत्रं तदुक्तमिति गंहीतं पूर्वव्याख्यातमित्यर्थः॥ एवं विधूननस्य हानित्वे सिद्धे केवलहानावुपा यनोपसंहार इति सिद्धं॥ सांपरायेन्ये॥ ॥ यथ ध्वनि अर्द्धमार्गे पूर्वोक्तं विधूननस्य हानत्वमुपजीव्य हानस्य न म दीतरणानंतर्यश्च लेरश्व इव॥ रोमाणि सादोदेह पातात्स्या कालत्वश्चेतेश्व संदूष्यमाह॥ नत्विमिति॥ ब्रह्मलोकमा दीतरणानंतर्यश्चलेरश्व इव॥ क्रतेविधूनुतइत्यत्रतदिति सर्वनामश्रुत्याले नेरपर्थ यासन्निहितनदी तर णमिधयेवि जाख्यनदीमत्येति तत्सुकृतेदुः कृते विधूनुत इत्यत्र

सूत्र ५

= मुख्यार्थे नात्विना भूते अपचितिर्लक्षणो च्चतरहस्ति न मतेनुपपत्तिसंबंधयोर्लक्षणाबीज त्वमितर्थः ७

४

=कृतमात्रे सर्षः

=पाठक्रमादर्थक्रमो बलीयान् इति न्यायात् बलवदर्थविरोधे दुर्बलपाठस्य बाधो युक्त इत्यर्थः ॥

णस्य कर्महानिहेतुत्वोक्तेरर्द्धपथे कर्मक्षय इति पूर्वपक्षस्तत्र विद्यायाः कर्मक्षयहेतुत्वासिद्धिः सिद्धांतेन तत्सिद्धिरिति मत्वा सिद्धांतयति ॥ सांपरायइति ॥ मरणात्प्रागित्यर्थः ॥ संपरेतस्य मृतस्य कंचित्कालं कर्मसत्वे फलाभावादेवयान मार्गप्रवेशायोगात् प्रागेवक्षय इत्यर्थः ॥ क्षयहेतोर्विद्याया मध्यमार्गे समस्यादित्याह ॥ विद्येति ॥ नदीतर णानंतरं पाठस्तु बाध्य अर्थविरोधादिहाह ॥ तस्मादिति ॥ तदिति सर्वनाम्नापि प्रकृतविषयो बोध्यत इति भावः ॥ किंच मृतस्य देहलोपात् अर्धमार्गे विद्यानुष्ठानानुपपत्तेरुभयोर्विद्याकर्मक्षययोः श्रुतो हेतुफलभावो विरुध्यते ॥ किंच सति पु फले हेतोनकार्यविलंब इति न्यायोपेत तांड्यादिश्रुतिविरोधस्तदवस्थः स्यादस्मत्पक्षे त्वविरोध इत्याह ॥ छंदत इति ॥ तस्मात्कर्महानस्य विद्याफलत्वात् केवलहानावुपायनोपसंहारो विद्यास्तुतये इति सिद्धं ॥ गतेरर्थवत्त्वं ॥ कश्चित्सगुणविद्यायां मार्गः श्रूयते निर्गुणविद्यायां न श्रूयते तत्राह ॥ न सन्निधौ मार्गस्य श्रुतत्वादनपेक्षितत्वात्त्व संश्रयेदर्थान्तसंगत्या पूर्वपक्षमाह ॥ यथात्वविदिति ॥ उपायनमार्गस्यापि कुचिद्ग्रुत्वात्सर्वत्रोपसंहार इत्यर्थः ॥ अत्र निर्गुणविदोपि मुक्त्यर्थं मार्गापेक्षा पूर्वपक्षे सिद्धांते त्वनपेक्षेति फलं ॥ देशादिव्यवहितवस्तुप्राप्तौ मार्गस्यापे क्षेति न्यायानुग्रहीतश्रुतिविरोधान्नोपसंहार इति सिद्धांतः ॥ निरंजनो साम्यं: साम्यं ब्रह्म ननु तर्हि सगुणविद्या यामपि मार्गो व्यर्थ इत्यत आह ॥ उपपन्न इति ॥ सा गति लक्षणं कारणं यस्यार्थस्य स तल्लक्षणार्थः ॥ अनियमः स र्वासां ॥ अत्राप्यर्चिरादिमार्गएव विषयस्तत्र विशेषप्रकरणादविशेषश्रुतेश्च संशये पूर्वपक्षमाह ॥ किंतावदिति ॥ सगुणनिर्गुणविद्यासु मार्गस्य भावाभावव्यवस्था ननु सगुणास्वपि व्यवस्थेति दृष्टो तेन प्राप्तो सिद्धांते व्यवस्थापवाद

=आपवादिकी संगतिरधिकरणयोः ॥

का

फ

यन्

छां·भा·टि·टी·
५२

संगतिः नियमानियमावुभयत्र फलं। नियमे प्रकरणमुक्त्वा पुनरुक्तिलिंगमाह॥ अपि चेति॥ एकत्रोक्तगतेरन्यत्र प्राप्तौ पु
नरुक्तिर्व्यर्था स्यादित्यर्थः॥ सिद्धांतयति॥ सर्वासामिति॥ अभ्युदयो ब्रह्मलोकः अविदुष इत्यादिना प्रकरणबाधो
न दोषस्त्वाह॥ नैष इति॥ तत्राप्यर्चिरादिना नाम ध्येये इत्युपंचाग्निविदो ये चामी। अरण्ये श्रद्धातपः इत्युपासते श्रद्धातपउप
लक्षितं ब्रह्म ध्यायंति ते चार्चिषमभिसंभवंतीत्यन्वयः॥ ननु श्रद्धातपोमात्रश्रुतेस्तौ प्रमिवार्चिरादिगमनं स्यान्नवै
श्वानरादिविद्यान्तिलानामित्युच्यते॥ कथं पुनरिति॥ अविदुषां गतिनिषेधाच्छ्रद्धातपः शब्दाभ्यां तस्याध्यब्रह्मवि
द्यालक्षणेति परिहरंति॥ नैष दोष इति॥ तद्ब्रह्मलोकस्थानं परगताः परारलाः कामक्रोधदोषान्नसंतीति यावत्॥ द
क्षिणाः केवलकर्मिणः तपस्विनोप्यविद्वांसो न गच्छंतीत्यर्थः॥ लक्षणादोषहीनं वाक्यमाह॥ वाजसनेयिनश्चेति
॥ किंच विद्याकर्मलक्षणमार्गद्वयभ्रष्टानामधोगतिश्रुतेर्वैश्वानराद्युपासकानामर्चिरादिमार्गप्राप्तिरित्याह॥ अ
थ य एतावितीत्येति॥ दंदशूकः सर्पः किंच अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं। तत्र प्रयाता गच्छंति ब्रह्म ब्रह्म
विदो जना इत्यविशेषेण उपासकानामर्चिरादिगतिमुक्त्वोपसंहारस्मृतेश्चैतेषां तत्प्राप्तिरित्याह॥ स्मृतिरिति॥
शुक्लागतिरर्चिरादिका कृष्णा धूमादिका जगतो विधीकर्माधिकृतस्य नराश्चते शाश्वते संमते तत्रैकया शुक्लयापु
नरावृत्तिवर्जं कार्यं ब्रह्म गच्छति अन्यया स्वर्गं गत्वा पुनरायातीत्यर्थः॥ पुनरुक्तिदोषं दूषयति॥ यत्पुनरिति॥ तत्र
तत्र मार्गश्रुतिरन्वहं मार्गचिंतनार्थं प्रकरणे न मार्गध्यानस्य विद्यांगत्वावगमात्॥ तथा च य इत्यपि तिसृत्रवकारः तथे
षगत्यनुस्मृतियोगाच्चेति॥ येषां न श्रुतो मार्गस्ते मार्गध्यानं विनापि विद्यासामर्थ्यान्मार्गं लिप्संत इति स्थापनार्थं पुनरु

स्तुत्या·ल

= तात्पर्यं हेत
ध्यां तद्ध
सर्थः ४

ह
५२

क्तिरित्यर्थः ॥ तस्मात्सर्वोपासनासु प्रतीकभिन्नास्वर्चिरादिप्राप्तिरिति सिद्धं ॥ ॥ यावदधिकारं ॥ निर्गुणविद्यायां ग
तिर्यथा मुक्तिफलत्वात् । सगुणविद्यासु सर्वत्रार्थवती ब्रह्मलोकफलत्वादिति व्यवस्थापकता सा न युक्तात स्व
ज्ञानिनामपीतिहासादौ पुनर्जन्मदर्शनेन ज्ञानस्य मुक्तिमुक्तिफलत्वाभावादित्याक्षेपात्संगतिः ॥ ज्ञानिनां
पुनर्जन्मदर्शनं संन्याथबीजं भाष्यदर्शितं पूर्वपक्षे ज्ञानान्मुक्तिर्मुक्तिफलतो नो ज्ञानश्रुतिमात्रत्वेन ज्ञानस्य मु
क्तिफलत्वाभावे सति ब्रह्मलोकफलत्वाविशेषादर्चिरादिमार्गोपसंहारः फलं सिद्धान्ते तु तव्यवस्था सि
द्धिरिति विवेकः । श्रुतावपीतिमेधातिथेर्मेधेति मंत्रे इन्द्रस्य मेषजन्मोपलभ्यते वशिष्ठ उर्वशीपुत्रो जात इत्येवमर्थो वि
रूपार्थवाद इत्यर्थः ॥ पाक्षिकमित्यापाततः अहेतुत्वमेवेति पूर्वपक्षः ज्ञानस्य मुक्त्यहेतुत्वं नेति । सिद्धान्तयति ॥ नेति ॥
लोकव्यवस्थासु स्वामित्वमधिकारः ॥ तस्यापकं प्रारब्धं यावदस्ति तावत्कालं जीवन्मुक्तत्वेनाधिकारिकाणामवस्थि
तिः प्रारब्धक्षये प्रतिबंधकाभावाद्विदेहकैवल्यमित्यत्र मानमाह ॥ अथेति ॥ अथ प्रारब्धक्षयानंतरं ततः पदाद्ध्वंसे वि
लक्षणः केवलब्रह्मस्वरूपः सन्नुदेत्यो दृश्यदेहं सत्येति यावत् ॥ एकल एव अद्वितीयो मध्यउदासीनात्मस्वरूपे ति
ष्ठतीत्यर्थः ॥ ननु ज्ञानिनामपि जन्मांतरं चेत्कथं मुक्तिरित्यत आह ॥ सकृदेव प्रवृत्तमिति ॥ यदि ज्ञानिनां प्रारब्धनिमित्त
कर्माधीनं जन्मांतरं स्यात्तदा ज्ञानान्मुक्त्यभावः स्यान्नैतदस्ति किं तु बहुजन्मफलाय सकृत्प्रवृत्तं प्रारब्धं तेक्षप
यंतीति जन्मग्रहणेपि ज्ञानयोगबलान्मुच्यंति ॥ प्रारब्धसमाप्तौ मुच्यंत इत्यर्थः ॥ ज्ञानिनां जन्मांतरस्य पूर्व
जन्महेतुप्रारब्धाधीनतया मलुस्यस्थितित्वं हेतुः ॥ योगजातिस्मरत्वे सति कर्मांतराधीनजन्मांतरवान् सलुत्त

शा.भा.टि. ८०

= ज्ञानं प्रारब्धविक्षेपस्थित्यनुकूलाज्ञानांशनिवर्तने समर्थं। तत्कार्यसहभावित्वात्। यद्यत्कार्यसहभावि तत्तत्कारणनिवर्तने समर्थं। यथा ... सहभावा
घनुमानं = १

४३

स्मृतिरिति व्याप्तेर्ज्ञानिषु व्यापकाभावाद्विनिष्ठ व्याप्याभावसिद्धिः॥ ननु तेषां जातिस्मरत्वादलुप्तस्मृतित्वमन्यथा-
सिद्धमित्यत आह॥ नैव तदिति॥ तथा च तेषामजातिस्मरत्वरूपविशेषणे सति विशेष्याभावादेव विशिष्टाभा-
वसिद्धिरित्यर्थः॥ पूर्वदेहनाशप्रसक्तिज्ञानहीनाः परतन्त्राः साभिमाना जातिस्मरा आधिकारिकास्तु पूर्वनाशा-
नः स्वतन्त्राश्च निरभिमाना इति वैषम्यं। तेन जनकेन सह व्यूढविवादस्येत्यर्थः॥ विदुषः प्रारब्धातिरिक्तकर्म-
भावान्न बंधः निमित्ताभावे नैमित्तिकाभाव इति न्यायानुगृहीतां ज्ञानान्मुक्तिश्रुतीं नानुस्मृतिमात्रस्य मिलितमम-
र्थमुपपादयति॥ यदि सकृत्प्रवृत्त इत्यादिना॥ श्रुतिस्मृत्युक्तार्थे युक्तिमप्याह॥ न चाविद्येति॥ वि[illegible]ध्यपाकृतत्वाद्वा-
नात् तत्कार्यकर्मक्षयश्चेत्तर्हि प्रारब्धस्य कथं स्थितिरित्यत आह॥ प्रवृत्तफलस्येति॥ विदुषो देहपातावधिश्रुतेरनुमाना-
च्च ज्ञानस्यावरकाज्ञानांशनिवर्तकस्य प्रारब्धविक्षेपस्थित्यनुकूलाज्ञानांशनिवर्तने सामर्थ्याभावसिद्धेर्भोगेनै-
व प्रारब्धक्षय इति भावः॥ ज्ञा[illegible]निनामाधिकारिकत्वं कथमित्यानुरूप्यज्ञानात्साधूतोपासनावशादित्याह॥ ज्ञानालवे-
पुचेति॥ प्रतिसंचरो महाप्रलयः परस्य हिरण्यगर्भस्याधिकारान्ते साक्षात्स्वतामोनामुक्त्यंतरस्य चः॥ ब्रह्मभावफल-
स्यापि भावित्वमाशंक्यासीतिश्रुतिं बाधकमाह॥ नहीति। तस्मान्निर्गुणविद्यायां मार्ग[illegible]नुप[illegible]संहार इति
सिद्धं॥ ॥अक्षरधियां॥ अत्राक्षरब्रह्मप्रमापकानि निषेधशब्दविषयास्तेषु यत्र यावंतः श्रुतास्तत्र तावतामनूष
द्वैतनिषेधकत्वसंभवासंभवाभ्यां संशयमाह॥ नासामिति॥ यथा निर्गुणविद्यायां मार्गस्यानपेक्षितत्वादनुप-
संहारस्तथा श्रुतनिषेधानामुपलक्षणतया सर्वद्वैतनिषेधसंभवाच्छाखांतरीयनिषेधशब्दानामनपेक्षितत्वा

दनुपसंहार इति दृष्टांतेन पूर्वपक्षस्तत्र लाघवं फलं ॥ सिद्धांते तु दोषद्वयाभावः फलं । तथाहि यदि श्रुतनञ्ब्रह्मश्रुतनिषे
धालक्ष्यंते तदा लक्षणादोषः यदि न लक्ष्यते तदा सर्वेष्वपि तन्निषेधासिद्धेर्निर्विशेषब्रह्मसिद्ध्यभावदोष इति विवेकः ॥
अक्षरे धर्मिणि दृष्टनिषेधधियो । अक्षरधियस्त्ववरुन्धा इति यावत् ॥ तासामवरोध उपसंहार इति सूत्रयोज
ना ॥ ननु विशेषलक्षणः सर्वेषु गुणानामसंभावात्तत्र मितेः समानत्वाच्च गुणानामुपसंहार इति चेत्तर्हि न्यायसाम्यात्पुनरु
क्तिता दवस्थ्यमित्यत आह ॥ प्रपंचार्थ इति ॥ आनंदादीनां स्वरूपत्वादस्तूपसंहारः निषेधानामनात्मत्वादा
नंत्याच्चानुपसंहार इत्यधिकाशंकायां तेषामनात्मत्वेपि निर्विशेषब्रह्मप्रमितिसार्थत्वादविधानज्ञनिषेधत्वे
नसंग्रहः सिद्धश्च निरपेक्षाः स्फूला ननु वाक्यस्थकृतनिषेधन्यायानामन्यत्र श्रुतनिषेधवाक्यैकवाक्यतयो
पसंहार इति चिंतायुक्तेत्यर्थः ॥ अन्यत्र श्रुतनञ्पाणां अन्यत्र श्रुतविसंबंधे दृष्टांतं व्याचष्टे ॥ यथेति ॥ जमद
ग्निः पुष्टिकामश्चतूरात्रेण यजेतेत्यस्य विहितः जमदग्निनादृष्टो जामदग्न्य अहीनश्चतूरात्रः क्रतुस्तस्मि
न्पुरोडाशिन्य उपसदो भवंतीति पुरोडाशानां याज्यानुवाक्याः ते च तैत्तिरीयके विहिताः तासामध्वर्युकर्तृत्वात्सामवेदो
त्पन्नमंत्राणां तासु विनियोगादध्वर्युणैव प्रयोगो नोद्गात्रेत्यर्थः ॥ [illegible] वगाणस्य होत्रमध्वर्यश्च कर्माग्ने स्त्वतत्र एव
याज्या[illegible]भिमंत्रणमंत्रार्थः ॥ उत्पत्तिविधिर्गुणः फलोपक्षत्वादुत्पन्नस्य फले विनियोगविधिर्मुख्यः सफलत्वात्तथा
च मंत्राणामुत्पत्ति वेदोत्पन्नत्वात् उद्गात्रा प्रयोगः विनियोगविधिनाध्वर्युणा प्रयोग इति गुणमुख्ययोर्व्यतिक्रमे विरो
धे सति मुख्येन बलीयसा मंत्राणां वेदस्याध्वर्युणा संयोगमुख्येन विनियोगार्थत्वादिति जैमिनिसूत्रार्थः ॥ यथ

छा॰ व्य॰ वि॰ रा॰

४४

=गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ३

=इतरानिनामपनेदृष्टः १

पिदस्याबस्भाष्ये वारवंतीयादिसाम्नामुच्चैःस्वरकसामवेदोत्पन्नत्वादाधानांगत्वेनोच्चैःस्वरप्रयोगः यएवं विद्वान्वा

रवंतीं गायति यज्ञायज्ञीयं गायति वामदेव्यं गायतीत्याधाने तेषां विनियोगविधिना याजुषेण याजुषस्योपांशु

स्वरस्य प्रयोग इति गुणमुख्ययोर्विरोधे सत्यमुख्ये विनियोगार्थत्वान्मुख्यविनियोगबलेन साम्नां यजुर्वेदस्व

रसंयोग इति सूत्रं व्याख्यातं॥ तथापि न्यायसाम्यादोपसदमंत्राः सूत्रविषयत्वेनोदाहृता इत्यविरोधः

रूपदामननात् मंत्रद्वयेपि प्रतिपादनमप्रकारभेदधियैक्यभावाच्च संगृण्यमाह॥ किमत्रेति॥ ॥

रंब्रह्म परमिति गुणाः श्रुताः सुवर्णवाक्ये नश्रुत्वादपस्तेषांमिथो नुपसंहार इति॥ श्रुतपानवाक्येष्व

संसारिब्रह्मस्वरूपवाक्यार्थैक्यादुपसंहार इति विवेकः। अस्तु वेद्यैक्यादक्षरधियामुपसंहार इह तु भेदप्रभे

दान्नोपसंहार इति प्रत्युदाहरणे पूर्वपक्षः॥ नन्वयं गुहाधिकरणे निरस्त इति चेत् सत्यं॥ किं तु पिबत्पदस्य मु

ख्यार्थत्वाय स्वतः कल्पनया च पानकर्त्राश्रयौ बुद्धिजीवौ पिबंतौ गता स्यो सुपर्णो तु जीवेश्वरा विरूपधिका इत्या

रूपकरणानुग्रहाच्च जीवानुवादेनासंसारिब्रह्मणि मंत्रद्वयतात्पर्यमिति प्रपंचार्थमिदं सूत्रमिति भागः॥ ॥

अंतराभूतग्रामवत्स्वात्मनः॥ ॥ एतदधिकं चिद्भिषपक्षेनापरोक्षं ब्रह्म तु साक्षादविषयत्वेनापरोक्षमिति

प्रथमार्थे पंचमी अत्र श्रुता वात्मधर्मोपरोक्षत्वं ब्रह्मण्युक्तं ब्रह्मधर्मः सर्वान्तरत्वमात्मन्युक्तं तेन तयोरैक्यं दर्शितं

तं मतव्यां तन्मेव्याचक्ष्वेत्युषस्तिप्रश्ने याज्ञवल्क्येन प्राणादिप्रेरकोदृष्ट्यादिसाक्षीप्रतिपादितः तथैव पदे वसाक्षा

=जीवस्य चेतनलोदन्यानपेक्षतया पानकर्त्रा श्रयत्वं बुद्धेरचेतनत्वात्कल्पनया तदाश्रयत्वमित्यर्थः = २

त॰ प्र॰

वे

के

४

ल्ह

दपरोक्षा। इत्यादिविशेषणं हू लयआत्मा सर्वांतरस्तं मे व्याचक्ष्वेति कहोलप्रश्नेऽ एतावाध्यतीतःप्रति
पादितः तत्र ब्राह्मणद्वये विप्रश्नाद्यभ्यासात्स र्वांतरत्वेन आचक्ष्वेति च प्रत्यभिज्ञानाच्च संशयेमंत्र पौर्वापर्यवक्षा
दस्त्वविघ्नैक्य॥ इह तु ब्राह्मणयोर्वैधैक्येप्यभ्यासादिद्याभेदः पजस्याप्यासाम याजरूपेदवदितिप्रत्यदाह
रणेन पूर्वपक्षः॥ तत्र मिथोधर्मानुपसंहारः फलं सिद्धांते उपसंहार इति विवेकः॥ द्वयोः सर्वांतरत्वानुप
पत्त्या तावद्ब्राह्मणयोरेकवस्तुपरत्वं सिद्धं तथाच वैद्यक्यान्ति गुणविद्यैक्ये न विवादः॥ नन्वन्यपरो वि
पत्त्या तावद्ब्राह्मणयोरेकवस्तुपरत्वं सिद्धं तथाच वैद्यक्याप्ति गुणविद्यैक्ये न विवादः॥ नन्वन्यपरो वि
धेस्यांगीकारेण्यासानुपपत्तिरिति चेदुच्यते स एवाभ्यासः कर्मभेदकः योऽनिरर्थकः इह तु अस्ति ब्राह्मणा
र्थता सन एवानूनाया स्वस्वरूपविशेषकथनार्थत्वादभ्यासोन्यथासिद्धोन विद्याभेदकइति समुदाया
र्थः॥ ॥व्यतिहारः॥ जीवेशाये। मिथो विशेषणविशेष्यभावो व्यतिहारस्तास्यमक्रतत्वादुस्तरपक्षोर्थो निरु
पैर्वतापलवतीति न्यायाच्च संशये जीवेश्वरत्वमतिरेवकार्या उतन्यायाश्च व्यतिहारस्तुतिस्त्स
तस्याएवदृढीकरणार्थत्वेनाभ्यासवदन्यथासिद्धेतिदृष्टान्तेन पूर्वपक्षः॥ तन्नलोपवं फलं॥ सि
द्धांतेभ्यत्यर्थवत्त्वमितिविवेकः॥ एवं नेयत्वमहमस्मीत्युच्चारणेनैवत्वमेतेः व तन्त्यादहत्वमसीति
रूपास्यादित्यर्थः॥ उक्तदोषस्मारयति॥ नन्विति॥ संदिग्धेर्थेन्यायः सावकाशो इह तु स्रक्तत्वा
दन्योन्यात्मत्वेध्येयं ब्राह्मणिमनोमयत्वादिवज्जीवात्मत्वस्यध्यानार्थआरोपनिकर्षप्रसक्त्यभावादि
तिपरिहरति॥ नैषदोषइति॥ ब्राह्मणनिकर्षणहि त्वाजीवतादात्म्यध्यानेमदुक्तेमेवागतमितिशंकते॥॥

नन्वेवमिति ॥ मते द्विरूपत्वं त्वदनुक्तमस्माभिरुच्यते ध्यानपरवाक्यमिदमेकत्वं तु मानांतराविरोधात्सि
ध्यतीति समाधत्ते ॥ नैवमिति ॥ अहंग्रहोपास्तिविषयं व्यतिहार उपसंहर्तव्य इत्याह ॥ तस्मादिति ॥ ॥
सेव सत्यादयः ॥ ॥ स यः कश्चिद्विद्यापूरी महद्यक्षं पूर्वपक्षी तिष्ठु प्रथमजं मेतस्य हमेवेति सत्यं
ब्रह्म हिरण्यगर्भाख्यं वेदोपास्ते तस्य लोकजयः फलमित्यर्थः ॥ सत्यमिति नाम त्र्यक्षरं तिस्र यमिति ॥ तत्र
प्रथमोत्तमे अक्षरे सत्यं मध्यमक्षरमनृतमुभयतः सत्येन संपुटितत्वात्सत्यप्रायमेव भवतीति नामाक्षरो
पासनात्सत्यविद्यांगत्वेनोक्ता यत्तत्सत्यं ब्रह्म लहृदयात्मकं तत्संपत्त्युक्ते यक्षत्वादिगुणकः सोऽसावादित्यमं
डले दक्षिणे च पुरुषस्तस्याहरित्यहमिति च नाम द्वयप्रज्ञानात्पापक्षयः फलमित्यर्थः ॥ अत्र पूर्वोत्तरवा
क्ययोः फलभेदश्रुतेः प्रकृताकर्षणाच्च संशयमाह ॥ तत्रेति ॥ एवं प्राप्ते गुणानां व्यवस्थयानुष्ठानं सि
द्धान्ते त्वनुष्ठानैक्यमिति फलं ॥ यथा जीवविद्ययोरन्योन्यात्मत्वश्रुतिभेदान्न मिथोरूप्यमुक्तं तथात्र
फलश्रुतिभेदाद्विद्याभेद इति दृष्टांतेन पूर्वपक्षयति ॥ दूरेति ॥ विदूरस्य ब्रह्ममात्राकर्षणमयुक्तं त
द्यत इति सर्वनामभिः प्रकृतस्य गुणविशिष्टं ब्रह्मात्मक्यादित्याधिस्थानादिगुणविधानात्तथा
च वाक्यादेवविद्यैक्यप्रसिद्धिरिति सिद्धांतयति ॥ एकैवेति ॥ यथा दहरशांडिल्यविद्ययोर्ब्रह्मैक्यप्र
त्यभिज्ञानमात्रं तथात्रेत्याह ॥ नैवमिति ॥ कारणांतरं प्रकरणभेदादिकं एवं विद्याभेदेऽप्येतद्रूपा
स्यैक्यज्ञानं स्यादत्र तु तन्नेत्यथा संभवे विद्यैक्यनानात्वसंशये समिरूपास्यरूपैक्यज्ञानाद्विद्यैक्य

आहरित्यादिना नाम स्वस्मिन्नित्यादि संयोगे तस्य
श्रुतेरित्यर्थः ४

निश्चयपरत्वमक्षरार्थः॥ अस्त्वपवादकारणेऽपूर्वैक्याद्विध्यैक्योत्सर्गासिद्धिः। न च फलभेदादपवादः अं
गेफलश्रुतेः स्तुतिमात्रतया फलभेदासिद्धिरित्याह॥ यत्पुनरित्यादिना॥ किंच यत्र प्रधानविधावे
वं कामयेतेति फलं श्रुतं तत्र प्रधानफलेनैवांगानां फलाकांक्षानिवृत्तेरंगफलश्रुतेः स्तुतिमात्रत्वं यथा
प्रथमजं सत्यं ब्रह्मेति प्रधानविद्याविधिस्थत्वं लोकजयफलस्याध्येपत्यात्मा भिन्नो नामरूपांगस्य फल
श्रुतेः स्तुतित्वमुक्तं वस्तुतस्तु प्रधानविधावप्येवं कामपदाभावाद्रात्रिसत्रन्यायेन फले कल्पनीये
सति प्रधाने तदंगे वा यत्किंचित्फलश्रुतं तस्य सर्वस्याविश्रुतत्वाविशेषाज्जातेष्टिफलन्यायेन समुच्चि
ते प्रधाने फलत्वकल्पनात् फलभेदोऽसिद्ध इत्याह॥ अपि चेति॥ सत्यं येऽजयन्ति॥ तस्मादिति॥ एकदेशि
व्याख्यामुपन्यस्य दूषयति॥ केचिदित्यादिना॥ छांदोग्ये कमोंगोऽध्येहि र एष य पुरुषदोऽध्येति यत्र लिंगमाह
॥ तत्रेति॥ पृथिव्येवाग्न्यात्मना दृष्टे ऋक्सामे गेष्णौ तस्मादृक्सामगो ... त्वासुरूपउद्गीथ इत्येवं विद्वानुक्ता
नां कर्मफलसमृद्धिसमर्थेति श्रुत्यर्थः॥ सत्यविद्यातु न कर्मांगा श्रुतेरित्याह। नैवमिति॥ अंगविद्यात
तंत्रहिरण्यगर्भविद्याया भेदान्न गुणोपसंहार इत्यर्थः॥ ॥ कामादी॥ ॥ सगुणनिर्गुणविषये श्रुताः
सत्यकामादयो वह्नित्वादयश्च गुणा मिथ उपसंहर्तव्या न वेत्युपसंहारस्य फलभावाभावाभ्यां संदेहे सत्य
विद्याया एकत्वाद्गुणसांकर्येऽप्यत्र विद्ययोः सगुणनिर्गुणरूपभेदेन भेदो निर्गुणविद्यायां गुणोपसं

शा॰भा॰टी॰रा॰

४२

घ

हारस्य फलाभावाच्चानुपसंहार इति बहिरेव प्राप्ते सिद्धान्तयति ॥ तत्रेदमित्यादिना ॥ एवं विद्याभेदे स्फुटे कथं गु
णोपसंहारस्तत्राह ॥ गुणवत्स्विति ॥ भिन्नविद्यास्थानामपि गुणानामायतनादिसाम्येन निर्गुणस्व
न्ने बुद्धिस्थानां स्वस्व सर्वमुपसंहारो युक्तः ॥ सानस्तु निप्रकर्षस्याकांक्षितत्वात् ॥ यत्र क्वचिद्दृष्टगुणैः स्तुते
कर्तुं योग्यत्वाच्चापि सगुणस्थस्य कामादिषु निर्गुणस्थगुणार्थं तद्भूता एव तथापि नोपसंहारोऽत्रे वैय
र्थ्यं निर्गुणस्तावकत्वेन श्रुतगुणानामन्यत्राप्यन्वेयत्वमिति शंकानिरासेनांत[illegible]र्भावदार्ढ्यार्थत्वादि
त्यनवद्यं ॥ ॥ आदरादलोपः ॥ ॥ अत्र पयोब्दाग्निहोत्रशब्दाभ्यां संशयमाह ॥ तत्रेदं विचार्यत इति ॥
वैश्वानरे[illegible] पासके नातिथिभोजनाभावात्फलत्वेन विद्यांगप्राणाग्निहोत्रविचारात्पादसंगतिः ॥ पूर्व
पक्षे भोजनलोपे विद्याव्यांतरेण प्राणाग्निहोत्रानुष्ठानं सिद्धान्ते तल्लोपेन्तो इति भेदः ॥ ननु यदुस्तकमिति य
च्छब्देन भोजनाद्वितत्पत्कमन्नं यत्तद्धोमीयमिति होमसंयोगविधानादाक्षेपकभोजनलोपे तदाक्षिप्त[illegible]
[illegible]क्षाश्रितहोमलोप इति सिद्धान्ती शंकते ॥ नत्वादिति ॥ निर्गुणस्योपास्तिलोपेऽपि स्वात्मार्थगुणस्येव यं
द्भोजनलोपेऽपि प्राणाग्निहोत्रस्यादरणस्तु तिनिर्वाहार्थमलोप इति दृष्टान्तेन स्वपक्षसूत्रेण परिहरति
एवं प्राप्त इति ॥ एवं तदितिस्व यं प्राणाग्निहोत्रमदस्त्वातोऽपि नांतःकरणमित्यर्थः ॥ उक्तं स्मारयित्वा परिह
रति ॥ नन्वित्यादिना ॥ यथा कुंडपायिनामयने मासाग्निहोत्रे अग्निहोत्रशब्दो गौणोऽग्निसाग्निहोत्रवा

ब्र॰व्या॰

प

छंद

४

चकान्नित्याग्निहोत्रधर्माणां पयोद्रव्यादीनां प्राप्तिस्तथात्रापि प्राणाहुतिष्वग्निहोत्रत्वाद्रसयोर्द्रव्यादीनां मु
त्सर्गतः॥ प्राप्तौ सत्यां भोजनार्थभक्तद्रव्यविधिनापवादः॥ एतः अतो भक्तविधेरपवादार्थत्वाद्भोजनलोपे
भक्ताख्यगुणस्यांगस्य लोपे विनमुख्याग्निहोत्रस्य लोपः अपवादाभावे उत्सर्गप्राप्तपयआदिना तस्य
निष्पत्तिसंभवादिति प्राप्तमित्यर्थः॥ गुणलोपेन मुख्यस्येति जैमिनिसूत्रं॥ आधाने संति पवमानेष्
पस्तत्राग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदिति निर्वापः॥ तत्रस्तदंगत्वेनाग्निहोत्रहवल्पां
हवींषि निर्वपेदिति दर्शपूर्णमासाख्यप्रकृतौ विहिताग्निहोत्रहवण्यपतिदेशेन प्राप्ता आधानकाले चाग्नि
होत्राव्यभावात्तस्या गुणभूताया लोपेपि मुख्यस्य निर्वापस्य न लोप इत्यर्थः॥ आरण्यानित्यादिकर्मणो
वरूपानुष्ठेयत्वात्तस्य द्रव्यालाभे प्रतिनिधिना द्रव्येणापि कर्म कर्तव्यमिति प्रतिनिधिन्यायः॥ सि
द्धांतयति॥ उपस्थितइति॥ तद्वचनादिति तद्धोमीयमिति तच्छब्देन भोजनार्थसिद्धभक्तमात्रस्य होम
विधानादित्यर्थः॥ सिद्धवद्धक्तोपनिपातः अनूनमत्तागमनं तस्य तच्छब्देन परामृश्यत इत्यर्थः॥ आश्रि
त्य विदितिनाहुतीनामाश्रयलोपे लोपएव न द्रव्यांतरापेक्षा कस्यचिद्यथा ऋतूपपूक्ता [illegible] पणयनाश्रित
स्य गोदोहनस्य क्रतुलोपे लोपो नत्वाश्रयांतरप्रयोजकत्वं तथेति फलितमाह॥ तादृशी॥ पृथक्त
मग्निहोत्रत्वाद्द्रव्यांतरप्राप्तिरिति फलितमाह॥ नचात्रेति॥ तद्धवनार्थत्वात् सामिहोत्रसादृश्य

शा॰भा॰टि॰स॰
४७

मर्थवादस्य नूनं ब्रह्मस्यस्तुतित्वेनोपपत्तेरित्यर्थः॥ अधर्मप्रापकत्वे दोषमाह॥ तद्धर्मप्राप्तौ चेति॥ अत
एवेति तद्धर्मप्राप्त्यभावादेवेत्यर्थः प्राणौपासंपादनं यथा स्यादिति भावः। मुख्याग्निहोत्राङ्गानि संपा
द्यंते चेत्कथं तदंगवेदिरत्र संपाद्यते तत्राह॥ वेदिश्चेति श्रवेति मुख्याग्निहोत्रस्य त्वनुच्चारणवत्सा
यंप्रातः कालंत्व यस्यापि तत्प्राप्तिरित्याह॥ भोजनेनेति। उपस्थानपरिस्तरणादयो यज्ञाभावान्न प्रा
प्नुवंतीत्याह॥ एवमिति॥ यस्मात्तद्धर्मप्राप्त्यभावस्तस्माद्भोजनद्रव्येण न होमद्रव्योपसंहारः प्रा
णाय स्वाहेत्यादयो मंत्राः ननु स्वामिभोजनस्योत्तरकालत्वं श्रुत्या विहितं कथं पूर्वं ति षिध्योऽभीपादि
लिवचनेन बाध्यते तत्राह॥ जक्षत्स्वीति। उपासकान्यस्वामिविषयमुत्तरकाले त्वविधानमित्यर्थः
॥ नत्विति माधम्यमात्रेणेत्यर्थः। प्राणोपासकस्य प्राप्ते भोजने प्राधम्याधीतयादरस्यान्यथासि
द्धेफलितमाह॥ तस्मादिति॥ ॥ तन्निर्धारणा॥ ॥ उभयथा दृष्टांत कर्तृत्वान्नात्र स्यायमाह॥ किं
तानीति॥ यथाऽनारभ्याधीते पर्णमयी त्वं जुहूद्वारा क्रत्वंगतया कर्मसु नित्यं प्रयुज्यते तथां
गाश्रितोपासनानुद्गीथादिद्वारांगतया मिस्या नित्यत्वं गोदोहनयान्नाश्रयो गोदोहन
संयोगः पशुफलार्थत्वादनित्यत्वेन यथा प्रयुज्यते यथा वा पर्णवंगरूपाश्रयतेन्यम न्यापफ
लत्वादि नित्यं तथाकर्मसमृद्धोदिफलत्वादुपासनान्यनंगत्वेनानित्यानीति संक्षायार्थः॥ पूर्व

=पत्रसंख्या पि शेषः २

स॰भा॰टि॰

ख्द
४७

नित्यत्वमिति पूर्वपक्षे दः अनित्यपक्षो ज्ञानाश्रयप्राणाग्निहोत्रस्यानित्यत्वात् मांगोपास्तीनां नित्यत्व[illegible]॰

पक्षेउपासनानांप्रयोगनित्यत्वंसिद्धांतेत्वमितितस्योदाहरणद्वारेणपूर्वपक्षमाह॥ किंतावदिति॥ उप
सनानिकर्मांगानि अफलत्वे सति कर्मांगाश्रितत्वात्पर्णमयीत्वादिवत्तथांगतयाप्रयोगविधिनाक्षिप्तेनप्र
युज्यंतइतिप्राप्ते सिद्धांतसूत्रंव्याचष्टे॥ पाणीत्यादिना॥ उद्गीथादयः कर्मणांगुणाः अंगानीति षाष्ठ्य
म्यंरसतमत्वादिकं तन्निर्धारणान्युपासनानि यानि तानि कर्मसु नित्यपर्णमयीत्वादिवन्नियम्येरन्नित्य
र्थः॥ एषांकर्मांगत्वे तादृशीनस्या[illegible]विदुषः कर्म न स्यादंगलोपात्स्मादविशेषोपि कर्मकर्तृत्वश्रु
तिलिंगैरंगत्वानुमानबाध इत्याह॥ तेहेति स्याह॥ तस्यानियमस्य दर्शनादित्यर्थः॥ तांश्चेद
विद्वान्प्रस्तोष्यमूर्द्धा तेव्यपतिष्यतीतिचाक्रायणेनर्त्विजामाक्षिप्तत्वादनुपासकानामपि कर्मप्र
योगोस्तीत्याह॥ प्रस्तोत्रादीति॥ उपास्तीनां कर्मफलात्पृथक्फलश्रुतेर्नैकर्मांगत्वमित्याह॥
अपिचेति॥ तेनो॥ मित्यक्षरेण यश्चैतदक्षरमेवं रसतमत्वादिरूपेण वेदोपास्ते यश्च न वेद लोके
कर्म कुरुतः वयद्यपि तथापि तु विद्याविद्ययोर्नानात्वं भिन्नफलत्वं॥ दृष्टं हि मणिविक्रये ज्ञा
नाज्ञानाभ्यां वणिक्शबरयोः फलवैषम्यं तस्माद्यदेव कर्म विद्ययाश्रद्धयोपास्य श्रद्धयास्ति
क्यबुद्ध्या उपनिषदा रहस्यदेवताध्यानेन करोति तदेव कर्मफलातिशयवदित्यर्थः॥ कर्मणो
वीर्यवत्त्वं नाम फलवत्त्वं विद्याहीनस्यापि गम्यमानं विद्याया अनंगत्वमितिभावः॥ सान्निलोकादि

दृश्योपासनेषु कर्मसमृद्ध्यतिरिक्तलोकादिफलश्रुतेस्तत्र नांगत्वमित्याह ॥ तथेति ॥ अस्मैव विदुषे कल्पन्ते भोगायस
मथो भवंति भर मेरूर्ध्वा लोका आवृत्ता अधस्सनाभ्य इत्यर्थः ॥ तथाहि गुणवादश्रुतिफलश्रुतेरर्थमात्रवादत्वे
स्तुतिलक्षणा स्यात् सा न युक्ता मुख्यस्य फलपरत्वसंभवात् प्रयाजानुयाजकर्मणां तु प्रकरणाद्गत्यंगत्वेन
गत्वलाभात् श्रुतत्वात् भूतिफलश्रुतेरगत्यास्तुतिफलकत्वं यद्यपि पर्णमयीत्वादीनामंगत्वं वाक्यप्रकर
णं नास्ति तथापि तेषु फलश्रुतेः स्तुतित्वं तेषामक्रियात्वेन क्रियासंबंधं विना फलहेतुत्वानुपपत्तेरलस्तेषां
फलार्थक्रियोपाक्षिप्ता क्रतोर्ज्जुहूप्रकृतिद्रव्याक्षिप्तत्वात् पर्णमयी जुहूरित्यादिवाक्येनैव प्रकृतिद्रव्यापे
क्षणजुहूद्वारा सन्निहितक्रत्वंगत्वसिद्धेर्युक्तं फलश्रुतेरर्थवादत्वमिति भावः ॥ अक्रियात्मकगोदोहनादे
रपि फलश्रुतिरर्थवादः स्यादत आह ॥ गोदोहनादीनां हीति ॥ यदपः प्रणयेत्तत्पशुकामस्य सतो गोदोहनेन
ब्रह्मवर्चसकामस्य कांस्येनेति फलार्थविधिरेव नार्थवादः गोदोहनादेः क्रत्वेनाकांक्षितत्वे तत्वेनांगत्व
साध्याभावाच्चमसेन निराकांक्षितात्क्रियासंबंधितया स्वफलसाधकत्वसंभवात् तथा खादिरत्वेन निराकांक्षि
क्रत्वंग यूपमाश्रित्य बैल्वमन्नाद्यकामस्य खादिरं वीर्यकामस्येति फलार्थविधिरेवेत्यर्थः ॥ पर्णमयी
त्वादिषु फलविधिः किं न स्यादत आह ॥ नत्विति ॥ एवं विधोपादिवन्निराकांक्षत्वाद् इत्यर्थः ॥ जुहूरनाश्रय
दुस्सत आह ॥ वाक्येनेति ॥ जुह्वाः प्रकृतिद्रव्याक्षिप्तत्वादनेनैव वाक्येन क्रत्वंगतया जुहूप्रकृतिद्रव्यसंब

= प्रकृतिद्रव्यमाक्षिप्तं यया सा प्रकृतिद्रव्याक्षिप्ता तस्या भावस्तत्त्वमिति बहुव्रीहिः

= जुहूद्वारा क्रत्वंगतयेत्यर्थः १

=पणमयीसेन।नराक्रोक्ष अनुहितसर्थः १

घोविधेयः पश्चान्निरांकांक्षजुहमाश्रित्यनस्येव प्रवृत्तिद्रव्यस्य फलसंयोगो विधेयैरिति द्रव्यसंबंधे वाक्यभेद इत्यर्थः॥ वर्णनादिवैलक्षण्यमुपासनानामाह॥ उपासनानां त्विति॥ स्वपाक्रियात्वा घागादिवत् फलवि निष्टत्वेन विधानोपपत्तिरित्यर्थः॥ तस्मादिति॥ अंगत्वावेदकमानाभावादित्यर्थः॥ अत एवेत्यनंगत्वादेवे त्यर्थः॥ तस्मादंगोपास्त्यभावेपि कर्माधिकार इति सिद्धं॥ ॥प्रदानवदेव तदुक्तं॥ ॥वायुप्राणयोर्भेदाभे दवाक्याभ्यां संशयमाह॥ तत्रेति॥ अस्तु कर्मांगानां तत्संबंधोपास्तीनां च फलभेदान्निसहानि स्वरूप प्रयोगभेदः इह तु वायुप्राणयोः स्वरूपाभेदान्न स्वरूपप्राप्तिलक्षणफलैक्यात्त्वा ध्यानप्रयोगैक्यमि ति पूर्वपक्षयति॥ अपृथगिति॥ अग्निर्वाग्भूत्वेत्यारभ्य वायुः प्राणो भूत्वा नासिके प्राविशदित्यभेद दर्शयतीत्यर्थः॥ यतश्चोदेति सूर्य इत्युक्तं वदेति प्रश्ने सूत्रात्मकवायुर्वाच्यः वायुस्थाने प्राणं वदन्नेकत्वं तयोर्दर्शयतीत्याह॥ तथेति॥ किंच यदि वायुप्राणयोः पृथक् ध्यानं स्यात्तर्हि ध्यानांगभूतभेदोपि स्यादि ह तु प्राणापानाभ्यां निरोधात्मकव्रतैक्यश्रुतेर्ध्यानैक्यमित्याह॥ तस्मादिति॥ व्रतैक्यस्य प्रभुत्वात्त्वादित्य र्थः॥ किंच वायुप्राणौ संवर्गौ भेदेनोपन्यस्य परस्तादधिकारिषेषसंवर्गदेवैक्यश्रुतेः प्रयोगैक्यमित्याह॥ तथेति॥ महात्मनश्चतुर इति द्वितीयाबहुवचनेन चतुरश्चतुःसंख्याकानग्निसूर्योदकचंद्रानपराउश्च वाक्चक्षुः श्रोत्रमनांसि प्राणेकोदेवः कः प्रजापतिर्जगार ग्रीर्णवाननुपसंहृतवानित्यर्थः॥ नब्रवीतिभेदमितिश्रेषः॥ पर्थो

ग्निहोत्रं जुहोतीत्यत्राग्निहोत्रस्यैकस्यैव दध्नितंदुलादिगुणभेदेन सायंप्रातःकालभेदेन प्रयोगभेदस्तथा
न्नादो भवति। य एवं वेदेत्यस्मन्नायाः संवर्गविद्याया एकत्वेप्युपसन्निशिष्टवायुप्राणाख्यगुणभेदात्प्रयोग
भेद इत्यत्र सूत्रं सिद्धांतयति॥ प्रदानवेति॥ तौ वा एतौ संवर्गौ विद्योपास्यभेदवाक्यस्य प्रयोगभेदपरत्वा
द्वाक्यादेव भेदसिद्धिरित्यर्थः॥ पूर्वपक्षयुक्तमन्तव्यप्रसाह॥ नन्वित्यादिना॥ उपास्यतया प्रधानफलस
वर्गगुणविशिष्टोपास्यस्य भेदवाक्यविशेषादनुपास्यवायुतत्त्वैक्यवाक्यं न प्रयोगैक्यप्रापकमिति भावः॥
सूर्योदयास्तमयावीक्ष्यधीनत्वात्तद्भेदाभिप्रायेण प्राणायत्तौ उक्तौ ततोऽध्यात्माधिदैवावस्थाभेदेनोक्त
स्यध्येयभेदस्य निरासे यतश्चोदेतीति श्लोकस्य नत्राणि रित्याह॥ श्लोकेति॥ असामर्थ्येऽपि लिंगमा
ह॥ सयथेति॥ श्लोकोपन्यासवैयर्थ्यं तेनैकोपन्यासोपि तत्त्वाभेदाभिप्रायेण स्याह॥ एतेनेति॥ नन्वेकाराद्धा
युक्तं वक्तुः प्राण एवैको ध्येयो भातीत्यत आह॥ एकमेवेति॥ वदनदर्शनादीनि वाक्चक्षुरादीनां व्रतानि म्र
मरूपत्वेनाभग्नानीत्यत्र प्राणस्याभग्नव्रतत्वं निर्धारितं तथा ज्वलनतापादीन्यग्न्यादित्यादीनां व्रता
नि भग्नानि। निसत्ता वायोरभग्नव्रतत्वं निर्धारितं स यथैषां प्राणानां मध्यमः प्राणः स्थिरव्रत एवमेतासां
देवतानां वायुर्म्लोचंति ह्यन्या देवता न वायुः सैषानस्तमिता देवता यद्वायुरिति श्रुतेरतो भग्नव्रतानि
तासामर्थ एवकारेण वायुव्रतं निरस्यर्थः॥ अत्रैवार्थेति लिंगमाह॥ एवमिति॥ उकारश्चार्थस्तेन यायोः
सायुज्यं समानं दिवस्येस लोकतां जयतीत्यर्थः॥ नन्वत्र वायुप्राणाविनिर्देशकत्तेत्यत्राह॥ देवतेति॥ तस्मा

तत्वाभेदहृष्यपात्रैलेच्यमितिस्थितं॥संप्रतिपूर्वोक्तंदृष्यागुपदेनुं विवृणोति॥लथालोवाइति॥सोत्रंदृष्टां
तंध्यान्चष्टे॥प्रदानवदिति॥त्रयःपुरोडाशाः अस्यांसंतीतित्रिपुरोडाशिनीष्टीतस्यां।किंसहप्रदा
नमुतभेदेनो।तिसंदेहेपूर्वपक्षमाह॥सर्वेषामिति॥सर्वेषांदेवानामाभिमुख्येनप्रापयद्भिर्वषट्
कृतिगच्छतीतिअर्थं वषट्कारंवषट्कारमव्यदेवभागमित्यर्थः॥यद्वासर्वदेवार्थेयुगपदवदानंकार्
यमित्यत्रहेतुरर्थं वषट्कारमितिअन्यर्थत्यायेत्यर्थः॥एकार्थमवत्तेहविषि मोयागानाह
तयाव्याख्यादितिभावः॥एवंसदावदानश्रुतेदैवेक्याच्चपुरोडाशानांसहप्रक्षेपेप्राप्तेपृथक्प्र
क्षेपेइतिसिद्धांतमाह॥राजेति॥राजाधिराजगुणभेदेनाविन्द्रेदेवतात्पदादित्यर्थः॥किंचाप्यपु
णायजेतिप्रैष यजेतहोतायोमंत्रः पापेतसाज्ञा याज्या अनुब्रूहीतिप्रैषानंतरमंत्रः पुरोनुवाक्य
तिभेदोस्तितन्नास्यामिश्रो प्रथमपुरोडाशप्रदानेयाकृतायाज्योसाहुतीयप्रदानेपुरोनुवाक्या
याच्चपूर्वमनुवाक्यासापश्चात्याज्येतिप्रत्यासमन्याहेतिश्रुत्याविधानात्पृथक्त्वात्प्रक्षेपप्र
थक्त्वमित्याह॥याज्येति॥संघर्षदेवताकांडं॥बाहुल्येवेधारेण॥नानैवदेवतासंज्ञादिगुणभेदे
नसदावगमादितिसूत्रार्थः॥दृष्टांतेदेवताभेदात्कर्मभेदवद्विपाभेदःस्यादित्यर्थं तआह॥तत्र
स्थिति॥कर्मणीतियाक्यस्थदेवताभेदःकर्मभेदहेतुःहृदुत्वन्तादीप्सवतियएवंवेदेत्यत्तावक्यनहू
तविधायाःपश्चाततेबायुप्राणभेदेनभेदकःअग्निहोत्रस्यदध्यादिद्रव्यभेदइत्यर्थः॥ ११

स्य२ हे२

रि ५

तर्हि केनांशेन प्रधानस्य पृथक्त्वमिष्यत आह ॥ विद्यैकत्वेपीति ॥ अनुष्ठानभेदाद्देवताभेदः प्रयोगभेदश्चे
त्येतेनायं दृष्टान्तः इत्यर्थः ॥ लिंगदर्शनाच्च ॥ ॥ उपपत्तेः प्रागिदं सर्वं नैव सदासीन्नासदासीदित्युपक्रम्य
तन्मनःसृष्टिमुक्त्वा तन्मन आत्मानमैच्छदिति ईक्षणपूर्वकमग्नीनपश्यदिति मनोधिकृत्य पठन्तीत्य
र्थः ॥ पुरुषायुषं कृत्स्नमुत वर्षान्तर्गतैः षट्त्रिंशत्सहस्रैरहोरात्रैरवच्छिन्नतया मनोवृत्तीनामसंख्ये
यानामपि षट्त्रिंशत्सहस्रत्वं तावद्भिः कालैर्नैरन्तर्येण तावन्तोपि मनसैव संपादिताः अग्नयो मनश्चित
स्तानेकोनपञ्चाशन्मनोमयान्मनोवृत्तिषु संपादितान् मनःस्थस्य संबन्धित्वेन मनोपश्यत् तथा वा
क्प्राणादयोपि स्वस्ववृत्तिरूपानग्नीनपश्यन्नित्याह ॥ तथेति ॥ प्राणो घ्राणं कर्मेन्द्रियेण हस्ता
दिना चितः कर्मचितः । अग्निरहस्यं तु पूर्वं नाग्निचयनप्रकरणात्त्विमे तेग्नयः क्रत्वर्था उत प्राधा
न्यमात्रं कालिंगादिरूपस्य श्रुत्यर्थ्या वेति संशयमाह ॥ तेष्विति ॥ केवलविद्यात्मकत्र्यंग
त्वं विना भावनात्मकमाहेत्यर्थः ॥ एवं प्रयोगासंभवात् पुमाणयोर्धर्मानप्रयोगभेदोस्तु हेतुम
नाश्रित्य घटना । नाप्रकरणात्क्रतोरंगत्वेनैकप्रयोगत्वमिति प्राप्य सिद्धान्तमुपक्रमते ॥ तच्चेत्या
दिना ॥ पूर्वपक्षे भावनाग्नीनां क्रत्वंगत्वमिष्टं तेषां क्रियाग्निना विकल्पः समुच्चयो वास्तु । सिद्धान्ते पु
रुषार्थत्वमिति फलं ॥ तत्ते चत्वारः सर्वप्राणिमनोवृत्तिभिर्मम सदाग्नयश्चीयन्ते इति ध्यानदाढ्यस तिसर्वदा
तानि यानि किंचिन्मनसा संकल्पयतीति तेषामेवाग्नीनां सा वृत्तिः करणमित्येवं लिंगांगत्वं प्रयत्नाङ्गस्य यत्किं

चिकेरणे न सिध्यदर्शनादित्याह॥ तथादिति॥ एवंविदे स्वप्ने जाग्रेतेपि तदीयानग्नीनूतानि सर्वदा चिन्वंतीति स्त्त्व संख्याप्यानें सेलिंगं एवं जातीकपदे नोक्ता॥ एवं सिद्धांतमुपन्यस्य पूर्वपक्षयति॥ पूर्वेति॥ पूर्वस्य षट्त्रिंशत्सहस्राभिरग्नीन्चिनुतहस्रऋत्स्य साध्यवीष्टको ग्निर्मितिसन्निहितस्यार्थंविकल्पविशेषापदेशः क्रियाग्निवसांकल्पिका ग्नेयाप्यंगमितियावत्॥ किंविधिवाक्यस्थलिंगं प्रकृणाद्बलीयः अर्थवादस्थं वा आद्यमशीक्रमेति॥ सत्यमिति॥ नद्वितीयद्याह॥ लिंगमिति॥ मानस्याग्निविध्यर्थो वा दस्थलिंगानां स्वार्थप्रापकमानाभावाद्दौर्बल्यमित्यर्थः॥ तत्र स्थक्रियापदं व्याचष्टे॥ तस्मादिति॥ नन्वत्रि स्य दशरात्रस्यैव द्विरा... त्रादिषु प्रवृत्तिस्वलक्षणमाणामेवतेषांतिदेशात्तस्य मध्यदशरात्रस्य दशमेहन्यर्थो वेदशाह निमानसग्रहः श्रूयते आनपात्वा पात्रेण समुद्रस्य याप्राजापत्यमानो ग्रहं गृह्णातीति॥ आनयारस्य या पृथिव्या पात्रेण समुद्रं प्रजापतिदेवताकं मनोग्रहं गृह्यत इति ग्रहः सोमरसः मनसा रसत्वेन भावितमध्वर्युर्गृह्णातीत्यर्थः॥ अत एव त्विजा ध्यापित... विविधवाक्योच्चारणाभावाद्वियाप्य संज्ञाकः प्राप्ता॥ ग्रहं नाम सोमपात्रस्योपादानं ग्रहे तस्य स्थाने स्थापनमासादनं सोमस्य होमो हयनं हुतशेषादानमाहरणं शेषभक्षणाय त्विजामिथोनुज्ञाकरणमुपाह्वानं ततो भक्षणमित्येतानि मानसान्येव स्यर्थः॥

पं॰ २

= ध्यायति तेध्यायिनस्तत्रावस्तता तमेस्यर्थः ३

पं॰ २

देशा

शा.भा.टि.र.

४१

न्या.प्र.न.

सच मानसोऽग्निहोत्रादहरहं तरं स्वतंत्रं स्यात्संकल्पादन्नाहसंज्ञाविशेषान्नाहरंतरं किंतु प्रकरणादविवाक्यस्य
स्याद्वंगमिति सिद्धांतमाह ।। सचेति । कल्पः प्रकल्पनाप्रकारः । केचित्तत्र भाष्ये दशरात्रशब्दो विकृतिपरस्तत्रापि
दशमेहन्यविवाक्यसंज्ञके मानसग्रहस्यातिदेशप्राप्तत्वादंगत्वादित्याहुः मनश्चिदादीनां क्रियांगत्वे प्रकरण
मुक्तो लिंगमाह ।। अतिदेशाच्चेति । क्रियांगत्वसादृश्यादतिदेशादित्यर्थः सिद्धांतमाह ।। विद्येति । श्रुतिलिंगवाक्यैः
प्रकरणं बाध्यमिति सूत्रत्रयार्थः । तत्रावधारणश्रुतेरन्यथासिद्धिं शंकते ।। नन्वबाधेति । विद्याचित इति पदे
नैवाबाधस्य साधनत्वस्य लब्धत्वादवधारणं व्यर्थमित्याह ।। नेति । नहि रूपमस्यार्थवत्वे तत्राह ।। अग्नी सद्वेति ।।
लिंगं व्यक्ति । तथेति । अग्नीनां सर्वकालव्यापित्वेनानंगत्वे दृष्टांतमाह । यथेति । तदाध्यानकालस्येत्यर्थः । होमे
यथा सातत्यमुच्यते तद्वदग्नीनां सातत्यदर्शनमित्यन्वयः । यदुक्तमर्थवादस्थत्वाल्लिंगं दुर्बलमिति तन्न सर्वदा
सर्वभूतानि मदर्थमग्नीन् चिन्वंतीति प्राचोदित्यपूर्वार्थतया विधिकल्पना तथा च विधिवाक्यस्थत्वाल्लिंगं प्रकर
णाद्बलवदित्याह । न चेदमित्यादिना ।। एतेनेति विधित्वेनेत्यर्थः । वाक्यं विवृणोति । तथेति । संपदुपास्यमनोवृत्ति
प्रक्रियांगानां प्रयोजनमनुबंधः श्रुत्यादिभिः क्रियात्वे तदन्यथानुपपत्त्याग्नीनां पुरुषार्थत्वं । क्रत्वर्थत्वेनानां
सिद्धत्वेन संपादनानुपपत्तेरित्याह । इतश्चेत्यादिना । ते अग्नयः आधीयमानास्तेषामाधानं मनसैव कुर्यादित्यर्थः ।।
कालस्य छेदस्यानियमादस्य नियमाच्छ्रूयते श्वश्चेत्याद्यर्थः । ग्रहाः पात्राणि । अस्तुवन् उद्गातारः आशंसन्
होतारः मंसंतीति किं बहुना यत्किंच यज्ञे कर्म तदद्रूपाकारं कं यज्ञीयं स्वरूपोपादकं चेतत्सर्वं मनोमयं
कुर्यादित्यर्थः । क्वचिद्वह्निध्यानस्य क्रियानंगत्वेऽपि तद्धीध्यानवत्क्रियांगाश्रितत्वं स्यादित्याह । न चात्रेति ।

९७

शा.भा.

४१

अंगावबद्धमतितोस्याः क्रतेर्वैरूप्यं स्पष्टयति॥ नहीति। अनंगत्वनिषुसोगक्रतुसंपादनं पुरुषस्य यत्नस्य ध्या
नवत्स्वतंत्रमित्यर्थः। अदृष्टार्थेतिदेशो न भवति किंतु विकल्प्यार्थं प्रस्तुतमाह। नचेति। एकस्मिन्साध्ये निरपेक्षसा
धनयोर्विकल्पो भवति यथा व्रीहियवयोः क्रतुक्रियाग्नेध्योनानीनो साध्यभेदान्नविकल्प इत्यर्थः। अतएव
समुच्चयो निरस्तः। यदुक्तं क्रियानंगत्वसामान्यनातिदेश इति तन्नेत्याह। यत्विति। स्वत्रभक्त्वेच्चनार्थमाह॥
क्रत्वादीनिचेति। अनुबंधात्निर्देशाच्च तिलिंगवाक्येभ्य इत्यर्थः॥ एवमिति अर्थदृतिन्नोषः। मनश्चिदादीनां
स्वातंत्र्ये क्रियाप्रकरणाद्युत्कर्षः स्यादित्याशंक्य सद्दृष्टमाह॥ दृष्टश्चेति। एकादशो च्चितिं राजा स्वारा
ज्यकामो राजसूये नयजेतेति अथ स्याद्वेष्टिर्नाम क॥ चिदिति। त्रिरात्मानाम् आग्नेयोष्टाकपालो हिरण्यं दक्षि
णा बार्हस्पत्यं चरुः शितिपृष्ठो दक्षिणा ऐन्द्रमेकादशकपालमृषभो दक्षिणेतिलस्यावर्णभेदनप्रयोगभेदः। अप
तेयदि आम्नायते। यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेत यदि वैश्यो वैश्वदेवं चरुं मध्ये नि
धानं ध्याय यदि राजन्यस्तदैन्द्रमित्याग्नेयैन्द्रपुरोडाशयोर्मध्ये बार्हस्पत्यं चरुं निधायेत्यर्थः॥ तत्राग्नेयादि
चरुद्वंगानां तत्रेणप्रयोगो भाति मध्ये निधान लिंगात्प्रयोगाभेदे मध्ये निधानायोगात् तयानाप्रक्रामयाज ये
कथ्यवनाश्चसच्च तंत्रप्रयोगः राजसूयक्रतुबाध्याया मन्त्राध्वकामवर्णत्रयकर्तृकायामेवावेष्टोऽस्य यः ननु क्रत्वंतर्ग
ता या। ननु किमत्र नियामकं क्रत्वर्थाया मध्ये वेष्टेस्तंत्रप्रयोगः किं नस्यादितिचेन्न। वर्णत्रयसंयुक्तायां काम्याया
मेवांगते नै साधकस्य मध्ये निधानादिलिंगस्य सत्वात् तो लिंगेक वचनाभ्यां तंत्रे क्रे सति हिरण्यादिका
मिलिते कवर्द दक्षिणादेया अन्यथा त्र योगेक्या योगाज्जमात्रकर्तृ क्रत्वंतर्गतेष्टौ तु वर्णत्रयसंयोगाभावान्न मध्ये नि
धानादिलिंगं नास्तितन्न यतंत्रेकसाधका भावाद्दक्षिणाभेदेन तंत्रभेद इत्यंगानामाव्रत्तिरेव चरुष्विति सत्रार्थः॥

...शांति. स्.

५२

ब्र.भा.

व

अत्र चैकप्रयोगलिंगस्य क्रत्वर्थत्वे [illegible] सम्भवं काम्येष्टौ च सम्भवं वदतानेन सूत्रेण काम्येष्टेः क्रत्वर्थेभ्यो विलक्षण
त्वात् क्रतुप्रकरणादुत्कर्ष इति सूचितं सर्वोत्कर्षो युक्त एव राजमाने [illegible] त्वे क्रतुयजमानस्य कर्तो व
र्णनयकर्तृकेष्टेरन्तर्भावायोगादिति सिद्धान्ते तथा मनश्चिदादीनामुत्कर्ष इति भावः ॥ परोक्तं दृष्टान्तं विषमय
ति ॥ न सामान्यादिति ॥ क्रत्वर्थत्वपुरुषार्थत्ववैषम्येपि मानसत्वसामान्ये न विरुध्यते विषमयोरपि सा
म्यदर्शनादित्यर्थः ॥ किंच सर्वो नर ब्राह्मणयोः स्वतन्त्रविद्याविधानात्तन्त्र [illegible] स्यापि ब्राह्मणस्य स्व
तन्त्रविद्याविधिपरत्वमित्याह ॥ परेण चेति ॥ [illegible] लोकदृष्टि विधानं स्वतन्त्रमुत्तरत्र गम्यते पूर्वत्र म
उलपुरुषोपास्ति [illegible] पि मानसाग्नयः स्वतन्त्रा इत्यर्थः ॥ तर्हि क्रियाग्निनामकः पाठः कि
मर्थमित्यत आह ॥ रूपासाम्यिति ॥ मनश्चिदादीनां पुरुषार्थत्वमुक्तं तदयुक्तं देहात्मेति तु पुरुषाभा
वादित्याक्षिपति ॥ ॥ एक आत्मनः शरीरे भावात् ॥ ॥ सिद्धान्तफलमाह ॥ बन्धेति ॥ पूर्वपक्षे तु परलोकार्थ
कर्मसु मोक्षार्थविद्यासु चाप्रवृत्तिरिति व्यतिरेकमुखेन फलमाह ॥ न ससतीति ॥ व्यतिरिक्तात्मविचा
रस्य एवं तन्त्रकृतत्वा सो न रुक्त्यमि सा [illegible] तन्त्रस्य विचारस्यापीदमेव स्थलं न मूलं [illegible] मिति सत्त्वाभा
वादतः पुनरुक्तिरित्याह ॥ ननु [illegible] इत्यादिना ॥ यत्रैवं धी यजमानः स्वर्गं लोकमिती त्यादिवाक्यस्य
भोक्तृत्वाभावादप्रामाण्यप्राप्ताविति [illegible] विचारः कृत [illegible] इत्याक्षेपे चेनं लिंगमाह ॥
अत एवेति ॥ सत्त्वाभावादेवेत्यर्थः ॥ [illegible] उपरमः अस्याधिकरणस्यास्मिन्पादे प्रसंगात्संग
तिरित्याह ॥ [illegible] चेति ॥ आमुष्मिकफलोपासनानिर्णयप्रसंगेन तदपेक्षितात्मा [illegible] स्तित्वमुच्यत इत्यर्थः

= यज्ञानां आयुधानि पात्राणि वर्तन्ते यस्य स तथा

= आत्मास्तित्वाभिधानादुपरमः कृत इत्यर्थः २

५२

॥१८१॥

एतस्मिन्नेव चसस्य प्रथमसूत्रे थशब्देनाधिकारी चिंतितस्तस्मादिदमधिकरणं सर्वशास्त्रांगमिति शास्त्र
संगतिमाह ॥ कृत्स्नेति ॥ आक्षेपलक्षणामवांतरसंगतिमाह ॥ अपिचेति ॥ देहातिरिक्त आत्मास्ति न वेति
वादिविप्रतिपत्तेः संशये पूर्वपक्षमाह ॥ अत्रैक इति ॥ यद्यपि समस्तेषु मिलितेषु भूतेषु चैतन्यं न दृष्टं तथापि
कुंभस्य ज्ञानाभावाद्व्यस्तेषु तु नास्त्येव तथापि देहात्मकभूतेषु स्यादिति तेभ्यो भूतेभ्य एव चैतन्यं संभावयंतो
मदशक्तिवद्विज्ञानं संघातजं तद्विशिष्टसंघात आत्मेत्याकु रिसन्वयः ॥ यथा मादकद्रव्येषु तांबूलपत्रादिषु
प्रत्येकमदृष्टापि मदशक्तिस्तत्संघाताज्जायते तद्वदित्यर्थः ॥ ननु देहः स्वयं न चेतनः घटवद्भौतिकत्वात् किं तु चेत
नः कश्चित्स्वर्गादिभोक्तास्ति तत्सान्निध्याद्देहस्य चैतन्यविभ्रम इत्यत आह ॥ न स्वर्गेति ॥ ननु यद्यहं जानामीति देहस्य
ज्ञातृता यदि प्रत्यक्षत्वात्प्रत्यक्षधर्म चेन प्रसिद्धानां धर्माणां देहान्वयव्यतिरेकानुभवात्तदन्यात्मनि प्रत्यक्षाभावाद
प्रत्यक्षस्याप्रामाण्याद्धेत्वासेति प्राप्ते सूत्रस्थ न त्विति पदेन सिद्धांतं प्रति जानीते ॥ न त्वेतदिति ॥ अनुमानस्य ताव
त्प्रामाण्यमनिष्टं तात्पर्यं स्वेयमन्यथा व्यवहारासिद्धेः न स्थनागतपाकादावविष्टसाधनतानुमितिं विना प्रवृत्तिः सं
भवति तथा च ज्ञानादयो देहव्यतिरिक्ताश्रयाः देहसत्वेप्यसत्वाद्व्यतिरेकेण देहरूपादिवदित्याह ॥ व्यतिरेक
एवास्येति ॥ न चादौ श्यामदेहस्य पश्चाद्रूपांतरव्यभिचारः गुणत्वसाक्षाद्व्याप्यजातिसवच्छेदेनासत्वस्य विवक्षि

= तद्यावच्छिन्नव्याप्यात्मतत्वेन साक्षाद्व्याप्यत्वं । तथा च गुणत्वव्याप्यं गौरत्वादिना ऽव्याप्यत्वे सति गुणत्वसाक्षाद्व्याप्य
रूपत्वं तदवच्छिन्नत्वेनासत्वं रूपांतरस्य नास्तीत्यतो न तत्र व्यभिचार इत्यर्थः ।
= यत्र गौरत्वादि तत्र गुणत्वमिति तद्व्याप्तिः यत्र रूपत्वं तत्र गौरत्वादि

भा·टी·टी·

४३

=ऽपलब्धेरयोग्यत्वाच्च न तदसत्त्वसाधकत्वमित्याह तादिति ३

तस्माद्देहे च स्थिते सदा रूपत्वावच्छिन्नमस्त्येव ज्ञानत्वावच्छिन्नं तु नास्तीति न ज्ञानं देहधर्मः ॥ किं चैते न देहगुणाः परैर्दृश्यत्वादित्याह ॥ देहधर्माश्चेति ॥ किं च देहव्यतिरेकेण तेषामभावस्य संदिग्धत्वान्न देहधर्मत्वनिश्चय इत्याह ॥ अपि चेति ॥ न चानुपलम्भात्तेषामभावनिश्चयस्तत्रानुपलब्धेरमानत्वात् तद्धर्मिणो देहान्तरप्राप्याप्यनुपलम्भोपपत्तेश्चेति भावः ॥ उपलब्धिवदिति सूत्रस्थं पदं व्याख्यातुमुपक्रमते ॥ किमात्मकमिति ॥ तल्लिङ्गरूपातिरिक्तं तत्समुतरूपादिवद्धर्मः ॥ नाद्यः ॥ अपसिद्धान्तादिरूपत्वादितीयमर्थं निषेधति ॥ यदनुभवनमित्यादिना ॥ देहात्मकरूपानां चैतन्यं प्रति विषयत्वात् कर्तृकर्मविरोधेन विषयस्य कर्तृत्वायोगान्न रूपतः कर्तृकत्वं चैतन्यस्येत्यर्थः ॥ किं च ज्ञानस्य भूततधर्मत्वं रूपादिवज्ज्ञाद्युपपत्तेर्न तद्धर्मत्वमित्याह ॥ नहीति ॥ फलितं सूत्रपदार्थमाह ॥ अतश्चेति ॥ यद्देहातिरिक्तात्मस्वरूपोपलब्धिः सैवात्मा चेदनित्यः स्यादुपलब्धेरनित्यत्वादित्यत आह ॥ नित्यत्वं चेति ॥ घटः स्फुरति पटः स्फुरतीति सर्वत्र स्फूर्तेरभेदान्नित्यत्वं विषयोपरागनानात्वेन तु नानात्वमित्यर्थः एवमात्मा देहाद्भिन्न उपलब्धिरूपत्वादुपलब्धिवदिति सूक्तं किं चाजाग्रत्स्वप्नयोर्देहभेदेऽप्यात्मैक्यप्रत्यभिज्ञापि आत्मभेदे चान्यानुभूतेऽन्यस्य स्मृत्यनुपपत्तेः स्वप्नस्मृत्यादिमानात्मा देहाद्भिन्न इत्याह ॥ अहमिति ॥ निरस्तमप्याधिकारिविधित्सयानुवदति ॥ यत्तूक्तमिति ॥ उपलब्धेर्देहान्वयव्यतिरेकौ न देहधर्मत्वसाधकौ तन्निमित्तत्वेनान्यथासिद्धेरित्यधिकमाह ॥

ना

कृष्ण

= स देहो निमित्तं यस्यास्तत्तन्निमित्ता तस्या भावस्तत्त्वं तेन हेतुना तयोरन्यथा सिद्धेस्तौ देहस्योपलब्धिं प्रति निमित्तत्वं साधयतः न तु तस्या देहधर्मत्वं साधयत इत्यर्थः =१

अपि चेति ॥ उपलब्धिमात्रे देहस्य निमित्तत्वमप्यसिद्धमित्याह ॥ न चासंतमिति ॥ स्वप्नोपलब्धि
र्न देहजा, अन्या देहव्यापारं विनापि भावादक्षवदत एव तन्वभावेपि स्वप्नवद्योगिनां भोगं सूत्रक
द्वक्ष्यति ॥ जाग्रदुपलब्धेर्देहजत्वमस्तीत्यसंतमित्युक्तं । तस्मादुक्तानुमानानुग्रहीतान्मम श
रीरमिति भेदानुभवाद्देहमनुष्य इत्यभेदज्ञानं भ्रमरूपं संहरति ॥ तस्मादिति ॥ ॥ अंगावबद्धा
उद्गीथावयव ॐकारे प्राणदृष्टिः पृथिवी हींकारोग्निः प्रस्तावोन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौ
र्निधनमिति हिंकारादिपंचविधे साम्नि पृथिव्यादिलोकदृष्टिः उक्थाख्यशास्त्रे पृथिवीदृष्टिः इष्ट
काचिताग्नौ लोकदृष्टिरित्येवं कर्मांगाश्रितोपास्तयः संति तास्तूद्गीथादिसाधारणश्रुत्या विशेषसन्नि
धानाच्च संशयः ननूद्गीथादीनां सर्वशाखास्वेकत्वादुपास्तयः सर्वत्रेति वेद्ये क्वा निश्चये कथं संशय
इत्यत आह ॥ प्रतिशाखं चेति ॥ यथा देहात्मनोर्भेदादात्मधर्मा देहे न संभवति तथा प्रतिवेदमुद्गीथादी
नां भिन्नत्वादेकस्मिन्वेदे विहितोद्गीथाद्युपास्त्यो वेदांतरस्थोद्गीथादिषु न संभवतीति दृष्टं तेन प्र
पक्षपति ॥ स्वशाखेति ॥ उद्गीथमुपासीतेति विधिवाक्यस्थोद्गीथत्वसामान्यस्य व्यक्त्यपेक्षत्वात् स्वशा
खासंनिहितव्यक्तिग्रह इत्यर्थः सामान्यश्रुतेः संनिहितव्यक्तिपरतास्व्यसंकोचस्त्वत्र कर्तव्यः यत्र व्यक्तिमात्र

शा.भा.टि.र.
५४

त.भा

ग्रहेणोपपद्यते यथा शुक्लां गामानयेत्यत्र गोश्रुतेः सत्त्वेऽपि तच्छुक्लव्यक्तिपरतया संकोचः अत्र चानुपप
त्त्यभावाद्व्यक्तिमात्रसंबंधसामान्यमुपास्यमिति सिद्धांतयतीति॥ एवमित्यादिना॥ एवं शाखांतरीयविहितोपास्ती
नां शाखांतरस्थांगसंबंधे यः प्रतीतो विरोधस्तमंगीकृत्य संबंध उक्तः संप्रति विरोध एव नास्ति शाखांतरविहि
तांगानां शाखांतरस्थांगिसंबंधाद्वद् कृत्संबंधोपपत्तेरित्याह॥ अथवेत्यादिना॥ यजुर्वेदिनां कुक्कुटोऽसीति
मंत्रोऽस्ति कुटरुरसीति नास्ति तथापि तंडुलपेषणार्थदृषदादाने मंत्रद्वयस्य विकल्पेन विनियोगात्सोऽपि प्रा
प्नोतीत्यर्थः॥ सूत्रस्थादिपदोपात्तकर्मणामुदाहरणमाह॥ एषामिति॥ मैत्रायणीनामित्यर्थः॥ हेमंतशिशिर
योरैक्यादृतवः पंच तद्वत्संख्याकाः प्रयाजाः समानेऽपि तुल्यकर्मस्थले होतव्या इति पंचत्वगुणविधा
नात् गुणिनः शाखांतरविहिताः संबध्यंत इति भावः गुणमुदाहरति॥ तथा येषामिति॥ यजुर्वेदिनामग्नीषोमीयः
पशुः श्रूयते नाज इति जातिविशेषस्तथापि प्रैषमंत्रलिंगाज्जातिविशेषसंग्रह इत्यर्थः मंत्राणामुदाहरणांतरमा
ह॥ तथेति॥ सामवेदस्थानां यजुर्वेदपरिग्रह इत्यर्थः॥ तथेति॥ सजनासं इत्युद्देसेनेनोपलक्षितं सूक्तं सजनीयं
तस्य याजुषाध्वर्युकर्तृकप्रयोगे शंसनं दृष्टमित्यर्थः यो जातो बालएव प्रथमो गुणैः श्रेष्ठो मनस्वान्विवेक
वान् स इंद्र एवं विधो जनासो जना इति श्रुत्यर्थः॥ भूम्नः क्रतुवत्॥ सूत्रे कादित्यादिषु प्रत्येकं वैश्वानरो नोपा

है।

स्तिः समस्तोपास्तिरिति भेदः आख्याताच्चोभयत्र विधिफलयोः श्रवणादेकवाक्यत्वोपपत्तेश्च संशयमाह ॥ ॥
॥ तत्रेति ॥ सैव हि सत्यादयः इत्यत्र तत्र यत्तत्सत्यमिति प्रकृताकर्षात् विधेयैक्यमुक्तं तद्वदत्रैक्यहेत्वभावादगतार्थ
त्वमत्वापूर्वत्रोक्तीत्यादिश्रुत्या संनिधिबाधेनोद्गीथाद्युपास्तीनां सर्वशाखास्वुपसंहारवद्व्यस्तोपास्तीनां वि
धिश्रुतेः फलश्रवणस्य च समस्तोपास्तिसन्निधिप्राप्तांगत्वस्य बाधित्वात् द्विधेयत्वमिति पूर्वपक्षमाह ॥
प्रसवयवमिति ॥ फलानुक्तौ पूर्वोत्तरपक्षसिद्धिरेव फलं मंतव्यं ॥ सुतं खंडितं सोमद्रव्यं तस्यैव प्रसूतं त्वमासमंतात्सु
तत्समवस्था भेदः सोमयागसंपत्तिस्तव कुले दृश्यत इति यावत् । अत्र त्वनो वैश्वानरस्य मूर्द्धैव सुतेजा इति वाक्यप्रक
रणाभ्यां व्यस्तोपास्तीनां समस्तोपास्त्यंगत्वेन प्रयाजदर्शवदेकप्रयोगत्वे सिद्धे प्रधानतदंगफलानां अर्थवादगा
तानामेकप्रधानफलतयोपसंहाराद्वाक्यभेदो न युक्त इति सिद्धांताशयः एकदेशिव्याख्यामनूद्य दूषयति ॥ ॥
केचिदिति ॥ यद्युभयथोपासनं सिद्धांतस्तर्हि व्यस्तोपासनमेवेति पूर्वपक्षो वक्तव्यः स च न संभवतीत्याह ॥ व
स्पष्टेति ॥ कथं तर्हि सूत्रे ज्यायस्त्वोक्तिस्तत्राह ॥ सोत्रस्येति ॥ व्यस्तोपास्तीनामप्रामाणिकत्वद्योतनार्थं तु
क्तमिति भावः ॥ नानाशब्दादिभेदात् ॥ शांडिल्यादिब्रह्मविद्यैका नाना वा तथा संवर्गादिप्राणविद्यैका नाना वे
ति रूपैक्यभानाभावाभ्यां संशये दृष्टांतसंगत्या पूर्वपक्षमाह ॥ पूर्वस्मिन्निति ॥ रूपैक्यात् विद्यैक्यमित्याह ॥ ॥

न्या.मा.टी.रा.

५५

न.५पा.

अपिचेति। विधेर्भेदे चेदेकश्रुतस्य क्रतुविद्यायाः श्रुत्यंतरे पुनरुक्तिर्वैयर्थ्यमित्यत आह ॥ श्रुतिनानात्वमपीति ॥ पूर्वपक्षमाह ॥
॥ तस्मादिति ॥ सिद्धांते तु गुणानुपसंहार इति मत्वा सूत्रं योजयति ॥ विद्याभेदेऽपीति ॥ ननु भिन्नभावार्थवाचक
शब्दः शब्दांतरं यथा यजति ददाति जुहोतीति तस्मिंश्च भेदके मन्त्रादिवत् विध्यर्थभावनाया भेदो युक्तस्त
स्याः कृतानुबंधत्वाद्भेदेन स्वीकृतविषयत्वाज्ज्ञानार्थभेदादिति यावत्। प्रकृते तु वेदोपासीतेत्यादिशब्दार्थोपा
स्तेर्यागदानहोमवत्स्वतो भेदाभावात्सिद्धगुणकब्रह्मण एकत्वेन विषयतोऽपि भेदाभावात्॥ कथमुपास्तिभेद इति शं
कते॥ नन्विति॥ अत्र सूत्रे शब्दभेदोऽभ्युच्चयमात्रतयोक्तः विद्यानानात्वे सम्यक् हेतुत्वस्यादिपदोपात्ता गुणादपर
एतथाहि सिद्धस्यापि कार्यान्वयिगुणस्य कार्यान्वयितया कार्यत्वमस्ति यथाऽरुण्यादिगुणानां क्रयणभावनान्वयि
तया कार्यत्वं न तथा च तत्र प्रकरणे सत्तिशिष्टरूपोपास्तिभावनान्वयितया साध्यत्वं तद्गुणे विशिष्टतयोपास्यस्वरूपभे
दादुपासनाभेदः यथा छत्रचामरादिगुणभेदेन राजोपास्तिभेदः यथा वामिक्षावाजिनगुणभेदेन यागभेदस्तद्व
तथा प्रतिविद्यं फलसंयोगभेदाद्दहरशाण्डिल्यादिसमाख्याभेदाद्भेद इति समाधत्ते। नैष दोष इत्यादिना॥ यदुक्तं श्रुति
नानात्वं गुणांतरं विध्यर्थमिति तन्नेत्याह॥ न चात्रैक इति॥ किं च प्राप्तविद्यानुमानेनानेकगुणविधाने वाक्यभेदः
स्यादित्याह॥ अनेकत्वाच्चेति॥ किं च विधेयैकपक्षे गुणानां पुनरुक्तिर्वैयर्थ्यं च प्रसक्तिर्ज्ञानार्थबहुत्वैक्याद्देवत सिद्धेः

अ ३ पा २

व्या १

२

६

-यथाकाम्यविकल्पयोरतो विद्यानानात्वस्य तुल्यत्वादेनोः संशय

विद्यानानात्वपक्षे तु गुणानामप्राप्ते साम्प्राप्य सर्वे स्याह ॥ न चास्मिन्पक्ष इति ॥ फलभेदाच्चोदनैक्याभावात्सर्वगु
णध्यानस्याशक्यत्वाच्च विद्यानानात्वे स्याह ॥ प्रतिप्रकरणं चेत्यादिना ॥ दहरध्याने तु सर्वेषु लोकेषु कामचारो भवति वैश्वा
नरध्याता सर्वेषु लोकेष्वन्नमत्तीत्यादिफलभेदः इत्यर्थः न तु विद्यानानात्वे सिद्धे पश्चाद्दहरादिविद्याप्रतिवेदान्तमेकानेका
वेति चिंतो चिंतात कपमादौ साकृते त्यत आह ॥ स्थिते चेति ॥ विद्यानानात्वाधिकरणं पादादावेव संगतं अत्र प्रासंगि
कमिति भावः ॥ विकल्पः विद्यानां स्वरूपं उक्तानुष्ठानप्रकारोऽत्र निरूप्यत इत्युपजीव्योपजीवित्वसंगतिमाह ॥ स्थितइ
ति ॥ विद्यास्त्रिविधा अहंग्रहा विद्यास्तत्र स्वाअंगाश्रिता ॥ श्रेति तत्राहंग्रहविद्यासु प्रथमं विकल्पयोर्विद्यानानात्व
साम्यात्संशयमाह ॥ क्रिमिति ॥ पूर्वपक्षे यथेच्छमनुष्ठानमिति नियमः सिद्धांते विकल्पेनानुष्ठानमिति नियम इति फल
भेदः तत्रानियमं साधयंति ॥ तत्र तत्र स्थितत्वादित्यादिना ॥ एक पुरोडाशफलत्वाद्यथा[illegible]ति यवयोर्विकल्पस्तथा वि
कल्पनियम एवासां विद्यानां न्याय्यस्तत्कल्पफलत्वान्न च फलभूयस्त्वार्थिनः काम्यकर्मसमुच्चयोपि दृष्ट इति वाच्यं
ईश्वरसाक्षात्काराख्यफलभेदे ध्यानसामहंग्रहोपास्तीनां साक्षात्काराख्यफलस्य तुल्यत्वात्तस्य चैकेनाप्युत्पन्नत्वेऽ
न्यस्याः कृतसाधनावाच्छिन्नविक्षेपकतयात द्विघातकत्वाच्चेति सिद्धांतभाष्यार्थः ॥ मास्तु साक्षात्कार इत्यत आह ॥ ॥
साक्षात्करणसाध्यं चेति ॥ यस्य पुंसोऽहमीश्वर ईश्वरोऽहमिति साक्षात्कारः स्याद्विचिकित्सा च नास्ति अहमीश्वरो न वे
ति तस्यैवेश्वरप्राप्तिरित्यर्थः जीवन्नेव भावनया देवत्वं साक्षात्कृत्य देहपातोत्तरकालं देवानाप्नोतीति श्रुतेः

श्री

॥१॥ दि.दा.

४८

त.ध्या.

२

रार्थः॥ अङ्गग्रहणमनुष्ठानक्रममुपसंहरति॥ तस्मादिति॥ काम्यास्त्विति॥ तद्रूपोपास्तयोऽत्र विषयस्तासु विकल्प उत
यथाकाममनुष्ठानमिति पूर्ववत्संशये सत्युपास्तित्वाविशेषादहंग्रहवद्विकल्प इति प्राप्तावपवादं सिद्धान्तयति॥
॥अवसिष्टेति॥ स यः कश्चिदेतं वायुमेवं गो लौकिकलिप्तानां दिशां वत्संपास्ते नासौ पुत्रमरणनिमित्तं रोदनं रोदिति
तन्मते निसमेव जीवन्पुत्रो भवतीत्यर्थः अहंग्रहदृष्टेस्तु साक्षात्कारद्वारत्वमुपाधिरिति भावः॥ संप्रत्यङ्गावब
द्धोपास्तीनामनुष्ठानक्रमं वक्तुं पूर्वपक्षयति॥ अङ्गेषु स्तुतिः॥ अङ्गाश्रितत्वात्सफलत्वात्संशयमात्रक्रियमिति॥ यथा
क्रत्वनुष्ठाने तदाश्रितानामङ्गानां समुच्चयस्यानुष्ठाननियमस्तथाऽङ्गानुष्ठाने तदाश्रितोपास्तीनां तन्नियम इति सूत्रार्थः॥
ननु तन्निर्धारणनियमः सत्राणामाश्रितानां गोदोहनवदनङ्गत्वमुक्तं तत्कथमनङ्गानामङ्गवत्समुच्चयः शङ्क्यत इत्युच्यते॥
अङ्गान्यनुष्ठापयन्प्रयोगविधिर्यदुपासनानि नानुष्ठापयेन्नहि तेषां तदाश्रितत्वं व्यर्थमिति मन्वानस्य शङ्केति भावः॥
तर्हि गोदोहनस्यापि समुच्चयः स्यादित्यत आह॥ शिष्टेश्चेति॥ शिष्टिः शासनं विधानमिति यावत्॥ विहितत्वाविशेषा
त्समुच्चयो गवादिस्त्यर्थः गोदोहनस्य तु नानुष्ठाननियमः चमसस्थाने विहितत्वात्तन्नियमे चमसविधिवैयर्थ्यादुपा
सनानां तु न कस्यचिदङ्गस्य स्थाने विहितत्वमिति समुच्चयनियमो न विरुध्यत इति भावः॥ समुच्चये लिङ्गमाह॥
समाहारादिति॥ ऋग्वेदिनां यः प्रणवः स सामवेदिनामुद्गीथ इति छान्दोग्ये प्रणवोद्गीथयोरैक्यध्यानविधिर
स्ति तस्य फलार्थवादो होतृषदनादिस्यादिः होतुरासनस्थलं वाचिनाहोतृषदनशब्देन शंसनं लक्ष्यते उद्गा

णा धृ वेदो३ वि दृ ४

ना स्वरादिप्रमादाद्दुष्टमप्युद्गीथं सम्यक्कृतमनात् होतृषदनादनुसमाहरत्येव निर्दोषं करोत्येव किलास्य मानप्रा
णवेन स्वीयोद्गीथस्यैकत्वध्यानबलादित्यर्थः ततः किं तत्राह ॥ इति ब्रुवन्निति ॥ सामवेदस्थोद्गीथध्यानस्य ऋग्वेदो
क्तप्रणवसंबंधो योऽदृष्टः स एवांगानां सर्ववेदान्तविहितोपास्तिसमुच्चये लिंगं प्रणवरूपपदार्थस्योपास्तीनां च वे
दान्तरोक्तत्वसादृश्याद्वेदान्तरोक्तांगसंबंधस्यापि समानत्वादित्यर्थः ॥ ॐकारस्य ध्येयस्य साधारण्याद्पि तदाश्रि
तध्यानानां समुच्चित्यानुष्ठानं गम्यत इति लिंगांतरमाह ॥ गुणेति ॥ तेनोंकारेण वेदत्रयोक्तं कर्म प्रवर्तत इत्यर्थः अन्वय
मुखेनोक्तमेवार्थं व्यतिरेकतोऽपि व्याचष्टे । अथवेति ॥ फलेच्छयाऽऽनीयमानादुपास्त्य नियम एव युक्तः अंगवत्समुच्च
य नियमे मानाभावादिति सिद्धांतयति ॥ नवेति ॥ प्रयोगविधिः खलु सांगप्रधानानुष्ठाननिर्यामकः न त्वनंगानां ग्राहक इ
त्याह ॥ नेति ब्रूम इति ॥ विमतोपास्तयः क्रतौ न समुच्चित्यानुष्ठेयाः स्वतन्त्रफलत्वाद्गोदोहनवदिति भावः ॥ शिष्टेऽश्वे सूक्तं
निरस्यति ॥ अयमेवेति ॥ समाहाराद्गुणसाधारण्यश्रुतेश्चोक्तं लिंगद्वयमपि मानान्तरप्राप्तस्य द्योतकं न त्वपूर्वं साधकं = अनुवं प्रय
अर्थवादस्थत्वादित्याह ॥ परं चेति ॥ गुणसाधारण्यसूत्रस्य द्वितीयां व्याख्यां दूषयति ॥ न चेति ॥ तत्रोक्तत्वाभावे तदा
श्रितत्वं कथमित्यत आह ॥ आश्रयेति ॥ इदमेवैषामंगाश्रितत्वं यदंगाभावे सत्त्वं न त्वंगव्यापकत्वमित्यर्थः किं
च ॥ विदुषा ब्रह्मणान्येषामृत्विजां पालयितृत्ववचनान्न सर्वोपास्तीनां सहप्रयोग इत्याह ॥ दर्शनाच्चेति ॥ ऋग्वेदादि

दिविकृतांगलोपे व्यासस्तितोम प्रायश्चित्तादिविज्ञानवत्वमेवं नित्वं ब्रह्मणरस्यार्थः॥५१॥ इति श्रीमत्परमहंसपरिव्रा
जकाचार्यश्रीमद्गोविंदानंदशिष्यस्य श्रीमद्रामानंदस्य कृतौ शारीरकभाष्यटीकायां भाष्यरत्नप्रभायां तृती
याध्यायस्य तृतीयः पादः समाप्तः॥३॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ ॥ छ॥ छ॥ छ॥ छ॥ छ॥
॥ॐ॥ कर्मांगविद्याप्रसंगाद्ब्रह्मज्ञानस्य कर्मांगत्वमाशंक्याह॥ ॥पुरुषार्थोतः शब्दादिति बादरायणः॥ पूर्वपादे
परापरविद्यानां गुणोपसंहारो तया स्वरूपं निश्चितं। अस्मिन् पादे तासां कर्मानंगतया पुरुषार्थहेतुत्वं निरूप्य
तत्सेवकविद्याविषयत्वं पादयोः संगतिः तत्रादौ तत्वज्ञानं विषयी कृत्य वादिविप्रतिपत्त्या संशयमाह॥ अथेति॥
पूर्वपक्षे ज्ञानकर्मणोरंगांगित्वेन समुच्चयः सिद्धांते केवलज्ञानान्मुक्तिरिति फलभेदः। पआसेति प्रजापसूक्त
ब्रह्मविद्यायां लोकादिकं सगुणविद्याफलं मोक्षानंदे तत्र्या वाभिप्रायेणोक्तमिति मंतव्यं। एवं सिद्धांतमुपक्रम्य
पूर्वपक्षयति॥ शेषत्वादिति॥ सूत्रे र्थवादपदमावर्तनीयं ज्ञानात्पुरुषार्थवादोर्थवाद इत्यर्थः। ज्ञानं कर्मां
गमफलत्वे सति कर्मशेषाश्रयत्वात् प्रोक्षणपर्णमयीत्वाद्विदिति भावः। तत्वनिर्णयार्थं गुरुशिष्ययोः कथा
वादोयमिति ज्ञापनार्थं जैमिनीग्रहणं। अंगिफले नांगभूतात्मावगतप्रयोजनस्तदाश्रयेत त्वंस्का

दि

सूत्र
५८

त्र

रके ज्ञाने फलश्रुतिरर्थवादः रसँदंष्टां तो यथेति॥ पर्णमयीद्रव्यं यजमानस्याजनं संस्कारः प्रयाजा। दीनिकर्माणि
तेष्विति सर्थः वर्मकवचं। आत्मज्ञानं दकर्मांगमानाभ्या वादितिसिद्धांतीशंकते। कृष्यमिति। पूर्वपक्ष्याह॥ कत्रिति॥
युक्तो स्यनारभ्याधीतायाः पर्णतायाजुहुद्वारेण वाक्याक्रत्वंगत्वावोजुह्वाः क्रतुव्याप्यतयाक्रतूपस्थापकत्वा
त्॥ नतथा त्मविज्ञानस्यात्मद्रव्यद्वारति वाक्याक्रतुसंबंधउपपद्यते। आत्मनः क्रतु॰ व्याप्त्यभावादिति सिद्धांतीदू
षयती॥ नेती। देहभिन्नत्वेन ज्ञातात्मनः क्रतुव्याप्यत्वमस्तीति पूर्वपक्षीसमाधत्ते। नव्यतिरेकेति॥ सर्वथेति देह
सत्वेनापीत्यर्थः देहभिन्नकर्तृज्ञानस्यांगत्वेप्यकर्तृब्रह्मात्मज्ञानस्यनांगत्वमिति शंकते॥ नन्वपहतेती॥
यस्यार्थेजायादिकं प्रियं सोयंसआत्माद्रष्टव्य इति भोग्यलिंगेन सूचिते भोक्तृभिन्नमकर्तृस्वरूपं नास्तीतिसा
माध्यर्थः। जन्मादि सूत्रमारभ्यसाधितं स्वरूपं कथं नास्तीति शंकते॥ नन्विति॥ स्वरूपज्ञानं वेदानां फलं तस्य
कत्वर्थत्वपुरुषार्थत्वविचारेण दार्ढ्यं क्रियत इत्याह। सत्यमिति॥ ब्रह्मविदां कर्माचारदर्शनं ब्रह्मविद्यायाः क
र्मांगत्वे लिंगमित्याह॥ आचारेति। ईजे यागं कृतवानित्यर्थः के भगवंत इति ब्राह्मणान्संबोध्य ब्रह्मविद्के
कयराजो ब्रूते॥ अहं यक्ष्यमाणो यागं करिष्यमाणोस्मि वसंत्वत्र भगवंत इत्यर्थः॥ अन्यपरेष्विति विद्याविधि

ता॰१मा॰टि॰टी॰

५८

तं॰ध्या
पादार

परेष्विति सर्थः॥ अल्पायासंयुक्तेरुपायं ज्ञानं लब्ध्वा बह्वायासं कर्म न कुर्यादित्यत्र दृष्टांतमाह॥ अल्पइति॥ समीप
रसर्थः॥ अर्क इति पाठे पथमेव अर्थः॥ ब्रह्मविद्यायाः कर्मांगत्वे तत्तीयाशंक्य। तिरप्यस्तीत्याह॥ तच्छ्रुतेरिति॥ लिं
गांतरमाह॥ समिति। तं परलोकं गच्छंतं विद्याकर्मणी अनुगच्छत इत्यर्थः॥ गुरोः शुश्रूषारूपं कर्म कुर्वन्नतिशेषेणाव
शिष्टेन कालेन यथाविधानं वेदमधीत्यानंतरं आचार्यस्य कुलात् ब्रह्मचर्यादिति यावत्। अभिसमावर्तनं कृ
त्वा कुटुंबे गार्हस्थ्ये स्थितः प्रत्यहं शुचौ देशे स्वाध्यायाध्ययनं कुर्वन्नन्यांश्चानि स्यादिधर्मान्कुर्वन् छन् ब्रह्म
लोकं प्राप्नोतीति श्रुत्यर्थः॥ यथावद्यातस्तत्र विमोक्षपर्यंत एवमध्ययनमर्थावबोधांतं दृष्टेऽर्थावबोधाख्ये
फले संभवति। अध्ययनस्यादृष्टार्थत्वायोगादिति पूर्वतंत्रे स्थितं॥ ततश्च ब्रह्मापि वेदार्थ इति तदवबोध
वंतः कर्मविधानमित्यर्थः॥ यावज्जीवकर्मनियमोऽप्यत्र लिंगमित्याह॥ नियमाच्चेति॥ इत एके कर्माणि कु
र्वन्नेव शतं संवत्सरान् जीवितुमिच्छेदेवं कर्मित्वेन जीवति त्वयि नरे कर्म पापं न लिप्यते। इतः कर्मणोऽन्य
था नास्ति कर्म विना श्रेयो नास्तीत्यर्थः। जरामर्यं जरामरणावधिकमित्यर्थः॥+ अधिकेति॥ अस्य महतः+
कर्तुरधिकस्यासंसारिणः कर्मशेषत्वाभावात् तज्ज्ञानं कर्मांगमिति सिद्धांतयति विशेषात्स्त्रियसं
मुचितआत्मा पर एव द्रष्टव्यः यः प्राणादि प्रेरयति सोऽप्यशनायाद्यसंपर्वाक्यशेषात् परएव तथा क्षिपरूषो

क
५

प्रवस्थासाक्षिपरं ज्योतिरिति वाक्यद्वयात्परपर इति। विभागः जीवानुकर्षणमभेदाविशिष्टमिति संगिकारे
न विरोध इति ब्रह्माभेदे जीवस्य विरोधादित्यत आह॥ पारमेश्वरमिति ज्ञानं कर्माङ्गमपि तत्त्वे सति कर्मन्
त्रयाभ्यासत्वादिसूत्रोक्तेतु [illegible]रसिद्ध इति भावः॥ ब्रह्मविदां कर्मव संन्यासस्यापि दर्शनात्तेषां कर्मदर्शे
नास्तु कं लिंगं लोकसंग्रहार्थत्वेनान्यथासिद्धमित्याह॥ तुल्यं त्विति॥ किंच यस्य कर्म सनब्रह्मविदि साह
॥अपि चेति॥ तर्हि वैश्वानरविद्यायाः कर्माङ्गत्वं स्यादित्यत आह॥ नचेति॥ ब्रह्मविदां लोकसंग्रहार्थं
क्रियमाणमपि कर्म नश्वरस्याभिमानाभावेनाधिकारित्वादितिभावः॥ समन्वारंभवचनस्य मुमुक्षुविष
यत्वमंगीकृत्य विद्या अन्यं मुमुक्षुं मुक्त्वेन अन्वारभ्यत इति विभागउक्तः। सूत्रकृता वस्तुतस्तत्तन्नास्तीत्या
ह॥ नचेदं समन्वारंभवचनमिति॥ तत्र संसारिविषये तं विद्ये सादिवाक्येयथाप्राप्तानुवादि नि विद्या
दिपदार्थमाह तत्रेति॥ विहितो क्रियादि विद्याप्रतिषिद्धानग्नस्त्रीध्यानादिरूपा च न्वैतदिति। उक्तमिति
त्रेषः अविद्यत्वाद्वेदार्थज्ञानशून्यत्वादित्यर्थः॥ मा पदमात्रज्ञानव्यावर्तकं नकर्मज्ञानस्येत्याह॥ ॥
न्नेषदोष इति॥ नियमवाक्यम ज्ञविषयमिसूत्रं विदुषो ज्ञानस्तुत्यर्थं वेत्याह॥ स्तुतय इति॥ एवं कर्म कुर्व
स्यपि लिप्यते नरे नेतो विद्यालब्धात्। ब्रह्मभावादन्यथास्ति कर्मणा संसारो नास्तीति यावत् यतः कर्मन

र्म

त्रे

त्र

लिप्यते अपूर्वरूपफलेपायनश्वरवती त्यर्थः श्रुतेरिति भावः स्वेच्छातः कर्मसाधनप्रजादिसाग लिंगात्र विद्या
स्वतंत्रैफलेत्याह। काम इति। तदेतत्स्मयेषां नो स्माकं अयमपरोक्ष आत्मा अयमेव लोकः पुरुषार्थस्तेवयं
किं प्रजादिना करिष्याम इत्यसालोच्य कर्मसक्तवंतइत्यर्थः। नन्वयं तोकइति ज्ञानफलस्य प्रत्यक्ष
त्वोक्तिरयुक्ता कर्मफलवद् दृष्टत्वादित्यत आह॥ अनुष्ठेयेति।। न केवलमनुपयोगात् ज्ञानस्य कर्मानं
गत्वं किंतु कर्मनाशकत्वाच्चेत्याह॥ उपमर्दं चेति॥ किं च कर्मतत्त्वज्ञाने नांगांगित्वं। भिन्नाधिकारिस्थत्वात् राज
सूयबृहस्पतिसववदित्याह॥ ऊर्ध्वेति॥ त्रयो धर्मस्कंधाः कर्मप्रधाना आश्रमाश्चतुर्थो ब्रह्मसंस्थ इत्यर्थः ब्रह्मच
र्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृण इति श्रुतेः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशये
दिति स्मृतेश्च प्रागापात् गार्हस्थ्यस्यैव निरस्तत्वं त्रयस्य पारिव्राज्यमित्यपि शंकान्तरापास्ता ब्रह्मचर्यादेव प्रव्रजे
दिति यमाश्रममिच्छेत्तमावसेदिति च विधिश्रुतिस्मृत्योः विरक्तविषयत्वाद् गमादित्याह॥ प्रतिपन्नेति॥
तस्मादिति संन्यासनिष्ठत्वादित्यर्थः संन्यासो नास्तीत्याक्षिपति॥ परामर्शं जैमिनिः ऊर्ध्वरेतःसु इति तं पा
रिव्राज्यमनुष्ठेयं न वेति मानश्रुतिमूलत्वाभ्यां संदेहे श्रुतिमूलत्वान्नानुष्ठेयमित्याह॥ त्रयइति॥

= ऽथेदानीमाश्रमाणां [illegible] बहुवचनं = १

आश्रमाणामवांतरभेदापेक्षया बहुवचनं। तथा च काण्वायनस्मृतिरर्थतोनुक्रम्यते गायत्रो ब्राह्मः प्राजापत्य [illegible] यो
बृहन्निति ब्रह्मचारी चतुर्विधः तत्रोपनयनादूर्ध्वं त्रिरात्रमक्षारालवणाशी गायत्रीमधीते सावित्रः यस्तु
वेदस्य ग्रहणांतं ब्रह्मचर्यं चरति स ब्राह्मः ऋतुकाले स्वदारगामी नित्यं परस्त्रीविमुखः प्राजापत्यः सांवत्स
रं वेदव्रतं [illegible] कुर्यात् प्राजापत्यः आमरणं गुरुकुलवासी नैष्ठिको बृहन्निति उच्यते। गृहस्थोपि चतुर्विधः वा
र्तिकः शालीनो यायावरो घोरसंन्यासिकश्चेति। तत्र कृषिगोरक्षादिरूपा वैश्यादिवत्साजीवन्त्रिसादि क्रि
यापरो वार्तिकवृत्तिः यायावरस्तु याचितवृत्तिर्याजनाध्यापनप्रतिग्रहविमुखः शालीनस्तु षट्कर्मनिरतो
याजनादिवृत्तिः संचयी उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वन् सह उञ्छवृत्तिर्ग्रामवासी घोरसंन्या
सिक इत्युच्यते। हिंसाविमुखत्वात्। वानप्रस्थोपि चतुर्विधः। वैखानस औदुंबरो वालखिल्यः फेनपश्चेति
तत्राकृष्टपच्यौषधीभिर्ग्रामबहिष्कृताभिरग्निहोत्रादि कुर्वन् वैखानस उच्यते। यस्तु प्रातरुत्थाय यां दिशं
पश्यति तत्र स्थौदुंबरबदरीनीवारश्यामाकैः कर्मपरः स औदुंबरः। यस्तु जटावल्कलधारी अष्टौ मासान् स्वस्व
पार्जनकृतं चतुर्मास्ये संगृहीताग्नी कार्तिक्यां संगृहीतपुष्पफलत्यागी स वालखिल्यः फेनपास्तु शीर्णपर्णफलवृत्त

यो

रा.भा.टि.रा

५०

त्र.धा.

ऽयोपन्न कश्चिद्वसंतः कर्मपरा इति। तथापरि व्राजकाश्चतुर्विधाः। कुटीचका बहूदका हंसाः परहंसाश्चेति। तत्र स्वपुत्र गृहे भिक्षां चरंत स्त्रिदंडिनः कुटीचकाः। बहूदकास्तु त्रिदंडिनः शिक्यजलपवित्रपादुकाप ज्ञोपवीतकौपीनका षायवेषधरा स्तीर्थान्यटं तो भैक्ष्यं चरंतः आत्मानं प्रार्थयंते। हंसा एकदंडिनः शिखावर्जंय ज्ञोपवीतधराः शिक्य कमंडलुपाणयः ग्रामैकरात्रवासिनः कृच्छ्रचांद्रायणपराः परमहंसा स्त्वेकदंडधरा मुंडा अयज्ञोपवीतिनः त्यक्तसर्वकर्माण आत्मनिष्ठा इति। अत्र पूर्वपक्षे संन्यासाभावान्नानास्य स्वतंत्रफलत्वासिद्धिः सिद्धांते तद्भावा त्तत्सिद्धिरिफलभेदः स्कंधा आश्रमाः आत्मानं शरीरं आचार्यस्य कुले गृहे कृशायन्नैष्ठिकः। सर्पः स्कंध श्रुतावाश्रमान विधीयंते किंतु ब्रह्मसंस्थता स्तूयते स्तुत्यर्थमनूद्यंते। नन्वनुपरापर्योपीति। अनुवा दापेक्षितपुरोवाद प्रतीतिमंगीकरोति। समिति॥ प्रत्यक्षा स्कंधश्रुतिरेवपुरोवादो ~~नानुपीति। अनुवाद पेक्षितपुरोवादप्रतीतिमंगीकरोति।~~ संसमिति॥ नानुवाद इत्यत आह॥ स्मृतीति॥ तयोरपीयमेवश्रुतिर्मू लमस्तु कृत्स्नश्रुतौ विधिमात्रकल्पनालाघवात् अस्या अनुवादत्वे तु मूलत्वे कृत्स्नागिनिकाश्रमश्रुति स्ता त्रविधिश्चेति द्वयकल्पना गौरवादित्यत आह। अतश्चेति। स्मार्तत्वादाश्रमाः प्रत्यक्ष यावज्जीवकर्म

नो

न

सू

छू ८

विधिश्रुतस्य विरुद्धत्वात्स्वाः विरु२द्धा स्वनग्निका आश्रमा उपेक्ष्याः कर्मानधिकृतैरंधादिभिर्वानुष्ठेया सर्वः
यावज्जीवश्रुतिविरोधात्साध्यवत्त्वाज्यमिति भावः स्कंधश्रुतावनुवाद्यत्वाविरोधात् गार्हस्थ्यवदितरेषामन
नुष्ठेयत्वमाशंक्य तस्य श्रौतत्वादनुष्ठानं नेतरेषाम श्रौतत्वादतो ब्रह्मसंस्थत्वस्तुतिपरमिदं स्कंधवाक्य
मित्याह। नचेत्यादिना। तं तु संततं तिंतत्वाये चेति तेर्चिषम विसंवन वंध्नीति वाक्यत्रो धादि सर्वः॥ स्कंधत्रयाद्ब
स्याश्रमेषु रूढत्वात्त्रत्रनाश्रमविधिरित्याह। संदिग्धं चेति। तर्हि प्रव्रजंतीत्याश्रमविधिरस्त्वत आह। तथैत
मिति। आसन्नो को महीयान् यदर्थमत्राश्रमांप्रव्रज्यामपि कुर्वतीति स्मृतिर्वर्तमानापदेशादि सर्वः॥ संप्रति
पूर्वपक्षमाक्षिपेयंश्रुतिर्नास्तीति कृत्वाचिंत्यं सनत इत्याह। नचेत्यादिना। स्कंधश्रुतावितराश्रमाः श्रुत्यंत
र विहिता अनूद्यंते। एतद्वाक्यानुवाद्यत्वात्। गार्हस्थ्यवदिति सिद्धांपति। अनुष्ठेयमिति। अनुवादस्य क्व
चिद्विधिपूर्वकत्वे दृष्टांतमाह। यथा चेति निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामिति वा
क्ये दैवकर्मण्युपविधीयते तत्स्तुतये द्वयसनूद्यते मानुषक्रियासु देहार्द्रवस्त्र बंधनाख्यनीविनस्य सौकर्या
र्थतया प्राप्तत्वात्। पित्र्ये कर्मणि प्राचीनावीतस्यापि विध्यंतरप्राप्तत्वादि सर्वः। वाक्यांतरे च स्वाध्यायादेवपारि
व्राज्यस्य विधिर्विधेयैः स्मृतिसादि साह २। तथैतमेवेति। अस्येति परिव्राज्योक्तिः। विज्ञेय वेदानुवचनादि

श्चाहित्या पारिव्राज्यस्य विधेयतेत्यर्थः वाक्यांतरेपि साम्यश्रुतिमाह ॥ ये चेति । अस्येति वानप्रस्थोक्तिः वि
धेयपंचाग्निविद्यया वानप्रस्थस्य सहोक्तेः तस्यालदपि विधेयमित्यर्थः । श्रुतत्रित्वान्यथानुपपत्त्या स्कंधत्रयो
स्याश्रमपरत्वनिश्चयपरसाह । यत्त्वमित्यादिना । उत्सतिविन्नाइतियजेताध्येतव्यं दद्यादिति एव्यानुसन्ना
इत्यर्थः । स्कंधश्रुतेरनुवादकत्वमंगीकृत्य विध्यंतरकल्पनेनाश्रमा अनुष्ठेया इत्युक्तं । इदानीं विधित्वं
तस्या एवकल्प्यं लाघवादित्याह । विधिर्वेति । यावज्जीवादिश्रुतेर्विरक्तविषयत्वान्न लाघवबाधकत्वमि
ति भावः । अल्पफलत्वेनाश्रमत्रयनिंदया ब्रह्मसंस्थतास्तुतिपरमेकमिदं वाक्यं भातीति तत्राश्रमविधि
त्वनुष्ठयमपुत्तमपि त्राकृते । नन्विति । आश्रमाणां विध्यंतरप्राप्त्यभावादनुवादायोगात् स्तुतिलक्षणा
त्वावरं विस्पष्टाश्रमविधिच्छेदकल्पनमपूर्वत्वादित्याह । सत्यमित्यादिना । प्रतीतैकवाक्यत्वभंगेन वि
धिच्छेदकल्पने दृष्टांतमाह । धारणवदिति । महापितृयज्ञे प्रेताग्निहोत्रे च स्रुचि प्रक्षिप्तहविराहवनी
यं प्रति । यदानीलेत दातस्पृत विधो ध्यस्तात्समिधं धारयन्ननुद्रवेदिति श्रावकः । विनिता धो धारणस्ता
वकत यो परिहीस स्पैकवाक्यच्छेदः तृतीयाध्याये जैमिन्याचार्येणोक्त इत्यर्थः । एवं च त्वार आश्रमा
विधीयंत इति पक्षउक्तः । संप्रत्याश्रमत्रयानुवादेन पारिव्राज्यमेकमेव विधीयत इति पक्षांतरमाह ॥ २

एकवाक्यत्वसमानेपि दैवे होमे स्रुग्दंडोपरि समिद्धारणे विधिरेवापूर्वत्वादिति २

यदापीत्यादिना ॥ ब्रह्मसंस्थता विधीयते कथं पारिव्राज्यविधिरित्याशंक्य विचारयति ॥ प्राचेति । ननु त्रय इति वाक्य
आश्रमचतुष्टयस्याप्राप्तेर्निर्बीजो ऽयं विचार इत्याशंक्य तद्वाक्ये परिव्राजकः परामृष्टो न वेति संदिह्याद्यपू
र्वपक्षं प्राप्तिमाह । यदि चेति ॥ नन्वनाश्रम्येव ब्रह्मसंस्थः किं न स्यादत आह । अनाश्रमत्वेति ॥ अनाश्रमीनाति
ष्ठेतेति निषेधादिति भावः द्वितीये सिद्धांतं प्राप्तिमाह । अथेति । एवं परामर्शतदभावाभ्यां संशयमुक्त्वा पूर्वप
क्षयति । न त्रेति । वनस्थस्येति स्यसाधारणं कृच्छ्रादिकं तप इति प्रसिद्धं तेनैकेन तपःशब्देनोभयग्रहणम
न्याय्यं भिक्षोः तपस्वित्वप्रसिद्ध्यभावाच्च । तथा च यज्ञाद्यसाधारणधर्मद्वारा गृहस्थाद्याश्रमत्रयं ब्रह्म
संस्थशब्देनैव ब्रह्मनिष्ठाप्रधानश्चतुर्थाश्रमो गृह्यते । स च स्तुतिसामर्थ्यात् सह ब्रह्मसंस्थया विधीयत
इति सिद्धांतयति । तदयुक्तमित्यादिना ॥ पृथग्व्यपदेशाच्च ब्रह्मसंस्थः पूर्वोक्तेभ्य आश्रमिभ्यः पृथग्भूत
इत्याह । अपि चेति । न चावस्थाभेदेन तेषामेव ब्रह्मसंस्थतोपपत्तेः कर्मत्यागे च परिव्राडेव ब्रह्मसंस्थ इत्यस्म
दिष्टसिद्धिरिति भावः । इममेवार्थं स्पष्टयितुं शंकते । कथं पुनरिति । यद्यपि ब्रह्मसंस्थशब्दः संन्यासाश्रमेण रूढः
तथापि योगात् तमेवोपस्थापयति । अन्याश्रमेषु यौगिकार्थासमवायादित्याह । अत्रोच्यत इति । सर्वकर्मसा =ऽव

=ध्यं स्यादिति वाच्यं कर्मत्यागे नापि सति मंदप्रज्ञत्वे प्रज्ञापि स्य
त् सति कर्मसेते बाधिक्षिप्तचेल जो ब्रह्मसंस्थता ३

ना०भा०टि०रा०

९२

न०ध्या

ष्ठिन: श्रवणाद्यर्थं ब्रह्मनिष्ठातिरेकेणानुष्ठेयं नास्तीत्यत्र मानमाह। तथा चेति। न्यासः संन्यासो ब्रह्मेति स्तूयतेऽनेन हे
तुमाह॥ ब्रह्माहीति॥ हिरण्यगर्भो हि पर इति प्रसिद्धः अतो ब्रह्मत्वेन स्तूयत: संन्यास: पर एवेति स्तुत्वा कर्मा
णि निंदति। तानीति। ततो न्यास एव ज्ञानद्वारा मोचकत्वादधिक इत्यर्थ:॥ तद्रूपो ब्रह्मचिंतास्तदात्मानो
ब्रह्मस्वरूपास्तन्निष्ठा: श्रवणादिपरास्तत्परायणा ब्रह्मप्रेप्सवः। निष्कामा इति यावत्। एवं ब्रह्मसंस्थ
शब्दस्य ज्ञानप्रधानाश्रमवाचित्वादमृतत्वकामस्तमाश्रममनुतिष्ठेदिति विधि: परिणम्यते। अतो न ज्ञा
नानर्थक्यदोष इत्युपसंहरति। तस्मादिति। संप्रति कृत्वा चिंतामुद्घाटयति। अनपेक्ष्येति। शिष्यबुद्धि
वैराग्यार्थं स्वं धश्रुतिमादाय चिंता कृतेति भाव:। यदि वेतरथेति। ब्रह्मचर्ये स्थितस्यैव पूर्वसुकृतप
रिपाकाद्वैराग्यं यदि स्यादित्यर्थ:। यदुक्तं कर्मानधिकृतांधादिविषय: संन्यास इति तन्नेत्याह। न चेति।
सामान्यश्रुते: संकोचे तत्त्वभाव: पृथगिति संन्यासस्येति शेष:। व्रती गोदानादि वेदव्रतवान् गुरुकुलान्नि
वृत्तिरूपस्नानानंतरं अकृतगार्हस्थ्यो गुरुसेवी स्नातक:। उत्सन्नाग्निर्विधुर: अग्रहीताग्निरनग्निक प्रव्रजे
दित्यन्वय:। संकल्पांगानामेव कथंचित्कर्मानधिकृतानां संन्यासो युक्त: विकलानां त्वंधादीनां न ज्ञानप्रधानसं

कृ

६

न्यासाधिकरणस्याह। ब्रह्मेति। दृष्टिपूतसंचारश्रवणादिकं विना ज्ञानानुत्पत्तेः शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा कर्णाभ्यां भूरि विश्रुवमित्यंगसाकल्यप्रार्थनात् लिंगाच्चांधपंगुबधिराणामनधिकार इत्यर्थः। तत्रेति॥ पारिव्राज्यस्य ब्रह्मज्ञानांगत्वं चेत्यर्थः ब्रह्मसंस्थयापब्रह्मसंभावसाक्षात्कारायेतियावत्॥ स्तुतिमात्रं। पृथिवीं ब्रह्मधि पुरुषवागृक्सामानां सप्तानां रसानां रसतमोऽष्टम उद्गीथावयव ॐकारः परमः परमात्मप्रतीकत्वात्। परस्य ब्रह्मणोऽर्द्ध स्थानं तदर्हतीति परार्ध्य इत्यर्थः। आसु श्रुतिष्वंगोपादानात् पूर्वार्थत्वाच्च संशयमाह। किमिति। यथानुष्ठेयगार्हस्थ्य साम्यश्रुतेः पारिव्राज्यस्यानुष्ठेयत्वं न तद्वदासां श्रुतीनां जुह्वादिस्तुतिश्रुतिसाम्यात् स्तुतित्वमिति पूर्वपक्षयति। स्तुत्यर्था इति। जुहूरियमेव पृथिवीति स्तूयते चयने। स्वः कूर्म आदित्य इति स्तुतिः आहवनीयः स्वर्गलोक इति। तथोद्गीथादीनां रसतमत्वादिगुणैः स्तुतिरित्यर्थः। स्तुतिलक्षणातो वरं विधिकल्पनमनुष्ठानफललाभादिति सिद्धांतयति। न स्तुतिति। पूर्वपक्षे त्वननुष्ठानं फलं सिद्धांते त्वनुष्ठानं फलमिति मंतव्यं। स्तावकत्वेनार्थवत्त्वं किं न स्यादित्यत आह॥ विधायकस्येति॥ युक्तमिदमेव जुह्वादिश्रुतीनां फलवज्जुह्वादिविधिप्रकरणस्थतया स्तावकत्वेनार्थवत्त्वं रसतमादिश्रुतीनां तु क्रत्वंगविधिप्रकरणस्थत्वाभावात् फलवदपूर्वोपास्तिविधायकत्वमेव युक्तं क्रत्वं

रा.भ.टि.टी.
६३

- विध्यपेक्षितेति विषयो ये
तो लक्षणात्तस्मात्स्वरस्त है

तरःश्रुतिवदिति भावः। किं चात्र विधिः कल्प्यः इति ज्ञत्वा चिंतयोक्तं वस्तुतस्तु न कल्प्यः कुप्तत्वादित्याह॥ ॥
भावेति॥ न चैवमुपासना विधिस्तावक त्वं रसतमादिश्रुतीनामिति सांप्रतं। विध्यपेक्षितविषयार्थकत्वसंभ
वे स्तुतिलक्षणायोगादिति भावः। देवोमदिष्टं कुर्यादिति प्रार्थनादावपि लिंगादिप्रयोगात् उपासीतेत्यादिश्रु
त्यानां कथं विधिपरत्व निश्चय इत्यत आह। तथा चेति। एतल्लिंगादिकं वेदेषु सर्गतो नियमेनेष्टसा
धनत्वाख्यविधेर्लक्षणं ज्ञापकं वा स्यात्। उपपदादिबाधके त्वन्यार्थपरमिसर्थः। तदिदमाह। लिङादी
ति। न च श्लोकपंचममिसुक्तेः पंचपदानामेव विधित्वलक्षणत्वं नोपासीतेत्यादिनामिति वाच्यमितव्यं क्रियासा
मान्यवाचिनां कृष्वस्तीनामुदाहरणेन सर्वधातूपरक्तलिंगादीनां विधित्वलक्षणत्वस्य विवक्षितत्वात्पं
चमपदं तु लापेक्षया श्लोकपूरणार्थम्। स्तुर्धावति पंचम इतिवत्। यद्यपि डुकृञ् करण इति धातोरेव करण
त्वाद्वित भावनाख्यक्रियासामान्यवाचित्वं नेतरयोर्द्वयोः। तथापि तयोरपि सत्तायां सत्त्वाविसर्थान्तरे तत्त्वप्राप्ति
जन्माख्यभवनस्य तत्फलत्वात्स्ति त्वस्य च प्रयोज्यनिष्ठस्य प्रयोजकव्यापार सकभावनाव्याप्यत्वात्त
योः क्रियासामान्यवाचित्वव्यवहारस्तत्र कुर्यादिति प्रकृत्यर्थभावनाख्या तेनानूद्यते यथा द्याविति

६६
६

प्रयोगे प्रकृत्यर्थो द्वित्वं प्रत्ययेनाभूयते तद्विशिष्टं च तस्यां इष्टसाधनत्वाख्यविधिर्बोध्यते कर्ता तु तयाक्षि-
प्यत इति आक्षिप्तकर्तृका भावनोदाहृता तथा क्रियते सत्रापि प्रकृतिप्रत्ययार्थौ व्याख्यातौ कर्मात्र प्राधान्ये-
नाक्षिप्यत इत्याक्षिप्तकर्मिका भावनोदाहृता आख्यातानां कर्त्रादिकारकेशक्त्यभावात्कर्तृकर्मणोरादे-
पएवेति मिंनमांसकमतं कर्तव्यमिति कृत्प्रत्ययेन कर्मकारकमुच्यते। तस्योपसर्जनत्वेन प्रकृत्या भावनोक्ते-
तिभेदः तथा दंडी भवेदूपेत दंडदंडिनौ मित्युदाहर्तव्यं। तथास्या रूपेत भवितव्यमिति अस्ति धातोरप्युदाह-
रणं द्रष्टव्यं। अस्तेर्भूरादेशात्। एतद्धातुत्रयोपरक्तलिंगादिभिः सर्वधात्वर्थोपरक्तभावनागतेष्टसाध-
नैकरूपो विधिरेक एवोच्यते धातूनां प्रत्ययानां कर्त्रादिकारकाणां च भेदेपि विधिभेदो नास्तीति ज्ञापना-
र्थं प्रतिधानूदाहरणत्रयं दर्शितमिति सर्वमनवद्यं। एवं सूत्रे भावो विधिरिति व्याख्यापतस्तत्वमिति
व्याचष्टे। प्रतिप्रकरणं चेति। एवं ऋत्विगुपासकः काम्यागानस्य गानेन फलसंपादने स्येष्टे समर्थः
सर्वः। एवमंगाश्रित विद्या अपि स्वतंत्रफलाः किमुत तत्र मनंगाश्रविद्या स्वातंत्र्यमिसा सवि-
द्या स्वातंत्र्यचिंतायां अस्याः पर्यवसानाद्दसंगतिर्बोध्या। पारि ॐ वार्थानि। अश्वमेधेषु त्रादि

Margin: भावितव्य
Margin: त्ये

पू २

शा.भा.टि.टी.

८४

परिप्लवतां परात्रे पारिप्लवमाचक्षीतेति नानाविधाख्यानकथनात्मकः पारिप्लवप्रयोगो विहितः तथा च वेदान्त
स्थकथानामाख्यानत्वसामान्याद्विद्यासान्निध्याच्च संशयमाह। किमिति। पूर्वस्तु सपेक्षया विधिर्व्यापानुष्ठानलाभा
दि सूक्तं तथैव कथानां न विद्यास्तावकत्वं पारिप्लवानुष्ठानलाभादिति पूर्वपक्षः तत्र फलमाह। ततश्चेति। यथा दे
वस्य त्वा सवितुरित्यादिमन्त्रेषु कस्यचित्सदस्य प्रयोगसमवेतार्थतया शेषस्य प्रयोगाङ्गत्वं तथा वेदान्तस्थकथानां
प्रयोगशेषत्वं तदेकवाक्यतया सर्ववेदान्तानां कर्मशेषत्वात्र विद्याप्राधान्यमिति सर्वथा। कथानां गुरुशिष्यसमाचारप्रदर्श
नेन बुद्धिसौकर्यद्वारा सन्निहितविद्याशेषत्वं सामर्थ्यलिङ्गादतो विद्याप्राधान्यमिति फलं मत्वा सिद्धान्तयति। तन्नेत्या
दिना। अश्वमेधे प्रथमेऽहनि मनुर्वैवस्वत इति कथां ब्रूयात्। द्वितीयेऽहनि यमो वैवस्वत इति तृतीयेऽहनि वरुण आदित्य
इति वाक्यशेषे कथानां विशेषितत्वादुपक्रमस्य संकोचो युक्त इति भावः। तर्हि कथानां विनियोगः स्यात्तत्राह सन्नि
धानाद्विद्यास्विति साह।। तथा चेति। प्ररोचनं। प्रीतिजननं स प्रजापतिर्वपामुदखिदत्। अहो मायोद्धृतवान्निति सस्य प्रा
ज्ञापस्य मज्जं तूपरमात्मनेतेति विधिशेषत्वं एवमन्येषां तत्तद्विधिशेषत्वं द्रष्टव्यं एवमाद्याधिकरणप्रमेयविद्या
तत्र मधिकरणत्रयेण दृढीकृतं साधाधिकरणस्य फलमाह। अतएव चेति। ब्रह्मविद्यास्वफले मोक्षे जनयितव्ये सा
कारित्वेन कर्माण्यपेक्षते न वेति वादिविवादात्संशयेत्ते नैति ब्रह्मविद्या सुण्यकृत्तेन सरसादिश्रूसाज्ञानकर्म

सम्मुच्चयेन मोक्षप्राप्तिकथनादपेक्षत इति प्राप्ते विद्याया मुक्तिहेतुत्वाद् विद्यानिवृत्त्या स्वमुक्तौ न कर्मापेक्षेति सि-
द्धान्तयति। पुरुषार्थ इति। अग्नीन्धनपदेन तत्साध्यकर्माणि लक्ष्यन्ते पुण्यकृत्तैजसः शुद्धसत्त्वोत्तमविद्भूत्वा तेन वेदनेने-
ति ब्रह्म प्राप्नोतीति श्रुतिर्यथाख्येयेति भावः। मुक्तावेवं कर्मणामसामर्थ्यादनपेक्षा विद्यायां त्वस्ति चित्तशुद्धिद्वारा तेषा-
मपेक्षेत्यधिकं वक्तुमुपसंहरति स्वरूपसंहारसूत्रस्य फलमाह। अधिकेति ॥ अधिकमाह। सर्वापेक्षा। यथाश्रमाफ-
लत्वाद्विद्यानिवृत्तौ कर्मानपेक्षा तत्प्रमात्वाद्विद्यायामपि प्रमाकरणम्। तत्साध्यायां नास्ति कर्मापेक्षेति पूर्वपक्षः
तत्र विद्यार्थकर्मानुष्ठानासिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति भेदः। अत्र विविदिषापाइष्यमाणज्ञाने वा यज्ञादीनां कर्मा-
णां हेतुत्वमपूर्वत्वाद्विधीयते प्रमायामप्युत्पत्तिप्रतिबंधकदुरितक्षयाख्यशुद्धिद्वारा कर्मसाध्यत्वसंभवात्। न च पारंपर्ये-
ण तीयाश्रुतिविरोधः ज्वालाद्वारापारंपर्येपि काष्ठैः पचतीति प्रयोगाद्द्वारस्याव्यवधायकत्वान्न च शुद्धेर्द्वारत्वेमा-
नाभावः ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः। कषायेकर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इति स्मृतेः। अविद्यया मृत्युं
तीर्त्वा विद्ययामृतमश्नुत इत्यादिश्रुत्या कर्मणा पापनिवृत्तौ ज्ञानेन मुक्त्यभिधानाच्चेति सिद्धान्तयति। इदमिति।
नन्वत्र विविदिषन्तीति पंचमलकारेण विविदिषाभावयेयुरिति सन्नर्थेच्छैवेभाव्यतया भाति तां विषयसौन्दर्यलक्ष-
तयोल्लंघ्य वेदनं चेद्भाव्यमुच्यते तर्हि वेदनमप्युल्लंघ्यतत्त्वं मोक्ष एव कर्मभिर्भाव्यः किं न स्यादित्यत आह॥
विविदिषासंयोगाच्चेति। इष्यमाणतया विद्यायाः शब्दतः फलत्वश्रवणादश्रुतमोक्षो न फलमन्यथा काष्ठैः

था

वि

स्तु

मा॰टि॰रा॰

८५

= ननु श्रोतव्य इत्यत्र श्रवणस्य विहितत्वात्कथं पुनरत्र तत्
रूपत्वादिस्यत आह। शमेति। ८

पचतीसत्राधिकाष्ठानां पाकफलत्वसिद्धेतुत्वप्रसंगादिति भावः। कर्मणां ज्ञानार्थत्वे लिंगवाक्यान्याह। अथेत्यादिना॥
कश्चिद्देवभागः साक्षात् ब्रह्मात्मरूपं पदं ब्रूते कश्चित्तु ज्ञानार्थकर्मद्वारेति मत्वा सर्वे वेदा इत्युक्तं। स्पष्टमन्यत्। एवं विद्योत्पत्तौ
बहिरंगानि कर्माण्युक्त्वा तदंतरंगाण्याह। शमेति। विद्यास्त्वरूपत्वे नैकवाक्यत्वसंभवे वर्तमानोक्तिसंगेन विधिकल्पनमयुक्तं वि
धानाकल्पाद्यप्रसंगादतः शब्दमात्रलभ्या विधेति पराभिप्रायमनूद्यांगीकरोति। तथापि त्विति। शमादेरावश्यकत्वात्
शब्दमात्रलभ्या विधेत्यर्थः। यस्मादेवं विन्न लिप्यते कर्मणा पापकेन तस्मादेवं विद्यार्थी शमाद्युपेतो भूत्वा विचारयेदिति वि
धिर्गम्यत इत्याह॥ नेति ब्रूमहति। अत्रोपरतपदेन संन्यास उक्तः तस्य श्रवणांगत्वमते शमादिविशिष्टश्रवणमत्र विधीयते
यदि तु लोकमिच्छंतः प्रव्रजंतीत्यानंपुरस्कृत्य संन्यसेदिसादि श्रुतिस्मृतिष्विफलवत्वेनोत्पत्तसंन्यासस्यांगत्वायोगात्श्रो
तव्य इति विहितश्रवणानुवादेनानेक शमादिविधाने वाक्यभेदापातात्। पर्यवदितिप्रक्रत्या श्रवणलक्षणादोषाच्च संं
न्यासो न श्रवणस्यांगं किं तु ततः प्रागनुष्ठेयत्वेपि श्रवणवत् ज्ञानार्थ इति मतं तदा शमादिसमुच्चयेन ज्ञानं भावयेदिति ज्ञाना
र्थशमादिसमुच्चयविधिरित्यनवद्यां। पूर्वं यज्ञादिश्रुतेः स्वरूपसर्थत्वांगीकारः आपाततो गुडजिह्विकान्यायेन शमादिस्वीकारा
र्थं कृतस्तमिदानीं त्यजति। यज्ञादीन्यपीति। यज्ञादीनां विद्यासाधनत्वरूपसंयोगस्यापूर्वत्वाद्वांतरवाक्यभेदेन वि
धिः स्वीक्रियते ब्रह्मविद्यावाक्येन महावाक्येकवाक्यताच्चेत्यर्थः। प्रकरणेप्यवांतरविधिरत्रापूर्वतं तत्र संमतिमा
ह। तस्मात्पूर्षेति॥ दर्शपूर्णमासप्रकरणे श्रुतं पूषाप्रपिष्टभाग इति तत्र पूषादेवतापिष्टभागो वा दर्शपूर्णमा
सयोर्नास्त्यतः समाप्रतीतस्य कालत्रयानवग्रष्ट स्यद्रव्यदेवतासंबंधस्यापि विनाभावेन यागविध्युपस्थापकत्वा

सा

= विद्याप्रकरणस्यार्थः ३

= यागविकारोवेनेसः ?

= ननु
सर्व श्रो॰
दर्शमीक
वयचेदा
तमाह प्र

णादिसर्थः
सर्वागत्र्ध
विद्यास्यांशन
नितयवे॰हि

दूस
८

प्रयोगज्ञानाय विधिपदमध्याहृत्य प्रकरणादुत्कर्षेण प्रबोधे यो न पिष्टभागः कर्तव्य इति तौ संबधः पौष्णं पेषं भवतीत्यत्र
विचारित इत्यर्थः। स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्याद्याः स्मृतयः कर्मणां ज्ञानहेतुत्वे शमादिवद्यावद्वि
नोदयमनुवृत्तिः स्यात्तथा च सन्न्यासाभाव इत्यत आह। तत्रापीति। दृष्टविक्षेपनिवृत्तिद्वारा शमादीनां ज्ञानार्थत्वा
दनुवृत्तिर्न कर्मणामदृष्टद्वारा ज्ञानार्थत्वादिति भावः। सर्वान्नानुमतिः॥ एवं विदि प्राणस्यान्नं सर्वमिति ध्यानवती सर्वः
जग्धं न भक्षितमपूर्वत्वाद्विधिश्रुतेश्च संशयः अपूर्वत्वाच्च ज्ञानादिवद्विधिः कल्प्य इति पूर्वपक्षयति। विधिरिति। अत्र भक्ष्या
भक्ष्यनियमसागस्य विद्यांगत्वसिद्धिः फलं। सिद्धांते तु विद्यास्तुतिरिति विवेकः। न कलंजं भक्षयेदिति शास्त्रं प्राण
विद्यातिरिक्तविषयं यथा ग्राम्यकर्मणि वामदेव्यसामोपासकव्यतिरिक्तविषयं परस्त्रीनिषेधशास्त्रं तद्वदिति
प्राप्ते सिद्धांतसूत्राद्बहिरेव दर्शयति। नेदमिति। प्राणविद्याविधिसन्निधेः अशक्यत्वाच्च स्तुतिरेव न विधिः कल्प्यः
निषेधशास्त्रविरोधात्। कॢप्तो हि विधिः सामान्यशास्त्रबाधकः न तु कल्प्य इति भावः। स्वस्वस्य प्राणविदो न स
र्वान्नानुमतिरिति सत्रलिंगं वदन् सूत्रं योजयति। तद्दर्शयतीति। मटच्योरकरुक्षुद्रपक्षिणस्तैर्हतेषु कुरुदेशस्थसस्ये
षु दुर्भिक्षे जाते बालया सह जायया मुनिर्देशांतरं गच्छन्निभ्यग्रामे स्थितवान्। इभ्यो हस्तिपालस्तेन सामिखादितानर्धभ
क्षितान् कुल्माषानुषस्तिश्चाक्रायणो भक्षितवान्। इभ्येन जलं गृहाणेत्युक्ते स उच्छिष्टं वै मे पीतं स्यादिति निषिध्य माषाः किन्नो
च्छिष्टा इतीभ्येनोक्ते सति माषभक्षणे जलत्यागे च कारणमुवाच। अन्नाशनमापदस्ति जलपानं तु स्वेच्छात इत्यागादौ

शा.भा.टि.टी. | टी.भा

८२

(स्वा) लभ्यत इति मामान्वैदिकोऽवशिष्टा जायायै दत्तवान् सा चापकृतापत्सुरापदं त्वा त्वामाबान् संरक्ष्य प्रातस्तस्मै ददौ स च तान् खादि
त्वा राज्ञोपशंगत्वा प्रस्तोत्रादीनाक्षिप्य प्राणादिकां प्रस्तावादिदेवतामुपदिश्य धनं प्राप्य स्थितः स त्रोऽप्युच्छिष्टभक्षणजत्व
सागास्त्वशिष्टाचारलिंगात् श्रौतादनापदि विदुषाप्यभक्ष्यं न भक्षणीयमिति सूच्यत इति भावः। सुरापानेनापि वैनमाशे (टी)
क्यकल्पनापि तन्न कार्यमित्याह। तथा मद्यं नित्यं ब्राह्मणस्तु इति न पिबेदिति शेषः कुतः स्मारंक्यमरणांतप्रायश्चित्तविधानादि
त्याह। सुरापस्येति। उक्तार्थमितितत्त्वांसुरामिति शेषः इतश्च सानपेयेत्याह। सुरापा इति।। उदात्तस्य तीनांमूलश्रुतिमाह।।
(४) त्राक्षश्चेति। कामकारोपध्ये प्रवृत्तिः। सोऽपि निषेधोऽप्युपपन्नतरो भवति। नहवा एवंविदि स्यस्यार्थवादत्वात्। पयपम
पिविधिंस्यात्तर्हि विहितप्रतिषिद्धत्वात् षोडशिग्रहणाग्रहणवत्सुरापाने विकल्पः स्यात् स च सर्वस्मृतिभिः शिष्टाचारेण च
विरुद्ध इति तत्त्वार्थः। विहितत्वाच्चाश्रमकर्मापि।। ।।नित्याग्निहोत्रादिकर्मसु विहितत्वाद्विनियुक्तविनियोगविरोधा
च्च संशयेशास्त्रांतरविरोधात्सर्वान्तलोकेः स्मृतित्वचनित्सविनियुक्तत्वश्रुतिविरोधाद्विविदिषायां विनियोगश्रुते
स्मृतित्वमितिपूर्वपक्षमाह।। तत्रेति। ज्ञानकामनयानुष्ठाने कर्मणामनित्यत्वमनावश्यकत्वं नस्यं अनित्यत्वाद्भाव (=ज्ञा या:)
वज्जीवादिविधिना तु नित्यत्वं चेति विरुद्धधर्मद्वयापाताद्विविदिषाश्रुतेस्तु तित्वमिति फलं पूर्वपक्षे सिद्धांते तु (५)
नपव्यानुष्ठानं सततमिति त्वाशुद्धिद्वारा विद्यां कुर्वंतीति सहकारीणि कर्माणि तेषांमावस्तत्वेनेत्यर्थः। विद्यापाक्ष (६)

=यथा विद्याकामनायाः सत्सामस्तांचेत्यर्थः १

475

त्फलकारित्वं सहकारिपदात्प्राप्तं निरस्यति। न चेदमिति। विद्यया अविहितत्वान्नांगापेक्षास्ति अतो विहितानित्यक-
र्माणि अविहितायां विद्यायां न सहकार्याणि। नित्योक्तस्यासाध्यत्वाच्च न कर्मणां सहकारित्वं संभवस्त्यर्थः। तु-
ल्यबलश्रुतिद्वयेन विनियोगपृथक्त्वं संयोगभेदस्ततो न विरोधः। कामाय नाया अनित्यत्वे च कर्मणां नानित्यत्वं
नित्यविधिना प्रयोगस्य नित्यत्वात् सांक्रामनायां काम्यप्रयोगेणैव नित्यसिद्धेर्न कश्चिद्विरोधः। इदं चैकस्य
तूभयत्वे संयोगपृथक्त्वमिति सूत्रे चिंतितं। यथा खादिरो यूपो भवतीति श्रुत्या खादिरत्वस्य क्रत्वर्थता खा-
दिरं वीर्यकामस्येति श्रुत्या पुरुषार्थता चेति। अतः सत्त्विद्यायां विनियुक्त विनियोगो न विरुध्यत इत्यर्थः। ननु नित्याग्नि-
होत्रादिभ्यो भिन्ना एव फलवर्षज्ञादयो विविदिषायां विनियुज्यंतां तत्र कुतो विनियुक्तविनियोगस्तत्राह। सर्वथापीति। नित्यत्वे
काम्यत्वे चेत्यर्थः। कुंडपायिनामयने मासमग्निहोत्रं जुहोतीत्याख्यातस्य साध्यहोमवाचित्वात्तदर्थाग्निहोत्रपदस्य
व्यवहितत्वसिद्धाग्निहोत्रपरामर्शकत्वायोगात्सगुणविशिष्टं कर्मांतरं विधीयत इति युक्तमिह तु यज्ञेनेत्यादिसुवंता-
नामाख्याते नैकार्थ्याभावात् सिद्धव्यवहितकर्मानुवादकत्वात्तेषामेव कर्मणां ज्ञानार्थत्वविधिरिति भावः। सिद्धक-
र्मसु संस्कारत्वे प्रसिद्धिरपि शुद्ध्याख्यसंस्कारद्वारा ज्ञानार्थकर्माभेदे लिंगमित्याह। अथेति। ब्रह्मचर्यादिकर्मणां
प्रतिबंधध्वंसद्वारा विद्यार्थत्वे लिंगमाह ॥ अनभिभवं चेति ॥ ॥ अंतरा चेति ॥ अनाश्रमिणां जपादिकर्मसत्वान्नि-

दितत्वाच्च संशये स साश्रमकर्मणामेव विद्याहेतुत्वश्रुतेरनाश्रमस्य निंदितत्वाच्चानधिकार इति पूर्वपक्षः॥ तत्रा
नाश्रमकर्मणां विद्याहेतुत्वासिद्धिः सिद्धांते तत्सिद्धिरिति फलं॥ रैक्वादीनां विद्यावत्त्वलिंगस्य जन्मांतरीयाश्रमकर्
मणान्यथासिद्धेरनाश्रमकर्मणो विद्यार्थत्वे प्रापकं मानांतरं वाच्यमिति शंकते। ननु लिंगमिति। अनाश्रमि
त्वाविरुद्धानां वर्णमात्रप्राप्तधर्माणां विद्यार्थत्वे मानमाह। तथा चेति। मैत्रोदयावानित्यर्थः। नन्वनाश्रमि
णां कर्म भवतु विद्याहेतुस्तथापि तेषां न श्रवणाद्यधिकारः संन्यासाभावादित्यत आह। दृष्टार्था चेति। बंधका
लानध्वस्ति फलकविद्याकामस्य श्रवणेऽधिकारः संन्यासोऽपि कदाचित्कृतो ज्ञाने उपकरोति श्रवणं प्रसनंगत्वा
दिति भावः। तस्याश्रमित्वं वक्ष्यते इत्यत आह॥ अतस्त्विति। पुण्यकृतो जनसः शुद्धसत्त्वस्ते न ज्ञानमार्गेणेति ब्रह्म प्राप्नो
तीत्यर्थः। अत्र पुण्यकृत्त्वलिंगादाश्रमित्वं ज्यायः पुण्योपचये शीघ्रं विद्यालाभादनाश्रमस्य निंदितत्वाच्चेवमिति
ति भावः। तद्भूतस्य तु। उत्तमाश्रमात्पूर्वाश्रमं प्राप्तस्य प्रच्युतस्य कर्मापि विद्याहेतुरनाश्रमिकर्मवदिति पूर्वपक्ष
फलं सिद्धांते तु भ्रष्टस्य कर्म न हेतुरिति फलं। रागादिप्राबल्यात्प्रच्युतिनिषेधाच्च प्रच्युतिः प्रामाणिकी न वेति संश
यः सिद्धांतसूत्रे नियमं व्याचष्टे। तथा हीति। असंवमिति नैष्ठिकत्वनियमः। अरण्यमियादेकांतोपलक्षितं पारिव्रा
ज्यं गृह्यते तदियाद्गच्छेदिति पदं शास्त्रमार्गस्तेन तस्मात्पारिव्राज्यान्न पुनरेयात् न प्रच्यवेदित्युपनिषद्रहस्यमित्यर्थः
अतद्रूपच्युतौ प्रमाणाभावं व्याचष्टे। यथा चेति। शिष्टाचाराभावमाह न चैवमिति। चंडालाः प्रत्यवसिताः इतिस्म

=कृतावरोहादित्यर्थः॥

प्रायश्चित्तप्रभुर्गर्दभो लौकिकाग्नौ होतव्य इत्यधिकारलक्षणे षष्ठाध्याये निर्णीतं ५

तेषां पतितानां कर्म निष्फलमिति भावः ॥ न चाधिकारिकं ॥ अवकीर्येत व्यभिचरेदित्यर्थः ॥ अवकीर्णपशौ नैमित्तिके निषि-
क्तं रेतोस्यास्तीत्यवकीर्णी: अत्र प्रस्तुतस्य प्रायश्चित्तं स्यान्नवैः सूपपातकत्वात् पतनस्य नेत्यत्र संशयः ॥ अत्र प्रस्तु-
तस्य यज्ञादिकं निष्फलमित्युक्तं । तद्वत् प्रायश्चित्तमपि निष्फलमिति पूर्वपक्षयति । नेत्युच्यत इति ॥ अत्र कृत-
प्रायश्चित्तस्य कर्मण्यानाहेतु न भवतीति फलं सिद्धांते तु भवतीति भेदः । पञ्चोपनयनकाले होमो लौकिकाग्ना-
वेव कार्यः दारसंबंधोत्तरकालविहिताधानास्य संप्रसप्राप्तकालत्वेनाहवनीयाभावात् तद्वदवकीर्णिनो-
ऽत्र संचारिणः प्रायश्चित्तमाधिकारिकं तदुपकुर्वाणस्यैव न नैष्ठिकस्येति प्राप्ते सिद्धांतयति । उपपूर्व-
मिति । उपपदपूर्वं यस्य पातकस्य तदुपपातकमित्यर्थः । प्रायश्चित्तं न पश्यामीति दर्शनाभावस्मृतेः प्रायश्चि-
त्ताभावपरत्वं कल्पयित्वा तन्मूलश्रुतिकल्पना प्रागेव कृतपसाधारणश्रुत्या प्रायश्चित्तसद्भावसिद्धेः
कल्पनं नोदेति । कृतश्रुतिविरोधादिति भावः प्रायश्चित्तस्याभावप्रसिद्धौ समत्वेऽपि भावप्रसिद्धिः श्रुति-
मूलत्वादादर्तव्येत्यत्र संमतिमाह । तदुक्तमिति । यवमयश्चरुरित्यत्र यवशब्दं दीर्घशूके प्रयुंजते केचिद्देश-
विशेषे प्रियंगुषु अतः कस्य चरुः कार्य इति संदेहे वृद्धप्रयोगसाम्यात्समा तुल्या विकल्पेन प्रतिपत्तिः स्यादिति प्रा-
प्ते सिद्धांतः शास्त्रस्थता प्रतिपत्तिर्ग्राह्या शास्त्रनिमित्तत्वाद्धर्मादिज्ञानस्य तथा च पदान्या ओषधयो म्लायं

(म)

स्मा·का·टि·रा·

६८

क३

सर्वथैते यवामोदमाना स्तिष्ठंतीति शास्त्र[illegible]लत्वाद्दीर्घश्रुतप्रयोगस्येनादर इत्यर्थः ॥ स्मृतेर्गतिमाह

प्रायश्चित्तेति ॥ ब्रह्मचर्यरक्षार्थं यत्नाधिक्यं कार्यमिति ज्ञापनार्थं प्रायश्चित्तं स्पष्टमपि ॥ न पश्यामि

सूक्तं सर्गं दक्षिणे सर्वथः ॥ नैष्ठिकयति वनस्थयोरपि प्रमादाद्ब्रह्मचर्यभंगे प्रायश्चित्तमस्तीत्याह ॥ एवमि

ति ॥ कृच्छ्रप्राजापत्यं महाकृच्छ्रं बहुतृणकाष्ठदेवराजलदानादिना वर्द्धयेत् । यतिस्तु सोमलतानर्जं वर्द्धयेत्

सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतं भूयस्तपस्वी भवति पंक्तिपावन एव । उपपातकसंघेषु पातकेषु

महत्सु च प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेदित्यादि स्वशास्त्रविहितध्यानप्राणायामादिसंस्का

रोऽपि भिक्षुणा कार्य इत्यर्थः ॥ बहिस्तूभयथापि ॥ कृतप्रायश्चित्तैस्तैः सह कृतश्रवणादिकं ज्ञानसाधनं

नवेति संदेहे तेषां शुद्धत्वात्साधनमिति प्राप्ते प्रायश्चित्तात् परलोके तेषां शुद्धत्वेऽप्यत्र शुद्ध्यभावान्न साध

नमिति सिद्धांतयति ॥ यद्यप्यूर्ध्वेति ॥ सुगमं भाष्यं ॥ ॥ स्वामिनः फलश्रुतेः ॥ ॥ अंगाश्रितोपासितिरप

कलसंभवाद्वा संशयः ॥ यः कृतप्रायश्चित्तः सः संव्यवहार्य इत्युत्सर्गस्य निंदातिशयस्य सानैष्ठिका

दिषु बाधवच्चोपदंगकर्त्तासतदाश्रितस्य कर्त्तत्वसुत्सर्गस्य कर्तुः फल[illegible]श्रुत्या बाध इति पूर्वपक्षमा

व

रजनीचरम प्रहरामर्थः

प

२

प्रायश्चित्तात्तेषां शुद्धा स्वशिष्टाचाराद्यभावाभ्यां संदेह इत्यर्थः ४

त॥ किमिति॥ अत्र कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यं फलं। सिद्धांते त्वंगाश्रिता ऋत्विक्कर्तृका अप्युपास्त्य
यो यजमानगामिस्वतंत्रफलाः किमुवाच्यं स्वनिष्ठब्रह्मविद्यायाः स्वातंत्र्यमिति फलं विवेक्तव्यं। अतः
पादसंगतिः। हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्यपंचप्रकारे साम्नि वृष्टिं ध्यातुर्वर्षसमृद्धिः फ
लमिति श्रूयते॥ श्रुतं फलं ऋत्विग्गतं किं न स्यादित्यत आह॥ तश्चेति॥ यथा सांगकर्मण्यधिकृताधिका
रत्वाज्ज्योतिष्टोमस्य फलं ऋत्विगधिकारिगतं तद्वदंगोपासनस्यापि फलं तज्ज्ञातमेवेत्यर्थः॥ अस्तु तस्य
फलं तज्ज्ञातं कर्तृत्वान्यः किं न स्यादित्यत आह॥ फलं चेति॥ यदुक्तं यजमानगामिफलमिति तस्यापवादं दर्श
यति॥ नन्विति॥ उक्तानेन साधयतीत्यर्थः॥ यजमानस्य फलमित्युत्सर्गस्यासति बाधकवचने सिद्धिरि
ति समाधत्ते॥ तस्मात्फलभोक्तृत्वादित्यर्थः। उपासनमार्त्विज्यं ऋत्विक्कर्तृकमिति सत्रश्रौतलिंगमाह
॥ तथा चेति॥ तमुक्तिष्याख्यं प्रणवं प्राणदृष्ट्याध्यातवानुद्गाता चनेमिन्नो यानां सत्रिणा। मुक्ताता
सीदेत्यर्थः। यजमानेन स्वगामिफलकसांगप्रयोगकरणाय र्त्विजां क्रीतत्वात्कर्तृत्वेऽपि न फलभागुत्व

दि

मुत्सर्गस्य बाधकाभावादित्युक्तत्वात्क्रयणद्वारा कर्तृत्वभोक्तृत्वसामानाधिकरण्यं चोपपद्यते नेश्व
सकर्तृके पुद्गराजापुद्यते जपतिं चेति वदिति भावः॥ सह कार्यंतरविधिः॥ यस्मात्सर्वे ब्राह्मणा आसानं

ना.भा.टी.श.

६९

ना

विदित्वा संन्यस्य भिक्षाचर्यं चरंतीति तस्मादेवंभूतो ऽपि ब्राह्मण आपातज्ञानरूपं पांडित्यं वान् पंडितः तस्य कृत्स्नं
पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन श्रवणजज्ञानस्य बलभावेन मनननेनासंभवनानि
रासेन बालस्य भावेन वा शुद्धचित्तत्वेन स्थातुमिच्छेदेवं मननश्रवणे कृत्वाथानंतरं मुनिर्निदिध्यासन
कृत्स्यादेवममौनं मौनादन्यद्बाल्यपांडित्यद्वयं मौनं च निदिध्यासनं लब्ध्वोपयज्ञानसामग्रीयोग्यत्वानंतरं ब्र
ला ह्मास्मीति साक्षात्कारवान् ब्राह्मणो भवतीत्यर्थः॥ मौनशब्दस्य सिद्धरूपेणाप्रिज्ञाप्येनुष्ठेये च ध्याने प्रयो
गासंशयः॥ पश्चात्तं तत्रवरसादिवाक्यत्रयोपाकुर्वीथा ध्यानरूपासनस्यालिंग्यत्वनिर्णयस्तद्वदथ ब्राह्मण इति वि
धिहीनवाक्यशेषो। मौनस्याविधेयत्वनिश्चय इति पूर्वपक्षमाह॥ न विधीयत इति॥ अत्र ध्यानस्याननुष्ठानं सि
द्धं ते त्वनुष्ठानमिति फलं। यदि मौनं पारिव्राज्यं तदा वाक्यांतरप्राप्तमनूद्यते बाल्यविधिप्रशंसार्थं॥ यदि ज्ञानं तदा
पांडित्यशब्दात्प्राप्तमिति पूर्वपक्षग्रंथार्थः॥ मुनिशब्दाद् ज्ञानातिशयः प्रतीयते तस्य ज्ञानमात्रवाचिपांडित्यश
ब्दान्न प्राप्तिः॥ नापि मुनिशब्दः परिव्राड्वाचकः वाल्मीक्यादिषु प्रयुज्यमानत्वात् तस्मादप्राप्तं मौनमपूर्व
त्वाद्विधिं कल्पयतीति सिद्धांतयति॥ एवमित्यादिना। आपस्तंबप्रयोगस्य गतिमाह॥ उत्तराश्रमेति॥ किं चामौ
नं च निर्विद्येति श्रवणमननवदनुष्ठेयत्वोक्तेर्मौनस्य विधेयत्वं स्यात्॥ निर्वेदनीयत्वेति॥ न च त्रयाणां विधा
ने वाक्यभेदो दोषः। उपरिधारण। यदि च तत्र द्वाक्यभेदस्येति भावः॥ कस्येदं ध्यानं विधीयत इत्यत्राह॥ ॥

न.भ्या

ह

481

तद्वत इति॥ आत्मानं विदित्वेति परोक्षज्ञानवतः संन्यासिनः प्रकृतत्वादित्यर्थः। सूक्ष्मार्थसाक्षात्कारसाधनत्वे
न ध्यानादेः षड्जादौ लोकतः प्राप्तिं शंकित्वा नियमविधिमाह। नन्विति सादिना॥ ननु ब्रह्मविद्यापरे वाक्ये कथं
ज्ञानांगमिति चेत्सफलक्रतुपरे वाक्येंगविधिवदित्याह॥ विध्यादिवदिति॥ प्रधानमात्रवाक्यांगपर्यंतो विधिः त
त्र प्रधानः क्रतुर्विध्यादिरनएवांगविध्यंतरस्तूच्यत इत्यर्थः॥ एतत्सूत्रभाष्यभावानभिज्ञाः संन्यासाश्रमधर्म
श्रवणादौ विधिर्नास्तीति वदंति विधौ स्वप्राप्तिमात्रमपेक्षितं तच्च भेददर्शनप्राबल्याद्दर्शितमिति संप्र
दायविदः समावर्तनानंतरं कुटुंबे स्थितो ब्रह्मलोकं प्राप्नोति न पुनरावर्तत इत्युपसंहारात् संन्यासो नास्ती
तिशंकार्थः। आयासविशिष्टकर्मबाहुल्याद्गृहिणोपसंहारः कृत्स्नेन संन्यासाश्रमादिति समाध्यर्थः॥ सं
न्यासगार्हस्थ्यद्वयमत्र सूत्रकृतोक्तं ततोऽन्यदाश्रमद्वयं नास्तीति कस्यचिद्भ्रमः स्यात्तं निरस्यति॥
मौनवदिति॥ आश्रमद्वयवदित्यर्थः॥ इतरयोरपीति वाच्ये बहुत्वं किरवांतरभेदमपेक्ष्यपरत्वं चास्माभिः प्रागदर्शि
तः॥ अनाविष्कुर्वन्नन्वयात्॥ तत्र बाल्ये विषये तद्भिन्नस्य भावाभावसंभवात् कर्मार्थत्वं गृहीत्वातिशयन्मत्र
लादिकर्मणोऽप्रस्तुतेंद्रियस्वादिरूपभावशुद्धेरेवेति फलं। पूर्वत्र मौनशब्दस्य ज्ञानातिशये ध्याने प्रसिद्ध
त्वाद्ध्यानं विधेयमित्युक्तं तद्वद्बाल्यशब्दस्य कामचारादौ प्रसिद्धेस्तद्विधिग्रहणमिति स्यात्॥ किंतावदिति।
कामतश्चरणवदनभक्षणानि यस्य स कामाचारवादभक्षस्तत्त्वमित्यर्थः। यथोपपादं यथासंभवं मूत्रादि

बलिकर्मत्वाविशेषात्संशयमाह। तत्रेति। पूर्वपक्षे विद्योगलेन तिष्ठन्मूत्रादेरपि अनुष्ठानं हि
द्योते भावशुद्धेः

सा॰टि॰र॰

१७०

यस्य तद्भावस्तत्त्वं बाल्यविधिवला स्यादिति सशास्त्रमन्यविषयं रतिभावः ॥ यथोपपादं यथासंभवं सूत्रादिय
स्य तद्भावस्तत्त्वं बाल्यं विधिवत्) यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः न स तत्पदमाप्नोति संसारं
चाधिगच्छतीत्यादिश्रौतनिषिद्धादिनियमविधिशास्त्रविरुद्धस्वभावश्रुत्याख्यबाल्यस्य विधिसंभवा
न्नपथ्येष्टचेष्टाविधिरिति सिद्धांतयति ॥ एवमिति ॥ प्रधानविरोधित्वाभावनतद्विधिरित्याह । प्रधानेति ॥ भा
वशुद्धेर्विद्योपकारकत्वेनाचपादनाविर्भूर्वभवेदिति बाल्यविध्यर्थ इति सूत्रयोजना ॥ एतिक्रमिति ॥ संन्यास
दिबाल्यांतं साधनजातमुक्तात सर्वथ्यविद्यानुत्पविचार्यत इति संगतिं वदन् साधनस्य द्विधाफलसंभवा सं
शयमाह । सर्वेत्यादिना ॥ कारीरिष्टिवदैहिकफलत्वनियमः श्रवणादीनामिति पूर्वपक्षमाह ॥ किं तावदिति ॥
नन्वामुष्मिकफलयज्ञादिसाध्यविद्यायाः कथमैहिकत्वनियमः स्यत आह । यज्ञादीन्यपीति ॥ शुद्धिद्वारा
यज्ञादिभिः श्रवणादिषु साक्षाद्विद्याहेतुषु घटितेषु विद्याविलंबो न युक्तः दृष्टांते च विलंबः अतः श्रवणा
देर्विद्याहेतुत्वमसिद्धमिति पूर्वपक्षे फलं । प्रतिबंधकवशाद्विलंबेपि हेतुत्वसिद्धिरिति सिद्धांते फलम
त्वाच्चित्रावदनियतफलं श्रवणादिकमिति सिद्धांतयति । एवमिति ॥ ननु प्रारब्धकर्मविरोधेन श्रवणा
दिफलप्रतिबंधः किमिति क्षिपते श्रवणादिनैव कर्मविपाकप्रतिबंधः किं न स्यादित्यत आह ॥ ॥

483

साधने नेति। प्रतिबंधक्षयशक्तिरपि फलबलात् ज्ञातव्येति भावः। प्रतिबंधस्त्वद्वेधौ तं स्मार्त्तं चाल्लिंगमाह ८

उपस्थितविपाकत्वं चेति॥ देशादिमहिम्नाकर्माणि विपच्यंतर इत्यर्थः। तेन श्रवणादिकमेव क्रमितिन विपच्य
तेत त्राह। प्यानि चेति॥ विपाचकत्वं फलोन्मुखत्वे हेतुत्वं ननु तर्हि श्रवणादि विपाचकदेशादिकं कीदृशमित्यत
आह। शास्त्रमपीति। फलबलाद्देशादिज्ञानमिति भावः। तथापि कर्मणो व श्रवणादिप्रतिबंधोनैव परीक्षमि
त्यत्र को हेतुस्तमाह। तथा चेत्यादिना॥ शृण्वतोपि न विदुरिति सूक्तेः प्रतिबंधसिद्धिः शासनोपपत्या वद्धा त्का
प्याश्चर्यः अद्भुतवत्कश्चिदेव भवति। तिष्ठतु लब्ध्वा साक्षात्कारवान्सरोक्षतो ज्ञाता प्याश्चर्यः। कुशलेनाचा
र्येणानुशिष्टोपीत्यर्थः। असति प्रारब्धकर्मप्रतिबंधे श्रवणादिनैहैव विद्योदयः पशादिभिः संचितपापप्र
तिबंधस्य निरस्तत्वात्सति तु भोगेन तन्निरासादमुत्रेति विद्याया ऐहिकामुष्मिकत्वविशेषनियम उक्तस्तद्व
त्फलेपि मोक्षे कश्चिदुत्कर्षादिविशेषः स्यादित्यत आह॥ एवं मुक्ति०॥ मुक्तिरत्र विषयः तस्यां विद्याव
द्विशेषनियमोस्ति न वेति फलस्यापि अपभासंभवात्संशये पूर्वपक्षमाह॥ यथेति॥ मुक्तिः सविशेषा फल
त्वाद्विद्यावदत तं कर्मसाध्या मुक्तिरिति फलं सिद्धांते तु निर्विशेषत्वावधारणश्रुतिबाधितमनुमानमतो ज्ञा
नैकव्यंग्या मुक्तिरिति फलं। किंच श्रवणादितारतम्याद्विद्यायां कंचिदतिशयमंगीकृत्य विद्यालभ्यमुक्तौ ना
तिशयपर इत्याह। अपि च विद्यासाधनमिति॥ ननु ब्रह्मणो नित्यसिद्धत्वाद विद्यानिवृत्तेश्चान्यत्वेद्वैतापत्तेर

नन्वेवेचासाध्यत्वात् किं विद्याफलमित्यत आह॥ तद्धीति॥ विद्याभिव्यक्तत्वेन ब्रह्मानंद एव मुख्यं फलं न भिन्नमुक्ति
र्विद्यानिवृत्तिरानंदस्वरूपस्फूर्तिप्रतिबंधकाभावतया विद्यया साध्यते सा चानिर्वाच्येति नैद्वैतापत्तिः॥ अन्ये
तु साब्रह्मानन्दस्यायुर्न च साध्यत्वानुपपत्तेस्तत्र विद्यावैयर्थ्यमिति व्याख्युः॥ यदभावे यदभावस्तत्तत्साध्यमिति हि
ज्ञानात्सर्वो लोकः प्रवर्त्तते। तथा च विद्याया अभावे ब्रह्मस्वरूपमुक्तेरभावोऽनर्थरूपाऽविद्यैवास्ति अस्मा एवमु
क्तिर्नास्तीति व्यवहारविषयत्वे ननु तस्य भावसात्तथा च विद्यां विनामुक्तिर्नास्तीति निश्चया नित्यामुपादत्ते विद्योदये
च स्वतः सिद्धं नित्यनिवृत्तानर्थस्वप्रकाशब्रह्मानंदात्मनाऽवतिष्ठत इत्यनवद्यं। संप्रति विद्यायाम तिन्नायां गीकारं स्मुत
तिः॥ न चेति॥ एकरूपे विषये प्रमायां तारतम्यानुपपत्तेरित्यर्थः॥ कथं तर्हि पूर्वाधिकरणे विद्याया विशेष उक्तस्तत्राह॥
तस्मादिति॥ तत्सामग्र्यपि सामग्र्यां ज्ञाने विलंबउक्तोन तारतम्यमित्यर्थः॥ तर्हि सत्यपि ज्ञाने मुक्तौ विलंबः किं न स्यादित्यत
आह॥ नत्विति॥ वाक्यादिप्रतिबंधाद्दीपोत्पत्तिविलंबेपु सत्सु तमो निवृत्तिविलंबादर्शनात्तदिति ज्ञानेनाज्ञाननिवृ
त्तौ विलंब इति भावः। किं च कर्मणामुपासनानां च गुणभेदेन तारतम्यात्फल तारतम्यं युक्तं निर्गुणविद्यायास्त्वेक
रूपत्वात्तत्फलेनैकरूप्यमित्याह॥ विद्याभेदे साद्दिना॥ सत्तौ कस्यचिन्निर्गुणविद इत्यर्थः॥ तस्माद्विद्यासमका
लैवमुक्तिरितिसिद्धं॥ ५२॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदानंदशिष्यस्य श्रीमद्रामानं
दस्य कृतौ शारीरकभाष्यटीकायां भाष्यरत्नप्रभाख्यायां तृतीयाध्यायस्य चतुर्थपादः समाप्तोऽयं तृतीय
ध्यायः॥ ॐ॥ ॥ ५२॥ ५२॥ ५२॥ ॥ ५२ ॥ ५२ ॥ ॥ ५२॥ ॥ ५२ ॥ ५२॥ ॥ ५२ ॥ ५२ ॥ ५२

=तत्सामग्र्यां भेदेन साधनभेदेनेति यावत्॥ =साधनतारतम्यात् फलतारतम्यमिति यादिसर्थः॥

Margin (left): ५२ ... प्रतिबंधक ...

Margin (right): पा०

॥ चतुर्थाध्यायस्यारंभः ॥

श्रीगणेशाय नमः ॥ ॐ ॥ आवृत्तिरसकृदुपदेशात् ॥ साधनं निरूप्य फलं निरूप्यत इति अध्याययोर्हेतुफलभावं संगतिमा
ह ॥ तृतीय इति ॥ फलप्रसंगेनोत्क्रांतिरर्चिरादिमार्गश्च विचार्यत इत्याह ॥ प्रसंगेति ॥ पूर्वं साक्षादेव मुमुक्षुः संन्यासादि
साधनं चिंतितं संप्रति फलार्थोपात्तिगम्यमावृत्त्यादिकमधाश्लेषाधिकरणात्प्राक् चिंत्यते तदारभ्य तदारभ्य जीवन्मु
क्तिस्ततो द्वितीयपादे उत्क्रांतिस्तृतीये अर्चिरादिमार्गस्य गंतव्यस्य निर्णयश्चतुर्थे ज्ञानोपासनयोः फलनिर्णय इति पादा
र्थविवेकः ॥ आद्याधिकरणस्य श्रवणादिसाधनं विषयमनुष्ठेयानुष्ठानदर्शनात् संशयमाह ॥ आत्मा वा इति श्रो
तव्यधीसाधनफलविचारात्मकत्वात्सर्वाधिकरणानां श्रुतिशास्त्राध्यायसंगतयः उक्ता तत्र साध्यार्थसंबंधात्त
त्वादसंगतिः मोक्षे विशेषाभावे च श्रवणाद्यावृत्तिविशेषो नास्तीति दृष्टांतलक्षणावांतरसंगत्या पूर्वपक्षमाह ॥ कि
तावदिति ॥ अत्र श्रवणादेः प्रयाजवददृष्टार्थत्वात्सकृदनुष्ठानं फलसिद्धौ पितत्ववघातवत् दृष्टार्थत्वात् यावत्फलमावृ
त्तिरिति भेदः ॥ असकृदुपदेशान्यथानुपपत्त्या साधनावृत्तौ शास्त्रस्य तात्पर्यमिति शंकते ॥ ननु सकृदिति ॥ श्रव
णादीनां समुच्चयसिद्ध्यर्थत्वेनासकृदुक्तेरन्यथोपपत्तेर्नावृत्तौ तात्पर्यमित्याह ॥ एवमपीति ॥ सगुणसाक्षात्कार
साधनेष्वप्यनावृत्तिमाह ॥ सकृदिति ॥ यद्यप्यसकृदुपदेशः आवृत्तिसमुच्चययोरन्यतरस्य सूचकत्वेनान्यथासिद्धस्तथा
पि दृष्टे संभवत्यदृष्टमात्रकल्पनानुपपत्तेः श्रवणादेरावृत्तिद्वारा साक्षात्कारफलस्य पशूजादौ दृष्टत्वादसकृदुक्तिरा
वृत्तिं सूचयति दृष्टार्थत्वादिति न्यायानुग्रहादित्याह ॥ दर्शनपर्यवसानत्वादिति ॥ ध्यानस्यत्वावृत्तेर्वेदोपासितेति
शब्दैः श्रुतत्वान्नकेवलार्थिकत्वमित्याह ॥ अपि चेति ॥ अस्तूपास्तिशब्दस्यावृत्तिवाचित्वं तथापि वेदेति शब्दोक्तवेद
नेष्वहं ग्रहेषु कथमावृत्तिसिद्धिरित्यत आह ॥ विद्युपास्योश्चेति शब्दयोरेकार्थत्वमुदाहरति ॥ कचिदिति ॥ सरैक्वो
यदेद तत्प्राण तत्त्वं रैकादन्योऽपि यः कश्चिद्वेद तत्फले सर्वमंतर्भवतीत्येतदुक्त रहस्यमपोत्कृष्टत्वेन सरैकवक्त इति हंस

प्रतिहंसांतरवच्चं नं तथ च्चारैक्कं गत्तोवाच जानश्रुतिः हे भगव एतां रैक्व विदितां देवतां मेनुशाधि मह्यमुपदिशेत्यर्थः एवंस
गुण निर्गुण साक्षात्कारसाध्य न ध्यानस्यावृत्तिः श्रुतार्थसिद्धा चाददृष्टार्थत्वात् श्रवणमननयोस्तु सकृदुपदेशाद्दर्थ
सिद्धे चावृत्तिरिति विशेषः आदित्यस्यैकस्यैवोद्गीथे संपाद्योपासनात्मकमत्त्वमेकएवपुत्रोसीति कौषीतकिः पुत्रमुवा
चातस्त्वं तथा माह्यध्याः किंतु बहून् रश्मीनादित्वं पर्यावर्त्तयेतात् पश्यगावर्त्तयस्वेत्यर्थः तल्लोपः छांदसः अत्रप
र्यावृत्तिशब्दाल्लिंगात् सिद्धवदुक्ती ध्यानस्यावृत्तिरुक्ता ततो ध्यानत्वसामान्योपलक्षणपर्यंतत्वसामान्याद्वा लिंगात्स
र्वत्रश्रवणमननध्यानेष्वावृत्तिसिद्धिरित्याह॥ लिंगाच्चेति॥ एवं तावत्सगुणनिर्गुणसाक्षात्कारसाधनेष्वावृ
त्तिरुक्ता तत्र सगुणध्यानादेरावृत्तिमंगीकृत्य निर्गुणश्रवणादिष्वावृत्तिमाक्षिपन्सूत्राहेत्यादिना॥ वाक्यं निर्गुणसा
क्षात्कारजनने शक्तं न वा आद्ये सकृच्छ्रुतवाक्यात् साक्षात्कारसिद्धेरावृत्तिर्व्यर्थेत्युक्ते द्वितीयं शंकते॥ सकृदिति॥ अ
शक्तस्यावृत्तावपि फलानुपपत्तिरित्याह॥ नेति॥ त[illegible]थापीति स्वतोशक्तस्य युक्तिसाहित्ये साध्यकत्वमपीत्यर्थः॥ वाक्ययु
क्तिभ्यां परोक्षज्ञाने जातेप्यपरोक्षज्ञानार्थमावृत्तिरिति शंकते॥ अथापि स्यादिति॥ तयोः परोक्षज्ञानहेतुत्वस्वाभाव्या
दावृत्तावपि न साक्षात्कारः स्यादिति परिहरति॥ नासकृदपीति॥ यदि तयोः साक्षात्कारसामर्थ्यं यदि वा परोक्षज्ञानसा
मर्थ्यं उभयथाप्यावृत्त्यनपेक्षेत्याह॥ तस्मादिति॥ प्रमातृवैचित्र्यादप्यावृत्तेर्नियममित्याह॥ नचेति॥ प्रमेयस्यानंत्र
साध्यत्वेत्याह॥ अपि चेति॥ द्विविधो ह्यधिकारी स्यात् कश्चिज्जन्मांतराभ्यासान्निरस्तसमस्तासंभावनादिप्रतिबंधः
कश्चित्तु प्रतिबंधवानिति तत्राद्यस्यावृत्तेरानर्थक्यमिष्टं द्वितीयस्य तु प्रतिबंधनिरासाय तदपेक्षेति समाधत्ते॥
अत्रोच्यत इति॥ आवृत्तेः प्रतिबंधनिरासार्थत्वे लिंगमाह॥ तथा हीति॥ यथा षड्जादिस्वरभेदसाक्षात्कारशक्तम
पि श्रोत्रमभ्यासमपेक्षते तथा ब्रह्मात्मसाक्षात्कारशक्तं वाक्यं तदपेक्षमित्यनुमानमभिप्रेत्याह॥ नहि दृष्टेनुपपन्नं

२

मा

स

नामेति ॥ तत्त्वंपदलक्ष्यार्थस्य दुर्बोधत्वादज्ञानप्रयुक्तसंज्ञात्यादिप्रतिबंधसंभवात्तत्ध्वंसायावृत्तिरपेक्ष्येति वाच्यलक्ष्यविवे
कपूर्वकमाह ॥ अपिचेत्यादिना ॥ यदुक्तमनंशत्वात्प्रमेयस्यावृत्त्यानर्थक्यमिति तत्राह ॥ यद्यपीति ॥ आरोपितांशनिरासा
यनमेदेहोनेंद्रियमित्यभ्यासो युक्त इत्यर्थः ॥ वाक्यार्थज्ञाने सति कथमभ्यासनियमः प्रमाणज्ञानस्याभ्यासायोगात्
ज्ञानिनो नियमायोगाच्चेति तत्राह ॥ तच्चेति ॥ ज्ञानात्प्रागेव श्रवणादिव्यापारनियमनं क्रियत इत्यर्थः ॥ अधिकं ज्ञांकि
तुमुक्तमनुवदति ॥ एषामिति ॥ अधिकं ज्ञांकते ॥ सत्यमिति ॥ दुःखित्वप्रत्यक्षविरोधाद्वाक्यादैक्यधीर्नोदेतीत्यर्थः ॥ प्रत्य
क्षस्य भ्रांतित्वादविरोध इत्याह ॥ नेत्यादिना ॥ दुःखादयो नात्मधर्माः दृश्यत्वात् देहादिवत् नाप्यात्मस्वरूपाः आत्मनि स
सुप्तावननुवृत्तत्वादतिरेकेण चैतन्यवदित्यर्थः ॥ निर्दुःखश्चिदात्मा निर्दुःखादिधियो भ्रांतिः स्याद्वाक्यार्थानुभवो न विरुध्य
त इत्याह ॥ तस्मादिति ॥ अनुभवे जातेऽप्यावृत्त्या चेदनुष्ठानं किमित्यादि मतमाह ॥ नचैवमिति ॥ रतिः कामः आत्मकाम
तया तृप्तिर्विषयतृष्णाक्षयः तेन संतोषः आत्मानंदानुभवः शांति भेदः नचावृत्तौ नियोगात्प्रवृत्तिर्वाच्या तथाच निर्मुक्तह
बुद्धेरकर्तृत्वात् धीर्नैत्यादि मतमाह ॥ [struck] ॥ तत्रापीति ॥ आवृत्त्यभ्युपगमेऽप्यकर्त्तात्मेत्यनुभवात्प्राच्यावगुरुरन्वया
नानियोगात्प्रवर्त्तयेदुक्तदोषादित्यर्थः ॥ कथं तर्हि प्रवृत्तिरिति मतमाह ॥ यस्त्विति ॥ अप्रतिभानादसंभावनादिनेत्यर्थः ॥
शिष्यबुद्ध्यनुसारेण श्रोतव्यादिवचोभिः प्रधानस्य भ्यर्थमावृत्त्यादौ प्रवर्त्तयेदित्यर्थः ॥ आत्मेनित्युपगच्छेति ग्राहयंति
च ॥ पूर्वत्रध्यानादेरावृत्तिरुक्ता तामुपजीव्य तत्त्वज्ञानार्थध्यानावृत्तिकाले किमहंब्रह्मेति ध्यातव्यं उत मत्स्वामीश्व
रस्तैक्यभेदमानाभ्यां संशयमाह ॥ इयेति ॥ शब्दादेवप्रमितिरित्यादावयमात्मा ब्रह्मेत्या ॥ घभेदश्रुतिभिरैक्य
निर्णयात्संशयमाक्षिपति ॥ कथमिति ॥ भेदश्रुत्यनुग्रहात्भेदप्रत्यक्षादिप्राबल्यमाशंक्य संशयं समाह ॥ उ
च्यत इति ॥ अभेदश्रुतीनां गौणमुख्यत्वेऽउपयन्नफलं यद्यप्ययं प्रत्यक्षादिविरोधपरिहारो द्वितीयाध्याये सं
गतस्तथाप्यैक्यश्रुतेरविरुद्ध निश्चयस्य समाधावंतरंगत्वादिह संगतिः विरुद्धयोरेकदृष्टिरशक्येत्याह ॥

२

469

नाहमिति॥किंचकिमीश्वरस्यजीवमात्रत्वमैक्यंजीवस्येश्वरमात्रत्वंवेतिविकल्प्यक्रमेणदूषयति॥ईश्वरस्यचेत्यादि
ना॥एकत्रश्रुतिप्रामाण्यायैक्यध्यानंकार्यमितिशंकते॥अन्यत्वेपीति॥एकत्वध्यानमस्मदिष्टमेवएकत्वंतुनास्ती
त्याह॥कामिति॥अभेदश्रुतीनांफलवदपूर्वार्थतान्नर्पणगौणत्वायोगाच्छ्रुतीनांकल्पितभेदानुवादित्वात्
प्रत्यक्षादेरपितद्विषयत्वात्बिंबप्रतिबिंबयोरिवविरुद्धधर्माणांमिथ्यात्वान्मुख्यमैक्यमितिसिद्धांतयति॥एव
मित्यादिना॥ईश्वरस्यजीवत्वंनप्रतिपाद्यंयेनेश्वरभावःस्यात्किंतुजीवस्येश्वरत्वंनचैवमधिकार्यभावःएक
त्वबोधात्प्रागधिकारिभेदांगीकारादित्याह॥यत्पुनरुक्तमित्यादिना॥वेदसत्त्वप्रमात्वंशंकते॥प्रत्यक्षा
द्यभावइति॥वर्णेषुक्रमस्वरयोरभेदादुपलब्धिध्वनिस्थयोरारोपोवाच्यःतथाचारोपितक्रमस्वरविशिष्ट
वर्णात्मकवेदस्यमिथ्यात्वंदुर्वारंवादिनांसत्त्वाग्रहस्तुविद्याविद्याविजृंभितइतिवेदसत्त्वाभावेनदोषइत्याह॥
नेति॥अविद्यामाक्षिपति॥कस्येति॥प्रश्नलिंगेनत्वय्येवतस्याःसिद्धत्वादाक्षेपानुपपत्तिरित्याह॥यस्त्विति॥अज्ञा
नरूपत्वात्भ्रमादेरितिभावः॥सर्वज्ञाभिन्नेमयिकथमज्ञानमितिशंकते॥नन्विति॥अभेदज्ञानात्प्राक्चिन्मा
त्रस्यतवैवाज्ञानाश्रयत्वमनुभवसिद्धाज्ञानस्यापलापायोगात्ज्ञानेत्वनिर्वाच्यस्यतस्यबाध्यात्राश्रयापेक्षेत्या
ह॥पश्यैवमिति॥अनिर्वाच्येनदोषांतरमपिनिरस्तमित्याह॥योपीति॥नप्रतीकेनहिसः॥उपयथाध्यानसंभ
वात्संशयः यथाब्रह्मण्यभेदसत्त्वादहंग्रहउक्तः एवंप्रतीकेष्वपिब्रह्मविकारतयाजीववद्भिन्नब्रह्माभिन्नत्वाज्जी
वाभेदसत्त्वेनाहंग्रहःकार्यइतिदृष्टांतेनपूर्वपक्षः अत्रप्रतीकोपास्तीनामहंग्रहोपास्तिभिरविशेषः॥सिद्धांतेतु
विशेषसिद्धिरितिफलं॥एतदारभ्याधिकरणत्रयस्यप्रासंगिकीपादसंगतिः ब्रह्मैक्यध्यानप्रसंगागतत्वादि
तिविवेकः किंप्रतीकेष्वात्मत्वानुभवबलादहंग्रहउतवस्तुतोजीवाभेदसत्त्वान्नोभयस्याह॥नहिसइति॥६॥

४= ननु भेदेपि प्रतिमादिषु विष्णुत्वादिबुद्धिवत् प्रतीके ब्रह्मत्वदृष्टिः शास्त्रात् स्यादित्यत आह अहमिति ४=

= अधिष्ठानब्रह्मव्यतिरेकेणेत्यर्थः ५=

३ =१५ शुक्तिकां रजतमितीतिसिरस्कोरजतशब्दोत्र शुक्तिकाशब्दसामानाधिकरण्येन शुक्ते रजतत्वस्वार्थं प्रत्यक्षविरोधात्सा प्रयेती

नानुभवतीत्यर्थः॥ द्वितीयमप्युक्तिध्यादूषयति॥ यत्तु नरित्यादिना॥ विकारस्य ब्रह्मणा स्वरूपैक्ये योग्यात् बाध्येनैक्यं क्या

वाच्यं प्रतीकबाध्ये नोपास्तिविधिर्न स्यादित्यर्थः॥ किंच कर्तृत्वाद्यबाध्येनोपास्तिविधिप्रवृत्तिर्वाच्याबाधेतदयोगात्

थाच बाध्यमूलब्रह्मैक्यज्ञानं धारीहत्य प्रतीकेषु हग्रहोपास्तिकल्पनानयुक्ता बाध्यविरोधादित्याह॥ नच ब्रह्मणइ

ति॥ अतो जीवप्रतीकयोः स्वरूपभेदादहंग्रहे विध्यश्रवणाच्च नाहंग्रह इति फलितमाह॥ अतश्चेति॥ यथा रुचकस्व

=आश्रयविषया भा वेनेति भावः ९= स्तिकयोः सुवर्णात्मनैक्येपि मिथोनैक्यं तथा जीवप्रतीकयोर्ब्रह्मात्मनैक्येपि भेदः समः यदि च धर्मिव्यतिरेकेणत

योरभावनिश्चयाद् स्वैक्यं तदोपासनोच्छेद उक्त इत्यर्थः॥ ब्रह्मदृष्टिरुत्कर्षात्॥ एकविषयत्वं संगतिः प्रश्नपूर्वकं संश लु

यबीजमाह॥ कुत इत्यादिना॥ सामानाधिकरण्यमुक्तं तत्र तावन्मुख्यं ब्रह्मविकारयोर्गवाश्वयोरिव भेदाद्योगात्॥

नापि प्रकृतिविकारभावनिबंधनं वाक्यस्य विकारबाध्येन ब्रह्मपरत्वापातात्॥ नन्वेवमापत्तिः नामब्रह्मेत्युपासीतेइ

ति विधिश्रुतिविधिविरोधात् परिमितपरिमितनामग्रहणानर्थक्यापाताच्च ब्रह्मपरत्वे सर्वं ब्रह्मेति वक्तव्यत्वादतः परिशे

षाद्दृष्ट्या सएव सामानाधिकरण्यकारणं अध्यासे च नियामकाभावात्संशय इत्यर्थः॥ उत्कृष्टनिकृष्टयोरुत्कृष्टमेवो

पास्यं फलवत्त्वादिति न्यायो नियामक इत्युक्त्वेत्याह॥ अथवेति॥ अत्र विकारदृष्टिभिर्ब्रह्मोपास्तिसिद्धिः फलं सिद्धां

तेतु विकारदृष्ट्या ब्रह्मण उपास्यत्वेनिकर्षप्राप्तो सत्यां फलत्वासिद्धेर्विकारा एवोपास्या इति फलं किंच लौकिकन्यावि

रुद्धार्थसंभवे विरुद्धार्थो न ग्राह्यः प्रसंगाद्यप्रसंगात्किंच प्रथमश्रुतानां नामादित्वादिपदानामसंजातविरोधितया मुख्या

र्थग्रहोन्याय्यः ४ ब्रह्मशब्दे च दृष्टिलक्षणाग्रहः तथा चादित्यादयो ब्रह्मदृष्ट्योपास्या इत्येव वाक्यार्थ इत्याह॥ प्राथम्याच्चे

ति॥ ब्रह्मशब्दस्यैव दृष्ट्यर्थत्वे हेत्वंतरमाह॥ इतिपरत्वादिति॥ इतिशब्दशिरस्कः शब्दः समभिव्याहृतक्रियालक्षक इति

लोके प्रसिद्धमित्यर्थः द्वितीयाश्रुतेश्चादित्यादीनामेवोपास्तिकर्मत्वमाह॥ वाक्यशेषोपीति॥ उत्कृष्टमेवोपास्यमिति

न्यायमुक्तमनुवदति॥ यत्तूक्तमिति॥ द्वितीये श्रुतिभ्यां लौकिकन्यायात् चोक्तन्यायबाध इत्याह॥ तदिति॥ ब्रह्मणोनुपा ३

ति
द्वितीश्रुतिश्च इतिश्रुतिश्चेति द्वितीयेतिश्रुतीताभ्यामिति समासः
या

=उपास्यविशेषणत्वेनोपास्यांतर्भावादिति भावः ९=

स्यत्वेकरूपफलदातृत्वेनत्राह॥फलंत्विति॥किंच यदृष्ट्याविकारस्योत्कर्षस्तस्य ब्रह्मणो विशेषणत्वेनुपास्यत्वं नास्तीत्याह॥
ईदृशं चेति॥आदित्यादि॥पृथिव्यग्न्यादिरित्यादि ऋचुसंज्ञकेषु लोकेषु हिंकारप्रस्तावोद्गीथप्रतिहारनिधनैः पंचविधं सा
मतेरेवादिरिस्तुपञ्चधरति च प्रसक्तिद्यावापृथिवैः सप्तविधं सामेति भेदः अत्र विशेषाज्ञानात् संशयः पूर्ववदुत्कर्षेणावधानादनिय
मइतिप्रत्युदाहरणेन पूर्वपक्षमाह॥तत्रेति॥सिद्धरूपादित्यादिरूपः कर्मरूपोद्गीथादीनां फलसंनिकर्षेणोत्कर्षात् ब्रह्मव
द्विशेषत्वनियम इति दृष्टांतेन मुख्यं पूर्वपक्षमाह॥अथवेति॥तत्र लक्षसिद्धिरेव पूर्वोत्तरपक्षफलं मंतव्यं किंच अनंगेष्व
ंगदृष्टिरित्यत्र तेष्वंगवाचिपदप्रयोगं लिंगमाह॥तथा चेयमेवेति॥तदेतदभ्याख्यं सामेत स्यां पृथिवीरूपायामृच्यध्या
ढमुपरिस्थितमित्यर्थः ऋचि सामवत् पृथिव्यामग्निर्दृश्यते अतः साम्यात् पृथिव्येवर्गग्निः सामेति ध्यानं विहितं तत्र य
स्तत्तरीति॥अतः प्रयोगोऽन्यथानुपपत्त्या पृथिव्यग्न्योर्ऋक्सामपदप्रयोगोऽनुस्यादित्यत्र दृष्टांतमाह॥
त्रसंशंसाम॥किंचपूर्वाधिकरणसिद्धांतन्यायेनाप्येवमित्याह॥प्रथमेति॥अनंगदृष्ट्या गान्युपास्यानीति सिद्धांतयति॥
एवमिति॥उपास्तीनां हि कर्मसमृद्धिः फलं श्रूयते सा च तासिरंगेषु संस्क्रियमाणेषूपपद्यते अंगानां समृध्युनुकूलप्रकृतक
र्मापूर्वजनकत्वादित्यर्थः॥ननु यत्रोपास्तीनां प्रकृतकर्मापूर्वसंनिकृष्टांगद्वारापेक्षं फलं श्रुतं तत्र फलोपपत्तये गर्भांगानामुपा
स्यत्वं भवतु तदनपेक्षलोकादिफलेषु तूपासनेषु कथमुपास्यविवेकः इति शंकते॥सर्वत्रेति॥यथा स्वतंत्रपशुफलस्यापि
गोदोहनस्यांगद्वारापेक्षैव फलमिष्टं तद्वल्लोकादिफलेषूपासनेष्वपि कर्मापूर्वांगद्वारैव फलकल्पनायुक्ता
कर्मापूर्वकृतस्यैवांगाश्रितोपासनेष्वधिकारादतोंऽगानामेवोपास्यत्वमिति समाधत्ते॥तेष्वपीति॥उत्कर्षानव
ध्यानादनियमत्वं निरस्यति॥फलेति॥उपक्रमबलाद्योगमुपास्यमिति आह॥अपीचेति॥गुणत्वुप
संख्यानमित्यर्थः॥द्वितीयं पूर्वपक्षं दूषयति॥यत्तूक्तमित्यादिना॥कर्मपत्यकर्मात्मकं ब्राप्येत्यर्थः॥सिद्धादि

गा

४

=४ स्वर्वेऽप्यर्थे पृथिव्यग्न्योर्दृष्टत्वतायाः दृष्टिद्वारकत्वात्सा परंपरा संबंधः संवाच्यलक्ष्ययोरेकदृष्टिविषयत्वस्य दृष्टिद्वारकत्वात्सा परंपरा संबं धत्तमित्यर्थः

साध्यात्मनाकर्मणां दृष्टोकर्मत्वहानिरित्यत आह॥ आदित्यादिभावेनेति॥ प्रयोगानुपपत्तिमुक्तां निरस्यति॥ तदेतदिति॥ लक्षणाबीजसंबंधमाह॥ लक्षणा चेति॥ गंगायां घोष इत्यत्र संनिकृष्टसंयोगसंबंधेन तीरलक्षणा॥ अग्निर्माणवक इत्यत्राग्निनिष्ठशुचित्वादिगुणवत्त्वरूपपरंपरासंबंधेन लक्षणा दृष्टा तथात्रर्क्सामयोः पृथिव्यग्निदृष्टिपक्षेपि ऋक्सामपदाभ्यां स्ववाच्यार्थदृष्टव्यताख्यपरंपरासंबंधेन पृथिव्यग्निलक्षणायुक्तेत्यर्थः॥ ननु प्रतीकवाचिपदस्य ध्येयेऽर्थे लक्षणा न युक्ता क्षत्तपदस्य राजान्यप्रयोगादिति शंकते॥ तत्रापीति॥ तथापि ऋक्साम संबंधात् पृथिव्यग्न्योरेवेतस्याम्च्य॥ ध्यूर्ऌ सामेत्येवर्क्सामपदप्रयोग इत्यन्वयः॥ ननु मुख्यार्थ एव कुतो न गृह्यतेत्राह॥ प्रसिद्धयोरिति॥ तस्मादृच्य ध्यूर्ऌ सामेति मुख्ययोः पृथगुक्तेः तदेतदेतस्यामित्यत्रापि तयोर्ग्रहे पुनरुक्तिः स्यात् अतः प्रतीकाभेददृष्ट्या पृथिव्यग्न्योः प्रतीकसंनिधानात्तयोरेव प्रतीकपदप्रयोगः कृतस्तदभेददार्ढ्यायेत्यर्थः॥ तर्हि क्षत्तशब्दोपि राजनि स्यादित्यत आह॥ क्षत्त्रिति॥ क्षित्त प्रयोगस्य निमित्तं किमपि वाच्यं न तु निमित्तमस्तीति प्रयोगऽपाधृतरति भावः॥ क्षत्ता सूतः तस्य कार्यं रथचर्यादि यदा राजैव करोति तदा क्षत्तृशब्दो राजन्यपस्त्यक्षरार्थः॥ ऋगादावेव पृथिव्यादिदृष्टिरित्यत्रैव हेत्वंतरमाह॥ इयमिति॥ सप्तम्या लोकानामुपास्यत्वमुक्तं निरस्यति॥ तेषु लोकेष्विति॥ सामात्मना लोकानुपासीतेति द्वितीयासप्तम्योर्भंगः स्वयाकार्यस्ततो वरं लोकात्मना सामोपासीतेति सप्तमीमात्रभंग इत्यर्थः॥ एतेनेति॥ एकविभक्ति भंग ---- प्राणात्मनागायत्रं सामोपास्यमिति व्याख्यातमित्यर्थः॥ ननु विभक्तिसाम्ये कथं निर्णयस्तत्राह॥ यत्रापीति॥ साम्न उपासनं सोऽधिकृत्य उपक्रम्य पृथिवी हिंकार इत्यादिना हिंकारादिपंचावयवस्य साम्न उपासमुक्त्वा इति नु पंचविधस्योपासनमित्युपसंहृत्य अथ इति सप्तविधस्य साम्न उपासनं प्रक्रम्य प्रपंचितमतः साम एवोपास्यत्वमित्यर्थः॥ यदुक्तं शायम्यात् पृथिव्यादेरुपास्यत्वमिति तत्राह॥ एतस्मादेवेति॥ यद्यपि हिंकाराद्यदिनपृथिवीत्वविधेरुद्देश्यस्य प्रथमनिर्देशो नाच्य तथाप्युक्तन्यायबलात् व्यत्ययो ग्राह्य इत्यर्थः॥ ॥ आसीनः संभवात्॥२ ॥ कर्मण उत्थितेनोपविष्टेन वाने कुध्यानुष्ठानदर्शनात् संशयः कर्माश्रितोपासनो [illegible]॥

म

४

गा२

वदि४

नामासननियमानपेक्षाणामनुष्ठानप्रकारउक्तः तद्वदंगानाश्रितोपासनेष्वपि नियम इति पूर्वपक्षयति ॥ तत्रे
ति ॥ अत्रासनाख्या सा स्थितिः सिद्धांते तु मनो देहयोरपि तत्रापि देहचांचल्ये मनसो नवस्थानस्यानुभवसि
द्धत्वान्मनोव्यापारेषूपासनेषु देहस्थैर्यार्थमानसनियमापेक्षेति फलभेदः तिष्ठतउच्छ्रितस्य ॥ किंच ध्याता
र आसीना एवस्युर्ध्यायतिशब्दार्हत्वात् बकारादिरित्याह ॥ ध्यानाच्चेति ॥ अत्रैव श्रौतं दृष्टांतमाह ॥ अचलत्वं
चेति ॥ बाह्यस्य शारीरस्य चासनस्य स्मरणान्नियम इत्याह ॥ स्मरंति चेति ॥ ॥ यत्रैकाग्रता तत्राविशेषात् ॥
तेष्वंगानाश्रितोपासनेषु प्राच्यादिदिग्विशेषे तीर्थादिदेशविशेषे प्रदोषादिकाले नियमोस्ति न वेति उभयथा संभ
वात्संशयः एकविषयत्वं संगतिः शास्त्रीनां विहितत्वाद्यागादिवदत्रापि दिगादिनियम इति पूर्वपक्षः अत्र
दिगाद्यादरः फलं सिद्धांते त्वनादरः ध्येये चित्तैकाग्र्यस्य प्राधान्यात् प्रधानाक्षिप्तदेशादिग्रहस्योचितत्वा
दिति विवेकः अर्थलक्षण एवेति ऐकाग्र्यफले लिंग एक एवेत्यर्थः ॥ प्राचीनप्रवणे प्रागुदक्प्रवणे निम्न इत्युक्तेवै

वं

श्वदेवकुपादितिवदत्र दिगादिविशेषोनुश्रूयते अतोनुमानमप्रयोजकमित्याहुः ॥ विशेषाश्रवणमसिद्धि

मि

मिति शंकते ॥ ननु विशेषणमपीति ॥ शर्कराः सूक्ष्मपाषाणाः जलाश्रयवर्जनं शीतनिवृत्त्यर्थं चक्षुःपीडनो
मशकः शब्दवानिकसमदेशादिनियममंगीकृत्य चित्तैकाग्र्यविरुद्धेषु देशादिगतेषु प्राचीनप्रवणत्वादिष्वनाद
र इति सुहृद्भावेन सूत्रकृदुपदिशति देशाद्याग्रहे चित्तविक्षेपात् समाधिभंगः स्यात् समाप्रकरादिति ॥ आप्राय
णात् ॥ व्यवहितेनास्य संबंधमाह ॥ आवृत्तिरिति ॥ अनियोज्यब्रह्मण्यात्मत्वप्रतिपत्तिर्यस्य तस्य विदुष इत्यर्थः ॥
अहंग्रहोपासनेष्वनुष्ठानस्योपायथादृष्टेः स न्यायमाह ॥ पानिपुनरिति ॥ यथादिगादिनियमस्याविधेरनाद
रस्तद्वदामरणमुपास्त्यावृत्तेरविधानादनियम इति पूर्वपक्षः मरणपर्यंतमावृत्तिरिति सिद्धांतयति ॥ एवमिति ॥

५

उपास्तीनां कर्मणां चांतकाले प्राप्यफलस्फूर्तिद्वारा फलहेतुत्वमानमाह ॥ सविज्ञानमिति ॥ भावनामयं विज्ञानं फलस्फुरणं
तेन सहितः सविज्ञानो विज्ञानस्फुरितं फलं सविज्ञानमित्यर्थः ॥ यच्चित्तस्मिंल्लोके चित्तसंकल्पोऽस्येति यच्चित्तः तेन संक
ल्पितेन लोकेन सह फलस्फूर्त्यनंतरं मनः प्राणेन नीयत इति यावत् ॥ तेज उदानः आत्मा जीवः जलूका दृष्टांतश्रुतेश्च
भाविफलस्फूर्तिमान्निरस्तीत्यर्थः ॥ अस्त्विदमस्य फलविज्ञानं कर्मणामिवादृष्टद्वारोपास्तीनां ततः कुत आमरणमावृ
त्तिरित्यत आह ॥ प्रत्ययास्त्विति ॥ उपास्तिप्रत्ययानां प्रवाहो लौकिकतपःस्वरूपानुवृत्तिरेवास्य विज्ञानं न त्वदृष्टद्वारक
मन्यदपेक्षितं सर्वभावानामेव स्वसमानजातीयद्वारानपेक्षतया प्रत्ययानां प्रत्ययांतरापेक्षायोगात्कर्मणां तु दृष्ट
द्वारासंभवीफलत्वानुपपत्तेरदृष्टद्वारकल्पनेति भावः ॥ क्रतुं ध्यानं स उपासकः एतत्त्रयमक्षितमस्यच्युतमसि प्राण
संशितमसीति मंत्रत्रयं मरणकालेऽपि स्मरेदित्यर्थः ॥ यथोपासनानां यावज्जीवं कर्तव्यमस्ति न तथात्मविद्यामिति
कर्मक्षयलक्षणां जीवन्मुक्तिमाह ॥ तदधिगम इति ॥ ज्ञानसाध्यनेषु पत्त्योधिकारार्थे फलाध्यायेऽपि साध्यनवि
चारः कृतः संप्रति [१] फलाध्यायस्तापेक्षितानियत इत्याह ॥ गतश्चेति ॥ कर्मणां फलतत्त्वनाशस्यात् ज्ञानना
श्यत्वनाशत्वाच्च संशयः पूर्वपक्षे ज्ञानिनोऽपि संचितपापक्षयो गानंतरं मुक्तिः सिद्धांते तु ज्ञानसमकालं पापनाशा
जीवन्मुक्तिरिति फलं नहि स्यादिसादि निषेधश्रुसा दुरितादृष्टस्य दुःखदायिनी शक्तिरधिगतानाप्युक्तं क्षी
यंते कर्मेति च स्मरंति अतः फलांतमेव पापं न मध्ये नश्यतीति पूर्वपक्षः ननु तर्हि तन्नाशार्थं प्रायश्चित्तविधिर्न
स्यादिति चेन्न ॥ यथाहिताग्नेर्गृहदाहे निमित्ते सति अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति इष्टिविधि
स्तद्वद्दोषे निमित्ते सति प्रायश्चित्तविधेर्दोषनाशार्थत्वासिद्धेः ननु विषम उपन्यासः युक्तं गृहदाहस्यासिद्धत्वाद
योग्यत्वाच्च फलतया निमित्तमात्रत्वं दोषवान् प्रायश्चित्तं कुर्यादित्यत्र तु मलिनः स्नायादितिवद्दोषपदस्य निवृ
त्तिद्वाराफलपरत्वसंभवात् तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति प्रायश्चित्तात्पापनिवृत्तिश्रुतेश्चायुक्तं प्रायश्चि

इष्टेः प्राग्वत्त्वादित्यर्थः

५

२ फलत्वायोग्यत्वादित्यर्थः सुखं वा दुःखं वा नाशो वा पुरुषेष्यमाणत्वात्फलत्वयोग्यो भवति न च तयोरन्यतरत्वं गृहदाहस्यातोऽयोग्यत्वमिति भ

१ तदसंताभावानधिकरणत्वं योग्यत्वं १

=२ यथा वर्तमानदेहारंभककर्मणो भोगेन क्षये सति ज्योतिष्टोमादिकर्मणः स्वर्गाख्यं फलं मेरुपृष्ठे देहांतरे भविष्यत्काले तरेच म
वत्येवं मोक्षोपि फले नाविशेषात्स मग्रपापस्य भोगेन क्षये देहाद्यंतरे भविष्यति नास्मिन् देहादावित्यर्थः २=

तस्य नैमित्तिकत्वमित्यत आह ॥ अपिचेति ॥ ज्ञानस्य दोषनाशार्थतया विधानं नास्ति क्षीयंते चास्य कर्माणि
त्यादेर्ज्ञानस्तावकत्वमात्रत्वादित्यर्थः ॥ कर्मभोगानंतरं देहकालांतरे मोक्षोस्तु विष्यति शास्त्रप्रामाण्यादित्याह
नेत्युच्यत इति ॥ ज्ञानात्कर्मफलस्याप्रवृत्तौ मोक्षानंतरविरुद्धत्वाच्छूतस्य राने कवाक्यानां स्तावकत्वापोगात्तस्योत्ति
त्वमस्तीति संभावयति ॥ एवमित्यादिना ॥ पापक्रियातोपरि वीनु सत्तिरश्लेषः सगुणब्रह्मविद्यायां व्यपदेशानुत्वात्
दिस्य तिश्चकर्मणः फलशक्तेः प्रमाणमतः शास्त्रस्यापि कुतश्चिन्नाशं गीकारेन शास्त्रविरोध इत्यर्थः ॥ त
त्वे ज्ञानमात्मन्य शेषदुरितनाशकं तन्मूलाध्यासबाधकत्वात् स्वप्नदुरितमूलकर्तृत्वाध्यासबाधक जाग्र
द्वोधवदित्याह ॥ तथाप्यकर्त्रात्मबोधादिति ॥ श्रुतार्थमेवयुक्त्या द्रढयति ॥ अश्लेष इति चेति ॥ मूलाध्यासानु
वृत्तेः पापस्याश्लेषस्तन्नाशानादिनाश इत्यर्थः ॥ अध्यासाभावे विद्वदनुभवमाह ॥ पूर्वेति ॥ मोक्षशास्त्रवलाच्च
ज्ञानात्कर्मक्षयसिद्धिरित्याह ॥ एवमेवेति ॥ ज्ञानात्कर्मक्षये सत्येवेत्यर्थः ॥ मोक्षस्य कर्मफलसाम्यमुक्तं निरस्य
ति ॥ नचेति ॥ इतरस्यापि तु ॥ अतिदेशात्तत्संगसो पपेक्षा ज्ञानात्पुण्यक्षीयते न वेति पूर्ववत्संदेहे ज्ञानं न पु
ण्यनाशकं शास्त्रीयत्वात्पुण्यवदित्यधिकाशंकामुक्तातिदेशं व्याचष्टे ॥ धर्मस्येत्यादिना ॥ ज्ञानं पुण्यनाशक
तन्मूलाध्यासनिवर्तकत्वादितिन्यायेनैतागमबाधितमनुमानमिति भावः ॥ ननु क्षीयंते चेत्यविशेषश्रुतिः पाप
विषया सर्वपाप्मानं तरतीति विशेषश्रुतेरित्यत आह ॥ यत्रापि केवलइति ॥ पापपुण्यक्षयपराविकर
णद्वयस्य फलमाह ॥ पातेस्त्विति ॥ अनारब्धकार्ये एव ॥ उक्तकर्मक्षयं विषयीकृत्य क्षयं तेचेत्यविशेषश्रु
तेस्तत्स्यतावदेव चिरमिति श्रुतेश्च संन्यायमाह ॥ पूर्वेपोरिति ॥ जीवन्मुक्त्यसिद्धिस्तेहि सिद्धिश्लेषत्वप्रसपन्नफलं
=४ स्वाप्नपुण्यमूलाध्यासवर्तकजाग्रद्वदिति द्रष्टव्यं ४=

=श्लेषमूलाध्य
संभवादित्य

पूर्वसिद्धांतन्यायेन पूर्वपक्षप्राप्तावुक्तो संगतिः कर्मक्षतिः प्रारब्धान्यकर्मविषये सापवादं सिद्धांतयति॥
एवमिति॥ सामिशब्दो र्धवाचकः प्रारब्धं यावन्न मुच्यते तावानेव विलंबः अथ तत्क्षणे ब्रह्म संपद्यत
इति श्रुत्यर्थः॥ देहपातावधि लिंगात्तत्त्वविदां याज्ञवल्क्यादीनां देहधारणदर्शनश्रुतिस्मृतिलिंगा
च्च॥ प्रारब्धकर्मणः तत्त्वज्ञानं प्रति हेतुत्वेनोपजीव्यत्वाच्च प्राबल्यसिद्धेस्तस्मात् बद्धतत्त्वज्ञानं तत्क्षि
प्र्यर्थमपि पांशविक्षेपशात्त्याख्यं विहायावरकांशं विद्यांशनाशयतीत्याह॥ उच्यते न तावदिति॥ वि
क्षेपको विद्यालेशः एव संस्कारः शिष्यान् प्रतिजीवन्मुक्तो स्वानुभवमाह॥ अपि चैनेवेति॥ अग्निहोत्रादि
नु निःसनेमित्तिकं कर्म ज्ञानान्नश्यति नवेति संदेहे उभे पुण्यपापे तरतीत्यविशेषश्रुतेर्नश्यतीत्याशं
क्येतरस्यापीत्युक्तातिदेशस्य नित्यसाधारणत्वेऽपि काम्यपुण्यविषयत्वेन॥ तत्रापवादं सिद्धांतयति॥ पुण्य
स्येत्यादिना॥ अत्र पूर्वपक्षे ज्ञानार्थनित्याद्यनुष्ठानासिद्धिः पक्षद्वयन्यायात् सिद्धांते तु ज्ञानोत्प
त्त्यर्थत्वात्तत्सिद्धिरिति विवेकः॥ अत्र भाष्ये ज्ञानकर्मणोः साक्षादेककार्यत्वं परमतेनोक्तं साक्षात्संसार
पर्यायरूपमोक्षहेतुत्वं मतमुक्तमिति मंतव्यं॥ अत एवेति॥ ज्ञानादूर्ध्वं कर्माभावात् पूर्वकर्मविषयमिदमित्यर्थः॥
निर्गुणविद्यायाः कर्मसाहित्यं तत्फलं प्रति प्रयोजनस्य लांगलेनेव दर्शितं संप्रति सगुणविद्यापरत्वेनास्य
सूत्रस्यांजस्यमाह॥ सगुणास्विति॥ उत्तरसूत्रं गृह्णाति॥ किमित्यादिना॥ यत्प्रारब्धादन्यत्कार्यं पुण्य

पापं च तदेव विद्वत्सुहृद्द्विषतोः स्वसमानजातीयं कर्म जनयति स्वयं च ज्ञानान्नश्यतीति भावः ॥ यदेव विद्ययेति
ति हि ॥ उक्तानीत्यादिकं विषयमुपजीव्य सबीजं संशयमुक्त्वा पूर्वपक्षमाह ॥ विद्यासंयुक्तमेवेति ॥ अत्र पूर्वप
क्षे कर्माङ्गोपास्तिहीनकर्मणो ज्ञानार्थत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः ॥ भवतु विद्याविशिष्टकर्मणो ज्ञा
नं प्रति शीघ्रकारित्वाख्यः कश्चिदतिशयः विद्यासामर्थ्यात् न तावता केवलस्य वैयर्थ्यं विविदिषाश्रुति
विरोधात् न च तत्र श्रुतौ यज्ञादिशब्दानां विद्योपेतकर्मपरतया संकोचो युक्तो हि यतो यदेव विद्ययेति श्रुतिः
केवलस्यापि वीर्यवत्त्वं गमयतीति सिद्धान्तग्रन्थार्थः ॥ भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ तत्त्वविदत्र विषयः
स किं प्रारब्धक्षयानन्तरं संसरत्युत नेति निमित्तभावाभावाभ्यां संशये सिद्धान्तमुपक्रमते ॥ अनारब्धेति ॥
अनारब्धकर्मणः क्षयोक्त्या प्रारब्धस्य कथं क्षय इत्याकाङ्क्षायां तस्योपस्थानात् संगतिः पूर्वपक्षे विदेहकैवल्या
सिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः देहपातोत्तरमपि तत्त्ववित् संसरति संसारयोग्यत्वाद् यथा देहपातात् पू
र्वमित्यनारब्धाधिकरणदृष्टान्तेन पूर्वपक्षमाह ॥ नन्विति ॥ भोगनिमित्तकर्माभावाद्धेत्वासिद्धिः ॥ यत्तु संचि
तं कर्मान्तरं तन्निमित्तं फलस्य ॥ दग्धमूलत्वाद् अविद्यादयो हि क्लेशाः कर्मणः तत्फलस्य मूलं ॥ तदुक्तं
योगशास्त्रे ॥ क्लेशमूलः कर्माशयः सति मूले तद्विपाकः इति तच्च मूलं ज्ञानाग्निना दग्धमिति कुतः पुनः सं
सारः ॥ तस्माद्देहपाते कैवल्यमिति सिद्धं ॥ ७ ॥ इति श्रीमद्धंसपरिव्राजकाचार्यश्रीमद्गोविन्दानन्दभगवत्कृ
तौ भाष्यरत्नप्रभायां चतुर्थाध्यायस्य प्रथमः पादः समाप्तः ॥ ७ ॥ ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ ज्ञाने

च

८

ज्ञानफलोत्पत्त्यनंतरमुपासनाफलं ब्रह्मलोकसंभवकृत्यं तत्रार्चिरादिमार्गप्राप्त्युं मार्गप्राप्तिश्चोत्क्रांतिसाध्या
तस्मादुपास्तिफलाक्षिप्तोत्क्रांतिपादस्यास्याध्यायसंगतिः युक्तं चास्य पूर्वपादानंतर्यं ज्ञानफलोत्पत्त्यनंतरं ख
कृत्योपास्तिफलेनाक्षिप्तत्वादित्याह॥ अथेति॥ ज्ञानिनस्त्वोपासकस्यापि उत्क्रांतेर्मतमाह॥ समानेति॥ विद्वानुपा
सकस्तस्यानुपासकवदुत्क्रांतिरस्ति अन्नत्वादिति वक्ष्यत इत्यर्थः॥ प्रयतो म्रियमाणस्येत्यर्थः वाक्पदस्य करणमा
त्रवृत्तित्वात्करणतद्वृत्त्योर्लयभानात् संशयः पूर्वपक्षे करणानां स्वरूपलयाभ्युपगमतमात्रस्य मुक्तिः सिद्धांते तु
संसारसिद्धिः अनुपासनेन मनसि वाचस्तत्त्वलयाभियोगेन व्यापारमात्रोपशमादिति विवेकः॥ सूत्रे वृत्तिपदाध्या
हारः कथमिति शंकते॥ कथमिति उत्तरत्र हि सूत्रकृता वृत्तिविदं इन्द्रियाणां स्वरूपलयं वक्ष्यति तद्वलादिहाप्याहार
उचितः अग्न्याप्यादिप्रलयप्रसाम्यात् वक्ष्यमाणविशेषात्त्ययोगादिसमाप्त्यर्थः प्रकृतावेव विकारलयः इति न्या
यविरुद्धार्थं श्रुतिरपि नक्षत्रसाहसिद्धांती॥ अतत्प्रकृतित्वादिति॥ न्यायस्य निरवकाशत्वाद् गौणीयस्तु शब्दस्य वृ
त्तिवीति तिसुसत्ता लक्षणेन वासावकाशात्वमिति द्योतयितुं शब्दाच्चेत्युक्तं वा चतुर्थं न्यायं च सुरादिषु निदिश्या
ति॥ अत एवेति॥ उपशांतदेहोऽक्रमणादूर्ध्वं पुनर्भवं प्रतिपद्यत इति श्रुत्यर्थः॥ इन्द्रियैरव्ययस्य श्रुतिस्वरूपस्य
त्तिपरतयोपपन्नः॥ सर्वेन्द्रियवृत्तिलयश्रवणादिष्टस्ताहि वाङ्मनसीति पृथक्सूत्रं किमर्थमित्यत आह॥ सर्वे प्राक
णानामिति॥ तन्मनः प्राण उत्तरात्॥ वाक्यक्रमादेव क्रमात्वाधिकरणक्रमः श्रुतिन्यायाभ्यां संशयः पूर्ववत्प्रब
लन्यायविरोधाद्वाणि इति श्रुतेर्बाधः कृतः इह तु बालकप्राणस्यान्नात्मक मनः प्रकृतित्वेन प्रकृतौ विकारलयप्र
तिन्यायानुग्रहान्मनः श्रुतिर्बाध्येति पूर्वपक्षः फलं पूर्ववत् सिद्धांतस्तु तन्नयोः प्रकृतिविकृतिभावेऽपि न ताद्विक
रयोः प्राणमनसोस्तद्भावो हि न दृष्टयोरपि तद्भावप्रसंगादतो न्यायविरोधात् पूर्ववच्छ्रुतिर्बाध्येति विवेकः॥

८

आगृहीताबाह्येंद्रियवृत्तावतेजसि उपायापि संभवतीर्थः वृत्त्योपेन तत्तथा हीनेंद्रियवृत्तिकं मनोपि वृत्तिक्षयेणैव
प्राणो हीयत इत्यर्थः॥ एवमपीति प्राणस्याविकारत्वपक्षेपीत्यर्थः॥ तस्मादिति॥ प्राणस्य साक्षान्मनः प्रकृतिकत्वा
भावान्मनः शब्दो वृत्तिं लक्षयतीत्यर्थः सोध्यक्ष इत्युपगमादिभ्यः॥ उक्तन्यायसिद्धं प्राणस्यापि वृत्तिलयमुपजीव्य
प्राणस्तेजसीति श्रुतेरुपगमादिश्रुतेश्च संग्राप्रमुत्क्रान्तौ जीवे लयं विनापि उपगमादिसंभव इति पूर्वपक्षयति॥ स्थि
तमित्यादिना॥ अत्र तेजः शब्दस्य मुख्यत्वेऽसिद्धान्ते तु भूतोपहितजीवलक्षकत्वमिति मत्वा सूत्रं योजयति॥ सप्रक
रसोदिना॥ ज्ञानकर्मवासनोपाधिक इत्यर्थः तं जीवं प्रति प्राणानामुपगमानुगमनावस्थानं श्रुतिस्पष्टमिति हेत्वर्थः॥
यथा पात्रे ष्वावंतं राजानमेताः सर्व उपगच्छन्त्येवमेवं परलोकं गमिष्यं जीवं सर्वे प्राणा अभिमुख्येनायन्तीति उपगमः
श्रुतः तमुत्क्रामन्तमित्यनुगमनं श्रुतं जीवे प्राणावस्थानं श्रुतिमाह॥ सविज्ञान इति॥ जीवस्य प्राणव्यपदेशावगाहि
विज्ञानसाहित्यं च मुख्यप्राणसहितकरणानां जीवे स्थितिं गमयतीत्यर्थः॥ यद्यपि प्राणस्य तेजस्यव्यवधानेन
लयः श्रुतः तथापि सद्युक्तात्प्राणे जीवे लीयते जीवद्वारा च तदुपाधिषु तेजआदिभूतेषु स्थितिं श्रुत्यर्थः स्फुटी
करणार्थं सूत्रं व्याख्याति॥ कथं तर्हीति॥ न च लयं विनापि जीवं प्रत्युपगमादिसंभवात्तेजःश्रुतिर्मुख्यास्त्विति वा
च्यं॥ जीवं प्रत्यागतस्य प्राणस्य निर्व्यापारत्वेन स्थितेरेवात्र लयशब्दार्थ लयो दिति भावः॥ भूतेषु जीवस्थितिः किं बला
द्व्याख्यायत इत्याशंक्य सोऽध्यक्ष इति सूत्रोदाहृतश्रुतिबलादित्याह॥ नन्वित्यादिना॥ प्राणस्य जीवद्वा
रा भूतप्राप्तौ दृष्टान्तमाह॥ योपीहेति॥ स्थूलदेहारंभायपंचीकृतभूतान्यावश्यकानीति रहस्याधिकर
णे व्याख्यातं॥ अण्वाः सूक्ष्माः मीयन्त इति मात्राः परिच्छिन्नाः प्राङ् मोक्षादविनाशिन्यो दश याऽर्धो नां पञ्च
नां भूतानां सूक्ष्मभागा इति यावत्॥ जीवस्य भूताश्रयत्वं कर्माश्रयत्वश्रुतिविरुद्धमित्याशंक्य कर्म

निमित्तत्वेनाश्रयः कृतानि। तु देहोपादानत्वेन तेसु मयैं विरुद्धमित्याह॥ ननु चेत्यादिना॥ तौ याज्ञवल्क्यार्तभागीय
जीवात्पोर्ण चतुस्तन्कर्मेति श्रुतेर्वचनं॥ एवं वा घेंद्रियाणां मनसि पृथग्वृत्तिलयसत्ता मनोवृत्तेः प्राणे
यः प्राणवृत्तेः कृतोपहितजीवे लयइति उक्तो तिव्यवस्थोक्ता॥ साच सर्वप्राणिषु तुल्येत्याह। समाना चानुपोष्य।
पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते इति विशेषश्रुतेर्विषया मतममृतत्वं इति श्रुतेश्च संशयमाह। सेयमिति॥ विषयानास
दिहानानामित्यर्थः॥ पूर्वपक्षे सगुणब्रह्मविदं संबंध्येव मुत्क्रांतिर्विशेषः साध्यते॥ ततोनुत्क्रांत उपासकोमृ
तिमस्मृतरतिफलं॥ सिद्धांते तत्त्वांतो ब्रह्मलोकभागीति फलभेदः पूर्वपक्षमाक्षिप्य समाधत्ते॥ ननु विषय
दिना॥ विषयमामृतत्वमिति श्रुतिः निर्गुणविषया॥ न तस्य प्राणा उत्क्रामंतीति विप्रतिषेधोपितद्विषयः॥ अ
नः सगुणविदोप्यज्ञस्येवोत्क्रांतिरितिसिद्धांतयति॥ एवमिति॥ सृतिमार्गस्तस्योपक्रमो चिः प्राप्तिस्ततः प्राप्त
नोत्क्रांतितुल्यात्तत उपासको मूर्धन्यनाडीद्वारार्चिरादिमार्गप्राप्त्या तिनान्यइति विशेषः॥ दहरोपासकस्यामृ
तत्त्वं श्रुतं तयोर्ध्वमायन्नमृतत्वमेतीति तदपेक्षितमेव नमु रव्ययं कामैर्यते सोस्य संकल्पादेव समुत्तिष्ठतीति
भोगश्रवणादित्याह॥ अनुपोष्य चेदमिति॥ उपदाहरति ध्यातोरिदं रूपं॥ तदापीतेः॥ पूर्वोदाहृतोत्क्रांतिवाक्य
शेषं व्याख्यायलिंगोप्यप्रपंचकृतानां क्रिमासंतिकोब्रह्मणि लय उत नांतिक इति लयस्योभयथा दर्शनात्संश
यमाह॥ कीदृशीपुनरियमिति॥ पूर्वत्रापेक्षिकेमृतत्वमिमुक्तं तदयुक्तमित्याक्षेपात्संगतिः॥ पूर्वपक्षेमृत
मात्रस्य मुक्तिसिद्धिः॥ सिद्धांते तु कर्मविपाकात्स्वबलोत्सावशेषले यसिद्धिरिति विवेकः॥ ननु लिंगात्मक
स्य तेजसः कथं सूक्ष्मतमनु उद्धारागतिः कुतो वा केन चिन्मूर्तेन प्रतिघातो नास्ति कुतोवानदृश्यत इत्यत आ
ह॥ सूक्ष्ममिति॥ प्रमाणसौक्ष्म्यादुतिरनुद्भूतस्पर्शरूपवत्त्वात्स्वस्थात्स्वस्यास्त्रप्रतिघातानुपलब्धिरित्यर्थः॥

काम

लिंगसद्भावे चोदयत्यलिंगकानुमानमाह ॥ अस्यैव चेति ॥ प्रतिषेधादिति चेन्न शारीरात् ॥ पूर्वमुपोषितेति पदेन दग्ध्वा
शेषके शास्य निर्गुणज्ञानिनउक्तो ह्याद्यभावः स्तुचितस्तस्याक्षिप्यसमाधानानुव्यवहितेनास्य संगतिरित्याह ॥ अ
मृतत्वं चेति ॥ सकामस्य संसारोऽनंतरं निष्कामस्य मुक्तिप्रकरणार्थोऽथ शब्दः ॥ आत्मकामत्वात् पूर्णानंदात्मवि
त्वादाप्तकामः प्राप्तपरमानंदः अतो निष्कामः अनभिव्यक्तान्तरवासनात्मककामश्शून्यः तस्मादकामः व्यक्तबाहिःका
मरहितत्वं दृश्यते योऽकामयमानस्तस्येत्सन्यसः ॥ ज्ञानिन उक्तौ तिरस्तिनेवेति पंचमीषष्ठीश्रुतिभ्यां संदेहे सिद्धांतीपू
र्वपक्षयति ॥ नेत्यादिना ॥ काण्वश्रुतौ न तस्येति सर्वनाम्ना प्रकृतज्ञानिनं परामृश्य संबंधसामान्यमुक्तं तत्र माध्यं
दिनिशाखायां तस्मादित्युपादानत्वरूपविशेषउक्तो ग्राह्यः ॥ तथा च जीवात् प्राणोत्क्रांतिप्रतिषेधात् तिन्नदे
हात्तच्च देहे न देहस्यानुक्तेस्तस्मात् ज्ञानिनोप्युत्क्रांतिरस्तीति नवैयर्थ्यमिति पूर्वपक्षे फलं सिद्धांतेतत्सार्थक्य
माह ॥ स्पष्टो हीति ॥ अत्र पुरुषशब्दवाच्यो देह एवास्मादित्युक्तः सर्वथोच्यते ॥ सशब्दपरामृष्टस्य प्रकृतस्य पुरु
षस्योच्छ्वयनादिधर्मकस्य जीवत्वायोगादित्यर्थः ॥ उच्छ्वयति बाह्यवायुपूरणाद्वर्धते आध्मात आध्मायति ॥
आर्द्रवृत्तिवच्छवंकरोतीत्यर्थः ॥ येषां पंचमीपाठस्तेषामपि देहिनः प्राधान्यं तथापि देहदेहिनोरभेदात्तस्मा
दितिदेहपरामर्शस्तदुपादानएवोक्तौ तिप्रतिषेध इति व्याख्येयं ॥ तत्सामान्यादुक्तश्रुत्यास्य पाठस्यैकार्थ
त्वादिति योजना ॥ इदानीं काण्वपाठस्यानुगुण्यमाह ॥ येषां तु षष्ठीपाठ इति ॥ संबंधविशेषाकांक्षायांपोत्क्रा
प्राणानां श्रोत्रोपकरणत्वविशेषान्नेव प्राणमयो मनोमय इति पूर्वश्रुत्युक्तो ग्राह्यः न तु स्वांतरस्थमुपादानत्वं यु
क्तं जीवदुत्क्रांतेर प्रार्तीयाः प्रतिषेधायोगात् अतो विद्वत्संबंधिप्राणानामुत्क्रांत्यपादानापेक्षायां चक्षुष्टो
वान्यः श्रोत्रेत्युक्तदेहप्रदेशा एव ग्राह्याः तथा चायमर्थः ॥ तस्य विदुषो भोगोपकरणात्मकाः प्राणा देहप्रदे

शा

९

रोऽस्मान्नोत्क्रामंतीति॥ एवंच प्राणोत्क्रांतिनिषेधार्थत्वं वाक्यस्येति सर्वं चतुरस्रं॥ अपिचेति॥ स्पष्टार्थः॥ सम्यगा
त्मभावेन पश्यतस्तानि पश्यतः अपदस्य प्राप्यपदरहितस्य पदैषिणो देवा अपि मार्गे मुह्यंति मार्गं न जानंतीति तदभा
वादिति श्रुतियोजना॥ स्मृ संतु रविरोधं चरीकृते॥ ननु गतिरपीति॥ सगुणविद्याबले नैषा गतिरिति परिह

स्म

रति॥ नशरीरस्येति॥ ननु तर्हि तयोर्ध्वमायन्नमृतत्वमेतीति स एवैनान्ब्रह्म गमयतीत्यादिश्रुतीनां का गतिस्त
त्राह॥ गतीति॥ तानि परे तथा ह्याह॥ पूर्वत्र गतिनिषेधेन विदुषः कलानां प्राणादीनामत्रैव लय उक्तः तमुपजी
व्य सकिं तत्तत्कलाप्रकृतिषु पृथिव्यादिषु स्यादुत परस्मिन्नीति श्रुतिद्वयदर्शनात् संशयः कार्यः॥ तत्र साक्षात्स्व
कृतो विकारस्य प्रकृतिन्यायानुगृहीतया गताः कलाः प्रतिष्ठा इति श्रुत्या पूर्वपक्षं अग्रे वदन्वादोऽसिद्धांतमाह॥ तानी
ति॥ यथा नद्यः समुद्रं प्राप्य लीयंते एवमेवास्य परिद्रष्टुः सर्वत्र ब्रह्मद्रष्टुरिमाः प्राणाद्याः पुरुषायणाः पु
रुषे कल्पिताः पुरुषमेव प्राप्य लयं गच्छंतीत्यर्थः॥ ननु प्राणयोरेकीकरणे कलानां पंचदशत्वं प्रति
ष्ठा इति द्वितीया बहुवचनं॥ स्वस्वप्रकृतीः पृथिव्याद्या इत्यर्थः॥ वस्तुगत्या विद्वद्दृष्ट्या परमात्मनि कलालये पि लोक
दृष्ट्या प्रतिष्ठासु लयोक्तिरविरुद्धा॥ तथा च कलाः स्वप्रकृतिषु लीयमानास्ताभिः सह पुरुषे लीयंत इति श्रुतिद्वयतात्पर्यं॥ ७॥ षु

अविभागो वचनात्॥ ७॥ उक्तलयमुपजीव्य लयस्य द्वैविध्यदर्शनात् संशयमाह॥ स पुनरिति॥ मुक्त्यसिद्धिस्त्वसिद्धिश्चे
त्युभयत्र फलं अवशेषो मूलकारणे शक्त्यात्मना स्थितिः पुनर्जन्म योग्यतेति यावत्॥ विमतः कलालयः सावशेषः क
लालयत्वात् सुषुप्तिवदिति पूर्वपक्षः॥ विमतो निरवशेषः विद्याकृतत्वात् रज्ज्वां विद्यया सर्पलयवदिति युक्त्युपेतश्रु
त्या सिद्धांतयति॥ ब्रवीतीति॥ नामरूपे शक्त्यात्मके अपि भिद्येते इत्यर्थः॥ तदोकोग्रज्वलनं॥ ७॥ एतेन मार्गस्योपक्रमो ९

नाडीप्रवेशनियमस्तं वक्तुं सूत्रभागव्याख्याद्वारा अधिकरणविषयमाह ॥ तस्येति ॥ समुत्क्रमिष्यतस्तेजोमात्राइंद्रियाणि हृदयस्या
ग्रं नाडीमुखं तस्य ज्वलनं प्रविफलस्फुरणं प्रद्योतारव्यं चक्षुषोश्चैव स नियमः श्रुतेस्तयोर्ध्वमायन्निति विशेषश्रुतेश्च संशयः
किमुपासकोऽप्यनुपासकवत् येनकेनचिद्द्वारेण निर्गच्छति उत मूर्धन्यनाड्यैवेति ॥ अत्र पूर्वपक्षे विद्याकृतोऽतिशयाऽसिद्धिः
सिद्धांते तत्सिद्धिरिति विवेकः ॥ वचनादविभागवदनियमइति प्राप्ते सिद्धांतयति ॥ आ चेष इति ॥ येनकेनचिन्मार्गेण निर्गति
स्यापि ब्रह्मलोकप्राप्तो विद्याशेषत्वेन मार्गानुस्मृतिविधेः केवलादृष्टार्थत्वं स्यादतो न वहं स्मृतेनैव मार्गेण गमनं युक्त
मिति भावः ॥ हार्दं ब्रह्म विद्यः ना नाविद्या अन्या नाड्या अन्येषामित्यर्थः ॥ सुषुम्नाख्या नाडी हृदयान्निर्गता दक्षिणता
लुकं गंतस्तन नासिकामध्यमिति द्वारा ब्रह्मरंध्रं प्राप्ता सूर्यरश्मिभेरकीकृता ब्रह्मलोकमार्गउपासकस्येति स्थितं ॥ ७ ॥
रश्म्यनुसारी ॥ ७ ॥ प्रकरणशेषं पुनः पूर्वकमुपासकस्य रश्म्यनुसारित्वं विषयमाह ॥ अस्तीत्यादिना ॥ अथ प्रारब्धांते
एतदुक्तमणपथास्यादध्यतदा एतैरेव नाडीसंबद्धैः रश्मिभिरुत्क्रामतीत्यर्थः ॥ अत्र संबंधस्य कालविशेषाश्रवणाद्रा
त्रौ रश्म्यभावाच्च संशयमाह ॥ तत्किमिति ॥ पूर्वोक्तनाडीसंबद्धर[blot] रश्मीनामत्रोपजीव्यत्वात् संगतिः ॥ पूर्वपक्षे रात्रौ मृत
स्य रश्मिप्राप्त्यर्थं सूर्योदयप्रतीक्षास्तीति सिद्धांते नास्तीति मत्वा सिद्धांतं प्रतिजानीते ॥ अविशेषेति ॥ पूर्वपक्षबीजमुपन्य
स्य दूषयति ॥ निशीत्यादिना ॥ शिरानाड्यः अतायंते विस्तृता भवंति सप्ताः संबद्धाः श्रुत संबंधस्य रात्रौ सत्त्वयुक्तिमाह ॥
निदाघेति ॥ तर्हि हि मृतादि रात्रिशेषोष्मोपलब्धिः स्यादित्यत आह ॥ स्तोकेति ॥ सवितारश्मावर्षहृदयान्तीति यार
णाभिधानं स्तोकरश्म्यनुवृत्साभिप्रायमेवेत्यर्थः ॥ किं च यदि रात्रौ मृतस्य रश्मियोगं विनैवोर्ध्वगतिः स्यात्तदा रश्मि
श्रुते दिवामृतविषयतया संकोचः स्यादूर्ध्वगत्यभावे च विद्यायामप्रवृत्तिः स्यान्न च प्रतीक्ष्यो र्ध्वगतिरिति वाच्यं ॥ र
श्म्युदयात् प्राक् देहदाहप्रतीक्षावैयर्थ्यापातात् प्रतीक्षाश्रुतिविरोधाच्च तस्माद्यदाकदाचिन्मृतस्य रश्मिप्राप्त्या सद
ति ब्रह्मलोकप्राप्तिरिति फलं सिद्धं ॥ एवं दक्षिणायने मृतो विद्वान्विद्याफलमाप्नोति न वेति विद्यायां नियमवत्फलश्रुते

प

१०

रूत्तरायणप्राशस्त्याच्च संदेहे पूर्वोक्तहेतूनतिदिशति ॥ अतश्चायनेपि दक्षिणे ॥ पूर्वपक्षमाशंक्यापनुदति ॥ उत्त
रायणे सादिना ॥ अत्रानामुत्तरायणे दैवान्मरणं चेत्प्रशस्तमित्यभिज्ञाभिवदनरूपाचारपरिपाठनार्थं भीष्मस्य प्रतीक्षा ॥
ष्यान् षण्मासानिति श्रुतिस्तूत्तरायणदेवतापरेति वक्ष्यते ॥ तथा च देवतायाः सदासत्त्वाद्विद्यया दक्षिणायनकालेपि तस्या
प्यविरुद्धेति भावः ॥ स्मृतिबलात्कालप्राधान्यं शंकते ॥ ननु चेति ॥ श्रौतदहराद्युपासकस्यास्माप्तिः कालानपेक्षा तर्हि
स्मार्त्तयोगिनां तु कालापेक्षास्त्वितावुच्यतस्तस्य विरोधमाह ॥ योगिन इति ॥ योगी दहराद्युपासक एव स्मृतस्तु कः किन्त्वस्मा
दिस्मृत आह ॥ स्मार्त्ते चेति ॥ भगवदाराधनबुद्ध्यानुष्ठितं कर्म योगः ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स सन्न्या
सी च योगी चेति स्मृतेः ॥ धारणापूर्वको कर्त्तृत्वानुभवः सांख्यं ॥ इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन्निति स्मृतेः ॥
ननु श्रुतिस्मृत्योर्भिन्नार्थत्वमयुक्तं प्रत्यभिज्ञाविरोधादिति शंकते ॥ कालाग्रहिणं प्रति भिन्नार्थत्वमुक्तं ॥ यदि तु श्रौता
र्थप्रत्यभिज्ञया कालशब्दो देवतापरः तर्ह्येकार्थमेवेति समाधानार्थः ॥ तस्माद्विद्यासामर्थ्यात्सर्वैरेव दिष्टगतस्य
फलप्राप्तिरिति सिद्धं ॥ छ ॥ श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविंदानंदभगवत्कृतौ शारीरकमीमांसाव्या
ख्यायां चतुर्थाध्यायस्य द्वितीयः पादः समाप्तः ॥ छ ॥ छ ॥ छ ॥ एवमुत्क्रान्तिं निरूप्य तत्साध्यं मार्गं गन्तव्यं च निरूपयि
तुं पादमारभते ॥ अर्चिरादिना तत्प्रथितेः ॥ वृत्तानुवादपूर्वकमाद्याधिकरणस्य विषयं मार्गमाह ॥ आसत्तीति ॥ विर
जो विरजसः शिष्यापाद्यर्थः ॥ श्रुतिविप्रतिपत्त्या संशयः ॥ पूर्वं यत्र कदाचिन्मृतस्य फलप्राप्तिरुक्ता तद्वद्येन केन
चिन्मार्गेण गतिरिति पूर्वपक्षस्य फलं विकल्पः ॥ सिद्धान्ते मार्गैक्यमिति विवेकः ॥ उपासनाभेदात्तद्भेदेन ध्येयानां
मार्गाणां भेद एवकाराद्वा किंच मार्गपदेसस्मादपं मार्गस्वरूपप्रापकरीत्युक्तं न मार्गैक्याभिप्रायः ॥ उपासना
भेदेप्युपास्यब्रह्मैक्यान्मार्गैक्यमविरुद्धमिति सिद्धान्तयति ॥ एकमिति ॥ तस्य मार्गस्य प्रसिद्धत्वादिति हेत्वर्थः ॥

१०

येदेशाविशेषश्रुतिरश्रुतगतिविषयेतिमार्गभेदं शंकते॥ स्यादेतदिति॥ एकस्यैवमार्गस्यानेकान्यग्न्यादीनि विशेषणा
नीत्युक्ते लाघवात्रमार्गभेदः प्रत्यभिज्ञानाच्चेति समाध्यर्थः॥ गंतव्यैक्यं विवरणे तित्तथाहीति॥ परावतो दीर्घायुषो
हिरण्यगर्भस्य परार्धपर्याः समाः संवत्सरान् वसंति कापेयं ब्रह्मणो याजितिः सर्वत्र जयो व्युष्टिर्व्याप्तिः तां लभत इत्यर्थः॥
एवं गंतव्यैक्यप्रत्यभिज्ञया मार्गैक्यनिश्चयात् प्रकरणभेदोऽप्रयोजक इत्युक्तं संप्रत्येवकारत्वराश्रवणं प्रयोगमिति माह॥ यत्रि
सादिना॥ रात्रौ सम्परस्मात्तावाहिदुषोऽर इत्यपि योगप्राप्तो तन्निरासार्थ एवकारो नान्यव्यावर्त्यः॥ यथा लौकिकमार्गे विशे
षस्तथार्चिरादौ नेति तत्र वाक्ये नोपपत्तिरित्यर्थः॥ मार्गैक्ये लिंगमाह॥ अपि चेति॥ शुभमार्गबाहुल्येन तृतीयस्थानो
क्तिर्न स्यादिति भावः॥ उत्तरमार्गैक्येऽप्यर्चिरादितेति विशेषणे को हेतुरित्यत आह॥ कृ यांसीति॥ उक्तमार्गैक्यमुपजी
व्य पर्वक्रममाह॥ ७॥ वायुमब्दात्॥ अर्चिरादिस्तस्मादयमनंतर इति क्रमेण विशेषणविशेषत्वस्तावदुच्यत इत्यधिकरण
स्य तात्पर्यमुक्त्वा विषयमाह॥ स एतमिति॥ अत्रान्ननंतरं पठितो वायुर्विषयः स किमर्चिरात्मकाग्नेरनंतरं उत संव
त्सरात्पर इति पाठाद्वक्ष्यमाणविशेषश्रुतेश्च संशये सिद्धांतमेवोपक्रमते॥ उच्यत इति॥ पुरुषत्वपासकोऽस्माल्लो
कादेहा तैति निर्गच्छति तत्स्मै प्राप्ताय पुरुषाय स वायुस्तत्र स्वात्मनि विजिहीते छिद्रं करोति तेन वायुदत्तेन रथचक्र
छिद्रतुल्येन द्वारेण ऊर्ध्वमादित्यं गच्छतीति श्रुत्यर्थः॥ इदानीं पूर्वपक्षमाह॥ कस्मात्पुनरिति॥ पाठबलादर्चि
षोऽनंतरो वायुरित्यर्थः॥ को षीति किं नां पाठमात्रेन क्रमविशेषवाचीकश्चिच्छब्दोऽस्ति॥ काण्वानां तु तेनेत्यस्पष्ट इति
च शब्दोभ्यात्र क्रमनिश्चयात् पाठबाध्य इति सिद्धांतार्थः॥ अस्त्वर्चिरादिमार्गे छांदोग्यस्थे संवत्सरपाद्यद्वयोरव्या
तु परत्वं वाजिश्रुतिस्थेतु संवत्सरस्याश्रुतेः कथमब्दात्परतो वायुरित्यत आह॥ वाजेति॥ तद्धि देवलोकाद्वायुमिति स्व
त्रस्यादित्यत आह॥ वायुमब्दादिति॥ संवत्सरस्य मासावयविहान्मासानंतर्यं संवत्सरापरे देवलोकस्ततः परो वा

११

सूर्यायोः परआदित्य इति श्रुतिद्वये क्रमो निष्पन्नस्तेनेतितत्तीयाश्रुत्या वायोरादित्यपूर्वत्वावगमादिति सूत्रे तु वायुप
दद्देवलोकपूर्वकवायुपरमिति स्थितं ॥ एकोपीत किंचि ॥ रग्नेरनंतरं पठितस्य वायोः स्थानमुक्तं वाय्वनंतरप
ठितस्य वरुणस्यार्चिरादिमार्गे स्थानमाह ॥ तडितोधिवरुणः संबंधात् ॥ ७ ॥ पठितो वरुणादिमार्गपर्वत्वेन
संबध्यते न वेति संदेहे विशेषो हरिस्सादिपंचम्यार्चिरादीनां क्रमेण मार्गपर्वत्व यावद्ब्रह्मा द्वारादिव स्थानविशेषश्रु
त्यभावादलब्धस्थानो वरुणादिर्न संबध्यत इति प्राप्ते सिद्धांतमाह ॥ आदित्सादिति ॥ अपां विद्युत्सार्यत्वेन सं
बंधेमानमाह ॥ विद्योतत इति ॥ वरुणस्याप्सु द्वारा विद्युत्संबंधाद्यागंतुकानामंते निवेश इति न्यायाच्च विद्युद
नंतर्ये सति यथापाठमिंद्रप्रजापत्योः क्रम इत्यर्थः ॥ एवमेवार्चिरादीनां क्रमं निरूप्य स्वरूपं निरूपयति ॥ ७ ॥ आ
तिवाहिकास्तल्लिंगात् ॥ ७ ॥ चिन्हनिर्देशात्सौम्यालोकशब्दाच्चेतत्त्वलिंगाच्च संशयः ॥ आद्यपक्षद्वयं पूर्वपक्षः
अर्चिरादयो विद्युदंताश्चेतनानेतारश्चामानवपुरुषेण नेत्रा सहपठितत्वादिति सिद्धांतयति ॥ एवमित्यादिना ॥
यथाश्रुतामानवस्यास्तु नेतृत्वं नार्चिरादीनामिति शंकते ॥ तद्वचनमिति ॥ पुरुषस्यामानवत्वं नेतृत्वं चेद्युक्तमप
रत्वे वाक्यभेदः स्यादतोर्चिरादिपदैर्नेतार एव मानवाः प्रकृताः प्रकरणबलाद्विद्युदनंतरं मानवस्य नेतृत्वं प्राप्तौ प्र
करणप्राप्तनेतृत्वानुवादेनामानवत्वमेकमेव प्रतिपाद्यत इति वक्तव्यमित्याह ॥ नेति ॥ नेतृप्रकरणानंगीकारे त्व
मानवः पुरुषो गमयतीति वाक्याभिधेयत्वमानवत्ववन्नेतृत्वस्याप्यप्राप्तेति भावः ॥ नेतृत्वानुवादलिंगस्यानुग्रा
हकन्यायपुरःसरं गृह्णाति ॥ नन्विति ॥ यद्यनेतारोचेतना एवार्चिरादयः तर्हि मार्गतद्वंत्रोरूपयोरपि व्यामोहा
दत्तत्वादूर्ध्वगतिर्न स्यादतः स्वयमप्रयत्नस्य न्यः चेतनान्तरेण नेय इति लौकिकन्यायानुग्रहात्तल्लिङ्गः नेतृत्वसिद्ध
रुक्तलिंगं न्यायेनोपेतमिति सूत्रार्थः ॥ पूर्वपक्षद्वयं दूषयति ॥ अनवस्थितत्वादित्यादिना ॥ अर्चिरहरादिनामात्व

वे

सि

१२

567

रलादश्च्यादीम तस्य प्रतीक्षा नास्ती मुक्तत्वाच्चन मार्गचिन्हत्वं भोग्यत्वं वा देवतानां स्थिरत्वदोषो नास्तीत्यर्थः॥
पन्नूपदेशस्यासारस्याच्चिन्हत्वं भवतीति तत्राह॥ अर्चिविहा हिरिति॥ चिन्हत्वनेतत्वसंशयाच्च वाक्यशेषान्निर्णय
शूसाह॥ अपि चेति॥ यदुक्तं लोकशब्दाद्भोग्यत्वमिति तन्नेत्याह॥ सपिंडतेति॥ सुत्रां तरंगच्छतीति॥ कथं पुनरिति॥
अमानवो विद्युल्लोकमागतो वैद्युतस्तेनेत्यर्थः॥ श्रुतौ तु वैद्युताल्लोकादित्यर्थः॥ श्रुसावरुणादीनां नेतृत्वाभा
वेप्यनुग्राहकत्वेन मार्गोत र्षीवृत्तिभावः॥ एवं मार्गं निरूप्य गंतव्यं चिंतयति॥ कार्यं बादरिरस्य गत्युपपत्तेः॥६॥
परब्रह्म गंतव्यमिति पूर्वपक्षे मार्गस्य मुक्त्यर्थता कार्यं ब्रह्मेति सिद्धांते भोगार्थतेति मत्वा प्रथमं सिद्धांतमाह॥ त
त्रकार्यमेवेति॥ सर्वगतस्यापि प्रदेशांतरविशिष्टत्वेनाकाशस्य गंतव्यत्वं दृष्टं ब्रह्मणस्तु प्रसक्तो त्रकथमपि
गंतव्यतेत्यर्थः॥ ब्रह्मलोके स्थितिं न हु वचनं लोकशब्दो धारसप्तमीश्रुतिभिर्गंतव्यस्य परस्मात् व्यावर्तितत्वा
च्चन परं गंतव्यमित्याह॥ विशेषितत्वाच्चेति॥ परब्रह्मणि भोग्योपचारा द्वौणी लोकश्रुतिरित्यर्थः॥ नपुंसकब्र
ह्मशब्देन कारणवाचिना कार्यं लक्ष्यते गंतव्यत्वन्यायोपेत बहुवचनाद्यनेकश्रुत्यनुग्रहाय न चानावृत्तिलिंगात् सर सु
गंतव्यता क्रममुक्त्याल्लिंगस्यान्यथासिद्धेरिति भावः॥ प्रति संचरो महाप्रलयः॥ एवं सिद्धांतमुक्त्वा तेन निरस्तं पूर्व
पक्षमाह॥ कं पुनरित्यादिना॥ दहरविद्यायां कठवल्लीषु परब्रह्मप्रकरणे च तयोर्ध्वमायन्नितिगतिर्दर्शिता॥ एवं
ब्रह्मश्रुसमन्तत्वलिंगाभ्यां प्रकरणाच्च परविषया गतिरित्युक्तं॥ संप्रतिप्रजापतेः सभां वेश्म प्रपद्ये इति उपा
सकस्य मरणकाले कार्यप्राप्तिसंकल्पश्रुतेर्न परं गंतव्यमिति शंकां निरस्यति॥ न च कार्ये इति॥ परस्य प्रकृतत्वा
ख्यशःपदस्य परमात्मनामत्वप्रसिध्या यशःपदेनात्मनोक्तेः यशो आत्मा ब्राह्मणानामहं भवामि तथा राज्ञां य
शो विशां प्रपद्ये इति सार्वात्म्यलिंगाच्च परप्राप्तिसंकल्प एवायमित्यर्थः॥ अस्तु वेश्म प्रतिपत्ती छापरब्रह्मविषया तथा
पि साकथं गतिपूर्विका स्यादित्यत आह॥ सा चेति॥ तत्र ब्रह्मलोके विभ्या ही नैरे पराजिता पूरस्ति ब्रह्मणो हिरण्मग

सो

१२

र्भस्यतेनैव प्रभुणा विमितं निर्मितं हिरण्मयं वेश्माऽस्ति तत्प्रतिपद्यते विद्वानिति दहरविद्यायां गतिपूर्विका वेश्मप्राप्ति
रुक्ता तेन परब्रह्मण्यपि वेश्मप्रतिशब्दसामान्याद्गतिपूर्वकत्वं तस्याः सिध्यतीत्यर्थः ॥ किंच पठगताविति धातु
पाठाद्वेश्मप्रतिपद्यत इति अत्र मार्गापेक्षा भातीत्याह ॥ पदेरपीति ॥ पूर्वपक्षमुपसंहरति ॥ तस्मादिति ॥ आचार्य
वसिद्धांतपक्ष इति दर्शयितुमुपक्रमते ॥ ताविति ॥ ब्रह्मशब्दमुख्यत्वादिहेतुनाम्ना भासत्वं स्फुटयति ॥ नहीति ॥ ग
न्तव्यत्वस्य ब्रह्मणो लोके छिति बहुवचनादेः संकल्पादेव गंधर्वादियत्नोगश्रुतेश्च परब्रह्मण्यसंभवान्मुख्यार्थस्या
गत इत्यर्थः ॥ यत्तु पूर्वतदुक्तं सत्यकाम परं चापरं ब्रह्म सादिश्रुतिषु प्रयोगसाम्याद्ब्रह्मशब्द उभयत्र रूढ इति तयामु
ख्य एव तथापि पूर्णे परस्मिन्नेव प्रवाहस्य निरतिशयमहत्त्वस्य लाभादपरब्रह्मण्यमुख्य इत्यंगीकृतमिति म
न्तव्यं ॥ यदुक्तं कठवल्लीषु प्रकरणबलाद्गतिः परविषयेति तत्राह ॥ परेति ॥ यथा विद्यासंबद्धेषु मंत्रास्तुत्य
र्थं तदसंबद्धं नाड्यंतरकीर्तनं तथा परविद्यास्तुत्यर्थं तत्प्रकरणे पापरविद्याश्रयगतिकीर्तनं युज्यते गति
विनैव हि परविद्या निरतिशयफला तस्या त्वपरविद्याफलं गतिसाध्यमिति अर्थवतीति स्तुतिलाभादित्यर्थः ॥
यदप्युक्तं प्राप्तिसंकल्पोऽपि प्रकृतपरविषय इति तत्रेत्याह ॥ प्रजापतेरिति ॥ प्रजापतिसभां वेश्म श्रुतिर्भिन्न
संघात्मकवाक्येन न च प्रकरणं बाध्यं ॥ यशोऽहमिति सार्वात्म्यं तूपासनार्थम परब्रह्मण्यपि युज्यत इत्यर्थः ॥
स्वपक्षमुक्त्वा परमतं दूषयति ॥ केचिदित्यादिना ॥ सर्वगतस्य स्वात्मभूतस्यापि ब्रह्मणः संसारदेशाद्देशां
तरेण तत्कोशाद्दकाशांतरेण विशिष्टतया गंतव्यत्वं स्यादिति पृथिवीवयोद्घाताभ्यां शंकते ॥ नन्विति ॥
यत्नं विनैव प्राप्तत्वमनुपपन्नं ॥ अवस्थातद्वतोरभेदात्स्वात्मभूतत्वं ॥ ननु युक्तं वयसोः प्राप्तयोरपि देशांत
रकालांतरविशिष्टत्वेन गंतव्यत्वं तयोर्गंतृभिन्नत्वात् ब्रह्मणस्तु गंतृभिन्नस्य कथं गंतव्यत्वं तत्राह ॥ सर्व
शक्तीति ॥ यामप्राप्तः सा न गंतव्या यत्र गंतव्यं देशांतरं तत्र प्राप्तमिति कुतः प्राप्तस्य गंतव्यता ॥ वयसोपि

१२

509

कथंचिदपिर

कालांतरेपिव्यक्तिमात्रेन गंतव्यत्वमितिवस्तुस्थितिः॥ अंगीकृत्य सविशेषत्वपक्षेगंतव्यतांपरब्रह्मणोदेश-
कालवैशिष्ट्याभावान्नगंतव्यतेत्याह॥ नेत्यादिना॥ अनादिमायया ब्रह्मणि साध्यासस्य तिः दृश्यविशेषस्य ह
शिकल्पितत्वात् दृग्आत्मनोनिर्विशेषत्वेतिन्यायः सगुणमेवब्रह्मत्वस्वात्मापेक्षया परंगतव्यं निर्विशेषत्वं तु ना
स्त्येवेति शंकते॥ जगदुत्पत्तीति॥ किं निर्विशेषस्यासत्वं मानाभावात् सविशेषश्रुतिविरोधाद्वानाद्यइत्याह॥
नेति॥ द्वितीयं शंकते॥ उक्तस्यादीति॥ सविशेषश्रुतीनां निर्विशेषश्रुतिशेषत्वान्न विरोधइत्याह॥ नेति॥
निर्विशेषश्रुतीनामेव सविशेषश्रुतिशेषत्वं किं नस्यादित्याह॥ कस्मादिति॥ तासां स्वार्थे फलवत्वेन निराकांक्ष
त्वादितरेषितां विशेषश्रुतीनां त्वफलत्वान्निषेध्यविशेषसमर्पणादिद्वारेण शेषत्वफलवत्संनिधावफलंतदंगमि
तिन्यायादित्याह॥ उच्यतइत्यादिना॥ नकेवलंन्यायादेषताकिंतुश्रुत्यापीत्याह॥ प्रसक्षादिति॥ तत्र मूलकार
णेब्रह्मण्यतत्त्वेजगदात्मकंकार्यमुक्तत्वाभिसुपक्रम्यतेन शुंगेन सन्मूलमन्विच्छेत्युपसंहारे सत्तेएवज्ञे
यत्वमुक्तं छांदोग्ये तथा ते त्तिरीयकेपि जगज्जन्माद्यनुवादेन ब्रह्मणएवज्ञेयत्वंदर्शितमतः सविशेषश्रुतीनां
श्रुत्यैव निर्विशेषधीशेषताभातीत्यर्थः॥ एवं ब्रह्मणो निर्विशेषत्वाच्च गंतव्यतेतिफलितमाह॥ एवमिति॥
स्पष्टनिषेधाच्चपरस्य नगंतव्यतेत्याह॥ नतस्येति॥ एवं गंतव्यालोचनयागतिंनिरस्यगंत्रालोचनयापि
निरस्यति॥ गतिकल्पनायां चेत्यादिना॥ भेदाभेदेनद्वौकल्पावसंतभेदस्तृतीयः कल्पः॥ नन्वासंताभेदक
ल्पः किमिति नोक्तस्तत्राह॥ असंतेपीति॥ कल्पत्रयेकिं दूषणमितिपृच्छति॥ यद्येवमिति॥ कल्पद्वयेपि दोषांत
रमाह॥ विकारावयवपक्षयोश्चेति॥ विकारावयवरूपजीवविशिष्टस्य ब्रह्मणः स्थिरत्वान्न जीवोनागत्यागती
नस्यातां॥ नह्यचलातिस्थूलपाषाणस्थयोर्मंडूकपाषाणावयवयोश्चलनमस्तीत्यर्थः॥ अस्माकंतत्त्वोनात्
कल्पितोपाधिक्षिर्गत्यागतिविभ्रमइतिभावः॥ तीयकल्पमनूद्यविकल्प्यदूषयति॥ अथेत्यादिना॥ अभेद

ति

२

श्रुतिविरोधरूपो दोषो मम नास्तीति भेदाभेदवाद्याह ॥ विकारावयवयोरिति ॥ भिन्नयोरभेदो मुख्यो न युक्तः विरोधा
दिति परिहरति ॥ नेति ॥ किंच पक्षत्रयमप्ययुक्तं संसारित्वस्य तात्त्विकजीवस्वभावस्य नाशे जीवस्वरूपनाशप्रसं
गात् ॥ न चास्माभिरिव त्वयाप्यब्रह्मत्वं जीवस्य तात्त्विकरूपमंगीकृतं यदस्य संसारनाशेऽपि न नश्येदित्याह ॥ सर्वे
ष्विति ॥ ननु किं ब्रह्मत्वेन संसाराभावः किं वा मोक्षः स च कर्माभावमात्रेण सेत्स्यतीति कर्मजडानां मतमुद्घाटयन्नि
रस्यति ॥ यत्त्विति सादिना ॥ एवं वदतां मोक्षहेतुरित्यस्मिन्नर्थे मानाभावादित्यर्थः ॥ तर्क एव मानमिति मत आह ॥ न चैतत्त
र्कयितुमिति ॥ ननु तदप्येतत्तर्कमात्रमेकस्मिन् जन्मन्यनेकविधफलानां कर्मणां भोगायोगाद् दृष्टवशिष्टक
र्मजन्मान्तरस्य निमित्तमिति साशंक्य तत्र मानमाह ॥ कर्मशेषसद्भावसिद्धिश्रुतेति ॥ संतनारब्धफलानि पुण्य
पापानि तेषां नित्याद्यनुष्ठानेन क्षयान्न जन्मान्तरमिति शंकते ॥ स्यादेतदिति ॥ पुण्येन पुण्यस्य न नाशः अविरो
धादन्यथातिप्रसंगात् पापस्यापि सर्वोत्तनापुण्येन नाशे प्रमाणं नास्तीति संचितपुण्यपापाभ्यां जन्मान्तरं दुर्वारमित्या
ह ॥ तन्नेत्यादिना क्रियमाणैर्नित्यादिनापि ॥ जन्म स्यात्कर्मणा पितृलोकद्यस्य विशेषश्रुतेः ॥ स्मृतेश्चेत्याह ॥ न च
नित्येति ॥ प्रसवापनिरासार्थं नित्याध्याचारस्समनुपश्चाद् निष्पतत इति स्मृत्वर्थं तः ॥ तद्यथेति ॥ निमित्तेऽप
शोपिते सतीत्यर्थः ॥ तथापि काम्यादिकर्मासत्तानिश्चयो नास्तीति मत आह ॥ संशयितव्यमिति ॥ ज्ञानं विनादे
हपाते मोक्ष एवेति निश्चयाला[illegible]साद्वत्सक्षपक्षतिरिति भावः ॥ अब्रह्मभिन्नस्य जीवस्य कर्तृत्वादिस्वभावस्य
मोक्षोऽपि न युक्त इत्याह ॥ न चेति ॥ कर्तृत्वादिरूपं कार्यं न स्वभावः किं तु तच्छक्तिरिति शंकते ॥ स्यादेतदिति ॥
कार्यगम्याया शक्तेः कार्यस्य संतानुसादसत्वमयुक्तम् अतः शक्तिसत्त्वे तद्विषयस्य कार्यस्य दृष्टदेशकालादि
निमित्तानां चाल्पनाशक्ति ह्यानित्स संबद्धत्वान्मोक्षो न स्यादिति परिहरति ॥ न चेत्यादिना ॥ मोक्षासिध्यर्थं

९३ गा श्री ९३

जीवस्य ब्रह्मत्वांगीकारे संसारानुपपत्तिमाशंक्याज्ञानात्तदुपपत्तिमसकृदुक्तां स्मारयति ॥ परस्मादित्यादिना ॥
प्रासंगिकं परिहृत्य परमप्रकृतमुपसंहरति ॥ तदेवमिति ॥ ननु परविद्यायामप्याप्नोतिपदेन गतिश्रुतेस्तत्र
आह ॥ ब्रह्मविदाप्नोतीति वैफल्याच्च गतेर्न परविषयत्वमित्याह ॥ अपि चेति ॥ अनुचिंतनपक्षं प्रत्याह ॥ न च
सिद्धेति ॥ तत्कथं तर्हि केश्चित्परविषयत्वं गतेरुक्तमित्याशंक्याभ्रांतैरित्याह ॥ तत्र परापरेति ॥ प्रश्नपूर्वकं प
रापरब्रह्मविभागं वदन्परब्रह्मणि गतेरर्थवत्त्वमाह ॥ किं देहस्येत्यादिना ॥ व्यापिनो जीवस्य कथं गतिस्तत्रा
ह ॥ सर्वगतत्वेपीति ॥ एवं गंतव्यं निरूप्य गंतृलिंगं निर्धारयति ॥ अप्रतीकालंबनात् ॥ स एतान्गमयति ब्रह्म गम
यतीति सविशेषश्रुतेस्तत्क्रतुन्यायाच्च संशयमाह ॥ इदमिति ॥ अनियमाधिकरणे तद्विदोन्यत्र सर्वोपास
कानां मार्गोपसंहार उक्तः ॥ इदानीमप्रतीकोपासकानामेव मार्गो न सर्वेषां विकारोपासकानामपि तु तत्प
र्याप्तावोक्तोपूर्वोक्तविरोधः स्यात्तस्मादुपासकमात्रस्योत्तरमार्गसिद्धिरिति पूर्वपक्षफलं सिद्धांते तु यथा
भावसिद्धिः ॥ अदोषादिति सूत्रे पदच्छेदः अविरोधादित्यर्थः ॥ अनियमः सर्वेषामिति सूत्रे सर्वशब्दस्य
प्रतीकोपासकान्यपरत्वादिति भावः यद्यपि प्रतीकध्यायिनां पितृयाणात्तृतीयस्थानयोरप्रवेशादर्चिरा
दिमार्गो वाच्यस्तथापि तेषां विद्युत्पर्यंतमेव गमनमस्तु न ब्रह्मप्राप्तिः ब्रह्मक्रतुत्वाभावात् यो यत्नु सा
ध्ययति स तत्प्राप्नोतीति ननु प्राणादिप्रतीकं ब्रह्मत्वेन ध्यायिनामप्यस्ति ब्रह्मोपासकत्वेन ब्रह्मप्रा
प्तिरित्यत आह प्रतीकेति ॥ तत्क्रतुन्यायः श्रुतमूलः प्रतीकेषु च नामादिषु ध्येयेषु ब्रह्मणो गुणत्वान्न
ब्रह्मध्यायित्वमस्ति अस्य च न्यायस्य पंचाग्निविद्यायामपवादात्तस्य वचनाद्बाध इष्ट इति सू
त्रभाष्यार्थः ॥ किं च प्रतीकतारतम्येन फलतारतम्यश्रुतेन प्रतीकध्यायिनो ब्रह्मप्राप्तिरित्याह ॥ विशेषं
चेति तस्मादसति वचने ब्रह्मध्यायिन एव ब्रह्म गंतार इति सिद्धं ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचा

१४

यश्रीमद्गोविंदानंदभगवत्कृतौ भाष्यरत्नप्रभायां चतुर्थाध्यायस्य तृतीयः पादः समाप्तः॥ ॥पूर्वपा
दे ब्रह्मोपासकानां कार्यब्रह्मप्राप्तिरुक्ता संप्रति तेषामैश्वर्यविशेषं ब्राह्मलौकिकं पादस्योत्तरार्धे
नप्रपंचयिष्यन्नादावस्य हितपरविद्याप्राप्यं निर्विशेषब्रह्मभावमाह॥ संपद्याविर्भावः स्वेन
शब्दात्॥ ॥निर्गुणविद्याफलवाक्यमुदाहृत्य स्वशब्दस्य स्वीयागंतुकरूपस्वात्मरूपवाचित्वा
भ्यां संशयमाह एवमिति पूर्वपक्षे मोक्षस्य स्वर्गादविशेषः सिद्धांते विशेष इति फलं तत्र मोक्षे
आगंतुकः फलत्वात् स्वर्गवदिति न्यायोपेतयाभिनिष्पत्तिश्रुत्या पूर्वपक्षमाह किमित्यादिना स्व
शब्दश्रुतिबाधितो न्यायः अभिनिष्पत्ति साक्षात्कारवृत्त्यभिप्रायो बंधध्वंसजन्मनो उपचारि
कैवेति मत्वा सिद्धांतयति एवमिति मोक्षस्य फलत्वेन प्राप्तागंतुकत्वनिरासार्थः स्वशब्द इति यु
क्तं स्वीयवाचित्वेनानर्थकानुवादः स्यादित्यर्थः सूत्रांतरं गृह्णाति कः पुनरिति जागरिते व्याघ्रा
दिदेहधर्मवान्भवति स्वप्ने तु हत इव केनचिदपि च पुत्रादिनाशाद्रोदितीव भवति सुषुप्तौ
तु विशेषाज्ञानाद्विनष्ट इवेति बंधदशायां कलुषितात्मना तिष्ठति मोक्षे तु विगलिताखिलदुः
खपरीतः प्रद्योतमानपूर्णानंदात्मनावतिष्ठत इति माहात्म्यविशेष इत्यर्थः॥ कार्यगोचरमिति का
र्यज्योतिःप्राप्तमित्यर्थः॥ कार्यप्राप्तोऽपि मुक्तः किं न स्यादित्यत आह नेत्यानंतिवृत्त इति॥
अविभागेन दृष्टत्वात्॥ स्वरूपस्थितं मुक्तमुपजीव्य वादिविवादाद्ब्रह्मणो भेदः संशयः सत्यत्वे
तन्नेदं पूर्वपक्षमुक्त्वा सिद्धांतमाह इति यस्येति॥ ॥ब्राह्मेण जैमिनिः॥ उक्तं ब्रह्मस्वरूपं मुक्त
मुपजीव्य सद्भिर्संसेन सर्वज्ञत्वादिना धर्मेण युक्तोऽस्तिष्ठति उक्तधर्मस्य शशशृंगवद्दर्शिता

२८

513

सत्वाच्चिन्मात्रात्मनाऽस्तीति किंवा वस्तुतश्चिन्मात्रोऽपि जीवांतरव्यवहारदृष्ट्या कल्पितसर्वज्ञत्वादिमानि
ति मुनिविप्रतिपत्तेः संशये सत्याद्यं पूर्वपक्षमाह अत्युनेत्यादिना तत्र ब्रह्मलोकसिद्धिरेव फलं द्रष्टव्यं सो
ऽन्वेष्टव्य इति विध्यर्थेन उद्देश्य आत्मेत्यादिरूपन्यासः शब्दार्थः आदिपदादिद्विव्यपदेशाग्रहः तत्रा
ज्ञातज्ञापको विधिः तमाह तथा सत्येनेति सर्वज्ञ इत्यादि सर्वज्ञत्वव्यपदेशः अयं हि नोद्देशः विध्यभावान्ना
पि विधिः सिद्धवन्निर्देशादित्यर्थः सर्वज्ञत्वादिधर्माणां सत्यत्वं दूषयन्नसत्यतां सत्वपक्षमाह चिति
तन्मात्रेणेति चितिश्चैतन्यं शब्दज्ञानार्थोऽचिकल्पो ऽसत्तामसत्यत्वं ज्ञाः असंता संत इति यावत् अस्य
भावरूपधर्मिणामसत्वं भावधर्माणां तु सत्यत्वमिति योऽन्वयः तेषामप्यौपाधिकत्वादसत्वमित्याह
सत्यकामेति चिन्मात्रे मुक्ते लक्षणादिश्रुतिः कथं तत्राह अत एवेति सर्वधर्मनिषेधादेवेत्यर्थः सर्व
धर्माणामसत्यत्वमसत्तासत्वं चेति पक्षद्वयमयुक्तं अद्वैतश्रुतीनां सर्वज्ञत्वादिश्रुतिव्यवहारयोश्च बा
धापातादतस्तृतीयपक्षे श्रेयानिति सिद्धांतयति एवमपीति अत्र केचिन्मुक्तानि अखंडचिन्मात्र
ज्ञानान्मुक्तस्याज्ञानाभावात् कुतः अज्ञानिकधर्मयोग इति तदिष्टबोधनीयाः यईश्वरधर्मास्त एव
चिदात्मनि मुक्ते जीवांतरे व्यवह्रियत इति न च मूलाविद्यैक्यात्तन्नाशे कुतो जीवांतरमिति वाच्यं
न वयं तन्नाशे जीवांतरव्यवहारं ब्रूमः किंतु तदज्ञानाशो नाशारब्धाध्यात्मिकशरीरदृष्टयाभि
मानिनो मुक्तावंशतरोपाधिका जीवाव्यवहारिति ब्रूमः तर्हि नानाविद्यापक्ष एव कुतो ना
श्रीयते जीवभेदहृष्यावश्यकत्वादिति चेन्न प्रकृतिनानात्वं प्रतिजीवप्रपंचभेद इत्याद्यप्रामाणिका
निकार्थगौरवादिति सर्ववृद्धसंमत एकाविद्यापक्ष एव अंशभेदेन च बंधमुक्तिव्यवस्थेति संक्षे
पः एवं परविद्याफलमुक्त्वा मिदानीमपरविद्याफलं प्रपंचयति॥ ॥संकल्पादेव तु तच्छ्रुतेः॥ ॥

१५

एवकारस्यायोगान्ययोगव्यवच्छेदसाधारण्यात्संशयः ब्रह्मलोकंगतस्योपासकस्य संकल्पो यत्नां
तरसापेक्षः भोगसाधकोऽपि संकल्पत्वादस्मदादिसंकल्पवत् न चैवकारश्रुतिविरोधः संकल्पेन
सामग्र्या अयोगव्यवच्छेदेन सौलभ्यार्थत्वाय यत्नानंगीकारे भोगपुष्ट्यसिद्धेश्चेति पूर्वपक्षार्थः
अत्र लोकवृत्तानुसरणफलसिद्धान्ते तु विद्याबलेन संकल्पस्यैव भोगपुष्टिकरत्वसिद्धिरि
ति भेदः किंच यदि भोगसंकल्पानन्तरमपि यत्नान्तरसाध्यनिमित्तापेक्षा स्यात्तर्हि निमित्तप्रा
प्तेः प्राग्जातसंकल्पस्य वंध्यत्वं स्यात् भोगविलंबात् ततः सत्यसंकल्पश्रुतेर्न यत्नान्तरापेक्षेत्या
ह निमित्तान्तरमपि वृत्ति नन्वीश्वराधीनस्य विदुषः कथं संकल्पमात्राद्भोगसिद्धिस्तत्राह
अत एव चेति ईश्वरधर्म एव विदुष्याविर्भूत इति न संकल्पभंग इति भावः एवकारवन्मनसेति वि
शेषणेनान्ययोगव्यवच्छेदाद्देहाद्यभाव इति पूर्वपक्षयति॥ ॥अभावं बादरिराह ह्येवं॥ ॥अत्रा
पि वादिविवादात् संशयस्तत्र देहाद्यो न संत्येव सदा संत्येवेति च पक्षद्वयं पूर्वपक्षः कालभे
देनेच्छया संति चेति सिद्धान्तपक्षो द्रष्टव्यः फलं तु तत्र धृतेर्मुख्यत्वमिति विवेकः द्वादशाहवदिति
यः एवं विद्वांसस्सत्रमुपयंतीत्युपायापि चोदनागम्यत्वश्रुतेः द्वादशाहस्य सत्रत्वं आसतेतिचोपयं
तीति वा चोदितत्वं अत्र लक्षणमिति स्थितं तथा द्वादशाहेन प्रजाकामं याजयेदिति द्वितीयजातिचोद
नादर्शनान्नियतकर्तृकत्वावगमेन द्विरात्रादिवदहीनत्वं चेत्यर्थः॥ ॥प्रदीपवदावेशः॥ संक
ल्पमात्रान्निर्मितदेहानुपजीव्यत्वे भयमात्रेत्यादर्शनात् संशयमाह भावमिति अनादिलिंगशरी
रस्यैकस्मिन्नेव शरीरे भावान्निर्मितानेकदेहेषु भोगासिद्धिः पूर्वपक्षफलं सिद्धान्ते तत्सि
द्धिरिति मत्वा सूत्रं व्याचष्टे यथेत्यादिना स एकधा त्रिधा पंचधेत्यादिश्रुत्या विदुष एवानेकधा

१५

भावनुक्तः विद्वांस्तन्न देहो नापि चिन्मात्रः किंतु लिंगोपहितात्मा न च तस्य लिंगभेदं विना नेकत्वं संभवति
अतः श्रुतिबलादेकस्यैवानादिलिंगस्यानेकदेहेषु प्रवेशकृतभेद एष्टव्यः यथापि मूलप्रदीपस्य वर्त्यं
तरेषु सन्नदीपानां चासंतभेदोस्ति लिंगस्य तु देहभेदकृतो भेदो न स्वतः स्वतो लिंगभेदे तदुपहित
जीवभेदादनुसंधानानुपपत्तेः॥ आगंतुकानेकलिंगसृष्टौ च सत्कार्यवादापातात् तथापि प्रदीपल
जासैक्येन व्यक्तिष्वैक्यारोपात् दृष्टांतदार्ष्टांतिकयोः साम्यं द्रष्टव्यं तथा चश्रेयाः प्रदीपो नेकवर्त्तिषु प्रवि
शति एवं विद्यायोगबलादिद्धलिंगस्य व्यापित्वादनेकदेहेषु युगपदावेश इति सूत्रार्थः॥ विदुषो नेकधा
वं श्रुतमन्यथानुपपत्तेरित्याह न च तदिति इतरथा स्रष्टृत्वमेकदेहे स्याह न च निरात्मकानामिति यदनादि
मन एकदेहस्थं तदनुसारीणि देहांतरस्थानि मनांसि भवंतीति तदेवस्थानां तन्नियम्यत्वसंभवादित्
त्र योगशास्त्रसंमतिमाह एषैवेति निर्माणचित्तान्यस्मितामात्रात् प्रवृत्तिभेदे प्रयोजकं चित्तमेकम
नेकेषामिति हि भगवत्पतंजलिना सूत्रितं योगिनोभिमानमात्रान्निर्माणचित्तानि निर्माणदेहेषु भ
वंति तेषां नियामकं मनो दिचित्तमित्यर्थः उत्तरसूत्रव्यावर्त्यशंकामाह कथं पुनरिति सलिलवत्स
लिलः स्वच्छ इत्यर्थः न तु तद्द्वितीयमस्तीति क्वचित्सुषुप्तिमधिकृत्योक्तं तत्केनकमित्यादि क्वचिन्मु
क्तिं प्रकृत्योक्तं एवं विशेषज्ञानाभाववचनं सुषुप्तिमुक्त्योरन्यतरापेक्षं सगुणोपासकस्य भोगोक्तौ
न विरुध्यते भिन्नविषयत्वादित्याह स्वाप्ययेति तत्रैव श्रुतौ तदधिकारवशात् सुषुप्त्यादिप्रकरण
बलादुक्तं वचनानां अन्यतरापेक्षत्वमाविष्कृतं हि यतस्ततो वगम्यत इत्यर्थः अत्र संमुच्छानादिवाक्यं मु
क्तिविषयं यत्र सुप्त इति सुषुप्तिविषयमिति विभागः॥ ॥जगद्व्यापारवर्जं॥ ॥संकल्पादेवेत्यादि

५

१६

द्विनो नैश्वर्यस्य जगत्सृष्ट्यादिव्यतिरिक्तविषयत्वेनात्रापवादासंगतिरन्यथा दर्शिनासंज्ञायः ईश्वरनानात्वपूर्व
पक्षफलस्य सिद्धांते तु विद्यायोगिनामीश्वरनियम्यत्वादेकस्यैव नित्यसिद्धस्येश्वरस्यैव जगत्कर्तृत्वसिद्धिरि
ति विवेकः फलयात्सर्गस्य समयेयस्य क्षणपूर्वकं कर्तृत्वं श्रुतौ प्रकृतं यस्यैव नियंतृत्वादिजगद्व्यापारः न स्यु
पासकानां देहवियोगे त्राणं संभवति किंचेश्वरस्य नित्यसिद्धत्वाच्छब्दैकसमधिगम्यत्वाच्च जगत्स्रष्टृत्वं पुनर्
न तत्प्रसादलब्धसिद्धीनां नाजीवानामित्याह ॥ नित्यशब्दनिबंधनत्वाच्चेति ॥ किंच विदुषां साम्यप्राप्त्यान्येभियो विरोध
यः एकः प्रत्यन्येषां गुणत्वे त्वेक एवेश्वर इत्याह ॥ समनस्कत्वादिति ॥ अधिकारो नियोजयत्या [illegible] नित्याधिकारि
कः स चासौ मंडलस्थश्च तस्य प्राप्त्युक्तेरित्यर्थः ॥ मनसस्पतिः सूर्यमंडलांतःस्थः परमात्मा तत्सवितुर्वरेण्यं धि
यो यो नः प्रचोदयादिति श्रुतेः ॥ तथा च यदि परं निरंकुशः स्वाराज्यमुक्तं स्यात्तर्हीश्वरस्याग्रे प्राप्यत्वं न ब्रूयादतो
भोगे स्वाराज्यं न जगज्जन्मादीति भावः ॥ वाक्पतित्वादिकमपीश्वराधीनमित्याह ॥ तदनुसारेणेति ॥ उक्तं न्यायं काम
चारादिवाक्येष्वतिदिशति ॥ एवमिति ॥ ननु जगद्व्यापार उपासकप्राप्यः तदुपास्यनिष्ठत्वात् संकल्पसिध्यादिवदित्याशं
क्योपास्यस्थनिर्गुणस्वरूपे व्यभिचारमाह ॥ विकारावर्त्ति चेति ॥ निर्गुणस्वरूपे प्रमाणमाह ॥ दर्शयतश्चेति ॥ यथा
ज्ञानात्प्राप्यान्निर्गुणं न प्राप्तं तथा ध्यानाभावेन जगत्स्रष्टृत्वादि न प्राप्यते ध्यानाभावश्चाविषयत्वाभावादिति भावः ॥ नमू
पासकब्रह्मलोकगतमाह हिरण्यगर्भः मयारवण्येमा आपो अमृतरूपा मीयंते भुज्यंते तत्र सो लोको अमृतोदकलक्षण इत्यर्थः ॥
श्रुत्यंतरमाह ॥ तस्य यथेति ॥ भोगसाम्ये दृष्टांतो यथेत्यर्थः ॥ तेनोरस्तु शब्देनापरार्थः सलोकतामपीत्यन्वयः सायुज्यं समा
नदेहत्वं क्रमेण मुक्तिर्वीरा [illegible] मात्संस्तवयन् सूत्रकारं पूजयति ॥ भगवानिति ॥ भगवत्त्वं सर्वज्ञत्वं ॥ सूत्रद्वारा श्रीपा

द्विस

प्य

१६

517

णामारंस्थापनादानार्थं बादरायणपदेन बदरिकाश्रमवासो त्यानिखिलसर्वज्ञस्य परमगुरोर्नारायणस्य प्रसादं द्योत
नात् तत्प्रणीतशास्त्रे निरवद्यतामुद्योतयति ॥ सगुणविद्यायाः सातिशयफलत्वेपि ततो निर्गुणविद्याया नावृत्तिरित्या
ह ॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ ये ब्रह्मलोकं गच्छंति ते तं प्राप्य नावर्त्तंत इति संबंधः ॥ लोकं विशिनष्टि ॥ यस्मि
न्निति ॥ इतोस्मात् पृथिवीलोकात् ॥ तृतीयस्यां दिवि यो ब्रह्मलोकस्तस्मिन्नर इति ण्य इति चार्णवतुल्यौ सुधाह्रदावि
त्यर्थः ॥ ऐरमन्नमयं मदीयं मदकरं सरः सोमसवनः अमृतवर्षी ॥ यद्यपि तेषामिह न पुनरावृत्तिरिमं मानवमिति च श्रु
तिषु इह इमं इति विशेषणादस्मिन् कल्पे ब्रह्मलोकगतानां कल्पांतर आवृत्तिः प्रतीतिः तेथापीश्वरोपास्तिं विना पंचाग्निवि
द्याश्वमेधादिभिर्ब्रह्मचर्यादिसाधनैर्ये गतास्तेषां तत्त्वज्ञाननियमाभावादावृत्तिः स्यात् ये तु दहरादीश्वरोपास्त्या गता
स्तेषां सगुणविद्याफलक्षयेपि निरवग्रहेश्वरानुग्रहलब्धात्मज्ञानान्मुक्तिनियम इत्यभिप्रेत्याह ॥ अंते त्वापि
त्विति ॥ ननु अत्र सत्त्वरूता सगुणविदामेवानावृत्तिः क्रममुक्तो न निर्गुणविदां तत्र को हेतुरित्याशंक्य तेषामावृत्तिशंकाभा
वादित्याह ॥ सम्यगिति ॥ तदाश्रयणेनेति ॥ सगुणविदामावृत्तिप्राप्तौ सम्यग्दर्शनाश्रयणेनैवानावृत्तिः साधिता अतः स्व
तरएव सम्यग्दर्शिनामावृत्तिशंका नेति किमु वाच्यमित्यर्थः ॥ यत्राध्यायसमाप्तिस्तत्र पदमात्रस्याभ्यासो दृष्टितिः इह सूत्र
स्यैवाभ्यासो शास्त्रसमाप्तिं द्योतयितुमित्याह ॥ अनावृत्तिः शब्दादिति ॥ एवं समन्वयो तथा ब्रह्मात्मैक्यस्य वेदांतप्रमाणत्वमवधा
रितं ॥ वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकारविरोधः परिहृतः ॥ साधनसंपत्तिश्च दर्शिता ॥ तस्माद्विवेकादिसंपन्नस्य श्रव
णाद्यावृत्तिनिरस्तसमस्तबंधस्याखंडात्मसंबोधात् समूलबंधध्वंसे सत्यां से विस्मृतनिष्कलंकानंतस्वप्रकाशब्रह्मदानं दात्मे
नावस्थानमिति सिद्धं ॥ ७ ॥ ७ ॥ ७ ॥ श्री सांबायनमः ॥ ७ ॥ ७ ॥ ७ ॥ श्री सांबायनमः ॥ ७ ॥ ७ ॥ ७ ॥ श्री सांबायनमः ॥

सा

क

त्रि

१८

नानाविधग्रंथजातं वीक्ष्य सम्यग्यथामति ॥ शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥१॥ अंतर्यामी जगत्साक्षी स
र्वकर्त्ता रघूद्वहः ॥ अतोत्र दोषो रामस्य स्याच्चेषहेवैतिरासनात् ॥२॥ वक्षस्य दक्षिणांश्रव पार्श्वे करतलयुगुले कौस्तुभा
भांदपाञ्चसीतांको दंडदीक्षामभयवरयुतां वीक्ष्य रामांगसंगः ॥ स्वस्याः कस्यादितीयं हृदि कृतमननाभाष्यरत्नप्रभा
र्पी स्वात्मानंदैकलुब्धा रघुवरचरणांभोजयुग्मप्रपन्ना ॥३॥ छ ॥ छ ॥ छ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य
श्रीमद्गोपालसरस्वतीपूज्यपादशिष्य श्रीगोविंदानंदभगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्था
ध्यायस्य चतुर्थः पादः समाप्तः ॥ छ ॥ छ ॥ छ ॥ श्रीगणेशाय नमः ॥ छ ॥ छ ॥ छ ॥ ग्रंथसंख्या १०००० ॥ छ ॥ छ ॥ छ ॥ ॥
भाष्यरत्नप्रभानामेतां भास्करोपज्ञकारह ॥ प्रज्ञाचक्षुष्मदानंदावाप्तये तन्नमाम्यहं ॥१॥ पूर्णानंदाश्रमेणातिश्रमेणालि
खितं स्वतेः ॥ सदास्य स्याव लोकाय लोकापचमुमुक्षवे ॥२॥ तत्वबोधकृते चोरे रणे न संसनेकध्या ॥ विपदादिशरीरांता
कवंध्याः सहसोत्थिताः ॥१२॥ नविध्यति बोधस्म रास्तानूद्रष्टुं न्येतु बिभ्यति ॥ अ॰ तएव निलीयंते कुंतपो गादिगह्वरे ॥ ॥२॥
स्मृत्वात त्रापि तान्नैभीता बहिर्यांति मुहुर्मुहुः ॥ प्रविशंति पुनस्तत्र बधाक्लिश्यंति नीरवः ॥३॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

१८

१८

॥ चतुर्थाध्यायस्य समाप्तिः ॥

१८

520

[OrderDescription]
,CREATED=28.08.20 15:50
,TRANSFERRED=2020/08/28 at 17:21:10
,PAGES=517
,TYPE=STD
,NAME=S0003564
,Book Name=M-1565-RATNAPRABHA TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF

FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF

FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF

FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF

FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF

FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF
,FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF
,FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF

FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF
,FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF
,FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF
,FILE517=00000517.TIF
,